00012871

THE
ASIATIC SOCIETY OF BOMBAY
Town Hall, Bombay.

Digitized with financial assistance from the
Government of Maharashtra
on 18 July, 2018

MAJUMDÁRA'S SERIES.

BHATTI KÁVYA;

A POEM

ON THE ACTIONS OF RAMA.

PART II.

WITH THE COMMENTARIES

OF

JAYAMANGÁLA & BHARATAMALLIKA.

EDITED AT THE REQUEST OF BÁBU

BARADÁ PRÁSADÁ MAJUMDÁRA.

BY

JADU NÁTHA TARKARATNA

PUNDIT, SANSCRIT COLLEGE, CALCUTTA.

CALCUTTA.

PRINTED BY A. L. CHOWDHORY AT THE B. P. M's PRESS.

22-2 Jhama Pooker Lane.

1873.

Price 2-8As. মূল্য ২।৷০ আড়াইটাকা।

00012871

MAJUMDAR'S SERIES.

भट्टिकाव्यम्

जयमङ्गलरचितजयमङ्गलया

भरतमल्लिकनिर्म्मितसुग्धबोधिन्या टीकया च

समेतम् ।

द्वितीयखण्डम् ।

श्रीयुक्तबाबुवरदाप्रसादमजुमदारस्य प्रार्थनया

कलिकातासंस्कृतकालेजाध्यापकेन

श्रीयदुनाथतर्करत्नेन

संस्कृतम् ।

कलिकातराजधान्याम्

वि. पि. एम्स् यन्त्रे

श्रीअमृतलालचक्रवर्त्तिनेन यत्नेन मुद्रितम् ।

संवत् १९२९ ।

भट्टिकाव्यम्।

प्रथमः सर्गः।

अभूद्भूपो विबुधसखः परन्तपः श्रुतान्वितो दशरथ इत्युदाहृतः।
गुणैर्वरं भुवनहितच्छलेन यं सनातनः पितरमुपागमत्स्वयं ॥१॥

अभूदिति भूतसामान्ये लुङ् भूत इत्यर्थः। अन्यथा राज्ञश्चिरातीतत्वात्कवेः परोक्षत्वाच्च लिट् स्यात्। गातिस्थेति सिचोलुक्। भूसुवोस्तिङीति गुणप्रतिषेधः। नयतेर्डिच्चेति नयतेरौणादिक ऋन् नरो मनुष्यास्तान्ऋन् पातीति आतोऽनुपसर्गे कः आतो लोपः ऋपो राजा अत्यन्तधर्म्मविजयित्वाद्देवराजस्य मित्रभावादित्याह विबुधसख इति विबुध्यन्त इति विबुधा देवास्तेषामपि प्रधानत्वात्तेगुपधलक्षणः कः सामान्यशब्दोऽपि देवेषु वर्त्तमानोऽप्यर्थवशाच्छक्रे प्रयुक्तस्तस्य सखेति राजाहःसखिभ्यष्टच् विबुधसखः अनेन धर्म्मविजयित्वं दर्शयति विबुधसखत्वस्य धर्म्मकार्य्यत्वात्। धर्म्माविस्मरणसुरलोकविजयिनश्च ये राजानस्तेषां धर्म्मविजयी प्रधानं। परे शत्रवस्त्रिविधाः उच्छेदनीयोपपीडनीयकर्षणीयाः तत्र ये उपपीड़नीयकर्षणीयास्तान्परांस्तापयतीतिपरन्तपः द्विषत्परयोस्तापेरिति खच्। खचि ह्रस्वः अरुर्द्विषदजन्तस्येति मम् ऋप इत्यनेन समासान्ते टित्तिराख्याता परन्तप इति परन्तप इति। श्रूयन्त इति श्रुतानि वेदादीनि तैरन्वितः सम्बद्धः अन्यतोऽर्थतश्च गृहीतत्वात्। दशरथ इत्यनेन नाम्ना उदाहृतो लोके गीतः। गुण्यन्त अभ्यस्यन्त इति गुणाः गुण आमन्त्रण इति चौरादिकोऽदन्तः तस्मादकर्त्तरिचेत्यादिना घञ् येषामेरजाद्यत्वनामितिदर्शनं। येषां तन्नास्ति तेषामेरच् स्वरं प्रति विवादो न रूपं प्रति। गुणैरभिरामादिभिर्वरं श्रेष्ठं यं ऋपं पितरमुपागमदिति सम्बन्धः। व्रियत इति वरः यङ्घादिना कर्म्मण्यप्। केन हेतुना उपगतवांस्तं पितरं सनातन इत्यत आह भुवनहितच्छलेनेति भवन्ति उत्पद्यन्त इति भुवनानि भूर्भुवःस्वरिति त्रयो लोकाः। रजकृञ्त्यनुवर्त्तमाने भूसूधूसृजिभ्यस्कन्दसीत्यौणादिकः क्युन् वक्तव्यः

सवचमाङ्गावायामपि भवति तेभ्यो हिताः भुवनहिताः विष्णोर्दशावतारा: तद्ह त रामो द्रष्टव्यः तच्छलेन व्याजेन भुवनहितच्छलेन इदानीं रावणादिकष्टको-द्धरणात् तथाचोक्तं परित्राणाय साधूनां विनाशाय च दुष्कृतां । धर्मसं-स्थापनार्थाय सम्भवामि युगे युग इति । सनेत्यव्ययं सदार्थे वर्तते सना भवतीति सायं चिरमिति ञु ञु लौटचतु सनातनो विष्णुः उपागमत् उपजगाम लुदित्वादङ् । सत्त्वत्येषु राजसु गुणैर्वरत्वात् यं पितरं जनकमङ्गीकृतवान् सोऽभूदिति योज्यं । स्वयमित्यात्मना न कर्म्मणान्येन वा प्रेरित इत्यर्थः ॥ १ ॥ ज० म०

अभूदिति । दशरथ इतिनाम्ना उदाहृतःख्यातो नृपो राजा अभूत् स कथम्भूतः विबुधसखः विबुधानां देवानां सखा मित्रं अथवा विबुधस्य इन्द्रस्य सखा सामान्य-देवतावाचिनोऽपि विबुधशब्दस्य विशेषपरत्वात् प्राधान्याद्वा इन्द्रवाचित्वं एतेन विजयित्वं दर्शितं विबुधसखत्वं विनयेनापि भवतीति प्रतापं दर्शयन्नाह परान् शत्रून् तपतीति परन्तपः श्रुतान्वितः श्रूयन्ते गुरुभ्य इति श्रुतानि शास्त्राणि तैरन्वितो युक्तः अधीतशास्त्र इत्यर्थः सोऽध्यैष्ट वेदानिति वक्ष्यमाणश्लोके वेदाध्ययनस्य नित्यत्वज्ञापनार्थं पुनरुक्तेः श्रुतमत्र वेदादन्यच्छास्त्रं । इत्युदाहृत इत्यत्र केचिद्व्या-चक्षते इतं ज्ञानं विद्यतेऽस्येति इती ज्ञानी उदाहृतः ख्यातएव यद्वा इतिषु ज्ञानिषु उदाहृतः इतीति इणगतावित्यस्माद्भावे क्तः सर्व्वे गत्यर्था ज्ञानार्था इति इतं ज्ञानं ततोऽस्त्यर्थेनैकाजादिति इन् । सनातनो विष्णुर्भुवनहितच्छलेन यं रूपं स्वयमा-त्मना न पुनरन्यप्रकारेण पितरं उपागमत् अङ्गीकृतवान् सोऽभूदिति योज्यं भुव-नेति भुवनानां हितं रावणवधादिरूपं तदेव छलं व्याजस्तेन एतेन भुवनहित-मपदिश्य अस्य राज्ञो महत्त्वेनैव पुत्रत्वं प्राप्तवानित्यर्थः । अत्र हेतुगर्भविशेषणमाह गुणैर्धैर्य्यगाम्भीर्य्यादिभिर्वरं श्रेष्ठं । अभूदिति भूधातोरूपं अस्तेर्भूरिति-भ्वादेशः भवद्भूतभव्ये त्रिषु क्याद्या इति भूते टौ भूतसामान्यविवक्षायां लुङिति पाणिनीयाः कातन्त्रेऽपि सम्प्रतिवर्त्तमानेत्यत्र सम्प्रति यदृणं स्वस्वसंज्ञाकालव्यभि-चारसूचनार्थमिति वर्त्तमानमिश्रेण व्याख्यातं । शास्त्रस्य विवक्षाधीनत्वात्सत्यपि परोक्षत्वे भूतसामान्यविवक्षायामद्यतनीति पुरुषोत्तमेनाप्युक्तं अनद्यतनेऽपि वाक्य-गम्ये इति क्रमदीश्वरेणोक्तं तेन वोपदेवेन भूतसामान्य एव घ्यादय उक्ताः नस्व-नद्यतनाद्यतनपरोक्षत्वविभागेन घीटीथीध्वमिति अम् व्यां सिः भूस्थापिवेति सेर्लुक् सर्व्वविधिभ्यो लोपविधिर्बलवानिति न्यायाच्चादौ वसोरस्येतीम् सेर्लुकि लुकि न तलेत्यनेन णुर्घुङ्इति न णुः व्रजवदेत्यादिना त्रिष्व निषिद्धः पञ्चरः शिखेति शारत्वं ङिदपिदृदिति अपिदृश्य ङित्वं तेनादावपि णुर्घुङ्

सोऽध्यैष्ट वेदांस्त्रिदशानयष्ट पितॄनपारीत् सममंस्त बन्धून् ।
व्यजेष्ट षड्वर्गमरंस्त नीतौ समूलघातं न्यवधीद्रिपूंश्च ॥ २ ॥

इति न गुणः नृप इति नॄन्मनुष्यान् पाति रक्षतीति पालरक्षणे इत्यस्मात् आदृन्तत्वात् हनजनादिति डः टेर्लोपोडितीति टेर्लोपः विबुधेति विबुध्यन्ते इति विपूर्ब्बबुधधातोरिजुङन्तात् कगङ्चाप्रीजुङः क इति कः विबुधसख इति सख्युर्हरात्रः ष इति षः ययोर्लोप इति इकारलोपः परन्तप इति तप्तृदृजीत्यादौ नाम्नीत्यत्र चकाराध्याहारादसंज्ञायामपि खः नाम्नि त्रेदं सूत्रमितिचेत् कृत्तद्धितसमासानामभिधानं नियामकमित्युक्तेरसंज्ञायां खः खित्यव्याजरूप इति मनु दशरथ इति शब्देनोक्तत्वात् स्वर्थे वा स्वर्थसम्बुद्ध्यर्थ इति श्री दशरथो नृपोऽभूत् कीदृशः इत्युदाहृतः वक्ष्यमाणश्लोकैरुदाहरणतां प्राप्त इति केचित् गुणैरिति गुण्यन्ते अभ्यस्यन्ते इति गुणा गुणत्कमन्त्रे इत्यस्मात् षञ्जनडिति अल् अलोपोऽनाल्पितीलोपः हसाक्षोपोऽयितीत्यकारलोपः वरमिति वृञधातोः म्रियते योऽसाविति पूर्ब्बेणाल् गुर्घुङ इति गुः सनातन इति नित्यार्थात् सनाशब्दात् त्यवाद्यचिरेत्यादिनाट्टनः सनातनः शाश्वतकंसवैरिणोः शिवेऽपि चात्मन्यतिधौ सुनिश्चय इति विश्वः । उपागमदिति औगस्कृगत्यां लृदित्वात् शासलिद्युदितिङः हनगमेत्यादावङ्टित्युक्तेर्नोङ्लोपः । दशरथगुणानाह ॥ १ ॥ भ०

सोऽध्यैष्टेत्यादि ॥ क्षत्रियस्य धर्म्मोऽध्ययनं यजनं दानं शस्त्राजीवो भूतरक्षणं चेति उभयं नृपदत्वनेनोक्तं । भूतरक्षणे शस्त्रमङ्गं स नृपो वेदानध्यैष्ट अधीतवानिति स्वाध्याय उक्तः । वेदयन्ति ज्ञापयन्ति धर्म्माधर्म्मौविति वेदाः सामादयः घञादयश्च । इङोऽधिपूर्ब्बस्य विभाषा लुङ्लृङोरिति गाङ् विभाषयेति गाङभावपक्षे रूपं अजादित्वादाट । आटश्चेति वृद्धिः ङित्त्वादात्मनेपदमादेशप्रत्ययय रिति षत्वं ष्टुत्वञ्च । त्रिदशान्देवानयष्ट अग्निष्टोमादिभिः पूजितवान् यजनमुक्तम् ।

यजेः स्वरितजितदृतितङ् अनिक्समीपगत्वात् क्ङलःसिच्सिचाविति कित्वं न भवति । अनिगन्तत्वात् व्रश्चादिना षत्वं झलोझलीति सिचो लोपः । पितॄन्पारीत् आप्यायितवान् पितरमुद्दिश्य यजनं पॄपालनपूरणयोरित्यस्मात् पूरणार्थात् लुङिरूपं सिचि वृद्धिः इटईटीति सिचोलोपः अथवा पितॄनतार्षीदिति पाठः तृपप्रीणन इत्यस्मात् लुङि स्पृशमृशकृषतृपदृपां सिच्वक्तव्य इति चेः सिचि । अनुदात्तस्य चेत्यादिना अमभावपक्षे रूपं पितॄन् तर्पितवानित्यर्थः ।

सममंस्त बन्धून् मातृपित्रादिज्ञातीन् सम्मतवान् सदा दानमानादिभिः पूजितवानित्यर्थः मन्यतेरनुदात्तत्वात्तङ् । इदितो नुम् धातोरिति नुम् । इदितप्रतिषेधश्च येषां सिच इकार उच्चारणार्थो येषां त्वनुबन्धार्थः तेषां हनः सिजिति किति कारणात्तकारलोपाभावः । येषां तु इकार इत् तेषामिदित्त्वान्नकारलोपाभावः । आभ्यन्तरं शत्रुमजित्वा कथं परानप इत्याह व्यजेष्ट षड्वर्गमिति कामक्रोधलोभमोहमदमात्सर्याणां षण्णां वर्गः षड्वर्गः तमभिभूतवान् । विपूर्वस्य जयतेर्विपराभ्यांजेरितितङ् । अरंस्त नीतौ सामादिषु सन्ध्यादिषु च रतः नीतिमानित्यर्थः । समूलघातं न्यवधीत् समूलाघ्रिः-शेषानरीन् शत्रून्निहतवान् उच्छेदनीया ये शत्रवः तैर्विदं विधानं समूलोपपदाद्घ्नेः समूलाकृतेत्यादिना णमुल् । हो हन्तेरितिन्नत्वं हेद्धिः हनस्त इति तत्वं कषादिषु यथेत्यादिना यथाविध्यनुप्रयोगः अनुप्रयोगे लुङ्लिचेति बधादेशः । तस्माकारान्तत्वादुपदेशेऽनेकाच्त्वाद्दिङ्निषेधो न भवति । अतोलोपेऽतः तस्य स्थानिवद्भावादतोहलादेरिति विभाषाङ्गस्येति न भवति ॥ २ ॥ ज० म०

सोऽध्यैष्टेति ॥ स दशरथो वेदानध्यैष्ट अधीतवान् अधीङ्लक्ष्यनेत्रयः पमे इति ङित्वान्न स्यांसिरिति सिः धीटीथीष्वित्यमं कृत्वा आदिगेचोरिति णौ कृते भूयोऽभजादेरिति पुनरमं कृत्वा आदिगेचोरिति त्रिः क्लिलादिति षः ष्टुभिरिति तस्य टः वेदानिति वेद्यन्तीति वेदाः सामादयः घञादित्वादनु घञलनट् इति करणे वा घञ् त्रिदशान् देवान् अयष्ट अग्निष्टोमादिना पूजितवान् केचित्तु यजेरेव देवपूजावाचित्वात् त्रिदशानित्यस्य वैयर्थ्यापत्तेस्त्रिदशानयष्ट सङ्कृतवानित्याहुः वस्तुतस्तूपचारात् पूजामात्रवाचित्वेऽपि यजञौदेवाङ्र्दानसङ्गतावित्यत्र देवो देवनं क्रीड़ा अर्च्चेतिद्वन्द्वः देवस्यार्च्चेति तत्पुरुषोऽपि तात्पर्यभेदाद्वाक्यभेदो लौकिके न दोष इति केचित् शच्छ्राजिति जस्य षड् झसस्खादिति सेर्लोपः ष्टुभिरिति तस्य टः पितॄन् अपारीत् आप्यायितवान् ञिष्टलिऋो पालने पूर्त्तौ च्यांसिः रुदाद्यस्तीति ईम् वसोऽरस्येति इम् झसस्खादिति सेर्लोपः त्यलोपे त्यलक्षणमिति न्यायात् सेर्लोपेऽपि व्रजवदेत्यादिना त्रिः अताप्सीदिति क्वचित् पाठः तपधातुः प्रीणने सकर्मकः प्रीतिभावे त्वकर्मक इति क्षीरस्वामिप्रभृतयः । बन्धून् सममंस्त आदृतवान् मन्यौङ् बोधेसम्पूर्वोयमादरार्थ औदित्वादनिम् । षड्वर्गं कामक्रोधलोभमानमदहर्षरूपं व्यजेष्ट अभिभवतिस्म जिजये चकारात् अभिभवे विपराजीति मं नीतौ अरंस्त क्रीड़ितवान् रमूङ् जौ क्रीड़े अरीन् शत्रून् समूलघातं यथास्यात्तथा न्यवधीत् हतवान् समूलानां शत्रूणां घातः प्राणवियोगफलकव्यापारो यत्र हिंसाक्रियायां । अन्ये तु समूलशब्दात्

वसूनि तोयं घनवद्व्यकारीत्सहासनं गोत्रभिदाध्यवात्सीत् ।
न त्र्यम्बकादन्यमुपास्थिताऽसौ यशांसि सर्व्वेषुभृतां निरास्यत् ॥२॥

पराङ्गतार्थाङ्गत्वे चणमूविभक्त्यन्तत्वदनुप्रयोगश्चेत्याङ्गः । समूलान्निःशेषान् अरीन् प्राप्य हतवानित्यर्थः चणम्भावोऽव्ययं पूर्व्वकाले इत्यत्र वाशब्दस्य व्यवस्थावाचित्वात् योगविभागाद्वा अन्यत्रापि चणम् वा स्यादिति देवोदासचक्रवर्त्तिना व्याख्यातम् । अरीन् समूलान् हत्वा तत् प्राणत्यागानुकूलव्यापार कृतवानित्यर्थस्तेन पूर्व्वकालत्वमपीति दुर्गसिंहप्रभृतयः । एतेन पुनः सम्भानगङ्गया सदा सावधानत्वं सूचितम् । घातमिति हन्लेर्घञि चणम् वा हनस्तोडिति नस्य तड् खेर्हो घ इति हस्य घः ञ्णित्यन्ने जुङतोरिति त्रिः न्यबधीदिति हन्लौ हिंसागत्योः हनबधइतीति बधादेशेन बधान्तत्वाद्धसादेः सेम इत्यादौ बधवर्जनाद्धेः सेमत्वसूचनाद्वा वसोरसेतीम् हसादेः सेम इति बधवर्जनान्न त्रिः व्यजेष्ट षड्वर्गमित्यनेन मानसा रिपवः अरीन् न्यबधीदित्यनेन च वाह्याश्च निर्जिता अतः प्रत्नप इति प्रागुक्तमुपपादितम् ॥ २ ॥ भ०

वसूनीति ॥ वसूनि द्रव्याणि बन्धुव्यतिरेकेण बालादिभ्यो व्यकारीत् दत्तवान् विक्षिप्तवानिति वा । किरतेर्लुङि रूपं कः किमिवेत्यपेक्षायामाह तोयं घनवदिति तोयं उदकं घनो मेघः फलनिरपेक्षतया यथा विकिरति तद्वत् । एवं सम्यक्पालनादिन्द्रेण तुल्यत्वमाह सहासनं गोत्रभिदाध्यवात्सीदिति गोत्रभिदा इन्द्रेण सहासनं अध्यवात्सीत् अध्युषितवान् अनेनात्यन्तधर्म्मविजयित्वस्य फलं दर्शयति वस निवास इत्यस्य रूपं वसिः संप्रसारणेति वचनादिडभावः । अस्तिसिचइतीट् । वदव्रजेत्यादिना ड्डिः सस्यार्द्धधातुक इति तत्वं आसनमिति उपान्यङ्वस इति अधिकरणस्य कर्म्मसंज्ञा । त्रीणि अम्बकानि अक्षीणि यस्येति त्र्यम्बको महादेवः तस्मादन्यं नोपास्थित न पूजितवानित्यर्थः उपपूर्व्वात्तिष्ठतेः देवपूजासङ्गतिकरणपथिष्विति देवपूजायां तङ् स्थाघोरित्त्वेत्यादिना इत्वं कित्वं च । ह्रस्वादङ्गादिति सिचोलोपः । द्रुघून् बिभ्रतीति अन्येभ्योऽपि दृश्यत इति क्विप् द्रुघ्नतो धनुर्द्धराः सर्व्वेषां तेषां यशांसि निरास्यत् निरस्तवानित्यर्थः एतेनास्य असाधारणीकृतास्त्रत्वं दर्शितं । उपसर्गादस्यत्यूह्योर्वा वचनमिति वचनाद्यदा तङ् नास्ति तदा तिप् अस्यतीत्यादिनाच्लेरङ् अस्यतेस्थूक् ॥३॥ ज०म०

वसूनीति ॥ असौ दशरथो वसूनि धनानि व्यकारीत् दत्तवान् क इव घनवत् मेघ इव चुत् साम्ये इति चुत् चित्वादव्ययत्वं तोयमिति तोयमिव तोय-

पुण्यो महाब्रह्मसमूहजुष्टः सन्तर्पणो नाकसदां वरेण्यः ।
जज्वाल लोकस्थितये स राजा यथाऽध्वरे वह्निरभिप्रणीतः ॥४॥

तुल्यानि वस्तूनीत्यर्थः तोयशब्दोऽयं स्वप्राधान्यैकत्वादप्येकवचनः अनेकेषामपि वस्तूनामेकतुल्यतेत्याशयः कृणत्तीत्येभे सौ व्रजवदेति त्रिः गोत्रान् पर्व्वतान् भिनत्तीति गोत्रभिदिन्द्रः त्रासुसित्यादिना क्विप् । तेन सह एकमासनमध्यवात्सीत् वसौनिवासे अनिमृत्वात् व्रजवदेति त्रिः सत्स्वरे इति सस्य तः कर्म्मक्रिया इत्यादिना डस्य ढत्वं त्र्यम्बकात् महादेवादन्यं न उपास्थित न पूजितवान् मैत्राध्वसङ्गारार्धइति आराधनार्थे मं स्थादोर्डिरिति णुनिषेधश्च लोणि अम्बकानि नेत्राणि यस्येति विग्रहः द्यौर्भूमिरापस्तिस्रोऽम्बा यस्येति भारतम् । त्रयाणां लोकानामम्बः पितेत्यन्ये तिस्रोऽम्बाः शक्तयोऽस्येति केचित् अन्यारभ्येति पौ सर्व्वेषुभूतां सकलधनुर्द्धराणां यशांसि निरास्यत् निरस्तवान् ततोऽधिकत्वात् वक्त्रसख्यालिप इति ङः वच्यस्येति अस्यतेरस्थादेशः इषून् बाणान् बिभ्रतीति पूर्व्ववत् क्विप् स्वस्य तनू पितेति तनू ॥ २ ॥ भ०

पुण्य इति । पुनातीतिपुण्यः पूञोयत् णुक् हुस्वश्चेति औणादिको यत् । णुगागमश्च हुस्वश्च अत्यन्तपुण्यकरणाद्राजापि पुण्य इत्युच्यते । तन्मयत्वाद्राजा अग्निरपि पुण्यः पावनात्पुण्यः यागादिः पुण्यः तेन पुरुषः पूज्यते । महतां वेदविदां ब्रह्मणां ब्राह्मणानां समूहेन जुष्टः सेवितो राजा अग्निश्च ब्रह्मशब्दोऽत्र ब्राह्मणपर्य्यायः । नाके स्वर्गे सीदन्तीति सत्सुद्विषेत्यादिना क्विप् नाकसदो देवाः तेषां कर्म्मणि षष्ठी सन्तर्पयति प्रीणयतीति सन्तर्पणः सन्तर्पयतेः कृत्यल्युटो बहुलमिति कर्त्तरि ल्युट् राजा यागादिना तर्पयति अग्निरप्यग्निसुखत्वाद्देवानां वरेण्यः श्रेष्ठः राजा अग्निश्च इङ् एण्यः जज्वाल प्रदीप्तवान् लोकस्थितये मा भूल्लोकस्य स्थित्यतिक्रम इत्येवमर्थी अग्निरपि लोकस्य स्थितये ज्वलति । यथोक्तं । अग्नौ प्रास्ताऽऽहुतिः सम्यगादित्यमुपतिष्ठते आदित्याज्जायते वृष्टिर्वृष्टेरन्नं ततः प्रजा इति । अभिप्रणीत इत्यग्निविशेषणम् । आभिमुख्येन प्रणीत इति प्रादिसमासः उपसर्गादसमास इत्यादिना णत्वं मन्त्रेणाभिमुखीकृत इत्यर्थः । यथाऽध्वरे यागेऽभिप्रणीतो वह्निर्ज्वलति तथा राजापीत्यर्थः ॥ ४ ॥ ज०म०

पुण्यो महेति । स राजा लोकस्य स्थितये मर्य्यादायै जज्वाल दीप्तवान् प्रतापवान् बभूवेत्यर्थः यथा अध्वरे यज्ञे अभिप्रणीतो मन्त्रेण संस्कृतोऽग्निर्ज्वलति अग्निज्वलनमपि लोकस्थित्यर्थं स्यात् यदुक्तं अग्नौ प्रास्ताऽऽहुतिः सम्यगादित्य-

स पुण्यकीर्त्तिः शतमन्युकल्पो महेन्द्रलोकप्रतिमां सहद्भ्रा।
अध्यास्त सर्व्वर्त्तुसुखामयोध्यामध्यासितां ब्रह्मभिरिङ्गबोधैः॥ ५॥

सुपतिष्ठते। आदित्याज्जायते वृष्टिर्वृष्टेरन्नं ततः प्रजा इति उभयोर्विशेषण-माह पुण्यः पुनातीति पुण्यं धर्म्मः नान्यत्रेतिकृचेति सूत्रेणान्येऽपि दृश्यतः प्रयोगाः स्युरिति सूचितं तेन पूधातोर्डुण्ये टेर्लोपोडितीति टेर्लोपः पुण्ययोगात् पुण्यः अर्शादित्वादः। पुण्यं धर्म्मं मनोज्ञे च पावने च प्रयुज्यते। महतां ब्रह्मणां समूहेन जुष्टः सेवितस्तेन प्रीतो वा ब्रह्मा विरिञ्चिद्विजयोरिति विश्वः। ब्रह्मे तैले तथा मांसे वेदे ज्यौतिषिके द्विजे यात्रायां पथि निद्रायां महत् शब्दो न दीयत इति निषेधान्महता ब्रह्मसमूहेन जुष्ट इति वा विग्रहः। महांश्चासौ ब्रह्मसमूहजुष्टश्चेति वा यद्वा महद्ब्रह्म तपो येषां तेषां समूहेन जुष्टः। वेदस्तत्वं तपो ब्रह्म ब्रह्मा विप्रः प्रजापतिरित्यमरः। यद्वा अमहा अश्वेव विष्णोरिव महस्तेजो यस्यासावमहा इति पृथक् पदं। यद्वा मह्यते पूज्यतेऽसौ महाः स्त्रासुसिति कर्म्मण्यस्। यद्वा अमो रोगस्तं हन्तीत्यमहा तस्मिन् राजनि सति लोकानां व्याधिभयं नासीदित्यर्थः। आरोग्यमपि कविभिर्वर्ण्यते तथाच कालिदासः जनपदे न गदः पदमादधावभिभवः कुत एव समुद्भव इत्यग्नेर्व्याधि-हन्तृत्वमस्त्येव। शङीजि जुषन्नादि सेवे ईदित्वान्नेम् भीत्रीदितीम् निषेधः। नाके स्वर्गे सीदन्तीति नाकसदो देवाः पूर्ब्ववत् क्विप् तेषां सन्तर्पणः यज्ञनन्दीति घेऽनः ढवे लुतीति ढे घी सम्यक् तर्पणं यस्मादिति विद्यमानसम्बन्धे षष्ठीत्यन्ये। कं सुखं तद्विपरीतमकं नास्त्यस्मिन्निति नाकः शोकोऽनौवाञ्छसोरिति व्यवस्थित-विकल्पत्वान्नञोऽनादेशः। वरेण्योऽन्यापेक्षया श्रेष्ठः वृञधातोः श्रेष्ठार्थे नान्यत्रेतिकृचेत्यन्यत्रलृत्सूचनादेयः॥ ४॥ भ०

यत्रस्थो राज्यं चकार तां नगरीं दर्शयन्नाह। स पुण्येत्यादि। स्वामि-गुणपूर्ब्बका हि निवासस्य गुणा भवन्तीति प्रदर्शनार्थं पश्चात्तदभिधानं तथा चोक्तं। स तु यत्कोलस्तत्कीला अस्य प्रकृतयो भवन्तीति। स राजा पुण्यकीर्त्तिः पुण्याः पवित्राः कीर्त्तयो यस्य सः। शतमन्युकल्पइति प्रभावं दर्शयति ईषद-समाप्तौविधिकल्पः शतमन्युरिन्द्रः महेन्द्रलोकप्रतिमामयोध्यामिति योज्यं। प्रति-भीयते तुल्यते इति प्रतिमा आतश्चोपसर्ग इत्यङ्। महेन्द्रलोकेन प्रतिमा तुल्या इतीयेति योगविभागात्समासः अमरावतीमिवेत्यर्थः कया सहद्भ्रा सम्यगतिशयेन महद्भिः समृद्धिः प्रादिसमासः अध्यास्त अध्यासितवान् भूतसामान्ये लङ्। आस्ते-

निर्म्माणदक्षस्य समीहितेषु सीमेव पद्मासनकौशलस्य ।
अर्ङ्कस्फुरद्रत्नगभस्तिभिर्या स्थितावरुद्धेव पुरं मघोनः ॥ ६ ॥

रतुदात्तत्त्वात्तङ् अधिशीङ्त्यादिना अधिकरणस्य कर्म्मसंज्ञा सुखयतीति सुखा मचाद्यच् सुखहेतुत्वाद्वा सुखा । सर्व्वेषु ऋतुषु सुखेति सप्तमीति योगविभागात्समासः । अध्यासितां अध्युषितां ब्रह्मभिर्ब्राह्मणैरिङ्गबोधैः सर्व्वशास्त्रपरिज्ञानात् पटुबुद्धिभिरित्यर्थः दृन्भेर्निष्ठायामनुनासिकलोपः ॥ ५ ॥ज०म०

स पुरेति । स राजाऽयोध्यामध्यास्त अध्युवास कर्म्मक्रियेत्यादिना उस्य चटत्वं । जिलाषङ् उपवेशे घ्यां लुगङ्गोऽप्र इति शभोलुक् स किम्भूतः पुण्या शोभना कीर्त्तिर्यस्य स तथा । पुण्यं सुगन्धे सुक्ते पुण्यं शोभनमुच्यत इति शाश्वतः । शतं मन्यवो यस्या यस्य स शतमन्युरिन्द्रस्तस्यादीवदूनस्यादेर्द्वीपे इति कल्पः । अयोध्यां किम्भूतां सदृशा सम्पत्त्या महेन्द्रलोकेनामरावत्या प्रतिमा सादृश्यं यस्याः सा तां सर्व्वस्मिन्नृतुषु सुखयतीति मचादित्वादन् सुखहेतुत्वात् सर्व्वर्तुसुखां इङ्गबोधैर्दीप्तज्ञानैर्ब्राह्मणैरध्यासितां इन्धेः क्तौ इङ्गः बुधेर्धञि बोधः ॥ ५ ॥ म०

निर्म्माणेति । पद्मासनो ब्रह्मा पद्मासनं यस्येति कृत्वा तस्य कौशलं नैपुण्यमिति षष्ठीसमासः । तस्य पूरणगुणेत्यादिना न प्रतिषेधः तत्र विशिष्टा एव गुणाः रूपरसगन्धस्पर्शाः तद्विशेषाश्च शुक्लनीलाद्यः कटुकाम्लाद्यः सौरभ्यादयः शीतोष्णाद्यश्च गृह्यन्ते तत्र रूपादिभिः समासो भवत्येव । तत्स्थैश्च गुणैः षष्ठी समस्यते न तु तद्विशेषगुणैरिति वचनात् अन्यैस्तु समासप्रतिषेधः । एवञ्च कृत्वा मुनित्रयवचनमर्थवद्भवति तद्यथा । अधिकरणैतावत्वे च तदग्रियं संज्ञाप्रमाणत्वादिति पाणिनेः युगपद्वृत्यप्रतिदर्शनादिति रूपसामान्याद्वा इति वचनप्रामाण्यादिति चेदलोपप्रतिषेध इति कात्यायनस्य नकारग्रहणसामर्थ्यात् लोपो न भविष्यतीति किं पुनरत्रासक्तत्वमिति माघकारस्येति । तस्य सीमेव मर्य्यादेव अयोध्या ततो न कृष्टान्तरं शोभनमस्तीत्यर्थः । कीदृशस्य निर्म्माणदक्षस्य निर्म्मितिर्निर्म्माणं सृष्टिः तत्र दक्षस्य पटोः । क्व विषयेषु समीहितेषु सृष्टुमीप्सितेष्वित्यर्थः । अर्ङ्कोपरिष्टात् स्फुरद्रत्नगभस्तिभिः स्फुरन्तो ये रत्नानां गभस्तयो रश्मयः तैर्हासभूतैर्मघोन इन्द्रस्य पुरममरावतीं अवरुद्धेव स्थिता या तामध्यास्त मघवन् त्वन् उपन् इत्यौणादिकः त्रयुवमघोनामिति संप्रसारणं ॥ ६ ॥ ज० म०

सद्रत्नसुक्ताफलवज्रभाञ्जि विचित्रधातूनि सकाननानि ।
स्त्रीभिर्युतान्यप्सरसामिवौघैर्मेरोः शिरांसीव गृहाणि यस्यां ॥७॥

निर्म्माण इत्यादि ॥ ऊर्द्ध स्फुरन्तो ये रत्नानां गभस्तयो रश्मय स्तैर्भासभूतैर्म्मयेन इन्द्रस्य पुरं अवहस्येव निर्म्माणदक्षस्य विश्वकर्म्मणः समीहितेषु सम्यक् चेष्टितेषु या स्थापिता तामयोध्यामध्यास्तेति पूर्व्वेणान्वयः समुपसर्गेण बहुत्वेन च चेष्टाया आधिक्यं सूचितं । विश्वकर्म्मणा नेदृशी शोभना पुरी निर्म्मिता अत इमां विलोक्य ईदृक् पुरीनिर्म्माणे चेष्टा जातेत्यभिप्रायः । पद्ममेव आसनं यस्य स पद्मासनो ब्रह्मा तस्य कौशलस्य नैपुण्यस्य सीमा इव उत्तेजायां ब्रह्मणा नेदृशी शोभनान्या पुरी निर्म्मितेति भावः । अतः सुतरां विश्वकर्म्मण ईदृक् निर्म्माणे चेष्टावत्त्वं । यद्वा निर्म्माणदक्षस्य विश्वकर्म्मणः समीहितेषु निर्म्मितेषु सीमेवेतः परं शोभनं न निर्म्मितं इत्यभिप्रायः । किम्भूतस्य पद्मासनस्येव कौशलं यस्य यद्वा पद्मासनस्य कौशलं सौन्दर्य्यं यस्य स पद्मासनकौशलो ब्रह्मा तस्य समीहितेषु वाञ्छितेषु सीमेव तस्य किम्भूतस्य निर्म्माणदक्षस्य निर्म्माणचतुरस्य । यद्वा कौ पृथिव्यां शलते चलतीति कोशलः पचाद्यच् सरसिजमित्युदाहरता वोपदेवेन क्वचित् समासे विभक्तेर्नलुक इति सूचितं तेनात्र सप्तम्या अलुक् पद्मासनश्चासौ कौशलश्चेति कर्म्मधारयस्तस्य समीहितेषु सीमेव क्वचिद्विशेष्यः प्राक् प्रयुज्यते प्राग्भावस्य विवक्षाधीनत्वात् इति पद्मासनस्य प्राग्भावः कौशल इति विशेषणात् पृथिव्यां विहितसृष्टेर्नेदृशी सृष्टिरिति सूचितं अतएव पृथिव्यां प्रतियोग्यभावात् स्वर्गसुपस्थिता भवोनः किम्भूतस्य निर्म्माणदक्षस्य स्वपुरनिर्म्माणं दक्षते हन्तीति पचाद्यच् इमां पुरीं दृष्ट्वा स्वपुरीनिर्म्माणनिन्दकस्येत्यर्थः ॥६॥ भ०

सद्रत्नेति । सन्ति शोभनानि यानि रत्नादीनि तानि भजन्ते यानि गृहाणि तानि सद्रत्नसुक्ताफलवज्रभाञ्जि सुक्ताफलवज्रयोरत्नान्तर्भावेऽपि प्राधान्यख्यापनार्थं वचनं गोवलीवर्द्दन्यायाद्वा रत्नशब्देन मरकतपद्मरागवैदूर्य्यादयो गृह्यन्ते । सद्रत्नादियुञ्जोति पाठान्तरम् । युजेरसमासे इति प्रतिषेधो न भवति अनपुंसकविषयत्वात् नपुंसके तु ह्रस्वत्वस्य नुमोविधानात् । विचित्रधातूनि विचित्रा नानाप्रकारा धातवो मनःशिलादयो येषु गृहेषु सेवाविरचितचित्रकर्म्मत्वात् सकाननानि सौधानि स्त्रीभिर्युतानि अप्सरसामिवौघैः तत्रत्याभिः स्त्रीभिरप्सरोभिरिवेत्यर्थः । मेरोः शिरांसीव मेरोः शृङ्गाणीव एतद्विधानि

अन्तर्निविष्टोज्ज्वलरत्नभासो गवाक्षजालैरभिनिष्पतन्त्यः ।
हिमाद्रिटङ्कादिव भान्ति यस्यां गङ्गाम्बुपातप्रतिमा गृहेभ्यः ॥८॥

गृहाणि यस्यामयोध्यायां तामध्यास्त । गृहमिति नेहे क्लः तत्र गृहशब्दो वेश्मनि नपुंसकलिङ्गः तरस्यायिषु पुंलिङ्गो नित्यं बहुवचनान्तश्च ॥७॥ ज० म०

यस्यामयोध्यायां गृहाणि मेरोः शिरांसीव उभयविशेषणमाह । सद्रत्न-इत्यादि ॥ सन्ति शोभनानि रत्नानि पद्मरागादीनि मुक्ताफलानि मौक्तिकानि वज्राणि हीरकाणि च भजन्ते इति विण् अिण्वन्ते जुङ्तोरिति इट्विः मुक्ता-फलवज्राणां रत्नत्वेऽपि प्राधान्यात् प्राचुर्याद्वा पृथगुपादानं जातौ जातौ यदु-त्कृष्टं तद्धि रत्नं प्रचक्षते इत्यनुशासनात् । सद्रत्नानि शोभनमध्ये उत्कृष्टानी-त्यर्थः । युक्ष्वीति पाठे रत्नादीनां युक् योगो येषु त्वासुसिति किम् विचित्रा-धातवो येषु मनःशिलादिभिः कृतचित्रत्वात् सुमेरुशृङ्गेषु सहजत्वात् काननैः सह वर्त्तमानानि गृहसन्निधिविहितोद्यानात् मेरुशृङ्गेषु सहजत्वात् सहःसो-वेति विभाषया सहशब्दस्य सो बहुव्रीहौ अम्बरसामोर्धैरिव स्त्रीभिर्युतानि ओघशब्दादेकैकशोऽपि स्त्रीणाममम्बरःसमूहसादृश्येनातिसौन्दर्यं दर्शितं ओघो वृन्देऽम्भसां रये इत्यमरः ॥ ७ ॥ भ०

अन्तरित्यादि । अन्तः गृहमध्ये निविष्टानि निहितान्युज्ज्वलरत्नानि यानि तेषां भासो रश्मयः गृहेभ्यो गवाक्षजालैः अभिनिष्पतन्त्यः निर्गच्छन्त्यः यस्यां भान्ति तामध्यास्तेति योज्यं पर्वतस्य उन्नतप्रदेशशृङ्ग इत्युच्यते तस्मात् हिमवत्पर्व्व-तटङ्कादिव गङ्गाम्बुपातप्रतिमा गङ्गाजलप्रवाहतुल्याः स्वच्छत्वात् ॥८॥ ज०म०

अन्तरित्यादि ॥ यस्यामन्तर्मध्ये निविष्टानामर्पितानां उज्ज्वलानाहृद्दीप्तानां रत्नानां भासो दीप्तयो गवाक्षजालैर्वातायनसमूहै र्जालाकृतिगवाक्षैर्वा गृहेभ्यो-ऽभिनिष्पतन्त्यो निःसरन्त्यो भान्ति हिमाद्रेर्हिमालयस्य टङ्कात् पाषाणदारणात् विदीर्णप्रस्तरभागात् अभिनिष्पतन्त्यो गङ्गाम्बुपातप्रतिमा इव गङ्गाजलपतनच्छटा इव टङ्कः कपित्थभेदे स्यात् पाषाणदारणे इति विश्वः । गवामक्षीव गवाक्षः अक्ष्णोऽचक्षुषीति अः यद्योगेऽपि इतोकारलोपः । हिमप्राधान्यात् हिमस्याद्रिर्हिमाद्रिरिति षष्ठी समासः हिमेन युतोऽद्रिरिति वा अभिनिष्पतन्त्य इति नदन्तस्त्रीत्वस्यार्थे चेति सूत्रेण पदत्व-निषेधात् समासे लुप्तविभक्तिकस्य पदान्तत्वं ज्ञापकसिद्धं ज्ञापकसिद्धस्यानित्यत्वं तेन समासे लुप्तविभक्तिकस्य क्वचिदपदान्तत्वमपि तेन सेतुकखपफेवेति सूत्रेण

धर्म्याासु कामार्थयशस्करीषु मतासु लोकेऽधिगतासु काले ।
विद्यासु विद्वानिव सोऽभिरेमे पत्नीषु राजा तिसृषूत्तमासु ॥ ९ ॥

विसर्गसम्बन्धिसस्य क्षुतत्वात् क्विलादिति षत्वं स्यादितिन्तु वेमूदित्यादि सूत्रे निष्कुषदिति मूर्द्धन्यषनिर्देशात् सूचितं तेनात्र सेतुकखपफेवेति विसर्गस्य से क्षुते क्विलादिति षत्वं मनीषादित्वाद्वा सेतुकखपफेवेत्यत्र वाशब्दो व्यवस्थावाची तेनात्र नित्यं सकार इति बोध्यं ॥ ८ ॥ भ०

धर्म्याासिति ॥ धर्म्यादनपेतासु धर्म्यपथ्यर्थेत्यादिना यत् । कामार्थयशांसि कर्त्तुं शीलं यासां तासु । कृञोहेतुताच्छील्ये टः अतः कृकमीत्यादिना विसर्जनीयस्य सत्वं टित्त्वात् ङीप् मतासु पूजितासु लोके तासां प्रतीतत्वात् । अधिगतासु काले विवाहयोग्ये काले परिणीतासु सोऽभिरेमे स राजाऽभिरतवान् पत्नीषु पत्युर्नोयज्ञसंयोग इति नकारः । तिसृषु कौशल्याकैकेयीसुमित्रासु उत्तमाखिति सद्गारीगुणैः श्रेष्ठासु विद्याखिति विदन्ति आभिर्धर्म्यांधर्म्यांविति विद्या संज्ञायां समजेत्यादिना क्यप् । तिसृषु रूपगर्व्यजुरूप्यासु धर्म्याखित्यादिकं तुल्यम् । विद्वानिव यथा अधिगतविद्य इत्यर्थः विदेः शतृर्वसुः दीर्घङ्लङ्ग्यादि संयोगान्तलोपः तस्य राज्ञः पत्नीभिस्ताभिः सह रममाणस्य सुता नैवासन् ॥ ९ ॥ ज० भ०

धर्म्याासिति ॥ स राजा तिसृषु पत्नीषु अभिरेमे चिक्रीड तृफलेत्यादिना ऋकारस्यैवं खिलोपश्च यथा विद्वान् पण्डितो विद्यासु रमते वेत्तेःशतुः क्वसुर्भवति वाशब्दस्य व्यवस्थावाचित्वात् पाण्डित्यार्थे नित्यमिति बोध्यं: विद्नीति विद्याः शीव्रजयजेत्यादिना क्यप् उभयविशेषणमाह धर्म्याासु धर्म्यादनपेतासु ढधेकात् ष्णीकेत्यादिना ष्णः तेषां ष्णादीनां सेत्त्वमणित्त्वञ्च स्यात् अत्राणित्त्वं तेन णिन्नेन्द्रिरित्यादिना न द्रिः द्विन्नेति न ईप् कामयर्थं यशः कुर्व्वन्ति इति कृकुष्ट इति टः । हेत्वाद्यर्थे ट इति परे रमते यशस्करी विद्येति उदाहरणेन हेत्वाद्यर्थः सूचितः विद्याया यशस्करणे हेतुत्वात् अन्यथा विद्येति निर्देशो निरर्थकः टित्त्वात् द्विन्नेन्द्राहेति ईप् सेतुकखपफेवेति वेः सः लोके मतासु पूजितासु काले विवाहसमये अधिगतासु परिणीतासु पक्षे गौणसमये गृहीतासु श्रेष्ठासु ॥ ९ ॥ भ०

पुत्रीयता तेन वराङ्गनाभिरानायि विद्वान् क्रतुषु क्रियावान् ।
विपश्चिमज्ञानगतिर्मनस्वी मान्यो मुनिः स्वां पुरमृष्यशृङ्गः ॥१०॥

ऋष्यशृङ्गनामा मुनिः पुत्रीयं क्रतुं जानातीति पुरोधसो वशिष्ठादुपश्रुत्य राज्ञा वारविलासिनीभिरानायितोमुनिरित्येतत्प्रथयितुमाह पुत्रीयतेत्यादि । पुत्रीयता आत्मनः पुत्रमिच्छता इच्छायां सुप आत्मनः क्यजिति क्यच् क्यचिचेतीत्वम् । तेन राज्ञा प्रयोजककर्त्रा वराङ्गनाभिर्वरस्त्रीभिः प्रयोज्यकर्तृभिः आनायि स्वां पुरमिति योज्यम् । नीवह्योरित्यादेरपि अकथितञ्चेति चकारेण संगृहीतत्वात् नयतिर्द्विकर्मकः । तत्र प्रधानकर्मणि लुङ् । चिणिलोपौ चिणोलुगिति तशब्दस्य लुक् गुणकर्मणि तु पुरमिति द्वितीया गतिबुद्धीत्यादिना प्रयोज्यकर्तरि द्वितीया न भवति । नीवह्योः प्रतिषेध इति वचनात् विद्वान् वेदार्थतत्त्ववित् एवञ्च ज्ञात्वा क्रतुषु क्रियावान् प्रशस्तक्रियः प्रशंसायां मतुप् विपश्चिमज्ञानगतिरिति विपाकेन निर्वृत्तम् पचतेः क्विः क्लौ मैप् यत्पूर्वजन्मकृतमनिवर्त्तनीयं कर्म तस्योपतपःप्रत्ययादिनोपदेशात् ज्ञानात्प्रवृत्तिर्बुद्धावस्य जातेत्यर्थः । मनस्वी प्रशस्तमनाः प्रशंसायामस्मायामेधेत्यादिना विनिः मान्यो मानार्हः अर्हंस्तत्प्रत्ययेति यत् । धर्मादिमनानन्मुनिः मनेरुपधाया इति इन् उपधाया उकारः । ऋष्यस्य शृङ्गं ऋष्यशृङ्गं तच्छृङ्गमिव शृङ्गं यस्य स ऋष्यशृङ्गः । सप्रमुखमानेत्यादिना उत्तरपदलोपी समासः ॥ १० ॥ ज० म०

पुत्रीयतेत्यादि ॥ आत्मनः पुत्रमिच्छता तेन राज्ञा प्रयोजककर्त्रा वराङ्गनाभिःप्रयोज्यकर्तृभि ऋष्यशृङ्गनामा मुनिः स्वां पुरमानायि णीञ्प्रापणे द्विकर्मकः ण्यादिज्ञप्रान्ताढेत्यादिना मुख्यकर्मोक्तं रतनोर्यगिणाविति तनि इण् इणस्तल्लोप इति तनो लोपः । ञेर्लोप इति ञिलोपः तदानयने हेतुगर्भविशेषणमाह विद्वान् पण्डितः क्रतुषु यज्ञेषु क्रियावान् प्रशस्तक्रियः भोज्यभक्ष्यादिति अस्त्यर्थवतुः अस्त्यर्थप्रत्ययाः प्राशस्त्यादिविवक्षया भवन्ति । यदुक्तं भूमनिन्दाप्रशंसासु नित्ययोगेतिशायने । संसर्गेस्ति विवक्षायां भवन्ति मतुवादय इति । विपाकेन जाता ज्ञानस्य गतिर्मार्गोयस्य स तथा विनोपदेशाज्ज्ञानं जातमित्यर्थः अतिपरिणतज्ञानमार्ग इत्यर्थो वा । ङितस्तज्जातीति त्रिमक् गतिर्ज्ञानेऽपि दशायाञ्च ज्ञाने यातायातुपायने इति विश्वः । मनस्वी प्रशस्तमनाः । स्वञ्जेधाम्नायादिति विन् मान्यः मानार्हः ढेकादिति अर्ह्यर्थे साध्वर्थे वाण्यः धर्मादिमनानन्मुनिः मनेर्निपातनात् ऋष्यस्य मृगस्य शृङ्गमिव शृङ्गमस्य आकर्षस्य क्रतुदाहरणेन

ऐच्छिष्ट तं कारयितुं कृतात्मा क्रतुं नृपः पुत्रफलं मुनीन्द्रम् ।
ज्ञाताशयस्तस्य ततो व्यतानीत्स कर्मठः कर्म सुतानुबन्धम् ॥११॥
रक्षांसि वेदीं परितो निरास्यद्दृङ्न्याय्यात्क्षीदभितः प्रधानम् ।
शेषाण्यहौषीत्सुतसम्पदे च वरं वरेण्यो नृपतेरमार्गात् ॥१२॥

क्वचिन्मध्यपदलोप इति सूचितं षष्ठीप्रथमयोरिवार्थे समास इति श्रीपतिदत्तः तन्यते नृपस्येव नृगस्येव नृङ्गमस्येति विग्रहः । प्रधस्तान्यङ्गान्यासामिति गोत्रेणेति पामादित्वान्नप्रत्ययेऽङ्गनाः पुत्त्रीयतेति क्योऽम्बादिति क्यः अकारस्य ईकारः ॥ १० ॥ भ०

ऐच्छिष्ट ॥ तं मुनीन्द्रं क्रतुं कारयितुं नृप ऐच्छिष्ट ईहितवान् ईहतेरात्मनेपदिनो लुङि सेट्त्वादिटि च रूपं । द्विकर्मकता तु हृक्रोरन्यतरस्यामिति । कृतात्मा वशीकृतात्मेति भावः । पुत्त्रफलं पुत्त्रः फलं कार्यं यस्य क्रतोः तत उत्तरकालं स मुनिः परचित्तज्ञत्वात् ज्ञाताशयो ज्ञाताभिप्रायो राजाभिमतं कर्म कारयितुं तस्य नृपस्य कर्म व्यतानीत् प्रारब्धवान् । तनोते र्नेटीतिहलन्तलक्षणायां प्रतिषिद्धायां अतोहलादेरितिविभाषाद्विः कर्मठः कर्मणि घटते कर्मणि घटो ठच् । यागक्रियानिष्पादक इत्यर्थः सुतानुबन्धं सुतानन्तरं बध्नातीति कर्मण्यण् । सुतानुबन्धीति पाठान्तरम् सुतानन्तर्यं शीलमस्येति । सुधञ्जातौ णिनिः सुपीत्यनुवर्त्तमाने सुब्ग्रहणसुपसर्गनिवृत्त्यर्थमिति केवलस्योपसर्गस्य निवृत्त्यर्थं द्रष्टव्यम् अन्यथा जातावितिं किं ब्राह्मणानामन्वध्यायतीति न युज्यते आङित्यस्योपसर्गत्वात् ॥ ११ ॥ ज० भ०

ऐच्छिष्टेत्यादि ॥ तं मुनीन्द्रं नृपः पुत्त्रफलं क्रतुं कारयितुं ऐच्छिष्ट ईह चेष्टे ऋांसिः वसोरस्येतीम् धीटीधीष्विति यम् आदिगेचोरिति त्रिः धोऽजौजेरिति प्रयोज्यकर्तुः कर्मत्वं कृतात्मा कृत आत्मा यत्नो येन आत्मा यत्नोधृतिरित्यमरः ततोऽनन्तरं ज्ञाताभिप्रायः स मुनीन्द्रस्तस्य नृपस्य सुतानुबन्धं कर्म व्यतानीत् तनुदञ विस्तृतौ ऋांसिः रुदादयस्तीति ईम् वसोऽरस्येति इम् हसादेः सेम इति त्रिः सुतानन्तर्यमाति जनयतीति ठात्षष्ठिति वचि सुतानुबन्धीति पाठान्तरं सुतस्यानुबन्धः सुतानुबन्धः घञन्तः ततोऽत्यर्थेनैकाजिति ट्रन् कर्मणि कुशलः कर्मठः कृत्तद्धितसमासानामभिधानं नियामकं इत्यक्तेः कर्मणः कौशले ठ इति बोध्यं ॥ ११ ॥ भ०

रक्षांसि ॥ वेदीं परितः यजनवेद्याः समन्तात् विघ्नायोपस्थितानि रक्षांसि

निष्ठां गते दत्तिमसभ्यतोषे विधिहितिमे कर्म्मणि राजपत्न्यः ।
प्राशुर्हुतोच्छिष्टमुदारवंश्याश्चिक्षः प्रसोतुं चतुरस्सुपुत्रान् ॥१२॥

रक्ष्यते एभ्य इत्यसुन् तानि रक्षोघ्नैर्मन्त्रैर्निरास्यत् निरस्तवान् । पर्य्यभिभ्यां सर्व्वोभयार्थे तसिल् । अभितः परित इत्यादिना द्वितीया अङ्गान्ययाचीदभितः प्राधानमिति । यद्देवतामयोयागः सा देवता तत्र प्रधानं पुत्रफलत्वाद्विष्णुः प्रधानम् । तमिज्या तस्योभयतः पार्श्वयोर्यान्यङ्गानि चक्षुरादीनि देवतान्तराणि तान्ययाचीत् । अग्नावाहुत्या पूजितवान् कर्त्तुः क्रियाफलाभावात्तङ् न भवति षत्वकत्वे शेषाग्यहौषीदिति स्वाङ्गं विष्णुमिज्या शेषाणि प्रतिज्ञतानि पिष्टकमयानि सुतानां सम्पदर्थमग्नौ हुतवान् । जुहोतेः सिचिवृद्धावीटि च रूपम् । वरेण्यः श्रेष्ठः वरं चामार्गीत् मार्गितवान् । हे देवा अग्निप्रभृतयो ऋषतेः सुता भूयासुरिति । मार्ग अन्वेषणे । आष्टयाद्येति यदा णिजन्तास्ति तदा चङभावात्मिजेव भवति ॥ १२ ॥ ज० भ०

रक्षांसीत्यादि ॥ वरेण्यो सुनिर्वेदीं परितो वेद्याः समन्तात् रक्षांसि निरास्यन्निराकृतवान् पूर्व्ववदस्यतेर्डः अस्यादेशश्च प्रधानमभितः प्रधानयागस्योभयपार्श्वे आदावन्तेच अङ्गानि अयाचीत् अङ्गयागानकार्षीत् यद्वा प्रधानदेवतायाः विष्णोरुभयपार्श्वेऽङ्गानि चक्षुरादीनि लोकपालनवग्रहादीन् वा पूजितवान् एतेन साङ्गाद्दैविककर्म्मणः फलावश्यम्भाव इति सूचितं हुलिहोमेदने आकाशकुलिशाङ्कुशशेषवेशेत्यादि नपुंसकसंज्ञके हेमचन्द्रेण पठितं ऋषतेः सुतसम्पत्यै च वरमार्गीत् मार्ग अन्वेषणे अयाचीदिति यजेरनिमित्त्वात् व्रजदेवेति ब्रिः शच्छ्राजेति षड् षढोः क इति कः क्लिदादिति षत्वं वेदीं प्रधानस्येत्यत्र परितोऽभितोयोगे धिक्समयेत्यादिना द्वितीया ॥ १२ ॥ भ०

निष्ठां ॥ निष्ठां समाप्तिं गते कर्म्मणि यागक्रियायां समाप्तायां राजपत्न्यः हुतोच्छिष्टं हुतावशेषं शिष्टचरं प्राशुः भक्षितवत्यः अश्नातेर्लिटि उषि रूपम् दत्तिमसभ्यतोषे दानेन निर्वृत्तोदत्तिमः सभ्यानां ब्राह्मणानां तोषो यत्र कर्म्मणि । विधिहितिमे विधानेन निर्वृत्ते कर्म्मणि । दाञो धाञश्चद्वितः क्तिरिति क्तौ विधिहिते प्रथमस्य दोदद्घोरिति ददादेशः द्वितीयस्य दधातेर्हिरिति हिरादेशः मघ् सभायां साधव इति सभ्याः सभाया यः । उदारवंश्याः महावंशोद्भवाः शेषे यत् । कौशल्या कैकेयी च क्षत्रिये सुमित्रा तु वर्णसंकरजा किमर्थं प्राशुः । प्रसोतुं सुपुत्रान्विनीतान् प्रसवितुं तत्र कौशल्याकैकयी च एकैकं पिण्डं प्राशितवत्यौ

कौशल्ययासावि सुखेन रामः प्राक्केकयीतो भरतस्ततोऽभूत् ।
प्रासोष्ट शत्रुघ्नमुदारचेष्टमेका सुमित्रा सह लक्ष्मणेन ॥ १४ ॥

ताभ्यां चावयोः परिचारिकेति पिण्डभागद्वयं दत्तं सुमित्रा प्राशितवती । ततश्च पुत्रद्वयं जनयिष्यति एवञ्चाभिसन्धाय चतुर इत्युक्तं नतु त्रीनिति । षूङ् प्राणिगर्भविमोचने स्वरतीत्यादिना विभाषितेट् ॥ १३ ॥ ज० म०

निष्ठामित्यादि ॥ कर्म्मणि निष्ठां निष्पत्तिं गते सति उदारवंश्या स्त्रियो राजपत्न्यः चतुरः शोभनपुत्त्रान् प्रसोतुं क्षुतश्रेयं प्राशुः । अशृग भोजने षूङ् प्रसवे तादर्थ्ये चतुर् वेमूदिदिति इम् पक्षे इमोऽभावः । वंश्या इति ढघेकादिति भवार्थे ष्ण्यः तस्यानित्त्वान्नित्यं ङीप् । कर्म्मणि कीदृशे दानेन जातः सभ्यानां तोषो यत्र । डुदाञ्दाने द्वितस्तञ्ज इति त्रिमक् दद्धोध इति दत् । सभायां साधुः सभ्यः पूर्ब्ववत् ष्ण्यः । विहितविधिना विधानेन जाते पूर्ब्ववत् त्रिमक् धाञोहिरिति हिः ॥ १२ ॥ भ०

कौशल्ययेत्यादि ॥ कोशलस्य राज्ञोऽपत्यमिति दृद्वेत्कोशलाजादाञ्ञ्यङ् । यङश्चाप् कौशल्यया प्राक् प्रथमं असावि रामः जन्यते स्म । षूङः कर्म्मणि लुङि चिणिरूपम् सुखेनेति प्रकृत्यादित्वात्तृतीया । महतां जन्मनि न काचिदपि पीडास्ति । तदनन्तरं केकयीतो भरतोऽभूत् । केकयानाचष्ट इति णिच् । सा हि ईदृशात्सादृशाः केकया इति कथयति । तदन्तादच इरिति इकार प्रत्यय औणादिकः णिलोपः । ह्रदिकारादक्तिन इति ङीष् । अणादानेचाहीयरुहोरिति तसिः । यदा च केकयस्यापत्यम् जनपदशब्दात्क्षत्रियादञिञ्यञ् । केकयमित्रयुप्रलयाणां यादेरिय इतीयादेशः । टिड्ढाणञिति ङीप् तदा कैकेयीति द्वितीयं रूपम् सुमित्रा शत्रुघ्नं उदारचेष्टं उदारा चेष्टा यस्येति प्रासोष्ट प्रसूतवती कर्त्तरि लुङ् । डित्वात्तङ् जातमात्रस्य हि तस्य किल महासत्त्वतया तादृशस्यैव चेष्टाभूदिति श्रूयते । एकेति एकैवेति गम्यमानत्वादेवशब्दो न प्रयुक्तः । सह लक्ष्मणेन लक्ष्मणेन सह ॥ १४ ॥ ज० म०

कौशल्ययेत्यादि ॥ कौशल्यया राजकन्यया प्राक् पूर्ब्बं सुखेन रामोऽसावि प्रसूयते स्म षूङस्यासनि कर्म्मणि रूपं कोशलशब्दादपत्यार्थे बाह्वादीत्यादिना ष्ण्यः तस्य षकारेत्त्वाविवक्षया ष्ट्रिन्द्र्याहेति नेप् अदन्तत्वात् स्त्रियामत आप् । ततोऽनन्तरं भरतः केकयीतोऽभूत् केकयस्य स्वमपत्यमिति बाह्वादात इति ष्णरूपस्य षकारेत्त्वाविवक्षया न त्रिः यतोपायेति जं पी च तस्मिन्निति तस् एका सुमित्रा

आर्च्चीद्द्विजातीन् परमार्थविन्दानुदेजयान्भूतगणान्न्यषेधीत्।
विद्वानुपानेष्ट च तान् स्वकाले यतिर्वशिष्ठो यमिनां वरिष्ठः ॥१५॥

लक्ष्मणेन सह उदारचेष्टं शत्रुघ्नं प्राप्तोष्ट स्रुङ्च्यास्रुनिरूपं सहचारणेति सहयोगे तृतीया सहचारणेति सूत्रे सहयोगस्य प्रधानत्वाप्रधानत्वाविशेषोक्तौ रत्न सहयोगस्य प्राधान्यं विवक्षितं पिता सहागतः पुत्रः राज्ञा सह वनं यातीत्यादिवत् तेन लक्ष्मणो ज्येष्ठ इति बोध्यं ये तु क्रियादिगौणात् सहार्थे तृतीया इत्याऊस्तन्मतेऽपि लक्ष्मणस्य ज्येष्ठत्वं। तथाहि युगपदारब्धप्रसवक्रियायां लक्ष्मणस्य गौणत्वं क्रियाया असमापकत्वादियं प्रसूतेति व्यवहाराभावात् शत्रुघ्नस्य प्राधान्यं क्रियायाः समापकत्वात् इयं प्रसूतेति व्यवहारात् तेन लक्ष्मणे जाते प्रसवक्रिया न समाप्ता पश्चादव्यवहितकाले शत्रुघ्नस्य जन्मत्वात् तेन लक्ष्मणस्य सहयोगो विवक्षितः। शत्रुघ्नस्य तु क्रियाव्याप्यत्वात् कर्म्मत्वं। वस्तुतस्तु यस्य हि क्रियादिसम्बन्धः साक्षात् शब्देन प्रतिपाद्यते तत् प्रधानं यस्य न प्रतीयते तत् गौणं एतच्च शक्तिस्वभावात् पिता सहागतः पुत्र इत्यत्र पितुर्गौणत्वं साक्षात् क्रियासम्बन्धाभावात्। न च पिता पुत्रसम्बन्धेन प्रधानाप्रधानता तस्मात् क्रियागुणद्रव्यसम्बन्धे गौणात् सहार्थैर्युक्तात् तृतीया स्यादिति बोध्यं। शत्रुं हन्तीति हनचरगष्टक् हनगमित्यङ् लोपे हनोऽघ्नः ॥ १३ ॥ म०

आर्च्चीदित्यादि। तेषु जातेषु द्विजातीन् द्वे जाती येषामिति तान् ब्राह्मणक्षत्रियवैश्यान् परमार्थविन्दान् विन्दन्तीति विन्दाः विदृलृलाभे इत्यस्मात् अनुपसर्गादित्यादिना शः सुचादित्वादुम्। परमार्थस्य विन्दान् लाभिन इति कर्म्मणि षष्ठी तस्याः क्त्र्योगाच्च षष्ठी समस्यत इति वक्तव्यमिति समासः। तानार्चीत् सगादिभिः पूजितवान्। अर्चपूजायामित्यस्मात् लुङि तिप् च्लि सिचो लोपः। भूतगणान् राक्षसादिगणान् उदेजयान् उत्कम्पान्। तस्मिन्नेव सूत्रे उत्पूर्व्वएजिरर्थस्योनिर्द्दिष्टः तस्मादुदेजयन्तीति शः तान् न्यषेधीत् उत्सादितवान्। षिधेर्नटीति हलन्तलक्षणायाः प्रतिषेधः विद्वान् पौरोहित्यकर्म्मणि कुशलः उपानेष्ट च तान् रामादीन् तेषामुपनयनादिक्रियां चकार सम्माननेत्यादिना आचार्य्यकरणे तङ्। स्वकाल इति गर्भादेकादशे वर्षे जातस्य गर्भैकादशेष्वित्यादिना वचनेन उपनयनकाल उक्तः। यमनियमेषु यतत इति यतिः। सर्व्वधातुभ्य इनिति इन्। अहिंसा सत्यमस्तेयं ब्रह्मचर्य्यमकल्कता। इति पञ्च यमा येषां

वेदोऽङ्गवांस्तैरखिलोऽध्यगायि शस्त्राण्युपायंसत जित्वराणि ।
ते भिन्नवृत्तीन्यपि मानसानि समं जनानां गुणिनोऽध्यवात्सुः ॥१६॥

स्तीति यमिनः स्मृताः । तेषां वरिष्ठः उत्तमः प्रियस्थिरेत्यादिना उरुशब्दस्य वरादेशो महत्यर्थायस्य ॥ १५ ॥ ज० म०

आर्च्चीदित्यादि । वशिष्ठः पुरोहितो द्विजान् परमार्थविन्द्रान् उत्कृष्टधनलाभिनः आर्चीत् परमधनेन पूजितवान् इति पर्य्यवस्यति विद्लृलाभ इत्यस्मात् साहियातीत्यादिना यः सुचादित्वात्सुणागमः । परमार्थ आत्मसाक्षात्कारः अर्च्च क् पूजायां । उदेजयान् भयहेतुक्रूरभूतगणान् राक्षसादीन् व्यधेधीत् दूरीचकार एजृकम्पने पूर्ब्ववत् णप्रत्ययः विद्वान् विधिज्ञः तान् रामादीन् स्वकाले गर्भैकादशे वर्षे क्षत्रियोपनयनयोग्ये उपानेष्ट ज्ञानार्च्चीत्तेषणोपनयेत्यादिना मं । यतते यमनियमादिष्विति यतिः औणादिक इः यमिनां मध्ये वरिष्ठः उरुतमः गुणाद्वेष्ठेयस्रू इति गुणवचनादिष्ठे कृते वाढान्तिकेति उरुशब्दस्य वरादेशः । वशिष्ठ इति पूर्ब्ववदिष्ठः वसनिवासे इति दन्त्यमध्यं पारायणिकाः साधयन्ति प्रकृष्टो वशी वशिष्ठ इति तालव्यमध्यमपि प्राहुः ॥ १५ ॥ भ०

वेदइत्यादि । शिक्षाकल्पो व्याकरणं छन्दो विचितिर्निरुक्तं ज्योतिषञ्चेति षडङ्गानि शास्त्राणि तानि विद्यन्ते यस्य वेदस्येति अङ्गवान् । तैरुपनीतैरामादिभिः अखिलो निश्शेषो वेदोऽध्यगायि अधीत इत्यर्थः इङोऽधिपूर्ब्वात्कर्म्मणि लुङि । विभाषालुङ्लृङोरिति गाङादेशः चिण्वद्भावात् तलुक् । यद्वा इक् स्मरणे इन्धदिक इति वक्ष्यमिति गाङादेशः । अतएव तैरामादिभिः पूर्ब्ववेदिताः साङ्गा वेदा वशिष्ठसुखादधीता इत्यर्थः । शस्त्राणि धनुरादीनि जित्वराणि जयशीलानि । इगनशजीत्यादिना क्वरप् तैरुपायंसत स्वीकृतानि । उपपूर्ब्वो यमिः स्वीकरणे वर्त्तते तस्मात्कर्म्मणि लुङ् । आत्मनेपदेष्वित्यादिना अदादेशः झनः सिजिति झापकादनुनासिकलोपाभावः । ततस्ते रामादयो गुणिनो मानसानि मनांसि प्रज्ञादित्वात्स्वार्थे णः भिन्नवृत्तीनि नानाविधप्रवृत्तीनि विषयेषु तानि मानसान्यपि जनानां समं साधारणं क्रियाविशेषणम् अध्यवात्सुः अध्युषितवन्तः । अधिपूर्ब्वाद्वसेः सिचि वदव्रजेत्यादिना वृद्धिः सस्येति तलम् सिजभ्यस्तेति जुस् । उपाधीत्यादिना अधिकरणस्य कर्म्मसंज्ञा ॥ १६ ॥ ज० म०

वेद इत्यादि । तैरामादिभिः समस्तः साङ्गो वेदोऽध्यगायि अधीङ्लक्ष्यायने गोङष्टीथ्योर्वेति ग्वादेशः । शिक्षाकल्पो व्याकरणं निरुक्तं छन्दश्चयोचितिः ।

ततोऽभ्यगाद्गाधिसुतः क्षितीन्द्रं रक्षोभिरभ्याहृतकर्म्मवृत्तिः ।
रामं वरीतुं परिरक्षणार्थं राजार्च्जिहत्तं मधुपर्कपाणिः ॥१७॥

ज्योतिषां निचयश्चेति वेदाङ्गानि वदन्ति षट् । तैःशस्त्राणि उपायंसत स्वीकृतानीति उपपूर्व्वोयमिः स्वीकारे मान्तोऽदनत इत्यत् । जिजये जयन्तीति जित्वराणि क्वरप् सृजीति क्वरप् स्वस्य तनूपितीति तन् शीलार्थे क्वरबिति परे । स्वमतेऽपि शीलार्थे "टनित्युक्तेः क्वचित्तृन् णिनु ष्णु क्वरप् प्रभृतयः शीलार्थेऽपि स्युरिति बोध्यं । ते रामादयो जनानां मानसानि विषयेषु भिन्नवृत्तीन्यपि समं साधारणं यथास्यात्तथा अध्यवात्सुः । वसौनिवासे अनिमित्ताद्वजबदेति त्रिः सत्स्वरे इति सस्य तः अनुस्विद्वेरिति अन उस् गुणिनो गुणवन्तः नैकाजादितीन् । मन एव मानसं विकारसंघेत्यादिना स्वार्थे ष्णः णित्ते त्रिरिति त्रिः कर्म्मक्रियेत्यादिना उस्य ढत्वं ॥ १६ ॥ भ०

तत इत्यादि ॥ तेषु रामादिषु तथाभूतेषु गाधिसुतो विश्वामित्रः क्षितीन्द्रं राजानमभ्यगात् अभिगतवान् इणो गादेशः गातिस्थेत्यादिना सिचो लुक् । रक्षोभिर्निशाचरैः अभ्याहृता अभिभूता यागादेः कर्म्मणो वृत्तिः प्रवृत्तिर्यस्येति रामं वरीतुं प्रार्थयितुम् वृतोवेति इटो दीर्घत्वम् । परिरक्षणार्थं विघ्न्यमानस्य कर्म्मण इत्यर्थः तं गाधिसुतं आर्जिहत् पूजितवान् अर्ह पूजायामिति स्वार्थिकण्यन्तश्चौरादिको गृह्यते न भौवादिकः । तस्माद्धेतुमण्णिचात्र न भवितव्यम् णिश्रीत्यादिना चङ् णिलोपः द्विर्वचनेऽचीति स्थानिवद्भावादजादेर्द्वितीयस्येति हिशब्दो द्विरुच्यते रेफस्य नद्रा इति प्रतिषेधः चुत्वञ्चा आट्टृद्विः मधुपर्कपाणिः दधिघृतमधूनि एकीकृतानि मधुपर्क इत्युच्यते तस्मिन्पात्रे स्थितः पाणिर्यस्येति विग्रहः सप्तम्युपमानेत्यादिना उत्तरपदलोपी समासः । पात्रादुद्धृत्य मधुपर्केण पूजितवानित्यर्थः । ज० भ०

तत इत्यादि ॥ अनन्तरं गाधिसुतो विश्वामित्रो रक्षोभिरभ्याहृतकर्म्मवृत्तिः सन् अर्थात् कर्म्मण आत्मनो वा परिरक्षणार्थं रामं वरीतुं क्षितीन्द्रमभ्यगात् । इणो गाङ्यामिति गादेशः भूस्थापिवेत्यादिना सेर्लुक् राजा तं आर्ज्जिहत् अर्हकृपूजायां चुर्ब्बोर्जिर्ब्बेति जिः जिश्रीत्यङ् धुर्हि ष्णुङीति हेर्हित्वं नाजन्नादेरादिर्हिः स्यादौ नवद्रोये इति च निषेधान्नादिरेफयोर्हित्वं झभखर्षेति हस्य जः जेर्लोपः मधुपर्कः पाणौ हस्ते यस्य स तथा एतेन मधुपर्केणार्च्चनं भवति । वरीतुमिति नेमेकाजादित्यादौ इवर्ज्जनात् वसोरस्येतीम् वृतोर्वमो र्घ इति र्घः ॥ १७ ॥ भ०

ऐषीः पुनर्जन्मजयाय यत्त्वं रूपादिबोधान्न्यदृतच्च यत्ते।
तत्त्वान्यबुद्धाः प्रतनूनि येन ध्यानं न्यधत्तच्छिवमित्यवादीत् ॥१८॥
आख्यन्मुनिस्तस्य शिवं समाधेर्विघ्नन्ति रक्षांसि वने क्रतूंश्च।
तानि द्विषद्वीर्यनिराकरिष्णुस्तृणेढु रामः सह लक्ष्मणेन ॥१९॥

ऐषीरित्यादि। मुक्तिस्तत्त्वावबोधस्तस्या ध्यानं प्रयोजनं तत्र पुनर्जन्म भूयोजन्म तस्य जयाय यत् ध्यानं त्वमैषीः एषितवानसि। इषेर्लुङ् मध्यमैकवचने इट्-इटीति सिचो लोपे रूपम् रूपादिबोधान्न्यदृतच्च यत्ते रूपादिषु शब्दस्पर्श-रूपरसगन्धेषु चक्षुरादिद्वारेण यो बोधः अध्यवसायलक्षणा बुद्धिः तस्माच्च यत् ध्यानं न्यदृतत् निदृत्तम्। दृतेर्द्युतादित्वात् द्युद्भ्योलुङीति तिप् च्लेरङ् तत्त्वानि पञ्चविंशतिः पुरुषप्रधानमहदहङ्कारादीनि। प्रतनूनि सूक्ष्माणि येन ध्यानेनाबुद्धाः ज्ञातवानसि बुधेरनुदात्तेतोलुङ् थास् सिच् लिङ्सिचावात्मने-पदेष्विति सिचः कित्त्वाङ्गुणाभावःसिज्लोपश्चर्त्वजश्त्वादि। तद्ध्यानं शिवं शोभनं कस्मिन्निति रूपः अवादीत् न तस्य व्याघात इति। वदव्रजेत्यादिना वृद्धिः ध्यैचिन्तायां भावे ल्युट् ध्यानं॥ १८ ॥ ज० भ०

ऐषीरित्यादि॥ तव तद्ध्यानं शिवं निर्विघ्नं तस्य कल्याणमिति वा इति रूपोऽवादीदुक्तवान् व्रजवदेति त्रिः यद्ध्यानं पुनर्जन्मनो जायाय अभिभवाय त्वं ऐषीः इषुग वाञ्छे ह्यांसिः रुदाद्यस्तीतोम् वसोरस्तेतोम् झसस्वाज्झसीः इति सेर्लोपः धीठीथीष्विति अम् आदिगेचोरिति णुः भूयोमजादेरिति पुनरम् आदिगेचोरिति त्रिः यच्च ध्यानं ते तव रूपादिबोधात् चक्षुरादिद्वारेण रूपरसादीनां यो बोधो ज्ञानं तस्मात् न्यदृतत् निदृत्तं ध्यानं ध्यानं न रूपरसगन्धादिविषयकं स्यात् दृतेर्द्युतादित्वात् द्युद्भ्योलुङीति डः डविधानं अतएव पं। येन ध्यानेन प्रतनूनि दुर्बोधादतिसूक्ष्माणि तत्त्वानि त्वं अबुद्धाः बुधेस्यासि झसस्वादिति सिलोपे ढभात्तथोरिति थस्य धः झषभ्रष्टोरिति धस्य दः॥ १८ ॥ भ०

आख्यदित्यादि॥ पृष्टो मुनिस्तस्य समाधेर्ध्यानस्य शिवमनुपद्रवमाख्यत् कथितवान्। चक्षिङः ख्याञ् अख्यतीत्यादिना च्लेरङ् आतो लोपः किन्त्वयं दोषः विघ्नन्ति रक्षांसि वने क्रतून्। गमहनेत्यादिना उपधालोपः होहन्तेरिति कुत्वम्। किं क्रियतामिति चेदाह तानि रक्षांसि द्विषतां वीर्यं सामर्थ्यं वीरः स्वार्थिकण्यन्तादचो यत् तस्य निराकरिष्णुः निराकरणशीलः अलङ्कृञित्या-

स शुश्रुवांस्तद्वचनं सुमोह राजासहिष्णुः सुतविप्रयोगं ।
अहंयुनाथ क्षितिपः शुभंयुरूचे वचस्तापसकुञ्जरेण ॥ २० ॥

दिवा दृणुच् हृणेढु हिनस्तु हृहेर्विधौ लोट् । एरुः रुधादित्वात् श्नम् । हृणद्धि दृम् होढः ढ्रुत्वं ढोढ इति 'ढलोपः सह लक्ष्मणेन लक्ष्मणेन सह ॥ १६ ॥ ज० म०

आख्यदित्यादि । ततो मुनिराख्यत् कथितवान् वक्ष्यस्य ख्यालिमेति ङः उखेचीत्यालोपः तस्य समाधेः शिवं कल्याणं तस्य नृपस्य आख्यत् सम्बन्धविवक्षया षष्ठीत्यन्ये । तु शब्दो वाक्यभेदे विषयद्योतकत्वे वा । रक्षांसि वने क्रतून् यज्ञान् विघ्नन्ति हनगमेत्युङ्लोपः हनोङ्घोन्नः तानि रक्षांसि रामो लक्ष्मणेन सह हृणेढु हन्तु हृहधकि हिंसे विधिनिमन्त्रणेति प्रार्थनायां गौ तुपि रुधादित्वात् दिवसुतुदरुधेति नण् हृह दृन् पिङ्क्ते दृति दृन् होढोभावितिहस्य ढः ढभान्तथोरिति तस्य धः ष्टुभिरिति धस्य ढः ढ्रोढ्रीति ढलोपः द्विषतां शत्रूणां वीर्यं निराकरोतीति ञिभ्राजभूसहेति दृणुः शीलार्थे वा दृणुरित्यन्ये ॥ १६ ॥ भ०

स इत्यादि । स राजा तस्य मुनेस्तद्वचनं शुश्रुवान् श्रुतवान् सन् सुतविप्रयोगमसहिष्णुः असहनशीलः सुमोह मोहमुपगतः मुहोतेर्भाषायां सद्वसश्रुवेत्यनेन क्सुः । सुतेन विप्रयोगमिति कर्तृकरणेक्षतासङ्गलमिति समासः नलोकाव्ययनिष्ठेतिषष्ठ्याः प्रतिषेधः । अथानन्तरं अहंयुना अहंकारवता अहंशुभमोर्युस् तापसकुञ्जरेण तपःसहस्राभ्यां विनीनिरित्यनुवर्त्तमाने अण्चेति मत्वर्थेऽण् तापसश्च स कुञ्जरश्चेति इन्द्वारकोत्यादिना समासः । तेन क्षितिपो राजा शुभंयुः कल्याणवान् पर्ज्जन्यवद्युस् । वचो वक्ष्यमाणमूचे उक्तः कर्म्मणि लिट् सम्प्रसारणं अहंयुनाथ इति विसर्गान्तपाठान्तरम् तत्र अहंयूनां क्षत्रियाणां नाथ इति योज्यम् ॥ २० ॥ ज० म०

स शुश्रुवानित्यादि । तस्य मुनेर्व्वचनं शुश्रुवान् स राजा सुमोह सुह्यल्लज्जिचैचित्ते यतः सुतविप्रयोगं पुत्रस्य विरहं असहिष्णुः अथानन्तरं तापसकुञ्जरेण तपस्विश्रेष्ठेन क्षितिपो वक्ष्यमाणं वच जचे व्यथयत्येति खेर्ज्जिः यहस्वपाद्योरिति प्रकृतेर्ज्जिः न्यादिज्ञान्तेति गौणकर्म्म उक्तं कोदण्डेन स्वप्रार्थनाभङ्गसम्भावनया क्रोधादहङ्कारवता कोदण्डो राजा शुभंयुः शुभयुक्तः गोदण्डमेधेति अण् याभ्यां अहंशुभं शब्दाभ्यां युरस्त्यर्थे ॥ २० ॥ भ०

मया त्वमाप्थाः शरणं भयेषु वयं त्वयाप्याप्स्महि धर्मवृद्धौ ।
क्षात्रं द्विजत्वञ्च परस्परार्थं शङ्कां कृथा मा प्रहिणु स्वसूनुं ॥२१॥
घानिष्यते तेन महान्विपक्षः स्थायिष्यते येन रणे पुरस्तात् ।
मा मां महात्मन्परिभूरयोग्येन मद्विधो न्यस्यति भारमग्र्य ॥२२॥

मयेत्यादि । भयेषु त्वं शरणम् आप्थाः प्राप्तोऽसि मया आपेः कर्मणि लुङ्सिज्लोपः । त्वयापि धर्मवृद्धौ धर्मोपचयाय वयमाप्स्महि प्राप्ताः । पूर्ववल्लुङादिः उत्तमबहुवचनं सिचोलोपाभावः मकारस्याझलत्वात् । तदित्थं क्षात्रं द्विजत्वं च धर्मवृद्धौ परस्परार्थं अन्योन्यप्रयोजनकर्मव्यतीहारे सर्वनाम्नो हे भवतः समासवच्च बहुलमिति यदा न समासवत् तदा अयम् । तस्मान्मा शङ्कां कृथाः माकार्षीः कथमस्मिन्संकटे पुत्रं वियोजयामीति । माङि लुङ् अडभावः उश्चेति कित्वाङ्गुणाभावः झलादङ्गादिति सिचोलोपः प्रहिणु प्रेषय स्वं पुत्रं हिनोतेः प्रार्थनायां लोट् स्नुः अपित्वात् ङित्वं गुणाभावः उतश्चप्रत्ययादिति हेर्लुक् हिनुमीनेति णत्वम् ॥ २१ ॥ ज० म०

मयेत्यादि । मया भयेषु शरणं रक्षिता त्वं आप्थाः प्राप्तः ढे थास् आप्नुनौकिप्रापणे झसखादिति सेर्लोपः । त्वयापि धर्मवृद्धौ वयं आप्स्महि प्राप्ताः अत्रापि ढे महि तस्मात् क्षत्रियत्वं ब्राह्मणत्वञ्च अन्योन्यप्रयोजनकं जातिव्यक्त्योरभेदोपचारात् व्यतीहारे गतिर्हिंसेति सूत्रेऽनन्योन्यार्थ इति ज्ञापकात् परस्परं व्यतिलुनन्तीत्युदाहरणेन च क्रियाव्यतीहारे परस्परार्थं भवतीति बोद्धव्यं । त्वं शङ्कां मा कृथाः झसखादिति सेर्लोपः धीटीधीष्वित्यत्रेति वाक्यात् मायोगे अम्निषेधः स्वसूनुं प्रहिणु प्रस्थापय विधिनिमन्त्रणेति प्रार्थनायां गौ हिन वर्द्धने गतौ स्वादित्वात् दिवसतुदेति नुः हेर्लोप इति हिलोपः प्राग्वद्धोष इति णत्वं ॥ २१ ॥भ०

घानीत्यादि ॥ अनागतमर्थं ज्ञानेन समीक्ष्याह । महान्विपक्षो रावणः त्रैलोक्यविजयित्वात् सोऽपि रामेण घानिष्यते किञ्चत इतरे राक्षसाः । हन्तेः कर्मणि लट् स्यसिजित्यादिना चिण्वदिट् उपधा दृद्धिः । होहन्तेरिति कुत्वं पुरस्तादपतो यद्दृशं युद्धं भावि परशुरामेण सार्द्धमिति भावः । तत्र येन स्थायिष्यते तेन घानिष्यते इति योज्यं अत्र तिष्ठतेर्भावे लट् चिण्वदिट्त्वा आतोयुक् हे महात्मन् महासत्व मा मां परिभूः भावज्ञासीः । किमेवं वदसीति परिपूर्वो भवतिर्निराकरणे वर्त्तते । मद्विध इति विधानं विधा प्रकारः आतश्चोपसर्ग

क्रुध्यन्कुलं धक्ष्यति विप्रवक्ष्यिर्यास्यन् सुतस्याप्रति मां समन्युं ।
इत्थं नृपः पूर्व्वमवालुलोचे ततोऽनुजज्ञे गमनं सुतस्य ॥ २३ ॥

इत्यङ् विधा भेदः सादृश्यञ्च इह सादृश्यं गृह्यते मया विधा सादृश्यं यस्येति मद्विधःप्रत्ययोत्तरपदयोश्चेति मदादेशः मद्विधो मत्सदृशोऽन्यो न भारमप्रयोग्यात् अयोग्ये असमर्थे न्यस्यति निक्षिपति किमङ्गं येनानागतं समीक्षितमिति भावः । योगाय प्रभवति योग्यः योगाद्यत् ॥ २२ ॥ ज० म०

शङ्कायां अकरणे हेतुमाह ॥ घानिष्यत इत्यादि ॥ येन रामेण रणे पुरस्तादेव स्थायिष्यते नच पराङ्मुखीभविष्यते तेन महान् विपक्षोऽपि घानिष्यते यद्वा येन हेतुना रामेणैवमेवं करिष्यते ततः शङ्कां मा कृथा इति पूर्व्वेणान्वयः हनमहदृशचदृति मिण् खेर्हौधोञ्णिति चेति हृस्य घः हनस्तङ् इत्यत्र हृण् वर्ज्जनात् न तङ् मिनिणोः समानत्वात् स्थायिष्यते इति पूर्व्ववत् मिण् यनञ्णित्कृदिन्यात इति यत् पुरस्तादिति दिक्शब्दाद्दिग्देशकाले इति सप्तम्याः स्तात् पूर्व्वाधरावराःपुराधावेति पूर्व्वस्य पुरादेशः हे महात्मन् हे महामते त्वं मां मा परिभूः न तिरस्कुरु माटोवेति भूस्थापिवेति सेर्लुक् मायोगेऽन्निषेधः । आत्मादेहमनोब्रह्मस्वभावधृतिबुद्धिषिति विश्वः । मद्विधो जनः अयोग्येऽसमर्थे अन्यं भारं न न्यस्यति नार्पयति योगाय प्रभवति योग्यः ढधेकादिति ण्यः अनिमित्तविवक्षया न त्रिः तत्पुरुषो वा नञः समास इति । नञ्तत्पुरुषसंज्ञकसमासार्थं परे सूत्रं कुर्व्वन्ति तन्मते न योग्योऽयोग्य इति विग्रहः क्षमते योग्यादन्यः अयोग्यः अन्यारभेत्यादिना नञोऽन्यार्थत्वात् पञ्चमीसमासः व्यंपूर्व्वमिति नञः प्राग्भावः नञोनौवेत्यः एवमब्राह्मण इत्यत्र ब्राह्मणस्य न सदृशोऽब्राह्मणः समार्थेनेत्यादिना नञः समार्थत्वात् षष्ठी तेनात्र षष्ठीसमासः अनिमित्तान्यथा पश्यन्नित्यत्र एकार्थेन निन्दितानि च तानि निमित्तानि चेति कर्म्मधारयः नञो निन्दितार्थे एकार्थत्वात् अपापमित्यत्र पापस्याभावोऽपापमित्यव्ययीभावः नञोऽव्ययत्वात् एवमन्यत्र यथान्वयं बोद्धव्यं । तत् सादृश्यमभावश्च तदन्यत्वं तदल्पता । अप्राशस्त्यं विरोधश्च नञर्थाः षट् प्रकीर्त्तिताः इत्यसमासे तु नञो वाचकत्वानङ्गीकारात् तद्योगे उक्तव्याख्या प्राग्विभक्तिर्न स्यात् । समैव विधा प्रकारो यस्य तादृशः सर्व्वं जानातीत्यभिप्रायः ॥ २२ ॥ भ०

क्रुध्यन्नित्यादि । यद्यहं भूतरक्षणेऽधिकृतोऽस्य वचनं न कुर्य्यां तदा क्रुध्यन् श्यन् दिवादित्वात् श्यन् विप्रो वह्निरिव उपमितिसमासः धक्ष्यति कुलं भस्मसा-

आशीर्भिरभ्यर्च्य ततः क्षितीन्द्रं प्रीतः प्रतस्थे मुनिराश्रमाय।
तं पृष्ठतः प्रस्थिताय नन्दो हिंस्रेषु दीप्राख्यधरः कुमारः ॥२४॥

करिष्यति दहेर्लृट् दादेरिति धः भष्भावः चर्त्वं धकारस्य ककारः । दृणकोरिति घत्वं यास्यन् गमिष्यन् सुतः मां समन्युं सशोकं तप्स्यति सन्तापयिष्यति तपेर्लट् इत्यमेवं प्रकारं ऋपः पूर्व्वमादौ अवालुलोचे अवलोचितवान् अवाङ्पूर्व्वोल्लोचेर्लिट् तत उत्तरकालं सुतस्य गमनमनुजज्ञे अनुज्ञातं ऋपेणेति विभक्तिविपरिणामेन तेनेति योज्यं कर्म्मणि लिट् ज्ञा अवबोधने इति परस्मैपदित्वात् नचानुपूर्व्वादस्मादात्मनेपदं विहितं ॥ २३ ॥ ज० भ०

क्रुध्यन्नित्यादि ॥ विप्र एव वह्निः क्रुध्यन् कुलं भक्ष्यति भस्मीकरिष्यति दहौ दाहे औदित्वान्नेम दादेर्ध इति हस्य धः झषझसोरिति धस्य कः क्विलादिति षः यास्यन् गमिष्यन् सुतः समन्युं सशोकं मां तप्स्यति तपौ दाहे इत्यमनेन प्रकारेण ऋपः पूर्व्वमवालुलोचे आलोचितवान् लोचृङीच्चे धुर्द्विच्छृङीति द्विः झभखघछर्झषेति ओकारस्य उकारः । ततोऽनन्तरं सुतगमनं अनुजज्ञे अवानुशब्दस्य उपसर्गप्रतिरूपकत्वेन जिज्ञप्त्रन्तपिबेति मं । यद्वा विभक्तिव्यत्ययेन ऋपेण सुतस्य गमनमनुजज्ञे अनुज्ञातं कर्म्मणि प्रत्ययः यद्वा अनु पश्चात् ततस्तेन सुतस्यगमनं जज्ञे ज्ञातं तस्मिन्निति तस् यद्वा जनीङोरूपं अनुज्ञातार्थता हनगमित्युङ्लोपः ॥ २३ ॥ भ०

आशीर्भिरित्यादि ॥ रामगमनस्यानुज्ञातत्वात् प्रीतो मुनिः क्षितीन्द्रं राजानं आशीर्भिरभ्यर्च्य पूजयित्वा आङ्शासेः क्रियुपसंख्यानात् उपधाया इत्वं प्रतस्थे पुनराश्रमाय आश्रमं पुनः प्रस्थितवान् । तिष्ठतेः समवेत्यादिना लिटि तङ् प्रष्ठं अग्रयायिनं तं प्रष्ठोऽग्रगामिनीति घत्वं पृष्ठतः पश्चात् इयाय कुमारः । दृणोरलि दद्विरायादेशः द्विर्व्वचनेचीतिस्थानिवद्भावात् द्विर्व्वचनमिकारस्य अभ्यासस्यासवर्ण इतीयङ् नन्दोऽनुकूलः हिंसनशीलाः इषवः शराः हिंस्रेषवः आप्नमविसम्बादि यद्धनुः तत् हिंस्रेषु दीप्रमाप्तं धनुर्यस्य कुमारस्येति विग्रहः । अत्र धनुषश्चेति अनङ् न भवति समासान्तविधिरनित्य इति । दीप्राख्यधनुरिति पाठान्तरं दीप्रमाख्यं दृष्टतया यस्य धनुषस्तत् दीप्राख्यं धनुर्यस्येति सः । कस्मिन्विषये हिंस्रेषु नान्येषु नन्दादयो नमिकम्पीत्यादिना रप्रत्ययान्ताः ॥ २४ ॥ ज० भ०

आशीर्भिरित्यादि ॥ मुनीरामस्य गमनानुज्ञया प्रीतः सन् क्षितीन्द्रं पुनराशीर्भिरभ्यर्च्य आश्रमाय प्रतस्थे प्रतिज्ञानिर्णयप्रकाशे संप्रव्यवाङ्पस्य इति मं गत्यर्थ-

प्रयास्यतः पुण्यवनाय जिष्णो-
रामस्य रोचिष्णुसुखस्य धृष्णुः ।
त्रैमातुरः कृत्स्नजिताश्वशस्त्रः
सध्र्यङ् रतः श्रेयसि लक्ष्मणोऽभूत् ॥ २५ ॥

मन्यढे इति चतुर्थी आङः शासः क्विप् शासुडिङ्वस इति उङ आकारस्य दः सषेसुस्वेति रडिर्व्यनचतयेति घः कुमारो रामस्तं प्रथं अग्रगं सुनिं पृष्ठतः पश्चात् इयाय । इन्लगतौ णप् धुर्विच्छडीति विः जिष्णत्यन्तेजुङतोरिति त्रिः खेर्यौरियुवर्ण इति इय प्रात्स्थोऽपगे इति षत्वं पृष्ठत इति प्रात्सस् । नम्रो विनयावनतः हिंसदीपेति कर्त्तरि रः हिंस्रेषु हिंसकेषु दीप्रं दीप्यमानं अस्त्रं धरतीति पचादित्वादन् हिंसदीपाभ्यां पूर्वेण रः । हिंस्रेषु दीप्तात्तधनुरिति पाठे हिंस्रेण दूषणा दीप्तमात्तं गृहीतं धनुर्येन इति विग्रहः ॥ २४ ॥ भ०

प्रयास्यतइत्यादि ॥ प्रयास्यतो गमिष्यतो रामस्य लक्ष्मणः सध्र्यङ् अभूत् सहायीभूतः सहाञ्चतीति क्विन् अनुषङ्गलोपः उगिदचामिति नुम् हलन्तादिसंयोगान्तलोपौ क्विन्प्रत्ययस्येति कुत्वं नकारस्य ङकारः सहस्य सध्रिरिति सध्र्यादेशः पुण्यवनाय पुण्यहेतुत्वात्पुण्यं वनं गत्यर्थात् कर्म्मणि चतुर्थी जिष्णोः जयशीलस्य ग्लाजिस्थश्वसित्यादिना ष्णुः रोचिष्णु रोचनशीलं सुखं यस्य रामस्य पितुराज्ञया तुष्टत्वात् अलङ्कृञित्यादिना ष्णुच् धृष्णुः शत्रुविध्वंसने प्रगल्भः । त्यदिसर्वादीत्यादिना स्नुः त्रैमातुरः तिसृणां मातृणामपत्यमिति तद्धितार्थविषये समासः पश्चान्मातृशब्दस्य इत्यादिना अण् उत्वञ्च द्विगोर्लुगनपत्य इति लुङ् न भवति सहि पितृव्यप्राशनात्ताभ्याञ्च जनितः अस्त्रञ्च शस्त्रञ्चेति द्वन्द्वः । कृत्स्नं समग्रं जितमधिगतमस्त्रं शस्त्रं येनेति विग्रहः रतः श्रेयसि कल्याणे प्रकृत्यैकाच् प्रशस्यस्य श्रः लक्ष्मीरित्यौणादिकः लक्ष्मेमुट् ईप्रत्ययश्च सा यस्य विद्यत इति लक्ष्मणः । लोमादिषु लक्ष्मा अञ्चेति अच् न प्रत्ययः अत्वञ्च ॥ २५ ॥ ज० म०

प्रयास्यत इत्यादि ॥ रामस्य श्रेयसि कल्याणे रतो लक्ष्मणः सध्र्यङ् सहचरोऽभूत् । सह अञ्चति गच्छतीति क्विप् सहसन्निरः सध्रीसमितिरीति सहशब्दस्य सध्र्यादेशः किम्भूतस्य पुण्यहेतुत्वात् पुण्यं पवित्रं वा यद्वनं तस्मै प्रयास्यतो गमिष्यतः गत्यर्थमन्यढेइति कर्म्मणि चतुर्थी जयतीति जिष्णुः ष्णुक्भूजेरिति ष्णुक् । यत्तरस्यार्थे गमनानन्तरात् रोचिष्णु दीप्यमानं सुखमस्य जिघ्रा जेति धृष्णुः किम्भूतः धृष्णुः प्रगल्भः क्षिपत्तसद्धधृषः क्नुरिति क्नुःशीलार्थे

दृष्टमति रघुसिंहे हन्दशूकान् जिघांसौ
धनुरपरिभरसह्यं सुष्टिपीडं दधाने ।
व्रजति पुरतरुण्यो बद्धचित्राङ्गुलित्रे
कथमपि गुरुशोकान्मा रुदन् माङ्गलिक्यः ॥ २६ ॥

ष्णुक् दृष्णुक्रुप्रत्यया इत्येके तिस्रृणां मातृणामपत्यं त्रैमातुरः संख्यासंभद्रान्मातुर्ण्यः इति ङ्युर् । कृतघ्नं समस्तं जितमस्त्रं शस्त्रञ्च येन सतया रतः रमधातोः क्तप्रत्यये वनतनाद्यनिमामिति मलोपः ॥ २५ ॥ भ०

दृष्टमतीत्यादि ॥ रघुसिंहे रामे रघुषु रघुवंशभवेषु सिंह इव शौर्यादियोगात् व्रजति सति दृष्टमति सन्निधङ्के प्रशंसायां मतुप् । दन्दशूकान् हिंसान् दंशेः लुपसदेत्यादिना यङ् जपजभेत्यादिना अभ्यासस्य नुक् । तदन्ताद्यजजभेत्यादिना ण्वुकः । अतो लोपः यस्य हलः जिघांसौ हन्तुमिच्छौ अज्झनेति दीर्घः । अभ्यासाच्चेति कुत्वं सनाशंसेति उः न लोकेति षष्ठीप्रतिषेधात् द्वितीयैव । धनुर्दधाने बिभ्राणे अरिभिरसह्यं सोढुमशक्यम् शकिसहोश्चेति यत् सुष्टिपीडं सुष्टिना पीडयित्वा सुष्टिशब्दे तृतीयान्ते उपपदे सप्तम्यां चोपपीडेति णमुल् तत्र चकारेण तृतीयानुकर्षणात् । बद्धं चित्रमङ्गुलित्रं येन अङ्गुलिं त्रायत इति कः पुरे तरुण्यः पुरतरुण्यः णुअत्रजीकक्ष्युंस्तरुणतलुनानामुपसङ्ख्यानमिति ङीप् । यदि तद्वचोऽर्थवत् नो चेन्नौरादिपाठात् ङीष् रामो गत इति गुरुः शोको यासां ताः । कथमपि मा रुदन् न रुदितवत्यः । रुदेरिरितोवेति चेरङ् यतो माङ्गलिक्यः मङ्गलप्रयोजनाः । तदस्य प्रयोजनमिति ठञ् टिड्ढाणञित्यादिना ङीप् ॥ २६ ॥ ज० म०

दृष्टमतीत्यादि ॥ रघुसिंहे रघुश्रेष्ठे रामे व्रजति सति तद्विच्छेदात् गुरुशोकात् पुरतरुण्यः कथमपि महाकष्टेन मा रुदन् लघिरुदरोदे यतो माङ्गलिक्यः मङ्गलाय हिताः मङ्गलप्रयोजना वा विकारसङ्केति ष्णिकः ष्ट्रिन्ब्राह्मेति ईए नदादित्वात् तरुणशब्दादीप् वयश्चरमे दरि क्रमदीश्वरादयः । रामे कीडशे दृष्टमति मतुरर्थे प्रशंसायां । दन्दशूकान् जिघांसौ दंशौ दंशने दन्त्यसात् जाग्ट्यङन्ते ति ऊकः यङोलुग्वेति यङोलुक् दंशोनलोपोवेति न लोपः दन्दशूकान् दंशनशीलानिति धातुचन्द्रादयः दन्दशूकश्च पुंलिङ्गो राक्षसे च सरीसृपे इति मेदिनी हन्तुमिच्छुर्जिघांसुः सन्निच्छायामिति सन् अत्तुमिच्छति जिघत्सतीत्यत्र सुग्गर्भाद्धातोः सन्निति बोध्यं अन्यथाऽत्तुमिच्छतीत्यत्र वैयर्थ्यं

अथ जगदुरनोचैराशिषस्तस्य विप्रा-
स्तुमुलकलनिनादं तूर्यमाजघ्नुरन्ये ।
अभिमतफलशंसी चारु पुस्फोर बाहु-
स्तरुषु चुकुवुरुच्चैः पक्षिणश्चानुकूलाः ॥ २७ ॥

इति भट्टिकाव्ये रामोत्पत्तिर्नाम प्रथमः सर्गः ॥

स्यात् सनाद्यन्ता धातवः इति धिः खेराद्यचो लोप इति खेर्लोपः भमखघेति हस्य जः खस्खेत्यनीति हः खेः हौ धौ जिणति चेति हस्य घः घौभनिङ्गमामिति दीर्घः अरिभिरसह्यं धनुर्दधाने किम्भूतं तत् सुष्टिपीडं सुष्टिना पीडा यस्य तत्तथा एतेन सुष्टे दार्ढ्यं सूचितं अन्ये तु प्रमाणाद्यत्नोत्तीयासप्रमीभ्यां ल्लाच्चयम् समासो वेत्याहुः । तन्नते सुष्टिना पीडयित्वा इत्यर्थः । सुष्टिं पीडयतीति पचाद्यित्वादन् सुष्टिपीडमिति विशेषणेन धनुषोऽतिदार्ढ्यं सूचितमिति केचित् । केचित्तु सुष्टिं मोषणं पीडयति खण्डयति इत्यनेन चौर्यापसारत्वमपि कविभिर्वर्ण्यते श्रुतौ तस्करता स्थितेति कालिदास इत्याहुः सुष्टिं हि सामर्थ्यात् शत्रुकृतां पीडयतीति केचित् धारणक्रियाविशेषणमिति केचित् विचित्रं अङ्गुलित्रं बद्धं येन अङ्गुलिं त्रायते रक्षतीति हनजनादिति डः ॥ २६ ॥ भ० ।

अथेत्यादि ॥ तस्य रामस्य व्रजतः विप्राः अनीचैः महता ध्वनिना आशिषः इष्टवचनानि जगदुः गदितवन्तः अन्ये वादकाः तूर्यं कांस्यतालपटहादिसमूहं आजघ्नुः ताडितवन्तः आङो यमहन इति आत्मनेपदं न भवति । अकर्मकादित्यनुवर्त्तते तुमुलो महान् कलो मधुरो निनादो ध्वनिर्यस्येति अभिमतं इष्टं फलं शंसितुं शीलं यस्य बाहोः स च पुस्फोर भृशतरं स्फुरितवान् । अत्र दक्षिणो बाहुः सामर्थ्यात्प्रत्यते खाङ्गत्वात् अनेन सीताप्राप्तिबीजमुपन्यस्तं स्फुरतेरभ्यासस्यपरपूर्व्वात् खय इति खयः शेषः चर्त्वं । पक्षिणश्च तरुषु स्थिताः अनुकूलाः सन्तः उच्चैः सुष्ठु चुकुवुः कूजितवन्तः । कुशब्द इत्यस्य लिटः किन्त्वादुवङादेशः ॥ २७ ॥ ज० म०

इति भट्टिकाव्यटीकायां जयमङ्गलाख्यायां प्रकीर्णकाण्डे रामसम्भवः प्रथमः सर्गः ॥

अथेत्यादि । अनन्तरं विप्रास्तस्य रामस्य अनीचैरुच्चैराशिषो जगदुः उक्तवन्तः अन्ये तूर्यं वाद्यं आजघ्नुः वादितवन्तः कीदृशं तुमुलो महान् कलो मधुरास्फुटो निनादो ध्वनिर्यस्य । तूर्योऽस्त्री वाद्यनिर्घोषे वादित्रं वादनञ्च तदिति कोषः । तस्य रामस्य बाङ्स्वारु यथा स्यात्तथा पुस्फोर किम्भूतः अभिमतं फलं शंसति कथयतीत्यर्थात् दक्षिणबाङ्स्पन्दनं कान्तालिङ्गनसूचकमिति दृष्टाः । शंसादित्वात्णिन् अन्ये तु शीलार्थे णिन् इत्याहुः । अनुकूलाः पक्षिणश्चैषुकुबुः शब्दं चक्रुः कुङ्शब्दे एतेन गमनमङ्गलसूक्तं । यदुक्तं वामे मधुरवाक् पक्षी दृष्टः पल्लवितोऽग्रतः । अनुकूलो वहन् वायुः प्रयाणे शुभशंसिन इति ॥ २७ ॥ भ०

इति श्रीभरतसेनकृतायां भट्टिटीकायां सुप्रबोधिन्यां प्रकीर्णकाण्डे श्रीरामसम्भवो नाम प्रथमः सर्गः ॥

द्वितीयः सर्गः ।

वनस्पतीनां सरसां नदीनां तेजस्विनां कान्तिभृतां दिशाञ्च ।
निर्याय तस्याः स पुरः समन्ताच्छ्रियं दधानां शरदं ददर्श ॥१॥
तरङ्गसङ्गात्तपलैः पलाशैर्ज्वालाश्रियं सातिशयान्दधन्ति ।
सधूमदीप्ताग्निरुचीनि रेजुस्तान्योत्पलान्याकुलषट्पदानि ॥२॥

इदानीं विजिगीषूणां कण्टकान् सशुद्धुं शरत्काले सत्युद्योग इति तमेव वर्णयन्नाह वनस्पतीनामित्यादि । स रामः तस्याः पुरः अयोध्यायाः निर्याय निर्गत्य समन्तात्सर्वतः शरदं ददर्श दृष्टवान् कालस्याप्रत्यक्षत्वात् कार्याणां दर्शनात्तद्दर्शनमिति मन्यते श्रियन्दधानां धारयन्तीं केषां वनस्पतीनां पारस्कारादिदर्शनात्सुट् । अत्र लोकप्रतीत्या दृश्या दृष्टव्याः न तु पारिभाषिकाः । तथा सरसां तड़ागानां नदीनां गङ्गादीनां तेजस्विनाञ्चन्द्रतारादीनां कान्तिं नैर्मल्यं बिभ्रतां दिशाञ्च तदा हि निर्मला दिशो भवन्ति । वनस्पत्यादीनां श्रियं दधानां शरदं ददर्श तां रामव्यापारं विना सामान्येन वर्णयन्नाह ॥१॥ज०स०

वनस्पतीनामित्यादि ॥ स रामस्तस्याः पुरोऽयोध्याया निर्गत्य समन्तात्सर्वतः शरदं ददर्श । यद्यपि कालस्य प्रत्यक्षता नास्ति तथापि तद्व्यञ्जकदर्शनात्तथा व्यपदेशः किम्भूतां वनस्पत्यादीनां श्रियं दधानां वनस्पतयो वृक्षाः परस्परं व्यतिलूनन्तीति ज्ञापकात् क्वचिदभिधानात् सकारागम इति बोध्यं । वानस्पत्येतरौ स्याद् द्रुमाद्येऽपि वनस्पतिरिति रभसः तेजो विद्यते येषां ते तेजस्विनश्चन्द्रादयः खञ्मेधास्रजादिति विन् एषां कान्तिभृतामिति सम्बन्धः कान्तिं बिभ्रतीति किप् स्वस्वतन्त्रितीति तन् । वनस्पतीनां पुष्पसम्बन्धात् सरसां विकसितपद्मादिमत्त्वात् नदीदिक्तेजस्विनां अन्यत्कान्तिभृत्त्वं ॥ १ ॥ भ०

तरङ्गेत्यादि । तरङ्गसङ्गात् सलिलोर्मिसम्पर्कात्तपलैः चञ्चलैः पलाशैः पत्रैः ज्वालाश्रियं सातिशयां दधन्ति सधूमदीप्ताग्निरुचीनि मधूमदीप्ताग्नेरिव रुचिर्येषां रक्तोत्पलानां तानि रेजुः दीप्यन्ते स्म राजेर्लिटि फणाञ्च सप्तानामिति एत्वाभ्यासलोपौ । आकुलाः कृतस्ततोयायिनः षट्पदायेषिति चलितपत्राणामग्नि-

विम्बागतैस्तीरवनैस्समृद्धिं निजां विलोक्यापहृतां पयोभिः ।
कूलानि सामर्षतयेव तेनुः सरोजलक्ष्मीं स्थलपद्महासैः ॥ ३ ॥
निशातुषारैर्नयनाम्बुकल्पैः पत्रान्तपर्य्यागलदच्छबिन्दुः ।
उपारुरोदेव नदत्यतङ्कः कुमुदतीं तीरतरुर्दिनादौ ॥ ४ ॥

शिखातुल्यत्वात् षट्पदानाञ्च धूमतुल्यत्वात् सधूमदीप्ताग्निरुचीनीत्युक्तं ॥ २ ॥ ज० म०

तरङ्गेत्यादि । ताम्रोत्पलानि रक्तोत्पलानि रेजुः राजृञ् दीप्तौ फणादित्वात् तृफलभजत्वमेति अत एवं खिलोपश्च । कीदृशानि तरङ्गसङ्गाच्चपलैश्चञ्चलैः पलाशैः पत्रैः सातिशयां ज्वालाश्रियं दधन्ति धारयन्ति धूमेन सह वर्त्तमानस्य दीप्ताग्नेरुचिरिव रुचिर्येषां । आकुलाश्चञ्चलाः षट्पदा भ्रमरा यत्र रक्तोत्पलदलानां वह्निज्वालाशङ्कां भ्रमरस्य धूमशङ्कामिति भावः ॥ २ ॥ भ०

विम्बेत्यादि । विम्बं प्रतिविम्बं तेनागतैर्निपतितैरिति । तृतीयेति योगविभागात्सः । तीरवनैः कुसुमितैरित्यर्थात् तैः करणभूतैः पयोभिः कर्त्तृभिः समृद्धिं विभूतिं निजामात्मीयां अपहृतां विलोक्य कूलानि कर्त्तृभूतानि सामर्षतयेव साक्षमतयेव सरोजलक्ष्मीं कमलशोभां पयःसम्बन्धिनीं तेनुः विस्तारितवन्ति । अत एकहल्मध्य इत्यादिना एत्वाभ्यासलोपौ । कूले सरोजासम्भव इति चेदाह स्थलपद्महासैरिति स्थलकमलविकाशैरित्यर्थः ॥ ३ ॥ ज० म०

विम्बेत्यादि । प्रतिविम्बेनागतैस्तीरवनैः करणभूतैः पयोभिः कर्त्तृभिरात्मीयां समृद्धिं सम्पत्तिं अपहृतां विलोक्य नद्यादीनां कूलानि सामर्षतया सक्रोधतया स्थलपद्महासैः स्थलकमलविकाशैः पयःसम्बन्धिनीं सरोजलक्ष्मीं पद्मशोभां तेनुः तनदुज् विस्तारे इवोत्प्रेक्षायां ॥ ३ ॥ भ०

निशेत्यादि ॥ निशायां तुषारैः हिमैः नयनाम्बुकल्पैः अश्रुतुल्यैः नयनाम्बुकारिषु पत्रेषु स्थितत्वात् । तैर्हेतुभूतैः पत्रान्तपर्य्यागलदच्छबिन्दुः पत्रान्तात्पर्य्यागलन्तः अच्छास्तुषारबिन्दवो यस्य तीरतरोः । स दिनादौ दिनारम्भे कुसुदतीमुपारुरोदेव आक्रन्दितवानिव भाति शशिवियोगादीदृशी त्वं भूतासीति रोदनक्रियया आक्रन्दनविशिष्टया कुसुदत्या ईप्सिततमत्वात् रुदिः सकर्मकः । तदाक्रन्देनं योजयन्नाह नदत्यतङ्क इति कूजत्पक्षीत्यर्थः पतेरङ्कत्पक्षीणोत्पक्षादिकः । कुसुदती कुसुदनडेत्यादिना डमतुप् भपदति वत्वम् उगीत्वात् ङीप् ॥ ४ ॥ज०म०

निशेत्यादि ॥ रात्रिसम्बन्धिहिमैर्नयनाम्बुतुल्यैर्हेतुभिः पर्य्यान्तपर्य्यागलदच्छ-

वनानि तोयानि च नेत्रकल्पैः पुष्पैः सरोजैश्च निलीनभृङ्गैः ।
परस्परं विस्मयवन्ति लक्ष्मीमालोकयाञ्चक्रुरिवादरेण ॥ ५ ॥
प्रभातवाताहतिकम्पिताकृतिः कुमुद्वतीरेणुपिशङ्गविग्रहं
निरास भृङ्गं कुपितेव पद्मिनी न मानिनी संसहतेऽन्यसङ्गमम् ॥६॥

विन्दुः सन् दिनादौ प्रातःकाले तीरस्थितो दृष्टः कुमुद्वतीं उपारुरोद इव चन्द्रस्य विरहात् त्वमीदृशी जातेति क्रन्दितवानिव पर्णान्तेभ्यः समन्तात् गलन्तो निर्मला हिमानां विन्दवो यस्य एतेन नयनाम्बुतुल्यत्वं सूचितं । नदन्तः कूजन्तः पतङ्गाः पक्षिणो यत्र एतेन पतङ्गशब्दैरेव रोदनं सूचितं । आक्रन्दनविशिष्टाया रोदनक्रियायाः सकर्मकत्वं केवलायास्त्वकर्मकत्वमिति दृष्ट्वा वतौ कुमुदस्थातो लोपो निपातनात् ॥ ४ ॥ भ०

वनानीत्यादि ॥ वनानि पुष्पैर्निलीनभृङ्गैः स्थितभ्रमरैः लीयतेः खाद्य ओदित इति निष्ठा नत्वं नेत्रकल्पैः नेत्रतुल्यैः । तोयानि च सरोजैः निलीन-भृङ्गैर्नेत्रकल्पैः विस्मयवन्ति जातविस्मयानि परस्परमन्योन्यस्य लक्ष्मीं शोभां आलोकयाञ्चक्रुरिव । आदरेण तात्पर्येण ॥ ५ ॥ ज० म० ॥

वनानीत्यादि ॥ नेत्रसदृशैः पुष्पैर्वनानि सरोजैस्तोयानि च परस्परं अन्योन्यस्य लक्ष्मीं शोभां आदरेण आलोकयाञ्चक्रुरिव शोभातिशयात् विस्मय-युक्तानि परस्परमिति क्रियाव्यतीहारे निपातः परस्परमितिपाठोऽपि तथा क्रियाविशेषणं वा नेत्रसादृश्ये हेतुगर्भविशेषणमाह निलीना आश्लिष्टा भृङ्गा येषु ॥ ५ ॥ भ०

प्रभातेत्यादि । प्रभाते यो वातस्तस्याघातेन कम्पिता चलिता आकृतिरा-कारो यस्याः पद्मिन्याः सा भृङ्गं निरास निरस्तवती । कुमुद्वतीरेणुना पिशङ्गः कपिशः विग्रहो यस्य भृङ्गस्य कुपितेव । यथा अन्यया स्त्रिया सहोषितं तदङ्गसंक्रान्तपरिमलकण्ठमालमात्मदयितं काचित् कुपिता निरस्यति तद्वत् । सा किमिति निरस्यति यतो मानिनी मानवती अन्यसङ्गमं अन्यया सह सङ्गमं न सहते आत्मसङ्गादन्यसङ्गमं न संसहते न क्षमते ॥ ६ ॥ ज० म०

प्रभातेत्यादि । पद्मिनी कुपितेव भृङ्गं निरस्यति स्म । कीदृशं कुमुद्वत्या-रेणुभिः पिशङ्गः कपिलो विग्रहः शरीरं यस्य । कीदृशी प्रातःकालसम्बन्धि-घाताभिघातेन कम्पिता आकृतिर्यस्याः सा यथा कुपिता स्त्री अन्ययोषिता सह गमितरात्रिं प्रति तदङ्गलग्नचन्दनचिह्नेन निर्णीय क्रोधात्कम्पितवती

दत्तावधानं मधुलेहिगीतौ प्रशान्तचेष्टं हरिणं जिघांसुः।
आकर्णयन्नुत्सुकहंसनादान् लक्ष्ये समाधिं न दधे मृगावित् ॥ ७ ॥
गिरेर्नितम्बे मरुता विभिन्नं तोयावशेषेण हिमाभमभ्रम्।
सरित्सुखाभ्युच्चयमादधानं शैलाधिपस्यानुचकार लक्ष्मीम्॥ ८ ॥

निरस्यति तथेयमपीति भावः यतः प्रशस्तमानवती स्त्री अन्ययोषित्सङ्गमं ईर्ष्यं प्रति न सहते अन्याशब्दस्य पुंवत्त्वेरिति पुंवत्। संसहत इति पाठे अर्थात् पत्युरन्यस्त्रीसंसर्गं न सम्यक् सहते ॥ ६ ॥ भ०

दत्तेत्यादि ॥ मधुलेहिगीताविति मधु लेढुं शीलमेषामिति णिनिः ॥ मधुलेहगीताविति पाठान्तरं तत्र लिहन्तीति लेहाः पचाद्यच् मधुनो लेहा इति षष्ठीसमासः मधु लिहन्तीति वा कर्मण्यण् दत्तावधानं दत्तमानसं हरिणं प्रशान्तचेष्टं जिघांसुः हन्तुमिच्छुरपि मृगावित् व्याधः मृगान्विध्यतीति क्विप्। यङ्लुग्ज्येत्यादिना सन्प्रसारणम् नहिदृतीत्यादिना दीर्घः। लक्ष्ये वध्ये समाधिं चित्तैकाग्र्यतां न दधे न धारितवान् जित्वाशङ् लिटः किन्त्वे आतोलोपः उत्सुकानां हंसानां नादानाकर्णयन् शृण्वन् तत्राभिरतचित्तकत्वात्। वर्त्तमानकालो भूतेनाभिसम्बध्यमानः साधुः। धातुसम्बन्धे प्रत्यया इति च आकर्णयन्निति प्रातिपदिकाद्वार्थे बहुलमिति णिच् लक्षणहेत्वोरिति शतृप्रत्ययः॥ ७ ॥ ज० म०

दत्तावधानमित्यादि। प्रशान्ता चेष्टा शरीरक्रिया यस्य तादृशमपि हरिणं जिघांसुर्हन्तुमिच्छुर्मृगावित् व्याधः उत्सुकानां हंसानां नादान् आकर्णयन् शृण्वन् लक्ष्ये शरव्ये हरिणे समाधिं अवधानं न दधे न धृतवान् हंसध्वनिश्रवणेन स्वस्योत्कण्ठितत्वात् प्रशान्तचेष्टत्वे हेतुगर्भविशेषणमाह मधुलेहिनां भ्रमराणां गीतौ दत्तमवधानं येन। मधुलेहीति ग्रहादित्वाण्णिन् मृगं विध्यतीति क्विप् वीरुद्रोधङ्कावितिं दीर्घनिर्देशात् क्वचित् क्विबन्ते पूर्वपदस्य दीर्घत्वं स्यादिति क्वचितं तेनात्र दीर्घत्वं आङ्पूर्वस्य विध्यते रूपं वा व्यधौताडे इत्यस्य दन्त्यवत्वात् नजवत्वं तेन भभान्नस्यादिजवामित्यस्य न विषयः कर्णोत्कभिदीत्यस्याङ्पूर्वस्य श्रवणार्थकत्वं। वेध्यं लक्ष्यं शरव्यश्च इत्यर्थोद्युक्त उत्सुक इति चामरः। शाकटायनेतु उन्मनसि उत्सुकः साधितः ॥ ७ ॥ भ०

गिरेरित्यादि। गिरेः कस्यचित् नितम्बे मध्यभागे स्थितमभ्रं कर्तृ मरुता विभिन्नं विश्लेषितं तोयावशेषेण पयसोऽवशिष्टतया हिमाभं हिमसदृशं

गर्ज्जन् हरिः साम्भसि शैलकुञ्जे प्रतिध्वनीनात्मकृतान्निशम्य ।
क्रमं बबन्ध क्रमितुं सकोपः प्रतर्कयन्नन्यमृगेन्द्रनादान् ॥ ९ ॥
अदृश्यताम्भांसि नवोत्पलानि कृतानि चाम्रोषत षट्पदानाम् ।
आघ्रायि वान् गन्धवहस्मुगन्धस्तेनारविन्दव्यतिषङ्गवांश्च ॥ १० ॥

सरिन्मुखानां गिरिनदीनिर्गमानामभ्युच्चयं दृष्ट्वा आदधानं कुर्व्वाणं शैलाधिपस्य हिमवतः लक्ष्मीं शोभामनुचकार अनुकृतवत् ॥ ८ ॥ ज० म०

गिरेरित्यादि । पर्व्वतस्य नितम्बे शिखरे स्थितं अभ्रं मेघः शैलाधिपस्य हिमालयस्य लक्ष्मीं शोभामनुचकार सदृशीचकार । कीदृशं महता वायुना विभिन्नं तोयावशेषेण हिमस्येव आभा यस्य सरिन्मुखस्य गिरिनदीनिर्गमस्थानस्य अभ्युच्चयं दृष्ट्वा दृष्ट्वा आदधानं कुर्व्वाणं अभ्रमिति अभं अभ्रगत्यां पचाद्यचि । यद्वा न भ्रश्यन्ति जलान्यस्मादिति गमादित्वात् हनजनाङ्गमादेर्ड इति डः । न भ्रश्यन्ति यतस्तेभ्यो जलान्यभ्राणि तान्युत इति निरुक्तिः । आपो भ्रश्यन्त्यस्मादिति वा पूर्व्ववत् डः ह्रस्वोरित्युत्वेः तेन वकारवानथवाभ्रशब्दः । अपोविभर्त्तीत्यभ्रमिति केचित् नितम्बो रोधसि स्तम्बे शिखरे च कटीरके इति विश्वः ॥ ८ ॥ भ०

गर्ज्जन्नित्यादि । हरिः सिंहः गर्ज्जन् शब्दं कुर्व्वन् क्व शैलनिकुञ्जे गिरेर्गहने साम्भसि सजलिले एवंविधे प्रदेशे प्रतिध्वनीन् प्रतिशब्दान् आत्मकृतान् निशम्य श्रुत्वा सरोषः सकोपः क्रमं बबन्ध क्रमितुमुत्पतितुं यत् सामर्थ्यं तच्चकारेत्यर्थः । अनेकार्थत्वाद्धातूनां बधिरत्र करणे वर्त्तते । किमिति प्रतर्कयन्नन्यमृगेन्द्रनादान् । इदानीं रामं व्यापारेण वर्णयन्नाह ॥ ९ ॥ ज० म०

गर्ज्जन्नित्यादि । हरिः सिंहः सजले पर्व्वतसम्बन्धिसलितादिपिहितस्थाने गर्ज्जन् शब्दं कुर्व्वन् आत्मकृतान् प्रतिनादान् वितर्कयन् सकोपः सन् क्रमितुमुत्पतितुं क्रमसमुत्पतनानुकूलशरीरक्रियां बबन्ध चकारेत्यर्थः । क्रमःपन्नौ परीप्सायां क्रमं चरणपङ्कयोरिति विश्वः । तर्कदीप्तावितिदोप्तप्रत्योऽपि तर्कधातुर्वितर्कमाह । प्रयोगतोऽन्ये मन्तव्या अनेकार्था हि धातव इत्यभिधानात् ॥ ९ ॥ भ०

अदृश्यतेत्यादि ॥ नवान्युत्पलानि येष्वम्भस्सु जलेषु तानि रामेणादृश्यत इदानि दृशेः कर्म्मणि लुङ् शलदृगुपधा इति प्राप्तस्य कसादेशस्य न दृश इति प्रतिषेधात् करितोवेति सिजेव भवति । तेन विकल्पेनाङोविधीयमानत्वात्

लतानुपातं कुसुमान्यमृष्टात् स नद्यवस्कन्दमुपास्पृशच्च।
कुतूहलाच्चारुशिलोपवेशं काकुत्स्थ ईषत्स्मयमान आस्त ॥११॥

लिङ्सिचाविति कित्त्वे गुणाभावः। षट्पदानां रुतानि अश्रोषत श्रुतानि। श्रृणोतेः कर्म्मणि लुङ् वहतीति वहः पचाद्यच् गन्धस्य वह इति क्रद्योगे षष्ठी समस्यते। गन्धवहो वायुराघ्रायि आघ्रातः कर्म्मणि लुङ्। अरविन्देन पद्मेन व्यतिषङ्गः सम्पर्कः सोऽस्ति यस्य वायोः स वातीति वान् वातेः शतृप्रत्ययः सुगन्धः शोभनो गन्धो यस्य सः अरविन्दव्यतिषङ्गवत्त्वात्। गन्धस्येदुत्पूतिसुरभिभ्य इतीकारः समासान्तो न भवति। गन्धस्येत्वे तदेकान्तग्रहणमिति वचनात् सुगन्ध आपणिक इति यथा ॥ १० ॥ज० भ०

अदृक्षतेत्यादि। तेन रामेण अम्भांसि अदृक्षत दृष्टानि नवानि उत्पलानि यत्र अम्भांसि नवानि उत्पलानि चादृक्षत इति वा षट्पदानां भ्रमराणां रुतानि शब्दा अश्रोषत श्रुतानि। वहतीति वहः पचाद्यित्वादच् गन्धस्य वहो गन्धवहो वायुराघ्रायि वान् गच्छन् वालगमनहिंसयोः अरविन्देन पद्मेन व्यतिषङ्गवान् संसर्गवान् अतएव सुगन्धः शोभनो गन्धोऽस्य इति सूत्सुरभिभ्यूतेर्गन्धादिरिति समवेतस्यैव गन्धस्य ग्रहणं अत्र तु परम्परया गन्धसम्बन्धान्न इप्रत्ययः। सुगन्धिरिति पाठे विकारसंघेत्यादिना सुगन्धशब्दात् स्वार्थे ण्विः क्वचित्तु समवायाध्याहारात् सुगन्धिः समीरण इति प्रयोग इति पाणिनीयाः। अगन्धादेर्वा इति कालापाः। अदृक्षतादिषु कर्म्मणि टौ अदृक्षतेत्यत्र इगुदुर्मदीक्ष निमृकिदिति कित्त्वान्न गुणः मान्तोऽदनत इत्यन्तस्य अत् आघ्रायीत्यत्र रतनोर्योगिणाविति इण् तनोलोपः यनञिणादिति यन्॥ १० ॥ भ०

लतेत्यादि ॥ विशिपतिपदिस्कन्दां व्याप्यमानासेव्यमानयोरिति द्वितीयान्त उपपदे नसुखिधीयते। तत्र व्याप्यमाने द्रव्यवचनस्य आसेव्यमाने च क्रियावचनस्य नित्यवीप्सयोरिति द्विर्वचनं विधीयते अत्र तु समासेनैवोक्तत्वात् नोपयुज्यत इति स्थितम्। स काकुत्स्थो रामो गच्छन् लतां लतां अनुपात्य कुसुमान्यमृष्टात् गृहीतवान् लतां अनुपात्यानुसृत्य च। तृतीयाप्रभृतीन्यन्यतरस्यामिति समासः ग्रहेर्लङ्। आघ्रायीत्यत्र अपिदिति ङित्त्वे ग्रहिज्यादिना सम्प्रसारणम्। नद्यवस्कन्दमिति नदीं नदीं अवस्कन्द्य सर्व्वानदीम् अवस्कन्द्य ढौकित्वा नदीं वा अवस्कन्द्यावस्कन्द्य उपास्पृशत् आचमनं कृतवान्। कौतूहलादिति सर्व्वत्र योज्यम् चारुशिलोपवेशमिति चारुशिलाः चारुशिला

तिग्मांशुरश्मिक्षुरितान्यदूरात्प्राञ्चि प्रभाते सलिलान्यपश्यत् ।
गभस्तिधाराभिरिव द्रुतानि तेजांसि भानोर्भुवि सम्भृतानि ॥१२॥

उपविश्य चारुशिला उपविश्योपविश्य वा आस्त आसितवान् । आशेर्लङि रूपं ईषत्क्षयमानः ईषद्वसन् ॥ ११ ॥ज०म०

लतानुपातमित्यादि । स काकुत्स्थो रामः लतानुपातं कुसुमानि पुष्पाणि अग्रहीत् ग्रहीतवान् । लतानां पातस्य पश्चात् लतानुपातमित्यव्ययीभावः लतानां पातमनुक्रम्येति लतानां पतनमनतिक्रम्येति वा अव्ययानामनेकार्थत्वादनुशब्दोऽनतिक्रमेऽपि । नद्यवस्कन्दं उपास्पृशत् स्नातवान् नद्यामवस्कन्दोऽवगाहो यत्र स्नानक्रियायां नदीयमिति बोधो यत्रेति वा उपस्पर्शः स्पर्शमात्रे स्नानाचमनयोरपीति विश्वः । कुतूहलादिति सर्वत्र योज्यं चारुशिलोपवेशमास्त चारुशिलायामुपवेशोवसनं यत्रासनक्रियायां चारुशिलानां रत्नशिलानामुपगता वेशा यस्मादिति वा । एतेन रामस्थित्या रत्नशिलानां सौन्दर्यं सूचितं ईषत् क्षयमान ईषद्वसमानः । यद्यपि क्षिङ्धातोरीषद्वसनमेवार्थस्तथापि ईषत् शब्देन अत्यन्तानुपलभ्यहास्यत्वेन गाम्भीर्यं सूचितं । पातादयो षड्न्ताः लतानुपातमादयो णमन्ता इति पाणिनीयाः । तन्नते लतां लतामनुपात्य नदीं नदीमवस्कन्द्य गत्वा चारुशिलायां उपविश्येत्यर्थः । खमते क्षणम् समूलघातमित्यत्र व्याख्यातः अग्रहीदित्यादिषु घी इषकृपस्य इन्द्रस्य ककुदि स्थितत्वात् ककुस्थ इक्ष्वाकुः इषोदरादित्वाद्दकारलोप इति रायमुकुटादयः । खमते मनीषादित्वादिति यथा देवीदासचक्रवर्त्ती कदाचिद्वाणेश्वर इव सुधीवो वैदेहेति ब्रुवाणश्चालघुककुस्थस्यार्थिनः प्रार्थना क्रियतां सफलेति वानरपुङ्गवानादिशदिति नलचम्पूश्लेषः तेन निस्तकारककुस्थशब्द इति बोध्यं प्राधान्ये राजलिङ्गे च इषाङ्के ककुदोऽस्त्रियामित्यमरः केचित्तु निपातनात् ककुदशब्दस्यातो लुकि ककुत्स्थशब्दस्तकारवान् इत्याहुः । तैस्तु निपातनात् ककुदस्यातो लुगिति इषोक्तं दान्तककुदशब्दस्य विद्यमानत्वात् । तथाहि ककुदोऽस्त्री ककुच्च स्त्री इषाङ्के राजलक्षणीति भूरिप्रयोगः ककुद्यंशे इत्यागमस्य निस्तकार एव ककुत्स्थ शब्द इति कश्चित् तन्न तकारवतोऽपि प्रयोगस्य दृश्यमानत्वात् । तथाच राघवपाण्डवीये । सार्द्धं द्विजैः संश्रुतधान्नि जिष्णावुपेयुषि ख्यातककुत्स्थवंश्य इति कनजनादिति तिष्ठतेर्डः ततोऽप्त्ये ष्णः ॥ ११ ॥ भ०

तिग्मांश्वित्यादि ॥ अदूरात्प्राचीपे सलिलान्यपश्यत् । दृशेर्लङि पाप्रेति

दिग्व्यापिनीर्लोचनलोभनीया ऋजान्वयाः स्नेहमिव स्रवन्तीः।
ऋज्वायताः शस्यविशेषषङ्क्तीस्तोषं पश्यन् वित्तृणान्तरालाः ॥१२॥

पश्यादेशः तिग्मांशोरादित्यस्य रश्मिभिः क्षुरितानि रञ्जितानि तुक्। प्राञ्चि पूर्व्वस्यां दिशि अवस्थितानि। प्रपूर्व्वादञ्चते र्क्त्विगित्यादिना क्विप् अनुषङ्गलोपः शिः नपुंसकस्य नुम्। भानोरिव तेजांसि भूवि सम्भृतानि पिण्डीकृतानि। गभस्तिभिः रश्मिभिः धाराभिरिव द्रुतानि गलितानि धारा प्रपात इति भिदादिपाठाद्द्रुदृष्टव्यम् ॥ १२ ॥ ज० म०

तिग्मांश्चित्यादि। रामोऽदूरात् समीपे सलिलानि अपश्यत् स्यादानमेति दृशः पश्यादेशः किम्भूतानि प्रभाते तिग्मांशोः सूर्य्यस्य रश्मिभिश्छुरितानि प्राञ्चि पूर्व्वदिगवस्थितानि। अत्रोत्प्रेक्ष्यते भानोस्तेजांसि गभस्तीनां रश्मीनां धाराभिर्द्रुतानि द्रवीभूतानि सन्ति भुवि सम्भृतानि धाराभिरिति धृञस्तुलेछेत्यादौ निपातः ॥ १२ ॥ भ०

दिग्व्यापीत्यादि। शस्यविशेषाणां धान्यादीनां षङ्क्तीः पश्यंस्तोष तुष्टवान्। दिग्व्यापिनीः सर्व्वदिग्व्यापनशीलाः लोभयन्तीति लोभनीयाः बहुलवचनात्कर्त्तर्य्यनीयः। लोचनानां लोभनीया इति षष्ठीसमासः। मार्जनमृजा शुद्धिः पिच्छिदादिभ्योऽङ् तया अन्वयो अनुगमो यासाम् शुद्ध्यनुगता इत्यर्थः। ततः स्नेहमिव स्रवन्तीः ऋजवश्च ता आयताश्च वित्तृणान्तरालाः उत्पाटितानि तृणानि अन्तराले मध्यभागे यासान्ताः ॥ १२ ॥ ज० म०

दिग्व्यापिनीरित्यादि। स रामः शस्यविशेषाणां धान्यादीनां षङ्क्तीः पश्यंस्तोष। किम्भूताः दिशं व्याप्नुवन्तीति अच्छादित्वात् णिन् शीलार्थे णिन्नित्यन्ये। लोचनानां लोभनीया आकाङ्क्षणीयाः तव्यानीयया इत्यनीयः। यद्वा लोचनानां लोभनीयं लोभो दर्शनेच्छारूपो यत्र पूर्व्वेण भावेऽनीयः लोचनानि लोभयन्तीति कर्त्तर्य्यनीय इति केचित् स्वमतेऽपि नियोक्तुमर्हतीति नियोग्यः प्रभुरिति वाक्यात् क्वचित् कर्त्तर्य्यपि तव्यादयः स्युरिति सूचितम्। ऋजूपलशुद्धौ पिच्चात् भीमिचिन्नीत्यादिना ङः स्त्रियामाप् अनुयन्तीति अन्वयाः पचादित्वादन् ऋजाया अन्वयाः शुद्ध्यनुगता इत्यर्थः ऋजाया अन्वयः सम्बन्धो यत्र इति वा स्नेहं स्निग्धतां अनुरागं वा स्रवन्तीरिव अतिस्निग्धत्वाद्द्रुते ऋजवः शरलाश्च ता आयता दीर्घाश्चेति उत्पाटितत्वात्तृणरहितं अन्तरालं अभ्यन्तरं यासाम् ॥ १२ ॥ भ०

वियोगदुःखानुभवानभिज्ञैः
काले नृपांशुं विहितं ददद्भिः ।
आहार्य्यशोभारहितैरमायै-
रैक्षिष्ट पुंभिः प्रचितान्स गोष्ठान् ॥ १४ ॥
स्त्रीभूषणं चेष्टितमप्रगल्भम्
चारूण्यवक्राण्यपि वीक्षितानि ।
ऋजूंश्च विश्वासकृतः स्वभावान्
गोपाङ्गनानां सुमुदे विलोक्य ॥ १५ ॥

वियोगेत्यादि ॥ पुम्भिः गोपैः प्रचितान् व्याप्तान् गोष्ठान् गावस्तिष्ठन्ति येष्विति सुपिस्थ इति कः अम्बाम्बेत्यादिना मूर्द्धन्यः तान्स राम ऐक्षिष्ट दृष्टवान् अनुदात्तेत्त्वात्तङ् दृश् वियोगदुःखस्य योऽनुभवः अनुभवनम् तस्यानभिज्ञैः तेषां पुत्रदारैः सहैव सर्व्वत्र गमनात् । एतावता कालेन एतावद्देयमिति विहितं कृतम् दधातेर्हिः नृपांशुकरं ददद्भिः आहार्य्या कटकादिभिः आहरणीया या शोभा दीप्तिः तया रहितैः अमायैः ऋजुभिः आहार्य्येति ऋहलोर्ण्यत् शोभयतीति शोभा पचाद्यच् । ण्यासश्रन्थोर्युजिति युच् न भवति तस्य स्त्रीलिङ्गे भावे अकर्त्तरि च कारके विधानात् । नन्द्यादिपाठात् ल्युर्न भवति तस्य वासरूपोऽस्त्रियामिति विकल्पितत्वात् अथवा शोभनं शोभा स्त्रीलिङ्गे भावे घञ् । क्त्यल्युटो बहुलमिति बहुलवचनादन्येऽपि कृतः प्राग्रमपि स्वाभिधेयं व्यभिचरन्ति ॥ १४ ॥ ज० म०

वियोगेत्यादि । स रामो गोष्ठान् गोस्थानानि ऐक्षिष्ट दृष्टवान् ईक्षङ् दर्शने । किम्भूतान् पुंभिः पुरुषैः प्रचितान् व्याप्तान् किम्भूतैः प्रवासित्वात् वियोगेन स्त्रीपुत्रादिविच्छेदेन यो दुःखानुभवस्तत्रानभिज्ञैः एतावति काले एतावद्देयमिति विहितं नृपस्यांशं करं ददद्भिः । आहार्य्यालङ्कारादिभिराहरणीया कृत्रिमा या शोभा तया हीनैः आहार्य्येति हरतेर्ण्यासोरिति ण्यण् शुभेर्धञन्तस्य स्त्रीलिङ्गत्वं क्वचिदभिधानात् नास्ति माया येषां गवादेरिति स्वः । गोष्ठशब्दोऽपि पुंलिङ्गोऽस्तीति प्राञ्चः गावस्तिष्ठन्ति यत्रेत्यादन्ताद्घनजनादिति ङः कृदोरित्युक्तेर्गोभूमिद्विवीत्यादिना रामानन्दसूत्रेण षत्वं मनीषादित्वाद्वा गोष्ठान् गोसहितान् प्रदेशानिति केचित् ॥ १४ ॥ भ०

स्त्रीभूषणमित्यादि ॥ गोपाङ्गनानां चेष्टितम् गमनागमनादि अप्रगल्भं लज्जावत्

विवृत्तपार्श्वं रुचिराङ्गहारं समुद्वहन्त्या रुनितम्बरम्यम् ।
आमन्द्रमन्थध्वनिदत्ततालं गोपाङ्गनानृत्यमनन्दयत्तम् ॥ १६ ॥

तच्च स्त्रीविभूषणं स्त्रीणामलङ्कारस्तथा वीक्षितानि विलोकितानि अवक्राण्यपि कटाक्षादिरहितान्यपि चारूणि शोभनानि स्वभावान् स्वाभिप्रायान् ऋजून् अकुटिलान् विश्वासकृतो विश्वासस्य जनकान् विलोक्य समुदे हृष्टवान् स रामः लिटोऽप्रित्वात्क्त्वे गुणाभावः । कार्य्याणां दर्शनात् स्वभावानां दर्शनमित्युक्तम् ॥ १५ ॥ ज० म०

स्त्रीभूषणमित्यादि । रामो गोपस्त्रीणामेतानि विलोक्य दृष्ट्वा समुदे ञिसद्दङ्हर्षे तानि कानीत्याह स्त्रीभूषणं मेखलाकङ्कणादिकं चेष्टितं गमनादिकं स्त्रीणां भूषणमिव यतोऽप्रगल्भं सलज्जं तथा अवक्राणि कटाक्षादिरहितान्यपि चारूणि वीक्षितानि विलोकितानि तथा विश्वासजनकान् ऋजून् कपटरहितान् स्वभावान् तत्कार्य्यविलोकनादेव तद्विलोकनव्यपदेशः गोपाङ्गनानां विलासवत्त्वाभावेऽपि स्वभावसिद्धचरितान्येव हर्षजनकानि भवन्ति । तथाहि विलासा नागरस्त्रीणां न तथा रमयन्ति नः । यथा स्वभावसिद्धानि दृप्तानि वनयोषितामिति कौमुदी । अन्येनाप्युक्तं सर्व्वः प्रियः खलु भवेदनुरूपचेष्ट इति ॥ १५ ॥ भ०

विवृत्तेत्यादि । गोपाङ्गनानान्दधिमन्थनाय यत् स्थानं कृतन्तत् । नृत्यमिवेति गोपाङ्गनानृत्यं कर्त्तृ तं रामं अनन्दयत् सन्तोषितवत् नन्देर्ण्यन्तस्य लङ्रूपम् विवृत्ते तिर्य्यक्चलिते पार्श्वे यत्र नृत्ये । रुचिरः शोभनोऽङ्गहारो ऽङ्गविक्षेपो यत्र समुद्वहता तिर्य्यक् समुन्नता चारुनितम्बेन कटिभागेन रम्यम् मनोहरम् । आमन्द्र ईषन्नम्भीरो यो मन्थकृतो ध्वनिः तेन दत्तस्तालो यत्र ॥ १६ ॥ ज० म०

विवृत्तपार्श्वमित्यादि । दधिविलोडनावसरे गोपाङ्गनानां गात्रविक्षेपो नृत्यत्वेन वर्ण्यते गोपस्त्रीणां नृत्यमिव नृत्यं कर्त्तृ तं राममनन्दयत् अतोषयत् । कीदृशं विवृत्तं तिर्य्यक् चलितं पार्श्वं यत्र रुचिरो मनोहरोऽङ्गहारोऽङ्गविक्षेपो यत्र । समुद्वहता तिर्य्यगूर्द्ध्वमधश्चलता चारुणा नितम्बेन रम्यं आमन्द्रेण ईषन्नम्भीरेण दधिमन्थनदण्डध्वनिना दत्तस्तालो यत्र एतेन नृत्यसादृश्यं व्यज्यते ॥ १६ ॥ भ०

विचित्रमुच्चैः प्लवमानमारात् कुतूहलं तनु ततान तस्य ।
मेघात्ययोपात्तवनोपशोभं कदम्बकं वातमजं मृगाणाम् ॥ १७ ॥
सितारविन्दप्रचयेषु लीनाः संसक्तफेणेषु च सैकतेषु ।
कुन्दावदाताः कलहंसमालाः प्रतीयिरे श्रोत्रसुखैर्निनादैः ॥१८॥

विचित्रमित्यादि । मृगाणां कदम्बकम्बृन्दन्तस्य रामस्य कौतूहलन्ततान विस्तृतवत् विचित्रम् क्षणश्वेतत्वात् उच्चैः प्लवमानम् ऊर्ध्वं जिहानम् आरात् समीपे तनु तनयशीलम् तनि गटधीत्यादिना क्रुः । मेघात्ययेन मेघापगमेन उपात्तवनोपशोभम् उपात्तं गटहीतम्वनम् उपशोभा च येनेति व्यधिकरण बहुव्रीहिः वातमजति वातमजम्वाताभिमुखङ्गच्छतीत्यर्थः वातगुनीति जगधेभ्यिति खग् । अरुर्द्विषदिति मुम् ॥ १७ ॥ ज० म०

विचित्रमित्यादि । मृगाणां कदम्बकं समूहस्तस्य रामस्य कुतूहलं ततान विस्तारितवत् कीदृशं विचित्रं नानावर्णं उच्चैः प्लवमानं प्लुङ् सर्पणे विचित्रं यथा स्यात्तथा उच्चैः प्लवमानं वा आरात् समीपे तनयतीति तनु क्षिपतनसेति कर्त्तरि क्रुः । श्रोत्रार्थं क्रुरित्यन्ये मेघात्ययेन शरत्कालेन मेघापगमेन वा प्राप्तं वनं उपशोभा च येन प्राप्तेन वनेन उपशोभते इति वा वातमजं वायोरनुगामि अभिमुखधावि वा तुभ्यदृडजीत्यादिना खः परत्वपवत् ॥ १७ ॥ भ०

सितेत्यादि । सितारविन्दानाम्प्रचयेषु समूहेषु एरच् सङ्घे चानौत्तराधर्य्य इति घञ् कौ न भवतः प्राणिषु सङ्घशब्दस्य रूढत्वात् लीनाः कलहंसमालाः तथा संसक्तफेणेषु च सैकतेषु पुलिनेषु लीनाः सिकता येषु विद्यन्त इति देशे लुबिलचौ चेति चकारादण् कुन्दावदाताः कुन्दमिवावदाताः शुक्लाः उपमाना नीत्यादिना समासः । प्रतीयिरे ज्ञाताः तेन रामेणेति विभक्तिविपरिणामेन सम्बन्धः । कर्म्मणि लिट् इणोयण् द्विर्व्वचनेऽचीति स्थानिवद्भावाद् द्विर्व्वचनम् । श्रोत्रसुखै र्मधुरैर्निनादैः करणभूतैः नौ गदेत्यादिना घञ् घरद्वर्णनसपसं हरन्नाह ॥ १८ ॥ ज०म०

सितारविन्देत्यादि । अर्थाद्रामेण कर्त्रा श्रवणसुखकारिभिर्निनादैः कलहंसमालाः प्रतीयिरे ज्ञाताः कर्म्मणि ठी यिणोऽचणाविति इणो यादेशः निनादस्तुतिव्यतिरेकेणाप्रत्यये हेतुगर्भविशेषणमाह शुक्लपद्मसमूहेषु फेणयुक्तेषु सैकतेषु च लीना शुक्लाः कन्दपुष्पवत् शुक्लाःसिकताशब्दात् विकारसंज्ञेत्यादिना

न तज्जलं यन्न सुचारुपङ्कजं
न पङ्कजं तद्यदलीनषट्पदम् ।
न षट्पदोऽसौ न जुगुञ्ज यः कलं
न गुञ्जितं तन्न जहार यन्मनः ॥ १९ ॥

तं यायजूकाः सह भिक्षुसख्यैस्तपःकृशाः शान्त्युदकुम्भहस्ताः ।
ययावरा: पुष्पफलेन चान्ये प्रानर्चुरर्च्यां जगदर्चनीयम् ॥ २० ॥

कर्दमे विकारार्थे अस्त्यर्थे वा णः सैकतं वालुकामयस्थानमुच्यते कादम्बे कलहंसः स्याद्राजहंसे च दृश्यते ॥ १८ ॥ भ०

न तज्जलमित्यादि । किम्बहुनोक्तेन सर्व्वथा न तज्जलं यत् सुचारुपङ्कजञ्च बभूव पङ्कजमपि यदलीनषट्पदन्तदपि न । असौ षट्पदोऽपि तथाविधो नाभूत् । यः कलम्मधुरञ्च जुगुञ्ज न गुञ्जितवान् । गुजि अव्यक्ते शब्दे इदितोनुम् धातोरिति नुमि लिटि रूपं । गुञ्जितमपि तत् नैवासीत् यन्मनो न जहार न हृतवत् रामस्य लोकस्य वा ॥ १९ ॥ ज० भ०

न तदित्यादि । अरदि तज्जलं नास्ति यत्र न सुचारूणि पङ्कजानि सन्ति तत् पङ्कजमपि नास्ति यत्र षट्पदा न लीनाः अनाश्लिष्टा लीङ्य श्लिषि स्रुस्वाद्योरिति क्त्वस्य नत्वं । असौ षट्पदोऽपि नास्ति यः कलं मधुरास्फुटं न जुगुञ्ज गुजिकूजने तद्गुञ्जितमपि नास्ति यन्मनो न जहार ॥ १९ ॥ भ०

तमित्यादि । यायजूकाः अत्यर्थं यजनशीलाः यजजपदशां यङ इत्यूकः अतोलोपः यस्य हलः ते तपोवनस्थितास्तं राममागच्छन्तमानर्चुः सुष्ठु पूजितवन्तः अर्चेर्लिटि द्विर्वचनम् अतआदेरिति दीर्घत्वम् । तस्मान्नुड्द्विहल इति नुट् सह भिक्षुसख्यैः भिक्षणशीला भिक्षवः परिव्राजकाः सनाशंसभिक्ष उः तेषां - ये प्रधानाः तैः सह तपःकृशाः तपसा दुर्बलाः शान्त्यर्थमुदकलेन पूर्णाः कुम्भाः एकहलादाविल्यादिना उदकस्य उदभावः स हस्ते येषामिति बहुव्रीहिः प्रहरणार्थेभ्यश्च इति वा । शान्त्युदकुम्भस्यहितनिवारणसाधर्म्यात् उपचारेण प्रहरणत्वे शिरःस्फुदकदानेन प्रानर्चुः । अन्ये मुनयो यायावरा एकत्रानियतनिलयाः यातेर्यङन्तात् यश्चयङ इति वरच् । अतोलोपादि पुष्पफलेन प्रानर्चुः पुष्पाणि च फलानि चेति जातिरप्राणिनामिति एकवद्भावः । अर्च्या अर्चनार्हाः अर्हेकत्वः अर्चनीयमित्यत्रापि । जगताञ्च-

विद्यामथैनं विजयां जयाङ्घ
रक्षोगणं क्षिप्नुमविक्षतात्मा ।
अध्यापिपन्नाधिसुतो यथाव-
न्निघातयिष्यन् युधि यातुधानान् ॥ २१ ॥

गङ्विधां अर्चनीयम् क्त्यानां कर्त्तरि वेति पक्षे षष्ठी । नतु कर्त्तृकर्म्मणोः कृतीति षष्ठी ॥ २० ॥ ज० म०

तमित्यादि । यायजूकाः पुनः पुनरतिशयेन वा यज्ञशीलाः भिक्षूणां परिव्राजकाणां मुख्यैः सह जगतामर्च्चनीयं तं रामं प्रानर्च्छुः अर्च्च पूजायां स्वान्नादाद्दादाद्यक्षोरिति खेरात् जाग्ट्यङन्तेति जकः । सनभिलेति भिलेरुपत्ययः कीदृशाः तपोभिः क्षयाः शान्त्यर्थं यदुदकं तस्य कुम्भो हस्ते येषां एतेन शान्तिजलेनार्च्चां प्रतीयते । उदकुम्भा इत्यत्र समासे उदकस्यासंयुक्तकृलादौ पूर्य्य इति उदादेशो विकल्पेनेति परे समते उदशब्दोऽस्ति । अन्ये मुनयः पुष्पफलेन प्रानर्च्छुः यायावराः सन्तो नानावनभ्रमणशीलाः यातेर्यङन्तात् यायायभासकसेति वरः यङ्लुक गत्यर्थाद्वक्रे यङिति केचित् यातिरत्र ज्ञानार्थः सर्व्वे गत्यर्थाः प्राप्त्यर्था ज्ञानार्थाश्चेति न्यायादत्यर्थज्ञानशीला इत्यर्थः । अर्च्याः स्तुत्यर्च्चाः ऋचृशनुत्यां तेल्याः शक्यार्हप्रेष्येति ण्यण् सेमक्षात् न चजोः कगाविति कत्वं ॥ २० ॥ भ०

विद्यामित्यादि । तपोवनस्याग्नः गाधिसुतः एनं रामं द्वितीयाटाविति नादेशः । विद्यान्नाम्ना विजयाङ्घयाङ्घ यथावत् यथाविधि अध्यापिपत् पाठितवान् णौजसंयङोरिति गाङभावपक्षे रूपम् अधिपूर्व्वादिङो हेतुमण्णिचि क्रीङ् जीनां णौ ह्रस्वात्वम् पुगादिनिषयः । रक्षोगणम् क्षिप्नुम्प्रेरयितारम् त्वक्षिरक्षधीत्यादिना क्नुः नलोकेति षष्ठीप्रतिषेधात् द्वितीयैव । अविक्षतात्मा रागादिभिरनभिभूतचित्तवृत्तिः । तस्य हि विद्या अमोघा भवति युधि संग्रामे यातुधानान् रक्षांसि निघातयिष्यन् मारयिष्यन् । हन्तेर्हेतुमण्णिच् घत्वं ल्युट्ल्युटः सदादेशः ॥ २१ ॥ ज० म०

विद्यामित्यादि । अथानन्तरं युधि संग्रामे यातुधानात् राक्षसान् रामद्वारा निघातयिष्यन् गाधिसुतो विश्वामित्र एनं रामं नाम्ना विजयां जयाङ्घ विद्यां यथावत् यथाविधि अध्यापिपत् पाठयामास । किम्भूतं रक्षोगणं क्षिप्नुं क्षिप ग्रौ नुदि क्षिपत्वसीति कर्त्तरि क्नुः शीलार्थे क्नुरित्यन्ये । ढधेक्नुत्वेति

आयोधने स्थायुकमस्त्रजातममोघमभ्यर्णमहाहवाय ।
ददौ बधाय क्षणदाचराणां तस्मै मुनिः श्रेयसि जागरूकः ॥ २२ ॥

स्रुते उदन्तक्षत्रत्ययवर्ज्जनात् न ढे धी । कीदृशः अविक्षतो वाणादिभिरनुपहत आत्मा यस्य । एनमिति इदमसमानार्थकस्य एनशब्दस्य रूपं द्वितीयेति स्त्रस्यानुक्तिविषयत्वात् । जहातु नैनं कथमर्थसिद्धिः संश्रय्य कर्णादिषु तिष्ठते य इति भारविः । अध्यापिपदिति अधीङ्लध्ययने जिः प्रेरणे इति जिः क्रीजीङोऽजेत्या ह्रीक्नोति पन् जिश्नीत्यङ् नाजन्तादेरिति निषेधात् धुर्द्विष्वङीति पीत्यस्यैव द्वित्वं जेर्लोपः निघातविघ्नमिति पूर्ववत् जिः ह्वनश्वाङिति तङ् खेर्हौघ इति घः ॥ २१ ॥ भ०

आयोधनइत्यादि । स मुनिः तस्मै रामायास्त्रजातम् अस्त्रसमूहम् ददौ दत्तवान् । ददातेर्लिट् णल् आत औ णलः आयुध्यन्ते अस्मिन्निति आयोधनम् संग्रामः अधिकरणे ल्युट् तत्र स्थायुकं स्थितिकरणशीलम् जयावहत्वात् । लषपतेत्यादिना उकञ् आतो युक् अतएवामोघम् अवन्ध्यम् अव्यर्थामोघत्वात् अभ्यर्णो निकटो महाहवो यस्य तस्मै अभिपूर्व्वादर्दैः निष्ठायाम् अभेश्चाविदूर्य्य इतीट् प्रतिषेधः रदाभ्यामिति नत्वम् अभ्यर्णः आहव इति आह्वयन्ते अस्मिन्युद्धायेति ह्वयतेराङ्पूर्व्वादाङि युद्धे इति सम्प्रसारणम् अप्प्रत्ययः गुणावादेशौ बधाय क्षणदाचराणामिति क्षणदा रात्रिः तत्र चरन्तीति चरेष्टः तत्र हि महाहवे रामो राक्षसान् हनिष्यतीति हनश्च बध इति बधादेशः क्रत्ययोगे क्षणदाचराणामिति कर्म्मणि षष्ठी । श्रेयसि जागरूकः तत्कल्याणे सावधानः जागर्त्तेरूकः ॥ २२ ॥ ज० म०

आयोधनइत्यादि । मुनिः क्षणदाचराणां राक्षसानां बधाय हिंसार्थं तस्मै रामाय अस्त्रजातं ददौ कीदृशं आयोधने युद्धे स्थायुकं स्थितिशीलं जयावहत्वात् भूस्थाभूकमिति जुकः यनञ्जिणदिति यत् अमोघं अव्यर्थं तस्मै कीदृशाय अभ्यर्णः समीपवर्त्ती महानाहवो युद्धं यस्य अभ्यर्णेति अभिपूर्व्वस्यार्दतेः क्तान्तरूपं क्षुध्यवाढेति निपातः । आह्वयन्ते योद्धारोऽस्मिन् इति आहवः अभिधानाज्जिः कीदृशो रामस्य साधूनां वा श्रेयसि कल्याणे जागरूकः सावधानः जाग्रयङन्तेति जागर्त्तेरूकः । आयुध्यन्तेऽस्मिन् योद्धार इत्यायोधनं आधारेऽनट् । हन्तेः कभावेऽमौ कृत्यनि कृते हनबधष्टीक्ष्णोतीति बधादेशः समूहार्थस्य जातस्य चवर्गादित्वमीरितमिति विश्वः ॥ २२ ॥ भ०

तं विप्रदर्शं क्रतघातयत्ना यान्तं वने रात्रिचरी डुढौके ।
जिघांसुवेदं धृतभासुरास्त्रस्तां ताडकाख्यां निजघान रामः ॥ २३ ॥
अथालुलोके क्रतधूमकेतुशिखाञ्जनस्निग्धसमृद्धशाखम् ।
तपोवनं प्राध्ययनाभिभूतसमुच्चरच्चारुपतत्रिशिञ्जम् ॥ २४ ॥

तमित्यादि । विद्यास्त्रजातञ्चादाय यज्ञकर्म्मणि विघ्नोपशमनार्थम्वने यान्तं रामम् रात्रिचरी राक्षसी ताडकाभिधाना डुढौके ढौकते स्म । ढौकतेरात्मनेपदिनो लिटि रूपम् ताञ्च रामो निजघान निहतवान् विप्रदर्शं क्रतघातयत्ना विप्रान् ब्राह्मणान्दृष्ट्वा क्रतमारणाभियोगा रात्रिचरी रामोऽपि जिघांसुवेदन्धृतभासुरास्त्रः जिघांसुं विदित्वा धृतभासुरं भासनशीलम् अस्त्रं येनेति बहुव्रीहिः विप्रदर्शञ्जिघांसुवेदमिति कर्म्मणि इगुपधेति सकल्य इति णमुल् ॥ २३ ॥ ज० म०

तमित्यादि । वने यान्तं गच्छन्तं तं रामं रात्रिचरी डुढौके प्राप्नवती ढौकृङ् गत्यां भ्वादेरोदित्वात् ओदितश्चेति क्तेरौकारस्य ह्रस्व उकारः रात्रौ चरतीति पचाद्यच्प्रत्ययान् ततो ङीप्रत्ययः ङीदयौ विप्रदर्शं विप्रं दृष्ट्वा क्रतो घाते यत्नो यया घातदृति हन्तेर्घञन्तस्य रूपं यत्न इति स्वपरत्नेति यतेर्नङ् जिघांसुं विदित्वा धृतं भासुरं दीप्तमस्त्रं येन स रामः तां ताडकानाम्नीं रात्रिचरीं निजघान भासङ् दीप्तौ भिद्भासभञ्ज इति घुरः विप्रदर्शं जिघांसुवेदमिति षणम्बाभीक्ष्ण्ये णमुल् योगविभागाद्वीप्सायाम् अथवा विप्राणां दर्शी दर्शनं यस्मात् रामस्य विशेषणं एतेन रक्षोभिया पलायमानानां विप्राणां पूर्व्वं दर्शनं भासीत् रामागमे तु विप्रदर्शनमिति व्यज्यते जिघांसुं वेत्तीति ढाक् षण् पचाद्यच्प्रत्ययान् वा दृडपि रामस्य विशेषणम् ॥ २३ ॥ भ०

अथेत्यादि । अथासौ रामो रात्रिचरीं हत्वा तपोवनम् आलुलोके दृष्टवान् । कथम्भूतं क्रतधूमकेतुशिखाञ्जनस्निग्धसमृद्धशाखम् क्रतश्चासौ धूमकेतुरग्निश्च क्रतधूमकेतुः तस्य शिखाञ्जनेन स्निग्धाः समृद्धाश्च फलादिना शाखा यस्य तपोवनस्य । प्राध्ययनेन वेदपाठेन अभिभूता तिरस्कृता समुच्चरन्तो चार्वी शोभना पतत्रिणाम्पक्षिणां शिक्षा ध्वनियेत्र शिजि अव्यक्ते शब्दे शिञ्जनं शिक्षा गुरोश्च हल इत्यकारप्रत्ययः । पतन्तं त्रायन्त इति पतत्राणि पक्षाः आतोऽनुपसर्गे कः सानि येषां सन्तीति पतत्रिणः । पतङ्गशिञ्जमिति पाठान्तरम् ॥ २४ ॥ ज० म०

अथेत्यादि । ताड़कावधानन्तरं रामस्तपोवनं आलुलोके लोकङ्लोके कीदृशं

क्षुद्रान्न जन्तुर्हरिणान्मृगेन्द्रा विश्रम्भसे पक्षिगणैस्समन्तात् ।
नंनम्यमानाः फलदित्सयेव चकाशिरे तत्र लता विलोला ॥ २५ ॥
अप्यूपुजन्विष्टरपाद्यमाल्यैरातिथ्यनिष्णा वनवासिमुख्याः ।
प्रत्यग्रहीष्टां मधुपर्कमिश्रं तावासनादि क्षितिपालपुत्रौ ॥ २६ ॥

हुतस्य धूमकेतोरग्नेः शिखाया यद्वनं तेन स्निग्धा सम्पन्ना फलपुष्पवती शाखा यत्र तथा धूमकेतुः स्मृतो वह्नावुत्पातग्रहभेदयोरिति विश्वः । प्राध्ययनेन प्रकृष्टाध्ययनेन अभिभूता समुच्चरन्ती उच्चरन्ती चारुणां पतत्रिणां पक्षिणां शिक्षा अस्फुटशब्दो यत्र शिक्षि ल किङस्फुटध्वनौ शेमन्नात्मरोरिति ङः स्त्रीत्वञ्च अमरकोषे तु भूषणानान्तु शिक्षितमित्युपलक्षणं ॥ २४ ॥ भ०

क्षुद्रानित्यादि । तत्र तस्मिंस्तपोवने तपोधनानामित्यभावात् । क्षुद्रानितरानपि हरिणान्मृगेन्द्राः सिंहाः न जघ्नुः न बाधितवन्तः जघ्न इति क्षुद्राः स्कायितञ्जीत्यादिना औणादिको रक् लिच्यन्यतरस्यामिति अदेर्घस्तृ गमहनेत्युपधालोपः खरिचेति चर्त्वम् शासिवसीत्यादिना षत्वम् पक्षिगणैः समन्तात्सर्वत्र विरुद्धैरपि काकोलूकादिभिः परस्परम्विश्रम्भसे विश्वस्तम् भावे लिट् लताश्च विलोलाश्चपलाश्चकाशिरे शोभन्ते स्म फलदित्सयेव मुनिभ्यः फलन्दातुमिच्छयेव नम्रम्यमानाः अत्यर्थंनम्यन्त्यः दातुमिच्छा दित्सा ददातेः सन् सनिमीमेत्यादिना इस् अत्र लोपोऽभ्यासस्येति अभ्यासलोपश्च । ससेत्यादिना सकारस्य तकारः अप्रत्ययादित्यकारप्रत्ययः । फलानां दित्सेति कर्म्मणि षष्ठीं विधाय क्रियोगे समासः । नम्रम्यमाना इति नमेर्यङि नुगतोऽनुनासिकेति नुक् यङन्नाच्छानच् आने मुक् ॥ २५ ॥ ज० म०

क्षुद्रानित्यादि । तत्र तपोवने मृगेन्द्राः सिंहाः क्षुद्रान् हरिणान् न जघ्नुः अद् लौ भक्षे घ्वांवेति घस्यादेशः हनगमित्यडलोपः । झषभक्षोरिति घस्य कः क्ङितीति षः पक्षिगणैः समन्तात्सर्वतो विश्रम्भसे तपःप्रभावात् । नित्य विरोधस्याप्यभावाद्भावे ठी विलोलाश्चञ्चला लताश्चकाशिरे काशृङ्दीप्तौ फलानि दित्सयेव नंनम्यमाना अतिशयेन नताः नमेर्यङन्तस्य अमजपजभेति खेर्नुन् फलभारनतानामुक्तेरेवेयं । दातुमिच्छा दित्सा दाञः सनि मिमीमादेतीस् खिलोपश्च सत्सरे इति तः संख्यादेः स्थियामाप् ॥ २५ ॥ भ०

अप्यूपुजन्नित्यादि । वनवासिमुख्याः महर्षयो विष्टरादिभिः अप्यूपुजन् पूजित-

दैत्याभिभूतस्य युवामवोढं मग्नस्य दोर्भिर्भुवनस्य भारं ।
हवींषि संप्रत्यपि रक्षतं तौ तपोधनैरित्यभिषिषातां ॥ २७ ॥

वन्तः तौ क्षितिपालपुत्त्वावित्यर्थात् द्वितीयान्तेन योज्यम् वनवासीति शश्वत्त्वादिना विकल्पेन सप्रभ्या अलुक् पूजेः स्वार्थिकण्यन्तस्य णौ चङि ह्रस्वः । दीर्घो लघोरिति अभ्यासस्य दीर्घः विष्टरमासनम् दृत्त्वासनयोर्विष्टर इति निपातनात् । पाद्यं पादार्घसूदकम् पादावभ्यामिति यत् तदर्थत्वात्प्लवाभावः माल्यानि कुसुमानि मालायां साधूनि तत्र साधुरिति यत् । आतिथ्यनिष्णाः अतिथ्यर्थम् आतिथ्यम् अतिथेर्ञ्यः तत्र निष्णाः कुशला निनदीभ्यां स्नातेः कौशल इति षत्वम् तौ च क्षितिपालपुत्त्वौ रामलक्ष्मणौ तदासनादि प्रत्यग्रहीष्टामतिगृह्णीतवन्तौ प्रतिपूर्व्वात् ग्रहेर्लुङ् तसस्ताम् ग्रहोलिटि इति दीर्घः षत्वष्टुत्वे मधुपर्कमिश्रम् मधुपर्केण सहेत्यर्थः ॥ २६ ॥ ज० म०

अपूपुजन्निति । वनवासिनां मुनीनां मुख्या विष्टरपाद्यमाल्यैरपूपुजन् अर्थात् रामलक्ष्मणौ पूजकपूजे टी ञ्नीत्यङ् अप्रङ्गुङः स्व इति स्वः खेः सन्वदित्यादिना खेर्घः विष्टर आसनं वेत्तो नाम्नीति रामानन्दस्नूत्वेन मनीषादित्वात् वा षत्वं । दृत्त्वासनयोर्विष्टर इति क्रमदीश्वरः । आसने कुशमुष्टौ च विष्टर इति विश्वः । विष्टरो विटपी दर्भमुष्टिः पीठाद्यमासनमित्यमरः । पादार्घं जलं पाद्यं विकारसंघेति ष्यञः पाद्यं पादाय वारिणीत्यमरः । मालैव माल्यं स्वार्थे ष्यञः मालायां साधूनि माल्यानि कुसुमानि वा किम्भूताः आतिथ्यनिष्णाः अतिथ्यर्थं आतिथ्यं अतिथिशब्दात् तादर्थ्ये ष्यञः स्वार्थे ष्यञः इति कैश्चित् क्रमादातिथ्यातिथेये स्नातिथ्यर्थेऽत्र साधुनीत्यमरः । वस्तुतस्तु आतिथ्यशब्देन अतिथिसेवनमुच्यते तत्र निष्णाः कुशला नदीस्नातिनिस्नात्योर्दीर्घे इति रामानन्दस्नूत्वेन मनीषादित्वाद्वा षत्वं । निनदीभ्यां स्नः कौशले इति षत्वविधायकं क्रमदीश्वरस्नूत्वं । क्षितिपालस्य पुत्त्वौ रामलक्ष्मणौ मधुपर्केण सहितं आसनादि प्रत्यग्रहीष्टां स्यां सिः ग्रहेरिमोर्घोऽयामिति घः किलादिति षः दृभिरिति तस्य टः ॥ २६ ॥ भ०

दैत्येत्यादि । दितेरपत्यानि दैत्याः दित्यादित्येत्यादिना ण्यः तैरभिभूतस्य मग्नस्य गरण्यस्य भुवनस्य भारमितिकर्त्तव्यतालक्षणन्दोर्भिर्भुजैः युवामवोढम् ऊढवन्तौ नरनारायणौ युवामित्युक्तौ त्वञ्च त्वञ्चेति एकशेषः अवोढमिति वहेर्लुङ् थसस्तम् कृलन्त लक्षणा दृद्भिः सिजलोपः सहिवहोरित्योत्वं ढत्वष्टुत्वढलोपः

तान् प्रत्यवादीदथ राघवोऽपि यथेप्सितं प्रस्तुत कर्म धर्म्यम् ।
तपोमरुद्भिर्भवतां शरारिणः संधुक्ष्यतां नोऽरिसमिन्धनेषु ॥ २८ ॥

दोरिति दमेर्दोसित्यौणादिको डोस् । हवींषि होतव्यानि सम्प्रत्यपि रक्षतम् अर्चिरुचिरुक्षरुपिक्षादिक्षदिभ्य इसिरित्यौणादिक इसिः । राक्षसैः उपहन्यमानानि रक्षतं प्रार्थनायां लोट् । शण्धसस्तम् इत्यमिति इदमस्यसुः अनेनोक्तप्रकारेण तपोधनैस्तप एव धनं येषामिति अभाषिषाताम् अभिहितौ भाषतेः कर्म्मणि लुङ् सिजिटौ ॥ २७ ॥ ज० म०

दैत्येत्यादि । तप एव धनं येषां तैस्तपोधनैस्तपस्विभिस्तौ रामलक्ष्मणौ इत्यमभाषिषातां भाषृङ्वाचीति कर्म्मणि टौ इदं प्रकारं इत्थं निपातनात् किं तदित्याह युवां भुवनस्य भारं परिरक्षणं दोर्भिर्भुजैः अवोढं वक्ष्येष्यामस्तं भरसखादिति सेर्लुक् ह्रोढोभावेति हस्य ढः ढभात्तथोरिति तस्य धः ष्टुभिरित्यादिना धस्य ढः सहवह्रोऽदोढि इत्योत्वं ट्रोट्रीति ढस्य लोपः कीदृशस्य दैत्याभिभूतस्य अतएव मग्नस्य नष्टप्रायस्य दितेरपत्यानि दैत्याः वाह्वाद्यत इत्यादिना गर्गादित्वात् यञ्यः भज्जेरौदित्वात् स्फूर्ज्यादीत्यादिना क्नस्य नः स्यादेःसलोपः इत्यनेन सलोपः । चजोःकगाविति स्फूर्जे अग्निम् यज्ञाङ्गयज इति क्ते ये अग्निमुद्धातवस्तेषां चजोः कगौ स्यातां इति सर्व्वं सङ्गतं भवति तथापि यतोऽसेम इतिक्तं चजोर्धिति क्ते च परे चजोः कगौ भवत इति सूचनार्थं तेन मग्नस्नभुग्नादयः सिध्यन्ति व्रस्जेः कङ् चेति कङ्विधानं शक्ऋजेति षङ्विधाननिरासार्थं तेन सृजस्तु सृष्ट इत्यत्र षङ्विशेषविधित्वादिति देवीदासचक्रवर्त्तिना व्याख्यातं तेनैव सूत्रेण जस्य गः मनीषादित्वाद्वा सम्प्रत्यपि हवींषि होतव्यानि राक्षसेभ्य रक्षतं विधिनिमन्त्रणेति प्रार्थनायां गीः क्ङिलोमेदने त्वासुसिति इस् ॥ २७ ॥ भ०

तानित्यादि ॥ अथैतस्मिन् प्रस्तावे राघवोऽपि रघुसुतः तान्मुनीन् प्रत्यवादीत् वदव्रजेति हृद्विः यथेप्सितं यथाभिमतं आप्नोतेः आप् ज्रपृधामीदितीत्त्वम् अभ्यासलोपश्च सनन्तात्कर्म्मणि निष्ठा । धर्म्मादनपेतन्धर्म्यं यागादि कर्म्म प्रस्तुत प्रारभध्वम् प्रपूर्व्वस्तौतिः प्रारम्भे वर्त्तते तस्मान्निमन्त्रणे नियोगकरणे लोट् थस्य तः शपोलुक् तपांसि मरुत इव तपोमरुद्भिः भवतान्तपोमरुद्भिः नोऽस्माकं बहुवचनस्य वस्नसाविति नसादेशः शरारिणः शरोऽग्निरिव संधुक्ष्यतां दीप्यताम् धुक्षाधिक्षसन्दीपनक्लेदनजीवनेषु तस्मात्कर्म्मणि लोट् अरिसमिन्धनेषु अरिकाष्ठेषु

प्रतुष्टुवुः कर्म्म ततः प्रक्लृप्तैस्ते यज्ञियैर्द्रव्यगणैर्यथावत् ।
दक्षिण्यदिष्टं क्रतमार्त्विजीनैस्तद्यातुधानैश्चिचिते प्रसर्पत् ॥ २९ ॥

समिध्यते एभिरिति समिन्धनानि करणे ल्युट् अरयः समिन्धनानीव ॥ २८ ॥ ज० म०

तानित्यादि ॥ अथ तद्वचनानन्तरं रघोरपत्यं रामोऽपि तान् प्रत्यवादीत् प्रत्युक्तवान् वदेर्ण्यां सौ व्रजवदेति व्रिः यूयं यथेप्सितं धर्म्मादनपेतं कर्म्म प्रस्तुत आरभध्वं विधिनिमन्त्रणेति विधौ गौ लुगङ्गप्रोऽप इत्यदादित्वात् श्नोलुक् आङ्गनौकिव्यापने सनि ऋपद्भ्रांपामीर्ष्य इतीखिलोपौ भवतां तपोवायुभिर्नोऽस्माकं शरान्निः अरिसमिन्धनेषु शत्रुकाष्ठेषु संधुक्षतां धुक्षङ् सन्दीपने समर्धनाशिषोर्गीतौ आशिषि कर्म्मणि गो तपांसि मरुत इव शरोऽग्निरिव अरयः समिन्धनानीव इति व्याघ्रादौ लुङ्हुणस्तुत्यर्थेति समास इति क्रमदीश्वरादयः स्वमते इवादेर्द्योतकत्वात् एकार्थतास्त्येव अविशेषणस्यास्यादोबहुत्वमेकत्वद्वित्वयोर्विकल्पेनेति पाणिन्यादयः स्वमते कहव्वान्येकद्विबहुष्वेकश्च इति सूत्रे एकद्विबहुत्वं विवक्षया साक्षात्सम्बन्धेन परम्परासम्बन्धेन वेति व्याख्यानादत्रात्मगुणानां बहुत्वेनैव बहुजनसाध्यकार्य्यकारित्वात् द्वित्वे बहुत्वं ॥ २८ ॥ भ०

प्रत्वित्यादि । ततो रामवचनादनन्तरमनपोधनाः कर्म्म यागक्रियामप्रतुष्टुवुः यथावत् यथाविधि प्रारब्धवन्तः यज्ञियैः यज्ञकर्म्मार्हैः द्रव्यगणैः प्रक्लृप्तैः मिलितैः कृपोरो लः दक्षिणामर्हन्तीति दक्षिण्याः महासुनयः काडङ्करदक्षिणाच्छेति चकारादुत् तैर्दिष्टमुक्तम् क्रतमार्त्विजीनैः ऋत्विक्कर्म्मार्हैरनुष्ठितम् ऋत्विजश्च ब्रह्मादयः षोडश पठिताः तच्च कर्म्म प्रसर्पत् दृद्भिरुत् यातुधानैः राक्षसैः चिचिते ज्ञातम् चितीसंज्ञाने इत्यस्मात् कर्म्मणि क्तिट् । यज्ञियैरार्त्विजीनैरिति यज्ञर्त्विग्भ्यां घखञाविति तत्कर्म्मार्हतीति ॥ २९ ॥ ज० म०

प्रतुष्टुवुरित्यादि । ततो रामवचनानन्तरं ते सुनयो द्रव्यगणैः स्रुवादिभिः करणभूतैर्यथाविधि यागकर्म्म प्रतुष्टुवुः आरब्धवन्तः । किम्भूतैः प्रक्लृप्तैर्विरचितैः कृपः क्लृपोऽकृपादाविति क्लृपादेशः यज्ञियैः यजेः खपरश्चक्षयतेति नङ् जिनिषेधश्च यज्ञाय साधवो यज्ञिया ढधेकादिति इयः तत्कर्म्म यातुधानैराक्षसैश्चिचिते ज्ञातं चिती संज्ञाने कर्म्मणि ठी । कीदृशं दक्षिण्यदिष्टं दक्षिणामर्हन्ति ढधेकादिति ण्यः तस्यानित्यविवक्षया न व्रिः दक्षिण्या ब्रह्मत्वेनारोपिता सुनयः तैर्दिष्टं आर्त्विजीनैः ऋत्विक्कर्म्मार्हैः क्रतं । ऋतौ यजतीति क्विप्

आपिङ्गरुच्चोर्द्धशिरस्यबालैः शिरालजङ्घैर्गिरिकूटदघ्नैः।
ततः क्षपाटैः पृथुपिङ्गलाक्षैः खं प्रावृषेण्यैरिव चानशेऽब्दैः॥ ३०॥
अधिज्यचापः स्थिरबाहुमुष्टिरुदञ्चिताक्षोऽञ्चितदक्षिणोरुः।

अहस्खेति जिः ऋत्विजः कर्म्म आर्त्विजं कर्म्मार्थे विकारसंघेत्यादिना ष्णः तदर्हतीति ढकेकादित्यादिना खीनः ऋत्विक् शब्दात् स्वार्थे खीनो वा प्रसर्पद्दृद्धिं गच्छत् ॥ २९ ॥ भ०

आपिङ्गेत्यादि। ततः कर्म्मप्रवर्त्तनादनन्तरम् क्षपाटैः निशाचरैः अटन्तीत्यटाः प्रचाद्यच् क्षपायामटा इति सप्तमीति योगविभागात्समासः खमाकाशमानशे व्याप्तम् अश्नोतेः कर्म्मणि लिट् अश्नोतेश्चेति नुट्। शिरसि जाताः शिरस्या शरीरावयवाद्यत् आपिङ्गा आ समन्तात् पिङ्गा विद्युदिव रुचाः रूक्षाः ऊर्द्धं शिरस्या बाला येषां तैः। अन्योऽपि शिरस्यो भवति इति बालग्रहणम् अमङ्गलबाला इत्यर्थः। शिराः सन्ति यासामिति प्राणिस्यादातोलजन्यतरस्यामिति लच् शिराला जङ्घा येषान्तैः गिरिकूटदघ्नैर्गिरिकूटप्रमाणैः प्रमाणे द्वयसजिति दघ्नच्। पृथूनि विस्तीर्णानि पिङ्गलानि चाक्षीणि येषान्तैः। बहुव्रीहौ सक्थ्यक्ष्णोरिति षच्। प्रावृषेण्यैरिवेति प्रावृष एण्यः अब्दसंघैः क्षणसाधर्म्यात्। अपोददतीति अब्दाः चकारः पादपूरणार्थः ॥ ३० ॥ ज० म०

आपिङ्गेत्यादि। ततस्तज्ज्ञानानन्तरं क्षपाटैराक्षसैः खं आकाशं आनशे व्याप्तं अशूङनव्याप्तिसंहत्योः कर्म्मणि ठौ स्यान्नादिति खेरान्। कीदृशैः आपिङ्गा ईषत्कपिला रुचा ऊर्द्धाः शिरस्याः शिरसि भवाः केशा येषां शिरस्यग्रहणं श्रवणकुण्डलादिवत् तदारूढिप्रतिपत्त्यर्थं शिरस्यबालैरिति क्वचित् पाठः शिरा नाडी तया व्याप्ता जङ्घा येषां शिराशब्दात् गोदण्डमेधेत्यादिना चूडादित्वाल्लः। गिरिकूटदघ्नैः गिरिशृङ्गप्रमाणैः दघ्नमात्रद्वयसन्माने इति दघ्नः पृथूनि पिङ्गलानि च अक्षीणि येषां सक्थ्यक्ष्णः सः स्याङ्ग इति बहुव्रीहौ षः प्रावृषेण्यैर्वर्षाकालीनैः अब्दसंघैरिव प्रावृष एण्यो भवार्थे अभिधानात् अपो ददातीत्यब्दः आदन्नात् हनजनादिति डः न केवलं चिचिते चानशे च इति चार्थः। पादपूरणे चेति केचित् ॥ ३० ॥ भ०

अधीत्यादि। तान् क्षपाटान् गगणस्थान् लक्ष्मणो जघान हतवान् कीदृशः अधिज्यचापः अध्यारूढा उत्कलिता ज्या गुणो यस्य चापस्य तदधिज्यम् प्रादिभ्यो

तान् लक्ष्मणः सन्नतवामजङ्घो जघान गुद्वेषुरमन्दकर्णी ॥ ३१ ॥
गाधेयदिष्टं विरसं रसन्तं रामोऽपि मायाचणमस्रचुञ्चुः ।
स्थास्नुं रणे स्रेरमुखो जगाद मारीचमुच्चैर्वचनं महार्थं ॥ ३२ ॥

धातुजस्रेति समासः अधिज्यं चापो यस्य लक्ष्मणस्य । स्थिरो निश्चलो बाहुर्मुष्टिश्च यस्य । उदञ्चिते उत्क्षिप्ते अक्षिणी येन स उदञ्चिताक्षः । आकाशस्थापितदृष्टिरित्यर्थः । अञ्चितः सङ्कोचितो दक्षिणोरुर्येन सोऽञ्चितदक्षिणोरुः अर्चेः पूजायामितीटोऽनुत्पन्नत्वात् ण्यन्तस्य रूपम् न चात्र पूजा गम्यते किन्तु गतिविशेष एव अनुषङ्गलोपोऽपि न भवति णिलोपस्य •स्थानिवद्भावात् । सन्नतात् नता वामजङ्घा यस्य स सन्नतवामजङ्घः । गुद्वेषुः निशितबाणः अमन्दमत्यन्तं क्रष्टुं शीलमस्यासावमन्दकर्णी कर्णान्ताकृष्टचाप इत्यर्थः ॥ ३१ ॥ ज० म०

अधिज्येत्यादि । लक्ष्मणस्तान् राक्षसान् जघान । कीदृशः अधिरूढा ज्या गुणो यत्र तादृशश्चापो यस्य । स्थिरो निश्चलो दृढो वा बाहुर्मुष्टिर्यस्य स लक्ष्मणः दर्शनार्थं उदञ्चिते ऊर्ध्वमुखार्पिते अक्षिणी येन आकाशक्षिप्तदृष्टिरित्यर्थः । अञ्चितः सङ्कुचितो दक्षिणोरुर्येन अर्चेर्णौ मेऽपि स्थानिवद्भावात् नाञ्चेर्न लोपः सन्नता वामजङ्घा यस्य गुद्वो निशित इषुर्यस्य अमन्दं यथास्यात्तथा धनुःकर्षतीति यत्नादित्वाण्णिन् क्रष्टुं शीलमस्येति परे ॥ ३१ ॥ भ०

गाधेयेत्यादि । गाधेरपत्यङ्गाधेयो विश्वामित्रः ह्यच इत्यनुवर्त्तमाने इतस्वानिञ इति ढक् तेन दिष्टङ्कथितं मारीचं नाम राक्षसं रामो जगाद गदितवान् रसन्तम्वदन्तम् विरसमश्राव्यमिति क्रियाविशेषणम् मायाचणम्मायया वित्तम् अस्रचुञ्चुः अस्रैः प्रतीतो रामः तेन वित्तचुञ्चुचणपाविति । स्थास्नुं रणे स्थितिशीलम् तस्य सेनापतित्वात् स्रेरमुखः चित्तक्षोभादीषद्वसनशीलवदनः नमिकम्पीत्यादिना रः । उच्चैस्तराङ्गगादेति क्रियाविशेषणम् वचनं वक्ष्यमाणमहार्थमधानं ब्रुविशासीत्यत्र ब्रुवीत्यर्थग्रहणात् द्विकर्मकता मारीचं वचनञ्च ॥ ३२ ॥ ज० म०

गाधेयेत्यादि ॥ रामः अपिशब्दात् लक्ष्मणोऽपि महार्थमुच्चैर्वचनं मारीचं जगाद । यात्राऽर्थदुहेति सूत्रे ब्रुवीत्यर्थस्य ग्रहणं तेन द्विकर्मकत्वं पचादिवाद्वा । कीदृशं मारीचं गाधेयेन विश्वामित्रेण दिष्टं कथितं गाधेरपत्यार्थे बाह्वादित्वादित्यनेन अत्रादित्वात् ष्ण्येयः । विरसं कठोरं यथास्यात्तथा रसन्तं शब्दायमानं मायया ख्यातं मायाचणं वित्तचुञ्चुचणाविति चणः । रणे स्थास्नुं

आत्मम्भरिस्त्वं पिशितैर्नराणां फलेग्रहीन् हंसि वनस्पतीनां।
शौवस्तिकत्वं विभवा न येषां व्रजन्ति तेषां दयसे न कस्मात् ॥३३॥
अद्मो द्विजान् देवयजोन्निहन्मः कुर्म्मः पुरं प्रेतनराधिवासं।
धर्म्मो ह्ययं दाशरथे निजो नो नैवाध्यकारिष्महि वेदवृत्तं ॥३४॥

स्थितिशीलं ग्लाग्लास्था इति स्नुः। रामः कीदृशः अस्खलचक्षुः अस्खलेन ख्यातः स्मरणीयद्वसनशीलं सुखमस्य हिंसदीपकर्म्मेति रः ॥ ३२ ॥ भ०

आत्मेत्यादि। नराणामिमैर्मांसैः आत्मानम् बिभर्षि पुष्णासि मान्यदपि शरीरस्थितिहेतुर्भवतीति भावः। स त्वमात्मम्भरिः आत्मभरणाय फलानि वृक्षन्ति ये वनस्पतीनान्तान् फलेग्रहीन् फलाग्रिनो मुनीन् हंसि मारयसि यपो लुक् फलेग्रहिरात्मम्भरिरेति निपातितौ। शोभवितारः शौवस्तिकाः अस्मस्तुट्चेति ठञ् तुडागमश्च। द्वारादित्वादेजागमः शौवस्तिकत्वन्तद्येषां विभवा न व्रजन्ति तेषामश्वस्तनिकवृत्तीनाङ्कस्मात्त्वं न दयसे न रक्षसि अधीगर्थदयेशामिति कर्म्मणि षष्ठी ॥ ३३ ॥ ज० म०

आत्मम्भरिरित्यादि। त्वं वनस्पतीनां फलेग्रहीन् मुनीन् हंसि फलानि वृक्षन्ति तन्मात्रभोजित्वेन स्वीकुर्व्वन्तीति सकृत्सप्तम्यादित्यादिना ड्रप्रत्ययः। फले इति सप्तम्या निर्द्देशादेवं वनस्पतीनां मध्ये फलेग्रहीन् मुनीन् हंसि उन्मूलयसीति केचित्। त्वं कीदृशः नराणां पिशितैर्म्मांसैरात्मम्भरिः आत्मानमेव बिभर्त्तीति कुक्ष्यात्मोदराद्भः खिरिति खिः खित्यव्योजेति मन् येषां विभवाः सम्पदः शौवस्तिकत्वं भाविदिनस्थितत्वं न व्रजन्ति तेषां कस्मान्न दयसे समार्थेनेति कर्म्मणि षष्ठी शोभनः शौवस्तिकः अस्तोभवार्थेति कस्मभिधानात् कणि मनीषादित्वात् त्यागमः द्वारस्मरेति ठम् णित्तेत्रिरिति त्रिः तत्सौभावे इति त्वं देवीदासचक्रवर्त्ती तु श्वस्तेकते श्वस्तिकः तिकऽगत्यां दृजुङत्वात् कगत्नाप्रीति कः ततः स्वार्थे ष्णः अन्यत् पूर्ब्ववदित्याह ॥ ३३ ॥ भ०

अद्मेत्यादि ॥ राक्षसः प्राह द्विजान् ब्राह्मणक्षत्रियवैश्यान् अद्मो भक्षयामः देवयजोन् देवान् यजन्ति आराधयन्ति ये तान्निहन्मः अचदरित्यनुवर्त्तमाने खनीत्यादिषूह्यमानेष्वौणादिकेषु स्नूत्वेषु यद्यपि यजिर्न पठितस्तथापि नायजेरिः प्रकृतेश्च तदुक्तमिति वचनात्। जासिनिप्रहणेत्यत्र सङ्गातविष्टहोतविपर्य्यस्तग्रहणात् षष्ठी प्राप्तापि न भवति कर्म्मणः शेषत्वेनाविवक्षितत्वात् पुरन्नगरम्प्रेतनराणामृतनराणाम् अधिवासमवस्थानङ्कुर्म्मः निमन्त्रणेन प्रस्थान-

धर्म्माऽस्ति सत्यं तव राक्षसायमन्यो व्यतिक्ते तु ममापि धर्म्मः ।
ब्रह्मद्विषस्ते प्रणिहन्मि येन राजन्यवृत्तिर्धृतकार्म्मुकेषुः ॥ २५ ॥

तुल्यम् इत्यर्थः । कस्मादेवमित्याह धर्म्म इति दशरथस्यापत्यं दाशरथिः अत इञ् हे दाशरथे हि यस्मादर्थे वर्त्तते यस्मादयं धर्म्मः आचारः निजो नित्यः न इत्यस्माकम् वेदविरुद्ध इति चेत् नैवाध्यकारिष्महि वेदोक्ते वेदविहितं कृत्तमिति मध्यमपदलोपी समासः । यद्वाऽस्माकानाम् उक्तमनुष्ठानन्तत्र वयं नैवाधिकृता इत्यर्थः । अधिपूर्व्वात्करोतेः कर्म्मणि लुङ् सिचिजित्यादिना च्विरवदिट् ॥ २४ ॥ ज० म०

अद्म इत्यादि । पूर्व्वापरपरामर्शान्नारीचप्रत्युत्तरमिदं वयं द्विजान् अद्मः भक्षयामः देवयजीन् देवपूजकान् निहन्मः । यङ्हेरिमोर्घोऽद्यां व्रजेर्वेरित्यादिनिर्देशात् सर्व्वधातुभ्य इप्रत्ययः स्यादिति स्मृतिं तेन यजिरिति सिद्धं वातप्रमीवत् दीर्घान्तोऽयमित्येके । पुरं हतमनुष्याधिवासं श्मशानतुल्यं कुर्म्मः कुरुवृत्तोपोऽन्तो इति व्रज उपो लोपः व्रजोऽङ्गनौरे इत्युकारः हे दाशरथे हि यस्मात् अयमेव अस्माकं निजो नित्यो धर्म्मः स्वभाव आचारो वा । धर्म्मः पुण्यन्यायस्वभावाचारसोमपा इत्यमरः वेदोक्ते वेदविहिते कर्म्मणि नैव अध्यकारिष्महि वयं नाधिकृताः विधात्रा इत्यर्थः । कर्म्मणि टो हनयज्हदृशच इति मिण् ॥ २४ ॥ भ०

धर्म्म इत्यादि । रामः प्राह हे राक्षस रक्ष एव राक्षसः प्रज्ञादित्वादण् स्वार्थिका अतिवक्ति न इति पुलिङ्गता तवायम्पूर्व्वोक्तः पराभिद्रोहलक्षणो धर्म्मोऽस्तीति सत्यमेतत् किन्तु ममापि रामस्य अन्यो धर्म्मोऽभिष्टनिष्टफललक्षणो व्यतिक्ते व्यतिभवते इदमुक्तम्भवति यद्यपेवम्प्रकारस्त्वद्धर्म्मो भविष्यति तथापीदामीमेव या त्वद्धर्म्मेण विद्यमानतया निष्पाद्या सा अस्मद्धर्म्मेणैव निष्पादकत्वेन व्यतिक्ते । ततश्चान्यसम्बन्धिनीं क्रियामन्यः करोति इतरसम्बन्धिनीमितर इति धर्म्मव्यतीहारसम्भवात् अस्तेः कर्म्मव्यतीहारे तङ् । तथाहि यो यदवसरे यां काञ्चित् क्रियाङ्करोति स तत्क्रियाकारीत्युपचारात् लोक उच्यते । येन धर्म्मेण हेतुना ब्रह्मद्विषस्ते प्रणिहन्मि मारयामि स व्यतिक्ते इति योज्यम् मेर्गेहेत्यादिना णत्वम् जासिनीत्यादिना कर्म्मणि षष्ठी । तथा कथन्तव धर्म्म इति चेदाह राजन्यवृत्तिरिति क्षत्रियवृत्तिः ततो राज्ञोऽपत्यम् राजन्यशुराद्यत् ये चेति प्रकृतिभावः । धृतकार्म्मुकम् इषवश्च येन सः यतः अहं राजन्यवृत्तिः

इत्थंप्रवादं युधि संप्रहारं प्रचक्रतू रामनिशाविहारौ ।
तृणाय मत्वा रघुनन्दनोऽथ बाणेन रक्षः प्रधनान्निरास्यत् ॥३६॥
जग्मुः प्रसादं द्विजमानसानि द्यौर्वर्षुका पुष्पचयं बभूव ।

ततोऽहन्धृतकार्मुकेषुरिति धृतकार्मुकेष्विति पाठान्तरम् क्व राजन्यदृत्तिः सायुधेष्वित्यर्थः ॥ ३५ ॥ ज० म०

धर्म्म इत्यादि । रामवाक्यमिदं हे राक्षस तव अयं धर्म्मोऽस्तीति सत्यं रक्षःशब्दात् विकारसंघेत्यादिना स्वार्थे णः त्रैलोक्यमित्युदाहरणेन स्वार्थिकाः प्रकृतितो लिङ्गवचनान्यतिवर्त्तन्तेऽपीति सूचितं तेन पुल्लं किन्तु ममापि अन्यो धर्म्मो व्यतिस्ते अस्तेर्व्यतीहारे गतिहिंसेति सं लोपोऽस्यसोरित्यकारलोपः यथा तव हिंसारूपो धर्म्मोऽस्ति तथा मम हिंसकहिंसाकारित्वरूपो धर्म्मोऽस्ति इत्यर्थः धर्म्मं प्रकाशयति येन धर्म्मेण हेतुना ब्रह्मद्विषस्ते तव प्रणिहन्मि कर्म्मणि घौ प्राग्वद्भावेन इति णत्वं । कुतस्तेऽयं धर्म्म इत्याह यतो राजन्यानां वृत्तिः धृतं कार्मुकमिषुश्च यत्र तथा भवति क्षत्रियाणां धनुर्बाणधारित्वं हिंसनाशार्थमेव राजन्येति मनुवर्ज्जानित्यादिना नलोपनिषेधः ॥ ३५ ॥ भ०

इत्थमित्यादि । इत्थं अनेन प्रकारेण प्रवादो अन्योन्याभिघातो यत्र सम्प्रहारे तं सम्प्रहारम्परस्पराभिभवलक्षणम्प्रकृतवन्तौ युधि रणभूमौ युध्यन्ते अस्यामिति सम्पदादित्वादधिकरणे क्विप् रामनिशाविहारौ रामो निशाविहारो निशाचरो मारीचस्तेत्यर्थः निशायाम्विहारो यस्येति समासः अथानन्तरं रघुनन्दनो रघुवंशस्य नन्दयिता रामो मारीचम्बाणेन तत्सम्बन्धिनं सत्यपि तृणाय मत्वा तृणमपि नावमत्य मन्यकर्म्मण्यनादर इति चतुर्थी तत्र प्रकृष्टकुत्सितयोस्तृणङ्कर्त्तव्यम् इह मामूत् तृणम्मत्वेति प्रधनात्संग्रामात् निरास्यत् अपनीतवान् ॥ ३६ ॥ ज० म०

इत्थमित्यादि । उक्तप्रकारं प्रवादं तदनन्तरं युधि युद्धे संप्रहारं रामनिशाविहारौ प्रचक्रतुः निशायां विहारोऽस्येति निशाविहारो मारीचः सम्यक् प्रहारो यस्मात् इति संप्रहारं प्रवादविशेषणमित्येके अथ रघुनन्दनो राक्षसं मारीचं तृणाय मत्वा बाणेन प्रधनात् युद्धात् निरास्यत् गत्यर्थमन्यढे इति चौ तृणोपमानेनैवावज्ञा गम्यते तेन तृणादेव चतुर्थी ॥ ३६ ॥ भ०

जग्मुरित्यादि। यागविघ्नकारिषु निरस्तेषु द्विजानां मानसानि मनांस्येव मानसानि प्रज्ञादित्वादण् प्रसादं अव्याकुलत्वं जग्मुः गतानि गमहनेत्युपधालोपः

निर्व्याजमिज्या वृत्ते वचश्च भूयो बभाषे मुनिना कुमारः ॥२७॥
महीयमाना भवतातिमात्रं सुराध्वरे धस्मरजित्वरेण ।
दिवोऽपि वज्रायुधभूषणाया ह्रिणीयते वीरवती न भूमिः ॥२८॥

द्यौः पुष्पचयं वर्षुका वर्षणशीला बभूव भवति स्म लषपतपदेत्यादिना उकञ् नलोकेति षष्ठीप्रतिषेधः । निर्व्याजन्निर्विघ्नं दृष्ट्वा यागः व्रजयजोर्भावे क्यप् वृत्ते वृत्तः लिट् भूयः पुनरपि मुनिना गाधेयेन कुमारः रामः अकृतदारकर्म्मत्वात् वचो वक्ष्यमाणम्बभाषे कर्म्मणि लिट् ब्रुवोऽर्थग्रहणात् द्विकर्म्मकता वचः कुमारस्य ॥ २७ ॥ ज० म०

जग्मुरित्यादि । शत्रुवधात् द्विजानां मानसानि प्रसादं अव्याकुलत्वं जग्मुः हनगमित्युङ्लोपः द्यौः स्वर्गः पुष्पस्य चयं समूहं वर्षुका बभूव वर्षतीति वर्षुका वृषेः ष्टस्थाभूकमगमेति ञुक् ढधेक्षतीति क्षत्रे उकवर्ज्जनात् न कर्म्मणि षष्ठी । निर्व्याजं निर्विघ्नं यथास्यात्तथा मुनीनां दृष्ट्वा यज्ञो वृत्ते निष्पन्नो यजेः शीव्रजेति क्यप् स्त्रियां मुनिना विश्वामित्रेण कुमारो रामः भूयः पुनरपि बभाषे ब्रुवोऽर्थात् द्विकर्म्मकत्वं कुमारत्वकेलौ पचादित्वादन् कुमारो बालके स्कन्दे युवराज्येऽश्ववारके इति विश्वः ॥ २७ ॥ भ०

महीत्यादि । भवता भूमिः पृथिवी महीयमाना पूज्यमाना अतिमात्रं सुष्ठु सम्यक् पालनाद्दिवोऽपि स्वर्गस्य न ह्रिणीयते न लज्जते किन्तु प्रतिस्पर्द्धत इति भावः ह्रिणी महीङिति कण्ड्वादिपाठाद्यक् ङित्वात्तङ् अवयवे कृतं लिङ्गं समुदायस्य विशेषकम्भवतीति महीयशब्दात्कर्म्मणि लकारः शानच् यक् अतोलोपः सुक् महीयमानेति रूपं सुराध्वरे सुरानुद्दिश्य योऽध्वरो यज्ञः क्रियते तत्र ये धस्मराः अदनशीलाः राक्षसाः धृषस्वदः क्वरच् तेषाञ्जित्वरेण जयशीलेन भवता इगुपधज्ञीत्यादिना क्वरप् वज्रायुधभूषणायाः शक्र एवालङ्कारो यस्याः दिवः वीरवती त्वद्विधो वीरो यस्यामूमाविति ॥ २८ ॥ ज० म०

महीत्येत्यादि । भूमिर्दिवोऽपि स्वर्गादपि न ह्रिणीयते न लज्जते तामपि स्पर्द्धत इत्यर्थः यतो भवतातिमात्रं अतिशयेन वीरवती प्रशस्तवीरान्विता अतएव लोकैर्म्महीयमाना पूज्यमाना महीङ् दृद्धिपूजनयोः ह्रिणीङ् लज्जायां आभ्यां कण्ड्वादित्वात् नमस्तपोवरिव इत्यादिना क्यः कौदृशेन भवता सुराध्वरे देवानां यज्ञे धस्मराणां बहुभक्षणशीलानां राक्षसानां जित्वरेण क्षपणशीलेन धसक्षदः क्वर इति क्वरः क्षरप्सृजीनेति जेः क्षरप् सस्यतनूपितीत्यनेन तनू

बलिर्बबन्धे जलधिर्ममन्थे जह्रे हृतं दैत्यकुलं विजग्ये।
कल्पान्तदुःस्था वसुधा तथोहे येनैष भारोऽतिगुरुर्न तस्य ॥३९॥
इति ब्रुवाणो मधुरं हितञ्च तमाजिहृन्मैथिलयज्ञभूमिं।
रामं मुनिः प्रीतमना मखान्ते यशांसि राज्ञां निजिघृक्षयिष्यन् ॥४०

दिवः कीडश्याः वज्रमायुधमस्येति वज्रायुध इन्द्रः स एव भूषणं यस्याः इन्द्रो यथा दिवः परिपालकस्तथा त्वं भूमेरिति भावः । आयुध्यतेऽनेनेति आयुधं इजुङ्-त्वात् कगन्नायोजुङ इति कर्त्तरि विहितप्रत्ययः करणेऽपि बोध्यः । ह्रञ्जोः कभावे हृत्युक्तेरन्यत्रापि प्रयोगत इत्युक्तेः ॥ ३८ ॥ भ०

संक्षेपेण स्तुतिमाह बलिरित्यादि । येन भवता बलिर्बबन्धे बद्धः जलधिर्ममन्थे मथितः मन्दरं दोर्भिर्गृहीत्वा मन्थविलोडन इत्यस्य रूपम् संयोगान्तत्वाल्लिटोऽकित्त्वे अनुनासिकलोपो न भवति जह्रे ऽहृतम् स्त्रीरूपधारिणा दैत्यबलम्बिजिग्ये विजितमनेकधा संलिटोर्जेरिति कुत्वम् एरनेकाच इति यणादेशः तथा कल्पान्ते प्रलये दुःस्था दुस्थाना वसुधा पृथिवी जह्रे उद्धृता वराहरूपिणा वहेर्यजादित्वात्सम्प्रसारणम् तस्य भवत एष भारो मुनिजनरक्षणम् अतिगुरुर्न भवति सर्व्वत्र कर्म्मणि लिट् ॥ ३९ ॥ ज० म०

बलिरित्यादि । येन भवता वामनावस्थायां बलिनामासुरो बबन्धे बद्धः जलधिः समुद्रो ममन्थे मथितः मन्थेः स्नात्व्यपितृकिदिति किदभावपक्षे उङो लोपाभावः स्त्रीरूपेण असुरवञ्चितहीतमहृतं जह्रे हृतं दैत्यवंशो विजिग्ये विजितः जेर्गिः सनाथोः श्नुधोरखचीति यत्वं कल्पान्ते प्रलयकाले दुःस्था जलप्लाविता वसुधा पृथिवी वराहरूपेण ऊहे उद्धृता सर्व्वत्र कर्म्मणि ठी वहेर्यजादित्वात् व्यथग्रहेति खेर्जिः ग्रहखपादयोरिति प्रकृतेर्ज्जिः दुःखेन तिष्ठतीति दुःस्था ह्रनजनादिति डः खसयुक्तग्रसिविसर्गस्य वा लोपो मनीषादित्वात् तस्य भवत एष भारो मुनिरक्षणरूपो नातिगुरुर्भवति ॥ ३९ ॥ भ०

इतीत्यादि । इति यथोक्तप्रकारेण मधुरं श्रोत्रसुखं हितञ्च ब्रुवाणो अभिदधानः लक्षणहेत्वोरिति शानच् मुनिः प्रीतमनाः मखान्ते यज्ञावसाने तं राममैथिलस्य यज्ञभूमिं आजिहृत् गमितवान् मिथिलानां राजेति जनपदशब्दात् क्षत्रियादञित्यत्र तस्य राजन्यपत्यवदित्यतिदेशादञ् अहिगतौ इदितो नुम् प्रयोजकव्यापारे णिच् लुङ् आट् चङि णिलोपः द्विर्व्वचनेऽचीति स्थानिवद्भावादजादेर्द्वितीयस्येति हिशब्दस्य द्विर्व्वचनम् नन्द्रा इति नकारस्य प्रतिषेधः

दूतः स्म मित्रावरुणौ किमेतौ किमश्विनौ सोमरसं पिपासू ।
जनं समस्तं जनकाश्रमस्थं रूपेण तावौजिहतां ऋसिंहौ ॥ ४१ ॥

अभ्यासकार्यम् आङ्गिहदिति रूपम्। राज्ञां यशांसि निजिघृक्षयिष्यन् निग्रहीतुमभिभवितुमेषयिष्यन् यहेः सन् सनि ग्रहगुहोश्चेति इट्प्रतिषेधः द्विर्वचनादिः रुदविदेत्यादिना सनः कित्त्वम् ग्रहिज्येत्यादिना सम्प्रसारणम् ढत्व भष्भावौ गकारस्य घकारः कुत्वषत्वे पञ्चास्मिच् तदन्ताङ्गविधत्वात्सामान्यविवक्षायां लट् तेन भविष्यदनद्यतने लुङ् न भवति ॥४०॥ ज० म०

इतीत्यादि। उक्तप्रकारेण मधुरं हितं ब्रुवाणो मुनिः प्रीतमना मखस्य यज्ञस्थान्ते तं रामं मैथिलस्य जनकस्य यज्ञभूमिं आङ्गिहत् प्रापयामास राज्ञां यशांसि निग्रहीतुं अभिभवितुं इच्छां कारयिष्यन् अर्थात् राम एव प्रयोज्यकर्त्ता मिथिलाया राजा मैथिलः विकारसंज्ञेति षः अङ्गिङ् गतौ इदितो नुम् ञिः प्रेरणे ञिश्रीत्यङ् नाजन्तादेरिति स्वादौ नवद्रोऽये इति निषेधात् हिशब्दस्य द्वित्वं खेर्भभखधेति हस्य जः ञेर्लोपः यहेः सनि नेसगुह इतीम्निषेधः ग्रहस्खेति जिः होढः झभान्तस्यादिजवामिति घः षढो कः से इति ढस्य कः किलादिति षः सनयङन्नोद्विः खेराद्यचो लोप्यः झभखधेति खेर्धस्य जत्वं झकारस्य अत्वञ्च ख्यस्येत्यनि ततोञिः ततः स्यटः ॥ ४० ॥ भ०

इत इत्यादि । एतौ तत्रागतौ ऋसिंहौ नरौ सिंहाविव जनकाश्रमस्थं जनं रूपेण स्वरूपतया औजिहतामित्यत्र कर्त्रभिप्रायक्रियाफलावित्यत्र णिचश्चेति तङ् न भवति चङि णिलोपस्य स्थानिवद्भावात् अजादेर्द्वितीयस्येति द्विर्वचनम् । जहमाह मित्रावरुणौ आदित्यवरुणौ देवताद्वन्द्वे इत्यानङ् तयोर्महानुभावत्वात् सोमरसम्पिपासू पातुमिच्छू न लोजेति षष्ठीप्रतिषेधः एतावागतौ आङ्पूर्व्वस्येणो निशायां रूपं किमश्विनौ अश्विनीकुमारौ सोमरसम्पिपासू एताविति एवञ्चनम् औजिहतां सुशब्दइति पाठे एतौ सुमित्रेति पाठः एतौ स्म मित्रेति स्मशब्दो निपातः पादपूरणार्थः ॥४१॥ ज० म०

इत इत्यादि। तौ ऋसिंहौ मनुष्यश्रेष्ठौ रामलक्ष्मणौ रूपेण सौन्दर्य्येण समस्तं जनकाश्रमस्थं जनं औजिहतां वितर्कं कारितवन्तौ जहङ् वितर्के जिः प्रेरणे ञिश्रीत्यङ् नाजन्तादेरिति निषेधात् हेर्द्वित्वं धोजौजेरिति ज्ञानार्थत्वात् कर्त्तुः कर्म्मत्वं । वितर्कमाह किमेतौ मित्रावरुणौ सूर्य्यवरुणौ सोमरसं

अजिग्रहत्तं जनको धनुस्तत् येनार्द्दिदद्दैत्यपुरं पिनाकी ।
जिज्ञासमानो बलमस्य बाह्वोर्हसन्नभाङ्क्षीद्रघनन्दनस्तत् ॥ ४२ ॥
ततो नदीष्णान् पथिकान् गिरिज्ञानाह्वायकान् भूमिपतेरयोध्यां ।
दित्सुः सुतां योधहरैस्तुरङ्गैर्व्यसर्ज्जयन्मैथिलमर्त्यमुख्यः ॥ ४३ ॥

यातुमिच्छावन्तौ इतश्च अमुं देशं प्राप्नुवन्तौ इणगतौ की क्षेनातीते इति की किम्वा एतौ अश्विनौ अश्विनीकुमारौ नासत्यदस्रौ नासत्यश्चैव दस्रश्च स्मृतौ तौ नामतोऽश्विनाविति मार्कण्डेयपुराणं । केचित्तु आगच्छः पादपूरणे इतोऽस्मिन् देशे एतौ आगतौ आङ्पूर्व्वादिणः क्त इत्याहुः । मित्रश्च वरुणश्चेति द्वन्द्वे मित्रचरितदेवताद्वन्द्वे पूर्व्वपदस्यादन्तता निपातनात् देवीदासचक्रवर्त्ती तु एकादश इत्युदाहरता विश्वराजोऽदेत्यस्य योगविभागात् क्वचित् समासे पूर्व्वपदस्य दीर्घत्वं स्मृचितमित्याह ॥ ४१ ॥ भ०

अजिग्रेत्यादि ॥ येन धनुषा दैत्यपुरं पिनाकी महादेव आर्द्दिदत् हिंसितवान् अर्द्देः स्वार्थिकण्यन्तात् चङि अजादेर्द्वितीयस्येति दिशब्दो द्विरुच्यते रेफस्य प्रतिषेधः तङ्ननुः तं रामञ्जनकः अजिग्रहत् बोधितवान् अनेन धनुषा त्रिपुरन्दग्धमिति ग्रहेर्हेतुमण्ण्यन्तान्चङि णिलोपः णौ चङि हुस्वः सन्वद्भावादित्वम् ग्रहेश्च बुद्ध्यर्थत्वात् गतिबुद्धीत्यादिना रामस्य कर्म्मसंज्ञा । अस्य रामस्य बाह्वोर्भुजयो र्बलञ्जिज्ञासमानो जनकः एवम्भूतमनुः हसन् क्रीयमानो रघुनन्दनो रामः अभाङ्क्षीत् भग्नवान् भञ्जेर्लुङि सिचि हलन्तलक्षणा वृद्धिः तत्र हि हलग्रहणं सम्प्रदायप्रतिपत्त्यर्थमित्युक्तम् ॥ ४२ ॥ ज० भ०

अजिग्रहदित्यादि । जनको राजा तं रामं तङ्ननुरजिग्रहत् ग्राहयामास धातूनामनेकार्थत्वात् ग्रहिरत्र ज्ञानार्थ इत्यन्ये घोऽौजेरिति ग्रयोज्यकर्त्तुः कर्म्मत्वं आङ्ग्रहः स्व इति हुस्वः खेः सन्वदिति सन्वत् येन धनुषा पिनाकी शिवो दैत्यानां पुरं त्रिपुरं आर्द्दिदत् हतवान् अर्द्दृ वधे स्वादौ नवद्रोऽये इति निषेधात् देर्द्दित्वं केचित्तु धनुषा प्रयोज्यकर्त्ता यातयामास इत्यर्थमाङ्ः जनकः कीदृशः अस्य रामस्य बाह्वोर्बलं जिज्ञासमानः ज्ञातुमिच्छन् स्मृदृशननुभ्येति सनन्तात्तो मं हसन् लीलयैव तङ्ननुरभाङ्क्षीत् भन्जोधौ मोटने आंसिः अनिमत्वात् व्रजवदेति त्रिः चङिति कुङ् ॥ ४२ ॥ भ०

तत इत्यादि ॥ धनुर्भङ्गादनन्तरमाह्वानयमिति ज्ञात्वा जनकः सुतान्दुहितरन्दित्सुः दातुमिच्छुः ददातेः सनि मीमेत्यादिना अव इस् द्विर्व्वचनम् अत्वलोप इत्य-

क्षिप्रं ततोऽध्वन्यतुरङ्गयायी यविष्ठवद्दृढतमोऽपि राजा ।
आख्यायकेभ्यः श्रुतसूनुवृत्तिरग्लानयानो मिथिलामगच्छत् ॥४४॥

भ्यासलोपः सस्येति तलम् सनाशंसभिक्ष उः भूमिपतेर्दशरथस्य आह्वायकान् आह्वयन्ति आकारयन्तीति कर्त्तरि ण्वुल् आतो युक् क्षत्रियोगे भूमिपतौ कर्म्मणि षष्ठी तान् अयोध्यां व्यसर्जयत् विसर्ज्जितवान् विपूर्ब्बस्य सृजेर्हेतुमण्ण्यन्तस्य लङि रूपं गत्यर्थत्वात् द्विकर्म्मकता । नद्यां स्नान्तीति नदीष्णाः सुपिस्थ इति योगविभागात्कः आतोलोपः निनदीभ्यां स्नातेरिति षत्वम् नदीन्तरीतुङ्कुशलान् इत्यर्थः । पथिकान् पथि कुशलान् तत्र कुशलः पथ इति ठक् गिरिज्ञान् यथाप्रदेशङ्गिरिज्ञान् इगुपधेत्यादिना कः तुरङ्गैः अश्वैः करणभूतैः युध्यन्त इति योधाः पचाद्यच् तानाहर्त्तुं क्षमैः वयसि चेत्यच् । कृसिसृधिखाभिदमिलूपूधूर्विभ्यस्त्रित्यौणादिकस्त्रन् । म्रियन्ते प्राणिनोऽस्मिन्निति मर्त्यो भूर्लोकः तत्र भवा मर्त्या मनुष्या दिगादेराकृतिगणत्वात् यत् आकृतिगणत्वस्य लिङ्गं देवमनुष्यपुरुषपुरुमर्त्येभ्य इति निर्देशः सुखमेव सुख्यः प्रधानम् शाखादिभ्यो यः । मर्त्यानामुख्यो मर्त्यसुख्यः मैथिलश्चासौ मर्त्यसुख्यश्चेति विशेषणसमासः जनक इत्यर्थः ॥ ४३ ॥ ज० म०

तत इत्यादि । धनुर्भङ्गानन्तरं मिथिलासम्बन्धिमनुष्यश्रेष्ठो जनकः रामाय सुतां दित्सुर्दातुमिच्छुः सन् भूमिपतेर्दशरथस्य आह्वायकान् दूतान् तुरङ्गैरयोध्यां व्यसर्ज्जयत् प्रेरयामास तुरङ्गैः कीदृशैः योधहरैः योधान् हर्त्तुं क्षमैः हृञः पचादित्वादन् वयोबोधकवचनार्थेऽनिति क्रमदीश्वरादयः एतेन शीघ्रगमनं दर्शितं षर्द्विजहेत्यादिना तुरङ्गो निपातितः किम्भूतान् नदीष्णान् नदीस्नानतिनिस्नात्योर्दाढ्ये इति रामानन्दसूत्रेण मनीषादित्वात् वा षत्वं नदीष्णो नदीज्ञ इति पुरुषोत्तमः । पन्थानं गच्छति वेत्ति वा इति निपातनादकः ष्णान्तात् स्वार्थे को वा पथि कुशलः पथिक इति केचित् गिरिं जानन्तीति गिरिज्ञा ह्नजनजादिति उः ॥ ४३ ॥ भ०

क्षिप्रमित्यादि ॥ आख्यान्ति कथयन्ति ये ते आख्यायकास्तेभ्यः श्रुता सूनुवृत्तिर्येन स राजा दशरथः सूयत इति सूनुः पुत्रः दाभाभ्यां नुरिति वर्त्तमाने सुवःकित्त्वौणादिको नुप्रत्ययः । ततोऽनन्तरमेव क्षिप्रं शीघ्रं स्खायिवश्चीत्यादिना रक् क्रियाविशेषणञ्चैतत् मिथिलामगच्छत् भरतशत्रुघ्नाभ्यां सहेत्यर्थादनुषक्तत्वं गमेर्लङि इषुगमियमाञ्छः अध्वानम् अलङ्गामिनो ये तुरङ्गा अश्वाः

दन्दिष्ठमार्च्छीद्वसुधाधिपानां तं प्रेष्ठमेतं गुरुवद्गरिष्ठं ।
सद्वद्महान्तं सुकृताधिवासं बंहिष्ठकीर्त्तिर्यशसा वरिष्ठम् ॥४५॥

ते अध्वन्याः अलङ्गामीत्यस्मिन्नर्थे अध्वनोयत्खाविति यत् येषामावकर्म्मणो-रिति प्रकृतिभावः तैः साधु यातीति साधुकारिणि णिनिः अध्वन्यतरङ्ग-यायी एवञ्च कृत्वा अग्लानयानः न विद्यते ग्लानं ग्लानिर्यस्मिन्याने तत् अग्लानं अग्लानं यानं यस्य तादृशै स्तुरङ्गैः सुखयानः ग्लानेति भावे निष्ठा संयोगादेरात इति नत्वम् । दृढतमोऽपि यविष्ठवत् युवतम इव युवशब्दस्ये-ष्ठनि स्थूलदूरेत्यादिना यणादिपरलोपः पूर्व्वस्य च गुणः पश्चात्तेन तुल्यम् इति वतिः ॥ ४४ ॥ ज० म०

क्षिप्रमित्यादि । ततोऽनन्तरं आख्यायकेभ्यः श्रुता स्नोः पुत्रस्य दक्षि-र्व्यवहारो येन स राजा दशरथः मिथिलां जनकपुरीं शीघ्रमगच्छत् कीदृशः अध्वन्यैस्तुरङ्गैर्यातीति यङ्गादित्वाण्णिन् शीलार्थे णिन्नित्येके आवश्यके णिन् इति केचित् अध्वानमत्यर्थं गच्छतीति षष्ठ्याः अनित्यविवक्षया न त्रिः मनुवर्ज्जानवर्म्मेति नलोपाभावः अध्वनि कुशलोऽध्वन्यो वा दृढतम इति अयमेषामतिशयेन दृढो-ऽपि यविष्ठवत् प्रकृष्टयुववत् गुणार्द्वेष्टेयस्तु इतीष्टः वाढान्तिकेति यूनो यवादेशः जीमंसदिन्नैकाच इति डित्त्वात् टेर्लोपः । अग्लानमक्लिष्टं यानं यस्य ग्लैकान्नि-संज्ञये क्तः यलयुक्तादन्तत्वात् स्नुत्वाद्योरिति क्तस्य नत्वं ॥ ४४ ॥ भ०

दन्दिष्ठमित्यादि । तं राजानमेतमायातञ्जनक आर्च्छीत् पूजितवान् अर्च्चे-र्लुङि रूपम् दन्दिष्ठं दन्दारकतमम्प्रशस्तमम्मित्यर्थः केषाम्वसुधाधिपानाम्भूपतीनाम् प्रेष्ठम्प्रियतमम् गुरुवत् गुरुणा तुल्यम्वर्त्तमानङ्गरिष्ठम् गुरुतमम् सद्वत् समा-नान्ययोश्चेत्युपसंख्यानाद्वतेः क्विप् रूढिशब्दस्वायम् नात्र दर्शनक्रिया विद्यते । अभिजनादिभिस्तुल्यो जनक इत्यर्थः महान्तम् महानुभावसदृशात्मध्ये महान्तं सुकृताधिवासं सुकृतनिलयम् अधिवसत्यस्मिन्निति अधिकरणे घञ् बंहिष्ठा बहुलतमा कीर्त्तिर्यस्य स बंहिष्ठकीर्त्तिः यशसा वरिष्ठङ्कृतमम् । अत्र दन्दा-रकप्रियगुरुबद्धलोरूणामिष्ठनि यथासङ्ख्यम्प्रियस्थिरेत्यादिना दन्द्रप्रगरबंहवर इत्येते आदेशा भवन्ति ॥ ४५ ॥ ज० म०

दन्दिष्ठमित्यादि । अर्थात् जनकस्तमागतं दशरथं आर्च्छीत् पूजितवान् किम्भूतं वसुधाधिपानां राज्ञां मध्ये दन्दिष्ठं प्रशस्ततमं प्रेष्ठं प्रियतमं गुरुवत् उपदेष्टृवत् पितृवद्वा गरिष्ठं गुरुतमं महान्तं महाशयं सुकृतानि पुण्यानि अधि-

त्रिवर्गपारीणमसौ भवन्तमध्यासयन्नासनमेकमिन्द्रः ।
विवेकदृश्वत्वमगात्सुराणां तं मैथिलो वाक्यमिदं बभाषे ॥ ४६ ॥

हिरण्मयो शालतेव जङ्गमा
च्युतादिवः स्थास्नुरिवाचिरप्रभा ।
शशाङ्कान्तेरधिदेवताकृतिः
सुता ददे तस्य सुताय मैथिली ॥ ४७ ॥

वसन्त्यस्मिन्निति आधारे घञ् यशसा वरिष्ठं उरुतमं दृहन्तमभित्यर्थः । जनकः कीदृशः सदृक् अर्थात् दशरथस्य समान इव दृश्यते योऽसाविति तदादिभवत्समानेति क्विप् समानेदमिति सादेशः सदृशानां महान्तमित्यन्ये वरिष्ठा वरुतमा कीर्त्तिर्यस्य स तथा दृन्दिशादौ गुणाद्वेष्यस्य इतीष्ठः वाढान्तिकेत्यादिना दृन्दारकप्रियगुरुबहुलोरुणां दृन्दभ्रगरबंहवरादेशः ओमंश्चेति डित्त्वात् टेर्लोपः प्रेष्ठमित्यत्र एकाचत्वान्न डित्त्वं ॥ ४५ ॥ भ०

त्रिवर्गेत्यादि । तन्दशरथमैथिलो जनकः वाक्यमिदम्बभाषे ब्रुवीत्यर्थग्रहणात् द्विकर्मकता किन्नद्वाक्यमित्याह असाविन्द्रो भवन्तम् एकासनमध्यासयन् आरोपयन् विवेकदृश्वत्वमगादिति सम्बन्धः आसनस्याधिशीङित्यादिना अधिकरणेकर्मसंज्ञा भवन्तमिति गतिबुद्धीत्यादिना आस्तेरण्यन्तावस्थायामकर्मकत्वात् । पारङ्गामीत्यस्मिन्वाक्ये अवारपारेत्यादिना पारशब्दात् खः तत्र विग्टहीतविपर्य्यस्तग्रहणात् त्रिवर्गस्य धर्म्मार्थकामस्य पारीणमिति षष्ठीसमासः त्रिवर्गपारीणमभवन्तं सुराणामध्ये स एवैको विवेकदृश्वत्वं विवेकज्ञतामगात् दृणोगा लुङि गातिस्थेत्यादिना सिचो लुक् विवेकन्दृष्टवानिति दृशेः क्विनिप् ॥ ४६ ॥ ज० म०

त्रिवर्गेत्यादि । मैथिलो जनकः तं दशरथं इदं वाक्यं बभाषे ब्रुवीत्यर्थत्वात् द्विकर्मकता किन्नदित्याह भवन्तमेकमासनमध्यासयन्नुपवेशयन् इन्द्रः सुराणां विवेकदृश्वत्वं सदसद्भेदज्ञत्वं अगात् प्राप्तवान् कीदृशं त्रिवर्गस्य पारं गच्छतीति ढधेकादिति खीनः त्रिवर्गो धर्म्मकामार्थैरित्यमरः । असाविति बुद्धिस्थनिर्दृशनं विवेकं दृष्टवानिति त्वासुसिति क्विनिप् भवन्तमिति अध्यासेः प्रागविवक्षितकर्म्मत्वादकर्म्मकत्वेन प्रयोज्यकर्त्तुः कर्म्मत्वं आसनमिति कर्म्मक्रियेत्यादिना आधारस्य कर्म्मत्वम् ॥ ४६ ॥ भ०

हिरेत्यादि । तस्य दशरथस्य सुताय रामाय सूयत इति सुतः सुप्रसवैश्वर्य्ययोरित्यस्मात् कर्म्मणि निष्ठा सुता मैथिली सीता ददे जनकेनेत्यर्थात् कर्म्मणि

लब्धां ततो विश्वजनीनवृत्तिस्तामात्मनीनामुदवोढ रामः ।
सद्रत्नमुक्ताफलभर्म्मभूषां संवंहयन्तीं रघुवंश्यलक्ष्मीं ॥ ४८ ॥

लिट् मैथिलस्यापत्यं अतइञ् तदन्तादितोमनुष्यजातेरिति ङीष् । रामस्य ज्येष्ठत्वात्तस्मैव कविना परिणय उक्तः न शेषाणाम् तेन अन्या अपि तदैव दुहितरो दत्ताः हिरण्मयी सुवर्णनिर्मितेव सालवृक्षलता वृक्षलता सुवर्णकदलित्वात् तस्याः हिरण्यविकार इति मयटि दाण्डिनायनेत्यादिना यलोपनिपातनम् । जङ्गमा सञ्चारिणी नतु स्थावरा अत्यर्थङ्गच्छतीति यङि नुगत इति नुक् यङन्तात्मचाद्युचि यङोऽचिचेति यङो लुक् च्युता दिवः आकाशात्पतिता अचिरप्रभेव विद्युदिव तेजस्वित्वात् तन्वीत्वाच्च किन्तु स्यात्सुरचञ्चला सा तु चञ्चलेति व्यतिरेकः जङ्गम इति जङ् न भवति क्रियाशब्दत्वात् तत्र मनुष्यजातेरिति वर्त्तते यथाङ्कात्तेर्य्याधिदेवता अधिष्ठात्री देवता तस्या आकृतिर्य्यस्याः सौम्यत्वात् आक्रियते अनयेत्याकृतिः संस्थानम् अकर्त्तरिकारकेति स्त्रियां क्तिन् ॥ ज० म० ॥

हिरण्मयीत्यादि । अर्थात् जनकेन तस्य दशरथस्य सुताय मैथिली सुता दत्ते मैथिलस्यापत्यं स्त्रीति ष्णः यद्वा मिथिलायां नगर्यां अर्थात् मिथिलाख्यभूभागे जाता अयोनिसम्भवत्वात् पार्थिवीत्यर्थः अयोनिसम्भवत्वेन दिव्यत्वाच्च ऋक्षीत्वं सूचितं रामसमीपे सीता कीदृशी हिरण्मयी स्वर्णमयी सालवृक्षसम्बन्धिनी लतेव एतेन रामस्य सालवृक्षतुल्यत्वं सूचितं मयटि हिरण्यस्य यलोपो निपातनात् जङ्गमा सञ्चारिणी अन्या लता स्थिरेति विशेषः यद्यपि गत्यर्थाकर्मकायां यङ्स्यात्तथापि जङ्गमशब्दोऽयं रूढः दिवश्च्युता अचिरप्रभा विद्युदिव स्यात्तुः स्थितिशीला विद्युच्चञ्चला इति विशेषः ग्लाञ्जास्थेति क्नुः अतिसौम्यत्वात् चन्द्रकान्तेरधिदेवताया अधिष्ठातृदेवताया इवाकृतिर्यस्याः ॥ ४७ ॥ भ०

लब्धामित्यादि । ततो दानानन्तरम् लब्धान्तामात्मनीनाम् आत्मनेहितां आत्मविश्वेति खः रामः उदवोढ वहेः स्वरितेत्त्वात्कर्त्तुः क्रियाफलविवक्षया तद् विश्वजनीना विश्वजनाय हिता वृत्तिः प्रवृत्तिर्य्यस्य रामस्य स पूर्ब्ववत्खः सती उत्कृष्टा रत्नादिशोभा यस्याः तैरलङ्कृतत्वात् तां सद्रत्नसुक्ताफलभर्म्मशोभाभर्म्म स्वर्णं सर्ब्बधातुभ्योमनिन् भर्म्मभूषामिति पाठान्तरम् सद्रत्नादिभूषा अलङ्कारो यस्या इति योज्यम् गुरोश्चहल इत्यकारः संवंहयन्तीं सम्बहुलामतिस्थिराङ्गुर्व्वाणाम् बहुलशब्दात्तत्करोतीति णिचि दृशवहोवात् प्रियस्थिरेत्यादिना वंहादेशः पश्चात्तदन्तस्य सम्पूर्ब्वस्य साधनेन योगः कामित्याह रघुवंश्यलक्ष्मीमिति

सुप्रातमासादितसम्मदं तद्वन्दारुभिः संस्तुतमभ्ययोध्यम् ।
अश्वीयराजन्यकहास्तिकाढ्यमगात्सराजं बलमध्वनीनम् ॥ ४९॥

रघुवंशे भवाब्धिभूतिस्वर्गान्नाञ्चेत्यनुवृत्तौ अशब्देयत्खावन्यतरस्यामिति यत् ॥ ४८ ॥ ज० म०

लब्धामित्यादि । ततोऽनन्तरं आत्मने हितां लब्धां तां सीतां राम उद्वोढ उत्पूर्ब्बवहः परिणये सहवहोऽदोढीति अतओत्वं दन्त्यवत्वात् भत्वाभावः विश्वेषां जनानां हिता वृत्तिर्ब्यवहारो यस्य विकारसंघेत्यादिना हितार्थे ईनः मन्वर्ब्बेत्यादिना आत्मनो नलोपाभावः । सद्रत्नानि सन्नाफलानि भर्म्माणि भूषा अलङ्कारो यस्याः शोभामिति पाठे तैः शोभते पचादित्वादच् सती वर्त्तमाना रत्नादीनां शोभा यत्रेति वा । हेम स्वर्णं जातरूपं सुवर्णं भर्म्म हाटकं शातकुम्भमिति हलायुधः रघुवंश्यलक्ष्मीं संवर्द्धयन्तीं सम्यक् बद्धलीकुर्ब्वतीं लेः क्त्वाख्यानेजिः वाढान्निकेति वंहादेशः ॥ ४८ ॥ भ०

सुप्रातेति । विवाहं निर्ब्बर्त्त्य प्रभाते अयोध्याभिमुखमन्द्रवन्द्रारयस्यागात् गतवत् । सुप्रातन्निरुपद्रवत्वात् शोभनम्प्रातर्ह्निसुखं यस्य बलस्य । सुप्रातसुश्वेत्यादिना समासान्तष्टिलोपश्च निपात्यते । आसादितसम्मदं प्राप्तहर्षं प्रमदसम्मदौ हर्षे इति निपातनम् । वन्दारुभिः संस्तुतं कृतस्तवम् अभ्ययोध्यम् अयोध्याभिमुखम् अभिप्रतीआभिमुख्ये इति अव्ययीभावः । अश्वानां समूहो अश्वीयं केशाश्वाभ्यां यञ्छाविति ञ्यः राजन्यानां क्षत्रियाणां समूहो राजन्यकम् । गोत्रोक्षेत्यादिना वुञ् प्रकृत्याकेराजन्यमनुष्ययुवान इति प्रकृतिभावादपत्ययकारलोपो न भवति । हस्तिनां समूहो हास्तिकम् अचित्तहस्तीति ठक् । एषां सेनाङ्गत्वात् द्वन्द्व एकवद्भावः तेनाश्वसुपचितमिति क्तोयेति योगविभागात्समासः । सह राज्ञेति विग्रहे साकल्यवचने यौगपद्ये वाव्ययीभावः । अव्ययीभावेचाकाल इति समभावः अनश्चेति टच् समासान्तः । अध्वनीनमध्वानमलङ्गामीत्यध्वनोयत्खौ आत्माध्वानौ ख इति प्रकृतिभावः ॥ ४९ ॥ ज० म०

सुप्रातमित्यादि । तद्बलं दशरथसैन्यं अभ्ययोध्यं अयोध्यामभिमुखीकृत्य अगात् द्रुणोगाद्यां शोभनं प्रातर्यस्य तत् सुप्रातं निश्चिन्तत्वात् निपातनेन साधुत्वेन वा साध्यं । आसादितः प्राप्तः सम्मदो हर्षो येन वन्दारुभिः स्तुतिपाठकैः संस्तुतं वदिस्तुत्यभिवादयोः ष्टुवन्द् आरुः अश्वराजन्यहस्तिनां समूहेन आढ्यं

विशङ्कटो वक्षसि बाणपाणिः सम्पन्नतालद्वयसः पुरस्तात् ।
भीष्मो धनुष्मानुपजान्वरत्निरैति स्म रामं पथि जामदग्न्यः ॥५०॥
उच्चैरसौ राघवमाह्वतेदं धनुः सबाणं कुरु मातियासीः ।
पराक्रमश्रीः प्रियसन्ततिस्तं नम्रः क्षितीन्द्रोऽनुनिनीषुरूचे ॥५१॥

प्रभूतं विकारसंघेत्यादिना समूहार्थे अश्वादीयः राजन्यहस्तिभ्यां कण् राज्ञा सह विद्यमानं सराजं राजसहितं अनवशिष्टं युगपद्वा इत्यर्थः । वःकसामीप्येति साकल्ये यौगपद्ये वा अव्ययीभावः अनङ्त्वनेनाप्रत्ययः । सहः सोऽकाले इति सः अध्वानमनुगच्छति ढधेकादिति ढैनः मन्वर्ज्जानित्यादिना नलोपाभावः ॥ ४९ ॥ भ०

विशेत्यादि ॥ एवमस्य गच्छतः पथि मार्गे सप्तम्यां भस्य ढेर्लोपः पुरस्तादयतः अस्तातौ चेति पूर्वस्य पुरादेशः । रामोजामदग्न्यः जमदग्नेरपत्यं रामोऽयम् गर्गादिपाठाद्यञ् स ऐति स्म आगतवान् आङ्पूर्व्वादिणो लट् एत्येधत्यूट्स्विति वृद्धिः । विशङ्कटो वक्षसि विशाल उरसि वेः शालच्छंकटचाविति शङ्कटच् । वाणः पाणावस्येति वाणपाणिः प्रहरणार्थेभ्य इत्यादिना सप्तम्यन्तस्य परनिपातः । सम्पन्नोनिष्पन्नोयस्तालद्वयः स प्रमाणं यस्य स तथोक्तः प्रमाणे द्वयसच् । भीयते अस्मादिति भीष्मः भियः ष्मन्वेति औणादिको मक्प्रत्ययः वा षुगागमश्च । भीमादयोऽपादान इत्यपादाने साधुः । धनुष्मान् धनुषा युक्तः संसर्गे मतुप् । जानुनोः समीपमुपजानु सामीप्येऽव्ययीभावः उपजानु अरत्निर्यस्य स तथोक्तः प्रलम्बबाहुरित्यर्थः ॥ ५० ॥ ज० म०

विशङ्कट इत्यादि । अथ जामदग्न्यः परशुरामः पुरस्तात् पूर्व्वस्यां दिशि अग्रतो वा पथि रामं ऐति स्म आगतः जमदग्नेरपत्यमिति गर्गादित्वात् ण्यः पुरस्तादिति दिक्शब्दाद्दिग्देशकालेस्तादिति स्तात् पूर्व्वाधरावरा इति पुरादेशः । वक्षसि विशङ्कटोविशालः बाणः पाणौ यस्य बाणयुतः पाणिर्यस्येति वा । सम्पन्नोविशालोयस्तालद्वयः स परिमाणं यस्य दन्तमात्तालद्वयसण्माने इति द्वयसः विभेत्यस्मात् भीष्मो निपातनात् । धनुष्मान् प्रशस्तधनुर्युक्तः मतुरर्थे जानुनोः समीपमुपजानु तत्रारत्निर्यस्य दीर्घबाहुत्वात् अरत्निस्तु निष्कनिष्ठेन मुष्टिना इत्यमरः । रत्नरत्नी स्त्रियौ हस्तौ बद्धमुष्टिततार्द्धकुली इत्यमरमाला ॥५०॥भ०

उच्चैरित्यादि ॥ उच्चैर्महता ध्वनिना राघवन्दाशरथिं एवम्वक्ष्यमाणमाङ्गत आह्वतवान् सङ्ग्रामाय आङ इत्यात्मनेपदम् आत्मने पदेष्वन्यतरस्यामिति चेरेङ् ।

अनेकशो निर्जितराजकस्त्वं पितृनतार्षीर्नृपरक्ततोयैः ।
संक्षिप्य संरम्भमसद्विपक्षं कास्यार्भकेऽस्मिंस्तव राम रामे ॥ ५२ ॥

धनुः सवाणङ्कुरु धनुषि वाणमारोप्य युद्धाय सज्जीभवेत्यर्थः मातियासीः मातिक्रम्य गमनङ्कार्षीः यातेर्माङि लुङ् अडभावः यमरमनमातांसकेति दृट् दृट इटीति सिचोलोपः । अथ क्षितीन्द्रो दशरथः तमूचे ब्रुवोवचिः आदेशस्य स्थानिवद्भावेन कर्तुः क्रियाफलविवक्षायान्नङ् न वचेः प्रस्थैपदित्वात् वच्यादिना सम्प्रसारणम् । पराक्रमज्ञः यतस्तस्य पराक्रमञ्जानाति राजा प्रियसन्ततिः प्रिया सन्ततिर्यस्य रामे व्यापादिते माभूत्सन्तानविच्छेद इति नम्रः प्रणतोभूत्वा अनुनिनीषुः अनुनेतुमिच्छुः तदनुनयमाह ॥ ५१ ॥ ज० म०

उच्चैरित्यादि । असौ परशुरामः उच्चैर्महाशब्देन राघवं राममाकृत स्पर्द्धयामास आह्वानं कृतवान् स्पर्द्धयामाङ् इति क्विडो मं वक्तव्यस्ख्यालिमेति ङः । इदं मदीयं धनुः सवाणं कुरु अतैव बलं ज्ञात्वा युद्धं करिष्यामि एतावतैव पराजितोऽहमिति भावः । अन्ये तु इदं त्वदीयं धनुः सवाणं कुरु धनुषि वाणमारोप्य युद्धाय सज्जीभवेत्यर्थ इत्याहुः इदमिति हस्तनिर्दिष्टत्वादुक्तं मातियासीः मातिक्रम्य गच्छ मेत्यव्ययं निषेधे तद्योगेऽमुनिषेधः यमरमनमेति इमसनौ । अथ क्षितीन्द्रोदशरथस्तं जामदग्न्यमूचे वचोऽरे इति ब्रुञो वचादेशः स्थानिवद्भावात् कर्तुः क्रियाफलवत्त्वविवक्षायां मं व्यथयश्चेति खेर्ज्ञिः अहस्वपाद्योरिति प्रकृतेर्ज्ञिः स किम्भूतः पराक्रमज्ञः, परशुरामस्य पराक्रमं जानाति प्रिया सन्ततिः सन्तानो यस्य प्रियसन्तानः अतएव नम्रः प्रणतः सन् अनुनिनीषुः अनुनेतुमिच्छुः ॥ ५१ ॥ भ०

अनेकशइत्यादि । संरम्भं क्रोधं संक्षिप्य उपसंहर क्षिपेः लोटि मध्यमैकवचने रूपम् श्यन् एकमेकमिति विग्रहे सङ्ख्यैकवचनाच्चेति वस् प्रत्ययस्समासः । अनेकशोऽनेकप्रकारमिति क्रियाविशेषणमेतत् निर्जितसमराजितं राजकं राज्ञां समूहो येन स निर्जितराजकः गोत्रोक्षेत्यादिना वुञ् । त्वं पुनः पितृनतार्षीः प्रीणितवानसि कैः रक्तैः तत्प्रीणन इत्यस्मात्तुदः सिच् हलन्तलक्षणा वृद्धिः । असद्विपक्षम् असन्नविद्यमानोविपक्षो यस्मिन् संरम्भे निर्जितराजकत्वात् रामोविपक्ष इति चेदाह कास्यार्भकेऽस्मिंस्तव राम रामे हे परशुराम अर्भके बालके रामे तव का आस्था क आदरोऽस्ति नैवेत्यभिप्रायः ॥ ५२ ॥ ज० म०

अनेकशइत्यादि । हे राम हे परशुराम संरम्भं क्रोधं संक्षिप्य संहर

अजीगणद्दाशरथं न वाक्यं यदा स दर्पेण तदा कुमारः ।
धनुर्व्यकार्क्षीद्गुरुवाणगर्भं लोकानलावीद्विजितांश्च तस्य ॥ ५२ ॥

क्षिप्यौनुदि अनेकवारं निर्जितं राजकं येन तथाभूतस्त्वं अतः क्रोधो न युक्तः क्षत्रियाणां रक्तानि रुधिराण्येव तोयानि तैस्त्वं पितॄन् अतार्प्सीः प्रीणितवान् एकविंशतिवारान् निःक्षत्रीकृत्य तद्रक्तैः पितृतर्पणकरणं तस्य प्रसिद्धं जिह्लदृपप्रीणने क्षयस्दृपस्पृशेति विकल्पात् सिः वेमूदिति रधादित्वाद्विकल्पेभावपक्षे व्रजवदेति त्रिः । संरम्भं कीदृशं असत्रवर्त्तमानो विपक्षो यत्र तादृशं निर्जितराजकत्वात् रामो विपक्ष इति चेदाह अस्मिन् मत्पुत्रे रामे अर्भके बालके तव का आस्था आदरो यत्नो वा न कापीति भावः । आस्याचालम्बनास्थानयत्नामेक्षासु कथ्यते इति विश्वः । रामपदद्वये न नामसाम्यादपि क्रोधो नोचित इति व्यज्यते । अनेकस्य एकमेकं इति विप्सायां संख्यैकार्थाद्वीप्सायामिति चशस् पश्चाच्च् समासः अनेकस्यापि संख्यावाचित्वात् तत एव चशस् इत्येके राजकमिति विकारसंज्ञेति राज्ञः समूहार्थे कण् ॥ ५२ ॥ भ०

अजीगेत्यादि । दाशरथन्दशरथस्येदन्दाशरथन्तस्येदमित्यण् वाक्यम्वचनं यदा स्वदर्पेण स्वमदेन हेतुना जामदग्न्यः नाजीगणत् न गणितवान् गणसङ्ख्यान इत्यस्यादन्तत्वान्न द्वित्वं चङि चेति द्वित्वनम् ईचगण इति अभ्यासस्येकारः तदा कुमारो रामोधनुर्व्यकार्क्षीत् आकृष्टवान् कृष आकर्षणे स्पृशस्दृशेत्यादिनोपसङ्ख्यानेन सिचि पक्षे रूपम् हलन्तलक्षणाट्टिः षढोः कस्सीति कत्वम् कृतदारकस्यापि पुत्रः पितरि जीवति कुमार इति व्यपदिश्यते । गर्भयतीति गर्भः गुरुर्बाणोगर्भोयस्य धनुषः लोकांश्च स्वप्रभावाद्विजितान् तस्य परशुरामस्य अलावीत् छिन्नवान् लुनातेर्लुङि सिचि ढ्रौ रूपम् । सकृच्छिद्यान्नामस्य लोका इति अमोघमस्त्रं सृक्कावानित्यर्थः ततःप्रभृति तस्य सर्वं तेजोऽपहृतम् ॥ ५२ ॥ ज० म०

अजीगणदित्यादि । यदा स जामदग्न्यः दाशरथं वाक्यं दर्पेण दर्पात् न अजीगणत् न गणितवान् दशरथस्येदमिति विकारसंज्ञेत्यादिना ष्णः । गणत्कसंख्याने वेड्गणकथः खेऽर्यड्डीति खेरीड् तदा कुमारो युवराजो बालको रामो धनुर्व्यकार्क्षीत् आकृष्टवान् कृषौत्वाकृषि कृषस्दृशेति सिः व्रजवदेति त्रिः षढोः कःसे इति कः क्किलादिति षः । कीदृशं धनुर्गुरु महत् बाणो गर्भ इव मध्यवर्त्ती यत्र बाणो गर्भे यस्येति वा गुर्ब्बिति बाणविशेषणम्वा । ततस्तस्य जामदग्न्यस्य विजितान् वशीकृतान् लोकान् स्वर्गानलावीत् छिन्नवान् तत्र गमनं निषिद्धवानित्यर्थः लुञ्गिछिदि टी ॥ ५२ ॥ भ०

जिते नृपारौ सुमनीभवन्ति शब्दायमानान्यशनैरशङ्कं ।
दृढस्य राज्ञोऽनुमते बलानि जगाहिरेऽनेकसुखानि मार्गान् ॥५४॥

अथ पुरुजवयोगान्नेदयद्दूरसंस्थं
द्वयदतिरयेण प्राप्तमुर्व्वीविभागम् ।

जित इत्यादि । जिते नृपारौ परशुरामे बलानि सैन्यानि मार्गान् पथः जगाहिरे अवष्टब्धवन्ति । दृढस्य राज्ञोदशरथस्यानुमते सति गच्छतेति । जामदग्न्यसंरम्भादसुमनांसि सुमनांसि सन्ति सुमनीभवन्ति बलानि अरुर्मन इत्यादिना ञ्वान्तस्य लोपे अस्य ञ्वितीत्वे रूपम् । शब्दायमानानि अशनैः सुष्ठु शब्दं कुर्व्वाणानि एवञ्जितस्तथा जितो नृपारिरिति शब्दवैरेत्यादिना क्यङ् अशङ्कन्निर्भयञ्जगाहिर इति क्रियाविशेषणम् । अनेकसुखानि पृथग्भूतानि पूर्व्वभयेन बद्धलीभूतत्वादनीकानाम्बद्धत्वाद्बद्धवचनमिति ॥ ५४ ॥ ज० भ०

जित इत्यादि । नृपाणां अरौ परशुरामे रामेण जिते सति दृढस्य राज्ञोदशरथस्यानुमते अनुमतौ सत्यां बलानि सैन्यानि अशङ्कं यथा स्यात्तथा मार्गान् पथो जगाहिरे आक्रान्तवन्ति गाहृङ् विलोडे । क्रीडार्थानि पूर्व्वं जामदग्न्यभयात् असुमनांसि सुमनांसि भवन्ति ञ्विःक्रभ्वःस्वभूततद्भावे इति ञ्विः । मनञ्चुरिति सलोपे अकारस्य ईः अशनैरशब्दैः शब्दायमानानि जयशब्दं कुर्व्वाणानि शब्दसुखकष्टादेरिति क्यङः घोर्ङ्ययरे इति दीर्घः । अनेकसुखानि पूर्व्वं भयात् वर्त्तुलीभूय सम्प्रति पृथग्भूतानि ॥ ५४ ॥ भ०

अथेत्यादि । अथेत्यानन्तर्य्ये बलन्दाशरथम् तूर्णं शीघ्रम् ऋष्यमत्वरेत्यादिना पत्ते दृढभावः । ज्वरत्वरेति वकारोपधयोरूठ् रदाभ्यामिति नत्वम् । अयोध्यामायात् आगतम् आङ्पूर्व्वाद्यातेर्लङि रूपम् । पुरुर्महान्वेगोजवः तेन योगात् पूर्य्यते वर्द्धते इति पुरुः कुर्त्रस्त्रेत्यधिकृत्य पृभिदिव्यधीत्यादिना कुप्रत्ययः । दूरसंस्थन्दूरे सन्तिष्ठत इति कः । उर्व्वीविभागन्नेदयत् अन्तिकयद्दूर्व्वत् अन्तिकशब्दात् समीपवाचिनः तत्करोतीति णिच् दृढवद्भावादन्तिकवाढयोर्नेदसाधाविति नेदादेशः पश्चाल्लट् शतरि शप् अयादेशः प्राग्वं विषयीकृतं चोर्व्वीविभागं भूविभागम् अतिरयेण अतिवेगेन द्वयत् दूरीकुर्व्वत् पश्चाद्वेगेन दूरशब्दात् पूर्व्ववत्णिचि दृढवद्भावे च स्थूलदूरेत्यादिना यणादिपरलोपः पूर्व्वस्य च गुणः पश्चात्तथा एव खडादयः । क्लमरहितम् अपगतश्रमम् अचेतत् कियद्दूरमागतोऽहमित्यवध्यमानम् चितीसंज्ञान इत्येतस्य शतरि रूपम् । अनीरजा नीरजाः कारितेति

क्लमरहितमचेतन्नीरजीकारितक्ष्मां
बलमुपहितशोभां तूर्णमायादयोध्याम् ॥ ५५ ॥
इति भट्टिकाव्ये प्रकीर्णकाण्डे सीतापरिणयो नाम
द्वितीयः सर्गः।

अरुर्मन इत्यादिना क्ष्मावन्त्यलोपः। अस्यञ्चावितीत्वम् नीरजीकारिता क्ष्मा भूमिर्यस्यामयोध्यायाम् तां सिक्तसम्मृष्टभूतलामित्यर्थः। उपहितशोभाञ्छत्रध्वज-पताकाभिरारोपितशोभाम् ॥ ५५ ॥ ज० म०

इति भट्टिकाव्यटीकायाञ्जयमङ्गलाख्यायामप्रकीर्णकाण्डे
सीतापरिणयोनाम द्वितीयः सर्गः ॥

अथेत्यादि ॥ अथानन्तरं बलं दशरथसैन्यं तूर्णं शीघ्रं अयोध्यां आयात् आङ्पूर्व्वाद्यातेर्धौ। त्वरतेः क्ते श्रिवावमवज्वरेति उङ सह वस्य जद् रूल्वाद्योदिति क्तस्य नत्वं। कीदृशं पुरुजवयोगात् प्रचुरजवयोगात् दूरसंस्थं नेदयदन्तिकं कुर्व्वत् लेःक्लत्याख्याने जिः वाढान्तिकेति नेदादेशः अतिरयेण अतिवेगेन प्राप्तं उर्व्वीविभागं दवयत् दूरं कुर्व्वत् जिः दवादेशः। क्लमरहितं अतिहर्षात् अपगतश्रमं अतएव अचेतत् कियद्दूरमागतमित्यजानत् चिती संज्ञाने भ्वादेः। कीदृशीमयोध्यां अनीरजा नीरजाः कारिता निर्धूली कारिता क्ष्मा भूमिर्यस्यां सिक्तसंमृष्टभूतलामित्यर्थः मनश्चुरिति क्ष्मौ सलोपः उपहित-शोभां ध्वजपताकादिभिः प्रापितदीप्तिम् ॥ ५५ ॥ भ०

इति भरतसेनकृतायां सुग्धबोधिन्यां भट्टिटीकायां
श्रीरामपरिणयोनाम द्वितीयः सर्गः ॥

तृतीयः सर्गः।

बधेन संख्ये पिशिताशनानां क्षत्रान्तकस्याभिभवेन चैव।
आढ्यम्भविष्णुर्यशसा कुमारः प्रियम्भविष्णुर्न स यस्य नासीत्॥१॥
ततः सुचेतीकृतपौरभृत्यो राज्येऽभिषेक्ष्ये सुतमित्यनीचैः।
आघोषयन् भूमिपतिः समस्तं भूयोऽपि लोकं सुमनीचकार॥२॥

बधेनेत्यादि। सङ्ख्ये संग्रामे पिशिताशनानां राक्षसानामभिभवेन क्षत्रियाणामन्तकस्य परशुरामस्य अभिभवेन च हेतुना यशसा आढ्यम्भविष्णुः समृद्धोभवन् कुमारो रामो यस्य न प्रियम्भविष्णुः स नासीदेव सर्वस्यैव प्रिय इत्यर्थः एवशब्दो नासीदित्यत्रान्वितः चैवशब्दः समुच्चये वा। अनाढ्य आढ्यो भवति इति प्रागप्रियोऽपि भूत्वा पश्चात् प्रियो भवति भुवोवेखिष्णुखुकञाविति वेखिष्णुः खित्यव्याजरुष इति मन् अस्तेर्ध्यां रुदाद्यस्तीति ईम्॥१॥ भ०

बधेनेत्यादि। संख्ये युद्धे पिशिताशनानां राक्षसानां बधेन क्षत्रियाणामन्तकस्य परशुरामस्य अभिभवेन च हेतुना यशसा आढ्यम्भविष्णुः समृद्धोभवन् कुमारो रामो यस्य न प्रियम्भविष्णुः स नासीदेव सर्वस्यैव प्रिय इत्यर्थः एवशब्दो नासीदित्यत्रान्वितः चैवशब्दः समुच्चये वा। अनाढ्य आढ्यो भवति इति प्रागप्रियोऽपि भूत्वा पश्चात् प्रियो भवति भुवोवेखिष्णुखुकञाविति वेखिष्णुः खित्यव्याजरुष इति मन् अस्तेर्ध्यां रुदाद्यस्तीति ईम्॥१॥ भ०

ततइत्यादि। ततः प्रियम्भविष्णुतायाः अनन्तरम् भूमिपतिर्ईश्वरो लोकं सुमनीचकार किमयं सम्यक् पालयिष्यति नवेति असुचेतसः पौरा भृत्याश्च जाताः ते सम्यक् पालनात्सुचेतसः कृता येन स सुचेतीकृतपौरभृत्यः भूयोऽपि पुनरपि लोकं समस्तं सुमनीचकार कथमित्याह राज्ये राजकर्म्मणि पालने रक्षणे सुतं रामं अभिषेक्ष्ये तदभिषेकङ्करिष्यामीति सिचेरुभयपदित्वात्तङ् अनीचैर्मन्दया ध्वनिना आघोषयन् घोषणाङ्कारयन् सुचेतीसुमनीशब्दौ अरुर्मन इत्यादिना साधू॥२॥ भ०

आदिक्षदादीप्तकृशानुकल्पं सिंहासनं तस्य सपादपीठं।
सन्तप्तचामीकरवल्गुवज्रं विभागविन्यस्तमहार्घरत्नम् ॥ ३ ॥
प्रास्थापयत्पूगकृतान् स्वपोषं पुष्टान् प्रयत्नादृढगात्रबन्धान्।
स्वभर्म्मकुम्भान् पुरुषान् समन्तात्पत्काधिणस्तीर्थजलार्थमाशु ॥४॥

तत इत्यादि। ततोऽनन्तरं अहं राज्ये राजकर्म्मणि सुतमभिषेक्ष्ये अभिषिक्तं करिष्ये इति अनीचैरुच्चैराघोषयन् भूमिपतिर्दशरथः समस्तं लोकं भूयः पुनरपि सुमनीचकार असुमनसं सुमनसं कृतवान्। कीदृशः असुचेतसः सुचेतसः कृताः पौरा भृत्यास्च येन स तथा अभिषेककाले किमयं सम्यक् परिपालयिष्यति नवेत्याशङ्कया पौरभृत्यानामसुचेतस्त्वमासीत् सम्यक् पालनात् तेषां सुचेतस्त्वं कृतं रामस्य प्रियमभिष्णुतया तदभिषेकमदृष्ट्वा पुनः पुनरसुमना लोक आसीत् रामाभिषेकाघोषणया पुनः पुनः सुमनसं चकार सुचेतीसुमनीशब्दौ पूर्ब्ववत् मनश्चक्षुरित्यादिना सिद्धौ सिच्प्रशौञ् क्षरणे क्षडिति कड्॥ २ ॥ भ०

आदिक्षदित्यादि। तस्य रामस्य सिंहासनमादिक्षत् आदिष्टवान् एवं विधं कारयेति। दिशेः स्वरितेतो लुङि शलदयुपधादित्यादिना चेः क्सः अकर्त्तृगामिक्रियाफलत्वात्तिप् आदीप्तकृशानुकल्पज्वलिताग्नितुल्यं तस्य कारणमाह सन्तप्तचामीकरवर्णानि उत्तप्तसुवर्णवर्णानि वज्राणि यस्मिन् तथा विभागेषु विन्यस्तानिअतिमहार्घाणि रत्नानि पद्मरागादीनि यत्र सपादपीठं सह पादपीठेन ॥ ३ ॥ ज० भ०

आदिक्षदित्यादि। दशरथस्तस्य रामस्य सिंहासनं आदिक्षत् आदिष्टवान् दिशौञ् अतिसर्ज्जने टी हशसोऽनिमिजुङ इति शक् शक्ङाजेति षड् षढोः कः से इति कः कीदृशं सम्यक् ज्वलिताग्नितुल्यं त्यादेश्चौने इति कस्यः पादपीठेन सहितं अग्नितुल्यस्वर्णशोभितहीरकं विशिष्टदेशार्पितमहामूल्यपद्मरागादिकम् ॥ ३ ॥ भ०

प्रास्थेत्यादि। तीर्थजलार्थम्पुरुषान् प्रयत्नात् आदरेण समन्तात्सर्व्वासु दिक्षु आशु शीघ्रम्प्रास्थापयत् प्राहिणोत्। प्रपूर्ब्वस्तिष्ठतिर्गमने वर्त्तते तस्य हेतुमण्यन्तस्य लङि रूपं पूगकृतान् अपूगाः पूगाः कृता इति श्रेण्यादिषु कृत्यर्थवचनमिति समासः सङ्घीकृतानित्यर्थः स्वपोषम्पुष्टान् स्वेपुष इति णसुल् अमैवाव्ययेनेति समासः यथाविध्यनुप्रयोगश्च। दृढो गात्रबन्धो येषान्तान् संयतकायान् महाभारोद्वहनक्षमत्वात् सङ्क्षेमकुम्भान् ससुवर्णकलसान् पत्काधिणः

उच्चांप्रचक्रुर्नगरस्य मार्गान् भ्रजान् बबन्धुर्मुमुचुः खधूपान् ।
दिशश्च पुष्पैश्चकरुर्विचित्रैरर्थेषु राज्ञा नियुक्ता निपुणा नियुक्ताः ॥ ५ ॥

पादौ कषितुं हिंसितुं शीलं येषामिति सुप्यजातौ णिनिः हिमकाशिहतिषुचेति पदादेशः पदातीनित्यर्थः । आश्वेति क्वापाजौत्यादिना उण् ॥ ४ ॥ ज० म०

प्रास्थापयदित्यादि । दशरथस्तीर्थजलार्थं समन्तात् सर्व्वासु दिक्षु आशु शीघ्रं पुरुषान् प्रयत्नात् आदरात् प्रास्थापयत् प्रपूर्व्वस्थाधातुर्गत्यर्थः धीजिःप्रेरणे हुवीवीति पन् पूगकृतान् अभिधानात् अपूगाः पूगा कृता इति च्व्यर्थे समासः सङ्घीकृतानित्यर्थः खपोषं यथा स्यात्तथा पुष्टान् खानां ज्ञातीनां पोषो यत्र पोषणक्रियायां पोषो घञन्तः गतार्थात् पुषोणम् तदनुप्रयोगश्चेति पाणिनीयादयः तन्मते खेन धनेन पुष्टानित्यर्थः दृढो गात्राणां बन्धो येषां भारोद्वहनत्वमत्वात् खर्णकलसंसहितान् पादकषणशीलान् कषबधे अच्हादित्वाणिन् पादचारिण इत्यर्थः । अत्र पादस्य पदादेश इति पाणिनीयादयः खमते पद्शब्दोऽस्ति पदंघ्रिश्चरणोऽस्त्रियामित्यमरः केन उभ्यते पूर्य्यते इति कुम्भो निघातनात् ॥ ४ ॥ भ०

उच्चानित्यादि । ये निपुणा अर्थेषु कार्य्येषु राज्ञा दशरथेन नियुक्ताः अधिकृतास्ते नगरस्य मार्गान् पथः उच्चान् सेकवतः प्रचक्रुः । उच्चणश्चा गुरोश्च हल इत्यकारः सा विद्यते येषामित्यर्शआदिभ्योऽच् इजादेश्च गुरुमत इत्यादिना आम्प्रत्यये प्रचक्रुरित्यनुप्रयोगो न घटते क्वाच्यनुप्रयुज्यते इत्यनुशब्दश्च व्यवहितनिरुत्त्यर्थत्वात् भ्रजान्बबन्धुः उच्छ्रायितवन्तः मुमुचुः खधूपान् आकाशे घटिकादिभिर्धूपान्मुमुचुः प्रसृक्तवन्तः । दिशश्च पुष्पैश्चकरुः क्षादितवन्तः कृविक्षेप इत्यस्य लिटि कृच्कृत्तामिति गणः विचित्रैः नानाप्रकारैः ॥ ५ ॥ ज० म०

उच्चानित्यादि । अर्थेषु प्रयोजनेषु राज्ञा नियुक्ता निपुणाः कर्म्मकुशला जना नगरस्य मार्गान् उच्चान्प्रचक्रुः सिक्तवन्तः उच सेचने वीजादित्वात् स्वरूपान्नाम इति सूत्रेणाम् इति प्रत्ययेसिद्धौ अनुप्रकृष्टं उपसर्गक्रियाविशेषणव्यवधानेऽपि तदनुप्रयोगज्ञापनार्थं इति रामानन्दाचार्य्येण व्याख्यातं तेनात्र तेनैव सोपसर्गस्य क्रजोऽनुप्रयोगः । क्रमदीश्वरेण तु सप्रादिक्रभ्वस्तिभिश्चेति सूत्रं कृत्वा अयमेव श्लोको निदर्शितः । केचित्तु नगरस्य उच्चां सेकं प्रचक्रुः भग्नान् मार्गान् भ्रजांश्च बबन्धुरित्याहुः । जयमङ्गलादिस्तु उच्चानिति पठित्वा उच्चणश्चा सास्येषामिति अर्शआदित्वाद् इति व्याख्यातम् । भ्रजान् बबन्धुः

मातामहावासमुपेयिवांसं मोहाददृष्ट्वा भरतं तदानीं ।
तत्कैकयी सोढुमशक्नुवाना ववार रामस्य वनप्रयाणम् ॥ ६ ॥

उत्थापितवन्तः खे आकाशे धूपान् सुसुचुः त्यक्तवन्तः पुष्पैर्दिशश्चकरुरुल्कादितवन्तः क्षयविक्षेपे ऋतोणुः कित्त्वामिति णुः ॥ ५ ॥ भ०

मातेत्यादि। तत्पूर्वोक्तमभिषेकसंविधानं सोढुमशक्नुवाना असहमाना कैकयी रामस्य वनप्रयाणम्ववार प्रार्थितवती राज्ञ इत्यर्थात् । सहेःशक्नोतावुपपदे शकधृषेत्यादिना तुमुन् तत्र नञाशक्त्यर्थस्य प्रतिषेधेऽपि न दोषः प्रतिषेधस्य बहिरङ्गत्वात् शक्नोतेः परस्मैपदित्वात् शानज् नास्ति ताच्छील्यवयोवचनेत्यादिना चानश् स्यादित्याच्छूः अचिश्नुधातुभ्रुवांय्वोरियङुवङौ क्ङिति चेत्यादिना उवङ् किं कृत्वेत्याह तदानीमार्थनाकाले देशान्तरावस्थितत्वात् किमेवं क्रियते न वेति न भरतमपृष्टवती । देशान्तरावस्थितिन्दर्शयन्नाह मातामहावासमिति मातुः पिता मातामहः पितृव्यमातुलेत्यादिना निपातनात् डामहच्। आवासः निलयम् आवसत्यस्मिन्निति अधिकरणे घञ्। उपेयिवांसम् उपेयिवान् नाश्वाननूचानश्च इत्यादिना निपातितः मोहादज्ञानात् दूतप्रेषणेनादृष्ट्वा रामस्येति कर्त्तरि षष्ठी वनाय प्रयाणङ्गमनमिति चतुर्थीति योगविभागात्समासः । गत्यर्थकर्म्मणीत्यादिना चतुर्थी परत्वात्कृत्कृत्तद्धितसमासैकशेषसनाद्यन्तधातुरूपाणां प्रक्रिया षष्ठ्या भवितव्यमिति चेत् न पुनर्द्वितीयाग्रहणात्परामपि षष्ठीम्बाधित्वा द्वितीयैव यथा स्यादिति । यद्येवन्द्वितीयैव स्यात् न चतुर्थी नैष दोषः द्वितीयाग्रहणस्योपलक्षणार्थत्वात् तथा च वृत्तावुभयसूत्रं यामङ्गत्वा यामाय गन्तेति ॥ ६ ॥ ज० म०

मातामहेत्यादि । तदानीं तस्मिन् समये तत्पूर्वोक्तमभिषेकविधानं सोढुमशक्नुवाना असमर्था कैकयी मोहादज्ञानात् भरतं अदृष्ट्वा रामस्य वनप्रयाणं ववार राजानं प्रार्थितवती । भरतं किम्भूतं मातामहावाससमुपेयिवांसं उपगतं अदृष्टेत्यत्र हेतुरयं एतेन भरतदोषपरिहारः कृतः मातृपितृभ्यां तत्पितरि डामहच् निपातनात् आवसत्यस्मिन् आवासो गृहं अधिकरणे घञ् उपपूर्वादिनः कृतुः वसोर्घसेकाजितीम् खेः कितिर्घ इति र्घः विनाऽभ्यणाविति यादेशः सहेश्चतुभि क्षोढोभाविति हस्य ढः ढभाक्तथोरिति तस्य धः ष्टुभिरिति धस्य ढः । सहवक्षोदोढोति अत ओत्वं द्रौद्रौति ढलोपः शक्निरुशक्नौ शक्तिवयस्ताच्छील्ये इति शतुः शानः वनाय वनस्य वा प्रयाणं वनप्रयाणं गत्यर्थमन्यढ इति चतुर्थीं ढधेक्ततीति क्तत्वयोगात् ढे प्रो अनयोर्ब्बिवक्षाधीनत्वात् चतुर्थ्या षष्ठ्या वा विग्रहः ॥ ६ ॥ भ०

कर्णेजपैराहितराज्यलोभा स्त्रैणेन नीता विकृतिं लघिम्ना ।
रामप्रवासे व्यसृजन्न दोषं जनापवादं सनरेन्द्रमृत्युं ॥ ७ ॥
वस्तूनि देशांश्च निवर्त्तयिष्यन्रामं नृपः संगिरमाण एव ।
तयावजज्ञे भरताभिषेको विषादशङ्कुश्च मतौ निचख्ने ॥ ८ ॥

कर्ण इत्यादि । कर्णे जपन्ति कर्णेजपाः सूचकाः मन्थरादयः सप्तम्यां कर्ण-योरित्यच् तत्पुरुषे कृतिबहुलमिति सप्तम्या अलुक् तैराहितः आनायितो राज्य-लोभो यस्याः सैवं स्त्रैणेन स्त्रिया अयं स्त्रीपुंसाभ्यान्नञ्स्नञाविति नञ् लघो-र्भावोलघिमा पृथ्वादित्वादिमनिच् टिलोपः तेन विकृतिमन्यथात्वन्नीता केकयी रामप्रवासे सति दोषन्न व्यसृजत् नालोचितवती सृजश्चामर्थन इति तौदादिकस्य लङि रूपम् किंस्वरूपन्दोषम् जनापवादं लोकवैमुख्यं राज्यार्हौ ज्येष्ठः पुत्रो-ऽनया प्रव्राजित इति । नरेन्द्रस्य दशरथस्य मृत्युना सह वर्त्तमानम् ॥७॥ज० म०

कर्णेजपैरित्यादि । केकयी रामप्रवासे जनापवादरूपं दोषं न व्यसृजत् नालोचितवती सृजश्चौ मृषि राजार्हौज्येष्ठोऽनया निष्काशित इति लोकापवादः किम्भूतं नरेन्द्रस्य दशरथस्य मृत्युना सहितं दोषानालोचने हेतुगर्भविशेषणमाह कर्णेजपैः पिशुनैर्मन्थरादिभिराहित आरोपितोराज्यस्य लोभो यस्याः कर्णे जपन्ति इति पचादित्वादच् अभिधानात् सप्तम्याअलुक् । परकीयबुद्ध्या दोष-कर्तृत्वे हेतुमाह स्त्रैणेन स्त्रीसम्बन्धिना लघिम्ना लघुत्वेन विकृतिं प्रकृतेरन्य-थात्वं नीता प्रापिता स्त्रिया अयं स्त्रैणः पुंस्त्रियोरिति नञ् लघोर्भावो लघिमा गुणादिमनभावे इति इमनच् ओमांश्वडिदिति ङित्वे टेर्लोपः ॥ ७ ॥ भ०

वस्तूनीत्यादि । रामं निवर्त्तयिष्यन् रामं निवर्त्तयितुं वस्तूनि द्रव्याणि देशांश्च सङ्गिरमाण एव प्रतिजानान एव दास्यामीति नृपोराजा कैकेया तदनङ्गीकरणादवज्ञे अवज्ञातः ज्ञा इत्ययन्धातुरवपूर्व्वोऽवज्ञाने वर्त्तते तस्मा-त्कर्म्मणि लिट् गमहनेत्युपधालोपः तत्र इतेर्हेतुमण्ण्यन्ताक्रियार्थोपपदे लट् । सङ्गिरणञ्च क्रिया गिरे स्तौदादिकादवाङ् इति अधिकृत्य समः प्रतिज्ञान इति तङ् ज्ञानच् ऋत इत् आनेमुक् । इदञ्चापरमनुष्ठितन्तया भरतो राज्येऽभि-षिच्यतामिति भरताभिषेको मतौ मनसि निचख्ने निखातः कर्म्मणि लिट् गमहनेत्यादिना उपधालोपः तथा विषादः शङ्कुरिव शल्यमिव निचख्ने ज्येष्ठत्वात् नायं समभिषिच्यत इति विषादः । संग्रामाल्लिल परिश्रान्तमागतन्दशरथ-ङ्केकयी परिचचार तेन परितुष्टेनोक्ताङ्किन्ते दास्यामीति सा प्राह यदार्थयिष्यते

ततः प्रविव्राजयिषुः कुमारमादिक्षदस्याभिगमं वनाय ।
सौमित्रिसीतानुचरस्य राजा सुमन्त्रनेत्रेण रथेन शोचन् ॥ ६ ॥

तदा यूयन्द्राक्षमेति सा तदवसरमुद्धा वरद्वयमार्थितवती एको रामस्य वनगमनं द्वितीयो राज्ये भरतोऽभिषिच्यतामिति ॥ ८ ॥ ज० म०

वस्तूनीत्यादि । रामं निवर्त्तयिष्यन् निवारयितुं केकय्यै वस्तूनि धनानि देशांश्च संगिरमाणः रामस्तिष्ठतु सर्व्वं दास्यामीति प्रतिजानान एव नृपोदशरथस्तया केकया तदनङ्गीकारात् अवजज्ञे अनादृतः पूर्व्वप्रतिज्ञातस्य तदभिमतप्रदानस्यानिर्व्वाहात् ज्ञागबोधने अवपूर्व्वोऽयमनादरे वर्त्तते कर्म्मणि ठौ दृतेः प्रेरणे अप्रत्नात् शदः गिरतेस्तौदादिकात् मनःप्रतिज्ञायामिति मं भरताभिषेकस्वत्वंशयित्वेन विषादरूपशङ्कुश्च मतौ मनसि निचखे चिन्तितः । यद्वा दशरथस्य नृपस्य मनसि भरताभिषेको निचखे आरोपितः तत्प्रार्थनायाः पूर्व्वं प्रतिज्ञाभयेन तत्स्वीकारात् शङ्कुरिव यो विषादः सोऽपि निचखे तत्प्रभृति विषादावतारात् खनेः कर्म्मणि ठौ हनगमजनेत्युङ्लोपः । पुरा परितुष्टेन राज्ञा केकय्यै वरद्वयं देयमिति प्रतिश्रुतं तदेदानीमेकं रामस्य प्रवासमपरं पुत्रस्य राज्यं केकयी प्रार्थयामासेति प्रसिद्धिः ॥ ८ ॥ भ०

तत इत्यादि । कैकेयीप्रार्थनानन्तरं राजा कुमारं रामं प्रविव्राजयिषुः प्रव्रजन्तमेनमव्राजयितुमिच्छुः व्रजेर्हेतुमण्यन्तात्मन् अस्य कुमारस्य रथेन वनायाभिगममभिगमनम्। यहृदृदृनिश्चिगमश्चेत्यप् आदिक्षत् आदिष्टवान् अस्येति कर्त्तरिषष्ठी वनायेति गत्यर्थकर्म्मणीति चतुर्थी सौमित्रिसीतानुचरस्य लक्ष्मणसीतासहायस्य सुमित्राया अपत्यम् वाह्वादित्वादिञ् सहचरत्वेनाभ्यर्हितत्वात् पूर्व्वनिपातः अनु पश्चाच्चरतीति अनुचरः भिक्षासेनादायेष्वचेति चकारस्यानुक्तसमुच्चयार्थत्वात् टः अनुचरश्चानुचरी च पुमान् स्त्रियां तावनुचरौ सौमित्रिसीते अनुचरौ सहायौ यस्य । कालापिकास्तु तोऽन्यत्रापि पठन्ति अनधिकरणोपपदे चरेष्टः इत्यर्थः । नीयतेऽनेनेति नेत्रं लोचनं दाम्नीत्यादिना ष्ट्रन् सुमन्त्रनामा रथवाहको नेत्रमिव यस्य रथस्य तद्वशात्तस्य प्रवृत्तेः शोचन् परिदेवयमानो राजा ॥ ६ ॥ ज० म०

तत इत्यादि । केकयीप्रार्थनानन्तरं राजा शोचन् कुमारं रामं प्रव्रज्यां कारयितुमिच्छुः अस्य रामस्य रथेन वनाभिगमनं आदिष्टवान् दृशसदित्यादिना सक् । व्रजेः प्रेरणे अप्रत्नात् वनायेति गत्यर्थमन्यदे इति कर्म्मणि चतुर्थी श्रीपतिदत्तादयस्तु नित्यं कर्म्मणि तुमर्थप्रयोगिनश्चतुर्थीत्याहुः वनं गन्तुमित्यर्थः

केचिन्निनिन्दुर्नृपमप्रशान्तं विचुक्रुशुः केचन साश्रमुच्चैः ।
ऊचुस्तथान्ये भरतस्य मायां धिक्केकयीमित्यपरो जगाद ॥ १० ॥

क्रीडतश्च रामस्य सीतालक्ष्मणसहायस्य सुमित्राया अपत्यं इति वाह्वादित्वात् ष्णः अनुचरतीति अनुचरः कर्मप्रतिरूपकोऽयमनुशब्दः तेन हनचरगष्टक्इति टक् । रेफेकेक्तौच परे इति निर्दिशता स्त्रीपुंसयोस्तन्मात्रकृतभेदयोरेकशेषः पुमान् भवतीति सूचितं तेन अनुचरश्च अनुचरी च अनुचरौ सौमित्रिसीते अनुचरौ यस्य स तथा । यद्वा सौमित्रिसीताभ्यामनुचर्यते यः स तथा घञ्खलनटोघे इति कर्मणि अल् प्राग्भावस्य विवक्षाधीनत्वात् सौमित्रेः प्राग्भावः अभ्यर्हितस्य प्राग्भाव इति ये वदन्ति तन्मते सदा सहचरत्वेन सौमित्रेरभ्यर्हितत्वं क्रीडतेन रथेन सुमन्त्रोनाम कश्चित् स नेता नायको यस्येति तेन नेतं रथे च नाड्याञ्च नेता नेतरि भेद्यवदिति विश्वः । सुमन्त्रो नेतं चक्षुरिव यस्येति केचित् नीजः वासुसिति त्रः ॥ ९ ॥ भ०

केचिदित्यादि । राज्ञा वनगमने समादिष्टे सति केचिज्जना नृपन्निनिन्दुः णिदिकुत्सायाम् अप्रशान्तं दृढभावेऽपि स्त्रीवशम् । केचन केचिन्नाश्रं सवाष्पमुच्चैः सुष्ठु विचुक्रुशुः सुतरामाक्रन्दितवन्तः तथान्ये भरतस्य मायां शाठ्यमूचुः उक्तवन्तः । तत्कृतोऽयं प्रयोगो येनात्मस्मरणार्थं मातामहकुलनिवासे स्थितः इति । अपरो धिक्केकयीं यद्येवमनुचितमिति जगाद गदितवान् धिगुपर्यादिषु त्रिष्विति धिग्योगे द्वितीया ॥ १० ॥ ज० म०

केचिदित्यादि । राज्ञि रामस्य वनगमनमादिष्टवति सति केचिज्जना नृपं निनिन्दुः णिदिकुत्सने क्रीडतं अप्रशान्तं वार्द्धकेऽपि स्त्रीवशीभूतत्वात् शान्तिरहितं केचन साश्रं सवाष्पं उच्चैर्महाध्वनिना विचुक्रुशुः क्रन्दितवन्तः केचित् केचन इत्यत्र किमःक्यन्ताच्चिञ्णाविति विद्यानिवाससूत्रेण चिञ्णौ किम्वा असाकल्येतु चिञ्णाविति कोधात् विभक्त्यन्तकिमः परमनयोः प्रयोगः अन्ये भरतस्य मायां शाठ्यं ऊचुः मातरमेव राज्यलोभाय नियुज्य स्वदोषहरणार्थं माता महमटवीं गतवानिति मायार्थः । अपरः कश्चित् केकयीं धिगिति जगाद धिक्समयेति द्वितीया धिगिति निन्दायां अपर इत्यत्र एकवचनात् अल्प एव लोकः केकयीं निन्दति बहवस्तु राजानं केकयाः स्त्रीलेन स्वभावतोमन्दबुद्धित्वं नृपस्य तु तथाविधस्यापि स्त्रीवचनान्नातिभंश इति महान् दोष इति व्यज्यते तेन प्रक्रमभङ्गोऽत्र न दोषावहः ॥ १० ॥ भ०

गतो वनं क्षोभवितेति रामः शोकेन देहे जनतातिमात्रम् ।
धीरास्तु तत्र च्युतमन्यवोऽन्ये दधुः कुमारानुगमे मनांसि ॥११॥
प्रस्थास्यमानावुपसेदुषस्तौ शोशुच्यमानानिदमूचतुस्तान् ।
किं शोचतेहाभ्युदये वतास्मान् नियोगलाभेन पितुः कृतार्थान् ॥१२॥

गतइत्यादि । स्व आगामिनि दिवसे वनङ्गतो रामो भवितेति तास् जनता जनसमूहः ग्रामजनबन्धुइत्यादिना ताल् देहे दग्धा कर्म्मणि लिट् अतएकहल्लित्येत्वाभ्यासलोपौ गत इति भूतकालः क्षोभवितेति भविष्यत्कालेन सम्बध्यमानः साधुः धातुसम्बन्धे प्रत्यया इति । ये तु तत्र धीराः ते च्युतमन्यवो विगतशोकाः सन्तः कुमारानुगमे कुमारस्य पश्चाद्गमननिमित्तं मनांसि दधुः कृतवन्तः राममनुव्रजाम इति निमित्तात्कर्म्मसंयोगे सप्तमीति । मनांसीति कर्म्मणा योगात् ॥ ११ ॥ ज० म०

गत इत्यादि । रामः श्वो भाविदिने वनं गतो भविता इति हेतोः शोकेन जनता जनसमूहोऽत्यर्थं देहे दग्धा दहेः कर्म्मणि ठी तृफलेति अतएत्वं खिलोपश्च । जनखलादित्वाज्जनात्तः संघे स्त्रीत्वमभिधानात् भवितेति भवद्भूतभव्ये इति भविष्यति डी श्वःप्रभृति भविष्यत्कालमात्रे अभिधानात् श्वइति न व्यर्थं तत्सम्बन्धात् गत इति धातुसम्बन्धे प्रत्यया इति वचनात् भविष्यत्कालेऽपि साधुः अन्येतु तत्र ये धीरास्ते च्युतमन्यवो विगतशोकाः सन्तः कुमारस्य रामस्य पश्चाद्गमने मनांसि दधुः धृतवन्तः धाजच्छार्हं अनुगम इति ढेनार्थादिति सप्तमी विषयसप्तमी वा ॥ ११ ॥ भ०

प्रस्थेत्यादि । तौ रामलक्ष्मणौ प्रस्थास्यमानौ गमिष्यन्तौ समवप्रविभ्यःस्थ इति तङ् जनान् इदं वक्ष्यमाणमूचतुः उक्तवन्तौ ब्रुवोऽर्थग्रहणात् वचेर्द्विकर्म्मकता उपसेदुषस्तौ ढौकितवतः जनान् भाषायां सदवसेत्यादिना क्वसुः । शोशुच्यमानान् अत्यर्थं शोकङ्कुर्वतः भृशार्थे यङ् किमूचतुरित्याह किं शोचतेति हे जनाः कस्मादस्मान् शोचत परिदेवयध्वम् विधावपूर्व्वार्थप्रकाशने लोट् दृहाभ्युदये वतशब्दो विस्मये तस्मिन् आश्चर्यभूते अभ्युदये वृद्धौ सत्याम् । कुत इत्याह पितुर्नियोगलाभेन वनगमनाज्ञालाभेन कृतार्थान् लब्धप्रयोजनान् कृतार्थत्वादशोच्या वयमित्यर्थः ॥ १२ ॥ ज० म०

प्रस्थास्यमानावित्यादि । प्रस्थास्यमानौ गमिष्यन्तौ तौ रामलक्ष्मणौ उपसेदुषः उपसन्नान् जनानिदं वक्ष्यमाणं ऊचतुः । किम्भूतान् शोशुच्यमानान् पुनः

असृष्ट योयश्च भयेष्वरक्षीद्यः सर्व्वदास्मानपुषत्स्वपोषम् ।
महोपकारस्य किमस्ति तस्य तुच्छेन यानेन वनस्य मोक्षः ॥१३॥
विद्युत्प्रणाशं स वरं प्रनष्टो यद्वोर्द्ध्वशोषं तृणवद्विशुष्कः ।
अर्थे दुरापे किमुत प्रवासे न शासनेऽवास्थित यो गुरूणाम् ॥१४॥

पुनरतिशयेन शोचतः मूलसूत्रेत्यादिना यङ् खेर्नुः प्रस्थास्यमानाविति प्रतिज्ञानिर्णयेत्यादिना संपूर्व्वात् तिष्ठतेर्म्मं स्यमानः । उपसेदुष इति उपपूर्व्वात् सदेष्टोपमवदिति क्वसुः वसोर्घसे इतीम् तृफलेति अतएत्वं खिलोपश्च वसोर्व्वःसेमपीति उः किमूचतुरित्याह दृहाभ्युदये दृढौ सत्यां किमस्मान् यूयं शोचत विधिनिमन्त्रणेत्यत्वादिशब्दात् विधावपूर्व्वप्रकाशने गी वर्तते खेदानुकम्पासन्तोषविस्मयामन्त्रितेष्वपीति वर्द्धमानः अभ्युदयः कृत इत्याह मित्रनियोगलाभेन वनगमनाद्यालाभेन कृतार्थान् लब्धप्रयोजनान् अस्मानिति द्वयोरप्यस्मदोबहुत्वमिति परः स्मरते वाह्याध्यात्मिक भावबहुत्वविवक्षया सीतान्वितत्वाद्वा ॥ १२ ॥ भ०

असृष्टेत्यादि । असृष्ट जनितवान् सृजेर्दैवादिकस्यात्मनेपदित्वात् लुङि रूपम् न तौदादिकस्य परस्मैपदित्वात् सृजिदृशोरित्यम् यश्च भयेषु सत्सु अरक्षीत् पालितवान् रक्षपालन इत्यस्य लुङि रूपम् यः सर्व्वदा सर्व्वकालं सर्व्वैकाल्येत्यादिना दाप्रत्ययः यश्चापुषत् स्वपोषन्धनेनापुषत् पुष्टवान् पुषेर्लुङि रूपम् पुषादित्वादवाङ् स्वपुष इति णसल् अमैवाव्ययेनेति समासः यथाविध्यनुप्रयोगश्च तस्य पितुः सम्बन्धिनोमहोपकारस्य किमस्ति मोक्षः प्रत्युपकारो नैवेति भावः केनेत्याह तुच्छेन असारेण वनस्य यानेन यातेर्भावे ल्युट् वनस्येति शेषसामान्ये षष्ठी कृल्लक्षणायास्तु षष्ठ्या गत्यर्थकर्म्मणि चतुर्थ्या वाध्यमानत्वात् ॥ १३ ॥ ज० म०

असृष्टेत्यादि । योऽस्मान् असृष्ट जनितवान् सृजौशविसर्गे यश्च भयेषु अरक्षीत् रक्षेत्यां रूपं यः सर्व्वदा सर्व्वकालं अस्मान् स्वपोषं अपुषत् स्वेन धनेन पुष्टवान् स्वपोषमिति चणम्बाभीक्ष्ण्ये इत्यत्र वाशब्दस्य व्यवस्थावाचित्वान्नणम् तदनुप्रयोगस्त्वभिधानात् अपुषदिति णसलिष्यते इति ङः सर्व्वदा इति सर्व्वैकात्काले दाच् तस्य पितुः सम्बन्धिनो महोपकारस्य तुच्छेन लघीयसा वनस्य गमनेन किं मोक्षः प्रत्युपकारोऽस्ति नास्त्येवेति भावः वनस्येति ढधे क्रतोति कर्म्मणि षष्ठी ॥ १३ ॥ भ०

विद्युदित्यादि ॥ अर्थे कार्य्यविशेषे दुरापेऽपि कृच्छ्रप्राप्येऽपि दैवङ्क्ष्वष्विल्यादिना खल गुरूणां यच्छासनमादेशः तस्मिन् योनावास्थित नावस्थितवान्

पौरा निवर्त्तध्वमिति न्यगादीत्तातस्य शोकापनुदा भवेत ।
मा दर्शतान्यं भरतञ्च मत्तो निवर्त्तयेत्याह रथं स्म सूतम् ॥ १५ ॥

अवपूर्व्वात्तिष्ठतेर्लुङ् समवेत्यादिना तङ् स्थाधोरिच्चेति किित्त्वमित्यङ्गात्तस्खाद-ङ्गादिति सिचोलोपः स वरं विद्युत्प्रणाशं प्रनष्टः विद्युदिवोत्पत्त्यनन्तरमेव विना-शङ्कृतः उपमाने कर्म्मणि चेति चकारात् कर्त्तोर्जीविपुरुषयोरित्यतः कर्त्तृग्रहणानु-वृत्तौ कर्त्तृवाचिनि विद्युच्छब्द उपपदे णमुल् उपसर्गादसमास इत्यादिना णत्वम् यद्वे त्यथवा स जर्ज्झशोषन्नृणवद्विशुष्कः जर्ज्झुगुधीत्यादिना णमुल् उभयत्रामवेत्या-दिना समासः यथा विध्यनुप्रयोगश्च किमु प्रवासे किम्पुनः प्रवासविषये यच्छा-सनन्तत्र तावदनवस्थितस्य सुतरामेव पूर्व्वोक्तं प्रयुज्यते ॥ १४ ॥ ज० म०

विद्युदित्यादि । दुरापे दुःखेन प्राप्येऽर्थे प्रयोजने गुरूणां शासने आज्ञायां यो न अवास्थित न तस्थौ स वरं विद्युत्प्रणाशं प्रनष्टो विद्युदिव उत्पत्त्यनन्तर-मेव नष्टः चणम्वेत्यत्र वाशब्दस्य व्यवस्थावाचित्वात् कर्त्तुरुपमानात् नशो-गतार्थाच्चणम् तदनुप्रयोगस्त्वभिधानात् प्राग्वद्रोण इति शान्तनशोणत्वं दुरापे इति दुःषद्दुःसोः खल्भावढे इति खल् अवास्थितेति अवपूर्व्वात्तिष्ठतेः प्रतिज्ञानि-र्देश इति मं व्यांसिः स्यादोर्डिंतीमेनणुरिति ङित्त्वस्य गुणाभावः झसूस्वा-दिति सेर्लोपः । शासनं राजदत्तोर्व्वीलेखाज्ञाशास्त्रशास्तिष्विति विश्वः । वरं मनागिष्टे देवकल्पितजामातावोर्वरः श्रेष्ठे पुनस्त्रिषु । मनागिष्टे भवेत् क्लीवमन्ये त्वाऊसदव्ययमिति रन्तिदेवः यद्वा अथवार्थे दृणवदूर्ज्झशोषं विशुष्क जर्ज्झुष्क इत्यर्थः जर्ज्झुष्क्षेण तार्थाच्च तदनुप्रयोगस्त्वाभिधानात् किमु सुप्रवासे सुकरप्रवास-विषये यत् शासनं तत्र योनावास्थित स किं पुनः सुतरामेव पूर्व्वोक्तं युक्तं किमुतेति क्वचित् पाठः ॥ १४ ॥ भ०

पौरा इत्यादि । हे पौराः यथागतन्निवर्त्तध्वम् विधौ लोट् इति तान्प्रगा-दीत् उक्तवान् रामः गदेरतोहलादेरिति वृद्धिः इट इटीति सिचोलोपः तातस्य पितुः शोकापनुदाः शोकस्यापहर्त्तारो भवेत तुन्दशोकयोरित्यादिना कः भवते-र्विधौ प्रार्थनायां वा लिङ् मध्यमपुरुषबहुवचनम् भरतञ्च मत्तो मत्तः सकाशात् अस्मदः पञ्चम्यास्तसिल् प्रत्ययोत्तरपदयोश्चेति मदादेशः अन्यं भरतस्मा दर्शत मा दृष्टारः स्यः अपि तु योऽहं सएव भरतः स च प्रतिष्ठितः राज्यम्पालयिष्य-तीत्येव न्यगादीत् दृशेर्णिजि लुङ् इरितोवेत्यङ् च्लेरङि गुणः निवर्त्तय रथमिति सूतञ्च सुमन्त्रमाह स्म लट् स्म इति लट् ब्रुवः पञ्चानामित्याहादेशः तिप्तोणल् ॥ १५ ॥ ज० म०

ज्ञात्वेङ्गितैर्गत्वरतां जनानामेकां शयित्वा रजनीं स पौरः ।
रक्षन् वने वासकृताङ्गयात्रान् प्रातश्छलेनापजगाम रामः ॥ १६ ॥
अस्रात्तुरस्रं करुणं रुवन्तो मुञ्चर्मुञ्चन्यश्वसिषुः कवोष्णं ।

पौरा इत्यादि । हे पौराःपुरवासिनो यूयं निवर्त्तध्वं निदृत्ता भवत विधिनिमन्त्रणेति विधौ गी । तातस्यात्यन्तिकः शोकापहर्त्तारो यूयं भवेत विधिनिमन्त्रणेति विधौ प्रार्थनायां खी ख्यायायुस्यामामिति याशब्दस्य इत्वं शोकापनुदा इति कृगृज्ञा इति इजुङत्वात् नुदेः कः मत्तोऽन्यं भरतं यूयं मा दर्शत अहमिव सोऽपि पालयिष्यतीति ध्वनिः । दृशिरौप्रेक्षणे मा योगे टौ इरनुबन्धात् शासुलिङ्युदिति विकल्पितोङः इश्रोर्णुरिति गुणः मत्त इति अन्यारभ्येति पञ्चमी तस्मिन्नेरिति तस् बाङुल्यात् त्यदांटेरक्षाविति न टेरित्युक्तं रामो न्यगादीत् उक्तवान् हसादेः सेम इति इदृङ्क्षः त्वं रथं निवर्त्तयेति सूतं सारथिं सुमन्त्रमाह स्म को स्केनातीत इति स्केन योगेऽतीते को पश्चतिपञ्चणव्याहरेति तिपोणय् अुव आहादेशः ॥ १५ ॥ भ०

ज्ञात्वेत्यादि । निवर्त्तध्वमित्युक्ते ये तत्रानिदृत्ताः तेषां जनानां रामो गत्वरताङ्गमनशीलतां ज्ञात्वा गत्वरश्चेति निपातितः तैरिङ्गितैरभिप्रायसूचकैश्चेष्टितैर्गत्वरतां गमनशीलतां ज्ञात्वा रामः सपौरः पौरैः सह एकां रात्रिं शयित्वा तान् जनान् वने वासकृताङ्गयात् रक्षन् प्रातश्छलेन सन्ध्यावन्दनादिव्याजेन अपजगाम इङ्गितैरिति इगिगत्यां भावे क्तः गत्वरतामिति च्वरप् मस्य तश्च रजनीमिति देशाध्वकालेति कर्म्मसंज्ञा शयित्वेति सेमनुधेत्यादिना क्त्विप्रतिषेधात् णुर्घञ् इति गुणः वनेवास इति अकालवाचिनः शयवासवासिष्विति सप्तम्या अलुगिति परः । स्वमते सरसिजमित्युदाहरता क्वचित् समासे विभक्तेरलुगिति सूचितम् ॥ १६ ॥ भ०

अस्रात्तुरित्यादि । ते पौरा राममपश्यन्तः करुणं रुवन्तो विलपन्तः कृशब्द

हा राम हा कष्टमिति ब्रुवन्तः पराङ्मुखैस्ते न्यवृतन्मनोभिः ॥ १७ ॥
स्नातोऽपि गङ्गासलिलैः पवित्वा सहाश्वमात्मानमनल्पमन्युः ।
ससीतयोराघवयोरधीयन् श्वसन् कदुष्णं पुरमाविवेश ॥ १८ ॥

इत्यस्य शतरि रूपम् अस्रम् अस्रु अस्रात्तुः सुक्तवस्तः स्रुजेस्त्रौदादिकस्य परस्मै-पदिनः सिचि स्रुजिदृशोरित्यम् झलन्तलक्षणा दृद्धिः चोःकुःखरिचेति चर्त्वम् मुड्मुड्भूयो भूयः कवोष्णमीषदुष्णमन्तःसन्तापात् कवञ्चोष्णः इति कोः कवादेशः न्यश्वसिषुः श्वसेर्लुङ् स्नात्यादिना श्वसेर्ट द्विप्रतिषेधः अतोहलादेर्लघोरिति विकल्पस्य प्राप्तत्वात् हा राम हा कष्टं क्रूरमिति ब्रुवन्तः पराङ्मुखैः येन गतो रामस्तेन गतैर्मनोभिरित्यभूतैः न्यवृतन् निवृत्तवन्तः द्रुस्रोलुङीति परस्मैपदविकल्पात् द्युतादित्वादङ् ॥ १७ ॥ ज० भ०

अस्रात्तुरित्यादि । ते पौरा राममपश्यन्तः करुणं रुदन्तोविलपन्तः अस्रं नेत्रजलं अस्रात्तुस्यक्तवन्तः रुदन्त इति रुदरोदे शतः अस्रात्तुरिति स्रुजौशविसर्गे ख्यां सिः वर्ट्रोऽकिदिति ऋकारस्य रः व्रजवदेति अनिमित्त्वात् त्रिः शच्छ्राजेति षड् षढोः कः से इति कः किलादिति षः अनुस्त्रिद्वेरिति अनडस् कवोष्णं ईषदुष्णं अन्तःसन्तापात् कत्कवौचाग्न्युष्ण इति ईषदर्थे कवा-देशः मुड्मुड्वारं वारं न्यश्वसिषुः निःश्वसितवन्तः हसादेःसेभ इत्यादौश्वसवर्ज-नात् श्वसेर्न त्रिः हा राम हा कष्टमिति ब्रुवन्तः ते पौराः पराङ्मुखैरामदिगनु-सारिभिरपूर्णकामत्वात् परिभूतैर्वा मनोभिरुपलक्षिताः सन्तो निवृत्ताः वृते-र्द्युतादित्वात् शासुलिद्युदिति ङः तेनैव लोपोऽतोऽदेर्लोरित्याकारलोपः । साधन-हेतुविशेषणेति विशेषणे तृतीया हा रामेति हा शब्दयोगे षष्ठ्यर्थे द्वितीया अत्र तु तद्भाव इति श्रीपतिः सामान्येन हाशब्दं प्रयुज्य रामः सम्बुध्यते इति दौर्गाः न सम्बुद्धाविति हादियोगे द्वितीयानिषेधार्थं क्रमदीश्वरसूत्रं स्वमते हा शब्दवाच्येन कष्टेन नात्र रामस्य योगोविवक्षितः किन्तु पौराणामेव तद्योगा-भावान्न द्वितीया ॥ १७ ॥ भ०

स्नातइत्यादि । स्नातोऽपि सुमन्त्रः सहाश्वमश्वैः सह अनल्पमनुः प्रवृद्धशोकः राघवयोः रामलक्ष्मणयोः सकृपाणामित्येकशेषः ससीतयोः सीतासहितयोः अधीयन् स्मरन् इकस्मरण इत्यस्य शतरि रूपं यणादेशः अधीगर्थेति कर्मणि षष्ठी श्वसन् कदुष्णम् ईषदुष्णङ्कवञ्चोष्ण इति चकारात् कदादेशः गङ्गातटात्प्रति-निवृत्य पुरमयोध्यामाजगाम आगतवान् गङ्गासलिलैः आत्मनो बाह्यमाभ्यन्तरञ्च

प्रतीय सा पूर्दृदृशे जनेन द्यौर्भानुशीतांशुविराकृतेव ।
राजन्यनक्षत्रसमन्वितापि शोकान्धकारच्युतसर्व्वचेष्टा ॥ १९ ॥

पवित्वा पवित्रीकृत्य पूङश्चेति विकल्पेनेट् पूङः क्त्वाचेति किच्चप्रतिषेधात् गुणः ॥ १८ ॥ ज० म०

सूत इत्यादि । सूतः सारथिः सुमन्त्रोऽपि गङ्गाजलैः सहाश्वं आत्मानं पवित्रां पवित्रीकृत्य सीतासहितयोरामलक्ष्मणयोरधीयन् स्मरन् कदुष्णं श्वसन् पुरमयोध्यां आविवेश प्रविष्टवान् अनल्पमन्युः प्रवृद्धशोकः गङ्गासलिलैः पवित्रा इत्यनेन गङ्गापर्य्यन्तं तद्गमनं ध्वन्यते पूङ्क्रियुदितदृम् इति विभाषत इस् सेमन्नुधेत्यादिना किच्चनिषेधात् गुणे ऊङ इति गुणः ससीतयोरिति सहःसोवेति बहुव्रीहौ सादेशः । राघवयोरिति समार्धधेनेत्यादिना कर्म्मणि षष्ठी अधीयन्निति अधीकलस्मृत्यां इखदिकइति वाक्यात् यिणोऽध्यणाविति यादेशः क्वचिन्न स्यात् आतिदेशिककार्य्यमनित्यमिति न्यायात् तेनात्र अधोरन्वचीति इयादेशः कदुष्णमिति कत्कवौचेति कोः कदादेशः ॥ १८ ॥ भ०

प्रतीत्यादि । जनेन रामानुयायिना प्रतीय प्रतिनिवृत्य पूरयोध्या दृदृशे दृष्टा कर्म्मणि लिट् प्रतीय इति ईङ्क्तावित्यस्य रूपम्न पुनरिणः तस्य हि तुकि प्रतीत्येति स्यात् । षत्वतुकोरसिद्ध इत्येकादेशस्यासिद्धत्वात् प्रतीयुषा सा दृदृशे इति पाठान्तरम् प्रतिनिवृत्तेन सा पूर्दृदृशे दृष्टेत्यर्थः । अस्मिन् पाठे तु उभेवनित्यादिना इणः कसौ रूपन्द्रष्टव्यमवोपसर्गस्यातन्त्रत्वात् । शोकोऽन्धकार इव शोकान्धकारः तेन च्युता नीतानुष्ठेयकर्म्मणि चेष्टा परिस्पन्दो यस्यां पुरि सा तथोक्ता राज्ञोऽपत्यानि राजन्यशुराद्यत् राजन्याः क्षत्रियाः येषामाभवकर्म्मणोरिति प्रकृतिभावः राजन्या नक्षत्राणीव तैः समन्विताऽपि द्यौः भानुशीतांशुविनाकृता रहिता अन्धकारच्युतसर्व्वचेष्टा तद्वत्यापि भानुचन्द्रस्थानीययोः राघवयोर्विरहात् ॥ १९ ॥ ज० म०

प्रतीत्यादि । जनेन रामानुयायिना प्रतीय प्रतिनिवृत्य सा पूरयोध्या दृदृशे कर्म्मणि ठौ प्रतीयेति इयङ्गत्यामित्यस्य रूपं न त्विणस्तनागमप्रसङ्गात् प्रतीयुषेति पाठे प्रतिपूर्व्वादिणः क्वसुः प्रतीयिवः शब्दस्य वसोर्व्वः सेमपीति सेमवस्योत्वं प्रतीयुषा प्रतिनिवृत्तेन जनेन पूर्दृदृशे इतियोजना कीदृशी पूःशोकोऽन्धकार इव तेन च्युता नाशिता सर्व्वेषां चेष्टा सर्व्या वा चेष्टा यस्यां सा तथा । राजन्याः

विलोक्य रामेण विना सुमन्त्रमच्योष्ट सत्वान्नृपतिश्च्युताशः ॥
मधूनि नैषीद्युलिपन्न गन्धैर्मनोरमे न व्यवसिष्ट वस्त्रे ॥ २० ॥
आसिष्ट नैकत्र शुचा व्यरंसीत् क्षताक्षतेभ्यः क्षितिपालभाग्भ्यः ।
स चन्द्नोशीरशृणालदिग्धः शोकाग्निनागादुषुनिवासभूयम् ॥ २१

नक्षत्राणीव तैः समन्विताऽपि पूः सूर्यचन्द्राभ्यां रहिता द्यौराकाशमिव यथा नक्षत्रसमन्विताऽपि द्यौः सूर्यचन्द्राभ्यां निराक्षता अन्धकारक्षतसर्वचेष्टा तद्वत् सापि सूर्यचन्द्रतुल्ययोराघवयोरभावादिति भावः । राजन्य इति राज्ञां समूह इति गर्गादित्वात् ष्ण्यः मनुष्यजनित्यादिना नलोपनिषेधः ॥ १९ ॥ भ०

विलोक्येत्यादि । रामेण विना सुमन्त्रं विलोक्य दृष्ट्वा नृपतिर्दशरथः सत्वात् स्वभावाद्च्योष्ट च्युतः च्यवतेरकर्मकात्क्तङ् गतोऽपि मद्वचनमतिक्रम्य आगच्छेदिति अस्य या आशा सा च्युता यस्य स च्युताशः सत्वात् च्युतश्च मधूनि प्रातर्नैषीत् नेष्टवान् नेटीति सिचि इडभ्यासप्रतिषेधः । गन्धैश्चन्दनादिभिर्नालिपत् लिपेर्लिपिसिचिहश्वीत्यङ् मनोरमे चेतोहारिणी वस्त्रे न व्यवसिष्ट न परिच्छितवान् वस आच्छादने इत्यस्मात् लुङ् अनुदात्तेत्त्वात्तङ् ॥ २० ॥ ज० भ०

विलोक्येत्यादि । रामेण विना सुमन्त्रं विलोक्य नृपतिर्दशरथः सत्वात् स्वभावात् व्यवसायाद्वा अच्योष्ट च्युतः च्युतोऽकर्मकात् टी गतोऽपि रामः कदाचित् पौराणामनुरोधान्मद्वचनमतिक्रम्य आगच्छेदित्याशा च्युता यस्य स तथा मधूनि नैषीत् इषु इच्छायां टी गन्धैश्चन्दनादिभिर्न व्यलिपत् वस्त्रस्याख्यालिमेति ङः मनोरमं वस्त्रद्वयं न व्यवसिष्ट न परिच्छितवान् वसलङ् आच्छादने सत्वं गुणे पिशाचादौ बले द्रव्यस्वभावयोः । आत्मनि व्यवसाये च चित्ते प्राणिषु जन्तुषु इति विश्वः ॥ २० ॥ भ०

आसिष्टेत्यादि । एकत्र स्थाने शुचा शोकेन नासिष्ट नोपविष्टः आसेरात्मनेपदिनोलुङ् । क्षतानि चाक्षतानि चेति क्षेन नञ् विशिष्टेनानञिति समासः अक्षमापितेभ्य इत्यर्थः क्षितिपालभाग्भ्यः क्षितिपालभ्यो जन्ते यानि दूतप्रेषणादीनि तेभ्यः क्षितिपालभाग्भ्यः व्यरंसीत् विरतः विसुखोऽभूदित्यर्थः जुगुप्साविरामप्रमादार्थानामुपसंख्यानमिति अपादानसंज्ञा रमेर्लुङ् व्याङ्परिभ्योरम इति तिप् यमिरमेत्यादिना सगिटौ । स एवम्भूतो राजा चन्दनोशीरशृणालैः शोकाग्निप्रतीकारभूतैर्दिग्ध उपलिप्तोऽपि उद्वेगाग्निनैव द्युनिवासभूयन्देवत्वमगात् गतवान् दिवेर्निघायान्दादेर्धातोर्घे इति घः झषस्तथोर्धोधः झलांजश्झशीति जश्त्वम्

विचुक्रुशुर्भूमिपतेर्महिष्यः केशान् लुलुञ्चुः स्वयमुंषि जघ्नुः ।
विभूषणान्युन्मुमुचुः क्षमायां पेतुर्बभञ्जुर्वलयानि चैव ॥ २२ ॥
ताः सान्वयन्ती भरतप्रतीक्षा तं बन्धुता न्यक्षिपदाशु तैले ।

दिवि निवासो येषां ते द्युनिवासाः देवाः तेषां भाव इति भूवो भाव इति क्यप् ॥ २१ ॥ ज० म०

आसिष्टेत्यादि । शुचा शोकेन एकत्र एकस्थाने न आसिष्ट आसलङ् उपवेशे । क्षताक्षतेभ्यः क्षितिपालभाग्भ्यः राजकर्त्तव्यदूतसम्प्रेषणादिभ्यो व्यरंसीत् विरतवान् घे पं परानु इत्यादिना विपूर्व्वात् रमेः पं यमरमेति दमसनौ क्षतावयवसम्बन्धात्क्षतं अक्षतावयवसम्बन्धाच्चाक्षतं इति एकार्थत्वात् कर्म्मधारयः । अनजःक्रान्तस्य तेन सनजेति कर्म्मधारय इति परः क्षितिपालं भजन्ते इति ढाङ्जवक्षेति विण् स ईदृशो राजा चन्द्रोज्ज्वीरक्षणालैस्तापोपशान्तिसाधनै दिग्धो लिप्तोऽपि शोकाग्निनैव हेतुना द्युनिवासभूयं देवत्वमगात् दिवि निवासो यस्य इति विग्रहः निवसन्त्यस्मिन्निति घञि द्यौर्निवासो यस्मिन्निति वा उहस्युङिति उङ् तस्य भवनं भूहनः क्यविति भुवोभावे क्यप् दिग्ध इति दिहौ उपलेपे क्तः क्ताद्देर्घः ढभात्तथोरिति तस्य धः झषश्चसोरिति धस्य गः उशीरं वीरणमूलं ॥ २१ ॥ भ०

विचुक्रुशुरित्यादि । भूमिपतेः राज्ञो महिष्यः पत्न्यः अविमह्याष्टिषच् इत्यौणादिकः ष्टिषच् विचुक्रुशुः रुदितवत्य इत्यर्थः हा स्वामिन्निति तथा केशान् लुलुञ्चुः उत्पाटितवत्यः स्वयंमुंषि स्वशरीराणि जघ्नुस्ताडितवत्यः विभूषणानि हारादीनि उन्मुमुचुर्मुक्तवत्यः क्षमायाम्भुवि पेतुः वलयानि अवैधव्यचिह्नानि बभञ्जुः चूर्णितवत्यः एते लिङन्ताः तुमेरेत्वाभ्यासलोपौ ॥ २२ ॥ ज०म०

विचुक्रुशुरित्यादि । भूमिपतेर्दशरथस्य महिष्यः विचुक्रुशुः क्रन्दितवत्यः हा हा स्वामिन्निति रुदमाक्रुतवत्यो वा यद्यपि क्रताभिषेका महिषीत्यमरः सा चैकैव तथाप्युपचारात् पत्नीमात्रेऽपि तिसृणामेव क्रताभिषेकत्वमिति केचित् केशान् लुलुञ्चुः उत्पाटितवत्यः स्यात्क्षपितृकिद्वेति अकित् पक्षे उङ्नलोपाभावः स्वयंमुंषि जघ्नुः ताडितवत्यः विभूषणानि हारादीनि उन्मुमुचुः त्यक्तवत्यः क्षमायां भुवि पेतुः तृफलेति पतेरत एत्वं खिलोपश्च वलयानि अवैधव्यलक्षणानि बभञ्जुः सर्व्वत्र क्त्वा उस् ॥ २२ ॥ भ०

ता इत्यादि । बन्धुता बन्धुसमूहः ग्रामजनबन्धुसहायेभ्यस्तल् ता महिषीः

दूतांश्च राजात्मजमानिनीषून् प्रास्थापयन्मन्त्रिमतेन यूनः ॥२३॥
सुप्तो नभसः पतितं निरीक्षाञ्चक्रे विवस्वन्तमधःस्फुरन्तम् ।
आख्यद्ससम्भ्रमाटकुले सखिभ्यः पश्यन्प्रमादं भरतोऽपि राज्ञः ॥२४

सान्त्वयन्ती संस्थापयन्ती सान्त्वङ्करोतीति णिच् । तं दशरथं मृतं तैले न्यक्षिपत् निक्षिप्तवती आशु शीघ्रं माभूत्पूतिरिति क्षिपेर्लुङ् पुषादित्वादङ् कक्षान्यक्षिपदित्याह भरतप्रतीक्षा तेन संस्कारः कर्त्तव्य इति सा भरतप्रतीक्षते ईक्षित्वमिभ्याङ्त्युपसङ्ज्ञानाप्तेः दूतान् प्रास्थापयत् प्रहितवती राजात्मजम्भरतमानिनीषून् आनेतुमिच्छून् अन्यथा कैकेयीवैसुख्याङ्भरतेऽपि वैसुख्यात् दूता अपि नानेतुमिच्छन्ति तत्रापि मन्त्रिमतेन न स्वमतेन यूनः तेषाङ्गन्तुं समर्थत्वात् ॥ २३ ॥ जं० म०

ता इत्यादि ॥ बन्धुता बन्धुसमूहः ता महिषीः सान्त्वयन्ती आश्वासयन्ती तं मृतं दशरथं शीघ्रं पूतिगन्धाशङ्कया तैले न्यक्षिपत् क्षिपस्तुदादित्वात् कुतो न्यक्षिपदित्याह भरतप्रतीक्षा भरतं प्रतीक्षते इति पचादित्वादन् भरते प्रतीक्षा यस्या इति वा दूतांश्च मन्त्रिणां मतेन बुद्ध्या कैकयीं प्रति क्रोधेन भरते वैसुख्यान्न तु स्वेच्छया प्रास्थापयत् प्रहितवती राजात्मजं भरतं आनिनीषून् आनेतुमिच्छून् ये स्वतएव भरतमानेतुमिच्छन्ति तत्प्रस्थापनं युक्तमिति भावः यूनस्तरुणान् शीघ्रगमनसामर्थ्यात् बन्धुतेति जनखलेति समूहार्थे तः सान्त्वयन्तीति सान्त्वत् सान्त्वने शतः ॥ २३ ॥ भ०

सुप्त इत्यादि । भरतोऽपि मातृकुले वसन् सखिभ्यो मित्रेभ्यः आख्यत् कथितवान् ख्यातेर्लुङ् अस्तिवक्तीत्यादिनाऽङ् क्रियाग्रहणङ्कर्त्तव्यमिति सम्प्रदानसंज्ञायाश्चतुर्थी । किमाख्यदित्याह अहं सुप्तः सन् नभसो नभस्तलात् आकाशात्पतितं विवस्वन्तमादित्यं स्फुरन्तञ्चलन्तन्निरीक्षाञ्चक्रे निरीक्षितवान् ईक्षेरिजादेरित्यात्मे । उत्तमविषये सुप्तप्रमत्तावस्थायां चित्तव्याक्षेपात् परोक्षे लिट् पश्यन् विलोकयन् राज्ञो दशरथस्य प्रमादमनिष्टम् ॥ २४ ॥ जं० म०

सुप्त इत्यादि । भरतोऽपि मातृकुले वसन् सन् राज्ञो दशरथस्य प्रमादं अनिष्टं पश्यन् वितर्कयन् सखिभ्यो मित्रेभ्य आख्यत् कथितवान् वक्ष्यतीति ङः तादर्थ्ये चतुर्थी यद्भिप्रेत्य धात्वर्थस्तत्र चतुर्थीति परः किमाख्यदित्याह सुप्तोऽहं नभस आकाशात् पतितं अधःस्फुरन्तं विवस्वन्तं सूर्यं निरीक्षाञ्चक्रे दृष्टवानस्मि अस्मदि चित्तस्य विक्षेपे ठीति परः स्वमते नियमाभावात् भवत्येव

अशिश्रवन्नात्ययिकं तमेत्य दूता यदार्थं प्रयियासयन्तः ।
आंहिष्ट जाताङ्गिहिषस्तदासावुत्कण्ठमानो भरतो गुरूणाम् ॥२५॥

सप्रस्य तादृशस्यार्थस्यदर्शनेन चित्तविक्षेपार्थोऽपि गम्यत एव ईक्षङ् दर्शनेविजादीत्याम् ॥ २४ ॥ भ०

अथेत्यादि । दूता एत्य आगत्य भरतमातुलकुलमित्यर्थः । आङ्पूर्व्वादिणः क्त्वाप्रत्ययस्य ल्यपि लुकि च रूपम् । यदा तं भरतमर्थं वचनमशिश्रवन् श्रावितवन्तः अर्थयतेऽनेनेति णिचं घञ्च श्रृणोतेरर्थ्यान्नुङि चङि द्विर्व्वचनम् स्रवतिश्रृणोतीत्यभ्यासस्येत्वम् । आत्ययिकम् अत्ययो विनाशः स प्रयोजनमस्येति तदस्य प्रयोजनमिति ठञ् पिता ते म्लानस्त्वान्द्रष्टुमिच्छतीति आत्ययिकं वचनं तमिति गतिबुद्धीत्यादिना कर्म्मसंज्ञा श्रृणोतेः शब्दकर्म्मत्वात् अर्थमिति कर्त्तुरीप्सिततममित्यनेन प्रयियासयन्तः प्रयातुमिच्छन्तम्भरतम्प्रयोजितवन्तः सनन्तण्यन्तोऽयं तदा असौ भरतोजाताङ्गिहिषः जाता अङ्गिहिषा गमनेच्छा यस्य सः अहिगतौ इदितोनुम् तस्मादंहितुमिच्छतीति सन् इट् अजादेर्द्वितीयस्येति हिंशब्दो द्विरुच्यते नकारस्य नन्द्रा इति प्रतिषेधः अभ्यासकार्य्यम् अनुस्वारपरसवर्णौ अःप्रत्ययादित्यकारप्रत्ययः टाप् आंहिष्ट गतवान् तस्मादेवात्मनेपदिनो लुङ् उत्कण्ठमानः स्मरन् मठिकठिशोक इत्यस्मादात्मनेपदिनो रूपम् अनेकार्थत्वाद्धातूनाम् । गुरूणामित्यमहादीनां अधीगर्थेति कर्म्मणि षष्ठी ॥२५॥ ज०म०

अशिश्रवन्नित्यादि । दूता एत्य आगत्य अर्थात् भरतमातुलकुलं तं भरतं अत्ययरूपं अर्थं वस्तु यदा न अशिश्रवन् श्रावितवन्तः प्रयियासयन्तः भरतं गमनेच्छां कारयन्तः तदा असौ भरतः जाता अङ्गिहिषा गमनेच्छा यस्य तादृशः सन् गुरूणां पित्रादीनां उत्कण्ठमानः स्मरन् आंहिष्ट गतवान् अशिश्रवन्निति श्रुश्रवणे ञिः प्रेरणे इति ञिः ञिश्रीत्यङ् धुर्ब्भ्यश्छ्नुरिति ह्विः खेः सम्बन्धे स्रुश्रुनुद्रुस्रुभ्यश्छन्दसीति खेरुकारस्य इत्वं ण्यन्तेजुङ्तोरिति ह्विःयलोपयायाव इति आव् अजाद्यतष्टाप् स्वः अलोंपः घोऽङौजेरिति प्रयोज्यस्य कर्त्तुः कर्म्मत्वं आत्ययिकमिति अत्ययो विनाशः विकारसंज्ञेति ष्ठिकः । अर्थोऽभिधेये शब्दानां धनकारणवस्तुषु । प्रयोजने निवृत्तौ च विषये च प्रयुज्यते । केचित्तु अर्थ्यते अनेनेत्यर्थं वचनं आत्ययिकं अनर्थसम्बन्धीत्यर्थः अर्थमित्यत्र असुमिति पाठे असुं भरतं प्रयियासयन्तः आत्ययिकं राज्ञोमरणं । एत्येति व्याख्यानञ्च इति आङ्पूर्व्वादिणः क्त्वोयप् स्वस्रतनूप्रितीति तन् प्रयियासयन्त इति यातेः सन-

बन्धूनशङ्किष्ट समाकुलत्वादासेदुषः स्नेहवशात्पायम् ।
गोमायुशारङ्गगणाश्च सम्यङ्नायासिषुर्भीममरासिषुश्च ॥ २६ ॥
स प्रोषिवानेत्य पुरं प्रवेक्ष्यन्शुश्राव घोषं न जनौघजन्यम् ।
आकर्ण्यामास न वेदनादान्न चोपलेभेवणिजां पणायाः ॥ २७ ॥

नात् जिः शत्रः आंहिष्टेति अहिङ्गतौ इदित्वान्नुन् जाताङ्गिहिषः इति अंहेः सन इस् नाजन्तादेरादिद्विरिति स्वादौ नवद्वोये इति च निषेधात् आदिनकारस्य न द्वित्वं संस्याद इति अः कठिङ् आध्याने इष्टानवाप्तौ तदवाप्तयेऽभिलाष उत्कण्ठेत्यन्ये । गुरूणामिति समार्थेनेत्यादिना कर्म्मणि षष्ठी ॥ २५ ॥ भ०

बन्धूनित्यादि । दुःखप्रदर्शनेन अकस्माच्च पितृदूतागमनेन स्नेहवशात् चेतसि समाकुलत्वाद्भरतो बन्धूनशङ्किष्ट शङ्कितवान् उत्प्रेक्षितवानित्यर्थः शङ्कतेरात्मनेपदिनो लुङि रूपम् कीदृशान् आसेदुषः अपायं विनाशं गतवतः भाषायां सदवसेत्यादिना क्वसुः अतएकहलित्येत्वाभ्यासलोपौ । अस्मद्बन्धुः कश्चित् व्यसनमापन्नोऽभूदिति गच्छतस्तस्य गोमायुशारङ्गगणाः शृगालमृगगणाश्च सम्यगनुकूलं नायासिषुः नागताः यातेर्लुङि यमरमेति सगिठौ शृगालाः प्रदक्षिणङ्कृताः मृगाश्च सव्यमित्यर्थः । भीमसुद्वेगकरमरासिषुः रसिताः रसेः परस्मैपदिनो लुङ् अतोहलादेरिति वृद्धौ रूपम् न रासिः तस्मात्मनेपदित्वात् ॥ २६ ॥ ज० भ०

बन्धूनित्यादि । दुःखप्रदर्शनात् अकस्मात् पितृदूतागमनाच्च स्नेहवशात् चेतसि समाकुलत्वात् गच्छन् भरतोबन्धून् अपायं विनाशं आसेदुषः प्राप्तान् अशङ्किष्ट शङ्कितवान् शकिङ्त्वासशङ्कयोः गच्छतस्तस्य गोमायुशारङ्गगणाः शृगालहरिणसमूहाः सम्यगनुकूलं नायासिषुः नागतवन्तः शृगालाः प्रदक्षिणं गता इत्यर्थः । यातेर्ह्यां यमरमेतीम्सनौ अनुस्विद्देरिति अन् उस् भीमं भयानकं यथा स्यात्तथा अरासिषुः शब्दं कृतवन्तः रसशब्दे हसादेः सेम इति त्रिः अन्उस् । चातके हरिणे पुंसि शारङ्गः शबले त्रिष्विति दन्त्यादौ रभसः । शृणोतेर्ज्ञन्तादङ्गः औणादिक इति तालव्यादि केचिदाहुः ॥ २६ ॥ भ०

स इत्यादि । स भरतः प्रोषिवान् मातामहकुलात् प्रोषितः सन् भाषायामित्यादिना क्वसुः यजादित्वात्सम्प्रसारणन्निर्व्वचनम् वस्वेकाजाद्घसामिति इट् पुरमयोध्यामेत्य आगत्य प्रवेक्ष्यन् गृहमित्यर्थात् पुरम्प्रविष्टः घोषं शब्दन्न

चक्रन्दुरुच्चैर्नृपतिं समेत्य तं मातरोऽभ्यर्णमुपागताक्ष्याः ।
पुरोहितामात्यमुखाश्च योधा विदङ्गमन्युप्रतिपूर्णमन्याः ॥२८॥

शुश्राव न श्रुतवान् जनौघजन्यञ्जनसमूहेन जन्यसुत्माद्यं तकिण्यसिचतियतीति जनेर्यत् तथा वेदध्वनीन्नाकर्णयामास न श्रुतवान् प्रातिपदिकाद्धात्वर्थे इति णिच् तदन्तात् लिप्यामि अपामन्नेत्यादेशः न चोपलेभे नोपलब्धवान् वणिजां पण्यजीविनाम्पणायान् पणलाभान् कथञ्चिद्रूपव्यवहारस्योच्चिन्नत्वात् पणन्ते इति वणिजः पणेरिजादेश्चैव इत्यौणादिकः पण्यन्तः इति पणाः नित्यम्पणः परिमाण इत्यप् व्यवहर्त्तव्याः । ईयन्ते प्राप्यन्ते वणिग्भिरित्यायाः लाभा एरजिति ण्यः कर्म्मणि अच् पणानामयाः पणायाः तान् । पणायामिति पाठान्तरं वणिजां वस्तूनि संव्यवहारविषयाणि नोपलेभे संव्यवहारकुशलाः साधव इति गुपादिषु स्तुत्यर्थपनिना साहचर्य्यात् पणेरपि तदर्थादेवायप्रत्ययः अःप्रत्ययादित्यकारः टाप् वणिजां प्रलापानिति तृतीयः पाठः वणिक्प्रसारकलहानित्यर्थः ॥ २७ ॥ ज० म०

स इत्यादि । स भरतः प्रोषितवान् मातामहकुले कृतप्रवासस्तत एत्यागत्य पुरमयोध्यां प्रवेक्ष्यन् प्रवेशं करिष्यन् जनसमूहजन्यं घोषं शब्दं न शुश्राव । प्रोषितवानिति प्रपूर्व्वाद्वसौऐनिवासे इत्यस्मात् क्तवतुः ग्रहस्पाद्योरिति जिः द्वित्वं वसोर्धसेकाजितीम् प्रवेक्ष्यन्निति विशश्चौ प्रवेशे स्यतः जन्यमिति जन्योः कभाक इत्युक्तेः कर्त्तरि ष्यण् जनौघाज्जातमित्यर्थः किंवा तव्यानीयया इति अन्नाज्जनेः कर्म्मणि यः वेदध्वनिं न आकर्णयामास न श्रुतवान् कर्णतक्भिदि वणिजां पणोपजीविनां पणायाः क्रयविक्रयव्यवहारान् न च उपलेभे ददर्श पणङ् व्यवहारेस्तुतौ कमकृतेत्यादिना आयः शंस्याद् इति अः स्त्रीत्वञ्च पणायानिति पाठे पण्यते इति पणाः घञलनटोघे इत्यल् आयोलाभः इमान् व्यवहर्त्तव्यलाभानित्यर्थः वणिगापणायामिति पाठे वणिजामापणो निषद्या तत्रायानित्यर्थः आपणस्तु निषद्यायामित्यमरः ॥ २७ ॥ भ०

चक्रन्दुरित्यादि । तं भरतं गृहगतमभ्यर्णं समीपीभूतं समेत्य ढौकित्वा मातरः कौशल्याद्याः नृपतिमुच्चैरित्यर्थं चक्रन्दुः क्रन्दितवत्यः हा स्वामिन् हा राजन् क्व गतोऽसीति उपागतस्याग्रमस्रमस्रजलं यासान्ताः एवंविधाः युध्यन्त इति योधाः पचादित्वाद्च् । ते च तं समेत्य नृपतिमुच्चक्रन्दुः पुरोधीयत इति पुरोहितः निष्ठा दधातेर्हिः । अमाशब्दः सहार्थे सह राज्ञा कार्य्येषु भवतीं-

दिदृक्षमाणः परितः ससीतं रामं यदा नैक्षत लक्ष्मणञ्च।
रोरुद्यमानः स तदाभ्यपृच्छद्यथावदाख्यन्नथ दृक्षमस्मै ॥२९॥

त्यमात्यः अमेहकृतसिद्धेभ्यः इति निपातात् पुरोहितामात्यौ सुखम्प्रधानं येषां योधानान्ते पुरोहितामात्यसुखाः अमात्यस्याजाद्यदन्तत्वेऽपि पुरोहितस्याभ्यर्हितत्वात्पूर्व्वनिपातः विदृक्षमन्युना शोकेन प्रतिपूर्णे मन्ये गलन्निरे येषामिति ॥ २८ ॥ ज० म०

चक्रन्दुरित्यादि। तं भरतं अभ्यर्णं समीपवर्त्तिनं समेत्य प्राप्य मातरः कौशल्यादयो नृपतिं चक्रन्दुः तमुद्दिश्य सशब्दं रुरुदुरित्यर्थः उपागतं अस्रं नेत्रजलं यासां तास्तथा अभ्यर्णमित्यभिपूर्व्वस्यार्हधातोः क्तान्तस्य रूपं ऋच्छत्यृतामित्यादिना निपातितं युध्यन्ते इति योधाः प्रचादित्वादन् तेऽपितं समेत्य चक्रन्दुः पुरोऽग्रे धीयते स्थाप्यते इति पुरोहितः धाजोहिः अमाशब्दः सहार्थे सह राज्ञा कार्य्येषु भवति अमात्यः त्यवाद्यचिरेति त्यः पुरोहितामात्यौ सुखं प्रधानं येषां योधानां ते तथा ते जना योधाश्चेति वा विदृक्षेन मन्युना शोकेन प्रतिपूर्णा मन्या येषां यासां वा दान्तशान्तपूर्णेति निपात्यते पश्चाद्ग्रीवा शिरा मन्या इत्यमरः ॥ २८ ॥भ०

दिदृक्षमाणइत्यादि। स भरतो यदा ससीतं रामं लक्ष्मणञ्च परितः सर्व्वतो दिदृक्षमाणः द्रष्टुमिच्छन् क्षान्नुस्रुदृशांसन इति तङ् हलन्ताच्चेति सनः कित्त्वे सृजिदृशोरित्यम् न भवति नैक्षत न दृष्टवान् तदा रोरुद्यमानः अत्यर्थं रुदन् यङि रूपम् अभ्यपृच्छत् पृष्टवान् ऐक्षताभ्यपृच्छदिति भूतसामान्यविवक्षया लङ् अन्यथा कवेः परोक्षत्वात् लिट् स्यात् अथैतस्मिन् प्रस्तावे यथावत् यादृशं दृक्षमूतन्तथावत् आख्यन् कथितवन्तः पुरोहितामात्यसुखा अस्मै भरताय। ख्यातेरख्यतीत्यादिना चेरङ् आतोलोपः ॥ २९ ॥ ज० म०

दिदृक्षमाण इत्यादि। स भरतः ससीतं रामं लक्ष्मणञ्च परितः सर्वतः दिदृक्षमाणः द्रष्टुमिच्छन् यदा न ऐक्षत तदा रोरुद्यमानो भृशं रुदन् अभ्यपृच्छत् पृष्टवान् अथानन्तरं यादृशं दृक्षं तादृशं तस्मै भरताय आख्यन् कथितवन्तः अर्थात् पुरोहितामात्यसुखा योधाश्च दिदृक्षमाण इति दृशेः सन् गुणनिमीति गुणनिषेधः स्रुदृशनजुक्ष इति सं ईक्षङ् दर्शने घी रुदेर्मूलसूत्रे त्यादिना यङ् ग्रच्छौग्रीक्षे घी ग्रहस्वपाद्योरिति जिः ख्यातेर्वक्ष्यतेति ङः तादर्थ्ये चतुर्थी यदभिप्रेत्य धात्वर्थ इति चतुर्थीति परः ॥ २९ ॥ भ०

आबद्धभीमभ्रुकुटीविभङ्गः शेश्वीयमानारुणरौद्रनेत्रः ।
उच्चैरुपालभ्य स केकयोच्चै शोके मज्जन्नविरतं न्यमाङ्क्षीत् ॥२०
नृपात्मजौ चिक्लिशतुः ससीतौ ममार राजा विधवा भवत्यः ।
शोच्या वयं भूरनृपा लघुत्वं केकय्युपज्ञं वत बन्धनर्थम् ॥ २१ ॥

आबद्धेत्यादि । स भरत उच्चैर्महता ध्वनिना केकयीञ्च मुहुर्मुहुर्भूयो भूय उपालभ्य उपालब्धवान् उपाङ्पूर्व्वोलभिरुपालम्भे वर्त्तते तस्मादात्मनेपदिनो झलोझलीति सिज्लोपे धत्वजश् त्वे रूपम् शोके च मज्जन् अविरतमजस्रं न्यमाङ्क्षीत् निमग्नः मस्जेर्लुङि मस्जिनशोर्झलीति नम् तत्रापि मस्जेरन्त्यादिनियमात् नुम् संयोगादिलोपः हलन्तलक्षणा दृद्धिः हल्ग्रहणं समुदायप्रतिपत्यर्थमित्युक्तम् कीदृशः आबद्धभीमभ्रुकुटीविभङ्गः भ्रमेश्चडुरित्यौणादिकोडुः कुडेस्त्रीलिङ्गे भावे क्रुशादिभ्य इतीः तदन्तात् क्रदिकारादिति ङीष् भ्रुवोः कुटी कौटिल्यं भ्रुकुटी इको ह्रस्वोऽङ्योगालवस्येति ह्रस्वः तस्या विभङ्गो विरचनम् आबद्धः कृतः प्रयत्नेनायासदत्तेन भीमो भयानको भ्रुकुटीविभङ्गो येन यस्य वेति शेश्वीयमाने अत्यर्थं श्रूयमाने अरुणे लोहिते रौद्रे भयानके नेत्रे यस्य सः श्वयतेर्यङि विभाषाश्वेरिति वा सम्प्रसारणम् तमुपालभ्य माह ॥ २० ॥ ज० म०

आबद्धेत्यादि । स भरतः उच्चैर्यथा स्यात्तथा मुहुर्वारं वारं केकयीं उपालभ्य निर्भर्त्सितवान् शोकेऽविरतं न्यमाङ्क्षीत् निममज्ज कीदृशः आबद्धः कृतोभयङ्करोभ्रुकुटीविभङ्गो येन स तथा पुनः किम्भूतः शेश्वीयमाने अत्यर्थविदृद्धे अरुणे रक्ते रौद्रे भयानके नेत्रे यस्य स तथा भ्रुवोः कुटी कौटिल्यं वेकस्वार्थेऽसे इत्यत्र व्यवस्थितविभाषार्थो वा शब्दस्तेन सन्ध्यतिरिक्तस्थाने क्वचित् समासे ह्रस्वः स्यादिति देवीदासचक्रवर्त्तिना व्याख्यातं तेनात्र पाक्षिको भ्रुवो ह्रस्वः मनीषादित्वाद्वा टु ओश्वितति इद्धश्वोः मूलस्थलेति यङ् खेर्णुः वर्णोऽज्ञ्यरे उपाङ्पूर्व्वाल्लभेर्गर्हायां टी तन् भसस्त्राञ्भसीति सेर्लोपः टुमस्जोशुद्धौ ग्रांसिः अनिमृत्वात् व्रजवदेति त्रिः स्यादेः सोलोपः चडिति कुङ् क्रिलादिति षः नुण्रध इति नुण् म्नोर्नुरित्यनुस्वारः अमेजन्नोरिति ङः ॥२०॥ भ०

नृपेत्यादि । नृपात्मजौ रामलक्ष्मणौ ससीतौ सीतया सह चिक्लिशतुः क्लिष्टौ ममार मृतो राजा म्रियतेर्लुङ् लिङोश्चेति नियमात्तङोभावः विधवाः धवो भर्त्ता तेन विना भवत्यो जाताः शोच्याः शोचनीया वयम् अयशोभाजन-

नैतन्मतं मत्कमिति ब्रुवाणः
सहस्रशोऽसौ शपथानशप्यत्।
उद्वाप्यमानः पितरं सरामं लुप्यन्
सशोको भुवि रोरुदावान्॥ ३२॥

त्वात् ऋहलोर्ण्यत् शङ्क्या इति पाठान्तरम् शङ्क्यनीया वयम् एतत्कृतोऽयमयोग इति भूम्नाऽपा न विद्यते ऋणोयस्यामिति नञोऽस्त्यर्थानामिति बहुव्रीहिः लघुत्वं राज्यप्रार्थनालक्षणङ्कैकय्युपत्तम् केकय्याः प्रथमतो ज्ञातम् नान्यस्य कस्यचित्पूर्वं ज्ञातम् उपज्ञायत इत्युपज्ञम् आतश्चोपसर्ग इति स्त्रियामङ् ऋक्षणा षष्ठी केकय्या उपज्ञेति समासः। उपज्ञोपक्रममिति नपुंसकता वत कष्टम्बह्वनर्थस्वदोषं क्लेशमरणाद्यनिष्टानां सम्भवात् भरतकृत एवायमयोग इत्येतत्परिहरन्नाह॥ ३१॥ ज० म०

ऋषात्मजाविति्यादि। सीतासहितौ ऋषात्मजौ रामलक्ष्मणौ चिक्लिश्यतुः दुःखितौ क्लिश्यु ङ्उपतापे राजा ममार ऋङ्दृष्टीढेत्र इति नियमात् पं धवो भर्त्ता तेन विहीना भवत्यो जाताः मातृगणं सम्बोध्योक्तं केकय्युपालम्भोऽयं वयं शोच्याः अयशोभाजनत्वात् शोकार्हाः तेल्याः शक्यार्ह इति अर्हार्थे ष्यण् इमन्तत्वात् चजोः कगाविति सेमृक्तवर्ज्जनात् कत्वं किंवा आवश्यकत्वविवक्षया नावश्यके इति निषेधः शङ्क्या इति पाठे एतत्कृतोऽयं प्रसाद इति लोकैः शङ्क्या वितर्कनीया भूरपा राजभ्रून्या लघुत्वं राज्यप्रार्थनरूपं नीचकर्म केकय्युपज्ञं केकय्याः सकाशात् प्रथमत उपलब्धं नान्यतः केनापि दृष्टमित्यर्थः उपज्ञायत इत्युपज्ञा क्विप्। उपज्ञोपक्रमान्तश्च तदादित्वप्रकाशने इत्यमरवचनात् नपुंसकत्वं लिङ्गस्य लोकाश्रयत्वात् बह्वनर्थं बहवोऽनर्था दोषा यत्र तत्तथा वत इति खेदे॥ ३१॥ भ०

नैतदित्यादि। यदेतत्कैकय्यनुष्ठितं मतमभिप्रायः न मत्कृतन्तत् नाहमस्य ग्रामणीर्न प्रभुरिति अस्मच्छब्दात्स्व एषां ग्रामणीरिति कन् प्रत्ययोत्तरपदयोश्चेति मपर्य्यन्तस्य मादेशः नास्मन्मतादनुष्ठितमनयेत्यर्थः इत्येवं ब्रुवाणः सहस्रशो बहुवारानसौ भरतः शपथान् सम्भ्रमयकारणवचनानि अशप्यत् कृतवान् अनेकार्थत्वाद्धातूनां शपेर्दैवादिकस्य उभयपदिनो लुङि रूपम् उद्वाप्यमानः आह्वयन् वाप्शब्दे दैवादिकः अनुदात्तेत् पितरं सरामं हा तात हा रामेति लुप्यन् भुवि लुठन् लुटविलोडने दैवादिकः परस्मैपदी सशोक इति शाप्यपरिहारार्थम्

तं सुस्वयन्तः सचिवा नरेन्द्रं दिधक्षयन्तः समुदूढुरारात् ।
आन्त्याऽऽहुतिं हावयितुं सविप्राश्चिचीषयन्तोऽध्वरपात्रजातम् ॥३२

रोरुदावान् अत्यर्थं रोदनं कुर्वन् यङन्तात् अः प्रत्ययादित्यकारः अतो लोपः यस्य हलः स्त्रियामतष्टाप् सा विद्यते यस्येति मतुप् ॥ ३२ ॥ ज० म०

स्वदोषं परिहरन्नाह । नैतदित्यादि । यदेतत् केकय्या कृतं तन्न मत्कं मत्स्वामिकं मत्कर्तृकं मतं अहमस्य प्रभुरित्यर्थे विकारसंघेत्यादिना कः इति ब्रुवाणोऽसौ भरतः सहस्रशो बहुवारान् शपथान् प्रत्ययकारणानि अशप्यत् उक्तवान् शपयौज आक्रोशे आक्रोशो भाषणं धातूनामनेकार्थत्वात् शपिरत्र करोत्यर्थो वा सरामं पितरं उद्दाश्यमानः हा राम हा तातेति आह्वयन् ङवाश्यन्द्रशब्दे भुवि लुठन् लुटविलोडने रोरुदावान् अत्यर्थंरोदनयुक्तः रुदेर्यङन्तात् संस्त्वाद् इति अप्रत्ययः ततोवतुः हेतुमाह सशोक इति सहस्रशब्दात् शङ्कैकार्थादिति चशस् ॥ ३२ ॥ भ०

तमित्यादि । सचिवा अमात्याः कार्येषु सचन्ते समवयन्तीति सचेरिवन्नित्यौणादिके इवन् तन्भरतं सुस्वयन्तः सुस्वयङ्कुर्वाणाः तत्करोतीति णिच् नरेन्द्रन्दशरथं समुदूढुः उद्वाहितवन्तः शिबिकायामारोप्य बहिरन्नर्भावितण्यर्थोऽत्र द्रष्टव्यः यजादित्वात्समासस्वरेण आरात् नातिदूरे दिधक्षयन्तः दग्धुमिच्छन्तं भरतं प्रयोजितवन्तः दहेः सनि दादेर्धातो र्घः भषभावस्तु प्रयोजकव्यापारे णिच् अन्ते विनाशे भवा या आन्तिः दिगादित्वाद्यत् तामन्त्याऽऽहुतिं हावयितुमग्नौ प्रक्षेपयितुं सविप्राः ब्राह्मणैः सहिताः सचिवाश्चिचीषयन्तः चेतुमिच्छन्तः प्रयोजितवन्तः किन्तत् अध्वरपात्रजातं यज्ञोपयोगिपात्राणां स्रुवादीनां समूहम् ॥ ३२ ॥ ज० म०

तमित्यादि । विप्रसहिताः सचिवाः अमात्यास्तं भरतं सुस्वयन्तः सुस्वं कुर्वन्तः नरेन्द्रं दशरथं समुदूढुः बहेरन्तर्भावितण्यर्थात् शिबिकायामारोप्य उद्वाहितवन्त इत्यर्थः विप्राणां वहनानौचित्यात् वहैर्जौ प्राप्णे ठौ व्यथश्चेति जिः सहसपाद्योरिति प्रकृतेर्जिः सुस्वयन्त इति लेःक्त्वाख्याने जिरिति सुस्वशब्दात् जिः आरात् समीपे दिधक्षयन्तोदग्धुमिच्छां कारयन्तः दहेः सनन्तात् जिः अतः अन्त्याऽऽहुतिं हावयितुं अग्नौ प्रक्षेपयितुं अध्वरपात्रजातं यज्ञोपयोगिस्रुवादिसमूहं चिचीषयन्तः चेतुमिच्छां कारयन्तः अन्तकाले भवोऽन्त्यः दधकादिति ष्ण्यः सचिः सेवा विद्यतेऽस्य सचिवः गोत्रर्क्षेत्यादिना केशादित्वाद्वः सचन्ति कार्येषु समवयन्तीत्यर्थे सचिवा निपातनाद्वा ॥ ३२ ॥ भ०

उदक्षिपन् पट्टदुकूलकेतूनवादयन् वेणुमृदङ्गकांस्यम् ।
कम्बूंश्च तारानधमन् समन्तात्तथानयन् कुङ्कुमचन्दनानि ॥ ३४ ॥
श्रोत्रात्त्रिनासावदनं सरूक्मं कृत्वाजिने प्राक्शिरसं निधाय ।
सञ्चित्य पात्राणि यथाविधानमृत्विग्जुहाव ज्वलितं चिताग्निम् ॥३५

उदेत्यादि । पट्टदुकूलविरचितान् केतून् ध्वजानुदक्षिपन् उच्छ्रितवन्तः ये नियुक्ताः क्षिपेस्तौदादिकस्य ग्रहणम् वेणुमृदङ्गकांस्यं वंशसुरजकांस्यतालमवादयन् वादितवन्तः वदेर्ण्यन्तस्यैव प्रयोगः जातिरप्राणिनामित्येकवद्भावः न पुनरूर्याङ्गत्वात् तत्र हि प्राणिनान्तूर्याङ्गानां द्वन्द्वैकवद्भावः यथा मार्दङ्गिक-पार्णविकमिति तृतवदिहनिकमिकघिभ्यः सः इत्यौणादिकः कंसशब्दः तदर्थाय हितं कांसीयं त्वपुषा दृढद्रव्यं प्रकृतिविकारभावे च्छः तस्य विकार इति कांसीय-परश्वयोर्य्यञञौ लुक्चेति छस्य लुक् यञ् च प्रत्ययः कम्बून् शङ्खान् तारान् उच्चैस्तरध्वनीन् अधमन् शब्दितवन्तः प्राध्मेत्यादिना धमादेशः तथा कुङ्कुमचन्दनानि आनयन् आनीतवन्तः सर्व्वत्र लङि रूपं अन्त्येष्टिं दर्शयन्नाह ॥ ३४ ॥ ज० म०

उदक्षिपन्नित्यादि । अर्थात् तत्र नियुक्तास्ते जनाः पट्टदुकूलरचितान् केतून् ध्वजान् उदक्षिपन् उच्छ्रितवन्तः क्षिपस्तौदादिकः । कार्पासं वादरं प्रोक्तं दुकूलाद्यञ्च वाल्कलं । कौषेयं कृमिजञ्चापि राङ्कवं मृगरोमजमित्यमरमाला । वेणुमृदङ्गकांस्यं अवादयन् वादितवन्तः अप्राणिजातित्वात् समाहार इति कालापाः तूर्याङ्गत्वात् इति वासवताः । सर्व्वो द्वन्द्वः समाहार इति प्राञ्चः । स्वमते इतरेतरयोगे च समाहारे च चो द्विधेति सामान्येन द्विविधो द्वन्द्व उक्तः तत्र क्वचिदितरेतरः क्वचित् समाहारः अभिधानात् बोध्यव्यः यदुक्तं कृत्तद्धित-समासानामभिधानं नियामकमिति कम्बून् शङ्खान् तारान् उच्चतरध्वनीन् अधमन् शब्दायितवन्तः स्थादानपाभ्येति धमोधम तथा कुङ्कुमचन्दनानि आनयन् सर्व्वत्र धी ॥ ३४ ॥ भ०

श्रोत्रेत्यादि । अजिने कृष्णसारचर्म्मणि प्राक् पूर्व्वं शिरोमूर्द्धा यस्येति तं प्राक्शिरसं शवन्निधाय स्थापयित्वा पश्चात् श्रोत्रात्त्रिनासावदनं प्राग्वदङ्कृत्वा-देकवद्भावः कृतवदीत्यादिसूत्रस्थानन्तरं नयतेराचेति प्रकृतेराकारे नासेत्यौणा-दिकं रूपम् सरूक्मं ससुवर्णङ्कृत्वा सञ्चित्य विन्यस्य अङ्गप्रत्यङ्गेषु पात्राणि स्रुगा-दीनि यथाविधानं याद्दग्यं विधानमुक्तं गृह्यशास्त्रे । ऋत्विग्याजकः ऋतौ यज-

क्षतेषु पिण्डोदकसञ्चयेषु हित्वाभिषेकं प्रकृतं प्रजाभिः ।
प्रत्यानिनीषुर्विनयेन रामं प्रायादरण्यं भरतः सपौरः ॥ २६ ॥
शीघ्रायमाणैः ककुभोऽस्रवानैर्जनैरपत्यानमुपेत्य रुग्नैः ।

तीति ऋत्विग्दृगित्यादिना निपातितः ज्वलितज्विताग्निं चयनं चितं तदर्थमग्निं जुहाव जुहोति स्म ॥ २५ ॥ ज० म०

श्रोत्रेत्यादि । प्राक् पूर्व्वस्यां दिशि शिरो यस्य तादृशं शरीरं अजिने कृष्णसारचर्म्मणि निधाय संस्थाप्य श्रोत्रात्त्रिनासावदनं सरुक्कं स्रुवर्णयुक्तं कृत्वा यथाविधानं विधानमनतिक्रम्य पात्राणि स्रुवादीनि सज्जित्व अङ्गेषु निधाय ऋत्विक् याजकः ज्वलितं चिताग्निं जुहाव एतेनान्येष्टिरुक्ता ऋतौ यजतीति ऋत्विक् त्वासुसिति क्विप् ऋडिति कुङ् श्रोत्रेत्यादिप्राण्यङ्गत्वात् द्वन्द्वैकत्वं क्लीवत्वञ्च नित्यं भजते इति परः । स्वमतेऽत्र वेणुष्टङ्ककांस्यमितिवत् समाहारो द्वन्द्व इतरेतरोऽपि दुर्निवारः । यथा ग्रीवाकुक्षिललाटेषु नित्यं स्वेदः प्रशस्यते । गण्डे चुम्बं ललाटात्तिलकोरुभगमूर्द्धसु इत्यादि दर्शनात् परमतं हेयं ॥२५॥भ०

क्षतेष्वित्यादि । पिण्डोदकदानास्थिसञ्चयनेषु कृतेषु प्रजाभिः प्रकृतं प्रस्तुतमभिषेकमादि कर्म्मणि क्तः हित्वा त्यक्त्वा जहातेश्चक्लीति हिरादेशः रामं प्रत्यानिनीषुः प्रत्यानेतुमिच्छुः विनयेन प्रसादनया न भयादरण्यं वनमायात् गतवान् भरतः सह पौरैः अयोध्याभवैर्जनै मयैकेन प्रसाद्यमानः कदाचिन्नागमिष्यतीति ॥ २६ ॥ ज० म०

क्षतेष्वित्यादि । पिण्डोदकदानास्थिसञ्चयनेषु क्षतेषु पश्चात् प्रजाभिः प्रकृतं प्रस्तुतमभिषेकं हित्वा विनयेन रामं प्रत्यानिनीषुः प्रत्यानेतुमिच्छुर्भरतः पौरैः सह अरण्यं प्रायात् जगाम यातेर्ण्यां रूपं प्रकृतमिति आरम्भे क्तः हित्वेति हाकोहिः आत्मनोविनयत्वापनार्थं मयैकेन प्रसाद्यमानः कदाचित् नागच्छेदित्याशङ्क्या पौरैःसह गमनं पिण्डोदकपदेन दाने लक्षणा सञ्चयोऽस्थिसञ्चयनं पिण्डोदकानां सञ्चया इति केचित् ॥२६॥ भ०

शीघ्रेत्यादि । जनैर्हेतुभूतैर्भूयकासाञ्चकार शीभते स्म कर्त्तुः क्रियाफलयोगेऽपि नात्मनेपदम् आत्मत्यवदित्यत्र पर्य्यायग्रहणानुवृत्तेः चकासेश्च परस्मैपदित्वादिति विधिनियमौ स्थितौ शीघ्रायमाणैः अशीघ्रैः शीघ्रैर्भवद्भिर्झटिति गच्छद्भिरित्यर्थः भ्वादित्वात् क्यङ् ङित्त्वात्तङ् ककुभोऽस्रवानैः दिशोव्याप्तु-

शोकादभूषैरपि भूश्चकासाञ्चकार नागेन्द्ररथाश्वमिश्रैः ॥ ३७ ॥
उच्चिक्षिरे पुष्पफलं वनानि सस्नुः पितॄन् पिप्रियुरापगासु ।
आरेसुरित्वा पुलिनान्यशङ्कं छायां समाश्रित्य विशश्रमुश्च ॥३८॥

वह्निः अश्नोतेः सौवादिकस्य आत्मनेपदिनो रूपम् । अपन्थानमुपेत्य स्रुग्नैः बहुत्वादमार्गमपि गत्वागतैः ऋक्पुरित्यादिना समासान्तः प्राप्नोनञस्तत्पुरुषादिति प्रतिषिद्धः सन् पथोविभाषेति विकल्पितः शोकाद्वेतोरभूषैरनलङ्कारैरपि चकासाञ्चकार भूः भूमिः भूषेति गुरोश्च हल् इत्यकारप्रत्ययः चकासृदीप्तावित्यस्मात् कास्यनेकाज्ग्रहणञ्नुम्भ्वाद्यर्थमित्याम् नागेन्द्ररथाश्वमिति द्वन्द्वे एकवद्भावः अल्पाच्तरस्य न पूर्वनिपातः बहुच्वनियम इति वचनात् तेन सेनाङ्गत्वात् कृतकवद्भावेन मिश्रैर्युक्तैः पूर्वसदृशेत्यादिना तृतीयासमासः ॥३ ७ ॥ ज० म०

शीघ्रायमाणैरित्यादि । शोकाद्भूषारहितैरपि जनैर्भूश्चकासाञ्चकार चकासृदीप्तौ विजादिदृश्येत्यादिनाम् भवस्त्वनामः भूषेति सेमन्तात् सरोरिति अः किम्भूतैः शीघ्रायमाणैः अशीघ्रैः शीघ्रे भवद्भिः कार्य्यवशात् द्रुतं गच्छद्भिरित्यर्थः भृशादेश्वर्थ्यं इति ङ्यः घोंऽज्यरे इति घः ङित्त्वान्नं कुभोदिशः अम्भ्वानैर्व्याप्नुवद्भिः अम्भूङ्ण्व्याप्तिसंहत्योः बहुत्वात् अपन्थानमपि व्याप्य स्रुग्नैर्गतैः विकल्पितमप्रत्ययान्तं नागेन्द्रा हस्तिश्रेष्ठा रथा अश्वाश्चेति परमते सेनाङ्गत्वात् समाहारद्वन्द्व एव स्वमते इतरेतरद्वन्द्वोऽपि लभ्यते मिश्रैर्युक्तैः ॥३७॥ भ०

उच्चीत्यादि । ते जनाः गच्छन्तः पुष्पफलं पुष्पाणि फलानि चेति जातिरप्राणिनामित्येकवद्भावः उच्चिक्षिरे उच्चितवन्तः ञित्वात्तङ् कर्तुः क्रियाफलयोगात् विभाषा चेरिति धातोः कृत्वभेरनेकाच इति यण्आदेशः उच्चिच्चिर इति पाठान्तरं युक्तम् वनानीति हेतुत्वेनाकथितकर्म्म वनानि विघट्टयन्तः फलानि जग्टह्रुरित्यर्थः ततः सस्नुः स्नातवन्तः स्नातेर्लिटि उस्यपदान्तादिपरंरूपम् पितॄन् पिप्रियुः उदकाञ्जलिना तर्पितवन्तः प्रीणातेर्लिटि इयङादेशः आपगासु नदीषु एतत्कृत्वा पुलिनानि सैकतानि दृत्वा आरेटुः आरटिताः आरेसुरिति पाठान्तरं शोकापनोदनार्थङ्क्रियन्तमपि कालभारमन्ति रु व्याङ्परिभ्योरम इति परस्मैपदम् अशङ्कं विस्रब्धं छायां समाश्रित्य विशश्रमुः विश्रान्ताः ॥ ३८ ॥ ज० म०

उच्चिक्षिर इत्यादि । ते जना वनानि पुष्पाणि फलानि च उच्चिक्षिरे चिञ्चयने ठी याच्ञार्थदुहचिप्रच्छीति द्विकर्म्मकत्वं चेः किर्ल्लेति किः शुश्रो-

संप्राप्य तीरं तमसापगाया गङ्गाम्बुसम्पर्कविशुद्धिभाजः ।
विगाहितुं यामुनमम्बु पुण्यं ययुर्निरुद्विग्नमनस्तयस्ते ॥ ३९ ॥
ईयुर्भरद्वाजमुनेर्निकेतं यस्मिन् विश्रश्राम समेत्य रामः ।

रिति यत्वं वनानि विघट्टयन्तः पुष्पफलं जग्टङ्गरित्यर्थः परमते अप्राणिजातित्वात् समाहारद्वन्द्वः खमतं मृदङ्गकांस्यमित्यत्रोक्तं आपगासु नदीषु सस्नुः स्नातवन्तः पितॄन् पिप्रियुः तर्पितवन्तः प्रीञ्तर्पणे अभ्योरितीयादेशः पुलिनानि सैकतानि दृत्वा गत्वा आरेसुः शोकापनोदनार्थं क्रीडन्ति स्म घे प्रमित्यादिना पं आरेटुरिति पाठे शोकात् शब्दं चक्रुरित्यर्थः । रटपरिभाषणे तृफलेति अत एत्वं खिलोपश्च अशङ्कं निःशङ्कं यथा स्यात्तथा छायां समाश्रित्य विश्रश्रमुः ॥ ३८ ॥ भ०

संप्राप्येत्यादि । तमसापगायाः तमसाख्याया आपगायाः नद्याः अत्यविचमितमिनमिरभिलभितमिपतिजनिपणिमहिभ्योऽसच् यस्याः स्मरणात्पापं तामयति सा तमसा तरसा इति पाठान्तरं तत्र तरसा वेगेन आपगाया अर्थात्तमसाया नद्या गङ्गाम्बुसम्पर्कात् विशुद्धिं पवित्रतां भजते या तस्यास्तीरं कूलं सम्प्राप्य गत्वा ते जना निरुद्विग्नमनस्तयः ययुः गताः गङ्गेति गमॄगम्यद्योरित्यौणादिको गन् विगाहितुं विगाहिष्यामह इति कृत्वा यामुनमम्बु यमुनाया इदं यमुनासम्बन्धि जलं पुण्यमुण्यहेतुत्वात् पुण्ययुक्तत्वाद्वा ॥ ३९ ॥ज० म०

संप्राप्येत्यादि । ते जनास्तमसापगायास्तमसानामनद्यास्तीरं कूलं संप्राप्य निरुद्विग्नमनस्तयः सन्तः यामुनं यमुनासम्बन्धि पुण्यं पावनं अम्बु जलं विगाहितुं ययुः तरसेति पाठे वेगेनेत्यर्थः यमुनाशब्दात् विकारसंघेत्यादिना इदमर्थे ष्णः ण्यिञेत्रिरिति त्रिः तमसापगायाः कीदृश्याः गङ्गाजलसम्पर्कात् अतिशयितशुद्धिं भजते या तस्याः ढाङ्गजसङ्घवहेति विण् ॥३९॥ भ०

ईयुरित्यादि । भरद्वाजमुनेर्निकेतं आश्रममीयुः गताः दृणोयणिति यत्वम् अभ्यासस्य दीर्घ दृणः कितीति दीर्घत्वं यस्मिन्निकेते रामो विश्रश्राम विश्रान्तः समेत्य मिलित्वा तमीयुर्जना इति योज्यम् फलवद्विभूत्या फलवतां वृक्षाणां सम्पद्या हेतुभूतया च्युताशनायोऽपगतबुभुक्षः अशनायेत्यादिना निपातितः व्यसन् उदन्यां वारयन् असेर्दैवादिकस्य रूपम् उदन्यां पिपासां शिशिरैः शीतलैः पयोभिः ॥ ४० ॥ ज० म०

च्युताश्रनायः फलवद्विभूत्या व्यस्यन्नुदन्यां शिशिरैः पयोभिः ॥४०॥
वाचंयमान् स्थण्डिलशायिनश्च युयुक्षमाणाननिशं सुमुक्षून् ।
अध्यापयन्तं विनयात् प्रणेमुः पद्भा भरद्वाजमुनिं सशिष्यम् ॥४१॥

ईयुरित्यादि। ते भरद्वाजमुनेर्निकेतमीयुर्गता इत्यर्थः इण गतौ ठी यिणौऽच्यणाविति यादेशः खेःकितिर्घ इति दीर्घः यस्मिन् निकेते रामः समेत्य संगत्य विश्रश्राम विश्रान्तः कीदृशः स फलवतां दात्राणां विभूत्या समृद्ध्या च्युताश्रनायः व्यपगतबुभुक्षः अश्रनशब्दात् कोम्बादिति क्यः धनोदकाश्रन इत्यादिना अन्नार्थे ङाः ततः संस्यात् इत्यः स्त्रीत्वञ्च च्युता अश्रनाया यस्य स तथा शिशिरैः शीतलैः पयोभिर्ज्जलैरुदन्यां पिपासां व्यस्यन् अपनयन् असुरुदन्यमे शतः उदकस्य डनङ् पानार्थे पूर्ब्ववत् पयोभिरिति पीड्यमाने त्वासुसिति अस् ॥ ४० ॥ भ०

वाचमित्यादि। ते भरद्वाजमुनिं सशिष्यं शिष्यैः सह वर्त्तमानमणेसुः प्रणमन्ति स्म विनयात् विनयेन अतएव पद्भाः पदातयः पादाभ्यां गच्छन्तीति अन्येष्वपि दृश्यत इति डः हिमकाषिहतिषु चेति चकारस्य अनुक्तसमुच्चयार्थत्वात् गमोत्तरपदे पदादेशः पदिति योगविभागाद्वा कीदृशम् अध्यापयन्तम्पाठयन्तम् कान् वाचंयमान् मौनव्रतान् वाचियमोव्रत इति खच् वाचंयमपुरन्दरौचेति निपातनात्पूर्ब्वपदस्य अमन्तता स्थण्डिलशायिनः भूशायिनः स्थण्डिलाच्छयितरिव्रत इति णिनिः युयुक्षमाणान् योक्तुमिच्छतः योगाभ्यासनिष्ठानित्यर्थः अनिशमविच्छेदेन सुमुक्षून्मोक्षाभिलाषिण इत्यर्थः अतएव योगाभ्यासमिच्छून् ॥ ४१ ॥ ज० म०

वाचंयमानित्यादि। ते जनाः सशिष्यं भरद्वाजमुनिं प्रणेसुः नमौ सब्दनत्योः तफलेति अत एत्वं खिलोपश्च प्राग्वद्रोण इति णत्वं नादित्वात् विनयात् विनयं विधाय यवर्थे पञ्चमी हेतौ वा कीदृशाः पद्भाः एतेन यानस्था अपि ये तेऽपि विनयात् पद्भाः पद्भ्यां गच्छन्तीति हनजनादिति डः पादसमानार्थोयं पच्छब्दः अध्यापयन्तं पाठयन्तं क्रीजीङोऽजेतीङ आङ्होर्व्वीरीत्यादिना पन् कानित्यात्र वाचंयमान् मौनव्रतिनः तृभ्रट्रदृजीत्यादिना आवन्तवाचा भ्रदान् यमः खः खित्यव्याजेति मन् खश्च परे तु वाक्शब्दोपपदेन साधयन्ति स्थण्डिलशायिनः तृणाच्छादितभूमिशायिनः अन्यादित्वान्निन् व्रतेणिनीति परः युयुक्षमाणान् योक्तुमिच्छून् योगाभिलाषिण इत्यर्थः युज्योऽसमाधौ सन् शानः

आतिथ्यमेभ्यः परिनिर्व्विवघ्नोः
कल्पद्रुमा योगबलेन फेलुः ।
धामप्रथिम्नो मृदिमान्वितानि
वासांसि च द्राघिमवन्त्युदूङ्क्षः ॥ ४२ ॥

शानेऽतोमन् अनिशं निरन्तरं सुसुक्षून् मोक्षाभिलाषिणः सुलृशपओमोक्षे सन् सन्भिक्षायांस उः दृभ्रजुषस्विणिति शास्तेः क्यप् शासुडिति इत् क्विबादिति षः ॥ ४१ ॥ भ०

आतीत्यादि । अतिथ्यर्थमातिथ्यमन्नपानादि अतिथेरर्थः एभ्यो भरतादिजनेभ्यः इति सम्प्रदाने चतुर्थी परिनिर्व्विवघ्नोः निर्व्वघ्नुमिच्छोर्दातुमिच्छोरित्यर्थः निपूर्व्वो वपिर्दाने वर्त्तते धामप्रथिम्नः धाम्ना तेजसा प्रथिमा पृथुत्वं यस्य तेजसोवह्निनिर्गतत्वात् शरीरस्य पृथुत्वं जायते तस्य भरद्वाजसुनेर्योगबलेन समाधिबलेन युजसमाधावित्यस्य रूपम् कल्पद्रुमाः फेलुः फलिताःभक्ष्यान्नपानादिकमित्यर्थः तृफलभजत्वपश्चेत्यत्वमभ्यासलोपश्च वासांसि च वस्त्राणि उदूङ्क्षः उद्वहन्ति स्म यजादित्वात्सम्प्रसारणं स्नदिमान्वितानि मृदुत्वसुपगतानि द्राघिमवन्ति दैर्घ्ययुक्तानि पृथुमृदुदीर्घशब्देभ्यस्तस्य भाव इत्यर्थे पृथ्वादिभ्य इमनिच् पृथुमृदुशब्दयो ऋतोऽलादेरिति रादेशः दीर्घशब्दस्य प्रियस्थिरेत्यादिना द्राघादेशः पश्चान्मतुप् ॥ ४२ ॥ ज० म०

आतिथ्यमित्यादि । आतिथ्यं अतिथ्यर्थमन्नपानादिकं एभ्यो भरतादिभ्यः परिसर्व्वतोनिर्व्वघ्नुं दातुमिच्छोर्भरद्वाजसुनेर्योगबलेन समाधिबलेन कल्पद्रुमाः फेलुः अर्थात् अन्नपानादिकं तृफलेति अतएत्वं खिलोपश्च विकारसंघेत्यादिना तादर्थ्ये अतिथेः ष्णः निः पूर्व्वोवपिर्दाने वर्त्तते युज्योङ्समाधौ घञि चजो कगाविति जस्य गत्वं तस्य सुनेर्धामप्रथिम्नोहेतोस्तेजोबाहुल्यात् ते कल्पद्रुमा वासांसि उदूङ्क्षः उद्वहन्ति स्म चकारः समुच्चये वहैऔप्राप्तणे व्यथयहेति जिः क्वीदृशानि स्नदिमान्वितानि मृदुत्वेन युक्तानि द्राघिमा दैर्घ्यं विद्यते येषान्तानि गुणादिमन् भावे इति पृथुमृदुदीर्घशब्देभ्यः इमन् पृथुमृदुभ्रयेति पृथुमृदुशब्दयोः ऋकारस्य रः वाढान्तिकेति दीर्घस्य द्राघादेशः ओमंश्चडिदिति डित्वे टेर्लोपः द्राघिमशब्दात् मोऽमश्चपादित्यस्यर्थे वतुः तेजसां प्रथिमा यस्य इति सुनिविशेषणं केचिदाङ्क्षः ॥ ४२ ॥ भ०

आज्ञां प्रतीषुर्विनयादुपास्युर्जगुः सरागं ननृतुः सहावम्।
सविभ्रमं नेमुरुदारमूचुस्तिलोत्तमाद्या वनितास्तस्मिन् ॥४३॥
वस्त्रान्नपानं शयनञ्च नाना कृत्वावकाशे रुचिसंप्रकल्प्तम्।
तान् प्रीतिमानाह सुनिस्तः स्म निवद्धमाद्धं पिवतात्तशेध्वम् ॥४४॥

आज्ञामित्यादि। तस्मिंस्तपोवने तिलोत्तमाद्या दिव्यस्त्रियः आगता-आज्ञामादेशं सुनेः प्रतीषुः प्रतीष्टवत्यः चेटीभवत्य इत्यर्थः प्रति पूर्व्व इषिर्यङ्लुगे वर्त्तते तस्य लिटि रूपम् विनयादुपास्युः उपस्थिताः पादप्रक्षालनादिदाने उपस्थानकृतवत्यः उपपूर्व्वास्तिष्ठतेर्लुङि सिच् गातिस्थेति सिचोलुक् सिजभ्यस्तविदिभ्यश्चेति झेर्जुस् उस्यपदान्तादिति यररूपम् जगुः सरागं सरक्तङ्गीतवत्यः ननृतुः सहावं सहङ्कारचेष्टं नर्तितवत्यः सविभ्रमन्नेमुः सविलासं प्रणताः उदारमूचुः अयास्यमुक्तवत्यः ॥ ४३ ॥ ज० म०

आज्ञामित्यादि। धामप्रथिम्नः किमित्याह तस्मिन् वने तिलोत्तमाद्या वनिता अप्सरस आगत्य सुनेराज्ञां प्रतीषुर्गृहीतवत्यः प्रतिपूर्व्व इषिर्यङ्लुगे यां रूपं विनयात् उपास्युः भरतादीनाम् उपासनां चक्रुः उपपूर्व्वास्तिष्ठतेश्यां रूपं भूस्थापिवेति सेलुक अनुस्विद्वेरिति अन् उम् उस्येचीत्यालोपः सरागं मालवादिरागयुक्तं यथास्यात्तथा जगुः गीतवत्यः गैगाने ठी सहावं हङ्कारचेष्टायुक्तं ननृतुः नृत्यमुक्तुः हावाः क्रियाः हङ्कारभावजा इत्यमरः। सविभ्रमं नेमुः प्रणामं चक्रुः। विभ्रमस्त्वरया काले भूषास्थानविपर्य्ययः। चित्तस्यानवस्थानं हङ्कारादिह्रभेऽथवा। विलास इत्यन्ये उदारमप्यास्यमूचुः वनिताः। जनितात्यर्थानुरागायाञ्च योषितीति कोषः चकारः पूर्व्वापेक्षया ॥ ४३ ॥ भ०

वस्त्रेत्यादि। ततोवनितोपस्थानानन्तरमवकाशे प्रदेशे यथाभिमते वस्त्रान्नपानं सर्व्वोद्देशे विभाषैकवद्भवतीत्येकवद्भावः शयनमित्यधिकरणे ल्युट् नाना कृत्वा पृथक् कृत्वा रुचिसम्प्रकल्प्तं यस्य यावद्भिरुचितन्तत्तथैव सम्पादितम् कृपोरोलः प्रीतिमान्मुनिस्तान् भरतादीनाह स्म उक्तवान् किमाह निबद्धं परिधत्त वस्त्राणि वस आच्छादने इत्यस्य विधौ लोट् झलाञ्झ्यझीति सकारस्य दकारः आद्धं उपविशत आसेः पूर्व्ववत् दादेशः अत्तखादत अन्नादिकं अदभक्षणे इत्यस्मात् लोट् पानादिकम्पिवत पिवतेः पाघ्रादिसूत्रेण पिबादेशः शेध्वम् स्वपत शयने सर्व्वत्र विधौ लोट् ॥ ४४ ॥ ज० म०

ते भुक्तवन्तः सुसुखं वसित्वा
वासांस्युषित्वा रजनीं प्रभाते ।
द्रुतं समध्वा रथवाजिनागै-
र्मन्दाकिनीं रम्यवनां समीयुः ॥ ४५ ॥

वस्त्रान्नपानमित्यादि । ततोवनितोपस्थानानन्तरं धामप्रथिम्नो हेतोर्वा अवकाशे यथायोग्यस्थाने वस्त्रं अन्नं पानं शयनञ्च रुचिसम्पन्नं यस्य यथारुचिस्तथैव सम्पादितम् अतएव नानाविधं कृत्वा प्रीतिमान् सुनिस्तान् भरतादीन् आह स्म उवाच किमुदित्याह निबद्धं वस्त्राणि परिधत्त वसङ्ल-स्तृतौ स्तुतिराच्छादनं भषभक्षयोरिति सस्य दत्वं निर्देशकारपाठे शेषलोपोवेति यात्विकः सलोपः सर्व्वत्र विधौ गौ आध्वम् उपविशत जिलासङ्ङपवेशे पूर्व्व-वत् पिबत पयःप्रभृतिकमर्थात् पापाने स्यादानेति पिबादेशकरणान्न गुणः किम्वा पिबादेशोऽयमदन्तः तेन णुर्भुङ इत्यस्य न विषयः लोपोऽतोहेचोरित्य-कारलोपः अत्त भक्षयत अद्लौभक्षणे शेषं शयनं कुरुत शीङोरेणुः वस्त्र-मिति वसेस्त्रासुसिति त्रः अन्नमिति गीक इति क्तले अन्नव्यवस्थनेति क्ताप-कात् न जग्धादेशः अदोजग्धिरनोदने इति परस्तात् पानमिति कर्म्मणि आधारे वा अनट् शयनमित्याधारेऽनट् ॥ ४४ ॥ भ०

ते भुक्तेत्यादि । ते भरतादयः सुसुखमिति क्रियाविशेषणम् भुक्तवन्तः सन्तो वासांसि वसित्वा परिधाय रजनीमुषित्वा रजनीं रात्रीं वसतिक्षुधो-रिट् कालाध्वनोरिति द्वितीया द्रुतं शीघ्रं प्रभाते मन्दाकिनीनदीं समीयुः सम्भूय गताः समध्वा अविच्छिन्नाध्वानः सङ्गता अध्वन इति प्रादिसमासः उपसर्गादध्वन इति समासान्तष्टच् रथवाजीति द्वन्द्वैकवद्भावः तेन सहिता नागा इति शाकपार्थिवादित्वात्समासः अन्यथा सेनाङ्गत्वात्सुदायस्यैकवद्भावः स्यात् रम्यवनां रमणीयकाननां रमणीयजलां वा ॥ ४५ ॥ ज० म०

त इत्यादि । सुसुखं यथास्यात्तथा भुक्तवन्तः कृतभोजना भरतादयो-वासांसि वस्त्राणि वसित्वा परिधाय रजनीं उषित्वा स्थित्वा प्रभाते समध्वा अध्वानं सङ्गताः सन्तः रथवाजिनागैर्द्रुतं शीघ्रं रम्यवनां मन्दाकिनीं समीयुः सङ्गतवन्तः दृणछ्यां रूपं मन्दाकिनी चित्रकूटवर्त्मनि नदीविशेषोनर्म्मदेति प्रसिद्धा गङ्गामात्रे मन्दाकिनीति केचित् रम्याणि वनानि यत्र वनं कानन-नीरयोरिति विश्वः वसित्वेति वसङ्लसृतावित्यस्य रूपम् उषित्वेति ऐवसौ-

वैखानसेभ्यः श्रुतरामवार्त्तास्ततो विशिञ्जानपतत्त्रिसङ्घम् ।
अभ्रंलिहाग्रं रविमार्गभङ्गमानंहिरेऽद्रिं प्रति चित्रकूटम् ॥४६॥

दृष्ट्वोर्णुवानान् ककुभो बलौघान्
वितत्य शार्ङ्गं कवचं पिनद्ध्य ।

निवासे चुधवसपूजार्थाच्चेति इम् अहखपाद्योरिति जिः रजनीमिति देशाध्वकालेति कर्म्मत्वं समध्वा. इति गेरध्वन इत्यः स्वोर्लोपौतौते इति नस्य लोपः ययोर्लोप इत्यकारलोपः रथाश्च वाजिनोऽश्वाश्च नागा हस्तिनश्चेतीतरेतरद्वन्द्वः परे तु सेनाङ्गानां बहुत्वे समाहार इति रथश्च वाजी च नागश्चेत्येकवचनेन विग्रहं वदन्ति समाहारविधेरनित्यत्वमित्यन्ये आदौ रथवाजिशब्दाभ्यां समाहारस्ततो रथवाजिना सहिता नागाः रथवाजिनागाः शाकपार्थिवादित्वादिति केचित् ॥ ४५ ॥ भ०

वैखेत्यादि । ततो मन्दाकिनीगमनानन्तरं वैखानसेभ्यस्तृतीयाश्रमिभ्यः चित्रकूटे रामोस्तीति श्रुतरामवार्त्ताः चित्रकूटनामानमद्रिं पर्व्वतं प्रति लक्षखेत्यभूताख्यानेत्यादिना कर्म्मप्रवचनीयसंज्ञा कर्म्मप्रवचनीययुक्त इति द्वितीया तं लक्ष्यीकृत्य आनंहिरे जग्मुः अंहतेर्लिटि द्विर्व्वचनं हलादिः शेषः अत आदेरिति दीर्घः तस्मान्नुट् द्विहल इति नुट् विशिञ्जानपतत्त्रिसंङ्घं कूजत्पक्षिगणंअभ्रंलिहाग्रं अभ्रस्यकृशिखरम् वहांभ्रंलिह इति खश् अरुर्द्विषदित्यादिना सम् रविमार्गभङ्गं उच्चैस्तरत्वात् रवेर्मार्गभङ्गोयस्मिन्नद्रावितिं ॥ ४६ ॥ ज० म०

वैखानसेभ्य इत्यादि । ततो मन्दाकिनीगमनानन्तरं वैखानसेभ्यो वाणप्रस्थेभ्यः श्रुता रामवार्त्ता यैस्तादृशा भरतादयश्चित्रकूटमद्रिं प्रति लक्षीकृत्य आनंहिरे गतवन्तः अहिङ्गतौ ठौ इदित्त्वान्नुण् द्वित्वं स्यान्नादाद्यदाद्यशोरिति खेरान् म्नोर्नुरित्यनुस्वारः होभस इति हस्य झसत्वात् धिक्समयेति प्रतियोगे द्वितीया । वैखानसोवनेवासी वाणप्रस्थश्च तापस इति वैजयन्ती अद्रिं किम्भूतं विशिञ्जानः पतत्रिणां पक्षिणां संघः समूहो यत्र एतादृशं शिञ्जिकिङ्स्फुटध्वनौ अभ्रंलिहाग्रं अभ्रस्यकृशिखरं परन्तपवत् खः बाहुल्याद्गणाभावः उच्चैस्तरत्वाद्रवेर्मार्गभङ्गोवर्त्मविघातो यस्मिन् ॥ ४६ ॥ भ०

दृष्टेत्यादि । बलौघान् दृष्ट्वा सौमित्रिस्तस्थौ स्थितः अभ्यासस्य शर्पर्वाः खय इति खः शेषः कीदृशः ककुभो दिश ऊर्णुवानान् आच्छादयतः ऊर्णोतेरादादिकस्योभयपदिनः श्यानचि उवङादेशे च रूपम् शार्ङ्गं धनुष्कस्य विकारं

तस्थौ सिसंग्रामयिषुः शितेषुः
सौमित्रिरक्षिभ्रुवमुज्जिहानः ॥ ४७ ॥
शुक्लोत्तरासङ्गभृतोऽविशस्त्रान्
पादैः शनैरापतत: समन्यून् ।

धनुर्विततय आरोपितगुणं कृत्वा वाल्यपोत्यनुनासिकलोपः कवचं पिनह्य बद्ध्वा नहबन्धन इत्यस्य ल्यपि अपिशब्दाकारलोपस्तु । वष्टि भागुरिरल्लोपमवाप्योरुपसर्गयोः । धाञ्कञो स्नानिनह्योश्च बहुलत्वेन यौनकिरिति । सिसंग्रामयिषुः संग्रामयितुमिच्छुः संग्रामयुङ इति चौरादिकोणिच् तदन्तस्य सनि प्रथमस्यैकाचोर्द्विर्वचनम् शितेषुः तीक्ष्णशरः अक्षिणी च भ्रुवौ च अक्षिभ्रुवम् अचतुरेत्यत्र निपातितः उज्जिहानः ऊर्ध्वन्नयन् ओहाङ्गतावित्यस्य जुहोत्यादिकस्य भ्रजाभितीत्वम् ॥ ४७ ॥ज० म०

दृष्टेत्यादि । कक्षुभो दिश जर्णुवानान् आच्छादयतो बलौघान् सैन्यसमूहान् दृष्ट्वा सौमित्रिर्लक्ष्मणः कवचं पिनह्य बद्ध्वा ग्रहङ्विकारं शार्ङ्गं धनुर्विततय सज्यं कृत्वा आकर्षणेन विस्तार्य्य वा अक्षिभ्रुवमुज्जिहान उत्क्षिपन् सिसंग्रामयिषुः युद्धेच्छुः सन् तस्थौ स्थातोऽौः किम्भूतः शितस्तीक्ष्ण इषुः शरोयस्य स तथा शोयनिशाने च्छाशोर्व्वेति डिः जर्णुवानानिति जर्णुञल आच्छादने शानः भ्रुध्वोरित्युव वितत्येति तनदुञ् विस्तृतौ वनतनाद्यनिमामिति नस्य लोपः स्वतनत् पिति पिनह्येति अपिपूर्व्वोणह्यौबन्धे वातोऽवाप्योरित्यमेरलुक् सिसंग्रामयिषुरिति संग्रामङ्तकयुद्धे सन् उः अक्षिभ्रुवमिति अक्षिणी च भ्रुवौ च अक्षिभ्रुवमिति निपातनात् उज्जिहान इति ओहाङ्लिगतौ शानः ह्वादीरेद्विः पृभ्वादेरिति खेर्डिः ॥ ४७ ॥ भ०

शुक्लेत्यादि । दाशरथिस्तान् स्वयंर्यान् स्वर्गे भवान् अशस्त्रेयत् खावितियत् आत्मीया अपि कदाचित् दुष्टबुद्धयो भवन्तीत्याह वीतविरुद्धबुद्धीन् औहिष्ट अहितवान् अहतेरात्मनेपदिनो लुङि आट दृङ्: तदेवाविरुद्धबुद्धित्वन्दर्शयन्नाह शुक्लोत्तरासङ्गभृतः शुक्लो य उत्तरासङ्ग उत्तरीयं तं बिभ्रतीति क्विप् विशस्त्रान् निरायुधान् पादैरापतत आगच्छतो सुक्लवाहनत्वात् शनैर्नत्वरया प्रमन्यून् प्रहृष्टशोकान् आगतशोकान् वा विवन्दिषून् वन्दितुमिच्छून् ॥ ४८ ॥ ज० म०

शुक्लेत्यादि । दाशरथिस्तान् स्वयंर्यान् वीतविरुद्धबुद्धीन् विगतदुष्टमतीन्

औद्दिष्ट तान् वीतविरुद्धबुद्धीन्
विवन्दिषून् दाशरथिः स्ववर्ग्यान् ॥ ४८ ॥
समूलकाषं चकषूरुदन्तो-
रामान्तिकं दृंहितमन्युवेगाः ।

औद्दिष्ट ज्ञातवान् जहङ्वित्तर्के वर्गात् भवार्थे ष्यञः । कदाचिदात्मीया अपि दुष्टचेतसः स्युरत उक्तं वीतेति इणः क्तः वीतविरुद्धबुद्धित्वं कुतो ज्ञातमित्याह शुक्लेति शुक्लो य उत्तरासङ्ग उत्तरीयं तं बिभ्रति इति क्विप् युद्धे शुक्लोत्तरासङ्गो निषिद्धः विश्वस्तान् निरायुधान् शनैर्मन्दं यथास्यात्तथा पादैरापतदागच्छतस्त्यक्तवाहनत्वात् समन्यून् सशोकान् विवन्दिषून् वन्दितुमिच्छून् ॥ ४८ ॥ म०

समूलेत्यादि । ते रामान्तिकं रामसमीपमाप्ताश्चकषुः पिष्टवन्तः समूलकाषं समूलङ्कषित्वा भूमेरधोभागसुत्खत्य निर्मूलसमूलयोः कष इति कषेर्णमुल् कषादिषु यथाविध्यनुप्रयोगः रुदन्तः रोदनं कुर्व्वन्तः दृंहितमन्युवेगा विवृद्धशोकवेगा दृंहितृङ्वावित्यस्य रूपम् रामवियोगशोकात् कारणात् क्षितिपालन्दशरथसञ्ज्ञैःकारं कृत्वा हतं निधनं गतं आवेदयन्तः अव्यये यथाभिप्रेताख्यान इति क्रञोणमुल् एतद्यथाभिप्रेताख्यानमिति नीचैराख्यातमभिप्रेतत्वात् उच्चैरावेदयन्ति ॥ ४९ ॥ ज० म०

समूलकाषमित्यादि । ते रुदन्तो रामान्तिकं रामसमीपदेशं समूलकाषं यथास्यात्तथा चकषुः पिष्टवन्तः भूमौ स्वशरीराघातात् समूलस्य साधोभागस्य रामसमीपदेशस्य काषः मेषणं यस्मादिति कषणक्रियाविशेषणं काषो घञन्तः समूलघातवत् चणम् वा । केचित्तु समूलं भूमेरधोभागमपि कषित्वा पिष्ट्वा पुनः पिष्टवन्त इति व्याख्याय चणमन्तस्य पूर्व्वकालत्वमाहुः अन्येतु णमन्तस्यात्र पृथगर्थाभावमाहुः तेन समूलकाषञ्चकषुः समूलं चकषुरित्यर्थः । कषवधे ष्वां रूपं समूलमिति साकल्येऽव्ययीभावः मूलसहितमित्यर्थोवा किम्भूतास्ते दृंहितमन्युवेगा विवृद्धशोकवेगाः दृंहितृङ्वावित्यस्य रूपम् रामवियोगहेतुकात् शोकान्मृतं क्षितिपालं उच्चैःकृत्वा आवेदयन्तो ज्ञापयन्तः उच्चैःकारमिति अव्ययात् क्रञोऽनिष्टकथने चणम् कारं विघ्नं किम् वा उच्चैर्यथास्यात्तथा वेदयन्तः किम्भूतं क्षितिपालं कारं रामवियोगे प्राणवियोगकारित्वेनैव विघ्नत्वं क्रकङ्विघ्ने इत्यस्मात् कभावेऽमी इति वचनात् कर्त्तरि घञ् ॥ ४९ ॥ भ०

1287

आवेदयन्तः क्षितिपालमुच्चैः-
कारं मृतं रामवियोगशोकात् ॥ ४९ ॥
चिरं रुदित्वा करुणं सशब्दम्
गोत्राभिधायं सरितं समेत्य ।
मध्येजलाद्राघवलक्ष्मणाभ्याम्
प्रत्तं जलं ह्यञ्जलमन्तिकेऽपाम् ॥५०॥

चिरमित्यादि । चिरं महान्तं कालं करुणं समन्तु सशब्दं प्रतिक्षत्तं रुदित्वा रलोव्युपधाद्धलादेरिति किच्चे विकल्पिते रुदविदेत्यादिना क्त्वम् सरितं समेत्य नदीं सम्भूय गत्वा मध्येजलात् जलस्य मध्यात् तस्माद्वा उत्थाय अवतीर्य ल्यब्लोपे पञ्चमी पारेमध्येषष्ठ्यावेत्यव्ययीभावः अपञ्चम्या इति प्रतिषेधात् अत्र भवति नाव्ययीभावादिति लुक्प्रतिषेधश्च राघवलक्ष्मणाभ्यां अपामन्तिके समीपे जलं प्रत्तम् दत्तं अचउपसर्गात्तः गोत्राभिधायं नामाभिधायं द्वितीयायाञ्चेति णमुल् ह्यञ्जलमिति अञ्जलिपरिक्षिप्तं जलमञ्जली द्वौ विग्रह्य तद्धितार्थे समासः द्वित्रिभ्यामञ्जलेरिति टच् ताभ्यामन्यत्रैकमञ्जलिप्रदानात् द्वावञ्जली प्रमाणमस्येत्यस्मिन्वाक्ये प्रमाणप्रत्ययस्य प्रमाणे लुक् द्विगोर्नित्यमिति लुक् ततः समासान्तो न प्राप्नोति अतद्धितलुकीत्यधिकारात् ॥ ५० ॥ ज० म०

चिरमित्यादि । चिरकालं करुणं सशोकं सफूत्कारं रुदित्वा क्रन्दित्वा सरितं नदीं समेत्य सम्भूय गत्वा मध्ये अवतीर्य जलमध्यादाकृष्य वा रामलक्ष्मणाभ्यां अपां अन्तिके जलसमीपे तटे ह्यञ्जलं अञ्जलिद्वयपरिक्षिप्तं जलं गोत्राभिधायं यथास्यात्तथा प्रत्तं प्रदत्तं डुदाञ्दाने क्तः ग्यचस्तवेति प्रत्ते तादेशः मध्ये जलादिति मध्ये इत्यव्ययं हस्ते पाणौ प्राध्वमित्यादौ तद्ग्रहणात् जलस्य मध्ये मध्येजलमित्यव्ययीभावः यवर्थे पञ्चमी अन्यारभ्येत्यादिना सामान्यतोयवर्थे पञ्चम्युक्ता तेन सर्वस्मात् कारकाकारकात् यवर्थे पञ्चमी दुर्निवारा परैस्तु कर्म्माधाराभ्यां यवर्थे पञ्चमी भूरिप्रयोगार्थमुक्ता क्वचिदन्यत्रापीति तैरुक्तत्वात् वोपदेवेनापि सामान्यतोयवर्थे पञ्चमीमुक्त्वा चानन्दादीश्वरः शैलादासनादीक्षतेऽलकामित्यत्र शैलमारुह्य आसने उपविश्य इत्यर्थ इति व्याख्यातं तेन कर्म्माधाराभ्यां यवर्थे पञ्चम्या भूरिप्रयोगोद्भावितः वातूक्ते र्मोऽतोष्याइति पीवर्ज्जनात् न मः मध्ये समेत्य जलादुत्थाय

अरण्ययाने सुकरे पिता माम्
प्रायुङ्क्त राज्ये वत दुष्करे त्वाम् ।
मागाः शुचं वीर भरं वहामु-
माभाषि रामेण वचः कनीयान् ॥ ५१ ॥

जलं प्रत्तमिति केचित् ह्यञ्जलमिति द्वयोरञ्जल्योः समाहार इति द्वित्रिभ्यामञ्जलेर इत्यप्रत्ययः ययोर्लोप इतीकारलोपः तत्परिच्छिन्नत्वादभेदोपचारात् जलमपि ह्यञ्जलसक्तं ताभ्यामेकैकाञ्जलिदानादञ्जलिद्वयं जलं दत्तमित्यर्थः केचित्तु अतद्धितार्थे द्विगौ द्वित्रिभ्यामञ्जलेर इत्युक्त्वा द्वावञ्जली प्रमाणमस्येति वाक्यं दूषयन्ति प्रमाणार्थस्य तद्धितवाच्यत्वात् गोत्राभिधायमिति गोत्रस्य नाम्नोऽभिधायोऽभिधानं यत्र दानक्रियाविशेषणं अभिपूर्वात् धाजो घञि यनञ्जिणदिति यन् किंवा गोत्रमभिधाय गोत्राभिधायं द्वितयान्तात् धातोश्चण-मभिधानात् केचित्तु आत्मीयैर्धृताभ्यां नीताभ्यां रामलक्ष्मणाभ्यां अपामन्तिके चिरं रुदित्वा तदनु मध्ये मध्यभागसमीपे सरितं समेत्य नाभिपर्य्यन्तं जलं गत्वेत्यर्थः जलं प्रत्तं कीदृशं जलं जलात् अदेः कर्म्मणि क्विप् जलस्य जड़स्य अदनीयं भावे क्विपि जड़स्य अदनीयं भोजनं यस्मादिति वा लोकान्तरं प्राप्तस्यापि दशरथस्य जड़त्वं त्यक्तरामत्वात् प्रेतत्वाद्वा मनीषादित्वात् डस्य प्राप्तिकं लत्वं गोत्राभिधायमित्यस्य रुदित्येतेनेन वा सम्बन्ध इत्याड्ः ॥ ५० ॥ भ०

अरण्ययान इत्यादि । अरण्याय यानं अरण्ययानं तस्मिन् सुकरे सुखसाध्ये पिता मां प्रायुङ्क्त नियुक्तवान् युजेरौधादिकस्य लङि रूपम् कर्त्तृभिप्राये प्रोपाभ्यां युजेरित्यात्मने पदं राज्ये दुष्करे दुःखसाध्ये त्वां प्रायुङ्क्त एवञ्च सति हे वीर शुचं शोकम्मागाः माकार्षीरित्यर्थः इणोगा लुङि गातिस्थेति सिचोलुक् वत इति खेदे किन्तु भरमम्बु पितुर्नियोगं भभरण इत्यस्मात् ऋदोरप् वह सम्पादय विधौ लोट् एवं वचः रामेण कनीयान् अनुजो भ्राता भरतः आभाषि भाषितः कर्म्मणि लुङ् ब्रुवीत्यर्थग्रहणात् द्विकर्म्मकता अल्पशब्दादीयसुनि युवाल्पयोरित्यादिना कनादेशः ॥ ५१ ॥ ज० म०

अरण्ययान इत्यादि । रामेण कनीयान् भरतोवच आभाषि कथितः ब्रुवेरर्थग्रहणात् याच्ञार्थदुहचीत्यनेन द्विकर्म्मकत्वं गौणे याचादय इति गौणकर्म्मोक्तं अल्पशब्दाद्गुणाद्वेष्टे यस्तू इति ईयसुः युवाल्पौकन्वेति कनादेशः किं तद्वच इत्याह पिता सुकरे सुखसाध्ये अरण्ययाने वनगमने मां प्रायुङ्क्त

कृती श्रुती वृद्धमतेषु धीमां-
स्त्वं पैतृकं चेद्वचनं न कुर्याः ।
विच्छिद्यमानेऽपि कुले परस्य
पुंसः कथं स्यादिह पुत्रकाम्या ॥ ५२ ॥

दुष्करे दुःखसाध्ये राज्ये राजकर्म्मणि त्वां प्रायुङ्क्त नियुक्तवान् युजेर्घ्यां कृधादित्वात् श्रण् युजिरुद्ग्रश्च इति मं नणोन्नेणाविति नादेशः चुडिति कुङ् अपेजन्नोः ईषद्दुःसोःखलिति क्तजः खल् विकारसंघेत्यादिना राज्ञः कर्म्मार्थे ङ्यः मनुवर्ज्जनित्यादिना भावकर्म्मण्यवर्ज्जनात् च्वोर्लोपौ ताविति राज्ञोनस्य लोपः वत खेदे एवं सति हे वीर शुचं शोकं मागाः न लभस्व दृणोगाद्यां भूस्यापिवेति सेर्लुक् अमुं भरं पित्रनियोगरूपं त्वं वह सम्पादय विधौ गौ भरोऽतिशयभारयोरिति कोषः ॥ ५१ ॥ भ०

कृतीत्यादि । वृद्धानां परिष्कृतानां मतेषु श्रुतानि कृतानि चानुष्ठितानि येनेति श्राद्धमतेनेत्यधिकृत्य वृद्धादित्वादिनिः क्तस्येन्विषयस्येति कर्म्मणि सप्तमी स्वमते भावक्तान्तादस्त्यर्थे इन् स त्वमेवंविधः धीमान् पैतृकं पितुरागतं पितुर्य्यञ्चेति चकाराद्दतश्च ञि ईसुसुक्तां तात्कः चेद्यदि वचनं न कुर्याः मध्यमपुरुषैकवचने लिङि रूपम् तदा विच्छिद्यमाने कुले वंशे परस्यापि अन्यस्यापि पुंसः अपिशब्दोभिन्नक्रमः कथं स्यादिह लोके पुत्रकाम्या आत्मनः पुत्रेच्छा नैवेत्यर्थः पुत्रशब्दात्काम्यच्छेति काम्यच् तदन्तादप्रत्ययः टाप् ॥ ५२ ॥ ज० म०

कृतीत्यादि । कृती त्वं पैतृकं पितुरागतं चेद्यदि न कुर्याः न करिष्यसि तदा कुले वंशे विच्छिद्यमानेऽपि परस्य उत्तरकालीनस्य श्रेष्ठस्य अन्यस्य वा पुंसः कथं इह लोके पुत्रकाम्या आत्मनः पुत्रेच्छा स्यात् भवन्तं दृष्ट्वा अग्रिमस्य लोकस्य वचनाकरणेन पुत्रेष्वश्रद्धाप्रसङ्गात् त्वं कथम्भूतः वृद्धमतेषु परिष्कृतमतेषु कृती श्रुती च वृद्धमतानि कृतानि येन स वृद्धमतेषु कृती श्रुती क्तेनाढे इति कर्म्मणि सप्तमी क्तेनाढे इति ज्ञापकात् क्तान्तात् कर्त्तरीन् प्रत्ययो बोध्यः किं वा कृतं करणं अनुष्ठानं श्रुतं श्रवणं कृञ्भ्यां भावे क्तः ततोऽस्त्यर्थे नेकाजादितीन् वृद्धमतेष्विति विषयसप्तमी धीमान् प्रशस्तबुद्धियुक्तः पैतृकमिति पितृशब्दादागतार्थे ढधेकादिति कण् कुर्या इति भव्ये वा फलहेत्वोरिति खौ कुरुब्लोपो इत्युपोलोपश्च पुत्रकाम्येति क्तेः काम्यक् स्वेच्छायामिति काम्यक् संस्त्यादः ॥ ५२ ॥ भ०

अस्माकमुक्तं बहु मन्यसे चे-
द्यदीक्षिषे त्वं न मयि स्थिते च ।
जिह्रेष्यतिष्ठन् यदि तातवाक्ये
जहीहि शङ्कां व्रज शाधि पृथ्वीम् ॥ ५३ ॥
दृढौरसां राज्यधुरां प्रवोढुम्
कथं कनीयानहमुत्सहेय ।

अस्माकमित्यादि । अस्माकमुक्तं अस्मत्सम्बन्धि वचनं यदि बहु मन्यसे आद्रियसे पितृतुल्यो भ्राता अस्यानुमतः कथमेवं न कुर्यामिति यदि च मयि स्थिते नेक्षिषे न प्रभुत्वङ्करोषि प्रभुरस्यमहं त्वदाज्ञाकर इति ईक्षेरदादिकस्य ईक्षः स ईतोऽागमः गुरुवचनमनतिक्रमणीयं विशेषतस्तातवाक्यं तस्मिन्नतिष्ठन् वचनमकुर्वाणः यदि जिह्रेषि लज्जसे स्नौ ह्रिर्वचनं एतन्निश्चित्याह जहीहि शङ्कां त्यज विकल्पम् व्रज गच्छ अयोध्यां शाधि पालय पृथ्वीं जहातेस्चेति हृत्वे विकल्पिते ईहल्यघोरितीत्वम् शासेः शाहाविति शाभावः तस्याभीयत्वेनाशिङ्गत्वात् ङिच्चलभ्योर्हेर्द्धिः ॥ ५३ ॥ ज० म०

अस्माकमित्यादि । अस्माकमुक्तं वचनं चेद्यदि बहु मन्यसे आद्रियसे यदि वा मयि स्थिते त्वं न ईक्षिषे प्रभुत्वं न करोषि तातस्य वाक्ये अतिष्ठन् पितृवचनमकुर्वाणो यदि जिह्रेषि लज्जसे तदा पृथ्वीं शाधि पालय एवं सति मम पितुश्च वचनं कृतं स्यात् अतो व्रज गच्छ अयोध्यां शङ्कां स्वायशोभयं जहीहि त्यज अस्माकमिति ल्यभावक्तेति कर्त्तरि षष्ठी सम्बन्धे इत्यन्ये गौरवे बहुत्वमभिधानात् अहमपि तव पितृतुल्य इति बहुत्वेन बोध्यते उक्तमिति भावे क्तः मन्यौङ् बोधे ईश्वलङ्ऐश्वर्ये सध्वोरस्येमिति द्रम् ह्रीलिलज्जे ओहाक्त्यागे विधौ गौ आद्योरित्यादिना ङौ शासुचलुषासने जह्रोधिशाधीति शाधि ॥ ५३ ॥ भ०

दृढौरसामित्यादि । भरतः प्राह धूर्वहनशीला धूर्नयनशीला इत्यर्थः अनेकार्थात्वाद्धातूनां भ्राजभासेति क्विप् राज्ञोपः इति वलोपः राज्यस्य सम्राज्ञ्य धूर्धात्री प्रकृतिरिति विग्रहेऽकृत्पूरित्यकारप्रत्ययः परवल्लिङ्गमिति धूरिति स्त्रीलिङ्गम् ततष्टाप् कीदृशीं दृढौरसां दृढो ज्येष्ठः औरसः पुत्रो यस्यां उरसा निर्मित इति छन्दसो निर्मित इत्यनुवृत्तौ उरसोऽण्चेत्यण् तां तिष्ठति रामे प्रवोढुं कथमुत्सहेय

मा मां प्रयुङ्क्थाः कुलकीर्त्तिलोपे
प्राह स्म रामं भरतोऽपि धर्म्म्यम् ॥ ५४ ॥
ऊर्ज्जस्वलं हस्तितुरङ्गमेत-
दमूनि रत्नानि च राजभाञ्जि ।

कनीयान् सन् नैवेत्यर्थः शकधृषेत्यादिना वहेः सहावुपपदे तुमुन् गर्हायां लङ्पिजात्वोरित्यनुवृत्तौ विभाषाकथमिलिङ्चेति लिङ् सहेरत्पूर्वस्य आत्मनेपदित्वात् सीयुट् इटोत् लिङः सलोपोनन्त्यस्य अतो मा मां प्रयुक्थाः मा नियोजय माङि लुङ् श्लोभ्यलीति सिचोलोपः कुलकीर्त्तिलोपे लोपयतीति लोपः पचाद्यच् रघुवंशस्य या कीर्त्तिः तस्या लोप इति समासः पूर्वैरनाचरितत्वात् एवञ्च धर्म्म्य धर्म्मादनपेतं भरतोऽपि प्राह स्म उक्तवान् पुनराह ॥५४॥ ज० म०

दृढौरसामित्यादि । रामस्य धर्म्म्यवचनानन्तरं भरतोऽपि धर्म्म्य धर्म्मादनपेतं वचो रामं प्राह स्म प्रोवाच विकारसंघेत्यादिना अनपेतार्थे धर्म्मात् यः किं प्राह स्म इत्याह कनीयानहं अनुजोऽहं राज्यधुरां प्रवोढुं कथं उत्सहेय उत्साहं करिष्यामि कथमाखोचवेति पक्षे खी राज्ञोधुः राजधुरा धुरोऽनङ्सा इति अः स्त्रियामत आप् । धूश्च स्यात् भारचिन्तयोरिति कोषः । कीदृशीं दृढौ ज्येष्ठौरसः पुत्रो यस्यां तां उरसा निर्म्मित इति ढधेकादिति ष्ण्यः ज्येष्ठपुत्रसम्बन्धिनीं राज्यधुरामित्यर्थः वहेश्चतुमि सहवहोदोढोत्योत्वं अतएव कुलकीर्त्तिलोपे धूर्वहे मां मा प्रयुक्था न नियोजय लोपयतीति लोपः पचादित्वादन् यद्वा लोपो नाशः युजेर्माटीवेति टी युजिर उद्गत्र इति मं भसस्त्राञ्भसीति सेर्लुक् मायोगेऽमनिषेधः ॥ ५४ ॥ भ०

ऊर्ज्जेत्यादि । एतद्वस्तितुरङ्गं सेनाङ्गत्वादेकवद्भावः ऊर्ज्जस्वलं बलवत् ऊर्जनमूर्कसम्मदादित्वात् क्विप् सा विद्यते यस्येति ज्योत्स्नातमिस्रेत्यादिना वलच् असुगागमश्च अमूनि च रत्नानि राजभाञ्जि राजगृह्याणि एतच्च राजन्यकं क्षत्रियसमूहः क्षितीन्द्रो राजा अहं त्वयि स्थिते स्वामिति भवामीति श्नान्नलोपेतत् अलीकमेतत् स्वामिति निमन्त्रणे नियोगकरणे लिङ् ॥ ५५ ॥ ज० म०

ऊर्ज्जस्वलमित्यादि । एतदूर्ज्जस्वलं बलवद्वस्तितुरङ्गं अमूनि राजयोग्यानि रत्नानि एतच्च राजन्यकं क्षत्रियसमूहः एवं सर्व्वं निवेद्यात्मानं निराकरोति त्वयि स्थिते अहं क्षितीन्द्रः स्यां भवेयं इत्येतत् वचनं श्नान्नं अलीकं अनुचितमित्यर्थः

राजन्यकं चैतदहं क्षितीन्द्र-
स्त्वयि स्थिते स्यामिति शान्तमेतत् ॥ ५५ ॥
इति निगदितवन्तं राघवस्तं जगाद
व्रज भरत गृहीत्वा पादुके त्वं मदीये ।

अस्तेर्निमन्त्रणे नियोगकरणे प्रार्थने वा खौ जर्ज्जक्जीवने बले त्वामुसिति असजर्ज्जौ विद्यतेऽस्य इति गोत्रणमेधेत्यादिना रजआदित्वाद्दलः हस्तिनश्च तुरङ्गाश्च इति समाहारद्वन्द्वः राजन्यशब्दात् विकारसंधेत्यादिना संघार्थे कण् ॥ ५५ ॥भ०

इतीत्यादि । इति एवं निगदितवन्तं उक्तवन्तं तं भरतं राघवो रामो जगाद उक्तवान् किमित्याह हे भरत मदीये पादुके उपानहौ गृहीत्वा त्वं व्रज गच्छ विधौ लोट् अस्मदस्त्यदादिले त्यदादीनिचेति इदंसंज्ञायां तस्येदमर्थे इदङ्काः प्रत्ययोत्तरपदयोश्चेति मदादेशः ततश्च पूज्यमानोजनौघैर्जनसमूहैः च्युतनिखिलविशङ्कः अपगताशेषविकल्पः सकलभुवनराज्यं सर्वत्र भूमण्डले राज्यङ्कारय अनुष्ठापय पादुके इति योज्यं अस्मन्मतेन अस्माकमभिप्रायेण अत्र मदादेशो न भवति अस्मदोबहुवचनान्तस्य विवक्षितत्वात् तत्र ह्येकवचन इति वर्त्तते ननु कथं मदीय इत्यत्र मदादेशः बहुवचनान्तत्वादिति विरोधः पादुके रामस्यैव तर्ह्यस्मन्मतेन इत्यत्वापि एकवचनं आवयोरामलक्ष्मणयोर्म्मतेनेति षष्ठीसमासे न दोषः ॥ ५६ ॥ ज० म०

इति भट्टिकाव्यटीकायाञ्जयमङ्गलायामकीर्णकाण्डे

रामप्रवासो नाम तृतीयः सर्गः ।

इतीत्यादि । इत्येवं निगदितवन्तं भरतं राघवो रामो जगाद किं जगादेत्याह हे भरत मदीये पादुके गृहीत्वा त्वं व्रज गच्छ अयोध्यामित्यर्थात् विधौ गौ विकारसंघेति इदमर्थे ईयः युष्मदस्मदोरित्यादिनास्मदो मदादेशः च्युतनिखिलविशङ्कः अपगताशेषविशङ्कः जनौघैर्जनसमूहैः पूज्यमानस्त्वं सकलभुवनराज्यं अस्मन्मतेन कारय पादुके इत्यर्थात् किंवा अस्मन्मतेन प्रयोज्यकर्त्रा राज्यं कारय घोऽञोर्जेरिति प्रयोज्यकर्त्तुः पाञ्चिककर्म्मत्वं अत्र साधनहेत्विति तृतीया अस्मन्मतमेव राज्यं करोतु त्वत्क्रियमाणरक्षणेनेति भावः किंवा रामोराज्यमकारयदितिवत् स्वार्थे ञिः चुभ्र्योर्जिरित्यत्र योगविभागात् किंवा हे अस्मन्मते अस्मत्सदृशबुद्धे राज्यं न कारय न घातय अन्यैरित्यर्थः शीघ्रं गत्वा राज्यं

च्युतनिखिलविशङ्कः पूज्यमानो जनौघैः
सकलभुवनराज्यं कारयास्मन्मतेन ॥ ५६ ॥
इति भट्टिकाव्ये प्रकीर्णकाण्डे श्रीरामप्रवासो नाम
तृतीयः सर्गः ॥

रक्षेति भावः कृञ्गिर्हिंसे इत्यस्मात् ज्निः प्रेरणे आवयोः रामलक्ष्मणयोरिव मतिर्यस्य तस्य सम्बोधनं एतेन राज्यरक्षणे राममतितुल्यमतित्वं दर्शितं किंवा अस्मन्मतेन राज्यं कारय ज्ञापय लोकानित्यर्थात् स्वयं अहं राज्यं न करोमि किन्तु रामाज्ञया करोमीति पादुकाग्रहणविनयेन लोकान् ज्ञापय इति भावः कृकडृ विज्ञाने इत्यस्मात् प्रेरणे ज्निः राज्ञोभावः कर्म्म वा राज्यं अस्माकं मतं अस्मन्मतं तेन सीतालक्ष्मणसहितत्वेन बहुत्वविवक्षया न मदादेशः ॥ ५६ ॥भ०

इति भरतसेनकृतायां सुग्धबोधिन्यां प्रकीर्णकाण्डे
रामप्रवासो नाम तृतीयः सर्गः ।

चतुर्थः सर्गः ।

निवृत्ते भरते धीमानत्रेरामस्तपोवनम् ।
प्रपेदे पूजितस्तस्मिन् दण्डकारण्यमीयिवान् ॥ १ ॥
अटाट्यमानोऽरण्यानीं ससीतः सहलक्ष्मणः ।
बलाद्बुभुक्षुणोत्क्षिप्य जह्रे भीमेन रक्षसा ॥ २ ॥

निवृत्ते इत्यादि । धीमान् बुद्धिमान् अत्र स्थिते मयि कदाचिद्भरतः पुनरेष्यतीत्येवम्बुद्धिमानाम्नः अत्रेर्महर्षेस्तपोवनं प्रपेदे गतः तस्मिंश्च तपोवने अर्घ्यपाद्यादिभिः पूजितः दण्डको नाम ऋषिभार्गवकन्यामहरत् तच्छापात्सांशुवर्षेणाक्रान्तः सबन्धुराष्ट्रविनाशो यस्मिन् स्थाने तत्तोपलक्षितं अरण्यमभूत् तदीयिवान् गतवान् उमेयिवानित्यत्र उपसर्गस्यातन्त्रत्वात्के वलादपीणः क्रमुः ॥ १ ॥ ज० म०

निवृत्ते इत्यादि । भरते निवृत्ते सति रामोऽत्रेर्महर्षेस्तपोवनं प्रपेदे गतवान् तत्र वने मुनिभिः पूजितः सन् दण्डकारण्यमीयिवान् गतः इणः क्रमुः वसोर्धसेकाजितीम् खेः क्विति धः यिणोऽन्यणौ दण्डकनाम्नः कस्यचिद्राज्ञोऽपराधेन ब्रह्मशापात् तद्देशे अरण्योत्पत्त्या दण्डकारण्यमिति प्रसिद्धिः ॥ १ ॥ भ०

अटेत्यादि । महदरण्यमरण्यानी इन्द्रवरुणेत्यादिना हिमारण्ययोर्महत्त्वे ङीषानुकौ तां अटाट्यमानः अत्यर्थमटन् रामः स्रुचिस्नुतीत्यादिना यङ् ससीतः सहलक्ष्मणः वोपसर्ज्जनस्येति विकल्पेन सभावः बलात् बलवत्तया जह्रे हृतः गृहीत इत्यर्थः कर्म्मणि लिट् उत्क्षिप्य उत्थाप्य हस्ताभ्यां केनापि रक्षसा वैश्रवणशापात् तुम्बुरुनाम्ना गन्धर्वेण राक्षसीभूतेन विराधाख्येन बुभुक्षुणा भोक्तुमिच्छुना भीमेन भयानकेन भियः षुक् इत्यौणादिकषुगभावपक्षे रूपम् ॥ २ ॥ ज० म०

अटाट्यमान इत्यादि । बुभुक्षुणा भोक्तुमिच्छुना भीमेन भयानकेन रक्षसा राक्षसेन उत्क्षिप्य हस्ताभ्यामुत्थाप्य रामो जह्रे गृहीत इत्यर्थः कर्म्मणि ठौ किम्भूतः सीतया लक्ष्मणेन च सहितो रामः अरण्यानीं महारण्यं अटाट्यमानः पुनःपुनरतिशयेन वा अटन् गच्छन् भूवस्रूनेति यङ् केचित्

अवाक्शिरसमुत्पादं कृतान्तेनापि दुर्दमम् ।
भंक्त्वा भुजौ विराधाख्यं तं तौ भुवि निचखनतुः ॥ ३ ॥
आंहिषातां रघुव्याघ्रौ शरभङ्गाश्रमं ततः ।
अध्यासितं श्रिया ब्राह्म्या शरण्यं शरणैषिणाम् ॥ ४ ॥

गत्यर्थाद्दृलुपेति नियमात् अवापि वक्रताविवक्षेत्याङ्गः तन्मते पथोऽभावात् दृत्तसंयोगेन वक्रं गच्छन्नित्यर्थः महदरण्यं अरण्यानी नारीसखीत्यादिना निपातः सहःसोवेति सहशब्दस्य विकल्पेन सादेशः ॥ २ ॥ भ०

अवागित्यादि । तं विराधाख्यं राक्षसं कृतान्तेनापि यमेनापि दुर्दमं दुःखेन दम्यत इति खल् तौ रामलक्ष्मणौ भुवि निचखनतु निखातवन्तौ कीदृशम् अवाक्शिरसं अधोमस्तकं अवाक् शिरो यस्येति ऊर्ध्वादौ यस्येति उत्पादम् भुजौ भंक्त्वा मोटयित्वा जानतश्चं विभाषेत्यनुनासिकलोपाभावपक्षे रूपम् ॥ २ ॥ ज० म०

अवाक्शिरसमित्यादि । तौ रामलक्ष्मणौ तं विराधाख्यं राक्षसं भुजौ भंक्त्वा भुवि निचखनतुः निखातवन्तौ खनगमित्युङ्लोपः किम्भूतं अवाक्शिरसं अधोमस्तकं ऊर्ध्वौ पादौ यस्येति बहुव्रीहिः कृतान्तेन यमेनापि दुर्दमं दुःखेन दमनीयं दैपदुःसोरिति खल् भंक्त्वेति भनजोऽनिम् इति विभाषितकित्त्वात् पक्षे नलोपाभावः ॥ ३ ॥ भ०

आंहीत्यादि । ततो विराधवधानन्तरं रघुव्याघ्रौ शरभङ्गनाम्नो मुनेराश्रमं आंहिषातां गतवन्तौ अंहेर्लुङि रूपं अध्यासितं आश्रयीकृतं श्रिया लक्ष्म्या ब्राह्म्या ब्रह्मसम्बन्धिन्या ब्रह्मण इयमित्यण् ब्राह्मोजातावितिं निपातनात् टिलोपः टिड्ढाणञित्यादिना ङीप् शरणे अवस्थाने साधु अनुकूलं शरण्यं तत्र साधुरिति यत् शरणैषिणां शरणत्राणमेषितुं शीलं येषाम् ॥४॥ ज०म०

आंहिषातामित्यादि । ततो विराधवधानन्तरं रघुव्याघ्रौ रघुवंशश्रेष्ठौ शरभङ्गनाम्नो मुनेराश्रमं आंहिषातां अहिगतौ टौ ब्राह्म्या ब्रह्मसम्बन्धिन्या श्रिया लक्ष्म्या अध्यासितं आश्रयीकृतं ब्रह्मणो देवस्य विप्रस्य तपसो वा इयमिति ष्णः शरणं त्राणं एषितुं शीलं येषां तेषां शरण्यं शरणेऽवस्थाने त्राणे वा साधु अनुकूलं विकारसंघेति साध्वर्थे यः शरणं वधरक्षितोः शरणं रक्षणे गृहे इति विश्वः ॥ ४ ॥ भ०

पुरो रामस्य जुहवाञ्चकार ज्वलने वपुः ।
शरभङ्गः प्रदिश्यारात् सुतीक्ष्णमुनिकेतनम् ॥ ५ ॥
यूयं समैष्यथेत्यस्मिन्नासिष्महि वयं वने ।
दृष्टास्थ स्वस्ति वो यामः स्वपुण्यविजितां गतिम् ॥ ६ ॥

पुर इत्यादि । शरभङ्गो रामस्य पुरः अग्रतः वपुः शरीरं ज्वलने अग्नौ जुहवाञ्चकार कृत्वात्मस्य भोक्तृभ्रुवामिति आम् आमिसुभावे द्विर्वचनम् किं कृत्वेत्याह प्रदिश्य कथयित्वा किं आरात्समीपे सुतीक्ष्णनाम्नो मुनेः केतनं आश्रमम् तत्र वासमुपकल्पयेति तत्र किमर्थमत्रावस्थानमिति चेदाह ॥५॥ ज० म०

पुर इत्यादि । शरभङ्ग आरात् समीपे सुतीक्ष्णनाम्नोमुनेः केतनं आश्रमं प्रदिश्य तत्र वासं कल्पयेति कथयित्वा रामस्य पुरोऽग्रतः ज्वलनेऽग्नौ वपुः शरीरं जुहवाञ्चकार हुतवान् पशाम् वाभीक्ष्णीति पशाम् शित्वाद्गत्वे ह्वादीरेद्विः भूस्कन्नामः प्रक्षेपमात्रस्य धात्वर्थस्य विवक्षितत्वात् ज्वलन इत्यस्य हामलब्धत्वात् वैयर्थ्यं न वाच्यम् ॥ ५ ॥ भ०

यूयमित्यादि । अपि नाम यूयं समैष्यथ आगमिष्यथ आङ्पूर्वः इण् आगमने वर्त्तते एष्येधत्यूट्स्विति इट्डिः इत्यस्मात्कारणात् अस्मिन्वने वयमासिष्महि स्थिताः आसेर्लुङि रूपम् अस्मदादयोरेति चकारस्यानुक्तसमुच्चयत्वादेकत्वे बहुवचनम् अस्मदागमने किन्ते फलमिति चेदाह दृष्टास्थ अधुना दृष्टा भवथ अस्तेर्मध्यमपुरुषबहुवचने असोरल्लोप इत्यकारलोपः । स्वस्ति कल्याणं वः युष्मभ्यम् नमःस्वस्तीत्यादिना चतुर्थी बहुवचनस्य वस्नसौ स्वपुण्येन विजितां लब्धां गतिं ब्रह्म यामः व्रजामः रामरूपेण विष्णुरवतीर्णः तं दृष्ट्वा यास्याम इत्यत्र वयं स्थिता इति ॥ ६ ॥ ज० म०

यूयमित्यादि । न केवलं सुतीक्ष्णमुनिकेतनं प्रदिश्य एतदपि प्रदिश्येति योज्यं यूयं समैष्यथ समागमिष्यथ इति हेतोरस्मिन् वने वयमासिष्महि आङ्पूर्वः इण् आगमने वर्त्तते आसेर्ह्यांसिः वयमिति एकत्वेऽपि बहुत्वविवक्षा परे तु एकत्वे वा बहुत्वमस्मदोऽविशेषेण इत्याहुः यूयं दृष्टाः स्थ लोपोऽस्यसोरित्यकारलोपः स्वस्ति वः कल्याणं युष्मभ्यं भक्त्यर्थवषडित्यादिना चतुर्थी द्वीचीयोणामित्यादिना वसादेशः वयं स्वपुण्येन विजितां लब्धां गतिं यामो गच्छामः विष्णुरूपे त्वयि दृष्टे शोभना गतिर्भविष्यतीत्याशया एतावन्तं कालं तिष्ठाम इति भावः ॥ ६ ॥ भ०

तस्मिन् क्रशानुसाङ्गते सुतीक्ष्णमुनिसन्निधौ ।
उवास पर्णशालायां भ्रमन्ननिशमाश्रमान् ॥ ७ ॥
वनेषु वासतेयेषु निवसन् पर्णसंस्तरः ।
शय्योत्थायं मृगान् विध्यन्नातिथेयो विचक्रमे ॥ ८ ॥

तस्मिन्नित्यादि । तस्मिन् शरभङ्गे क्रशानुसाद्भूते कात्स्न्र्येनाग्नीभूते किंभाषा सातिकात्स्न्र्ये इति सातिः रामः सुतीक्ष्णस्य मुनेः सन्निधौ समीपे पर्णशालायां पर्णकुट्यामुवास उषितवान् तत्र कृताधिवासस्य वृत्तिमाह भ्रमन्ननिशमाश्रमान् पर्य्यटन् सदा तपोवनानि मुनीनुपासितुम् ॥ ७ ॥ ज० म०

तस्मिन्नित्यादि । तस्मिन् शरभङ्गे क्रशानुसाङ्गते कात्स्न्र्येनाग्नीभूते सति रामः सुतीक्ष्णमुनेः सन्निधौ समीपे पर्णशालायां पर्णकुट्यां उवास वसैऔनिवासे ठौ व्यथयहेति जिः कात्स्न्र्यायत्योरिति चसात् क्त्रिलादित्यादौ साद्वर्ज्जनात् न सत्वं अनिशं निरन्तरं आश्रमान् भ्रमन् पर्य्यटन् अर्थान्मुनीनुपासितुम् ॥७॥ भ०

वनेष्वित्यादि । वासतेयेषु वसतौ साधुषु पथ्यतिथीत्यादिना ढञ् निवसन् शयानः संस्तीर्य्यत इति संस्तर ऋदोरप् पर्णानि संस्तरो यस्येति पर्णसंस्तरः शय्योत्थायं शय्याया उत्थाय उत्पूर्व्वात्तिष्ठतेरपादाने परीप्सायामिति णमुल् शय्यते अस्यामिति शय्या संज्ञायामित्यादिना क्यप् । त्वरया सुखधावनादीन्यपि न कृत्वा मृगान्विध्यन् ताड़यन् यष्टिज्यादिना सम्भरणम् तत्रापि नात्मार्थं लुब्ध इत्याह आतिथेयः अतिथौ साधुः पूर्ववत् ढञ् विचक्रमे विहरति स्म वेः पादविहरण इति तङ् ॥ ८ ॥ ज० म०

वनेष्वित्यादि । वासतेयेषु वसतौ निवासे रात्रौ वा साधुषु वनेषु निवसन् वासं कुर्व्वन् शयानोवा पर्णसंस्तरः पत्ररचितशय्यः सन् शय्योत्थायं शय्यायास्त्वरया उत्थाय मृगान् विध्यन् ताड़यन् विचक्रमे विहरति स्म तत्रापि नात्मार्थं बध इत्याह आतिथेय अतिथौ साधुः ढकेकादिति वसत्यतिथिभ्यां साध्वर्थे ण्ये ययोर्लोपइतीकारलोपः शय्योत्थायमित्यभिधानात् पञ्चम्यन्तात् त्वरायां क्षणम् किम्वा शय्याया उत्थानं यस्मै इति मृगवेधनक्रियाविशेषणं एतेन शयनोचितकालेऽपि मृगताड़ननिमित्तं शय्योत्थानं गम्यते तेन च सुतरां त्वरापि अस्मिन् पक्षे भावे घञ् यनञ्क्षिणदिति यन् उदः सःस्थास्तम्भोरिति सलोपः शेरतेऽस्यामिति शय्या शीव्रजयजेति क्यप् शीङोऽय्येऽणौ व्यधौताडे शल्टः शल्हस्पाद्योरिति जिः वेःपद्भिरिति विपूर्व्वात् क्रमो मं ॥ ८ ॥ भ०

ऋग्यजुषमधीयानान् सामन्यांश्च समर्चयन् ।
बुभुजे देवसात्कृत्वा शूल्यमुख्यञ्च होमवान् ॥ ९ ॥
वसानस्तन्वकनिभे सर्व्वाङ्गीने तरुत्वचौ ।
काण्डीरः खाङ्गिकः शार्ङ्गी रक्षन् विप्रांस्तनुत्ववान् ॥ १० ॥

ऋग्यजुषमित्यादि । ऋक्च यजुश्च ऋग्यजुषम् अचतुरेत्यादिना निपातितम् इन्द्राबृदषहान्तात्समाहारे उच् ऋग्वेदं यजुर्वेदञ्च अधीयानान् पठतः इङोऽधिपूर्व्वस्य लटि शानचि रूपम् नलोकेति षष्ठीप्रतिषेधः सामन्यांश्च सामसु साधून् द्विजान् तत्र साधुरिति यत् येचाभावकर्म्मणोरिति प्रकृतिभावः समर्चयन् पूजयन् शूल्यमुख्यञ्च मांसम्बुभुजे भुक्तवान् शूले उखायाञ्च स्थाल्यां संस्कृतम् शूलोखाद्यत् भुजोऽशन इति तद् किङ्कृत्वा देवसात्कृत्वा देवेभ्यो दत्वा तदधीनङ्कृत्वा देयेत्वाचेति चकारात्सातिश्च होमवान् होमो विद्यते यस्येति क्रताग्निकार्य्य इत्यर्थः ॥ ९ ॥ ज०म०

ऋग्यजुषमित्यादि । ऋग्यजुषं ऋग्वेदं यजुर्वेदञ्च अधीयानान् पठतो मुनीन् सामन्यान् सामवेदकुशलांश्च समर्चयन् सम्यक् पूजयन् शूल्यं शूलपाचितं उख्यं स्थालीसंस्कृतं च मांसं देवसात्कृत्वा देवाय देयं कृत्वा बुभुजे भुजोऽशने इति सं होमवान् क्रताग्निकार्य्यः नित्यं होमो विद्यतेऽस्येति मोऽमभूपादिति वतुः ऋक्च यजुश्चेति चैक्याद्बृदसहोरिति अः अधीङ्लध्ययने शानः अध्वोरितीयः सामशब्दात् ढक्येकादिति साध्वर्थे ण्यः मनुवर्ज्जलादिना नलोपाभावः अर्चृक् पूजे चुरादिर्ज्ञन्तात् शतः देवशब्दात् देयेत्वाङ्गेति चकारात् चसात् ढक्येकादिति शूलोखाभ्यां तत्र संस्कृतेऽर्थे यः ॥ ९ ॥ भ०

वसान इत्यादि । असौ रामो वनेष्वानभ्र भ्रान्तवानिति वक्ष्यमाणेन श्लोकेन सम्बन्धः वसानः परिदधानः वस आच्छादने इत्यस्मात् शानच् तरुत्वचौ वल्कले प्रत्यग्रे तन्वकः तन्वादचिरापहृत इति कन् तन्निभे तत्तुल्ये सर्व्वाङ्गीणे सर्व्वाङ्गाणि व्याप्नुवत्यौ तत्सर्व्वेत्यादिना खः काण्डीरः काण्डोऽस्यास्तीति काण्डाण्डादीरन्नीरचौ खङ्गिकः खङ्गोऽस्यास्तीति अतइनि ठनौ खाङ्गिक इतिपाठान्तरम् तत्र खङ्गः प्रहरणमस्येति तदस्य प्रहरणमिति ठक् शार्ङ्गी सधनुः तनुत्ववान् तनुं शरीरन्त्रायत इति तनुत्रम् आतोऽनुपसर्गे कः संसर्गे मतुप् पिनद्धकवच इत्यर्थः स एवम्विधो विप्रान् ब्राह्मणान् रक्षन् ॥ १० ॥ ज० म०

वसान इत्यादि । असौ रामो वनेष्वानभ्र इति वक्ष्यमाणश्लोकेनान्वयः

हित्वाश्रितङ्गवीनानि फलैर्येष्वाश्रितम्भवम् ।
तेष्वसौ दन्दशूकारिर्व्वनेष्वानभ्र निर्भयः ॥ ११ ॥
व्रातीनव्यालदीप्राक्षः सुवनः परिपूजयन् ।
परिषद्वलान्महाब्रह्मौराट नैकटिकाश्रमान् ॥ १२ ॥

कीडगः तरुत्वचौ वसानः परिदधानः वसलङ्कृतौ यानः कीदृश्यौ तन्त्रकनिभे नूतनवस्त्रतुल्ये तन्त्रात् पटोपकरणात् अचिरोद्भूतं वस्त्रं तन्त्रकं ढधेकादिति विकारसंधेत्यादिना आदिग्रब्दात् अचिरोद्भूतार्थे तन्त्रशब्दात् कः तन्त्रकञ्च नवाम्बरे इत्यमरः सर्व्वाङ्गीणे सर्व्वाङ्गं व्याप्नुवत्यौ ढधेकादिति तद्व्याप्नोतीत्यर्थे ईनः कारणीरः प्रशस्तकारण्युक्तः गोदण्डमेधेत्यादिना अस्त्यर्थे ईरः खाङ्गिकः खड्गेन युध्यतेऽसाविति ढधेकादिति ष्णिकः शार्ङ्गी शृङ्गस्य विकारः शार्ङ्गं धनुः विकारसंधेति ष्णः शार्ङ्गं विद्यतेऽस्येति नैकाजादिति इन् तनुं शरीरं त्रायते इति तनुत्रं कवचं हनजनादिति डः तद्युक्तः एवम्भूतः सन् विप्रान् रक्षन् ॥ १० ॥ भ०

हित्वेत्यादि । आश्रितास्तृप्ता गावो येषु भवन्ति तृणप्रायत्वात् अषडक्षादिस्तृत्वेण खः पूर्व्वपदस्य च मान्तत्वन्निपात्यते तान्यरण्यानि हित्वा येषु वनेषु फलैराश्रितम्भवमाश्रितस्य भवनन्तृप्तिर्व्वर्त्तते आश्रिते भव इत्यादिना भावे खच् तेष्वानभ्र अभ्रवर्त्मेति गत्यर्थो धातुः लिटि अत आदेरिति दीर्घे तस्मान्नुडद्विहल इति नुट् दन्दशूकारिः व्यालानां हन्ता लुपसदेत्यादिना दंशेर्यङ् तदन्ताद्यजजपेत्यादिना अकः ॥ ११ ॥ ज० भ०

हित्वेत्यादि । आश्रितङ्गवीनानि वनानि हित्वा त्यक्त्वा तेषु वनेषु असौ आनभ्र भ्रमति स्म अभ्रगत्यां ठौ स्थान्नादिति खेरान् आश्रितास्तृप्ता गावो यत्र तदाश्रितयु आङ्पूर्व्वोऽश्नातिस्तृप्त्यर्थः परे तु तृप्त्यर्थेऽश्रितस्यादौ दीर्घ इत्याहुः ततः स्वार्थे ईनः मकारागमो निपातनात् गोदण्डप्रा तृणबाहुल्यात्तत्त्यागः केचित्त्याहु येषु च फलैराश्रितम्भवं आश्रितेन तृप्तेन भूयते भावयेत्वाश्रिताङ्गव इति स्वः दन्दशूकानां व्यालानामरिर्हन्ता निर्भयो भयरहितः ॥ ११ ॥ भ०

व्रातीनेत्यादि । तेषु वनेषु भ्रमन् नैकटिकाश्रमानाट गतवान् अटेरभ्यासस्यात आदेरिति दीर्घत्वं ग्रामस्यान्तिके क्रोशमात्रन्त्यक्त्वा यतयो भिक्षवो ये निवसन्ति ते नैकटिकाः निकटे वसतीति ठक् तेषामाश्रमांस्तपोवनानि कीदृशः व्रातीनव्यालदीप्राक्षः नानाजातीयाः अनियतदृक्तयः शरीरमायास्य ये जीवन्ति ते व्रातास्तेषां यत्कर्म्म तदपि व्रातन्तेन जीवन्ति इति व्रातीनाः व्रातेन जीव-

परेद्यव्यद्य पूर्व्वेद्युरन्येद्युश्चापि चिन्तयन् ।
दृद्विच्चयौ मुनीन्द्राणां प्रियम्भावुकतामगात् ॥ १२ ॥

तीति खञ् तेषां व्याला हिंस्राः उपघातकाः तेषु दीप्राख्यः ज्वलदायुधः सम्प्रतीति योगविभागात्सः सुत्वनः सुतवतः परिपूजयन् सोमपायिन इत्यर्थः सुयजोर्ङ्वनिप् तुक् नसंयोगादित्यत्लोपोन पर्षद्वलानिति पर्षत्त्वेहने अस्मात्पर्षते स्निह्यतीति ग्रहणसोदिरित्वत्र पर्षर्वाच्छलकादौणादिकोदिः पर्षत् तत्र यदि रजःकथासुतिपर्षदोवलजिति तदा पर्ष्णत् विद्यते येषां सुत्वनामिति वलच् अत्र परिषीदतीति परिषत् क्विबन्तोयदा परिषदस्येषा गुणग्राहिणी तदा परिषद्वलं सहायो येषामिति बहुव्रीहिः महाब्रह्मैर्महाब्राह्मणैः कुमहद्ब्रह्मग्रामन्यतरस्यामिति टच् तैः सहाट ॥ १२ ॥ ज० भ०

व्रातीनेत्यादि । रामो नैकटिकाश्रमान् आट अटगतौ ठी निकटे वर्त्तन्ति नैकटिका ढधेकादिति ष्ठिकः तेषां मुनीनामाश्रमान् तपोवनानि किम्भूतः नानाजातीया अनियतदृत्तयः शरीरक्लेशेन ये जीवन्ति ते व्रातास्तेषां यत् कर्म्म तदपि व्रातमिति रूढं तेन जीवन्तीति व्रातीनाः पूर्ब्ववदीनः तेषां मध्ये ये व्याला उपघातकास्तेषु दीप्राणि अस्त्राणि यस्य स तथा । व्यालोभुजङ्गमे क्रूरे श्वापदे दुष्टदन्तिनीति विश्वः । सुत्वनः सोमपान् परिपूजयन् षुञ्अभिषवे त्वासुसिति क्तनिप् खस्यतनपितीति तन् आश्रमान् कीदृशान् महाब्रह्मैर्महद्भिः ब्रह्मभिर्ब्राह्मणैः परिषद्वलान् सभायुक्तान् देशाद्ब्रह्मणः कुमहद्ब्रह्मग्रामंतुवेति षः परिषीदन्त्यत्रेति क्विप् परिषत् सभा गोत्रणेत्यादिना रज आदित्वाद्वलः नवाचरपादस्थापीष्टत्वात् न चात्र श्लोके छन्दोभङ्गः पर्षद्वलानिति पाठे पर्य्युपसर्गस्य दकारलोपो निपातनात् । आस्थानंसंसदास्थानीपर्षत् परिषदौसमे इति रभसः । केचित्तु ब्राह्मणवाचके महच्छब्दविशेषणस्य विरुद्धार्थत्वात् महाब्रह्मैर्महातपोभिरुपलक्षितान् सुत्वनः विशेषणे तृतीया नच देशाद्ब्रह्मण इति सूत्रे ब्राह्मणवाचको ब्रह्मशब्द इति नियम इत्याहुः ॥ १२ ॥ भ०

परेद्यवीत्यादि । परेद्यवि परस्मिन् आगामिनि दिवसे इत्यर्थः अद्यैतस्मिन्नहनि पूर्ब्वेद्युः पूर्ब्वस्मिन्नहनि अन्येद्युरन्यस्मिन्नहनि चिरातिक्रान्ते चिरागामिनि दिवसे परेद्यवीत्यादिषु दिवसेषु मुनीन्द्राणां दृद्विच्चयौ उदयापचयौ चिन्तयन् प्रियम्भावुकताम्पूर्ब्वम्प्रियाभावनियुक्तत्वादतथाभूतः सन् प्रियो भवतीति प्रियम्भावुकः आदरासुभगेत्यधिकृत्य कर्त्तरि भुवः खिष्णुच्खुकञाविति

आतिष्ठदु जपन् सन्ध्यां प्रक्रान्तामायतीगवम् ।
प्रातस्तरां पतत्रिभ्यः प्रबुद्धः प्रणमन् रविम् ॥ १४ ॥ युग्मकम् ।

खुकञ् तद्भावः तामगात् गतः अर्थान्मुनीन्द्राणामेव परेद्यव्यद्यादयः शब्दाः सद्यः परुदित्यादिना निपातिताः ॥ १३ ॥ ज० म०

परेद्यवीत्यादि । परेद्यवि परस्मिन्नहनि पूर्व्वेद्युः पूर्व्वस्मिन्नहनि अन्येद्युः अन्यस्मिन्नहनि च मुनीन्द्राणां वृद्धिक्षयौ धनशरीरादिगतोपचयापचयौ चिन्तयन् स्मरन् रामः प्रियम्भावुकतां अगात् प्राप्तवान् अप्रियोऽपि प्रियोभवतीति भुवोषेखिष्णुखुकञाविति भ्वर्थे खुकञ् परेद्यवि अद्यचेति कुतःकुतश्च इत्यादिना निपातनात् पूर्व्वान्यान्यतरेति पूर्व्वान्याभ्यां एद्युस् ॥ १३ ॥ भ०

आतीत्यादि । जपन्मन्त्रमिति सामर्थ्यलभ्यं सन्ध्याकालोधिकरणत्वे नात्यन्तसंयोगे द्वितीया सन्ध्यमध्यायन्त्यस्यामिति आतश्चोपसर्गे इत्यङ् किमवधिं सन्ध्यामित्याह प्रक्रान्तामायतीगवम् आयत्यः आयान्त्यो भवन्ति यस्मिन् काले गावः अस्मिन्नायतीगवं तिष्ठदुप्रभृतीनि चेत्यव्ययीभावसमासत्वात्साधुः नाव्ययीभावादिति यस्मिन् काले सम्प्रत्या अस्मभावः आङ्पूर्व्वादिणः शतरि इणोयणिति यणि ङीपि च रूपं आयतीति गावोऽपि गोचरात् गोष्ठमायान्ति दिवसस्यार्द्धनाडिकावशेषे सन्ध्यापि तदेव प्रवर्त्तते कियन्मेवञ्चपन्नित्याह आतिष्ठदु इति तिष्ठन्ति गावो यस्मिन् काले दोहाय गावोहि रात्रिप्रथमयामस्य नाडिकायामतीतायां विश्रान्ताः सत्यः उत्थाप्य दुह्यन्ते आतिष्ठदित्याङ् मर्य्यादाभिविध्योरित्यव्ययीभावः तिष्ठदुप्रभृतीनि चेति चकारस्यानुक्तसमुच्चयार्थत्वादव्ययीभाव एव पुनः समासान्तरञ्च भवति प्रातस्तरामिति प्रातरित्यव्ययमभातवाचि प्रकर्षविवक्षायान्तरप् तदन्तात्किमेतेत्यादिना आम् अतिप्रभाते पतत्रिभ्यः कुक्कुटादिभ्यः प्रथममप्रबुद्ध उत्थितः पञ्चमीविभक्ते इति पञ्चमी रविमादित्यमणमन् यदा चरति तदा प्रियम्भावुकतामगादिति पूर्व्वेण योज्यम् ॥ १४ ॥ ज० म०

आतिष्ठदित्यादि । प्रियम्भावुकतां अगादिति पूर्व्वेणान्वयः तिष्ठन्ति स्थिरीभवन्ति गावो यस्मिन् स तिष्ठदुः कालः रात्रेः प्रथमनाडिका तत्र हि विश्रान्ता गावः पश्चादुत्थाप्य दुह्यन्ते आयन्ति गोष्ठं गावो यस्मिन् काले स आयतीगवः कालः अर्द्धास्तमितभास्करः प्रायशस्तत्रैव गवानयनात् आङ्पूर्व्वादिणः शतरि तिष्ठद्गवायतीगवशब्दौ कालेऽव्ययीभावे निपातितौ आयतीगवकाले प्रक्रान्तां आरब्धां सन्ध्यां व्याप्य तिष्ठदुकालं यावत् जपन् अर्थान्मन्त्रं अन्यारभ्येत्यादिना आङ्ये गे पञ्चमी लुक्परादित्यादिना पञ्चम्या लुक् सन्ध्यामिति सदाध्वादीति

ददृशे पर्णशालायां राक्षस्याभीकयाथ सः ।
भार्य्यौढं तमवज्ञाय तस्थे सौमित्रयेऽसकौ ॥ १५ ॥
दधाना बलिभं मध्यं कर्णजाहविलोचना ।
वाक्त्वचेनातिसर्व्वेण चन्द्रलेखेव पञ्चतौ ॥ १६ ॥

द्वितीया आयतीगवमिति त्रीप्रोर्व्वेति सप्तम्यामः प्रातस्तरामिति प्रभाते पतत्रिभ्यः कुक्कुटादिभ्योऽपि प्रबुद्धोऽधिकप्रबोधवान् तेभ्योऽपि प्रागुत्थितः सन् रविं प्रणमन् अधिकभावविवक्षायां पञ्चमी अभिधानात् प्रबुद्धशब्देभ्यः प्रबुद्ध इत्यन्ये किमेव्याङ्चेति चतरां ॥ १४ ॥ भ०

ददृश इत्यादि । पर्णानां शालायां स्थितः स रामः राक्षस्या ददृशे दृष्टः कीदृश्या अभीकया कामुक्या अनुकाभिकेत्यादिना निपातितः दृशेः कर्म्मणि लिट् अथ दर्शनानन्तरमभार्य्यौढं जढभार्य्यमूढा भार्य्या यस्येति आहिताग्न्यादिषु दर्शनात् निष्ठान्तस्य परनिपातः अवज्ञाय अनादृत्य सद्भार्य्यत्वात् असकौ राक्षसी पापासौ कुत्सायामव्ययसर्व्वनाम्नामकच् सौमित्रये लक्ष्मणाय श्राघन्ङित्यादिना सम्प्रदानसंज्ञा तस्थे स्वाभिप्रायमैथुनायाविष्कृतवती प्रकाशनस्थेयाख्ययोश्चेति प्रकाशने तङ् ॥ १५ ॥ ज० म०

ददृश इत्यादि । अभीकया कामुक्या राक्षस्या सूर्पणखया पर्णशालायां स रामो ददृशे कर्म्मणि ठी अथ दर्शनानन्तरं भार्य्यौढं कृतविवाहं तं रामं अवज्ञाय सभार्य्यत्वादनादृत्य असकौ राक्षसी सौमित्रये लक्ष्मणाय तस्थे स्वस्थित्या मैथुनाभिप्रायं प्रकाशयामास इत्यर्थः प्रतिज्ञानिर्णयप्रकाश इति मं यस्मैदित्येत्यादिना चतुर्थी असकाविति त्यादिव्यासेत्यादिना ऽदसष्टेः पूर्व्वोऽक् परमते अविज्ञाता निन्दिता वा असौ असकौ तथाच । कृपायां निन्द्नेऽज्ञाने नीतौ दानेन मानिते । प्रायोऽगन्त्यस्वरात् पूर्व्वः सर्व्वनामतिङव्ययादिति । जढा भार्य्या येन स तथा अग्न्याहितादित्वात् पक्षे परनिपातः ॥ १५ ॥ भ०

दधानेत्यादि । सा तस्मार्थयाङ्चक्रइति वक्ष्यमाणेन सम्बन्धः कीदृशी मध्यं स्तनजघनयोरन्तरं बलिभंबलयोऽस्मिन् सन्तीति तुन्दिबलिवटेर्भः दधाना धारयन्ती कर्णजाहविलोचना कर्णजाहङ्कर्णमूलसमीपमित्यर्थः तस्य पाकमूलइत्यादिना जाहच् कर्णजाहयोर्विश्राम्ने विलोचने यस्या इहि सप्तम्युपमानेत्यादिना उपपदलोपी बहुव्रीहिः वाक्त्वचेन वाक्च त्वक्चेति प्राण्यङ्गत्वादेकवद्भावः ह्रस्वाद्वुदक्षहान्तादिति टच् अतिसर्व्वेण अतिक्रान्तेन सर्व्वम् अत्यादयइति सः

सुपाद् द्विरदनासोरूर्मृदुपाणितलाङ्गुलिः ।
प्रथिमानं दधानेन जघनेन घनेन सा ॥ १७ ॥
उन्नसं दधती वक्त्रं शुद्वदल्लोलकुण्डलम् ।
कुर्व्वाणा पश्यतां मृगयून् स्रग्विणी सुहसानना ॥ १८ ॥ कलापकम् ।

एकविभक्तिचापूर्व्वेनिपात इति सर्व्वशब्दस्योपसर्जनत्वेऽपि पूर्व्वनिपातो न भवति अपूर्व्वनिपात इति प्रतिषेधात् वाक्त्वचेन वाङ्मुखेन माधुर्य्येण मार्दवेन चासाधारणेनोपलक्षितेनेत्यर्थः इत्थम्भूते तृतीया चन्द्रलेखेव पक्षतौ तनुत्वात् पक्षोऽर्द्धमासः तस्य मूले प्रतिपदि पक्षात्तिः ॥ १६ ॥ ज० म०

दधानेत्यादि । सा तं प्रार्थयाञ्चक्रे इति चतुर्थश्लोकेनान्वयः बलिभं बलियुक्तं मध्यं दधाना गोहणमेधेत्यादिनेभः कर्णस्य मूलं कर्णजाहः तत्र विलोचनं यस्याः सा तथा कर्णान्तायतनेत्रेत्यर्थः अतिसर्व्वेण माधुर्य्यसौन्दर्य्याभ्यां सर्व्वमतिक्रान्तेन वाक्त्वचेन उपलक्षिता वाक्च त्वक्च इति द्वन्द्वे चैक्याच्छुद्धहोऽइत्यः विशेषणे तृतीया पक्षतौ पक्षमूले प्रतिपदि चन्द्रलेखेव दृष्टुं सुष्ठुत्वात् ॥ १६ ॥ भ०

सुपादित्यादि । शोभनौ पादौ यस्याः असौ सुपात् सङ्ख्यासुपूर्व्वस्येति पादान्तलोपः पादोऽन्यतरस्यामिति यदा ङीप् नास्ति तदेत्थं रूपम् द्विरदनासोरूर्द्विरदनासे इव करिपोतकरा इव ऊरू यस्याः उपमानपूर्व्वोबहुव्रीहिः ऊरुत्तरपदादौपम्य इति ऊङ् रद्यते अनेनेति रदः दन्तः पुंसिसंज्ञायाङ्गः करणे द्वौ रदौ यस्येति द्विरदः मृदुपाणितलाङ्गुलिः तलञ्च अङ्गुलिश्चेति द्वन्द्वः तत्र घ्यन्तात्यात्तरयोः अल्पाच्तरस्य पूर्व्वनिपातः पाणितलाङ्गुलिः पाणितलाङ्गुलिः मृदुः पाणितलाङ्गुलिर्यस्या इति योज्यं प्रथिमानम्प्रथुतान्दधानेन धारयता घनेन उपचितेन जघनेनोपलक्षिता सा रात्रसी ॥ १७ ॥ ज० म०

सुपादित्यादि । शोभनौ पादौ यस्याः सा संख्यासुपमानादिति पादस्य पाद्भावः द्विरदनासेव हस्तिशुण्डेव ऊरू यस्याः सा तथा वामलक्ष्मणेत्यादिना ऊप् मृदु पाणितलाङ्गुलिश्च यस्याः सा तथा ये तु अल्पाचः पूर्व्वनिपातं तथा प्राण्यङ्गत्वे समाहारं वदन्ति तन्मते प्रथमं तलाङ्गुलिशब्दयोः समाहारद्वन्द्वः तदनु पाणिना सह षष्ठीसमासः तदनु मृदुना बहुव्रीहिः प्रथिमानं महत्त्वं दधानेन निबिडेन जघनेनोपलक्षिता । पश्चान्नितम्बः स्त्रीकट्याः क्लीबे तु जघनं श्रोणी इत्यमरः ॥ १७ ॥ भ०

उन्नसमित्यादि । उच्यते अनेनेति वक्त्रम् सर्व्वधातुभ्य ष्ट्रनिति ष्ट्रन् तत्र

प्राप्य चञ्चूर्य्यमाणासौ पतीयन्ती रघूत्तमम् ।
अनुका प्रार्थयाञ्चक्रे प्रियाकर्त्तुं प्रियंवदा ॥ १९ ॥

दीर्घः पतीयन्ती आत्मनः प्रतिमिच्छन्ती क्यः स्वाद्यर्थेति क्यः घोऽङ्यरे इति वक्त्रशब्दो मुखैकदेशे वर्त्तमानोऽपि कविभिः समुदाये प्रयुज्यते वक्त्रमुखसन्नसन्धतौ नाभ्यस्ताच्छतुरिति नुम् न भवति उन्नता नासिका यस्मिन्निति अजनासिकायाः संज्ञायामसञ्ज्ञेत्यधिकृत्य उपसर्गाच्चेत्यच् नासिका च नसादेशमापद्यते शुद्वदन् शुद्वाः शुक्ला दन्ता यस्मिंस्तच्छुद्वदत् अयान्तशुद्वेत्यादिना दन्तादेशः लोले चञ्चले कुण्डले यस्मिन् तत् लोलकुण्डलं पश्यतो जनान् शंयून् विद्यमानसुखान् कुर्व्वाणा शं सुखन्तदस्यास्तीति कंशम्भ्यांयभ्युस्तुंतयस इति युप् सित्वात्पदसंज्ञा अनुस्वारः अपश्यतो वा शंयून् कुर्व्वाणा पश्यतान्तु पीडाकरी स्वग्विणी मालावती अस्मायेत्यादिना विनिः सुहसानना हसनं हसः सनहसोर्वेत्यप् शोभनहसनमाननं यस्याः सा ॥ १८ ॥ ज० म०

उन्नसमित्यादि । ऊर्द्धनासिकं वक्त्रं मुखं दधती उपसर्गान्नासिकाया नसादेशो बहुव्रीहाविति परे खमते नसाशब्दस्य रूपं तथाच रभसः लपनं वदनं तुण्डमाननं नासिका नसा । नसा नासा च नासिकेति कोषान्तरं । उच्यते अनेनेति वक्त्रं त्वासुसिति त्रः वक्त्रं कोडयं शुद्वदन् शुद्वा दन्ता यस्येति दन्तस्य दशादेश इति परे खमते दत्शब्दोऽस्ति लोले चञ्चले कुण्डले यत्र मुखे तत्तथा सा किम्भूता पश्यतो जनान् शंयून् सुखिनः कुर्व्वाणा शंकंभ्यांयुतुतुतिवभा इति अस्त्यर्थे युः स्वग्विणी मालावती स्वङ्गेधाप्रमायाद्विन्वेति अस्त्यर्थे विन् शोभनो हसो यत्र तादृशमाननं यस्याः सा तथा ॥ १८ ॥ भ०

प्राप्येत्यादि । प्राप्य टौकित्वा चञ्चूर्य्यमाणा गर्हितमाचरन्ती प्राणिनो हन्तव्या इति चरेर्लुपसदेत्यादिना भावगर्हायां यङ् चरफलोश्चेत्यभ्यासस्य लुक् उत्वरत्वात् दत्वत्वम् हलिचेति दीर्घत्वं पतीयन्ती आत्मनः पतिमिच्छन्ती सुप आत्मनः क्यच् अनुका अभिलाषुका अनुकेत्यादिना निपातितः रघूत्तमं लक्ष्मणमार्थयाञ्चक्रे प्रार्थितवती प्रियाकर्त्तुमनुलोमयितुं पतिमं स्याद्इति सुखप्रियादानुलोम्य इति डाच् । प्रार्थनामाह ॥ १९ ॥ ज० म०

प्राप्येत्यादि । असौ राक्षसी रघूत्तमं लक्ष्मणं प्राप्य प्रियाकर्त्तुं प्रार्थयाञ्चक्रे प्रार्थितवती किं कुर्व्वती चंचूर्य्यमाणा गर्हितं पुनः पुनश्चरन्ती गत्यर्थात् गलुपसदचरेति गर्हार्थे यङ् चरफलोश्चोडोनुरिति खेर्नुन् उडउकारश्च र्थनचतयोति

सौमित्रे मासुपायंस्थाः कस्मामिच्छुर्वशंवदाम् ।
सुभोगीनां सहचरीमशङ्कः पुरुषायुषम् ॥ २० ॥
तामुवाच स गौष्ठीने वने स्त्रीपुंसभीषणे ।
असूर्य्यम्पश्यरूपा त्वं किमभीरुररार्य्यसे ॥ २१ ॥

दीर्घः किम्भूता सा अरुका कामुको प्रियंवदा प्रियं वदतीति प्रियवशाङ्गयेत्यादिना खः खियय्याजेति मन् प्रियाकर्त्तुमिति सपत्तनिष्पत्तेत्यादिना आनुकूल्याथ डाच् ॥ १९ ॥ भ०

सौमित्रेइत्यादि । हे सौमित्रे इच्छुरेषणशीलः विन्दुरिच्छुरिति निपातितः अशङ्कः निर्व्वीतत्यः सन् किम्भावयिष्यतीति मासुपायंस्थाः परिणयं आशंसायामभूतवच्चेति लुङ् उपाद्यमः स्वीकरण इति तङ् विभाषोपयमनइत्यकित्त्वपक्षे रूपम् कस्माम् नमिकम्पीत्यादिना रः वशंवदां अहन्ते वश्येति वदन्तीम् त्वद्भोगीनां त्वच्छरीराय हिता अर्शआदिलक्षणयोगात् आत्मन्विश्वजनेत्यादिना खः सहचरीं सहगामिनीं भिक्षासेनादायेषु चेति चकारस्यानुक्तसमुच्चयार्थत्वात् टप्रत्ययः कियन्तङ्कालं पुरुषायुषम्पुरुषस्यायुर्यावत् अचतुरेत्यादौ निपातितः अत्यन्तसंयोगे द्वितीया चरणक्रियायाः कृत्स्नसंयोगात् यथा मासमधित इति ॥ २० ॥ ज० म०

सौमित्रे इत्यादि । एतत् प्रार्थयाञ्चक्रे इति पूर्व्वेणान्वयः हे सौमित्रे त्वं इच्छुः सन् मासुपायंस्थाः परिणय अभिधानात् आशंसायां टी उपयमो विवाह इति मं यमः स्वीचनेवाद्वाहे इति सेविभाषितकित्त्वात् पक्षे अमलोपाभावः कीदृशीं मां कस्मां कामयमानां रूपवतीमित्यन्ये हिंसदीपेत्यादिना रः वशंवदां अहं ते वश्येति वदन्तीं प्रियवशादित्यादिना खः सुभोगीनां सुभोगाय हितां विकारसंघेत्यादिना ईनः भुज्यतेऽनेनाक्षिन् वेति भोगः शरीरं मैथुनाद्युपभोग इत्यन्ये पुरुषस्यायुर्जीवितकालः निपातनात् अत् स्वार्थे ष्णो वा पुरुषायुषं कालं व्याप्य सहचरीं सहचरेति हनचरगश्क् कर्म्मप्रतिरूपकोऽयं सहशब्दः किंवा पचादित्वादत् नदादित्वादीप् सदाध्वादीति द्वितीया इच्छतीति इच्छुः विन्दिच्छू इति निपातः ॥ २० ॥ भ०

तामित्यादि । राक्षसी लक्ष्मण उवाच उक्तवान् किमित्याह गौष्ठीने वने गोष्ठं भूतपूर्व्वं यस्मिन्वने इदानीन्नामापि न ज्ञायते गोष्ठात् खञ् भूतपूर्व्वइति खञ् स्त्रीपुंसभीषणे स्त्री च पुमांश्चेति स्त्रीपुंसौ अचतुरेत्यादौ निपातीतौ तयो-

मानुषानभिलष्यन्ती रोचिष्णुर्दिव्यधर्म्मिणी ।
तमप्सरायमाणेह स्वतन्त्रा कथमद्य सि ॥ २२ ॥

भीर्यस्य इति षष्ठीसः बिभेतेर्णिचि हेतुभयेषुक् तदन्तात् क्त्यल्युटोबहुलमिति कर्त्तरि ल्युट् तस्मिन्नभीरुः सती किमित्यरार्य्यसे अत्यर्थमठसि अर्त्तेः सूचि-सूत्रीत्यादिना यङ् यङि चेति गुणः ननद्रा इति प्रतिषेधस्य प्रतिषेधो यकारपरस्य न द्वित्वनिषेध इति रेफोद्विरुच्यते भयशीला भीरुः भियः क्रुक्रुकनौ क्रियाशब्द-त्वादूङुत इति ऊङ् न भवति अमनुष्यत्वाच्च तथाहि लक्ष्मणेनामानुषीयमिति ज्ञाता तथाच भङ्ग्या दर्शयन्नाह असूर्य्यम्पश्यरूपा अतिगोपनीयतया सूर्य्यमप्य-निधिदर्शनन्न पश्यतीति असूर्य्यललाटयोरित्यादिना खश् पाघ्रेत्यादिना पश्यादेशः असूर्य्यम्पश्यं रूपं यस्या इति सः सा न पश्यतीति रूपमपि न पश्यतीत्युक्तम् ॥ २१ ॥ ज० म०

तामित्यादि । तां राक्षसीं लक्ष्मण उवाच किमित्याह त्वं वने किमर्थ-मभीरुः सती अरार्य्यसे अत्यर्थं भ्रमसि ऋगतौ सूत्रसूत्रेति यङ् स्यादार्द्धधातोरिति गुणः नाजन्तादेरादिद्विरिति निषेधात् आद्यवयस्य न द्विः स्यादौनवर्द्रीये इति वर्জ্জनात् रेफसहितस्य यस्य द्वित्वं खेराद्यच इति खेर्यलोपः घोऽनिव इति खेर्घीधः वने किम्भूते गोष्ठीने भूतपूर्व्वं गोष्ठं यस्मिन् सम्मति गोसञ्चारोऽपि नास्ति अतएव स्त्रीपुंसयोर्भीषणे भयजनके गावस्तिष्ठन्ति अस्मिन्निति गोष्ठं निपातनात् विकारसंघेत्यादिना भूतपूर्व्वेऽर्थे गोष्ठात् नीतः स्त्रीच पुमांश्च स्त्री-पुंसौ निपातनात् अत्रभीधातोर्नन्द्यादित्वादनः भीर्भीष्वेति भीषादेशः भीषिचि-नीति सूत्रनिर्द्देशात् भीषधातुरप्यस्तीति केचित् कीदृशी असूर्य्यम्पश्यरूपा सूर्य्य-मपि न पश्यति असूर्य्यम्पश्यं घटीखारीत्यादिना खश् स्यादानेति दृशः पश्यादेशः असूर्य्यम्पश्यं रूपं यस्याः सा तथा दृशिना सम्बद्धस्य नञः सूर्य्येण सह समासो गमकत्वात् नबिभेतीति अभीरुः क्रुक्रुकौभिय इति क्रुः क्रियावचनस्य भीरुशब्दस्य मनुष्यजातित्वाभावात् उतोऽयुङ् रज्वादेरिति सूत्रेण उप् प्रत्ययः ॥ २१ ॥ भ०

मानुषानित्यादि मनोरपत्यानि मानुषाः मनोर्जातावञ्यतौ षुक् तान-भिलष्यन्ती कामयन्ती रन्तुमिच्छन्ती वाम्भाशेत्यादिना श्यन् रोचिष्णुः रोचन-स्वभावा अलंकर्ष्णुरित्यादिना इष्णुच् अतएव दिव्यधर्म्मिणी दिवि भवा दिव्याः देवाः राक्षसा अपि देवयोनित्वात् तेषान्धर्म्मः स्वभावः सोऽस्या अस्तीति धर्म्म-शीलेत्यादिनेनिः अप्सरायमाणा अप्सरा इवाचरन्ती राक्षसभावङ्गोप्तुमिति भावः

जग्गंपश्याकुलेऽरण्ये शालीनत्वविवर्जिता ।
कामुकप्रार्थनापट्वी पतिवत्नी कथन्न वा ॥ २२ ॥

उपमानादाचार इत्यधिकारे कर्तुः क्यङ् सलोपश्च ओजसोऽप्सरसोनित्यमिति वचनात् इह वने स्वतन्त्रा कथमङ्गसि भ्रमसि स्व आत्मा तन्त्रः प्रधानं यस्याः अपराधीनत्वात् अनयोक्ता राक्षसीत्वन्दर्शयति ॥ २२ ॥ ज० म०

मानुषानित्यादि । त्वं स्वतन्त्रा सती इह वने कथमङ्गसि भ्रमसि स्वं तन्त्रं प्रधानं यस्याः सा तथा तन्त्रः कुटुम्बे इष्टे स्यात् कारणेऽपि परिच्छदे । शास्त्रे प्रधाने सिद्धान्ते तन्त्रवाये गदोत्तम इति विश्वः । मनोरपत्यानि मानुषाः मनोस्यणाविति परस्यूत्वेणापत्यार्थे यण् स्वमतेऽभिधानात् तानभिलष्यन्ती कामयमाना क्रमक्लमेति पक्षे श्यन् रोचिष्णुर्दीप्ना जिभ्राजभूसहेति ष्णुः दिवि भवानां गन्धर्वादीनां यो धर्म्मस्तद्युक्ता नैकाचाजादितीम् दिव्येति ढधकादिति भवार्थे यः उहस्युडिति स्तुत्वस्य पदान्तविषयत्वं उवर्णे परे वस्य अपदान्तत्वासम्भवात् द्युभ्यामित्यादौ दान्तवत्सभीति दान्तत्वादुत्वं नदन्तसाविति पदनिषेधात् अत्र न उत्वं अप्सरस इव आचरन्ती धान्ङ्प्रइति ङ्प्रः सलोपश्च धोऽज्यरे इति दीर्घः॥२२॥भ०

उग्रमित्यादि । उग्रम्पश्यन्तीत्युग्रम्पश्याः पापाशयत्वात् श्वरादयः उग्रम्पश्येत्यादिना खञ् निपात्यते तैराकुले व्याप्ते अरण्ये पतिवत्नी जीवत्पतिः कथङ्केन प्रकारेण न वा नैवं भवसीत्यर्थः अन्तर्व्वत्यतिवतोर्लुगित्यत्व पतिर्व्विद्यते अस्या इति मतुप् सिद्धः जीवत्पत्याम्मतुपो वत्वद्विपात्यते तुक्स्तुत्वेनैव विधीयते ङीप्प्रत्ययस्तूगित्वादेव सिद्धः शालीनत्वविवर्जिता अदृष्टतया वर्जिता शालाप्रवेशमर्हतीति शालीनकौपीने इति खञ् निपात्यते अदृष्टेऽभिधेये प्रवेशशब्दस्य लोपः तस्य भावः शालीनत्वं कामुकः कामशीलः लषपतेत्यादिना उकञ् तस्य प्रार्थनायाम्पटी चतुरा वोतोगुणवचनादिति ङीष् ॥ २२ ॥ ज० म०

उग्रम्पश्याकुले इत्यादि । कथं वा त्वं पतिवत्नी सभर्तृका न भवसि पतिसत्वे ईदृक् स्वातन्त्र्यासम्भवात् नारीसखीत्यादिना पतिशब्दात् मतोर्वत्वादेशो निपातितः शालां प्रवेष्टुमर्हति शालीना अदृष्टा विकारसंघेत्यादिना ईनः शालीनाया भावः शालीनत्वं पुंवत् स्युक्तपुंस्कइति पुंवत् शालीनत्वविवर्जिता दृष्टेति फलितार्थः अरण्ये कामुकस्य प्रार्थनायां दत्ता दृष्टस्यार्भूकमगमेति जुकः अरण्ये किम्भूते उग्रम्पश्यन्ति उग्रम्पश्याः सिंहव्याघ्रादयः पापाशयत्वात् श्वरादयो वा तैराकुले व्याप्ते घटीखारीत्यादिना उग्रशब्दादृशः खञ् ॥ २२ ॥ भ०

राघवं पर्णशालायामिच्छानुरहसं पतिम् ।
यः स्वामी मम कान्तावानौपकर्णिकलोचनः ॥ २४ ॥
वपुश्चान्दनिकं यस्य कार्णवेष्टनिकं मुखम् ।
संग्रामे सर्व्वकर्म्मीणौ पाणी यस्यौपजानुकौ ॥ २५ ॥

राघवमित्यादि । रामम्पर्णशालायामवस्थितम्पतिमिच्छ अनुरहसं विवेक-प्राप्तमनुगतोरहइति विग्टह्य अन्वतप्राद्रहस इत्यच् यो राघवो ममापि स्वामी प्रभुः स्वामिन्नैश्वर्य्य इति निपातितम् कान्तावान् सभार्य्यः प्रवृत्तसम्भोगोऽसौ नाहमिति दर्शयति तमेव रूपशौर्य्याभ्यां वर्णयन्नाह औपकर्णिकलोचनः कर्णयोः समीपमुपकर्णं समीपार्थे अव्ययीभावः तत्र भवमिति उपजानू-पकर्णोपनीवेष्ठक् शेषमपि शब्दद्वयमप्योच्यते औपकर्णिके लोचने यस्य कर्णान्तायतलोचन इत्यर्थः ॥ २४ ॥ ज० म०

राघवमित्यादि । पर्णशालायां स्थितं रामं पतिमिच्छ विधिनिमन्त्रणेति आमन्त्रणे गो अनुगतं रहो विजनस्थानं रतं वा यस्य तं तप्रान्वाद्रहसइति यः यो ममापि स्वामी ईश्वरः तस्मिन् सति मद्वरणं न युक्तमिति कान्तावान् एतेन स्त्रीसुखाभिज्ञोऽपि अहन्तु तपस्वीति ध्वनिः कर्णयोः समीपं उपकर्णं तत्र भव इति ढकेकादित्यादिना ष्णिकः तादृशे लोचने यस्य स कर्णायतनेत्र इत्यर्थः एतेन रूपवत्त्वं दर्शितम् ॥ २४ ॥ भ०

वपुरित्यादि । यस्य राघवस्य वपुः शरीरञ्चान्दनिकञ्चन्दनेन सम्पद्यते प्राग्गेभं भवति मुखञ्च कार्णवेष्टनिकं कर्णवेष्टकाभ्याङ्कर्णालङ्काराभ्याङ्कार्णवेष्टनि-कलत् उभयत्र सम्पादिनीति ठक् पाणी हस्तौ संग्रामे युद्धे सर्व्वकर्म्मीणौ धनुः-खड्गादिव्यापारकर्म्माणि व्याप्नुतः तत्सर्व्वादेरिति खः औपजानुकौ आजानुकौ आजानुलम्बावित्यर्थः अत्र ठक् इसुसुक्तान्तात्कः ॥ २५ ॥ ज० म०

वपुरित्यादि । यस्य रामस्य वपुश्चान्दनिकं चन्दनेन राजितं इति ढकेका-दिति ष्णिकः यस्य मुखं कर्णवेष्टनाभ्यां कुण्डलाभ्यां राजितं इति पूर्व्ववत् ष्णिकः एतेन विलासित्वं दर्शितं यस्य पाणी हस्तौ संग्रामे युद्धे सर्व्वस्मिन् कर्म्मणि धनुःखड्गादिव्यापाररूपे कुशलौ विकारसंघेति ईनः सर्व्वादेः पथ्यङ्ग-कर्म्मपत्रपात्रात्तद्व्याप्नोतीत्यर्थे ईन इति परः तन्मते सर्व्वकर्म्मणि व्याप्नुतः इत्यर्थः व्यापनमत्र तत्करणद्वारैव एतेन वीरत्वं औपजानुकौ उपजानु जानु-

बद्धो दुर्बलरक्षार्थमसिर्यैनौपनीविकः ।
यश्चापमाश्मनप्रख्यं सेषुं धत्तेऽन्यदुर्व्वहम् ॥ २६ ॥
जेता यज्ञद्रुहां संख्ये धर्म्मसन्तानसूर्व्वने ।
प्राप्य दारगवानां यं मुनीनामभयं सदा ॥ २७ ॥

समीपे भवौ तावत्प्रलम्बावित्यर्थः एतेन महापुरुषलक्षणं ढधेकादिति कण् तमिच्छेति योजना ॥ २५ ॥ भ०

बद्ध इत्यादि । येन असिः खड्गः औपनीविकः नीवीसमीपे प्रायेण भवतीति स हि नीव्याश्रित्य वर्त्तमानः पार्श्वयोश्चोर्द्ध्वमिबद्धः किमर्थं दुर्बलरक्षार्थन्दुर्बलरक्षायै इदमित्यस्मिन्नर्थे चतुर्थी तदर्थेत्यादिना सः तत्रार्थेन नित्यसमासः सर्व्वलिङ्गता च यश्चापन्धनुर्द्धत्ते धारयति आश्मनप्रख्यं अश्मनो विकार इत्यण् अश्मेति प्रकृतिभावे प्राप्ते अश्मनोविकार उपसङ्ख्यानमिति टिलोपः पाक्षिकः विभाषाङिश्योरित्यतो मण्डूकप्लुत्या विभाषायङ्ग्रहणानुवृत्तेः अन्यत्राश्मन एव भवति आश्मनेन प्रख्या शब्दस्यास्य तदाश्मनप्रख्यमुपघटितमिव सेषुं सशरं अन्यदुर्व्वहं दुःखेनोह्यतइति खल् रामादन्येन दुर्व्वहमित्यर्थः ॥ २६ ॥ ज० म०

बद्ध इत्यादि । येन रामेण असिर्व्बद्ध औपनीविकः नीवीसमीपे भवः वामपार्श्वाधोभागस्थायीत्यर्थः । स्त्रीकटीवस्त्रबन्धेऽपि नीवी मूलधनेऽपिचेत्यत्र स्त्रीपदमुपलक्षणं अत्र वा लक्षणा उपनीविशब्दात् ढधेकादिति ष्णिकः यश्चापं धत्ते अश्मैवाश्मनः प्रस्तरः विकारसंधेत्यादिना स्वार्थे ष्णः मनुवर्ज्जेत्यादिना अविकारष्णेऽनन्तस्य नलोपनिषेधः तत्प्रख्यं तत्सदृशं अश्मनि जातं अश्मभवं इति केचित् सेषुं शरयुक्तं अन्यदुर्व्वहं रामादन्येन दुःखेन उह्यते इति दुःखेनोरिति खल् दुर्व्वलानां रक्षैव अर्थः प्रयोजनं यस्य खड्गबन्धनस्य चापधारणस्य च तत्तथा तमिच्छेति योजना ॥ २६ ॥ भ०

जेतेत्यादि । यज्ञाय द्रुह्यन्तीति यज्ञद्रुहो राक्षसाः सत्सूद्विषेत्यादिना क्विप् तेषां संग्रामे जेता त्वजन्तोऽयम् ततश्च कर्त्तरीत्यादिना क्विप् धर्म्मसन्तानसूः पूर्व्ववत् क्विप् धर्म्मरत इत्यर्थः वने वर्त्तमानानामुनीनां वानप्रस्थादीनामित्यर्थः तेषामाश्रमाग्निपरिग्रहात् यानि दारगवानि दाराश्च गावश्चेति दारगवानि अचतुरेत्यादिना निपातितानि दारयन्तीति दाराः दारजारौ कर्त्तरि ण्विलुकेतिषज् तेषाञ्च येनाभयं सदा दत्तमिति योज्यम् येषामेव प्राग्क्रिया तेषामेवाभयमिति समानकर्तृकत्वम् ॥ २७ ॥ ज० म० ॥

ततोवाद्दत्यमानासौ रामशालां न्यविक्षत ।
मामुपायंस्त रामेति वदन्ती सादरं वचः ॥ २८ ॥
अस्त्रीकोऽसावहं स्त्रीमान् स पुष्यतितरां तव ।
पतिरित्यब्रवीद्रामस्तमेव व्रज मा सुचः ॥ २९ ॥

जेतेत्यादि । यज्ञाय द्रुह्यन्ति यज्ञद्रुहो राक्षसाः त्वासुसिति क्विप् तेषां जेता संख्ये युद्धे धर्म्मसन्तानं सूते इति क्विप् यं प्राप्य वने सम्बन्धिनां दारगवादीनां सदा अभयं भयाभावः दाराश्च गावश्च दारगवानि निपातनात् दारयन्तीति दाराः कर्भावेऽमीदिति कर्त्तरि घञ् पूर्व्वकाले इति सूत्रे व्याख्यानात् विष्णुं नत्वा स्तौति इत्युदाहरता एककर्तृकयोर्धात्वोः प्राक्काले क्त्वाच् भवतीति लब्धं अत्र च येषां प्राप्तिस्तेषामेव यद्भवयं तदभाव उक्त इति समानकर्तृत्वमस्त्येव यामान्नागच्छतीतिवत् क्रियानिषेधेऽपि अन्तरङ्गस्य क्रियाश्रितकार्य्यस्य निवृत्तेः केचित्तु स्थितानामित्यध्याहरन्ति तमिच्छेति योजना ॥ २७ ॥भ०

. तत इत्यादि । ततो लक्ष्मणवचनानन्तरमसौ राक्षसी वाद्दत्यमाना रामं दृष्वाना वाद्दत्वरणइति दैवादिकः आत्मनेपदी रामशालां रामस्य पर्णकुटीरं न्यविक्षत प्रविष्टा विशेः शलदृगुपधादनिटः क्यः नेर्विशइति तङ् मामुपायंस्त रामेति हे राम अहं प्रार्थये भवान् मामुपायंस्त परिणयत्विति वाक्यभेदेन योज्यम् आशंसायाम्भूतवच्चेति लुङ् उपाद्यमः स्वकरण इति तङ् विभाषोपयमनम इत्यकित्त्वपक्षे रूपम् इत्येवं वचः सादरं वदन्ती ॥ २८ ॥ ज०म०

तत इत्यादि । ततो लक्ष्मणवचनानन्तरं असौ राक्षसी वाद्दत्यमाना रामं दृष्वती रामस्य शालां वेगं न्यविक्षत विशशोप्रवेशे विपराजीति मं तन् दृशशोऽनिमिजुङ् इति सक् वाद्दत्यमानेति वाद्दत्युङ् आशंसायां सम्भक्तौवरणेच वाद्दतधातुः यित्त्वाद्दैवादिकः ङित्त्वादात्मनेपदी हे राम भवान् मां उपायंस्त परिणयतु इति वचः सादरं वदन्ती उपयमोविवाहे इति मं आशंसयां टी अभिधानात् मान्मेनधीत्यादिति योगविभागात् अन्यत्रापि धीत्यादिति देवीदासचक्रवर्त्ती ॥ २८ ॥ ज० म०

अस्त्रीत्यादि । असौ लक्ष्मणोऽस्त्रीकः न विद्यते अस्य स्त्रीति नद्यृतश्चेति कप् न कपीति ह्रस्वप्रतिषेधः अहं पुनः स्त्रीमान् समार्य्यः प्रशंसायामतुप् स एव लक्ष्मणः पुष्यतितराम् अतीव पुष्यति लक्ष्मणस्तव पतिः तिङश्चेति तरप् किमेदित्याम् तस्मात्तमेव लक्ष्मणं व्रज गच्छ मा सुचः मा त्याक्षीः सुचे-

लक्ष्मणं सा वृषस्यन्ती महोक्षं गौरिवागमत् ।
मन्मथायुधसम्पातव्यथ्यमानमतिः पुनः ॥ ३० ॥

लुङ् लदित्वादङ् इति एवमब्रवीद्रामः उक्तवान् अदादिकस्य ब्रूञोलङि ब्रव-ईडिति ईटि रूपम् ॥ २९ ॥ ज० म०

अस्त्रीक इत्यादि । इति रामस्तामब्रवीत् किन्तदित्याह असौ लक्ष्मणः अस्त्रीकः न विद्यते स्त्री यस्य इति धृतः कः अहं स्त्रीमान् प्रशस्तस्त्रीयुक्तः अतः स एव तव पतिः पुष्यतितरां त्वामित्यर्थान् पुष्यौलटपुष्टौ किमेव्याङ्गेति उत्कर्षे चतरां भविष्यत्यामीष्ये की अभिधानात् किंवा यावत्पुराभ्यां भव्ये इत्यस्य योगविभागात् तत्र भव्ये इति सामीष्ये सम्भी तुष्यतीति क्वचित्पाठः तस्मात्तमेव लक्ष्मणमेव व्रज मा सुचः मा त्याक्षीः सुचल्लयपजौमोक्षणे लदित्वात् शासुलि-द्युदिति ङः ॥ २९ ॥ भ०

लक्ष्मणमित्यादि । लक्ष्मणं पुनर्भूयोऽगमत् लक्ष्मणं प्रति गता यथा गौः वृषस्यन्ती मैथुनेच्छावती महोक्षम्महान्वृषं वृषस्यन्तीत्युपमानविशेषणमेतत् तेन वृषं लब्धुमिच्छन्तीति क्यच् अश्वक्षीरेत्यादिना असुक् तद्यश्च वृषयोर्मैथुनेच्छायामिति तद्वदागमनं महोक्षमिति अचतुरादिसूत्रेण निपातितम् मन्मथस्यायुधानि शराः आयुध्यन्ते एभिरित्यायुधानि घञर्थे कविधानमिति कः तेषां सम्पातः संश्लेषः तस्मात् व्यथ्यमाना पीड्यमाना मतिर्मनो यस्याः ॥ ३० ॥ ज० म०

लक्ष्मणमित्यादि । सा राक्षसी लक्ष्मणं पुनरगमत् यथा गौर्म्महोक्षं महान्तं वृषभं गच्छति महांश्चासौ उक्षा चेति जातमहद्वृद्वादुक्ष्ण इति षः कीदृशी वृषस्यन्ती वृषोऽत्र शुक्रलवचनः मैथुनाय वृषं शुक्रलपुरुषं इच्छन्ती कामुकीत्यर्थः गोपक्षे वृषं वृषभं इच्छन्ती क्योब्राह्मणेति क्यः धनोदकाशनेत्यादिना सन् क्यविधानं स्वेच्छायां सनागमस्तु याभार्थे तेन मैथुनविषयस्वेच्छावगम्यते केचित्तु प्रकृत्यर्थत्यागेन मैथुनेच्छामात्रे वृषस्य अश्वस्येति क्यवन्तरूपं अतएव विरुद्धहयान-श्वस्यन्तीति नैषधप्रयोगः तत्र हि हयान् मैथुनायेच्छन्तीत्यवगम्यते प्रकृत्यर्थपुर-स्कारे हयशब्दानन्वयापत्तेरित्याहुः अन्ये तु वृषस्याश्वस्यदित्यव्युत्पन्नमेव धातु-द्वयं मैथुनेच्छायां वर्त्तत इत्याहुः कुसुमायुधस्य कामस्य सम्पातेन संश्लेषेण व्यथ्यमाना मतिर्मनो यस्याः सन्ताप इति पाठे कामेन यः सन्ताप इति व्याख्येयं मन्मथायुधेति क्वचित् पाठः आयुध्यन्ते एभिरिति करणे कः कगञ्जेति करणे कः लङोःकभावदित्युक्तेः मन्यतेऽनयेति करणे क्तिः ॥ ३० ॥ भ०

तस्याः सासद्यमानाया लोलूयावान्नघूत्तमः ।
असिं कौक्षेयमुद्यम्य चकारापनसं मुखम् ॥ ३१ ॥
अहं सूर्पणखा नाम्ना नूनं नाज्ञायिषि त्वया ।
दण्डोऽयं क्षेत्रियो येन मय्यपातीति साब्रवीत् ॥ ३२ ॥

तस्या इत्यादि । सासद्यमानायाः समीपे गर्हितं सीदन्त्याः प्रविशन्त्याः लुपसदेत्यादिना यङ् रघूत्तमो लक्ष्मणः सुखमपनसमपगतनासिकञ्चकार उपसर्गाच्चेत्यच् नासिका च नसादेशमापद्यते तत्र संज्ञायामिति नानुवर्त्तते किं कृत्वा कौक्षेयमसिमुद्यम्य उत्क्षिप्य कुक्षौ भव इति इतिकुक्षीत्यादिना ढञ् कौक्षेयः लोलूयावान् अत्यर्थं लवनक्रियायुक्तः लुनाति लोलूया यङन्तादप्रत्ययादित्यकारः सा विद्यते यस्येति मतप् ॥ ३१ ॥ ज० म०

तस्या इत्यादि । रघूत्तमो लक्ष्मणः कौक्षेयं कुक्षौ कोषे भवं विद्यमानं तीक्ष्णलोहभवं वा असिं खड्गं उद्यम्य उत्क्षिप्य राज्ञस्याः सासद्यमानायाः समीपे गर्हितं सीदन्त्या उपविशन्त्याः सुखं अपनसं अपगतनासिकं चकार लोलूयावान् अतिशयच्छेदनयुक्तः तत् कर्तृत्वात् मूलसूत्रेत्यादिना लूञोयञ् द्वित्वं खेनुः संस्यादः मोऽभ्यपाद्वतुः गत्यर्थाद्लुपेति सदेर्गर्हार्थो यङ् ढचेकादिति कुक्षेर्भवार्थे ष्णेयः कुक्षेस्तीक्ष्णलोहार्थाद्विकारेटेयन्निति केचित् कुक्षिः खड्गविधाने स्यात् तीक्ष्णलोहे तथोदरे इति कोषः अपनसं उन्नसमितिवत् ॥ ३१ ॥ भ०

अहमित्यादि । सा राज्ञसीत्यब्रवीत् अहं सूर्पणखेति नाम्ना नूनमवश्यत्वया नाज्ञायिषि न ज्ञातास्मि ज्ञाङित्यस्मात्कर्म्मणि लुङ् सर्त्तिशास्त्यादिना अजन्तत्वात् चिण्वदिट् आतोयुगिति युक् खाङ्गाच्चेति ङीषि प्राप्ते नखमुखात्संज्ञायामिति प्रतिषेधः पूर्वपदात्संज्ञायामिति णत्वम् अज्ञाने कारणमाह येनायन्दण्डो नासाछेदनलक्षणो मय्यपाति पातितः पातेः कर्म्मणि लुङ् चिणादेशः अत उपधाया इति वृद्धिः चिणोलुक् क्षेत्रियः परक्षेत्रे चिकित्स्यः परक्षेत्रे जन्मान्तरशरीरे यदि शक्यश्चिकित्सितुं तदा नासिकायाः सम्भवात् क्षेत्रिये च परक्षेत्रे चिकित्स्य इति निपातनम् ॥ ३२ ॥ ज० म०

अहमित्यादि । सा राज्ञसी इत्यब्रवीत् किं तदित्याह नाम्ना सूर्पणखाहं नूनं निश्चितं त्वया नाज्ञायिषि न ज्ञाता कर्म्मणि टौ व्यांसिः हनश्चहश्च इति मिण् यनञ्णिदिति यत् नाम्नेति भेदके तृतीया सूर्पणखेति नाम्ना उपलक्षितेति केचित् सूर्पवत् नखा यस्याः सा सूर्पणखा पूर्वपदस्यात् ह्रु-

पर्य्यशाप्सीद्दिविष्ठासौ संदर्श्य भयदं वपुः ।
अपिस्फवच्च बन्धूनां निनङ्क्षुर्विक्रमं मुहुः ॥ २२ ॥

संज्ञायां णत्वमिति परे खमते घ्वृणीदान्ते इत्यादौ वाशब्दस्य व्यवस्थावाचित्वात् नखमुखात्संज्ञायामीप्निषेध इति परे खमते पातृघोनादीत्यादिना खाङ्गादीप् प्रत्ययोविभाषित ईपोऽभावपक्षे आप् पक्षे तादृशसंज्ञाया अभावात् न ईप् ईपि सति तु वा का क्षतिः तत्र वाशब्दो व्यवस्थावाची वा अज्ञाने हेतुमाह येनायं दण्डो नासाच्छेदनरूपो मयि त्वया अपाति निपातितः अत्रात्मा पतेः कर्म्मणि टी क्षेत्रियः जन्मान्तरशरीरे चिकित्स्यः एतज्जन्मनि नासाया अनुत्पत्त्या शरीरान्तर एव तत्सम्भवात् विकारसंघेत्यादिना क्षेत्रशब्दात् जन्मान्तरशरीरे-चिकित्स्येऽर्थे दृयः क्षेत्रादियः परक्षेत्रे चिकित्स्ये इति परस्मृतं तत्र परक्षेत्रे जन्मान्तरशरीरे ॥ २२ ॥ भ०

पर्य्यशाप्सीदित्यादि । असौ राक्षसी पर्य्यशाप्सीत् आक्रुष्टवती शमेरनिटः सिचि हलन्तलक्षणा वृद्धिः शपउपालम्भन इति तङ् न भवति उपलम्भनं हि वाचा शरीरस्पर्शनम् दिविष्ठा नभसि वर्त्तमाना तत्पुरुषेकृतिबहुलमिति सप्तम्या अलुक् अम्बाम्बेति षत्वम् भयदं रौद्रम्वपुः शरीरं सन्दर्श्य दर्शयित्वा बन्धूनां विक्रमं शौर्य्यम्मुहुः पुनः पुनः अपिस्फात् स्फीतीचकार अतिह्रीत्यादिना णावित्यनुवृत्तौ स्फायोव इति वकारः स्फायतेश्चङि णिलोपः ह्रस्वद्विर्व्वचनादि अभ्यासस्य खयः शेषः चर्त्वमित्वञ्च सन्वद्भावे निनङ्क्षुः नष्टुमिच्छुरित्यर्थः नशेः सनि मस्जिनशोर्झलीति नुम् ॥ २२ ॥ ज० म०

पर्य्यशाप्सीदित्यादि । असौ राक्षसी दिविष्ठा सती नभस्था सती भयदं भयजनकं वपुः सन्दर्श्य पर्य्यशाप्सीत् आक्रुष्टवती बन्धूनां खरादीनां विक्रमं मुहुर्व्वारं वारं अपिस्फवच्च वर्द्धयामास च रामादीनां भयार्थं विवर्द्ध कथयामासेत्यर्थः निनङ्क्षुः अन्तर्द्धातुमिच्छुः नशेः सनि नुगरधोमुचामिति नुग् शच्छाजेति षङ् षढोःकःसे शपौजआक्रोशे ह्यांसिः अनिमित्वात् व्रजवदेति त्रिः दिवि तिष्ठतीति ह्नजनादिति डः सप्तम्या अलुक् षत्वञ्चाभिधानात् संपूर्व्वात् दृशेर्ज्ञान्तात् क्तोयप् अपिस्फवदिति स्फायीङ् वृद्धौ ञिःप्रेरणे पातिस्फायोर्लनुवडौआविति वङ् ञिश्नीत्यङ् द्वित्वं खेःसन्वत् अङ्प्रङःस्वः अपिस्फुरदिति क्वचित् पाठः तत्र प्रकाशितवतीत्यर्थः अपुष्करदिति पाठेऽपि तथा स्फुरश्चिस्फूर्त्तौ चले क्रीजीङ्होऽजेति पक्षे उकारस्यात्वं ॥ २२ ॥ भ०

खरदूषणयोर्भ्रातोः पर्य्यदेविष्ट सा पुरः ।
विजिग्राहयिषूरामं दण्डकारण्यवासिनोः ॥ २४ ॥
कृते सौभागिनेयस्य भरतस्य विवासितौ ।
पित्रा दौर्भागिनेयौ यौ पश्यतं चेष्टितं तयोः ॥ २५ ॥
मम रावणनाथाया भगिन्या युवयोः पुनः ।
अयं तापसकाङ्क्षः क्षमध्वं यदि वः क्षमम् ॥ २६ ॥

खरेत्यादि । खरदूषणयोर्भ्रात्रोर्दण्डकारण्यवासिनोः पुरः अग्रतः पर्य्यदेविष्ट परिदेवनङ्कृतवतीति देवृदेवनदित्यस्यात्मनेपदिनः सेटो लुङि रूपम् परिदेवने कारणमाह विजिग्राहयिषुः रामं विग्राहयितुं योधयितुमिच्छुः ग्रहेर्ग्रन्तस्य सनन्तस्य रूपम् रोरीति रेफलोपः ह्रोलोप इति दीर्घत्वम् किमर्थं देविष्टेत्याह ॥ २४ ॥ ज० म०

खरदूषणयोरित्यादि । रामं विजिग्राहयिषुः विग्राहयितुं खरादिभिः सह योधयितुमिच्छुः सा राक्षसी खरदूषणयोर्भ्रात्रोः पुरोऽग्रतः पर्य्यदेविष्ट क्रन्दितवती देवृङ्देवने किम्भूतयोः दण्डकारण्यवासिनोः दण्डकनामारण्ये वसत इति अहादित्वाच्छिन् वस्तुं शीलमनयोरित्यत्रे ग्रहेर्ग्रन्तत्वात् सनङः पुर इति पूर्व्वाधरावरा इति पूर्व्वशब्दस्य पुरादेशः अतएव अस् तद्योगे समार्थेनेत्यादिना षष्ठी ॥ २४ ॥ भ०

कृते इत्यादि । भरतस्य कृते कार्य्यनिमित्तं राज्ये अभिषेक्तव्यमिति सुभगा कैकेयी तस्या अपत्यं सौभागिनेयः स्त्रीभ्यो ढक् कल्याण्यादीनामिनङ् तत्र सुभगादुर्भगा चेति पश्यते हृङ्नेत्यभयपदहृद्विः पित्रा यौ विवासितौ निष्काशितौ दौर्भागिनेयौ कौशल्यासुमित्रा च दुर्भगे तयोरपत्ये रामलक्ष्मणौ तयोश्चेष्टितन्नासाच्छेदनमपश्यतम् विधौ प्रार्थनायां वा लोट् थस्तम् ॥ २५ ॥ ज० म०

कृते इत्यादि । इति पर्य्यदेविष्ट इति पूर्व्वेणान्वयः सौभागिनेयस्य सुभगापुत्रस्य भरतस्य कृते निमित्तं यौ दौर्भागिनेयौ दुर्भगापुत्रौ रामलक्ष्मणौ पित्रा दशरथेन विवासितौ राष्ट्राद्विराकृतौ तयोश्चेष्टितं नासाच्छेदनरूपं युवां पश्यतं विधौ गौ कृते इत्यव्ययं निमित्तार्थे वर्त्तते क्विबन्तकृत्शब्दात् चतुर्थीत्येके कृतशब्दात् सप्तमीत्येके वाह्वादयोऽत्रावादेरित्यादिना आवन्तत्वात् सुभगादुर्भगाशब्दाभ्यां अपत्यार्थे ष्णेयः नित्तेञ्रिरिति द्विपदे वृद्धिः कल्याणीसुभगेत्यादिना ष्णेयस्य इनेयादेशः ययोर्लोप इत्यालोपः ॥ २५ ॥ भ०

ममेत्यादि । रावणो नाथः प्रभुर्यस्याः मम विशेषणं युवयोर्भगिन्या-

असंस्कृतिमसंव्यानावनुघ्रिमफलाशिनौ ।
अभृतिमपरीवारौ पर्य्यभूतां तथापि माम् ॥ ३७ ॥

अयन्तापसकात् कुतापसात् कुत्सायाङ्कन् ध्वंसो नासिकाविनाशः यदि वः युष्माकं गुरूणां क्षमं युक्तम् क्षन्तुमित्यर्थात् युष्मदि गुरावेकेषामिति बहुवचनन्तयोर्ज्येष्ठत्वात् तर्हि क्षमध्वं उमेक्षध्वं रावण एव क्षास्यतीति भावः पुनरप्येजयितुमाह ॥ ३६ ॥ ज० म०

ममेत्यादि । रावणोनाथोयस्यास्तादृश्या मम युवयोर्भगिन्या युवयोरेव पुरोऽग्रतः अयं तापसकात् क्षुद्रतपस्विनः सकाशात् ध्वंसोनासाच्छेदनरूपो दत्तः अत्र यदि वोयुष्माकं क्षमं क्षन्तुं योग्यं तदा यूयं क्षमध्वं रावण एव क्षास्यतीति भावः विकारसंघेत्यादिनाल्पार्थे कुत्सार्थे वा कः युष्मदोर्हित्वे बहुत्वविवक्षा क्षममिति क्षमायोग्यं सामान्यतः प्रयुक्तं । युक्ते योग्ये हिते क्षममिति कोषः क्षममव्ययमित्यन्ये पुनरिति पाठे मम पुनरिति योज्यम् ॥ ३६ ॥ भ०

असमित्यादि । संस्कारेण वाग्वेन भरणेन च निर्वृत्तं संस्कृतिमसुघ्रिमम्भृतिमञ्च द्वितः क्तिः क्तो र्ममनित्यम् संपर्युपेभ्य इति सुट् सम्पूर्व्वस्य क्वचिदभूषणेऽपीष्यते संस्कृतिमद्म विद्यते येषामिति ञ् समासः असंस्कृतिमाणि संव्यानानि परिधानानि उत्तरीयाणि ययोः वल्कलवाससावित्यर्थः अनुघ्रिमाणि फलानि अशनमाहारो ययोः तौ वन्यफलाहारौ न शालिभोजनौ परिक्रियतेऽनेनेति घञ् उपसर्गस्य वञ्चेति दीर्घः मृगाणाममनुष्यत्वात् अभृतिमः परीवारो अनुजीविलोकोययोस्तौ मृगपरिवारौ तथापि माम्पर्य्यभूताभ्परिभूतवन्तौ लुङि रूपम् ॥ ३७ ॥ ज० म०

असंस्कृतिमसंव्यानावित्यादि । तौ असंस्कृतिमसंव्यानौ तन्त्वादीनां संस्कारेण जातं संस्कृतिमं संपरेःसुमिति सुम् न विद्यते संस्कृतिमं संव्यानमुत्तरीयं ययोर्बल्कलमात्रसत्त्वात् वपनेन जातं उघ्रिममनुघ्रिमं वन्यं तादृशं फलमशनमाहारो ययोः अथवा नन्द्यादित्वात् कर्त्तरि अनः फलाशिनाविति क्वचित् पाठः भरणेन पोषणेन जातो भृतिमः परीवारोऽनुजीविजनो ययोः सर्व्वत्रद्वितस्तज्ञेतिमक् यहस्वपादोरिति जिः परिवृणोतीति कर्त्तरि घञ् व्यतीहारे त्रिःपूर्व्व इत्यत्र व्यतीहार इति दीर्घनिर्देशात् क्वचित् घञन्ते उपसर्गस्य दीर्घत्वं दृष्टं तेनात्र परेरिकारस्य दीर्घत्वं तौ यद्यपि दृष्टौ तथापि मां पर्य्यभूतां परिभूतवन्तौ भूस्थेति शेषेलुक् ॥ ३७ ॥ भ०

श्वः श्रेयसमवाप्तासि भ्रातृभ्यां प्रत्यभाणि सा ।
प्राणिवस्तव मानार्थं व्रजाश्वसिहि मा रुदः ॥ ३८ ॥
जक्षिमोऽनपराधेऽपि नरान्नक्तन्दिवं वयम् ।
कृतस्त्यं भीरु यत्तेभ्यो दुह्यद्भ्योऽपि क्षमामहे ॥ ३९ ॥

श्वःश्रेयसमित्यादि। श्वःशब्दःप्रशंसामाह शोभनं श्रेयदृतिवाक्ये श्वसोवसीयः श्रेयसदृत्यच् मयूरव्यंसकादित्वात्सः श्वःश्रेयसङ्कल्याणमवाप्तासि प्राप्स्यसि भविष्यदनद्यतने लुट् मारयावस्तावित्युक्तम्भवति ताभ्यां भ्रातृभ्याम्प्रत्यभाणि प्रतिभणिता सा कर्म्मणि लुङ् प्राणिवस्तव मानार्थम् तव मानखण्डनन्माभूदिति जीवावः श्वस्प्राणने अनच् रुदादिभ्यः सार्व्वधातुक इति दृट् अनित्तेरिति णत्वं तस्माद्व्रज यथास्थानं गच्छ आश्वसिहि उद्वेगं त्यज विधौ प्रार्थनायां वा लोट् मा रुदः माङिलुङ् इरितो वेत्यङ् यदा नास्ति तदा मारोदीरिति ॥३८॥ ज० म०

श्वःश्रेयसमित्यादि । भ्रातृभ्यां खरदूषणाभ्यां सा राक्षसी प्रत्युत्तरं प्रापिता किन्नदित्याह श्वःश्रेयसं कल्याणं अवाप्तासि प्राप्स्यसि शतृषधेनेत्यर्थात् छान्दसं श्वोभवं श्रेयः श्वःश्रेयसं श्वोऽवसीयस्श्वःश्रेयसेति निपातितं तव मानार्थं सम्मानार्थं आवां प्राणिवःजीवावः अनघ्र प्राणने रुदादिभ्योयदृतीम् प्राग्वद्नोण इति पक्षे णत्वं तस्माद्व्रज गच्छ स्वस्थानमित्यर्थात् आश्वसिहि आश्वासं लभस्व उद्वेगं त्यज इत्यर्थः प्रार्थनायां गौ रुदादित्वात् पूर्ब्ववदिम् त्वं मा रुदः मारोदीः लुधिरुदरोदे इरित्त्वात् शासुलिहुदादिति पक्षे ङः॥३८॥ भ०

जक्षिम इत्यादि । वयं अनपराधेऽपि नक्तञ्च दिवा च नक्तन्दिवम् अचतुरेति निपातितम् नरान् जक्षिमो भक्षयामः जक्षभक्षहसनयोरिति भक्षार्थस्य रुदादिभ्य इतीट् अक्षदोईयोश्चेति द्वित्वे वयमिति बहुवचनं यत एवं हे भीरु सम्बुद्धौ गुणो न भवति संज्ञापूर्ब्बकोविधिरनित्य इति कृतस्त्यङ्कृत एतदागतम् अव्ययत्वात् त्यप् अमेहकृतसित्वेभ्य इति त्यप् तेभ्यो नरेभ्यो दुह्यद्भ्योऽपि द्रोहङ्कुर्ब्वाणेभ्योऽपि क्षमामहे नैवेत्यर्थः क्रुधद्रुहेति सम्प्रदानत्वम् क्षमेर्गम्यमानोनञर्थस्तस्यासूयार्थत्वात् क्षमध्वं यदि वः क्षममित्यस्य प्रतिवचनम् ॥३९॥ज०म०

जक्षिम इत्यादि । अनपराधे अपराधाभावेऽपि वयं नरान् नक्तन्दिवं रात्रौ च दिवा च जक्षिमः भक्षयामः जक्षचलुघभक्षहासयोधित्त्वात् रुदादिः अक्षदोर्द्वित्वबहुत्वविवक्षा अन्यराक्षसयोगाद्बहुत्वं नक्तन्दिवमिति अक्षिभुवादित्वान्निपातितं स्वार्थिकणान्तेन दिवशब्देन समाहारोद्वन्द्वो वा हे भीरु दुह्य-

तौ चतुर्दशसाहस्रबलौ निर्ययतुस्ततः ।
पारश्वधिकधानुष्कशाक्तीकप्रासिकान्वितौ ॥ ४० ॥
अथ सम्पततो भीमान् विशिखैरामलक्ष्मणौ ।
बङ्गमूर्द्धौ द्विमूर्द्धांश्च त्रिमूर्द्धांश्चाहतां मृधे ॥ ४१ ॥

द्वेऽपि द्वेष्टुं कुर्वन्नोऽपि तेभ्यो नरेभ्यो वयं क्षमामहतीति यत्तत् कृतस्यं कृत आगतं तत्राद्यचिरेत्यादिना त्यः यदभिप्रेत्य धात्वर्थस्तत्र चतुर्थीति परः स्मते तादर्थ्यविवक्षयैव भीरु इति तन्वादेर्व्वेति पक्षे ऊङ् सुभ्वादीति ह्रस्वः ह्रस्वकरणान्न गुणः ॥ ३९ ॥ भ०

तावित्यादि । ततोनिगदनादुत्तरकालन्निर्ययतुः निर्गतवन्तौ चतुर्दशसहस्राणि परिमाणमस्य बलस्य प्रतिवचनमित्यस्मिन्विषये शतमानविंशतिकसहस्रवसनादण् प्राग्वतेः सङ्ख्यायाः संवत्सरेत्युत्तरपदवृद्धिः चतुर्दशसाहस्रबलं ययोः तौ यथा पारश्वधिकधानुष्कयाष्टीकप्रासिकान्वितौ परश्वधः प्रहरणमेषामिति परश्वधात् ठञ्चेति ठञ् तथा धनुः प्रहरणमेषां यष्टिः प्रहरणमेषामिति शक्तियष्ट्योरीकक् प्रासः कुन्तः प्रहरणमित्यौत्सर्गिकष्ठक् तत्र धनुषष्ठक् इषुसक्तान्नाकः ततः सेनाङ्गत्वात्कतैकवद्भावः तेनान्विताववनुगतौ ॥ ४० ॥ ज० भ०

तावित्यादि । ततोऽवचनानन्तरं तौ खरदूषणौ निर्ययतुः निर्गतौ चतुर्दशसहस्राणि परिमाणमस्य चतुर्दशसहस्रं विकारसंघेत्यादिना तदस्य परिमाणमित्यर्थे षाणः सुमङ्गालादित्वात्परदे वृद्धिः चतुर्दशसाहस्रं बलं ययोः तौ तथा परश्वधैः परशुभिर्युध्यन्ते पारश्वधिकाः धनुर्भिर्युध्यन्ते धानुष्काः शक्तिभिर्युध्यन्ते शाक्तीकाः प्रास्यन्ति तमिति प्रासोलशुडः कर्म्मणि घञ् प्रासैर्युध्यन्ते प्रासिकाः एभिरन्वितौ अनुगतौ ढधेकादिति ष्णिकक्ठण्णीकाः ॥ ४० ॥ भ०

अथेत्यादि । अथैतस्मिन् प्रस्तावे रामलक्ष्मणौ मृधे संग्रामे विशिखैः शरैरहतां हतवन्तौ हन्तिः परस्मैपदी तस्माल्लङि तस्तस्ताम् तस्य ङित्त्वे अनुदात्तेत्यादिना अनुनासिकलोपः कान् राक्षसान् विशेषणोपादानात् विशेष्यप्रतिपत्तिः प्रकृतत्वाद्वा सम्पततोऽभिपततः बङ्गमूर्द्धोबङ्गशिरसः तथा द्विमूर्द्धांस्त्रिमूर्द्धांश्च द्वित्रिग्यांधमूर्द्धेति समासान्तः षः अतएव भीमान् भयानकान् त्रिमूर्द्धांश्चेत्यत्र नश्छव्यप्रशानिति रुः पूर्व्वस्य त्वनुनासिकः विसर्जनीयस्य सः चुत्वम् ॥ ४१ ॥ ज० भ०

अथेत्यादि । निर्गमानन्तरं सम्पततः सङ्गच्छतः संमुखमागच्छतो राक्ष-

तैर्दृक्करुग्नसंभुग्नच्छुसभिन्नविपन्नकैः ।
निमग्नोद्विग्नसंह्रीणैः पप्रे दीनैश्च मेदिनी ॥ ४२ ॥
केचिद्वेपथुमासेदुरन्ये दवथुमुत्तमम् ।
सरक्तं वमथुं केचिद्व्राजथुं न च केचन ॥ ४३ ॥

सात् अर्थात् रामलक्ष्मणौ स्पर्धे युद्धे विशिखैर्व्राणैराहतां वनतनाद्यनिमामिति नस्य लोपः बङ्गमद्रोबङ्गमस्तकात् एवं द्विमूर्द्धान् त्रिमूर्द्धान् द्वित्रेमूर्द्ध इति षः न्वोर्लोपोतावितिं नस्य लोपः बङ्गशब्दोविपुलार्थश्चतुरादिसंख्यार्थकोवा अतएव भीमान् भयङ्करान् ॥ ४१ ॥ भ०

तैरित्यादि । तैः राक्षसैर्मेदिनी पप्रे पूरिता प्रापूरण इत्यस्मात्कर्मणि लिट् दृक्कैः छिन्नैः रुग्णैः भग्नहस्तपादैः सम्भुग्नैः वक्रीकृतदेहैः छुसैः संश्लिष्टशरीरैः भिन्नैः विदारितैः विपन्नकैः नष्टैः अनुकम्पायां कन् निमग्नैः परिभूतैः उद्विग्नैर्भीतैः संह्रीणैर्लज्जितैः वयमपीदृशीन्दृशां प्राप्ता इति दीनैः हा मातः हा भ्रातरित्येवम्भाषमाणैः तत्र दृश्विरुजिमुजिमथिजविजिभ्योनिष्ठाया-मोदितश्चेति नत्वम् चोःकुरिति कुः छुदिभिदिपदिभ्योरदाभ्यामिति दस्य च नः संह्रीणदृति नुदविदेत्यादिना दीङ्क्षये इत्यस्य खादय ओदित इत्योदितश्चेति नत्वम् ॥ ४२ ॥ ज० म०

तैरित्यादि । तैराक्षसैर्मेदिनी पप्रे पूरिता पृलिपूर्त्तौ कर्म्मणि ठौ कीदृशैः दृक्कैः छिन्नैः दृश्वे : कड्चेति क्तस्य नत्वं कड्च चस्य कत्वे तन्निमित्तस्य शस्य सत्वे स्यादेः सोलोपः अहस्पाद्योरिति जिः रुग्नैर्भग्नहस्तपादैः रुजोशौभङ्गे ओदित्वात् स्तूल्वाद्योरिति क्तस्य नः जस्य गत्वविधानं मग्नस्य दोर्भिर्भुवनस्य भारमित्यत्र व्याख्यातं संभुग्नैर्वक्रीकृतैः भुजोशौवक्रीकृणे पूर्व्ववत् छुसैः संश्लिष्टदेहैः छुदिरसंश्लेषणे दान्तत्वात् स्तूल्वाद्योरिति क्तस्य दस्य च नः पृणोऽदान्तदृत्यादिना पूर्व्वस्य णत्वे ष्टुभिरिति परस्य नस्य णत्वं भिन्नैर्विदारितैः विपन्नकैर्मृतैः विपूर्व्व-पदिर्मरणे वर्त्तते स्वार्थे कुत्सायां वा कः निमग्नैर्भीत्या गुप्तैः रुधिरप्रवाहे मग्नैर्व्वा उद्विग्नैर्भीतैः ओविजीभयचलनयोः संह्रीणैः ह्रीङ् लज्जासामर्थ्ययोः लज्जितैः ह्रीलिलज्जायां ह्रीभावोन्देति क्तस्य नः दीनैः सुतादिदुःखान्वितैः ओदीङ् यक्षये ॥ ४२ ॥ भ०

केचिदित्यादि । तेषामध्ये केचित् वेपथुं कम्पम् टुवेपृकम्पने आसेदुः प्राप्ताः अन्ये दवथुमुपतापमुत्तमम्महान्तं टुदुउपतापे केचिद्वमथुञ्छर्दनं सरक्तं

मृगयुमिव मृगोऽथ दक्षिणेर्म्मा
दिशमिव दाहवतीं मरावुदन्यन् ।
रघुतनयमुपाययौ त्रिमूर्द्धा
विषभृदिवोग्रमुखं पतत्रिराजम् ॥ ४४ ॥

मृगोणितं टुवमुडङ्गिरणे भ्राजथुं शोभां नैव केचन न केचिदपि टुभ्राजृदीप्तौ सर्व्वत्र ट्वितोऽथुच् ॥ ४३ ॥ ज० म०

केचिदित्यादि । तेषां मध्ये केचिद्रात्रसा वेपथुं कम्पं आसेदुः प्रापुः वपट्टडङ्चलने अन्ये दवथुं उपतापं उत्तमं महान्तं आसेदुः टुदुउपतापे केचित् वमथुं रक्तेन सह छर्दिमासेदुः टुवमउङ्गिरणे केचन भ्राजथुं दीप्तिं नासेदुः टुभ्राजृङ्णदीप्तौ सर्व्वत्र ट्वितोऽथुभावे इति अथुः ॥ ४३ ॥ भ०

मृगयुमित्यादि । अथैतस्मिन् राक्षसविध्वंसनप्रस्तावे त्रिमूर्द्धः त्रिशिरा नाम राक्षसः रघुतनयमुपाययौ उपागतः मृगयुमिव लुब्धकमिव मृगान् यातीति मृगयुः मृगयादयश्चेत्यौणादिककुप्रत्ययान्तः दक्षिणेर्म्मा दक्षिणे ईर्म्मं व्रणं यस्येति दक्षिणेर्म्मा लुब्धयोगद्दत्यनिच् यथा मृगलुब्धकव्रणितदक्षिणाङ्गः तमेव मरणायोपयाति दिशमिव दाहवतीं यथा दिशन्दावाग्नियुतामरौ निर्जले देशे मृग उदन्यन् उदकपानाभिलाष उपयाति उदकमिच्छति सुपआत्मन इति क्यच् उदकस्योदन्भावः अग्नायेत्यादिना निपातितम् तदन्तात्क्विप् शतृप्रत्ययः विषभृदिव यथा विषधरः सर्पः उग्रमुखम्भीषणमुखं पतत्रिराजं गरुडमुपयाति तद्वत्तमिति राजाहःसखिभ्यष्टच् ॥ ४४ ॥ ज० म०

मृगयुमित्यादि । अथ रक्षोवधानन्तरं त्रिमूर्द्धस्त्रिशिरा नाम राक्षसो रघुतनयं रामं उपाययौ उपागतः यथा दक्षिणेर्म्मा व्याधेन व्रणितदक्षिणाङ्गो-मृगस्तमेव मृगयुं व्याधं याति तद्वत् भृगं यातीति मृगयुर्निपातनात् दक्षिणेऽङ्गे ईर्म्मं व्याधघातव्रणं यस्य स दक्षिणेर्म्मा दक्षिणादीर्म्मादन् व्याधव्रणितदक्षिणाङ्गे मृगेऽति परस्त्वं स्वमते ईर्म्मन् शब्दोऽप्यस्ति किंवा दक्षिणे ईर्म्मं व्रणं यस्येति धर्म्मादिनित्यस्य योगविभागादन् लुब्धकयोगस्त्वभिधानात् व्रणोऽस्त्रियामीर्म्मरुरित्यमरः यथा वा उदकपानाभिलाषी मृगो मरौ निर्जलदेशे दाहवतीं दिशं उपयाति उदकं पातुमिच्छतीति धनोदकाश्वनेति क्ये डनङ् शतः यथा वा विषभृत् सर्पः उग्रमुखं भीषणवदनं पतत्रिराजं गरुडं उपयाति ॥ ४४ ॥ भ०

शितविशिखनिकृत्तकृत्स्नवक्त्रः
क्षितिभृदिव क्षितिकम्पकीर्णशृङ्गः ।
भयमुपनिदधे स राक्षसाना-
मखिलकुलक्षयपूर्व्वलिङ्गतुल्यः ॥ ४५ ॥

इति भट्टिकाव्ये चतुर्थः सर्गः ॥

शितेत्यादि । त्रिमूर्द्धोराक्षसानामभयमुपनिदधे उपनिहितवान् कीदृशः शितविशिखैस्तीक्ष्णविशिखैः निकृत्तानि छिन्नानि कृत्स्नानि सर्व्वाणि वक्त्राणि मुखानि यस्य सः क्षितिभृदिव भूधर इव कीदृशः क्षितिकम्पकीर्णशृङ्गः क्षितेर्भूमेः कम्पेन कीर्णानि क्षिप्तानि शृङ्गानि यस्य क्षितिभृतः अखिलस्य सर्व्वस्य कुलस्य क्षये विनाशे यत् पूर्व्वं लिङ्गं चिह्नं तेन तुल्यः असावप्यखिलराक्षसक्षयस्य पूर्व्वलिङ्गतुल्यः ॥ ४५ ॥ ज० म०

इति भट्टिकाव्यटीकायाञ्जयमङ्गलाख्यायामकीर्णकाण्डे
रामप्रवासश्चतुर्थः सर्गः ॥ ४ ॥

शितेत्यादि । शितविशिखैस्तीक्ष्णवाणैर्निकृत्तानि छिन्नानि कृत्स्नानि सर्व्वाणि वक्त्राणि मुखानि यस्य स त्रिमूर्द्धोराक्षसानां भयमुपनिदधे उपनिहितवान् क्षितिभृदिव पर्व्वत इव क्षितिकम्पात् कीर्णानि विक्षिप्तानि शृङ्गाणि यस्य स तथा त्रिमूर्द्धः किम्भूतः अखिलकुलक्षयपूर्व्वलिङ्गतुल्यः अखिलस्य कुलस्य क्षयः तस्य यत्पूर्व्वलिङ्गं पूर्व्वचिह्नं भाविक्षयसूचक उत्पातस्तत्तुल्यः केचित्तु अखिलकुलस्य क्षये पूर्व्वलिङ्गं आदिचिह्नं त्रिमूर्द्धस्तादृशः पर्व्वत इत्याहुः ॥ ४५ ॥ भ०

इति सद्वैद्यगौराङ्गमल्लिकात्मजश्रीभरतसेनकृतायां भट्टिटीकायां सुग्धबोधिन्यां प्रकीर्णकाण्डे त्रिमूर्द्धवधो नाम चतुर्थः सर्गः ॥

पञ्चमः सर्गः

निराकरिष्णू वर्त्तिष्णू वर्द्धिष्णू परितो रणम्।
उत्पतिष्णू सहिष्णू च चेरतुः खरदूषणौ ॥ १ ॥
तौ खड्गमुषलप्रासचक्रबाणगदाकरौ।
अकार्ष्टामायुधच्छायं रजःसन्तमसे रणे ॥ २ ॥

निरेत्यादि। खरदूषणौ रणम्परितः समन्तात् अभित इत्यादिना द्वितीया चेरतुः भ्रान्तौ निराकरिष्णू शत्रुनिराकरणशीलौ वर्त्तिष्णू अभिमुखं वर्त्तनशीलौ न पलायनशीलौ वर्द्धिष्णू मायया महाप्राणोड्डावनशीलौ उत्पतिष्णू नभउत्पतनशीलौ सहिष्णू शस्त्रप्रहारसहनशीलौ सर्व्वत्रालङ्घीत्यादिना ष्णुच् ॥१॥ज०भ०

निराकरिष्णू इत्यादि। खरदूषणौ रणं परितः सर्व्वतश्चेरतुः चरगत्यां ठी धिक्समयेति परितोयोगे द्वितीया निराकरिष्णू शत्रुनिराकरणशीलौ वर्त्तिष्णू वर्त्तनशीलौ अर्थात् प्रतियोद्धृसंमुखे रणं परित इति वा अनुषङ्गनीयं वर्द्धिष्णू मायया वर्द्धनशीलौ उत्पतिष्णू आकाशादुत्पतनशीलौ सहिष्णू प्रतियोद्धृशस्त्रघातादिसहनशीलौ सर्व्वत्र जिभ्राजभूसहेत्यादिना कर्त्तरीष्णुः शीलार्थता तु ढधेक्त्यव्येति सूत्रे शीलार्थे ष्ट्रिल्युक्तं किन्तु ष्ट्रणविधायकसूत्रे शीलार्थता नोक्ता अतएव ष्ट्रणाद्यः कतिचित् प्रत्ययाः शीलार्थेऽपि भवन्तीति सूचनात् किं वा अभिधानाच्छीलार्थतानुक्तावपि न क्षतिः निराकुरुतः शत्रूनित्यादिवाक्यं विधेयम् ॥ १ ॥ भ०

तावित्यादि। रणे रणभूमौ रजःसन्तमसे सङ्कुतन्तमः सन्तमसं अवसमन्धेभ्यस्तमसस्त्यच् रजसा सन्तमसं अस्मिन् इति रजःसन्तमसस्मिन् रजसा कृताम्धकारे तौ खरदूषणौ आयुधच्छायमायुधबाहुल्यमकार्ष्टाम् कृतवन्तौ आयुधानां छायेति छायाबाहुल्य इति नपुंसकत्वे ह्रस्वत्वं खड्गादीनाम्बाणानान्द्वन्द्वैकवद्भावङ्कृत्वा पश्चात्तेन सहिता गदेति शाकपार्थिवादित्वात्समः अन्यथा समुदायस्य जातिरप्राणिनामित्येकवद्भावेन नपुंसकलिङ्गता स्यात् बाणगदमिति खड्गमुषलप्रासचक्रबाणगदाः करे येषामिति समासे प्रहरणार्थेभ्य इत्यादिना करशब्दस्य परनिपातः ॥ २ ॥ ज० भ०

अथ तीक्ष्णायसैर्बाणैरधिमर्म्म रघूत्तमौ।
व्याधं व्याधममूढौ तौ यमसाच्चक्रतुर्द्विषौ॥ ३॥
हतबन्धुर्जगामासौ ततः शूर्पणखा वनात्।
पारेसमुद्रं लङ्कायां वसन्तं रावणं पतिम्॥ ४॥

तावित्यादि। खरदूषणौ रणे युद्धे आयुधानां बहूनां क्षायमकार्ष्टां क्षतवन्तौ रणपदं रणभूमिवाचकमित्यन्ये सम्यक्क्षमः सन्नमसं समवान्नात्तमस इति अः रजसा सन्नमसं यत्र रणे आयुधानां बाहुल्यात् क्षायशब्दस्य नपुंसकत्वमभिधानात् कोटयौ खड्गादयः करे ययोस्तौ अकार्ष्टामिति क्षजञ्जांसि व्रजवदेति त्रिः॥ २॥ भ०

अथेत्यादि। अथैतस्मिन् संग्रामे रघूत्तमौ रामलक्ष्मणौ कर्तृभूतौ कर्म्मभूतौ द्विषाविति सत्सूद्विषेत्यादिना क्विप् यमसाच्चक्रतुः यमाधीनौ क्षतवन्तौ तदधीनवचन इति सातिः तीक्ष्णायसैर्बाणैः तीक्ष्णमायसम्फलं येषामिति व्याधं व्याधं विद्ध्वा विद्ध्वा आभीक्ष्ण्ये णमुल् तत्र समानकर्तृकयोः पूर्व्वकाल इति वर्त्तते अभीक्ष्ण्ये द्वे भवत इति द्विर्व्वचनं अधिमर्मेति विभक्त्यर्थेऽव्ययीभावः अमूढौ सावधानौ रामलक्ष्मणौ मर्म्मवेधमेवाह॥ ३॥ ज० भ०

अथेत्यादि। तयोर्विक्रमानन्तरं रघूत्तमौ कर्तृभूतौ तीक्ष्णायसैस्तीक्ष्णफलैर्बाणैरधिमर्म्म जीवितस्थाने व्याधं व्याधं विद्ध्वा विद्ध्वा तौ द्विषौ खरदूषणौ कर्म्मभूतौ यमसात् यमाधीनौ चक्रतुः रघूत्तमौ किम्भूतौ अमूढौ रणपण्डितौ किं वा खरदूषणौ अमूढौ अस्त्रवर्षेऽप्यसम्भ्रान्तौ मर्म्मवेधे सावधानौ वा रणपण्डितावपि वा तीक्ष्णमायसमयोविकारः फलं यत्र मर्म्म विध्यतीति कारकार्थेऽव्ययीभावः व्यधौताडे इत्यस्मात् क्षणम् वाभीक्ष्ण्ये इति क्षणम् आभीक्ष्ण्ये द्वित्वं लोकतः सिद्धं कात्स्न्न्यायत्योः सम्पद्यकादावित्यधीनत्वे वसात् किं वा देयत्वान्नेति देयेऽर्थे चकारात् वसात् त्वासुसित्यादिना द्विषः क्विप्॥ ३॥ भ०

हतेत्यादि। असौ शूर्पणखा हतबन्धुः व्यापादितभ्रातृद्वया ततोवनाद्दण्डकारण्यात् रावणमतिं प्रभुं शरणङ्गाम गतवती पारेसमुद्रं समुद्रस्य पार इति पारेमध्येषष्ठ्यावेत्यव्ययीभावः तत्सन्नियोगेन पूर्व्वपदस्यैकारान्तत्वमश्चात्यन्तमी नाव्ययीभावादित्यस्भावः समुद्रस्य पारे स्थितायां लङ्कायां वसन्तं रावणमिति॥ ४॥ ज० भ०

हतबन्धुरित्यादि। असौ शूर्पणखा हतबन्धुः सती परेण व्यापादितभ्रातृ-

संप्राप्य राक्षससभं चक्रन्द क्रोधविह्वला ।
नामग्राहमरोदीत् सा भ्रातरौ रावणान्तिके ॥ ५ ॥
दण्डकाम्यध्यवात्तां यौ वीर रक्षःप्रकाण्डकौ ।
त्वया संख्ये ऽक्षपातां तौ सभृत्यौ भूमिवर्द्धनौ ॥ ६ ॥

द्वया सती ततोवनात् दण्डकारण्यात् रावणं पतिं प्रभुं जगाम पारेसमुद्रं समुद्रपारे स्थितायां वसन्तं पारे समुद्रमित्यव्ययीभाव एत्वञ्च निपातनात् त्रीय्वो-र्वेति सप्तम्याम: प्रतीति पाठे रावणं प्रति लक्षीकृत्य जगाम ॥ ४ ॥ भ०

संप्राप्येत्यादि । सा शूर्पणखा राक्षससभं संप्राप्य ढौकित्वा राक्षसानां सभेति सभाराजेत्यादिना नपुंसकता चक्रन्द क्रन्दनङ्कृतवती क्रोधविह्वला क्रोध-विवशा भ्रातरौ खरदूषणावरोदीत् रुदितवती नामग्राहन्नाम गृहीत्वा भ्रातरौ खरदूषणाविति नाम्ना दिग्विग्रहोरिति णमुल् अत्र नामग्रहणविशिष्टाया रोदनक्रियाया व्याप्तुमिष्टत्वाद्रुदिः सकर्मकः रावणान्तिके रावणसमीपे सप्तम्य-धिकरणे चेति चकाराद्दूरान्तिकार्थेभ्य इति सप्तमी तयोः किञ्जातमिति रावणेन पृष्टाह ॥ ५ ॥ ज० म०

संप्राप्येत्यादि । सा शूर्पणखा राक्षससभं संप्राप्य चक्रन्द राक्षसानां सभा राक्षससभं क्लीवत्वमभिधानात् क्रोधेन विह्वला व्याकुला सती भ्रातरौ खर-दूषणौ नामग्राहं नाम गृहीत्वा रावणस्यान्तिके समीपे अरोदीत् रुदेर्ण्यां ण्यां रुदाद्यस्मिरितीम् पूर्वं क्रन्दनसक्तं अत्र नामग्रहणमुक्तमिति भेदः अश्रु-विमोचनमात्रे रुदिरकर्मकः शब्दयुक्तक्रन्दने तु सकर्मकः इति प्राञ्चः भ्रातरौ चक्रन्द आजुहाव क्रदि आह्वाने नामग्राहमरोदीदित्यन्वय इति केचित् नाम-ग्राहमिति नाम्नोग्रहणमभिधानात् किं वा हा खरदूषणेति नाम्नोग्राहो-ग्रहणं यत्रेति वा रोदनक्रियाया विशेषणं ग्राहोघजन्तः ॥ ५ ॥ भ०

दण्डकामित्यादि । हे वीर दण्डकात् दण्डकारण्यप्रविवेशात् अध्यवात्ताम् अध्युषितवन्तौ वसनिवासयोरित्यस्मात्लुङ् हलन्तलक्षणा वृद्धिः सःस्येत्यादिना धातु-सकारस्य तत्वम् झलोझलीति सिचोलोपः रक्षःप्रकाण्डकौ प्रशस्तौ राक्षसौ प्रशंसावचनैश्चेति सः ततः स्वार्थे कन् स्वार्थिकाश्च प्रकृतितोलिङ्गवचनान्यतिवर्त-न्तइति नपुंसको न भवति अन्यथा रूढिशब्दाः प्रशंसावचना आविष्टलिङ्ग-त्वादन्यलिङ्गेऽपि जातिशब्दे स्वलिङ्गोपादानादेव समानाधिकरणाः स्युः यथा गोप्रकाण्डमिति तौ त्वयास्मत्भ्रात्रा संख्ये युद्धे भूमिवर्द्धनावक्षपाताम् हतौ

विग्रहस्तव शक्रेण बृहस्पतिपुरोधसा ।
सार्द्धं कुमारसेनान्या शून्यश्चासीति को नयः ॥ ७ ॥

कर्म्मणि क्तुङ् अचिरप्रभावे रूपम् वर्द्धत इति वर्द्धनौ क्त्यल्युटोबहुलमिति कर्त्तरि ल्युट् भूमेर्व्वर्द्धनाविति सः भस्मीकृतशरीरस्य भूमौलीयमानत्वात् सभ्रत्यौ नैकाकिनौ ॥ ६ ॥ ज० म०

दण्डकामित्यादि । एवंप्रकारेणारोदीदित्यन्वयः वीरेति सोपालम्भसम्बोधनं यौ रक्षःप्रकाण्डकौ प्रशस्तराक्षसौ दण्डकामध्यवात्तां सभ्रत्यौ तौ भ्रभ्यां मनुष्याभ्यां संख्येसंग्रामे भूमिवर्द्धनौ अक्षपातां क्षयः कर्म्मणि टो दृगुडुर्म्मढीति कित्वान्न गुणः भवस्तु क्षितिवर्द्धन इति त्रिकाण्डशेषः अरण्ये दण्डकाशब्दः स्त्रीलिङ्गः क्वायोध्यायाः पुनरुपगमो दण्डकायां वने व इति भवभूतिः दण्डकानिति पाठे दण्डकारण्यसन्निवेशानित्यर्थः केचित्तु दण्डकाशब्दः स्त्रीलिङ्गबहुवचनान्त एव इत्युक्ता दण्डका इति प्रसन्नं पठन्ति अध्यवात्तामिति अधिपूर्व्वाद्वसेष्टौतां द्यांसि: सत्यरे इति सस्य तः अनिसत्वात् त्रिः रक्षसां मध्ये प्रकाण्डकौ प्रशस्तौ एकार्थत्वात् कर्म्मधारयो वा समासे विशेषणमपि परं स्यात् प्रशंसावचनैश्चेति परस्त्वं यद्यपि प्रकाण्डमुद्वृतलज्जाविप्लवमरेणोक्तं दृश्यते च गोप्रकाण्डमित्यादावजहल्लिङ्गता तथापि कप्रत्यये सति स्वार्थिकाः प्रकृतितो लिङ्गवचनान्यतिवर्त्तन्तेऽपीति न्यायात् पुंस्त्वं वस्तुतस्तु पुंलिङ्गोऽपि प्रकाण्डशब्दोऽस्ति निगडाक्रीडनलप्रकाण्डकाण्डा इति पुनपुंसकवर्गे हेमचन्द्रः उद्वृप्रकाण्डौ द्वौ प्रशंसायामिति हलायुधः भूमिं वर्द्धयत इति नन्द्यादित्वादनः ॥ ६ ॥ भ०

विग्रहेत्यादि । बृहस्पतिः पुरोधा मन्त्री यस्य शक्रस्य तेन कार्य्येषु पुरा धीयत इति पुरोधाः पुरःपूर्व्वाद्धाञः सर्व्वधातुभ्य असुन् तथा कुमारः कार्त्तिकेयः सेनानीर्यस्य सेनां नयतीति सत्सूद्विषेत्यादिना क्विप् तेन शक्रेण सह सार्द्धं तव विग्रह आसीत् इदानीं कार्य्यनिपुणाभावात्, शून्यश्चासि तासस्योर्लोपइति सकारलोपः तस्मात्को नयः नय एव न भवतीत्यर्थः तदेव दर्शयन्नाह ॥ ७ ॥ ज० म०

विग्रह इत्यादि । शक्रेण सार्द्धं तव विग्रहो विरोधस्तथापि त्वं शून्यः कार्य्याकार्य्यविचाररहित एवासि इति को नयः न कापि नीतिस्तवेत्यर्थः किम्भूतेन बृहस्पतिपुरोधसा बृहतां देवानां गुरुत्वात्पतिः बृहस्पतिर्म्मनीषादित्वा-

यद्यहं नाथ नायास्यं विनसा हृतबान्धवा ।
नाशास्यस्त्वमिदं सर्वं प्रमाद्यंश्चारदुर्बलः ॥ ८ ॥
करिष्यमाणं विज्ञेयं कार्यं किन्तु कृतं परैः ।
अपकारे कृतेऽप्यज्ञो विजिगीषुर्नवा भवान् ॥ ९ ॥

त्रिपातः स पुरोधाः पुरोहितो यस्य कुमारः कार्तिकेयः सेनानीः सेनापतिर्यस्य सेनां नयतीति क्विप् कव्यादयनेकाच इति यत्वं लोपोऽस्यसोरिति अलोऽसौ स लोपः ॥ ७ ॥ भ०

यदीत्यादि । विनसा विगता नासा यस्याः नासैव नासिकेति केण इति स्वार्थे रूपम् तस्या नसादेशस्य विधीयमानत्वात् अत्र सम्भव एव नास्ति विनसेति पाठान्तरम् तत्र विगता चासौ नासिका च विनासिका तत इत्यभूतलक्षणायां हृतोद्यायां पहद्दन्नोमासदित्यादिना नसादेशः विगतया नासिकोपलक्षिते त्यर्थः विगता नासिका अस्या इति बहुव्रीहिणा व्याख्याने अजनासिकेत्यादिना अत्र नसादेशश्च प्राप्नुतः तस्य संज्ञाविषयत्वात् उपसर्गाच्चेत्यसंज्ञायां विधीयमानो न भवति येर्योक्तव्यइति यादेशो बाधकः हे नाथ यद्यहं विनसा हृतबान्धवा नायास्यन्नायाता भविष्यम् तदा तदिदं सर्वम्भ्रात्रोर्वधन्नाशाच्छेदञ्च नाशास्यः न ज्ञातोऽभविष्यः क्रियातिपत्तौ लिङ् अज्ञाने कारणमाह प्रमाद्यन् विषयेषु प्रमादङ्कुर्वन् चारदुर्बलः चारहीनः चाराहि चक्षूराज्ञाङ्कार्य्याकार्य्यज्ञानाय लोके चरतीति चरः पचाद्यच् चर एव चारः प्रज्ञादित्वादण् ॥ ८ ॥ज०म०

यदीत्यादि । हे नाथ विनसा हृतबान्धवा च सती यद्यहं नायास्यं तदा त्वमिदं सर्वं पूर्व्वोक्तं नाशास्यः याशाभ्यां ध्वर्थासम्भवे थो अज्ञाने हेतुमाह प्रमाद्यन् विषयेषु अनवधानतां गच्छन् यन्थो प्रमादीति प्रमादीत्वाद्दीर्घः प्रमादोऽनवधानता चारेण दुर्बलो हीनः राजा चरैर्जगत्कार्य्यं प्राप्नुयाल्लोकसम्मतैरिति हि शास्त्रं विनसा इति विगता नासा नासिका यस्याः सा विनसा केचित्तु विनतया नासिकया उपलक्षिता विशेषणे हृतोयादिदन्नेति नसादेश इत्याहुः बन्धुरेव बान्धवः चर एव चारः स्वार्थे णः ॥ ८ ॥ भ०

करिष्यमाणमित्यादि । परैः शत्रुभिरपचयचिकीर्षया करिष्यमाणङ्कार्य्यं विज्ञेयम् किन्तु कृतमेव यत्तदवश्यमेव विज्ञेयमित्यर्थः त्वम्पुनः परैरपकृतोऽपि अज्ञोऽविदितस्वरूपः अतोविजिगीषुर्नवा भवान् क्षमो न राज्यं सम्भावयतीत्यर्थः ॥ ९ ॥ ज० म०

इतस्त्वं पात्रेसमितैः खट्वारूढः प्रमादवान् ।
पानशौण्डः श्रियं नेता नात्यन्तीनत्वमुन्मनाः ॥ १० ॥
अध्वरेष्वग्निचित्वसु सोमसुत्वत आश्रमान् ।
अत्तुं महेन्द्रियं भागमैति दुश्चवनोऽधुना ॥ ११ ॥

करिष्यमाणमित्यादि । परैः शत्रुभिः करिष्यमाणमपि कार्यं विज्ञेयं अर्थाज्जिगीषुणा किन्नु कृतं तदवश्यमेव विज्ञेयमित्यर्थः परैः कृतेऽपि अपकारे भवान् अज्ञः अतो भवान् नवा विजिगीषुः जेगिःसनश्चोरिति गिः जानातीति ज्ञः कगज्ञाग्रीति कः उखेचीत्यादिना आकारलोपः आदन्तात् डेनेष्टसिद्धौ कगज्ञाइत्यत्र ज्ञाग्रहणेन हनजनादित्यस्य उपपदस्यैव विषयः कगज्ञा इत्यस्य तु उपपदेऽनुपपदे च विषय इति ज्ञापितं वाशब्दः आद्येपक्षे वा ॥ ९ ॥ भ०

इत इत्यादि । अत्यन्तङ्गामिनीति अवारपारेत्यादिना खः तस्य भावोऽत्यन्तीनत्वं नैवात्यन्तीनामत्यन्तगामिनीं श्रियन्नेता न प्रापणशीलः ल्युट्निति ताच्छीलिकस्तृण् नलोकेति षष्ठीप्रतिषेधः यद्यपि महोदयं राज्यमाप्नुवानसि तथापि न चिरकालमित्यर्थः यतस्त्वमुन्मनाः भ्रान्तचित्तः यतः पानशौण्डः पाने प्रसक्तः सप्तमी शौण्डैरिति सः अतएव प्रमादवान् अतोऽपि खट्वारूढः उत्पथप्रस्थितः खट्वाक्षेप इति द्वितीया सः तत एव पात्रेसमितैः भोजन एव सन्निहितैः अनुजीविभिर्वृतः पात्रेसमितादयश्चेति क्षेपे सः ॥ १० ॥ ज० म०

इत इत्यादि । त्वं श्रियं आत्यन्तीनत्वं अत्यन्तगामिनं न नेता न प्रापयिष्यसि नीजोद्विकर्मकात् ल्युण् ढ्वेकलोपेत्यादौ शीलार्थे ल्युणवर्जनात् न षौ अत्यन्तशब्दात् ढ्वेकादिति तद्गामिन्यर्थे षीनः तत्वेत्वजात्याख्यइति पुम्वत् हेतुमाह पात्रेसमितैर्भोजनपात्र एव समितैः सन्निहितैः कार्यान्तराक्षमैरनुजीविभिर्वृतोवेष्टितः अत्राक्षेपे समासो विभक्त्यलोपश्चाभिधानात् खट्वारूढः विपथप्रस्थितः क्षेपे खट्वाया द्वितीया तत्पुरुष इति परे खमते समासे सति मण्डूकादिवत् स्वभावाद्धान्तरे वृत्तिः प्रमादवान् अनवधानतायुक्तः यतः पानशौण्डः पाने प्रसक्तः अतएव उन्मना उद्भ्रान्तचित्तः ॥ १० ॥ भ०

अध्वरेष्वित्यादि । त्वय्येवम्भूतेऽधुना दुश्चवन इन्द्रः आश्रमानिति आगच्छति आङ्पूर्वस्यैषः एत्येधत्यूठ्सु इति वृद्धिः सोमसुत्वतः सोमं सुनोतीति सोमेसुज इति क्विप् सोमसुतः सन्ति येषामाश्रमेष्विति मतुप् तस्यौ मत्वर्थ इति भत्वे तका-

आमिक्षीयं दधि क्षीरं पुरोडाश्यं तथौषधम् ।
हविर्हैयङ्गवीनञ्च नाप्युपन्नन्ति राक्षसाः ॥ १२ ॥

रस्य जस्त्वन्न भवति झयदृति मतोर्व्वत्वम् किमर्थमेतीत्याह अत्तुमत्तयितुमहेन्द्रियमागं महेन्द्रोदेवता अस्येति महेन्द्राद्घाणौ चेति घः क अध्वरेषु यज्ञेषु अग्निचित्वत्सु अग्निश्चितवन्तोऽग्निचितः आहिताग्नयः अग्नौचेरिति क्विप् ते सन्ति येष्विति पूर्ब्ववन्मतुप् ॥ ११ ॥ ज० म०

अध्वरेष्वित्यादि । तवैव प्रमादात् अधुना इदानीं दुश्चवन इन्द्रः अध्वरेषु यज्ञेषु महेन्द्रियं महेन्द्रदैवतं भागं अत्तुं भक्षयित्तुं आत्मानेति आगच्छति स भागोराक्षसयाह्यएवासीदिति भावः कीदृशेषु अग्निचित्वत्सु अग्निं चितवान् अग्निचिन्मुनिः त्वासुसिति चेःक्विप् खस्यतनूपिति ततोऽस्त्यर्थे मोऽसमभ्याहृतः नदं तसाविति पदत्वनिषेधात् न चपोऽवेजव कीदृशान् सोमसुत्वतः सोमं सुतवान् सोमसुत् यजमानः तद्युक्तान् पूर्ब्ववत् क्विवादि सोमोलतासवनं सन्धानं महेन्द्रोदेवता अस्येति विकारसंघेत्यादिना इयः ॥ ११ ॥ भ०

आमीत्यादि । दग्ना सहितं घृतं पय आमिक्षा तस्मै हितमामिक्षीयं विभाषाहविरपूपादिभ्य इति छयतौ दधि च क्षीरञ्चेति विभाषा इच्छेत्यादिना व्यञ्जनत्वादेकवद्भावः पुरोडाशाय हितमौषधन्नीवारतण्डुलादि पुरोडाश्यमपूपादित्वाद्यत् ओषधिरेवौषधम् ओषधेरजातावित्यण तण्डुलानामजातित्वात् स्वार्थिकाश्च प्रकृतितो लिङ्गवचनान्यतिवर्त्तन्त इति नपुंसकलिङ्गता हविः ह्रियत इति हविः अर्चिशुचीत्यौणादिक इस् हैयङ्गवीनं घृतं ह्यो गोदोहस्य विकार इत्यर्थे हैयङ्गवीनसंप्रायामिति निपातनात् खञ् ह्यिं त्वादेशश्च तानि नाप्युपन्नन्ति राक्षसाः त्वय्युदासीने सति इदानीङ्कार्य्यप्रदर्शनेन प्रोत्साहयितुमाह ॥१२॥ ज० म०

आमिक्षीयमित्यादि । अधुना राक्षसा अपि एतानि वस्तूनि न उपभुञ्जन्ति अपिशब्दः पूर्ब्वापेक्षया कानि आमिक्षायै हितं दधि दुग्धञ्च व्यञ्जनत्वे समाहार इति परः स्वमतेऽभिधानात् आमिक्षा सा घृतोष्णेया क्षीरेसादधियोगतः हितार्थे ईयः तथा पुरोडाशाय हितं औषधं नीवारतण्डुलादि पुरे दश्यते इति पुरोडाशो ऽन्नविकारः पिष्टकादिः निपातनात् ततोहितार्थे यः ओषधिशब्दात् स्वार्थे ष्णः औषधं क्वचित् स्वार्थिका प्रकृतितो लिङ्गवचनान्यतिवर्त्तन्त इति क्लीवत्वं हविर्हव्यञ्च ह्यदाने त्वासुसिसितीम् ह्योगोदोहस्य विकारोहैयङ्गवीनं निपातनात् तत्तु हैयङ्गवीनं यत् ह्योगोदोहोद्भवं घृतमित्यमरः ॥१२॥भ०

युवजानिर्धनुष्पाणिर्भूमिष्ठः खविचारिणः ।
रामो यत्नद्रुहो हन्ति कालकल्पशिलीमुखः ॥ १३ ॥
मांसान्योष्ठावलोप्यानि साधनीयानि देवताः ।
अश्नन्ति रामाद्रक्षांसि विभ्यत्यश्नुवते दिशः ॥ १४ ॥

युवेत्यादि । युवतिः यौवनवती जाया यस्य युवजानिः जायाया निङ् वलिलोपः स्त्रियाः पुंवद्भावात् स्त्रीप्रत्ययो निवर्त्तते धनुष्पाणिः पाणौ धनुर्यस्य प्रहरणेत्यादिना परनिपातः भूमिष्ठः भूमौ तिष्ठतीति भूमिष्ठः नाकाशचरः सुपिस्थ इति कः अम्बाम्बेत्यादिना षत्वम् कालकल्पशिलीमुखः मृत्युतुल्यशरः रामो राक्षसान् हन्ति खविचारिणः आकाशचरणशीलान् सुप्यजातावितिणिनिः ॥ १३ ॥ ज० म०

युवजानिरित्यादि । भूमिष्ठोऽपि रामः खविचारिणोऽपि यत्नद्रुहो राक्षसान् हन्ति भूमौ तिष्ठतीति हनजनादिति डः षत्वं मनीषादित्वात् खे आकाशे विचरितुं शीलं येषां ते तथा सुवन्नोपपदे ताच्छील्ये णिन्निति परः खमते खे विचरन्तीति गमादित्वाणिन् यत्नाय द्रुह्यन्तीति क्विप् कीदृशो रामो युवजानिः युवती जाया यस्य स तथा बहुव्रीहौ जायाया इज्जानश्चेति परः खमते जाया समानार्थौ जानिशब्दोऽस्ति जनी सौभाग्यिनीबध्वोरित्यनुशासनात् जनीशब्दस्य स्वार्थिकष्ण्यन्तस्य जानिरिति रूपमत्वा पुंवत् स्त्र्युक्तपक्ष इति पुंवद्भावः धनुः पाणौ यस्य स तथा षत्वविधानं गवाक्षजालैरित्यत्र व्याख्यातं ईषदूनः कालः कालकल्पो यमतुल्यइत्यर्थः तादृशः शिलीमुखो बाणो यस्य स तथा त्यादेश्चोने इति कल्पः ॥ १३ ॥ भ०

मांसेत्यादि । ओष्ठावलोप्यानि ओष्ठाभ्यां छेदार्हाणि अवद्यानि वा अर्हार्थे अवद्यार्थे वा कृत्यः कृत्यैरधिकार्थवचन इति सः । साधनीयानि यत्नस्य साधनाय हितानि तस्मै हितमिति छः सावनीयानीति पाठान्तरम् तत्र सवनं स्नानं तद्योगात्स्नातकोऽपि तथोच्यते तत्र भवः सावनो यत्नः तस्मै हितानीति छः तानि मांसानि देवता अश्नन्ति भुञ्जते न राक्षसा रक्षांसि किन्तु रामाद्बिभ्यति वानपुंसकस्येति शतुर्जुसभावपक्षे रूपं दिशोऽश्नुवते व्याप्नुवन्ति ॥ १४ ॥ ज० म०

मांसानीत्यादि । इदानीं देवता मांसानि अश्नन्ति रक्षांसि तु रामाद्बिभ्यति दिशोऽश्नुवते व्याप्नुवन्ति पलायन्तइत्यर्थः कीदृशानि मांसानि ओष्ठावलोप्यानि छेत्तुं अवद्यानि लुप्छेदने तेभ्योऽवद्यार्हे इति अवद्यार्थे ण्यण्

कुरु बुद्धिं कुशाग्रीयामनुकामीनतां त्यज ।
लक्ष्मीं परम्परीणां त्वं पुत्रपौत्रीणतां नय ॥ १५ ॥
सहायवन्त उद्युक्ता बहवो निपुणाश्च याम् ।
श्रियमाशासते लोलां तां हस्तेकृत्य मास्वसीः ॥ १६ ॥

साधनीयानि स्वर्गादेः साधनाय यज्ञाय हितानि सुरसतायाः साधनं घृतादि तेन संस्कृतानि वा अश्नन्तीति अश भोजने आद्योरित्यालोपः विभ्यतीति त्रिभीलिभीत्यां शतः ह्लादीरेद्विः द्वेः शतुर्नुनृशाविति पक्षे नुणोऽभावः अत्यन्तमिति केचित् तदा अन्तोऽद्वेरित्यत् अगूङ्लव्याप्तिसंहत्योः अशूधोरित्युव् मान्तोऽदनतः ॥ १४ ॥ ज० म०

कुर्वित्यादि । कुशाग्रीयाङ्कुशाग्रमिव सूक्ष्मां कुशाग्राच्छ इति इवार्थे छः स्थूलबुद्धिर्माभूदित्यर्थः अनुकामीनतान्त्यज यथेच्छगामितान्त्यज अवारपारेत्यादिना खः परम्परीणाम्परांश्चापरांश्च अनुभवतीत्यर्थे परापरशब्दात् परोवरेत्यादिना खः परादेश्च तां लक्ष्मीं क्रमायातान्त्वम्पुत्रपौत्रीणतान्नय पुत्रांश्च पौत्रांश्चानुभवतीति खः तस्य भावः पुत्रपौत्रानुगामिनीङ्कुर्वित्यर्थः ॥१५॥ज०म०

कुर्वित्यादि । त्वं बुद्धिं कुशाग्रीयां कुशाग्रमिव सूक्ष्मां कुरु विकारसंज्ञेति कुशाग्रादिभ्यो ईयः अनुकामीनतां कामस्य अभिलाषस्य अनु पश्चात्कामितां यथेष्टाचरणं त्यज अनुकामात्तत्कामिन्यर्थे ढघेकादितीनः परम्परीणां क्रमादायातां लक्ष्मीं पुत्रपौत्रीणतां पुत्रपौत्राधीनतां नय प्रापय परञ्च परतरञ्च इति इन्हे परम्परादेशो निपातनात् ततस्तदनुभवतीत्यर्थे पूर्ववेण ईनः ॥ १५ ॥ भ०

सहेत्यादि । यान्च श्रियन्त्वदीयां धौर्योपात्तां सहायवन्तः ससहाया उद्युक्ता उत्साहवन्तो निपुणाः कुशला आशासते इच्छन्ति आङः शासुइच्छायामित्यादादिकस्यात्मनेपदिनो रूपम् आत्मनेपदेष्वनत इत्यदादेशः तां हस्तेकृत्य स्वीकृत्य मास्वसीः आश्वासमा कार्षीः चञ्चलत्वात् यदाह लोलामिति ह्लन्तक्षण श्वसजाग्टणीति वृद्धिप्रतिषेधः टुटटीटीति सिचोलोपः नित्यं हस्ते पाणाविति गतिसंज्ञायां समासे ल्यबादेशः तां लोलतान्दर्शयन्नाह ॥ १६ ॥ ज० म०

सहायवन्तइत्यादि । सहायवन्तः प्रशस्तसहाययुक्ता उद्युक्ता उद्योगिनो बहवोनिपुणाः कर्मकुशला यां श्रियं आशासते इच्छन्ति तां श्रियं हस्तेकृत्य स्वीकृत्य मास्वसीः आश्वासं माकार्षीः यतोलोलां चञ्चलां आङः शास इच्छायां अदादिरात्मने पदी हस्तेशब्दः शप्रत्ययप्रतिरूपकोऽव्ययः स्वीकारे

लक्ष्मीः पुंयोगमाशंसुः कुलटेव कुतूहलात् ।
अन्तिकेऽपि स्थिता पत्युश्छलेनान्यं निरीक्षते ॥ १७ ॥
योषिद्वृन्दारिका तस्य दयिता हंसनादिनी ।
दूर्वाकाण्डमिव श्यामा न्यग्रोधपरिमण्डला ॥ १८ ॥

वर्त्तते हस्ते पाणौ प्राध्वमित्यादिना समासः व्यादनजःक्रोयस्तु आङः शासछ्यांसिः इसादेः सेम इत्यादौ त्रसवर्ज्जनान्न त्रिः ॥ १६ ॥ भ०

लक्ष्मीरित्यादि । त्वयैवं न मन्तव्यम् अयैः प्राप्यमानापि न मय्यरि त्यजतीति यतः छलेन व्याजेन अन्यन्निरीक्षते किमर्थं पुंयोगमाशंसुः अभिलषन्ती सनाशंसभिक्षउः कुतूहलात् कोऽस्य विशेष इति स्नेहादन्तिके अदूरेऽपि स्थिता पत्युः दूरान्तिकार्थैरित्यादिना षष्ठी कुलटेव बन्धकीव शकलम्बादिषु दर्शनात्परुषम् युवजानिरित्युक्तत्वोषित्प्रलोभनायाह ॥ १७ ॥ ज० म०

लक्ष्मीरित्यादि । लोलतां दर्शयति लक्ष्मीः पत्युरन्तिके स्थिताऽपि सुतरां दूरस्था कुतूहलात् अन्यं पुरुषं छलेन व्याजेन निरीक्षते केनापि छिद्रेण गन्तुमित्यर्थः यतः पुंयोगमाशंसुः अभिलषन्ती एकेन पुंसा तत्प्रिया-स्त्रीत्यर्थः अतएव कुलटा इव अस्तीव कुलान्यटति पचादित्वादन् मनीषादित्वा-दकारलोपः सनभिक्षाशंसउरिति आङ्पूर्व्वशंसेरुः ॥ १७ ॥ भ०

योषिदित्यादि । योषिच्चासौ वृन्दारिका चेति वृन्दारकेत्यादिना सः रूपेण प्रियेत्याह दयिता प्रियाप्रशस्त्ये कारणमाह हंस इव गन्तुं शीलं यस्याः कर्त्तर्युपमान इति णिनिः दूर्व्वाकाण्डमिव श्यामा दूर्व्वास्तम्बवदिव श्यामा न्यग्रोधपरिमण्डला उपमानानीत्यादिना सः ॥ १८ ॥ ज० म०

योषिद्वृन्दारिकेत्यादि । प्रलोभनार्थमिदमुच्यते तस्य रामस्य दयिता प्रिया योषिद्वृन्दारिका योषितां स्त्रीणां मध्ये वृन्दारिका रूपवती हंसवद्गदतीति हंसना-दिनी कर्त्तर्युपपदाणिनिरिति परः ल्यते यद्वादित्वात् हंसनादिनीशब्दः पारि-भाषिकोऽप्यस्ति यथा "गत्या नितम्बिनी या तु हंसशीलानुगामिनी । मञ्जु-कोकिलसंशब्दा सा ज्ञेया हंसनादिनी" । दूर्व्वाकाण्डमिव तत्तुल्या छायाङ्गी-त्यर्थः दूर्व्वाकाण्डवत् श्यामवर्णेति व्याख्यानं पुराणविरुद्धं तत्र गौरत्वकथनात् श्यामान्यग्रोधपरिमण्डलाशब्दौ रूढौ यथा शीते सुखोष्णसर्व्वाङ्गी स्त्रीमात्रे तु सुखशीतला । तप्तकाञ्चनवर्णाभा सा स्त्री श्यामेति कथ्यते । स्तनौ सुकठिनौ यस्या नितम्बे च विशालता । मध्ये क्षीणा भवेद्या सा न्यग्रोधपरिमण्डला

नास्यं पश्यति यत्तस्या निंस्ते दन्तच्छदं न वा ।
संशृणोति न चोक्तानि मिथ्याऽसौ विहितेन्द्रियः ॥ १९ ॥
सारोऽसाविन्द्रियार्थानां यस्यासौ तस्य नन्दथुः ।
तल्पे कान्तान्तरैः सार्द्धं मन्येऽहं धिङ्निमज्जथुम् ॥२०॥

अग्निपुराणे स्त्रीपुरुषलक्षणाध्याये न्यग्रोधपरिमण्डललक्षणमुक्तं यथा प्रसारितभुजस्येह मध्यभागद्वयान्तरं । उच्छ्रायेण समं यस्य न्यग्रोधपरिमण्डल इति केचित्तु दूर्वाकाण्डमिव न्यग्रोधपरिमण्डला न्यग्रूर्ध्वाङ्गीति न्यग्रोधं अधः प्रसृतं परितोमण्डलं नितम्बमण्डलरूपं यस्याः दूर्वाकाण्डमपि अधः प्रसरति नोपरिष्टादित्याहुः अन्ये तु न्यग्रोधस्य वटस्य इव परिमण्डलं परिणाहो नितम्बभागे यस्याः एकदेशधर्म्मेणापि समुदायोपमानतादर्शनादित्याहुः श्यामा अप्रसूतेति केचित् अप्रसूताङ्गनायाञ्च श्यामा सोमलतौषधौ । त्रिदशताधारिवागुन्द्रानिशाकृष्णाप्रियङ्गुष्विति विश्वः ॥ १८ ॥ भ०

नास्यमित्यादि । तस्या आस्यमुखं यो न पश्यति दन्तच्छदं ओष्ठच्छाद्यते अनेनेति घः छादेर्घेद्युपसर्गस्येति ह्रस्वः दन्तानाच्छदं नवा निंस्ते न चुम्बति णिसिचुम्बन इत्यादिक आत्मनेपदी इदितोनुम् धातोः उक्तानि उदितानि न संशृणोति समोगमित्यादिना तङ् न भवति अकर्म्मकादित्यधिकारात् मिथ्यासौ विहितेन्द्रियः दृष्यैव तस्य वेधसा विहितानि इन्द्रियाणि चक्षुरादीनि॥ १९ ॥ ज० म०

नास्यमित्यादि । यत्तस्या आस्यं मुखं न पश्यति नवा दन्तच्छदं ओष्ठं निंस्ते चुम्बति निसिलङ् चुम्बने नवा तस्या उक्तानि भाषितानि संशृणोति असौ पुरुषः विहितेन्द्रियो विधात्रा कृतेन्द्रिये मिथ्या प्रयोजनाभावात् तस्य चक्षुरादीनि मिथ्येति भावः दृष्येति क्वचित्पाठः दृष्टविहितानि इन्द्रियाणि यस्य स तथा दन्ताश्छाद्यन्तेऽनेनेति छादेस्तनूकीसघेस्च इतिष्ट्रनः घेस्चदृत्युक्तेर्नाम्न्यन्तेतिकेति संज्ञायां घप्रत्ययोबोध्यः ओष्ठाधरौ तु रदनच्छदावित्यमरः ॥ १९ ॥ भ०

सारइत्यादि । इन्द्रियार्थानामध्ये सारोऽसौ दयिता इन्द्रियार्थः रूपाद्यतिशययोगात् यस्यासौ संपद्यते तस्य नन्दथुः आनन्दश्चेतसः तल्पे शयनीये यस्य कान्तान्तरैरन्यस्त्रीभिः सार्द्धंनिमज्जथुं शयनं सर्व्वत्र द्वितीयाद्युच् तस्य धिक् कुत्सितमहं मन्ये उभयत्र सर्व्वतसोरित्यादिना धिग्योगे द्वितीया तया सार्द्धं शोभनमित्यर्थादुक्तमभवति ॥ २० ॥ ज० म०

न तं पश्यामि यस्यासौ भवेन्नोद्देजया मतेः ।
त्रैलोक्येनापि वित्स्वं तां क्रीत्वा सुकृती भव ॥ २१ ॥
नैवेन्द्राणी न रुद्राणी न मनावी न रोहिणी ।
वरुणानी नचाग्नायी तस्याः सीमन्तिनी समा ॥ २२ ॥

सारइत्यादि । इन्द्रियस्य अर्था विषयाः सक्चन्दनवनितादयस्तेषां मध्ये असौ सीतैव सारः श्रेष्ठा यस्य असौ सीता विद्यते तस्यैव नन्दथुरानन्दः कान्तान्तरैः सार्द्धं तल्पे शय्यायां निमज्जथुं निमज्जनं शयनं धिक् तयैव सार्द्धं युज्यत इत्यहं मन्ये उभयत्र द्वितोऽथुर्भावे धिक्समवेति द्वितीया ॥२०॥भ०

न तमित्यादि । सर्व्वथा न तं पश्यामि जानामि जगति यस्य सम्बन्धिन्याः मतेश्चेतसः उद्देजया उत्कम्पिकाऽसौ न भवेत् चित्तक्षोभजनिकेत्यर्थः उद्देजयतीति अनुपसर्गाल्लिम्पेति कर्त्तरि यः क्रद्योगे कर्म्मणि षष्ठी तस्मात् त्रैलोक्येनापि त्रयश्चैते लोकाश्चेति त्रिलोकाः तएव त्रैलोक्यञ्चातुर्व्वर्ण्यादित्वात्स्वार्थे ष्यञ् स्वार्थिका अतिवर्त्तन्त इति नपुंसकत्वम् तेनापि तोङ्कीत्वा लब्ध्वा वित्स्वं सुकृती भव पण्डितो भव आढ्यो वा भव पाण्डित्यमस्य त्रैलोक्यमात्रेणापि स्त्रीरत्नङ्क्रीत्वा लब्धमिति वित्तीति तेनैव सूत्रेण यः अन्या अपि स्त्रियः सन्तीति चेदाह ॥ २१ ॥ ज० म०

न तमित्यादि । असौ सीता यस्य मतेरुद्देजया क्षोभजनिका न भवेत् तं पुरुषं नाहं पश्यामि त्रैलोक्येनापि तां क्रीत्वा त्वं वित्तो लाभवान् सुकृती च भव सुकृती पुण्यवान् शोभनः कृती पण्डितो वा तत्क्रयणादेव तव लाभवत्त्वं पुण्यवत्त्वं पाण्डित्यञ्च सफलं अन्यथा निष्फलमिति भावः एजकम्पे एजेरुदः श इति परः स्वमते साहिसातीत्यादिना अगेरित्यस्य नजा निर्द्दिष्टस्य व्यभिचारात् यः विदशपजौ लाभे पूर्व्वेण यः कुचादित्वानुण् त्रिलोक्येव त्रैलोक्यं स्वार्थे ष्णः स्वार्थिकाः प्रकृतितोलिङ्गवचनान्यतिवर्त्तन्ते इति वाक्यात् क्लीवत्वम् ॥२१॥भ०

नैवेत्यादि । तस्यास्तु सीतायाः तुल्यार्थैरतुलोपमाभ्यामिति षष्ठी न काचित्सीमन्तिनी स्त्री तुल्या समा सीमन्तः केशेष्विति पररूपत्वम् अन्यत्र सीमान्तः स विद्यते यस्य इति इनिः इन्द्राणी इन्द्रभार्या न सम्यक् किमुनरन्या तथा रुद्राणी रुद्रभार्या वरुणानी वरुणभार्या इन्द्रवरुणेत्यादिना आनुक् मनावी मनुभार्या मनोरौवेत्यौकारः अग्नायी अग्निभार्या ष्वाकष्यग्निकुक्षि-

प्रत्यूचे राक्षसेन्द्रस्तामाश्वसिहि बिभेषि किम् ।
त्यज नक्तञ्चरि क्षोभं वाचाटे रावणो ह्यहम् ॥ २२ ॥

कृसिदेत्यादिना ऐरिति सर्व्वत्र पुंयोगादाख्यायामिति ङीष् रोहिणी चन्द्रभार्य्या रोहितशब्दात् वर्णादनुदात्तेत्यादिना ङीष्नकारश्च वरुणानी न अग्नायीत्यत्र प्रतिषेध एकः पूर्व्वेण योज्यः द्वितीयः परेणेति नचाग्नायीति पाठान्तरम् ॥२२॥ ज० म०

नैवेत्यादि । काऽपि सीमन्तिनी स्त्री तस्याः सीतायाः समा तुल्या न सर्व्वत्र नञ्सम्बन्धादिह नञ्सम्बन्धश्च उपपद्यते इन्द्राणी इन्द्रस्य पत्नी तस्याः समा न एव निश्चये ब्रह्मरुद्रभवेत्यादिना पत्न्यादीप् आनङ्च रुद्राणी रुद्रस्य पत्नी पार्व्वती समा न पूर्व्ववत् ईप् आनङ्च मनावी मनोः पत्नी शतरूपा न समा नारीसखीत्यादिना निपातः रोहिणी चन्द्रस्य भार्य्या न समा पूर्व्वेण निपातः वरुणानी वरुणस्य पत्नी न समा ब्रह्मरुद्रेतीप् आनङ्च अग्नायी अग्नेः पत्नी न समा वृषाकप्यग्नीतीप् ऐङ्च केचित्तु इन्द्राणी न समा कीदृशी प्रशस्तसीमन्तयुक्ता एवं रुद्राण्यादित्याहुः सीमन्तः कथ्यते स्त्रीणां केशमध्ये च पङ्क्तिरिति हलायुधः मनीषादित्वात्साधुः तस्याः इति समार्थेनेत्यादिना षष्ठी ॥ २२ ॥ भ०

प्रत्यूचे इत्यादि । राक्षसेन्द्रो रावणः राक्षसीमित्यूचे प्रतिवचनमुक्तवान् आश्वसिहि खेदन्त्यज रुदादीत्यादिना दृट् बिभेषि किं किमर्थन्तापसकात् हे नक्तञ्चरि महिषये क्षोभं रोषन्त्यज वाचाटे बहुभाषिणि आलजाटचौ बहुभाषिणि यस्माद्रावणोऽहम् अनेनात्मोत्कर्षमावेदयति तमेव स्फुटयन्नाह ॥२३॥ ज० म०

प्रत्यूचे इत्यादि । स राक्षसेन्द्रोरावणः तां शूर्पणखां प्रत्यूचे प्रत्युत्तरमाहस्म आश्वसिहि खेदं त्यज रुद्गोयइति दृम् किं बिभेषि तापसकात् हे नक्तञ्चरि क्षोभं दुःखं मयि रोषं वा त्यज हे वाचाटे बहुनिन्द्यभाषणशीले हि यस्मात् अहं रावणः प्रसिद्धनामानुवादात् उत्कर्षः सूचितः वाचोऽस्त्यर्थे वाग्मिवाचाटवाचाला इति निपातः वाचाटोबहुगर्ह्यवागित्यमरः रवणस्य विश्रवसोऽपत्यं रावणः विश्रवसो विश्रवणरवणावित्यणे इति परः स्वमते सर्व्वभूतानि रावयति आक्रन्दयति रावणः नन्द्यादित्वादनः किंवा हिंसनधर्म्मत्वात् रावणः हिंसार्थरुधातोरनटि रवणं ततः अस्य शीलं इत्यर्थे विकारसंधेत्यादिना ष्णः अत्रापि वा नन्द्यादित्वादनः ततः स्वार्थे ष्णः कलध्वनौ रुङ्बधे गत्यां ॥ २३ ॥ भ०

मामुपास्त दिदृक्षावान् याष्टीकव्याहृतो हरिः ।
आत्मालाभोन्मुखो दूरात् काक्षेणानादरेक्षितः ॥ २४ ॥
विरुग्नोद्ग्रधाराग्रः कुलिशो मम वक्षसि ।
शतधाभिन्नं शतधात्मानं मन्यते बलिनं बली ॥ २५ ॥

मामित्यादि । मामुपास्त सेवितवान् हरिरिन्द्रः दिदृक्षावान् द्रष्टुमिच्छावान् आत्मदर्शनेच्छावानित्यर्थः दूरादेव याष्टीकैः वेत्रयष्टिभिर्व्याहृतोऽपसारितः कर्तृकरणेकृतेति सः यष्टिः प्रहरणमेषामिति शक्तियष्टीरीकक् आत्मालाभे किमभिधास्यतीत्युत्सुकः उन्मुखः तत्परः सम्प्रतीति योगविभागात्सः अनादरेक्षितः अवज्ञाविलोकितः काक्षेण कुदृष्ट्या काक्ष्यत्नयोरिति कुशब्दस्य कादेशः यदि तत्पुरुष इत्यनुवर्त्तते तदा कुत्सितमक्षमिति विग्रहः अक्षशब्दस्येन्द्रियसामान्याभिधायित्वेऽपि ईक्षितशब्दोपपदत्वाच्चक्षुषि वर्त्तते अथ तत्पुरुष इति नानुवर्त्तते सामान्येनादेशस्तदा कुत्सितमक्षि यस्येति बहुव्रीहौ सक्थ्यक्ष्णो रिति षच् काक्षेण मयेत्यर्थः ॥ २४ ॥ ज० म०

मामित्यादि । हरिरिन्द्रो मामुपास्त सेवितवान् आसेष्टौ रूपं यष्ट्या प्रहरतीति याष्टीकः द्वारि नियुक्तः यष्टिप्रहारकपुरुषः ढ्रेकादिति ष्णीकः तेन व्याहृतस्ताडितोऽपि दिदृक्षावान् द्रष्टुं इच्छावान् मदाज्ञाया लाभनिमित्तं उन्मुखः ऊर्द्धमुखः दूरात्समीपगमनायोग्यत्वात् मया तु काक्षेण कुदृष्ट्या अनादरेणावज्ञया ईक्षितः अवलोकितः कुत्सितमक्षं काक्षं इन्द्रियसामान्यवाचनेऽक्षशब्दस्यात्र प्रकरणाच्चक्षुरेवेत्यर्थः कुत्सितमक्षि यस्येति वा सक्थ्यक्ष्णः षःखाङ्गे इति षः काक्षेदिति कोः कादेशः तत्र अक्षदृशि इन्द्रियवाचकस्यादन्तस्य क्षतसमाहान्तस्य अक्षिशब्दस्य च श्यणं ईषदूनं काक्षं इति वररुचिः तदा कटाक्षे तात्पर्ये कोरीषदर्थे इति कादेशः ॥ २४ ॥ भ०

विरुग्नेत्यादि । विरुग्नानि अवसन्नानि कुण्ठितानि उद्ग्राणि महान्ति धाराग्राणि यस्य स कुलिशो वज्रः मम वक्षसि पतितः सन् बली आत्मानमभिन्नं शतधा शतप्रकारं सङ्ख्यायाविधार्थे धा बलिनमन्यते अहो बलवानहन्न येन शतधा भग्न इति तस्य देवतारूपत्वात् बलमस्त्येव आत्मानं बलिनं मन्यत इवेत्युत्प्रेक्षा ॥ २५ ॥ ज० म०

विरुग्नेत्यादि । कुलिशोवज्र आत्मानं बलिनं मन्यते कुतइत्याह मम वक्षसि शतधा शतप्रकारेण अभिन्नं केवलं विरुग्नानि भग्नानि उद्ग्राणि महान्ति

कृत्वा लङ्कादुमालानमहमैरावतं गजम् ।
बन्धनेऽनुपयोगित्वान्नतं तृणवदत्यजम् ॥ २६ ॥
आहोपुरुषिकां पश्य मम सद्रत्नकान्तिभिः ।
ध्वस्तान्धकारेऽपि पुरे पूर्णेन्दोः सन्निधिः सदा ॥ २७ ॥

धारयाणि यस्य तादृशः बली वस्तुतोबलवानपि महत्त्वस्वभङ्गादेव बलं जानाति असुरसमूहविदारणादपीदमेव तस्याधिकसुत्कर्षस्थानमित्यर्थः तस्य देवतारूपत्वा-न्मननमस्त्येव उत्प्रेक्षामात्रं वा मन्यत इव इत्यर्थः संख्याया धाच् प्रकारे ॥२५॥भ०

कृत्वेत्यादि । एप्वालीयतइत्यालानं अधिकरणे ल्युट् विभाषा लीयत इत्यात्वम् लङ्कादुमा आलानानि यस्यैरावताख्यस्य गजस्य तदृत्वा नतन्नम्रसुख-न्तृणमिव मत्वा सोऽहमत्यजम् त्यक्तवान् बन्धनेऽनुपयोगित्वात् प्रयोजनाभावात् ॥ २६ ॥ ज० म०

कृत्वेत्यादि । लङ्कादुम एवालानं बन्धनस्तम्भो यस्य तथाभूतं ऐरावतं गजं कृत्वा नतं नम्रं तं अहं तृणवत् अत्यजं अथवा तं गजं तृणवत् न अत्यजं अपि तु अत्यजमेवेति शिरश्चालने नञ् कृत इत्याह बन्धनेऽनुपयोगित्वात् स्वयमेव वशीभूतत्वात् अनुपादेयत्वाद्वा आलीयतेऽस्मिन्नित्यालानं आधारेऽनट् निपात्यते शोऽनालिलियस्त्वा इति पक्षे डा इरावान् समुद्रः तत्र जात इति ढधेकादिति ण्यः ॥ २६ ॥ भ०

आहो इत्यादि । अहो पुरुषस्य भावः मनोज्ञादित्वादुञ् आहोपुरुषिका कार्यसिद्धावपि तत्साधने वृत्तिः ताम्मम शूर्पणखे पश्य सद्रत्नकान्तिभिः ध्वस्तान्ध-कारेऽपि पुरे पूर्णेन्दोः पूर्णचन्द्रस्य सन्निधिः सदा सन्निधानन्न पुनस्तेन कार्यं रत्नरश्मिभिरेव तत्कृत्यस्य कृतत्वात् ॥ २७ ॥ ज० म०

आहो इत्यादि । ममाहोपुरुषिकां पश्य सद्रत्नकान्तिभिः सद्रत्नानां प्रभा-भिर्ध्वस्तान्धकारे नाशितध्वान्तेऽपि मत्पुरे सदा पूर्णेन्दोः सन्निधिः एतेन प्रयो-जनाभावेऽपि भीत्या पूर्णीभूत्वा चन्द्रस्तिष्ठति देवैरपि भीत्वा नाशौ पीयते चन्द्रप्रभाणि च रत्नानि मम सन्तीति सूचितं अहमेव पुरुषोयत्नेति रूढ्यावनाय आहोपुरुषिका निपातनात् आहोपुरुषिकादर्प्याद्यास्माभावनात्मनीत्यमरः। अहो पुरुषस्य भाव आहोपुरुषिका इति केचित् तदा विकारसंघेति भावे कण् स्त्रीत्वमभिधानात् काश्यनाशीरकइति अत इत्वं सदेति कुतः कृवृषेत्यादिना निपातितम् ॥ २७ ॥ भ०

हृतरत्नश्च्युतोद्योगो रक्षोभ्यः करदो दिवि ।
पूतक्रतायीमभ्येति सव्रपः किन्न गोत्रभित् ॥ २८ ॥
अतुल्यमहसा सार्द्धं रामेण मम विग्रहः ।
त्वपाकरस्तथाप्येष यतिष्ये तद्विनिग्रहे ॥ २९ ॥
उत्पत्य खं दशग्रीवो मनोयायी शितास्त्रभृत् ।
समुद्रसविधावासं मारीचं प्रति चक्रमे ॥ ३० ॥

हृतेत्यादि । हृतोऽन्यैः स्ववज्रादिरत्नोगोत्रभिदिन्द्रः अतएव च्युतोद्योगः दिवि वर्त्तमानोऽपि रक्षोभ्यः करदः राजग्राह्यं वित्तमयच्छन् पूतक्रतायीं शचीं पूतक्रतोरैचङीषूपयोगादाख्यायामिति सव्रपः सव्रीडः किन्नाभ्येति न ढौकते ॥ २८ ॥ ज० म०

हृतेत्यादि । गोत्रभित् इन्द्रो दिवि वर्त्तमानोऽपि सव्रपः सलज्जः सन् पूतक्रतायीं स्वभार्यामपि नाभ्येति नाभिसख्येन गच्छति अपि तु तथैव सव्रपत्वे हेतुमाह मया हृतरत्नः हृतं रत्नं यस्य स तथा गलितोद्योगः राक्षसेभ्यः करदः करं राजग्राह्यभागं ददातीति डः पूतक्रतोरिन्द्रस्य पत्नी पूतक्रतायी इषाकथग्नि इत्यादिना ईषु ऐङ्च गोत्रान् पर्व्वतान् यो भिनत्ति सोऽतिबलीयान् इति साभिप्रायं पदम् ॥ २८ ॥ भ०

अतुल्येत्यादि । तदेवंविधस्य मम अतुल्यमहसा अतुल्यतेजसा रामेण सह विग्रहस्त्वपाकरः क्रञोहेत्यादिना टः तथापि त्वत्प्रार्थनया एष च यतिष्ये तद्विनिग्रहे विविधनिग्रहविषये तस्य यतिष्ये यत्नं करिष्यामि वर्त्तमानसामीप्ये वर्त्तमानवद्वेति विकल्पेन लटो विधानात् लृडुदाहृतः ॥ २९ ॥ ज० म०

अतुल्येत्यादि । यद्यपि अतुल्यमहसा असदृशतेजसा रामेण सार्द्धं मम विग्रहस्त्वपाकारः तथापि तस्य विविधनिग्रहे एषोऽहं यतिष्ये यत्नं करिष्ये त्वत्प्रार्थनयेति शेषः त्वां लज्जां करोतीति सुकृतः निग्रह इति विषयसप्तमी निमित्तमात्रेऽपि सप्तमी लोकोपचारादित्यन्ये ॥ २९ ॥ भ०

उत्पत्येत्यादि । उक्तवं खमाकाशमुत्पत्य मारीचमिति चक्रमे यत्र मारीचो राक्षसस्तत्र गत इत्यर्थः अनुपसर्गादिति क्रमेरस्तङ् मनोजवादयु यातुं शीलमस्येति कर्त्तव्युपमान इति णिनिः शितास्त्रभृत् गृहीततीक्ष्णचन्द्रहासः समुद्रस्य सविधे समीपे आवासो यस्य मारीचस्य सह विधेन सविधमिति व्युत्पत्तिमात्रं शब्दस्तत्समीपवाची ॥ ३० ॥ ज० म०

सम्पत्य तत्सनीडेऽसौ तं वृत्तान्तमशिश्रवत् ।
तच्छ्रुत्वाथ श्रुतार्थेन तेनागादि दशाननः ॥ ३१ ॥
अन्तर्द्धत्स्व रघुव्याघ्रात्तस्मात्त्वं राक्षसेश्वर ।
यो रणे दुरुपस्थानो ह्रस्तरोधं दधद्धनुः ॥ ३२ ॥

उपगत्येत्यादि । एवमुक्त्वा दशग्रीवो रावणः स्वमाकाशं उत्पत्य मारीचं प्रति लक्षीकृत्य चक्रमे गतः वागेरिति मं द्वितीयानिमित्तकस्य प्रतिशब्दस्य गित्वाभावात् मन इव शीघ्रं यातीति मनोयायीति कर्त्तर्युपमाने उपपदे णिन्निति परः खमते गे त्वादित्वाखिन् व्याघ्रश्चासौ श्वा चेति वाक्यं कुर्वता क्वचिदुपमानव्यञ्जकशब्दाभावेऽप्युपमानं गम्यते इति सूचितं तेन मन इव यायीत्यर्थो गम्यते क्षिप्रं तीक्ष्णमस्त्रं बिभर्तीति क्विप् सुसुद्रस्य सविधे समीपे आवासो यस्य तं । सदेशाऽभ्याससविधसमर्यादरुवेश्यवदित्यमरः ॥ ३० ॥ भ०

सम्पत्येत्यादि । असौ दशग्रीवः तत्सनीडे मारीचस्य समीपे अत्रापि सह नीडेनेति व्युत्पत्तिमात्रम् समेत्य यात्वा तं वृत्तान्तं गृध्रेणखाकथितमशिश्रवत् श्रावितवान् श्रृणोतेरन्तस्य लुङि रूपम् तेन मारीचेन श्रुतार्थेन तच्छ्रुना तच्छ्रवणशीलेन दशाननः अगादि उक्तः कर्म्मणि लुङ् ॥ ३१ ॥ ज० म०

संपत्येत्यादि । असौ रावणः तस्य सनीडे समीपे संपत्य संगत्य तं मारीचं वृत्तान्तं गृध्रेणखोक्तं अशिश्रवत् श्रावितवान् । समीपे निकटासन्नसन्निकृष्टसनीडवदित्यमरः । अथ अनन्तरं श्रुतार्थेन तेन मारीचेन तच्छ्रुना श्रवणशीलेन दशाननोऽगादि उक्तः कर्म्मणि ठौ ॥ ३१ ॥ भ०

अन्तरित्यादि । हे राक्षसेश्वर तत्स्माद्रघुव्याघ्रादन्तर्द्धत्स्व अन्तर्हितो भव व्यवहितो भवेति यावत् दधातेर्हौटि आभ्यस्तयोरित्याकारलोपः अभ्यासस्य दधस्तथेत्यादिना भष्भावः अन्तर्द्धौ येनेत्यपादानसंज्ञा यस्मात्स रामः रणे दुरुपस्थानः दुःखेन उपस्थीयते उपगम्यत इति अतोयुचेति युच् यतोहरूरोधन्दधद्धनुः हस्तेन रुध्वा सदैव यो धनुर्धत्ते स कथन्दुरुपस्थानो न भवति हस्तशब्दे तृतीयान्त उपपदे सप्तम्या श्लोपपीडरुधकर्षेति णमुल चकारेण तृतीयायाः सप्तम्यन्तत्वात् तृतीयाप्रभृतीन्यन्यतरस्यामिति सः तदेव दुरुपस्थानत्वं स्फुटयन्नाह ॥ ३२ ॥ ज० म०

अन्तरित्यादि । हे राक्षसेश्वर तस्माद्रघुव्याघ्रात् त्वं अन्तर्द्धत्स्व स यथा न पश्यति तथा व्यवहितो भव अन्तःपूर्व्वधाञोगीस्वः क्ङादीरेद्धिः झभस्वधे-

भवन्तं कार्त्तवीर्य्यो यो हीनसन्धिमचीकरत् ।
जिगाय तस्य हन्तारं स रामः सार्व्वलौकिकः ॥ ३२ ॥

त्यादिना खेर्हसः धस्य दश्च झभान्तस्येति दस्य धः आद्योरालोप्य इत्यालोपः झषझसोरिति धस्य तः यतोऽपायेत्यादिना अन्तर्द्धौ पञ्चमी हेतुमाह यो रामो दुरुपस्थानः दुःखेनोपस्थीयते उपगम्यते यत्नुभिः समीपगमनमेवाशक्यं किं पुनर्युद्धमिति भावः अतोनोऽदरिद्र इति अनः यतोहस्तरोधं सदा धनुर्दधाति हस्तेन रुद्ध्वा हस्तरोधं आसक्तौ तृतीयान्ताद्धुधोषम् इति परः तेन सदा स्थिरतरं धनुर्दधातीत्यर्थः केचित्तु हस्तं रुद्धेत्यर्थे स्वाङ्गात् रुधेर्णम् तेनान्यकर्म्मनिवृत्तिर्हस्तस्य गम्यत इत्याहुः स्वमते हस्तं रुणद्धि कार्य्यान्तराद्व्यावर्त्तयतीति ढात् घण् धनुर्विशेषणम् ॥ ३२ ॥ भ०

भवेत्यादि । यः कार्त्तवीर्य्यः कृतवीर्य्यस्यापत्यं सहस्रबाहुः भवन्तं हीनसन्धिमचीकरत् हीनेन दुर्ब्बलेन यः सन्धिः तन्भवन्तङ्कारितवान् तेन हीनत्वं बलान्निर्ज्जित्य कारित इति दुरुपस्थानमुक्तम् हृक्रोरन्यतरस्यामिति द्विकर्म्मता तस्य कार्त्तवीर्य्यस्य यो हन्ता परशुरामः क्तस्यायोगे कर्म्मणि षष्ठी तेन हि तस्याग्निहोत्रधेनुमपहृत्य गच्छतः परशुना बाहुंसहस्रञ्छित्त्वा तस्य हन्तारं स रामो जिगाय जितवान् जयतेर्लिटि धातुजकारस्य संलिटोर्जेरिति कुत्वम् सार्व्वलौकिकं सर्व्वलोके विदितं लोकसर्व्वलोकाभ्यां ठञ् अनुशतिकादित्वादुभयपदवृद्धिः सार्व्वलौकिक इति पाठान्तरम् अत्र राम इति योज्यम् ॥ ३२ ॥ ज० भ०

भवेत्यादि । दुरुपस्थानत्वं स्फुटीकुर्व्वन्नाह यः कार्त्तवीर्य्योऽर्ज्जुनो भवन्तं हीनसन्धिं भग्नसन्धिं अचीकरत् कृतवान् क्रजः स्वार्थे ञिः चुभ्र्योर्ञिर्व्वा इत्यस्य योगविभागात् क्वचिच्चुरादेरन्यस्मादपि स्वार्थे ञिर्वा भवतीति बोध्यं तेन रामो राज्यमकारयदित्यादि प्रयोगाः यद्वा हीनजनेन सह सन्धिं सन्धानं मिलनं कारयामास यद्वयात् भवता हीनजनोऽप्याश्रित इत्यर्थः घोञ्जेर्जोरिति प्रयोज्यकर्त्तुः कर्म्मता कृतवीरस्यापत्यं कार्त्तवीर्य्यः गर्गादित्वात् ष्यञ् तस्य कार्त्तवीर्य्यस्य हन्तारं परशुरामं स रामो जिगाय जेर्गिःसनुधोः सार्व्वलौकिकं सकलत्रैवियनाद्येन सर्व्वलौकविदितम् प्रथमान्तपाठे रामविशेषणं तत्र विदित इत्यर्थे ढधेकादिति ष्ठिकः ष्ठिक्ते त्रिरिति शुभगादित्वात् उभयपदे वृद्धिः ॥ ३२ ॥ भ०

यमास्यदक्षरी तस्य ताड़का वेत्ति विक्रमम् ।
शूरमन्यो रणाच्चाहं निरस्तः सिंहनर्दिना ॥ २४ ॥
न त्वं तेनान्वभाविष्ठा नान्वभावि त्वयाऽप्यसौ ।
अनुभूतो मया चासौ तेन चान्वभविष्यहम् ॥ २५ ॥

यमेत्यादि । तस्य रामस्य विक्रमन्ताडका वेत्ति ज्ञातवती वर्त्तमानसामीप्य इति भूते लट् कीदृशी यमास्यदक्षरी तच्छरताडिता यमसुखन्दृष्टवती मृतेत्यर्थः दृशेः क्तनिप् वनोरचेति ङीत्रेफौ अहमपि शूरमन्यः शूरमात्मानमन्यमानः आत्ममाने खश्च सिंहनर्दिना रामेण सिंह इव नर्दतीति कर्त्तर्य्युपमान इति णिनिः रणान्निरस्तः बहिष्कृत इत्यर्थः ॥ २४ ॥ ज० म०

यमास्येत्यादि । तस्य रामस्य विक्रमं ताडका वेत्ति जानाति अहञ्च वेद्मि सा किम्भूता यमास्यदक्षरी यमसुखं दृष्टवती मृतेति यावत् त्वासुसिति दृशेः क्तनिप् नचखसाद्दनदृति ईप् रङ्च अहं किम्भूतः शूरमन्यः आत्मानं शूरं मन्यमानः मन्याल्यार्थे इति खश् शित्त्वात् रत्वे दिवसुतुदेत्यादिना यत् तेन सिंहनर्दिना रणात् निरस्तः निराकृतः सिंह इव नर्दतीति मनोयायीतिवत् वेत्तीति लोकान्तरस्था ताडका इदानीमपि जानातीत्यभिप्रायेण वर्त्तमाने की वर्त्तमानसामीप्ये भूतेऽपि कीत्यन्ये रणादिति हेतौ पञ्चमी रणभूमेः सकाशात् बहिष्कृत इति वा ॥ २४ ॥ भ०

न त्वमित्यादि । तेन रामेण त्वन्नान्वभाविष्ठाः त्वमनेन नानुभूतः कर्म्मणि लुङ् थासि स्सिजित्यादिना चिण्वदिट् ष्टुत्वं नान्वभावि त्वयाऽप्यसौ नानुभूतः येनैवमुच्यते अत्र चिण्भावकर्म्मणोरिति चिण् अनुभूतो मया चासौ चशब्दः पुनरित्यर्थे मया पुनरसावनुभूतः न शक्योजेतुमिति तेन रामेण चान्वभविष्यहमनुभूतोऽहम् तेन सह योद्धुमहम इति अत्र चिण्भावो न कृतः किन्तु लुङि उत्तमपुरुषैकवचने बलादिलक्षण इट् तेन इडभावात् गुणएवेति ॥२५॥ज० म०

न त्वमित्यादि । त्वद्वचने को ग्रहः मत्प्रसिद्धैव सा दूरीभविष्यति इत्याशङ्कायामिदमुत्तरं तेन रामेण त्वं न अन्वभाविष्ठा न अनुभूतः कथं त्वत्तोऽस्य भयं स्यात् अनुपूर्व्वोभूधातुः सकर्म्मकः कर्म्मणि थास् हनग्रहदृशचदृति पक्षे मिण् त्वयापि असौ रामो न अन्वभावि न अनुभूतः तेन तत्प्रावल्या न युक्ता कर्म्मणि टौ तन् असौ मया अनुभूतः तवापि तत्त्वत्तोऽहमिति मद्वचनं गृह्या-

अध्यङ् शस्त्रभृतां रामो न्यङ्क्षुं प्राप्य महिधाः ।
सकन्याशुल्कममनज्जिथिलायां मखे धनुः ॥ ३६ ॥
संवित्तः सह युध्वानौ तच्छक्तिं खरदूषणौ ।
यज्वानश्च ससुत्वानो यानगोपीन्मखेषु सः ॥ ३७ ॥

खेति भावः तेनाप्यहमन्वभविषि अनुभूतः तेन मद्गमनं व्यर्थं धराजितस्य मम दर्शनेन तस्यावज्ञाप्रसङ्गात् कर्म्मणि टी दृण्भिणोरभावपक्षे दृम् ॥ ३५ ॥ भ०

अध्यङित्यादि । शस्त्रभृतामध्ये रामोऽध्यङ् अधिकः अध्यञ्चेत्याधिक्ये वर्त्तत इति ऋत्विगित्यादिना किन् तस्मिन् लुप्ते अनुनासिकलोपे ञ्णिदचामिति नुम् तस्यानुस्वारपरसवर्णत्वे कृते च हलङ्यादिसंयोगान्तलोपौ नकारस्य किंप्रत्ययस्य कुरिति कुत्वेन ङकारः तन्नाद्दशम्याप्य महिधा न्यङ्क्षो क्षीणाः निशब्दोऽवाधोभावे वर्त्तते न्यञ्च इति पूर्ववत् किन् अनुनासिकलोपः नुम् हल्लोपोनास्ति अहल्त्वात् कुत्वञ्च नास्ति अपदसंज्ञत्वात् यो मिथिलायामहद्धनुरभनक् भग्नवान् सोऽस्मादपि कारणात् शस्त्रभृतामध्यङ् भङ्गेर्लङि आडागमलोपः हलङ्यादिलोपः कुत्वञ्च कन्याशुल्कङ्कन्यामूल्यन्तद्धि यो रौद्रन्धनुरारोपितगुणङ्करोति अस्मै कन्या दीयत इति मूल्यीकृत्य स्थापितम् ॥ ३६ ॥ ज० म०

अध्यङित्यादि । शस्त्रभृतां मध्ये रामो अध्यङ् आधिक्येन पूजितः कर्म्मणि किप् हलङ्लोपोऽणाविति प्राप्तनलोपस्य नेदित्यूजार्थाञ्चेरिति प्रतिषेधः विच्प्रत्ययो वा चुडिति अञ्चेः पृषक् अहणात् लुप् प्राक्कङ् न्नोर्नुः अमेजमनोः स्वान्तस्य लुप् अध्यङ् अधिको वा अधिपूर्वोऽञ्चतिराधिक्ये वर्त्तते तं प्राप्य महिधा मत्प्रकारकाः पुरुषाः न्यञ्चः निशब्दोऽधोभागे न्यञ्चन्ति अधो गच्छन्तीति न्यङ्को हीना इत्यर्थः कुत इत्याह स रामो मिथिलायां मखे यत्तं धनुरभनक् भग्नवान् भञ्जेर्घ्यां रुधादित्वात् नण् नणो नलोपः हसङ्ग्यादिसेरिति दिलोपः चुडिति कङ् कन्याशुल्कं कन्यापणं धनुरारोपे सति कन्या देयेति मूल्येन स्थापितम् ॥ ३६ ॥ भ०

संवित्त इत्यादि । नाहमेव रामशक्तिमवैमि अपितु खरदूषणावपि संवित्तः ज्ञातवन्तौ वर्त्तमानसामीप्य इति भूते लट् सकर्म्मकत्वात् समोगमीत्यादिना तङ् न भवति तत्राकर्म्मकादिति वर्त्तते सह युध्वानौ सह तेन युद्धवन्तौ सह्येचेति युधेः कनिप् कनिप् यज्वानश्चाहिताग्नयः ससुत्वानः सोमयाजिसहिताः सुय-

सुखजातः सुरापीतो हतजग्धो माल्यधारयः ।
अधिलङ्कं स्त्रियो दीव्य मारब्धा बलिविग्रहम् ॥ २८ ॥

जोङ्वनिप् संविदन्तीति वचनविपरिणामेन योज्यम् यानगोपीत् अरक्षीत् मखेषु स रामः लुङि रूपमन्यथा मखद्रुहो राक्षसाः यतो रामस्य शक्तिं ज्ञातवन्तः ॥ २७ ॥ ज० म०

संवित्त इत्यादि । न केवलमहमेव वेद्मि खरदूषणावधि तस्य शक्तिं संवित्तः ज्ञातवन्तौ ताडका वेत्तीतिवत् की सहयुध्वानौ तेन सह युद्धवन्तौ त्वासुषिति क्वनिप् यज्ञानस्वाहिताग्नयश्च विदन्ति पूर्वेण क्वनिप् बाहुल्याच्च जिः ससुत्वानः सुत्वभिः कृतसोमपानैः सहिताः पूर्वेण क्वनिप् खसतनूपितीति तनू तेषां ज्ञाने हेतुमाह मखेषु यज्ञेषु स यानगोपीत् अरक्षीत् तेषां यज्ञे राक्षसहननात् तेऽपि जानन्तीत्यर्थः गुपूरक्षणे वारे इति आयोऽभावः पक्षे त्रांसिः वेमूदिति पक्षे इम् ॥ २७ ॥ भ०

सुखेत्यादि । यतएवेन्दुरूपस्थानः स तस्माद्बलिना रामेण विग्रहमारब्धाः माकार्षीः रभेराङ्पूर्वात् माङि लुङ् धाम् झलोझलीति सिज्लोपः झषस्तथो र्धोधः झलाञ्झशीति किङ्कार्यमित्याह अधिलङ्कं लङ्कायामधि विभक्त्यर्थेऽव्ययीभावः स्त्रियो दीव्य क्रीड लोटि रूपम् दिवःकर्मचेति कर्मसंज्ञायां वाम्शसोरितीयङ् कीदृशः सुखजातः जातं सुखमस्येति बहुव्रीहिः क्तासवपानत्वात् यदाह सुरापीतः पीतमदिरः हतजग्धः भुक्तमानुषः निष्ठायामदोजग्धिः पूर्वबहुत्वम् एषु वाहिताग्न्यादिदर्शनात्परनिपातः माल्यम्बारयतीति माल्यधारयः अनुपसर्गात् लिम्पेत्यादिना शः ॥ २८ ॥ ज० म०

सुखेत्यादि । रामो दुरूपस्थान एव अतस्तेन बलिना सह विग्रहं युद्धं मारब्धाः माकार्षीः आङ्रभेर्धी धास् झसस्वादिति सिलोपः ढभात्तथोरिति थस्य धः अधिलङ्कं लङ्कायामधिकृत्य स्त्रियो दीव्य स्त्रीभिः क्रीड कारकार्थेऽव्ययीभावः दिवसुतदेत्यादिना दिवः श्यन् व्यनूचतयीति धः हेर्लोपः दिवोधेवेति करणे द्वितीया कीदृशः सुखं जातमस्य सुरा पीता येन सा मनुष्यो जग्धो भक्षितो येन स तथा एषु अग्न्याहितादित्वात् क्तान्तस्य परनिपात इति परः स्मृते पूर्वपरनिपातयोर्विवक्षाधीनत्वं दैक्यं सोन्वय इत्युक्ते जग्धोदोयपिचेति जग्धादेशः माल्यानि धारयतीति साहित्यातीति शः ॥ २८ ॥ भ०

तं भीतङ्कारमाक्रुश्य रावणः प्रत्यभाषत ।
यातयामं विजितवान् स रामं यदि किन्ततः ॥ ३९ ॥
अघानि ताड़का तेन लज्जाभयविभूषणा ।
स्त्रीजने यदि तच्छ्लाघ्यं धिग्लोकं क्षुद्रमानसम् ॥ ४० ॥
यद्गर्हेहेनर्हिनमसौ शरैर्भीरुमभाययत् ।
कुब्रह्मयच्चके रामो भवन्तं पौरुषं न तत् ॥ ४१ ॥

तमित्यादि । तमारीचम्भूर्व्वीक्तञ्चिराक्रुर्व्वन् रावणः प्रत्यभाषत प्रत्युक्तवान् लङि रूपम् भीतङ्कारमाक्रुश्य भीतङ्कृत्वा भीतोऽसीति कर्म्मण्याक्रोशे क्रञः खसुञ् यातयामङ्कृतवयसं यदि विजितवान् रामो दाशरथिः किन्ततः किं तापसः शूरः ॥ ३९ ॥ ज० म०

तमित्यादि । भीतङ्कारं त्वं भीतोऽसीत्युक्त्वा आक्रुश्य तं मारीचं रावणः प्रत्यभाषत प्रत्यूचे भीतंकारमिति कर्म्मण आक्रोशे क्रञोभाषणार्थे क्त्वा चणम् खिदङ्खेति परः खमते तमाक्रुश्य प्रत्यभाषत तं किम्भूतं भीतं भययुक्तं पुनः किम्भूतं कारं रोरणे दुरुषस्यान इत्यादेर्विज्ञापयितारं क्रकङ्विज्ञाने इत्यस्मात् अन्नन्तात् कभावेऽमीति कर्त्तरि घञ् किंवा चणञ्वेत्यस्य योगविभागात् आक्रोशे चणम् मनीषादित्वात् पूर्व्वपदस्य ह्रीकान्तत्वं किं प्रत्यभाषतेत्याह स राघवो यातयामं वृद्धं रामं जामदग्न्यं विजितवान् ततः किं नहि वृद्धजयेन शौर्य्यं ज्ञायते । यातयामस्तु जीर्णे स्यात् परित्यक्तोज्झितेऽपि चेति विश्वः ॥ ३९ ॥ भ०

अघानीत्यादि । तेन रामेण ताड़का अघानि व्यापादिता हन्तेः कर्म्मणि लुङ् लज्जा भयं च विभूषणं यस्याः स्त्रीत्वान्न शौर्य्यम् एवंविधाया अनेन रामेण यदि गर्ह्यमपि हननं स्त्रीजने श्लाघ्यं श्लाघनीयम् क्त्यानाङ्कर्त्तरिवेति तृतीया तं धिक् तं लोकं क्षुद्रमानसं हीनमानसम् ॥ ४० ॥ ज० म०

अघानीत्यादि । लज्जा भयञ्च विभूषणं यस्याः सा ताडका तेन रामेण अघानि मारिता हन्तेः कर्म्मणि टी रतनोर्यगिणौ खेर्हीघोज्झितिचेति घत्वं स्त्रीजने तत्कर्म्म यदि श्लाघनीयं तदा क्षुद्रमानसं हीनचित्तं लोकं धिक् धिक् समयेति ह्री ॥ ४० ॥ भ०

यद्गर्हेत्यादि । असौ रामो यद्ब्रवन्मीरुं शरैरभाययत् भाययितवान् षुगात्मनेपदे न भवतः भयहेतोरभावात् अत्र हि शरेभ्यो भयम् नतु रामात्

चिरकालोषितं जीर्णं कीटनिष्कुषितं धनुः ।
किं चित्रं यदि रामेण भग्नं क्षत्रियकान्तिके ॥ ४२ ॥

तत् किम्पौरुषम्पुरुषकारः किमसौ पुवादित्वादण् गेहेनर्दिनङ्गेहएव नर्दिनं पात्रे-समितादित्वात्सः कुत्रक्षत्रियत्रके क्षत्रिता ब्रह्माणः कुत्रब्रह्माः कुःपापार्थ इति सः कुमहद्ब्रह्मग्रामन्यतरस्यामिति समासान्तश्च तेषाङ्क्षत्रितो यत्नः तस्मिन् सति कृत्वा-याङ्कन् तेन शूरमन्योऽहं रणात्ते न निरस्तः इत्यपुष्कलसुन्नाम् ॥ ४१॥ ज०म०

यत्न इत्यादि । असौ रामः कुत्रक्षत्रियत्रके यद्भवन्तं शरैरभाययत् अत्रासयत् तदपि न पौरुषं कथमित्याह भीरुं भयशीलं अतएव गेहे नर्दिनं स्वगृहएव नर्दितीति अहादित्वाल्लिन् पात्रेसमितादित्वात् त्रेमे समाधेर्विभक्त्यलोपश्चेति परः अभाययदिति भियोऽप्रत्नात् घी स्त्रिभ्योर्धार्ङ्ङर्थे ओ मन्त्रेत्यस्य भीर्भीष् त्रेत्यस्य च नात्र विषयः यतः शरेभ्य एवात्र भयं विवक्षितं नतु प्रयोजकात्कर्त्तुः कुत्सितो ब्रह्मा ब्राह्मणः कुत्रब्रह्मः देशाद्ब्रह्मणः कुमहद्ब्रह्मग्रान्तुवेति पक्षे षः तस्य कुत्सितो यत्न इति निन्द्यायां विकारसंधेत्यादिना कः अतएव प्रयोजनाभावात्तत्र समर्था राक्षसा न गच्छन्ति पुरुषस्य भावः कर्म्म वेति पूर्व्वेण ष्णः ॥ ४१ ॥ भ०

चिरेत्यादि । यदि रामेण क्षत्रियकान्तिके कुत्सितक्षत्रियसमीपे भग्न-धनुः किन्नचित्रमाश्चर्य्यं क्षत्रिया जनकादयः तस्य कुत्सायाङ्कन् क्षत्रियकस्या-न्तिके दूरान्तिकार्थैर्योगे षष्ठीसमासं विधाय पञ्चात्यप्रत्ययधिकरणे चेति चकारा-दूरान्तिकार्थेभ्यश्चेति सप्तमी किमिति न चित्रमित्याह चिरकालोषितमिति कालाध्वनोरिति द्वितीयां विधाय अत्यन्तसंयोगेचेति द्वितीयायाः समासः जीर्णञ्चिरकालोषितत्वात् जृषूक्षयोहानौ निष्ठा क्तस्याड्डातोः इकोहलिचेति दीर्घः रदाभ्यामिति निष्ठानत्वम् कीटैर्घुणैर्निष्कुषितङ्क्षादितं निरःकुष इत्यनुवर्त्तमाने दृण् निष्ठायामितीट् ॥ ४२ ॥ ज० म०

चिरेत्यादि । क्षत्रियकान्तिके कुत्सितानां क्षत्रियाणां जनकादीनां निकटे यदि रामेण धनुर्भग्नं तदपि किं चित्रं कथं न चित्रमित्याह चिरकालोषितं चिरकालं व्याप्य स्थितं सदाध्वादिव्याप्ताविति द्वितीया तया समासः ततएव जीर्णं जजरायां हानौक्तः क्षदिरक्षावितीर् व्यनक्षतयीति दीर्घः क्षुल्वादयोदितिनकारः कीटैर्घुणैर्निष्कुषितं अन्तःक्षादितं नेमडीत्यादौ निष्कुषवर्ज्जनात् दृम् षत्वविधानं गवाक्षजालैरभिनिष्क्रमतस्य इत्यत्र व्याख्यातं ईदृशधनुर्भङ्क्षाघयैव क्षत्रियाणां कुत्सा ॥ ४२ ॥ भ०

वनतापसके वीरौ विपक्षे गलितादरौ ।
किं चित्रं यदि सावज्ञौ मन्यतुः खरदूषणौ ॥ ४३ ॥
त्वञ्च भीरुः सुदुर्बुद्धे नित्यञ्च रणकाम्यसि ।
गुणांश्चापक्रुषेऽस्माकं स्तौषि शत्रूंश्च न सदा ॥ ४४ ॥
भीर्षच्छेद्यमतोऽहं त्वां करोमि क्षितिवर्द्धनम् ।
कारयिष्यामि वा क्षत्यं विजिघृक्षुर्ध्वनौकसौ ॥ ४५ ॥

वनेत्यादि । वने तापसो वनतापसः कुत्सायां कन् तस्मिन् तापसके रामे सावज्ञत्वाद्गलितादरौ विपक्षे किमयङ्करिष्यतीत्यवज्ञयैव योधितवन्तौ खरदूषणौ यदि मन्यतुः मतौ को दोषः किञ्चित्रं क्रियतेर्लुङ् लिङोश्चेति नियमात् लिङ्मात्मनेपदन्न भवति ॥ ४३ ॥ ज० म०

वनेत्यादि । खरदूषणौ यदि मन्यतुः तदापि किञ्चित्रं नैवाश्चर्यमित्यर्थः तपःशीलस्तापसः वने कुत्सितस्तापसो वनतापसको रामस्तस्मिन् विपक्षे किमयं करिष्यतीति मत्वा गलितादरौ वीरावपि सावज्ञौ विपक्षादराभावात् युद्धेऽपि सावज्ञौ मन्यतुः मतौ को दोषः किञ्चित्रं नैवाश्चर्यमित्यर्थः तपःशीलस्तापसः वने कुत्सितस्तापसो वनतापसको रामस्तस्मिन् विपक्षे किमयं करिष्यतीति मत्वा गलितादरौ वीरावपि सावज्ञौ विपक्षादराभावात् युद्धेऽपि सावज्ञौ मन्यतुः मतौ को दोषः किञ्चित्रं क्रियतेर्लुङ् लिङोश्चेति नियमात् लिङ्मात्मनेपदन्न भवति ॥ ४३ ॥ भ०

त्वञ्चेत्यादि । हे दुर्बुद्धे त्वमुनः भीरुश्च भवसि नित्यञ्च रणकाम्यसि आत्मनोऽनिशं रणमिच्छसि आत्मेच्छायाङ्काम्यच् अस्माकञ्च सतो गुणानपक्रुषे अपनयसि क्रुङ् अपनये अदादिकः ङित्त्वात्तङ् शत्रूंश्च नोऽस्माकं स्तौषि स्तौतेः उतोऽद्विर्लुकि हलि ॥ ४४ ॥ ज० म०

त्वञ्चेत्यादि । हे दुर्बुद्धे मारीचं त्वं भीरुश्च भवसि रणकाम्यसि च आत्मनोरणमिच्छसि च लेःकाम्यक्स्वेच्छायां भीरोर्युद्धेच्छाऽनुचितैव युद्धे पराजयोऽवश्यं एवमस्माकं गुणांश्चापक्रुषे शौर्यादीन् अपनयसि क्रुङ्लचौर्ये सदा नोऽस्माकं शत्रून् स्तौषि ष्टुञ्स्तुस्तुतौ रपिस्तुतोऽद्वेर्त्रिः ॥४४॥भ०

भीर्षत्यादि । यतएवम्विधस्त्वन्दुष्टः अतोऽहं त्वामौद्वितीयाया कृत्याष्टमिकलक्षणेन त्वादेशः भीर्षच्छेद्यं भीर्षच्छेदार्हं भीर्षच्छेदाद्यत् क्षितिवर्द्धनङ्करोमि शिरश्छित्वा व्यापादयामीत्यर्थः अथवा क्षत्यङ्करणीयं विभाषाकृञोरिति क्यप् कारयिष्यामि हृक्रोरिति द्विकर्मकता विजिघृक्षुः विग्रहीतुमिच्छुः सनिग्रहगुहोश्चेटि प्रतिषेधः रुदविदेत्यादिना सनः कित्त्वे ग्रहिज्येत्यादिना सम्प्रसारणम्

तमुद्यतनिशातासिं प्रत्युवाच जिजीविषुः ।
मारीचोऽनुनयंस्त्रासादभ्यमित्रो भवामि ते ॥ ४६ ॥
हरामि रामसौमित्री मृगो भूत्वा मृगद्युवौ ।
उद्योगमभ्यमित्रीणो यथेष्टं त्वञ्च सन्तनु ॥ ४७ ॥

होढः एकाचो वशोभष् घढोःकझि वनौकसौ रामलक्ष्मणौ वनमोकोग्रहं ययोः नलोकेति कर्म्मणि षष्ठ्याः प्रतिषेधः ॥ ४५ ॥ ज० म०

शीर्षेत्यादि । अतः कारणात् अस्मद्गुणाप्रश्नवात् शत्रुस्तवनाच्च शीर्षच्छेद्यं शीर्षच्छेदार्हं त्वां क्षितिवर्द्धनं मृतं करोमि शिरश्छित्वा मारयामीत्यर्थः शीर्षच्छेदमर्हतीत्यर्थे ढधेकादिति यः किंवा छिदोघ्यण् शीर्षं छेद्यः शीर्षं छेद्यं यस्येति वा विग्रहः अथवा कृत्यं कार्य्यं त्वां कारयिष्यामि यदि जीवनेच्छास्ति तदा मत्कृत्यं कुर्व्विति भावः कृत्यसृजेति पक्षे क्यप् घोऽजौजेरिति प्रयोज्यकर्त्तुः पक्षे कर्म्मत्वं वनमेव ओको ययोस्तौ रामलक्ष्मणौ विग्रहीतुं योधयितुं अभिभवितुं वा इच्छुरहं यहेः सन् नेसुसुहग्रह इति इन्निषेधः ग्रहस्वपप्रच्छां जिः ॥ ४५ ॥ भ०

तमित्यादि । तं रावणं एवमुक्तवन्तं निशात इति शाछोरन्यतरस्यामितीत्वाभावपक्षे रूपं उद्यतः उत्थापितः निशातस्तीक्ष्णोऽसिर्येन तन्मारीचस्त्रासात् प्रत्युवाच वचनमुक्तवान् अभ्यमित्रोभवामि ते अमित्रस्याभिमुखमभ्यमित्रमाभिमुख्येऽव्ययीभावः अभ्यमित्रमलङ्कामीत्यस्मिन्नर्थे अभ्यमित्राच्छेति चकाराद्यत् खौचेति यत् त्वदमित्राभिमुखङ्करोमीत्यर्थः अनुनयन् अनुकूलयन् किमर्थं जिजीविषुः जीवितुमिच्छुः ॥ ४६ ॥ ज० म०

तमित्यादि । मारीचो जिजीविषुर्जीवितुमिच्छुः सन् त्रासात् अनुनयन् तं रावणं प्रत्युवाच त्रासहेतुमाह उद्यत उत्थापितो निशातस्तीक्ष्णोऽसिर्येन तं निशातेति छाशोर्वेति श्यतेः पक्षे न छिः किं प्रत्युवाचेत्याह अहं ते तव अभ्यमित्रः शत्रुभिमुखगामी भवामि अमित्रस्य अभिमुखं अभ्यमित्रं आभिमुख्येऽव्ययीभावः अभ्यमित्रशब्दादिदं गच्छतीत्यर्थे विकारसंयोगेति यः ॥ ४६ ॥ भ०

हरेत्यादि । अहन्मृगोभूत्वा रामसौमित्री हरामि देशान्तरमापयामि अखेटकाभिरतत्वात् यदाह मृगद्युवौ मृगैर्दीव्यत इति क्विप् छोःशूडनुनासिके चेति चकारात् कौ च जट् यणादेशः उवङ् मृगद्युताविति पाठान्तरम् तत्र द्यु अभिगमने मृगान् द्यौति अभिगच्छतीति क्विप् त्वञ्च यथेष्टं यथारुचि तमुद्योगं सन्तनु विस्तारङ्कुर्व्वित्यर्थः तनोतेर्यौटि उतश्चेति

ततश्चित्रीयमाणोऽसौ हेमरत्नमयो मृगः ।
यथासुखीनः सीतायाः पुप्लुवे बभ्रु लोभयन् ॥ ४८ ॥
तेनादुद्यूषयद्रामं मृगेण मृगलोचना ।
मैथिली विपुलोरस्कं प्रावृषेण्यं मृगाजिनम् ॥ ४९ ॥

हेर्लुक् अभ्यमित्रीणः अमित्राभिमुखमलङ्कामी अभ्यमित्राच्छेति चकारादात्खौ चेति खः ॥ ४७ ॥ ज० म०

हरेत्यादि । उपायं दर्शयन्नाह अहं मृगोभूत्वा रामसौमित्री हरामि अन्यत्र नयामि यतस्तौ मृगद्युवौ मृगयारसिकौ मृगैर्दीव्यत इति किपि च्छोः-शूटाविति वस्रोट् धोरियुवचि मृगद्युताविति पाठे द्युलभिसर्पणे इत्यस्मात् किपि स्वस्वतनूपितीति तनू मृगाभिगामिनावित्यर्थः ततस्त्वमपि अभ्यमित्रीणो यथेष्टमुद्योगं सन्तनु तनदुज्विस्तारे हेर्लोपोऽस्योत्रोक्षेति हिलोपः अभ्यमित्रीण इति अभ्यमित्रवत् ॥ ४७ ॥ भ०

तत इत्यादि । उक्तानन्तरमसौ मारीचो मायामृगीभूतः सन् हेमरत्नमयः रत्नञ्च हेम चेति विग्रहे मयट्द्वैतयोर्भाषायामिति विकारे मयट् निर्म्मलत्वात् सीताया अग्रतो यथासुखीनः प्रतिबिम्बाश्रय इव भूत्वा पुप्लुवे भ्रमति स्म इवयङ्-लोपो द्रष्टव्यः यथासुखसम्मुखस्य दर्शनः खः बभ्रु लोभयन् सुष्ठु मृहाञ्जनयन् यतश्चित्रीयमाणः आश्चर्य्यमभवत् हेमरत्नमयत्वात् नमोवरिवश्चित्रङ्आश्चर्य्ये ङकारस्यात्मनेपदार्थत्वात् शानच् अवयवकृतं लिङ्गं समुदायस्य भवतीति ॥ ४८ ॥ ज० म०

तत इत्यादि । ततो वचनानन्तरं असौ मारीचो मायया हेमरत्नमयो-मृगः सन् सीताया यथासुखीनोऽग्रतः स्थायी भूत्वा बभ्रु लोभयन् चक्षुःमृहां जनयन् पुप्लुवे भ्रमति स्म प्लुङ्गतौ ठी चित्रं करोतीति चित्रीयमाणः चित्रङ् आश्चर्य्ये कण्ड्वादित्वात् क्यः ङित्त्वादात्मनेपदं हेम रत्नञ्च प्रस्तुतं यत्रेति प्रस्तुतार्थे मयट् बाहुल्यात् विकारइत्येके सुखस्य सदृशं यथासुखं दर्पणादिस्थप्रतिबिम्बमुच्यते सादृश्येऽव्ययीभावः मृगस्य रत्नमयत्वेन स्वच्छतया यथा सुखं दृश्यतेऽत्रेति विकारसंज्ञेत्यादिना तदत्र दृश्यते इत्यर्थे ईनःवस्तुतस्तु उपचारात् यथासुखीनशब्दोऽभिमुखमात्रेऽपि वर्त्तते सीताभिमुखोभूत्वेत्यर्थः ॥ ४८ ॥ भ०

तेनेत्यादि । तेन मृगेण मैथिली सीता रामदुद्यूषयत् क्रीड़ितुमिच्छन्तम्-युक्तवती मृङ्प्लुतामयमिति इवन्तस्य दिवः सनीवन्तेत्यादिना यदा मेङ् तदा च्छ्वोः

योगक्षेमकरं कृत्वा सीताया लक्ष्मणं ततः ।
मृगस्यानुपदो रामो जगाम गजविक्रमः ॥ ५० ॥
स्थायं स्थायं क्वचिद्यान्तं क्रान्त्वा क्रान्त्वा स्थितं क्वचित् ।
वीक्षमाणो मृगं रामश्चित्रवृत्तिं विसिष्मिये ॥ ५१ ॥

मूट् द्विर्वचनम् तस्मात्सनन्तस्यत्वात् लडि रूपम् मृगलोचना मृगस्य लोचने इव लोचने यस्याः मध्यपदलोपी सः विपुलोरस्कं विस्तीर्णवक्षस्थलम् उरःप्रभृतिभ्यः कप् किमर्थमदुद्यूषयत् मृगाजिनम्मृगचर्म्म प्रावृवूर्षुः प्रावरितुमिच्छुः प्राङ्पूर्वस्य दृङ् दृट्सनिवेत्यनिट्पक्षे अज्झनगमां सनीति दीर्घः उदोष्ठ्यपूर्वस्येत्युत्वम् रपरत्वं वोरुपधायादीर्घ इकः द्विर्वचनम् इण् करोति षत्वम् रेफस्येण्यङ्गेन यङ्गणाद्दन्त्योष्ठ्योऽपि वकार ओष्ठ्यङ्गेन गृह्यते ॥ ४९ ॥ ज० म०

तेनेत्यादि । मैथिली मृगाजिनं मृगस्य चर्म्म प्रावृवूर्षुः प्रावरीतुं परिधातुमिच्छुः सती तेन मृगेण रामं अदुद्यूषयत् क्रीडितुमिच्छामकारयत् दिवेः सनि भ्रमुत्रिसृतृस्वृगृधिधृषिक्षिपेरदरिद्रेत्यादिना पक्षेऽनिम् णूर्नानिमीति गुणाभावे क्ङोः सूटाविति वस्य जत्वं ततोद्वित्वं जिःप्रेरणे दिवेरकर्म्मकत्वात् घोर्लोपेति प्रयोज्यकर्त्तुः कर्म्मत्वं सा कीदृग्री मृगस्येव लोचने यस्याः सा तथा रामं कीदृशं विपुलं प्रकीर्णसुरो वक्षःस्थलं यस्य तं उरःप्रभृतितः को बहुव्रीहाविति प्रगतः स्वमते स्वार्थे कः प्रावृवूर्षुरिति वृङ् वरणे सनि घोर्ऽज्झनिङ्गमां सादृदृङ्धुरिति पक्षेऽनिम् दन्त्योष्ठ्यस्याप्योष्ठ्यकार्य्यत्वात् ऋदिरणावूर्वोष्ठ्यादिति उर्व्यनच्चतयीतिधुः ॥ ४९ ॥ म०

योगेत्यादि । ततो दुद्यूषानन्तरं रामो जगाम योगक्षेमौ शरीररक्षितिपालने करोतीति कृञोहेतित्यादिना हेतौ टः यङ्गणवता तदन्तविधेरभावात् क्षेमप्रियमद्रेण्वित्यण्खचौ न भवतः सीतायाः स्थितिपालनहेतुभूतं लक्ष्मणङ्कृत्वा रामः मृगस्यानुपदी अन्वेष्टा अनुपदान्वेष्टेति निपातनात्साधुः गजविक्रमः गजगमनमिव गमनं यस्येत्यर्थः ॥ ५० ॥ ज० म०

योगेत्यादि । ततोऽनन्तरं लक्ष्मणं जानक्या योगक्षेमकरं कृत्वा गजविक्रमो हस्तिपराक्रमो हस्तिगमनतुल्यगमनो वा रामो मृगस्यानुपदी सन् जगाम फलपुष्पादेरलब्धस्य साधनं योगः शरीरादेर्लब्धस्य पालनं क्षेमः तौ करोतीति कृकुष्टः अनुपदं यातीति बाहुल्यात् इन् अनुपदमनुगमनं विद्यतेऽस्येति नैकादित्वादिति इन् अन्वेष्टर्थानुपदादिति परसूत्रम् ॥ ५० ॥ भ०

स्थायस्थित्यादि । मृगश्चित्रवृत्तिमद्भुतशरीरचेष्टं वीक्षमाणो रामो विसि-

चिरं क्लिश्वित्वा मर्म्माविद्रामो विलुभितप्लवम् ।
शब्दायमानमव्यात्सीत् भयदं क्षणदाचरम् ॥ ५२ ॥
श्रुत्वा विस्फूर्जथुप्रख्यं निनादं परिदेविनो ।
मत्वा कष्टश्रितं रामं सौमित्रिं गन्तुमैजिहत् ॥ ५३ ॥

श्विये विस्मितः श्विङोऽङित्त्वादात्मनेपदं षोपदेशत्वाच्छाभ्यासे णः परस्य सस्य षः चित्तवृत्तितां दर्शयन्नाह स्थायं स्थायं स्थित्वा स्थित्वा क्वचित्प्रदेशे यान्तं क्रान्त्वा क्रान्त्वा क्वचित्प्रदेशे उत्प्लुत्योत्प्लुत्य स्थितम् आभीक्ष्ण्ये णमुलित क्रान्त्वा-णमुलौ द्विर्वचनञ्च ॥ ५१ ॥ ज० म०

स्थायमित्यादि । मृगं वीक्षमाणो रामो विस्मिश्विये विस्मितः श्विङ्ष्वां रूपं षोपदेशत्वात् खेरिलात् षत्वं श्रुध्वोरितीयः विस्मये हेतुमाह चित्तवृत्तिं आश्चर्य्यचेष्टं चित्तवृत्तित्वं दर्शयति स्थित्वा स्थित्वा क्वचित् गच्छन्तं चणम्वा-भीक्ष्णे पूर्व्वकाले इति चणम् आभीक्ष्णे द्वित्वं लोकतः सिद्धमिति स्थारं स्थारं नमसीत्युदाहरणेन ज्ञापितं क्वचित् क्रान्त्वा क्रान्त्वा उत्प्लुत्य उत्प्लुत्य स्थितं क्रमोर्धोवेति पक्षे दीर्घः ॥ ५१ ॥ भ०

चिरमित्यादि । रामः क्षणदाचरमारीचमव्यात्सीत् विज्ञवान् व्यधेर्लुङि हलन्तलक्षणाट्टिः मर्म्माविद्रामः मर्म्माणि विध्यतीति क्विप् नष्टिहतीत्यादिना पूर्व्वपदस्य दीर्घत्वं चिरं क्लिश्वित्वा महान्कालमायस्य अत्यन्तसंयोगे द्वितीया क्लिशः क्त्वानिट्ययोरिति विकल्पेनेट् तत्र रलोव्युपधादिति कित्त्वविकल्पे ग्रहग्रहे-त्यादिना कित्त्वं विलुभितप्लवं व्याकुलितगमनं लुभोविमोहन इतोट् विमोहनं व्याकुलीकरणम् शब्दायमानं शब्दङुर्व्याणं शब्दवैरेति क्यङ् भयदन्निशाचरं शब्दविशेषणं वा ॥ ५२ ॥ ज० म०

चिरमित्यादि । रामश्चिरकालं क्लिश्वित्वा श्रान्तोभूत्वा भयदायकं क्षण-दाचरं तं राक्षसं अव्यात्सीत् व्यध्यौताडे टी पूर्व्वयुदितदम् इति क्लिशेः पक्षे दम् सेमन्तुधेत्यादौ क्लिशवर्ज्जनात् न गुणः मर्म्माणि विध्यतीति क्विप् जिः धीरूहोधङ्क्वाविति दीर्घनिर्द्देशात् क्वचित् क्विवन्ते पूर्व्वपददीर्घत्वं स्यादिति रूचितं आङ्पूर्व्वस्य रूपं वा मर्म्मावित् मर्म्मज्ञो वा वेत्तेरूपं विलुभितप्लवं मर्म्मताडनात् व्याकुलगतिं लुभग्रविमोहने विमोहनं व्याकुलीकरणं क्षुधवस-पूजेत्यादिना दम् शब्दायमानं शब्दं कुर्व्वाणं शब्दसुखकष्टादेरिति ङत्रः भयद-मिति स्टगस्य शब्दक्रियाया वा विशेषणम् ॥ ५२ ॥ भ०

श्रुत्वेत्यादि । विस्फूर्जथुप्रख्यं वज्रनिर्घोषतुल्यं टुओस्फूर्जावज्रनिर्घोषे

एष प्रावृषिजाम्भोदनादी भ्राता विरौति ते ।
ज्ञातेयं कुरु सौमित्रे भयात्त्रायस्व राघवम् ॥ ५४ ॥
रामसंदूषितं नैतन्मृगस्यैव विवञ्चिषोः ।
रामस्वनितसङ्काशः स्वान इत्यवदत्प्रियाम् ॥ ५५ ॥

ट्वितोऽथुच् निनादं शब्दं नौगदनदेति विकल्पनात् पक्षे घञ् श्रुत्वा मैथिली कष्टश्रितं क्रूरग्राहं रामं द्वितीयाश्रितेत्यादिना सः मत्वा बुद्ध्वा क्रूरग्राहेण रामेण मृतमिति परिदेविनी परिदेवनशीला शङ्कमाना सम्पृचानुरुधेत्यादिना घिनुण् सौमित्रिङ्गन्तुमैजिहत् ऐहाङ्कारितवती ऐहेर्ण्यन्तात् लुङि द्विर्वचनेचीति स्थानिवद्भावादजादेर्द्वितीयस्येति हिशब्दस्य द्विर्वचनम् अभ्यासकार्यञ्च ॥ ५३ ॥ ज० म०

श्रुत्वेत्यादि । विस्फूर्ज्जथुप्रख्यं वज्रनिर्घोषतुल्यं निनादं श्रुत्वा कष्टश्रितं कष्टं प्राप्तं रामं मत्वा परिदेविनी परिदेवनशीला अर्थात् सीता सौमित्रिं गन्तुं ऐजिहत् चेष्टामकारयत् ऐहङ् चेष्टायां ञिःप्रेरणे अङि हेर्द्वित्वं ट्वौस्फूर्ज्जावज्रनिर्घोषे दीर्घवानित्येके ट्वितोऽथुभावे ॥ ५३ ॥ भ०

एष इत्यादि । एष ते भ्राता रौति उतोऽद्वित्रित्यौकारः प्रावृषि जातः प्रावृषिजः सप्तम्याञ्जनेर्डः प्रावृडित्यादिना सप्तम्या अलक् सचाम्भोदश्चेति विशेषणमिति सः तद्वदतीति कर्त्तर्युपमाने णिनिः तस्मात्सौमित्रे ज्ञातेयं ज्ञातिभावस्तत्कर्म्म वा कुरु किमित्याह भयात्त्रायस्व राघवम् ॥ ५४ ॥ ज० म०

एष इत्यादि । हे सौमित्रे एष ते तव भ्राता विरौति शब्दायते रुचध्वनौ रपिद्वस्युतोऽद्वेर्त्रिः प्रावृषि वर्षाकाले जातः प्रावृषिजः हनजनादिति डः सरसिजमित्युदाहरता क्वचित् समासे विभक्तेरलुगिति स्मृचितं अम्भो ददातीति अम्भोदः पूर्ववत् डः प्रावृषिजश्चासौ अम्भोदोमेघश्चेति सहैव नदतीति यहादित्वाच्छिन् त्वं ज्ञातेयं ज्ञातिकर्म्म कुरु किमित्याह भयात्त्रायस्व विकारसंघेत्यादिना कर्म्मण्यर्थे ज्ञातेः ष्णेयः ॥ ५४ ॥ भ०

रामेत्यादि । रामसङ्कुषितं रामशब्दितमेतन्न भवति घुषिरविशब्दार्थः तस्य निशायां रुष्यमत्वरेत्यादिना विकल्पेनेट् मृगस्य विवञ्चिषोः ऊलयितुमिच्छोः वञ्चुगतौ भौवादिकः तस्मानेकार्थत्वात् प्रलम्भनइति चौरादिकस्याण्यन्तस्य वा प्रयोगः येषामनित्यण्यन्तास्तुरादयइति दर्शनं तेषां मतेनात्मापि सिध्यति एष स्वानो ध्वानः स्वनहसोर्वेति पक्षे घञ् क्रीडयः रामस्वनितसङ्काशः रामशब्दानुकारीति तां सीतां एवमवदत् उक्तवान् स लक्ष्मणः ॥ ५५ ॥ ज० म०

आप्यानस्कन्धकण्ठांसं रुषितं सहितुं रणे ।
प्रोर्णुवन्तं दिशो वाणैः काकुत्स्थं भीरु कः क्षमः ॥ ५६ ॥
देहं बिभ्रत्सुरस्याग्नौ खगः प्राणैर्दिदेविषन् ।
ज्याघुष्टकठिनाङ्गुष्ठं राममायान्मुमूर्षया ॥ ५७ ॥

रामेत्यादि । स लक्ष्मणस्तां सीतां इत्यवदत् किमित्याह एतत्र रामसंघुषितं घुषरवे विवक्षिषोर्व्यञ्जयितुमिक्षोर्मृगस्यैव एष स्वानः शब्दः रामस्वनिततुल्यः वञ्चकड्वञ्चने कित्त्वात् चौरादिकः वञ्चनं प्रलम्भनं चुर्म्योञ्जिर्व्वेति अभावपक्षे रूपमिदं केचित्तु वञ्चगत्यां चौरादिकोधातोरनेकार्थत्वात् प्रलम्भनेऽपि वर्त्तत इत्याहुः स्वनशब्दे भावे क्तौ स्वनितं घञि स्वानः ॥५५॥भ०

आप्येत्यादि । ष्यैङ्ट्वौ अस्मादाङ्पूर्व्वात्संयोगादेरातोधातोर्यण्वत इति निष्ठातोनः ओप्यायीट्ट्वावित्यस्य वा रूपम् ओदितश्चेति निष्ठानत्वंपीभावस्तु आङ्पूर्व्वस्य त्वन्भूधसोरिति वचनात् इह न भवति आप्यानस्कन्ध इति आप्यानं स्थूलं स्कन्धकण्ठांसं यस्य काकुत्स्थस्य बाहुशिरोंसः तस्य पश्चिमो भागः स्कन्धः तं रुषितं क्रुद्धं रणे संग्रामे सहितुं हे भीरु कातरे कः क्षमः शक्तः अपि तु न कोऽपीत्यर्थः क्षमेः शक्नोत्यर्थत्वात् तदुपपदे शकधृषेत्यादिना तुमुन् तीषसहेत्यादिना वेट् काकुत्स्थस्यापत्यं काकुत्स्थः शिवादिभ्योऽण् कस्मान्न क्षम इत्याह प्रोर्णुवन्निन्दिशोवाणैः यतः सर्व्वाः दिशः वाणैः छादयन्तं ऊर्णोतेः शतरि उवङ् क्षमत इति क्षमः पचाद्यच् ॥ ५६ ज० भ०

आप्यानेत्यादि । हे भीरु कातरस्वभावे रणे रुषितं क्रुध्यन्तं काकुत्स्थं रामं सहितुं अभिभवितुं कः क्षमः शक्तः न कोऽपीत्यर्थः वेभसहलुभ इत्यादिना उभयत्र पक्षे इम् क्षमेः पचाद्यित्वादन् काकुत्स्थस्यापत्यं इति शिवादित्वात् ष्णः आप्यानं स्थूलं स्कन्धकण्ठांसं यस्य तं ओप्यायीङ् वृद्धौ ओदित्वात् क्तस्य नकारः ष्योर्लोपोहस्यये इति यलोपः आङोऽन्भूधसोरिति नियमात् न ष्यादेशः ष्यैङ्ट्वावित्यस्य रूपं वा अंसोभुजशिरः बाणैर्दिशः प्रोर्णुवन्तं आच्छादयन्तम् ॥ ५६ ॥ भ०

देहमित्यादि । एष खगो रामायात् आगतवान् यातेर्लङि रूपम् किमर्थं देहं शरीरं अस्याग्नौ अस्त्रे अग्नाविव बिभ्रत्युः भ्रस्जिरुधः भ्रस्जेः सनीवन्तर्द्धेत्यादेडभावपक्षे स्क्योः संयोगाद्योरित्यनेन सलोपे भ्रस्कृत्वयोश्च रूपम् प्राणैर्हिदेविषन् क्रीडितुमिच्छन् दिवः कर्म्म चेति चकारात् करणसंज्ञा सनी-

शत्रून् भीषयमाणं तं रामं विज्ञापयेत कः ।
मास्म भैषीस्त्वयाद्यैव कृतार्थो दृश्यते पतिः ॥ ५८ ॥
यायास्त्वमिति कामो मे गन्तुमुत्सहसे न च ।
दृच्छुः कामयितुं त्वं मामित्यसौ जगदे तया ॥ ५९ ॥

वन्तेतोट् पत्ते रूपम् ज्यया गुणेन घुष्टौ निघृष्टौ ततएव कठिनौ अङ्कुशौ सव्यापसव्यकर्षणाद्यस्य घुषिरविशब्दने इति निष्ठायामनिट् सुमूर्षया मर्तुमिच्छया सृङः सनि उदोष्ठ्यपूर्व्वस्येत्युत्वम् अः प्रत्ययात् ॥ ५७ ॥ ज० म०

देहमित्यादि । एष सृगो सुमूर्षया मर्त्तुमिच्छया राममायात् आगच्छत् यात्रापणे धी सृङः सनि धर्वोऽज्झनिङ्गमामिति दीर्घे कदिरणाविति उर् रामस्य अस्त्रमग्निरिव तत्र स्वदेहं भ्रष्टुमिच्छुः भ्रस्जः सनि भ्रस्जभ्रिस्वर्षुभरदृति इमोऽभावपक्षे स्वादेः सोलोपः शक्ऋाजिति षङ् षढोःकःसे प्राणैर्दिदेविषन् क्रीडितुमिच्छन् इवन्तत्वात् पूर्व्वेण पक्षे इम् ज्याघुष्टोधनुर्गुणनिष्पिष्टः कठिनाङ्कुशो यस्य तं रामं घुषशब्दे क्षुब्धस्वाढेत्यादिना निपातः निपातात् निष्पेषणार्थोऽपि गम्यते गुणनिष्पेषेऽङ्कुशकाठिन्यं युक्तं निपातोऽपि शब्दार्थ एव इति चेत् ज्यया घुष्टः शब्दितः सुप्रसिद्धः कठिनाङ्कुशो यस्येति ॥ ५७ ॥भ०

शत्रूनित्यादि । तं रामं शत्रून् भीषयमाणभीतान् कुर्व्वाणं भियोहेतुभये षुक् भीरूभ्योहेतुभयदृति तङ् विज्ञापयेत कः क्षुभितचित्तङ्कुर्य्यात् नैवेत्यर्थः नित्यं स्मयतेरिति णावात्वम् अर्तीत्यादिना पुक् निमन्त्रणे नियोगे वा लिङ् पुर्व्ववदात्मनेपदं तस्मान्मास्म भैषीः मामूभींता स्मोत्तरेलङ्चेति चकारात् लुङ् सिचि दृङ्गः त्वया अद्यैव कृतार्थः पूर्णमनोरथः पतिर्द्रक्ष्यते दृशेः कर्म्मणि स्यट् ॥ ५८ ॥ ज० म०

शत्रूनित्यादि । शत्रून् भीषयमाणं भीतान् कुर्व्वाणं रामं को विज्ञापयेत क्षुभितहृदयं कुर्य्यात् न कोऽपीत्यर्थः स्मिभ्योर्घाङ्गे मङ्क्षेति स्मिधातोरिकारः आ मङ्क्ष भीर्भीष्वेति भियः पक्षे भीषादेशः तस्मात् त्वं सा भैषीः भयं न कुरु मास्मेन घीष्वाविति टी व्रजवदेति व्रिः मायोगे अमागमाभावः त्वया अद्यैव कृतार्थः कृतकृत्यः पतिर्द्रक्ष्यते दृशः कर्म्मणि तो वर्द्रोऽकिञ्झस इति रेफः ॥ ५८ ॥ भ०

यायेत्यादि । तदन्वेषणाय यायास्त्वमिति कामोऽभिलाषः कामप्रवेदने कञ्चिति इत्यकञ्चित्युपपदे लिङ् न च गन्तुमुत्सहसे शकधृषेति तुमुन् तस्मान्मून-

मृषोद्यं प्रवदन्तीं तां सत्यवद्यो रघूत्तमः ।
निरगात् शत्रुहस्तं त्वं यास्यसीति शपन् वशी ॥ ६० ॥
गते तस्मिन् जलशुचिः शुद्धदन् रावणः शिखी ।
जंजपूकोऽक्षमालावान् धारयो मृदलावनः ॥ ६१ ॥ कुलकम् ।

माङ्कामयितुमिच्छुः एषणशीलः समानकर्तृकेषु तृतसन् विन्दुरिच्छुरिति निपातनात्साधुः इत्येवमसौ लक्ष्मणो जगदे गदितस्तया सीतया ॥ ५९ ॥ ज० म०

यायां इत्यादि । त्वं रामान्वेषणाय यायां इति मे मम कामोऽभिलाषः कामोऽक्लेऽकञ्चितीति खी नलु गन्तुं शत्रुहस्ते तस्मात्त्वं मां कामयितुं इच्छुः इच्छतीति इच्छुः विन्दिच्छू इति निपातः कमइतोगुपूधूभ्येति कमेर्जिङ् इत्यसौ लक्ष्मणस्तया सीतया जगदे कर्मणि ठी ॥ ५९ ॥ भ०

मृषोद्यमित्यादि । माङ्कामयितुमिच्छुरित्येतन्मृषोद्यम् मृषावादं राजसूयेत्यादिना भावे क्यप् यजादित्वात्सप्तसारणं प्रवदन्तीं तां सीतां रघूत्तमो लक्ष्मणः शपन् शत्रुहस्तं त्वं यास्यसीति शापम्प्रयच्छन् भौवादिकोऽत्र शपिर्न दैवादिकः निरगात् निर्गतः तस्मादुटजादित्यर्थात् कथं मृषोद्यमित्याह वशी वशनं वशः इन्द्रियसंयमनं वशिरण्योरुपसंख्यानमित्यप् स यस्यास्ति स वशी जितेन्द्रियः अत एव सत्यवद्यः अवितथवादी शत्रुहस्तं यास्यसीति सत्यं वदतीति ब्रूञ्यत्युटो बहुलमिति कर्त्तरि यत् वदःसुपिः क्यप्चेति चकाराद्यत् भावे वा यतं विधायाच् अर्शआदित्वात् ॥ ६० ॥ ज० म०

मृषोद्यमित्यादि । त्वं शत्रुहस्तं यास्यसीति तां सीतां शपन् शापं प्रयच्छन् रघूत्तमो लक्ष्मणो निरगात् निर्गतः दृणातौ गाद्यां भूस्थेति सेर्लुक् इच्छुः कामयितुं मामिति मृषोद्यं मिथ्यावादं प्रवदन्तीं मृषोपपदे वदेर्नित्यं क्यप् लेर्व्वदःक्यप्यावित्यनन्तरं मृषोद्यं नित्यमित्युक्तं यहस्पाद्योरिति जिः सत्यं वदतीति ब्रूञोः कभावश्चत्युक्तेः कर्त्तरि यः सत्यवद्यः लेर्व्वदःक्यप्यावितिभावे ये सत्यं वद्यं विद्यते अस्येति अर्शआदित्वादद्वा सत्यं वद्यं अस्येति बहुव्रीहिर्व्वा यद्वा वदनं वत् वदस्यैर्थे क्विप् विकारसंघेत्यादिना तत्र साधावर्थे यः सत्यस्य करणे साधुरित्यर्थः वशी जितेन्द्रियः वश इन्द्रियसंयमः सोऽस्यास्तीति नैकाजादिति इन् अतएव सत्यवद्यः ॥ ६० ॥ भ०

गत इत्यादि । तस्मिन् लक्ष्मणे गते सति रावणः सीतामूच इति वक्ष्यमाणेन सम्बन्धः कीदृशः जलशुचिः स्नात इत्यर्थः शुद्धदन् निर्म्मलदशनः शुद्धा दन्ता

कमण्डलुकपालेन शिरसा च मृजावता ।
संवस्त्र्य लाञ्छिके वस्त्रे मात्राः संभाण्डय दण्डवान् ॥ ६२ ॥

यस्य अयान्ते इत्यादिना दन्तस्य दत्वादेशः शिखा अस्यास्तीति शिखी परिव्राजकः आङ्गादित्वादिनिः जञ्जपूकः पापाशयत्वात् गर्हितञ्जपतीति लुपसदेति यङ् जपजभेत्यभ्यासस्य नुक् यजजपदशां यङ् इत्यूकः अक्षमालावान् अक्षसूत्रयुक्तः संसर्गे मतुप् धारयतीति धारयः अनुपसर्गादिति शः कस्य मृदलावुनः नञिलम्बेनलोपश्चेत्यौणादिकजकारे प्रत्यये अलाबूः तस्य विकारः फलमिति ओरञ् तस्य फले लुक् नपुंसकत्वस्त्रीत्वम् मृत्पूर्णमलावु इति मध्यमपदलोपी सः क्तत्रयोगे कर्मणि षष्ठी इकोचिविभक्ताविति तुम् ॥ ६१ ॥ ज० म०

गत इत्यादि । तस्मिन् लक्ष्मणे गते सति रावणः समागम्य सीतामूचे इति चतुर्थश्लोकेनान्वयः कीदृशः जलशुचिः जलेन शुचिः स्नातत्वात् शुद्धा निर्मला दन्ता यस्येति शुद्धदन् निपातनात् शिखी शिखायुक्तः नैकाजादिति इन् पापाशयत्वात् गर्हितं जपतीति जञ्जपूकः गत्यर्थात् गलुमेत्यादिना यङ् अमजपजभेति खेर्नुण् जाग्टयङन्तयजजभेति जकः यङोलुक् अक्षमालावान् अक्षसूत्रयुक्तः मृदलावुनो धारयः धारयतीति साहिसातिचेतीति शः ढे धी मृच्च अलावुश्च इति समाहारद्वन्द्वे चर्गैक्यवं क्लीवं मृत्पूर्णमलावु मृदलावु वा भवेदलावुरालाबुरालावुस्यादलावुचेति शब्दभेदः अलावुस्तुम्बीफलं मृत् तीर्थमृत्तिका ॥ ६१ ॥ भ०

कमेत्यादि । कमण्डलुना कपालेन च जातिरप्राणिनामिति द्वन्द्वैकवद्भावः मृजावता निर्मलेन शिरसा च उपलक्षित इत्यभूते तृतीया संवस्त्र्य परिधाय वस्त्रात्समाङ्पूर्वात् दृ इति सुरुडभिश्चेत्यादिना णिच् लाञ्छिके वस्त्रे लाञ्छया रक्ते लाञ्छारोचनेत्यादिना ठक् मात्राः कमण्डल्वादिकान् सम्भाण्डय समाचित्य राशीकृत्येत्यर्थः भाण्डात्समाचयनइति पुरुभाण्डेत्यादिना णिङ् दण्डवान् मृद्दण्डः संसर्गे मतुप् ॥ ६२ ॥ ज० म०

कमेत्यादि । कमण्डलुश्च कपालो भिक्षापात्रञ्चेति समाहार द्वन्द्वः तेन उपलक्षितः केचित्तु कं जलं पालयतीति कपालः कमण्डलुश्चासौ कपालश्चेति कर्मधारयः तेन उपलक्षितः परिव्राजको हि दक्षिणकरे सजलं पात्रं धारयतीति भाव इत्याहुः मृजावता मार्जनायुक्तेन शिरसा उपलक्षितः मृजलूपशुद्धौ धिच्चात् भीमिचिन्नीत्यादिना ङः स्त्रीलिङ्गत्वञ्च विशेषणे तृतीया लाञ्छिके

अधीयन्नात्मविद्विद्यां धारयन्मस्करिव्रतम् ।
वदन् बह्वङ्गुलिस्फोटं भ्रूक्षेपञ्च विलोकयन् ॥ ६३ ॥
सन्दिदर्शयिषुः साम निजुम्हूषुः क्षपाटताम् ।
चंक्रमावान् समागत्य सीतामूचे सुखाभव ॥ ६४ ॥

वस्त्रे संवस्त्र्य परिधाय ज्रिः कल्याद्देरिति वस्त्रात् समाच्छादने परिधाने च ज्रिः संपूर्व्वस्यैव तदभिधानशक्तिः प्रकृत्यर्थपरित्यागस्तु धातोः स्वभावात् यदुक्तं विशेषकर्म्मसम्बन्धात् प्रकृतेस्तु गतार्थतेति लाक्षया रक्ते लाक्षिके विकारसंघेत्यादिना तेन रक्तेऽर्थे ष्णिकः मात्रां परिच्छदं कमण्डलुप्रभृतिं संभाण्ड्य समाचित्य युगपद्ग्रहनार्थं राशीकृत्य भाण्डानि संचिनोतीत्यर्थे पूर्व्ववत् ज्रिः प्रकृत्यर्थत्यागः संपूर्व्वतानियमश्च मात्रा कर्णविभूषणे । अक्षरावयवे दृक्षे मानेऽल्पे च परिच्छदे इति विश्वः दण्डवान् गृहीतदण्डः ॥ ६२ ॥ भ०

अधीत्यादि । मा कुरुत कर्म्माणि शान्तिर्वः श्रेयसीत्येवङ्घोषयन्ति ये ते मस्करिणः परिव्राजकाः तेषामेतन्मस्करिव्रतमसौ धारयन् मस्करमस्करिणाविति परिव्राजके स्तृ आत्मविदां योगिनां विद्यामुपनिषदमधीयन् जपन् इङ्धार्य्योरिति इङोधारेश्च अकर्त्तृवति कर्त्तरि शतृप्रत्ययः अन्तरा बह्वं प्रभूतं वदन् अङ्गुलिस्फोटमुनः स्फोटिकान्दत्वा भ्रूक्षेपञ्च विलोकयन् भ्रुवावुत्क्षिप्योत्क्षिप्य विलोकयन् उभयत्रापि स्वाङ्गेभ्व इति णमुल् ॥ ६३ ॥ ज० भ०

अधीत्यादि । आत्मविदां योगिनां विद्यामुपनिषदं अधीयन् पठन् धारीङोरक्षेपे शतरिति परस्मैत्वं स्वमते क्वचिदभिधानात् आत्मनेपरस्मैपदिनोः परस्मैपदात्मनेपदिता मस्करिणः परिव्राजकस्य व्रतं धारयन् अङ्गुलीस्फोटं अङ्गुलीं स्फोटयित्वा बह्वं वदन् मितभाषितया बह्वं हस्तसंज्ञयैव वदतीति भावः भ्रूक्षेपं भ्रुवमुत्क्षिप्य विलोकयन् ऋजुतया कटाक्षाद्यभाव इत्याशयः उभयत्र पीड्यमानात्स्वाङ्गाणमिति परः बह्वं अङ्गुलेः स्फोटो यत्र वदनक्रियायां भ्रुवोः क्षेपो यत्र विलोकनक्रियायां स्फोटक्षेपौ वर्जन्तौ ॥ ६३ ॥ भ०

संदीत्यादि । दृङ् भयस्मा भूदिति सामसान्त्वं सन्दिदर्शयिषुः सन्दर्शयितुमिच्छुः वदन् बह्वङ्गुलिस्फोटमिति योज्यं दृशेर्ण्यन्तसनन्तत्वे रूपं क्षपाटतां रात्रिसत्वन्निजुह्वुर्निन्होतुमिच्छुः धारयन्मस्करिव्रतमिति योज्यम् ह्वोतेरज्झनगमांसनीति दीर्घः कुटिलं क्रमणञ्चङ्क्रमा क्रमेर्नित्यङ्कौटिल्येगताविति यङ् सुगत इत्यभ्यासस्य सुक् अःप्रत्ययादित्यकारः अतोलोपः यस्य हलः टाप् सा यस्यास्ति

सायन्तनीं तिथिप्रण्यः पङ्कजानां दिवातनीम् ।
कान्तिं कान्त्या सदातन्या ह्रेपयन्ती शुचिस्मिता ॥ ६५ ॥

चङ्क्रमावान् कुटिलगतिमानित्यर्थः समागत्य ढौकित्वा सीतामूचे किमित्याह सुखंभवेति अनुकूला भवेत्यर्थः यदहम्प्रार्थये तत्र प्रतिकूला न भवेति भावः सुखप्रियादानुलोम्य इति क्रम्बस्ति योगे डाच् ॥ ६४ ॥ ज०म०

सन्दीत्यादि । साम सान्त्वं संदर्शयितुमिच्छुः दृशेर्ज्ञप्त्यात् सन् चपाटतां राजसभावं निह्नोतुमिच्छुः ह्नुङ्ग्लचौर्ये सनि धर्मोऽज्ञानिङ्कामिति घः चंक्रमावान् कुटिलगतियुक्तः अमेध्यादिस्थलपरिजिहीर्षया चित्तक्षत्यं वा कौटिल्यं गत्यर्थाद्भ्रमेति यङ् अमजमेति खेर्नुण् यङोलुक् शंस्यादः ततोवतुः ईदृशः सन् समागम्य सुखाभव यदहं याचे तत्रानुकूलाभवेति सीतामूचे सपत्ननिष्पत्तेत्यादिना सुखादानुकूल्ये डाच् यद्यप्यत्र तीयसम्बन्धेजेत्यादिरूक्तत्वात् क्रजीत्यनुवर्त्तते तथापि मण्डूकप्लुताधिकारात् स्त्रिः क्रम्बस्सुखभूतत्वाद्भाव इति रूक्तत्वात् क्रम्बस्सुखित्यस्यानुवर्त्तनं बोध्यं प्रयोगदर्शनात् इत्तौक्रजीति लिपिकरप्रमादात् वाङ्ग्ल्यार्थं वा किंवा सुखं विद्यते यस्याद्यर्थ्यादित्वात् अः तत आप् ॥ ६४ ॥ भ०

सायमित्यादि । का त्वमिति वक्ष्यमाणेन सम्बन्धः सायन्दिनावसानजन्यत्व भवाङ्कान्तिम् यदा घोऽन्तकर्म्मण्येत्येतस्मात् घञ्प्रत्ययान्तः तदा सायश्चिरेति टुञुलौ तुट् च मकारान्तत्वञ्च निपात्यते यदा सायंशब्दोमकारान्तः तदाप्यव्ययत्वादेव प्रत्ययागमौ स्यातां कस्येत्यपेक्षायां तिथिप्रण्यः चन्द्रमसः पञ्चदश कलाः तासां दृद्भिह्लासाभ्यां पञ्चदशतिथीः प्रणयति प्रवर्त्तयति सत्सूद्विषेति क्विप् उपसर्गादसमासेति णत्वम् एरनेकाचइति यणादेशः पङ्कजानाञ्च कान्तिङ्कीदृशीन्दिवातनीन्दिवाभवां कान्त्या त्वदीयया सदातन्या सदाभवया ह्रेपयन्ती लज्जयन्ती दिवातन्याः सायन्तन्यास्च सदाभवत्वात् जिह्रीतेरतींत्यादिना णौ युक् शुचिस्मिता शुभ्रहासा ॥ ६५ ॥ ज०म०

सायमित्यादि । का त्वमेकाकिनीति द्वितीयश्लोकेन सम्बन्धः तिथिप्रण्यश्चन्द्रस्य सायन्तनीं दिनावसानभवां कान्तिं तथा पङ्कजानां पद्मानां दिवातनीं दिनभवां कान्तिं स्वकान्त्या ह्रेपयन्ती लज्जयन्ती कीदृश्या सदातन्या सर्व्वकालस्थितया चन्द्रपद्मयोस्तु प्रभा न सदा तिष्ठतीति लज्जाहेतुः पञ्चदशतिथीः प्रणयति प्रवर्त्तयतीति तिथिप्रणीश्चन्द्रः तस्य ह्रासवृद्धिभ्यामेव ज्योतिःशास्त्रे तिथिनिरूपणात् त्वासुधिति क्विप् प्राग्वद्रीणइति णत्वं कस्यादयनेकाच इति

का त्वमेकाकिनी भीरु निरन्वयजने वने ।
क्षुध्यन्तोऽप्यघसन् व्यालास्त्वामपालां कथन्न वा ॥ ६६ ॥
हृदयङ्गममूर्त्तिस्त्वं सुभगम्भावुकं वनम् ।
कुर्व्वाणा भोममप्येतद्वदाभ्यैः केन हेतुना ॥ ६७ ॥

यत्वं तिथिप्रणीदर्गविपन्निशामणिस्त्विनेत्वचूडामणिरत्विनेत्वभूरित्यमरः मन्मथेनापिता छाया सैव कान्तिरिति स्मृतेति परिभाषिता कान्तिः सीतायाः चन्द्रपद्मयोस्तु शोभामात्रं कान्तिरिति बोध्यं त्यलाद्यचिरदत्विणेत्यादिना सार्यदिवासदाग्रदेभ्यस्त्यनट् भवार्थे शुचिस्मिता शुद्धहासा स्मितन्त्वदृष्टदृशने हासे इति वैजयन्ती ॥ ६५ ॥ भ०

का त्वमित्यादि । का त्वन्देवी मानुषी राक्षसी वेति एकाकिनी असहाया एकादाकिनिश्चासहायइति आकिनिच् भीरु इत्यामन्त्रणम्भयप्रकृतित्वात् स्त्रीणाम् निरन्वया निरनुगमा जना यस्मिन्वने यत्र न कथञ्चिन्मनुष्याणां सम्भवः क्षुध्यन्तोऽपि बुभुक्षमाणा अपि दिगादित्वात् यत् व्याला हिंस्रा व्याघ्रादयः कथं वा त्वाञ्चाघसन् न भक्षितवन्तः अदेः लुङ्सनोर्घस्लृ लृदित्वाच्चङ्परङ् क्षुध्यन्तोनाघसन्निति पाठान्तरम् तत्र कथन्न वा अपरिचितानेवाघसन् इति योज्यम् अपालां सतीं अविद्यमानः पालो यस्या इति पालरक्षण इति चौरादिकः पालयतीति पालः पचाद्यच् यदा प्रयोजकविवक्षा तदा पातेर्लुगागमो णौ वक्तव्य इति लुक् ततः पचाद्यच् ॥ ६६ ॥ ज० म०

का त्वमित्यादि । हे भीरु वने एकाकिनी का त्वं देवी मानुषी अन्या वा वने किम्भूते निरन्वयजने निरन्वया निःसम्बन्धा जना यत्र भीरु इति सम्बोधनं भयप्रकृतित्वान्नारीणां जातिभेदस्य प्रत्यक्षत्वाद्वा एकादाकिन्नसहायेऽभिधानात् क्षुध्यन्तो बुभुक्षमाणा व्याला व्याघ्रादयो हिंस्राः अपालां पालकारक्षितां त्वां कथं नावसन् न भक्षितवन्तः वस्लृदःसनोर्घसृ लृदनुबन्धात् शासिवसिघसीति ङः क्षुधबुभुक्षायां दिवादिः पालरक्षणे चौरादिकः पचाद्यच् व्यालोदुष्टगजे सर्पे श्वापदेनान्यवत्पुल इति मेदिनी ॥ ६६ ॥ भ०

हृदयमित्यादि । केन हेतुना इदं वनमभ्यैः अभिगतासि वद कथय अभिपूर्व्वादिणोलङ् मध्यमपुरुषैकवचनं आडजादीनाम् आटश्चेति वृद्धिः हृदयङ्गच्छति या मूर्त्तिः शरीरमत्यन्तसौन्दर्य्यात् गमेश्चेति खच् सा एवंविधा मूर्त्तिर्यस्याः सा त्वम्भीमयेतद्वचनं सुभगम्भावुकं सर्व्वस्यैवाप्रियं प्रियङ्कर्व्वाणा

सुकृतं प्रियकारी त्वं कं रहस्युपतिष्ठसे ।
पुण्यकृच्चाटुकारस्ते किङ्करः सुरतेषु कः ॥ ६८ ॥
परिपर्य्युदधेरूपमाद्युलोकाच्च दुर्लभम् ।
भावत्कं दृष्टवत्स्वेतदस्मास्वधि सुजीवितम् ॥ ६९ ॥

व्यसुभगं भूत्वा सुभगं भवतीति कर्त्तरि भुवदृति खुकञ् ॥ ६७ ॥ ज० म०

हृदयेत्यादि । केन हेतुना त्वं एतद्वचनं अभ्यैः अभिगता इति वद् अभिपर्य्वादिणोघ्याः क्विप् लुगङ्गयोपः घीटीथीष्विति अम् आदिगेचोरिति णुः भूयोऽम् त्वादयोऽर्थाधिक्येरिति तृतीया हृदयङ्गमा मूर्त्तिर्यस्याः सा तथा लावण्यातिशयात् हृदयं गच्छतीति तभ्रुहृदृत्वादिना खः नाम्नीत्यस्य व्यभिचारो बाहुल्यात् भीममध्येतद्वचनं सुभगम्भावुकं कुर्व्वाणा प्रागप्रियं प्रियं भवतीति भुवोर्धखिष्णुखुकञाविति खुकञ् ॥ ६७ ॥ भ०

सुकृतमित्यादि । सुकृतम्पुण्यकारिणं शोभनं कृतवानिति सुकर्म्मपापेत्यादिना क्विप् कं रहसि विजने त्वमुपतिष्ठसे उपश्लिष्यसि सङ्गतकरणेतङ् प्रियकारी अनुकूलवर्त्तिनी सती प्रियमनुकूलङ्करोतीति च्लेमप्रियमद्रेणचेति अण् टिड्ढाणञित्यादिना ङीप् पुण्यकृत् कृतपुण्यः तस्य पूर्ब्बवत्क्विप् चाटुकारः प्रियवाक्यकरः नश्यद्श्लोकेत्यादिना टे प्रतिषिद्धेऽणेव भवति दृष्टश्रुते किङ्करः दासः दिवा विभेति टः किंयत्तद्डुषु कृञोऽधिकरणमिति तत्क्लीबविषये द्रष्टव्यम् सुरतेषु शोभनरतेषु नपुंसके भावे क्तः अनुदात्तेत्यादिनानुनासिकलोपः अनेनोभयरुचिराख्याता ॥ ६८ ॥ ज० म०

सुकृतमित्यादि । त्वं प्रियकारी अनुकूलवर्त्तिनी सती कं सुकृतं पुण्यकारिणं पुरुषं रहसि विजने उपतिष्ठसे सङ्गच्छसि मैत्राध्वसङ्गाराधदृति सङ्गं शोभनं करोतीति त्वासुसिति क्विप् प्रियङ्करोतीति च्लेमप्रियमद्रात्कुर्व्वा दृति खाभावपक्षे ढात्यण् कः पुण्यकृत् ते तव सुरतेषु शोभनरतेषु किङ्करो दासः सन् चाटुकारः प्रियवाक्यकारी पुण्यं करोतीति क्विप् रमेर्भावे क्तः वनतनादयनिमामिति मलोपः चाटु करोतीति क्वचिदपवादविषयेऽप्युत्सर्गोऽभिनिविशत दृति न्यायात् सुकृष्ट दृति टविषयेऽपि ढात्यण् किमित्यव्ययं तस्मात् कृजष्टः ॥ ६८ ॥ भ०

परीत्यादि । एतद्रूपम्भावत्कम्भवत्यादृदमिति भवतष्ठक्छसाविति ठक् छसौ ठक्छसोश्चोपसंख्यानमिति पुंवद्भावः दृसृसुक्रान्तात्कः दुर्लभम्परिपर्य्युदधेः

आपीतमधुका भृङ्गैः सुदिवेवारविन्दिनी ।
सत्परिमललक्ष्मीका नापुंस्कासीति मे मतिः ॥ ७० ॥

अपपरीवर्जने इति कर्म्मप्रवचनीयसंज्ञा याद्वितीयायास्माप्रायाम्पञ्चम्यपाङ्परिभिरिति पञ्चमी अपपरिवहिरञ्चवः पञ्चम्या इति विभाषासमासश्च असमासपक्षे परेर्वर्जनइति द्वित्वचनम् उदधिं वर्जयित्वा चतुरुदधिमेखलायाम्भुवि दुर्लभमाद्युलोकाच्च स्वर्गलोकान्तञ्च यावत् दुर्लभमत्रापि पूर्ब्बवत्पञ्चमी तादृशन्दृष्टवत्स्वर्गात्तु अधि सुजीवितमस्माद्विषयो आधिक्येन सुजीवितम् अहो वा सुजीवितमिति अहो शब्दार्थे अधिशब्दो वर्त्तते ॥ ६९ ॥ ज० भ०

परीत्यादि। एतत् भावत्कं भवदीयं रूपं दृष्टवःस्तु अस्मात्तु अधि सुजीवितं अधिकं शोभनं जीवनं विषये सप्तमी यद्वा अधिकेशार्थोपाधिभ्यामिति स्वाम्यर्थेनाधिना च योगे सप्तमी तेनास्मत्स्वामिकं सुजीवितमित्यर्थः त्वामपश्यतस्तु जनस्य तन्नास्तीति भावः भवत्याद्दमित्यर्थे विकारसंज्ञेति कण् पुंवत्रूप्युक्तपुंस्कः स्त्रियामित्यादौ तत्वशस्तरादाविति तद्धितसंज्ञके त्वपर्य्यन्तप्रत्यये शस्तरादौचेति देवीदासचक्रवर्त्तिव्याख्यानात् पुंवत् ये तु त्वतौभावदित्यनेन कृतयोस्त्वयोरेवमित्याद्यस्तन्मतेऽभिधानात् योगविभागात् किंवा पुंवत्ये रिति पुंवत् भवच्छब्दस्य स्त्रियंज्ञायां पठितत्वात् पुंवत्स्त्रेरित्यत्र क्तेर्लुक्त्येचेत्यस्मात्त्येचेत्यनुवर्त्तते दृष्टौ त्येचेति यत्र दृश्यते तत्क्षिपिकरप्रमादात् अन्यगौरवाद्वा न लिखितं तदनुवृत्तेर्दुर्निवारत्वेन स्पष्टत्वात्पुंवत्सर्व्वनाम्नो वृत्तिमात्रे तसादौ चेति परस्रूत्रं कीदृशं रूपं उदधेः परि परि उदधिं वर्ज्जयित्वा दुर्लभं दुष्प्रापं उदधिपरिक्षिप्तायां पृथिव्यां दुर्लभमित्यर्थः सप्तम्र्थे लक्ष्म्या उत्पत्तिः तत्रैव तत्सम्भवो नान्यत्रेति भावः आद्युलोकात् स्वर्गलोकपर्य्यन्तञ्च दुर्लभं उभयत्र अन्यारभ्येत्यादिना पञ्चमी पर्य्याङौ त्यागसीमार्थौ आङ् व्याप्तिसीम्नोरित्यागेऽन्यावित्युक्ते वर्ज्जनार्थपरेर्विभाषया द्वित्वमभिधानात् ॥ ६९ ॥ भ०

आपीत्यादि। परि सर्व्वतोभार्जनमिति परिमलः कलत्रपक्षेत्यधिकृत्य सृजेश्लिलोपश्चेति कलप्रत्ययश्चौणादिकः इह सुरतोपभोगविमर्द्दः परिमलोऽभिप्रेतः तस्य लक्ष्मीः तत्कृतत्वात् सती विद्यमाना परिमलशोभा यस्याः उरःप्रभृतिभ्यः कप् सा त्वमपुंस्का अविद्यमानभर्त्तृका नासीति मे मतिः पूर्ब्बवत्कप् किमिव सुदिवेवारविन्दिनी पद्मिनी शोभनन्दिवा नीहारादभावाद्दिवा दिवसं यस्याः सुप्रातेत्यादिना अच् आपीतमधुका भृङ्गैः आपीतमधु यस्याः

मिथ्यैव श्रीः श्रियमन्या श्रीमन्मन्यो हृषा हरिः ।
साक्षात्कृत्याभिमन्येऽहं त्वां हरन्तीं श्रियं श्रियः ॥ ७१ ॥

शेषाद्विभाषेति कप् यथेयं सत्परिमललक्ष्मीका तथा त्वमपीति ॥ ७० ॥ ज०म०

प्रपेत्यादि । त्वं न अपुंस्कासि किन्तु विद्यमानभर्तृकासीति मे मम मतिः यतः सती परिमलस्य लक्ष्मीर्यस्यास्तादृशी विभर्त्रीत्ये परिमलो गन्धे जनमनोहर इत्यमरः सुरते भोगविभर्तृ एव परिमल इति जयमङ्गला पुंलक्ष्मीभ्यामेकवचनान्ताभ्यां को बहुव्रीहाविति परः स्वमते लक्ष्मीशब्दात् द्यूतःक इति कः अपुंस्केति पुंवत्कुक्पुंस्कादिति ज्ञापकात् द्यूतःक इत्यस्य योगविभागेन क्वचिदन्यत्वापि कदिति बोध्यं स्वार्थे कोवा यथा भट्टैः प्रपीतं मधु यस्यास्तादृशी सुदिवा अरविन्दिनी पद्मिनी तथा त्वमपि सत्परिमललक्ष्मीका शोभनं नीहारादिरहितं दिवा दिनं यस्याः सुपूर्व्वाद्दिवाशब्दाद्बहुव्रीहौ अदिति परः स्वमते दिवाशब्दात् स्वार्थे ष्णः तस्यानित्त्वविवक्षया न ङीप् वद्विश यद्वा शोभने दिवसे इति सप्तम्यन्तं रूपं दिवाशब्दोऽयमव्ययः ॥ ७० ॥ भ०

मिथ्यैवेत्यादि । श्रियः श्रियं रूपसम्पदं हरन्तीमभिभवन्तीं त्वां साक्षात्कृत्य प्रत्यक्षीकृत्य विभाषाकृञीत्यनुवर्त्तमाने साक्षात्प्रभृतीनि चेति गतिसंज्ञा गतिसमासे ल्यवादेशः अहमभिमन्ये किं मिथ्या श्रीः श्रियमन्या अहमेव श्रीर्नान्येति मन्यमाना श्रीर्मिथ्या नैव श्रीः किन्तु त्वमेवेति आत्मानं स्वम् दिवादित्वात् श्यन् दृच एकाचोमत्ययवच्चेत्यम्भावः तस्यामः प्रत्ययत्वान्मलोपाभावः न विभक्तौत्वमा इति वचनात् अचीतीयङादेशः क्विबन्ताधातुत्वच्च जहतीति क्विब्चीत्यादिना श्रयतेरोणादिकः क्विप् हरिरात्मानं श्रीमन्तमन्यमानो हृषान श्रीमान् यस्त्वं स एव श्रीमानित्यहमभिमन्ये ॥ ७१ ॥ ज० म०

मिथ्यैवेत्यादि । श्रिया लक्ष्म्याः श्रियं शोभां हरन्तीं जयन्तीं वा त्वां साक्षात्कृत्य अहमेवमभिमन्ये श्रीर्लक्ष्मीर्मिथ्यैवात्मानं श्रियं मन्यते हरिरपि हृषा आत्मानं श्रीमन्तं मन्यते त्वमेव श्रीस्तदीयशोभाहरणात् त्वत्सदृशेव त्वद्योगात् श्रीमानिति भावः मन्यात्स्वार्थ इति स्वम् णित्त्वात् दिवसुतदेति यत् खित्यव्याजरूप इति एकाजिजन्तत्वात् श्रीशब्दस्य ह्रीकान्तत्वं हस्तेपाणौप्राप्त्वमित्यादिना समासपक्षे व्यादनजः क्त्वोयप्सु साक्षादादेरभूततद्भावेऽजः क्त्वोयप् वेति परः ॥ ७१ ॥ भ०

नोदकरिष्यतात्यर्थं त्वामैक्षिष्यत चेत् स्मरः ।
खेलायन्ननिशं नापि सजूःकृत्य रतिं वसेत् ॥ ७२ ॥
वल्गूयन्तीं विलोक्य त्वां स्त्री न मन्यूयतीह का ।
कान्तिं नाभिमनायेत को वा स्थाणुसमोऽपि ते ॥ ७३ ॥

नोदेत्यादि । स्मरभार्या रतिः सापि रूपेण निकृष्टेति दर्शयति चेत् यदि स्मरः त्वामैक्षिष्यत दृष्टवानभविष्यत् तदा अत्यर्थमुदकरिष्यत रतिस्मृति भ्रशमुत्करिष्यतो नाभविष्यत् ईक्षदर्शने इति कठिशोक इति भौवादिकात् क्रियातिपत्तौ लृङ् नापि रतिं स्वभार्यां सजूःकृत्य सहायीकृत्य वसेत् अपितु परित्यजेत् अत्र क्रियातिपत्तिर्न विवक्षिता किन्तु हेतुहेतुमद्भावः नापि रतिं सजूःकृत्य वसेत् यदि त्वामीक्षेतेति हेतुपदमभ्यूह्य हेतुमद्भावदर्शनात् उर्यादिषु सजूःसहार्थ इति वचनात् गतिसंज्ञा खेलायन् अनिशं क्रीडन् सर्व्वदा खेलाशब्दात् कण्ड्वादित्वात् यक् ॥ ७२ ॥ ज० म०

नोदेत्यादि । रतिरपि न ते तुल्येति दर्शयन्नाह स्वयं कामश्चेत् यदि त्वां ऐक्षिष्यत तदा अत्यर्थं न उदकरिष्यत रतिं प्रति भ्रशमुत्करिष्यतो नाभविष्यत ईक्षङ्दर्शने कठिङ् आध्याने उभयत्र ध्वर्थासम्भवे धीं नापि रतिं स्वभार्यां सजूःकृत्य सहायीकृत्य अनिशं निरन्तरं खेलायन् क्रीडयन् वसेत् तां परित्यजेदेव यदि त्वां पश्येत् इति हेतुपदमत्र बोध्यं भव्येवाफलश्लोत्योरित्यस्य योगविभागाद्भूतेऽपि खी भव्येऽपि न क्तिः विलासार्थात् खेलाशब्दात् कण्ड्वादिन्वात् करोत्यर्थे क्यः सजूःशब्दोऽयमव्ययः सहार्थे वर्त्तते साक्षादादित्वात् हस्तेपाशौ प्राध्वं इत्यादिना समासः ॥ ७२ ॥ म०

वल्गूत्यादि । त्वां वल्गूयन्तीं शोभमानां विलोक्य न मन्यूयति स्त्रीह का इह जगति का स्त्री न मन्यूयेत् न कुप्येत् सर्व्वदा कुप्यत्येव ईर्ष्यायुक्तत्वात् स्त्रीणामसम्भवने लिङ् वल्गुमन्तुशब्दाभ्यां क्यङ्वदित्वाद्यक् कोवा को नाम स्थाणुसमोऽपि काष्ठतुल्योऽपि गुणदोषानभिज्ञत्वात्ते तव कान्तिं विलोक्य नाभिमनायेत पूर्व्वमदृष्टत्वादनभिमना सन् अभिमनाः सचेता भवेत् पूर्व्ववल्लिङ् अभिमनसोभ्रशादित्वात्क्यङ् सलोपश्च महादेवतुल्योवा आस्तामन्यः सोऽपि तावदभिमनायते ॥ ७३ ॥ ज०म०

वल्गित्यादि । इह जगति का स्त्री वल्गूयन्तीं शोभमानां त्वां विलोक्य न मन्यूयति न ईर्ष्यति स्वपतिवैराग्यशङ्कया सर्व्वैव कुप्यतीत्यर्थः वल्गुमन्तुभ्यां

दुःखायते जनः सर्व्वः स एवैकः सुखायते ।
यस्योत्सुकायमाना त्वं न प्रतीपायसेऽन्तिके ॥ ७४ ॥
कः पण्डितायमानस्त्वामादायामिषसन्निभाम् ।
वसन् वैरायमाणेभ्यः शून्यमन्ववसद्वनम् ॥ ७५ ॥

कण्ड्वादित्वात्क्यङः धौङ्ज्यरे कोवा स्थाणुसमोऽपि ब्रह्मादेववज्जितेन्द्रियोऽपि काष्ठवन्नीरसोऽपि वा तव कान्तिं विलोक्य न अभिमनायेत प्रीतमना न भवेत् अपि तु सर्व्वएवाभिमनायेत भ्वादेश्चार्थे वेति प्राच्यिकोङ्यः सलोपश्च धौङ्ज्यरे प्रौढ्यासम्भावने इति खौ ॥ ७३ ॥ भ०

दुःखेत्यादि । स एवैको जनः सुखायते सुखं वेदयते यस्यान्तिके समीपे न त्वम्प्रतीपायसे न प्रतिकूलवर्त्तिनी भवसि उत्सुकायमाना उत्कायमाना सती यस्य पुनरन्तिके उत्सुकायमाना प्रतीपायसे स सर्व्वोजनः दुःखायते दुःखं वेदयते सुखदुःखशब्दाभ्यां सुखादिभ्यः कर्त्तृवेदनायामिति क्यङ् उत्सुकप्रतीपशब्दाभ्यान्भृशादित्वात् ॥ ७४ ॥ ज०म०

दुःखेत्यादि । यस्यान्तिके समीपे त्वं उत्सुकायमाना उत्सुकीभवन्ती न प्रतीपायसे न प्रतिकूलीभवसि स एवैकोजनो जगति सुखायते सुखमनुभवति अन्यः सर्व्वोजनोदुःखायते दुःखमनुभवति सुखदुःखशब्दाभ्यां शब्दसुखकष्टादेरिति वेदे क्यङः केचित्तु सुखदुःखयोस्तदाश्रयेऽपि वर्त्तमानत्वात् असुखःसुखीभवति अदुःखोदुःखी भवति इत्यर्थे डाच् लोहितादेः पञ्चेति क्यङमाहुः उत्सुकप्रतीपाभ्यां भृशादित्वात् भ्वर्थे क्यङः केचित्तु प्रतीपशब्दात् धान्यङ्कीत्यादिना आचारे क्यङमाहुः ॥ ७४ ॥ भ०

कःपण्डीत्यादि । पण्डितायमानः अपण्डितः कथमपि पण्डितो भवन् भ्वादित्वात्क्यङ् त्वामामिषसन्निभां सर्व्वजनप्रार्थनीयत्वात् आदाय गृहीत्वा कः शून्यं वनमन्ववसत् शून्ये वने अवसदित्यर्थः उपान्वध्याङ् वस इति कर्म्मसंज्ञा कीदृशः वसन् विभ्यत् वैराय माणेभ्यः वैरङुर्व्वाणेभ्यः शब्दवैरेत्यादिना क्यङ् भीत्रार्थानामित्यपादानसंज्ञा ॥ ७५ ॥ ज० म०

क इत्यादि । कः पण्डितायमानः अपण्डितः पण्डितोभवन् आमिष सन्निभां लोभ्यद्रव्यतुल्यां त्वां आदाय गृहीत्वा शून्यं वनं अन्ववसत् वसतिस्म कर्म्मक्रियेत्यादिना डे ढं पण्डिताद्भ्वादित्वात् क्यङः वैरायमाणेभ्यः वैरं कुर्व्वाणेभ्यः वसन् भवन् भयाभावे एवं कर्त्तुमनुचितमिति भावः वैरात् शब्दादित्वात्

ओजायमाना तस्यार्घ्यं प्रणीय जनकात्मजा ।
उवाच दशमूर्द्धानं सादरा गद्गदं वचः ॥ ७६ ॥
महाकुलीन ऐक्ष्वाके वंशे दाशरथिर्मम ।
पितुः प्रियङ्करो भर्त्ता क्षेमकारस्तपस्विनाम् ॥ ७७ ॥

शब्दसुखकष्टादेरिति क्तौ ङ्रः यतोऽपायभीति अपादानसंज्ञा आभिमुख्ये लोभ्ये सम्भोगोत्कारयोरपि । आभिमुख्ये सुन्दराकारे रूपादिविषयेऽपि चेति विश्वः ॥ ७५ ॥ भ०

ओजेत्यादि । एवमुक्तवति रावणे जनकसुता दशमूर्द्धानमुवाच दश मूर्द्धानः शिरांसि यस्य तमर्घ्यमर्हणीय दत्वा अतिथिरयमिति सम्प्रदानस्य गौणत्वेन विवक्षितत्वात् षष्ठी ओजायमाना ओज इवाचरन्ती कर्तुः क्यङ् सलोपश्च ओजसोष्मरसोनित्यमिति वचनात् किञ्चिल्लज्जापरित्यागात् तेजस्विनी भवन्तीत्यर्थः किमुवाच वचो वक्ष्यमाणं सादरा सती परिव्राजक इति गद्गदमनभिव्यक्तमसंस्कृतत्वात् ॥ ७६ ॥ ज० म०

ओजेत्यादि । जनकात्मजा सादरा सती तस्य कपटपरिव्राजकस्य अर्घ्यं प्रणीय अतिथिबुद्ध्या दत्वा दशमूर्द्धानं दश मूर्द्धानो यस्य तं रावणं गद्गदं लज्जया अन्तर्भिया वा सम्यगनभिव्यक्तं वचो वक्ष्यमाणं उवाच ओजायमाना किञ्चिल्लज्जापरित्यागात् ओजस्विनीवाचरन्ती ओजःशब्दात् धर्म्मिप्रधानात् धान्ङ्रक्तीति ङ्रः सलोपश्च भ्वादित्वात् चूर्ण्यर्थे वा ङ्रः तस्य इति सम्प्रदानस्य सम्बन्धविवक्षायां षष्ठी प्रणीयेत्यस्य समीपे स्थापयित्वा इति वार्थः मूल्ये पूजाविधावर्घः अर्घाय इदमित्यर्थे विकारसंज्ञेति यः ॥ ७६ ॥ भ०

महेत्यादि । यदुक्तवान्तं कं रहस्युपतिष्ठस इति अस्य प्रतिवचनं मम भर्त्ता महाकुलीनः महाकुलस्यापत्यमिति महाकुलादञ्खञावितिखञ् किमादित्यवंशसम्भवः किं सोमवंशसम्भवो वा महाकुलस्यापत्यमित्याह ऐक्ष्वाके वंशे इक्ष्वाकूणामयमैक्ष्वाकः दाण्डिनायनेत्यादिना टिलोपनिपातनम् अन्ये तत्र सन्तीत्याह दाशरथिः दशरथस्यापत्यं यः स मम भर्त्ता महाकुलीनः कीदृशः पितुः प्रियङ्करः अनुकूलकारी तपस्विनाञ्च क्षेमकारः क्षेमप्रियमद्वेषेति चकारात् खच् ॥ ७७ ॥ ज० म०

महेत्यादि । कं रहस्युपतिष्ठस इति रावणप्रश्ने उत्तरमिदं मम भर्त्ता दाशरथिः प्राधान्यात् विशेषेण महिम्ना च ज्येष्ठ एव गम्यते दशरथस्यापत्यं

निहन्ता वैरकाराणां सतां बब्रुकरः सदा ।
पारश्वधिकरामस्य शक्तेरन्तकरो रणे ॥ ७८ ॥
अध्वरेष्विष्टिनां पाता पूर्त्तौ कर्म्मसु सर्व्वदा ।
पितुर्न्नियोगाद्राजत्वं हित्वा योऽभ्यागमद्वनम् ॥ ७९ ॥

इति वाह्लाद्यतइति अदन्तत्वात् णिः णिच्चेत्रिः ऐक्ष्वाके वंशे महाकुलीनः इक्ष्वाकुनामा कश्चित् सूर्य्यवंशसम्भवः तस्यापत्यमिति तद्भवे वंशे इत्यर्थाद्भ्यते शिवादित्वात् ष्णः ओर्गोपोऽकद्रुपाण्डोरेये इत्यत्र एयश्च अस्येति समासात् उकारलोपः ये तु केवलण्येयप्रत्यय इति व्याचक्षते तन्मते योगविभागात् महाकुलेविद्यमानः ढघेकादिति णीनः महाकुलीन इति पाठे अनित्यत्वित्वया त्रिः महाकुलस्यापत्यमिति केचित् पितुः प्रियङ्करः प्रियङ्करोतीति क्षेम-प्रियमद्राल्कुर्व्वति खः तस्य विकल्पपक्षे तपस्विनां क्षेमकारः कुशलकर्त्ता ढात् षण् ॥ ७७ ॥ भ०

निहेत्यादि । वैरकाराणां शत्रूणां वैरपूर्व्वात्कृञोमशब्दस्नोकेत्यादिना टे प्रसिद्धे अणेव भवति निहन्तेति हजन्तस्य प्रयोगः तत्र कर्म्मणि षष्ठी सतान्धर्म्मे स्थितानाम्बब्रुकरः बब्रुकार्य्यङ्करोतीति दिवाविभेति टः स्त्रीवित्तायान्तु किंयत्तदइदमिति करोतेरच् आङ्परयोः खनिशृभ्याखिड्डेत्यौणादिकः कुः परशुशब्दः तत्पर्य्यायएवाव्युत्पन्नः परश्वधशब्दः स प्रहरणं यस्य परश्वधाढ्यश्च तस्य परशुरामस्य सम्बन्धिन्याः शक्तेः सामर्थ्यस्यान्तकरो विनाशयिता अन्तङ्करोतीति पूर्व्ववद्टः रणे सङ्गामे तत्र भवः ॥ ७८ ॥ ज०म०

निहेत्यादि । तथा वैरकाराणां निहन्ता ढात् षण् कर्म्मणि षष्ठी सतां साधूनां सदा सर्व्वदा बहूनि कार्य्याणि करोतीति सुकृटः रणे पारश्वधिक-रामस्य जामदग्न्यस्य शक्तेः सामर्थ्यस्य अन्तकरो नाशयिता परश्वधेन परशुना प्रहरतीति ष्णिकः परान् श्यति खण्डयतीति परशुः परश्वधश्चेति निपातनात् ॥ ७८ ॥ भ०

अध्वेत्यादि । इष्टमेभिरिति इष्टिनो यज्वानः इष्टादिभ्यश्चेतीनिः किमिष्ट-वन्तः अध्वरान् कर्म्माणि तत्र क्रत्वेन्विषयस्येति कर्म्मणि सप्तमी अध्वरेष्विष्टिना-मिति कर्म्मणि षष्ठी क्रतौ यागे पाता रक्षिता पूर्त्तौ कर्म्मसु सर्व्वदा पृणोतेर्निष्ठाया-सुदोऽनूर्ध्वस्येत्युत्वम् न ध्याख्येत्यादिना निष्ठानत्वप्रतिषेधः पूर्त्तमनेनेति पूर्व्ववदिनिः किम्पूर्त्तमिति सर्व्वदा श्राद्धादिकर्म्मणि पूर्व्ववत्सप्तमी स राजत्वं राज्यम् हित्वा

पतत्रिक्रोष्टुजुष्टानि रक्षांसि भयदे वने ।
यस्य बाणैर्निकृत्तानि श्रेणीभूतानि शेरते ॥ ८० ॥
दीव्यमानं शितान् बाणानस्यमानं महागदाः ।
निघ्नानं शात्रवान्रामं कथं त्वं नावगच्छसि ॥ ८१ ॥

त्यक्त्वा वनमभ्यागमत् आभिमुख्येन आगतवान् लुङ् चङि रूपम् पितृनियोगात् नायोग्यत्वात् स मे भर्त्तेति योज्यम् ॥ ७९ ॥ ज०म०

अध्वर इत्यादि । तथा अध्वरेषु दृष्टिनां यज्ञनां पाता रक्षिता पालरक्षणे इष्टं यजनं भावे क्तः ढधेक्षतीति कर्म्मणि षष्ठी सर्व्वदा कर्म्मसु पूर्त्तौ पूर्त्तं पूरणं भावे क्तः स्फूर्त्यादयोदित्यादौ पूर्व्वजनाच्च क्तस्य नः वदुश्रिजूर्णोरिति इन्निषेधः कर्म्मोपादानेऽपि भावे क्तः अध्वरान् इष्टमेभिः कर्म्मभिः पूर्त्तमनेन चेत्यर्थे इष्टादेरिष्टमनेनेत्यादावर्थे कर्त्तरि वाच्ये इन्प्रत्ययो भवेदिति परः स्वमते क्लेनाढे इति ज्ञापकात् क्लान्तात्कर्त्तरि इन् तद्योगे कर्म्मणि सप्तमी किंवा इष्टपूर्त्ताभ्यां भावक्तान्ताभ्यां नैकाजादिति अस्त्यर्थे इन् अध्वरकर्म्मभ्यां विषये सप्तमी केचित्तु अध्वरा इष्टा एभिः कर्म्मभिः पूर्त्तान्यनेन चेति कर्म्मक्तादिन् कर्त्तरीत्याहुः यः पितुराज्ञया राजत्वं हित्वा त्यक्त्वा वनमभ्यागमत् स मे भर्त्तेति योज्यं ॥ ७९ ॥ भ०

पतेत्यादि । यस्य बाणैर्निकृत्तानि छिन्नानि रक्षांसि भयदे वने दीर्घनिद्रया शेरते स मम भर्त्तेति योज्यम् शेरतइति शीङोरूट् कीदृशानि अश्रेणयः श्रेणयोभूतानि जर्थादिञ्चिडाचश्चेति च्व्यन्तानाङ्गतिप्रादय इति सः च्वौचेति दीर्घः च्व्यर्थानान्तु श्रेण्यादयः कृतादिभिरित्यय विषयः पतत्रिभिः क्रोष्टुभिश्च जुष्टानि परिहृत्तानि ॥ ८० ॥ ज०म०

पतत्रीत्यादि । त्रसन् त्रैरायमाणेभ्य इति वाक्ये तस्य त्रासो नास्तीत्युत्तरमिदं यस्य बाणैः शरैर्निकृत्तानि खण्डितानि रक्षांसि भयदे वने शेरते पतितानि सन्तीत्यर्थः स मे भर्त्तेति सम्बन्धः शीङः की अन्ते शीङोरेणुः मान्तोरम् मान्तोऽनतः अश्रेणयः श्रेणयोभूतानि श्रेणीभूतानि च्विः कृभ्वस्त्यभूततद्भावइति च्विः दीर्घश्च त्योवमालो लोप्य इति च्विलोपः पतत्रिभिः पक्षिभिः क्रोष्टुभिः शृगालैश्च जुष्टानि परिहृतानि जुषसृदिसेवे ॥ ८० ॥ भ०

दीव्येत्यादि । शितांस्तीक्ष्णान् बाणान् दीव्यमानङ्क्ष्णुं शक्नुवन्तीलं वा अनेकार्थत्वाद्धातूनान्त्विक्तात्क्षीव्यवयोवचनेत्यादिना आनच् दिवादिभ्यः श्यन् महागदाः अस्यमानं क्षेप्नुं शक्नुवन्तीलं वा पूर्व्ववच्चानश् शात्रवान् शत्रून् घ्नन्ना-

भ्रातरि न्यस्य यातो मां मृगाविन्मृगयामसौ ।
एषितुं प्रेषितो यातो मया तस्यानुजो वनम् ॥ ८२ ॥
अथायस्यन् कषायात्मा स्यन्नस्वेदकणोल्बणः ।
सन्दर्शितान्तराकूतस्तामवादीद्दशानन: ॥ ८३ ॥

दित्वादण् निघ्नानं हन्तुं शक्तस्तच्छीलं वा पूर्ववत्प्रत्ययः हन्तेर्गमनेत्युपधालोपः होहन्तेरिति कुत्वम् एवम्विधं रामङ्कथञ्चावगच्छसि तेन कर्म्मणा सर्व्वलोकविदितत्वादिति भावः ॥ ८१ ॥ ज० म०

दीव्येत्यादि । कथं त्वं राममपि नावगच्छसि न जानासि सर्व्वलोकप्रसिद्धकर्म्मत्वात् तथाहि शितान् बाणान् दीव्यमानं तीक्ष्णैः शरैः क्रीडाशीलं विजिगीषाशीलं वा दिव्युजिगीषेच्छापणद्यूतौ क्रीडागत्योः दिवोधेवेति करणे द्वितीया महतीर्गदा अस्यमानं क्षेप्तुं शक्तं उत्क्षेपणयोग्ये वयसि वर्त्तमानं वा क्षेप्तुं शीलं यस्येति वा शात्रवान् निघ्नानं निहन्तुं शक्तं सर्व्वत्र शक्तिवयस्त्वाच्छीलेऽतुः शानः हन्तेर्हनुगमित्युङ्लोपे हनोङ्क्नोम्नः शतुरेव शात्रवः स्वार्थे ष्णः ॥८१॥भ०

भ्रातरीत्यादि । यद्येवं कासावित्याह असौ रामो मामभ्रातरि न्यस्य अर्पयित्वा मृगयामाखेटकं यातः मृगेः स्वार्थिकोणिच् अदन्तत्वाच्च गुणो न भवति तदन्तात्कृञ्शचेति अधिकृत्य परिचर्य्या परिसर्य्या मृगया टाद्यानासुपसङ्ख्यानमिति भावे शप्रत्ययः यक् अङ्लोपाभावश्च टाप् मृगान्विध्यतीति मृगावित् कासौ भ्रातेति चेदाह तस्यानुजः कनिष्ठो मया प्रेषितः सन् यातो वनं अनु पश्चाज्जायत इति अन्येभ्योऽपि दृश्यत इति डः अनौ कर्म्मण्युक्तमकर्म्मण्यपि भवति किमर्थं एषितुम् तमेव ज्ञातुम् इषुगतावित्यस्य रूपम् ज्ञानार्थत्वात् प्रेषित इति तस्यैव रूपम् ॥ ८२ ॥ ज०म०

भ्रातरीत्यादि । तथापि त्वामेकाकिनीं हित्वा त्यक्त्वा कुतो गत इत्याह असौ रामो मां भ्रातरि न्यस्य समर्प्य मृगयां यातो गतः मृगान् विध्यतीति मृगावित् स कुतेत्याह तस्यानुजोऽपि मया प्रेषितः प्रस्थापितः सन् एषितुं ज्ञातुं अर्थाद्रामं वनं गतः सर्व्वे गत्यर्था इति वचनात् इष्यसर्पण इत्यस्य ज्ञानार्थत्वं अनुजातोऽनुजः हनजनादिति डः ॥ ८२ ॥ भ०

अथेत्यादि । अथैवमुक्तो जानक्या दशाननस्तामवादीत् उक्तवान् आयस्यन् क्रोधाविष्टत्वात् शरीरङ्क्लेदयन् यसुप्रयत्न इति दैवादिकः परस्मैपदी क्रोधादेव कषायात्मा बहुव्रीहौ सक्थ्यक्ष्णोरिति षच् स्यन्दैः स्रुतैः स्वेदकणै-

कृते कानिष्ठिनेयस्य ज्यैष्ठिनेयं विवासितम् ।
को नग्नसुषितप्रख्यं बद्ध मन्येत राघवम् ॥ ८४ ॥
राक्षसान् वटुयज्ञेषु पिण्डीशूरान्निरस्तवान् ।

रूक्षण उद्भटः व्याप्तइत्यर्थः स्नन्देर्निष्ठायां रूपम् संदर्शितमान्तरमन्तर्गतमाकूतमभिप्रायो येन स एवंविधः ॥ ८३ ॥ ज० म०

अथेत्यादि । अथ तयैवमुक्तो दशाननस्तां सीतामवादीत् व्रजवदेति व्रिः कीदृशः आयसैः तद्वाक्यैः क्रोधवशात् शरीरं खेदयन् कषायाक्तः क्रोधेन कषाये अक्षिणी यस्य स तथा सक्थ्यक्ष्णः षः खाङ्गे स्वेदैः स्रुतैः स्वेदकणैरूक्षणः उद्भटः व्याप्तइत्यर्थः स्नन्दूङ्वल्लसुतौ जदित्त्वाद्वेमत्वे नेमडीश्वीदित्यादिना इमु निषेधः हसुङ्नलोपोऽणावितिं नस्य लोपः रूक्ष्णाद्योदिति क्षस्य दस्य च नः सन्दर्शितं प्रकटीकृतं आन्तरं अन्तर्गतं आकूतमभिप्रायो येन स तथा ॥८३॥म०

कृत इत्यादि । कनिष्ठाया अपत्यं ज्येष्ठाया अपत्यमिति स्त्रीभ्योढक् कल्याण्यादीनामिनङ् तयोः कल्याण्यादिषु पठितत्वात् कनिष्ठा सुतस्य भरतस्य कृते निमित्ते ज्येष्ठायाः सुतः निरूपयोगितया विवासितः विसर्जितः विपूर्व्वस्य वसतेर्हेतुमाण्यन्तस्य निष्ठायां रूपम् तद्वग्नसुषितप्रख्यं यथा कश्चिन्नुषितोनग्नो भवति तद्वदूभूतं पूर्व्वकालेति सः तस्याः पूर्व्वापरकालत्वात् राजदन्तादित्वात्परनिपातः ईदृशं राघवङ्को बद्ध मन्येत श्लाघेत नैवेत्यर्थः ॥ ८४ ॥ ज०म०

कृतेदित्यादि । को जनो राघवं बद्ध मन्येत श्लाघेत न कोऽपीत्यर्थः किम्भूतं कानिष्ठिनेयस्य कनिष्ठाया अपत्यस्य भरतस्य कृते निमित्तं ज्यैष्ठिनेयं ज्येष्ठाया अपत्यमपि विवासितं पित्रा परित्यक्तं राज्याद्बहिष्कृतं वसेर्जिक्षान्तस्य रूपं ततएव लग्नसुषितप्रख्यं यः कश्चित् प्रथमं सुषितोनिराकृतः पश्चाल्लग्नोलज्जितो दिगम्बरीकृतो वा भवति तत्तुल्यं पूर्व्वकालस्यापरकालेनेति कर्म्मधारयार्थं परस्रूतं स्वमते पूर्व्वकालसम्बन्धात् य एव सुषितः परकालसम्बन्धात् स एव लग्न इत्येकार्थतास्त्येव अभिधानात् पूर्व्वकालीनस्य परनिपातः राजदन्तादित्वादिति परः ज्येष्ठा कनिष्ठाभ्यामावन्तत्वात् वाह्वाद्यतोऽत्रावादेरिति कृतस्य ष्णेयस्य कल्याणीशुभगेत्यादिना इनेयः लग्नेति ओलजङीङ्हियि ओदित्त्वात् रूक्ष्णाद्योदिति क्षस्य नकारः मग्नवज्जस्य गत्वं केचित्तु नस्जेर्नस्य निपातनात् तवर्गपञ्चम इत्याहुः ॥ ८४ ॥ भ०

यद्यसौ कूपमाण्डूकि तवैतावति कः स्मयः ॥ ८५ ॥
मत्पराक्रमसंक्षिप्तराज्यभोगपरिच्छदः ।
युक्तं ममैव किं वक्तुं दरिद्राति यथा हरिः ॥ ८६ ॥
निर्लङ्को विमदः स्वामी धनानां हृतपुष्पकः ।

राज्ञेत्यादि । अध्वरेष्विष्टिनामित्यस्योत्तरमाह यद्यसौ राक्षसान् पिण्डीशूरान् पिण्डामेव शूरान् भोजनेष्व शूरान् पातेसमिताद्यश्चेति सः वटुयज्ञेषु कुब्राह्मणयज्ञेषु निरस्तवान् तिरस्कृतवान् हे कूपमाण्डूकि कूपे माण्डूकीव पूर्ववत्सः ढक्कमण्डूकादिति चकारादणवापत्ये एतावति स्वल्पे वस्तुनि तव कः स्मयः नैव युज्यते मत्पराक्रमे तु युक्तः तवापि मम न युक्तं वक्तुमित्याह ॥ ८५ ॥ ज० म०

राक्षसानित्यादि । अध्वरेष्विष्टिनां पातेत्यस्योत्तरमिदं वटवो ब्राह्मणास्तेषां यज्ञेषु असौ रामः पिण्डीशूरान् पिण्डां भोजन एव शूरान् कार्यान्नराक्षमान् राक्षसान् निरस्तवान् तदा एतावति अल्पेऽपि कार्ये हे कूपमाण्डूकि तव कः स्मयो गर्वः विस्मयोवा मण्डूकस्य भेकस्य स्व्यपत्यमिति शिवादित्वात् ष्णः कूपे माण्डूको इव एतेनाल्पदृश्यत्वादन्ये वीरास्त्वया न दृष्टा इति ते स्मय इति सूचितं कूपमण्डूकीति पाठे जातेरतद्वतीप् कूपमाण्डूकीत्यत्र पिण्डीशूरान् इत्यत्र च पातेसमितादित्वात् क्षेपे तत्पुरुष इति परः स्वमते अर्थवशात् क्षेपोगम्यते ॥ ८५ ॥ भ०

मत्परेत्यादि । राज्यभोगादयः परिच्छदोहरूप्यश्वादिः स मत्पराक्रमेण संक्षिप्तोऽपहृतोयस्य हरेरिन्द्रस्य स यथा दरिद्राति निरर्थको भवति तन्ममैव किं वक्तुं युक्तमात्मगुणवादस्य लज्जाकरत्वात् दरिद्रातेरादादिकत्वाच्छपोलुक् ॥ ८६ ॥ ज० म०

मदित्यादि । मत्पराक्रमेण संक्षिप्तोऽपहृतो राज्यभोगपरिच्छदोहरूप्यश्वादिर्यस्य तादृशोहरिरिन्द्रोयथा यदि दरिद्राति दुर्गतो भवति तदा किं ममैव वक्तुं युक्तं अपि तु नैवेत्यर्थः आत्मगुणानुवादस्य लज्जाकरत्वात् दरिद्राच्लुदुर्गत्यां ॥ ८६ ॥भ०

निर्लङ्क इत्यादि । यस्मात् कारणात् धनानां स्वामी धनदः अन्तर्गिरमध्यास्ते अध्यासितवान् गिरेः कैलासस्यान्तर्मध्ये विभक्त्यर्थेऽव्ययीभावः गिरेश्च सेनकस्येति टच् अधिशीङ्स्थासामिति कर्मसंज्ञा तेन तृतीयासप्तम्योर्बहुलमित्य-

अध्यास्तेऽन्तर्गिरं यस्मात् कस्तन्नावैति कारणम् ॥ ८७ ॥
भिन्ननौक इव ध्यायन् मत्तो बिभ्यद्यमः स्वयम् ।
कृष्णिमानं दधानेन सुखेनास्ते निरुद्यतिः ॥ ८८ ॥

।

स्मावो न भवति नाव्ययीभावादित्यमेव भवति तत्कारणमस्य पराक्रमस्यां वा को नावैति न जानाति कीदृशः निर्लङ्कः लङ्कातोनिष्क्रान्तः निरादयः क्रान्ताद्यर्थे पञ्चम्येति सः एकविभक्तिचेत्युपसर्जनसंज्ञायां हृतत्वम् हृतपुष्पकः हृतं आच्छिन्नम्पुष्पकाख्यं विमानं यस्य अतएव विमदोऽपि तदर्थः लङ्का पुष्पकञ्च धनदस्यासीत् तच्छित्त्वा अनेन गृहीतमिति ॥ ८७ ॥ ज० म०

निर्लङ्क इत्यादि । धनानां स्वामी कुबेरः यस्मात् कारणात् अन्तर्गिरं गिरेः कैलासस्यान्तर्मध्यमध्यास्तेऽधिवसति तत्कारणं मत्पराक्रमरूपं को जनो नावैति अपितु सर्व्वएव जानाति कीदृशः कुबेरः निर्लङ्कः लङ्कायानिष्क्रान्तः पञ्चमी तत्पुरुषः व्यंपूर्व्वमिति निरः पूर्व्वनिपातः निर्गता लङ्का यस्येति वा विमदः विगतो मदो दर्पो यस्य हृतपुष्पकः हृतं पुष्पकं विमानं यस्य ईदृशोऽपि मत्पराक्रमादेवेति भावः अन्तर्गिरमिति सप्तम्यर्थेऽव्ययीभावः ऋप् नदीपौर्णमास्याग्रहायणीगिरेर्व्वेति पक्षे अः कर्म्मक्रियेत्यादिना आधारस्य कर्म्मत्वं ॥ ८७ ॥ भ०

भिन्नेत्यादि । स्वयं स्वात्मानमत्तोबिभ्यत् त्रसन् यमोवैलक्षण्यात् सुखेन कृष्णिमानङ्कृष्णवर्णत्वं वर्णदृढादिभ्यश्चेति चकारादिमनिच् दधानेन धारयता इत्यभूते तृतीया निरुद्यतिः निरुद्यमः आस्ते उत्पूर्व्वाद्यमेः स्त्रियाङ्क्लिन् अनुनासिकलोपः कीदृशः ध्यायन् चिन्तयन् किमप्यापद्यदृहमनेन हृतसर्व्वस्व इति भिन्ननौक इव विपन्नपोतवणिगिव उरःप्रभृतिभ्यः कप् ॥ ८८ ॥ ज०म०

भिन्नेत्यादि । यमः मत्तो बिभ्यत् त्रसन् स्वयं ध्यायन् चिन्तयन् निरुद्यतिर्निरुद्यम आस्ते स्वयमिति स्वयमेवात्मनोऽसामर्थ्यं जानाति नत्वन्येन बोधित इत्यर्थः कृष्णिमानं कृष्णत्वं दधानेन सुखेन उपलक्षितः विशेषणे तृतीया गुणादिमन् भावे भिन्ना विदारिता नौर्यस्य तादृशो वणिक् यथा ध्यायति तथा ध्यायन् एकवचनान्तेन नौशब्देन बहुव्रीहौ क इति परः खमते स्वार्थे पुंवत्कर्म्मधारयेति ज्ञापकात् तत्कैरिति अस्मदः पञ्चम्यास्तस् युष्मदस्मदोरन्यतरस्यामित्यादिना मदादेशः मदादेशः गणोक्तकार्य्यस्य बाहुल्यात् त्यदादेरःकाविति अनिषेधः जिभीलिभीत्यां भटः क्वादीरेद्भिः अद्भिरित्युक्तेर्न नुण् निरुत्पूर्व्वात् यमः क्तौ

समुद्रोपत्यका हैमी पर्व्वताधित्यका पुरी ।
रत्नपारायणं नाम्ना लङ्केति मम मैथिलि ॥ ८९ ॥
आवासे सिक्तसंमृष्टे गन्धैस्त्वं लिप्तवासिता ।
अर्पितोरुसुगन्धिस्रक् तस्यां वस मया सह ॥ ९० ॥

वनतनाद्यनिमामिति नलोपः एतेन दिक्पतीनां जयादहमेव सुप्रसिद्धो नतु तथेत्युक्तं ॥ ८८ ॥ भ०

एवं स्वपौरुषमदर्श्य स्त्रीकर्त्तुमाह समुद्रेत्यादि । हे मैथिलि लङ्केति नाम्ना मम पुरी कीदृशी समुद्र एवोपत्यका आसन्नो यस्याः सा समुद्रोपत्यका समुद्रस्य पर्व्वतोपत्यकात्वात् समुद्रोपत्यकेति समासे साधुत्वन्न भवति यतः संज्ञाधिकारात् पर्व्वतस्यासन्ने अधिरूढे उपाधिभ्यां त्यकन्प्रत्ययान्तयोरुपत्यकाधित्यकाशब्दयोः साधुत्वमुक्तम् प्रतिषेधे त्यकन् उपसंख्यानमिति प्रत्ययस्यादीतीकारो न भवति हैमी हेमविकारा प्राणिरजतादिभ्योऽञ् पर्व्वताधित्यका त्रिकूटपर्व्वतस्योपरि स्थिता रत्नपारायणं यत्र रत्नानामारभवसानमयन्ते बुध्यन्ते तत्पुरीत्यर्थः । दुर्गावस्थित्यानभिभवनीयतां रत्नोपचयात् समृद्धताङ्कथयन् प्रलोभयति ॥ ८९ ॥ ज०म०

समुद्रेत्यादि । सम्प्रति सीताप्रलोभनं क्रियते हे मैथिलि लङ्केति नाम्ना ख्याता मम पुरी कीदृशी समुद्रोपत्यका समुद्रस्य उपत्यका समीपे भूमिः पर्व्वतस्य त्रिकूटस्य अधित्यका उपरि स्थिता अध्युपाभ्यां त्यदादित्वात् त्यदाद्यचिरेत्यादिना भवादित्वात् अद्भ्यासन्नयोस्त्यः ततः स्वार्थे कः स्त्रियामाप् काश्यनाशीरकइत्यादिना त्रिपादित्वात् न इत्वं उपत्यकाद्रेरासन्ना भूमिरूर्द्धमधित्यका इत्यमरकोषे अद्रेरित्युपलक्षणं समुद्रउपत्यका पर्व्वतासन्नभूमिर्यस्याइति केचित् एतेन दुर्गमत्वं सूचितं हैमी हेम्नो विकारः विकारसंज्ञेति ष्णः मनुवर्ज्जेत्यादौ विकारष्णवर्ज्जनात् नलोपनिषेधाभावात् न्योर्लोपौतावितिनस्य लोपः रत्नानां पारभवसानं अयन्ते बुध्यन्ते तत्पुरीयका अत्रेति रत्नपारायणं घञलनटोघे इति आधारे अनट् स्वभावादजहल्लिङ्गता सर्व्वरत्नस्थानमित्यर्थः यदाह हलायुधः साकल्यवचनं प्राप्तैः पारायणमुदाहृतमिति ॥ ८९ ॥ भ०

आवासे इत्यादि । तस्यां पुर्य्यां आवासे गृहे आवसत्यस्मिन्निति अधिकरणे घञ् मया सह त्वं वस प्रार्थनायां लोट् सिक्तसंमृष्टे पूर्व्वं सिक्ते पश्चात्संमृष्टे गन्धैर्लिप्तवासिता सती पूर्व्वं लिप्ता चन्दनादिभिर्गन्धैः पश्चाद्वासिता धूपिता

सङ्गच्छ पौंस्नि स्त्रैणं मां युवानं तरुणी शुभे ।
राघवः प्रोष्यपापीयान् जह्रीहि तमकिञ्चनम् ॥ ९१ ॥

सम्मृष्टादिभिः पूर्व्वकालेत्यादिना सः अर्पिता न्यस्ता उर्व्वी महती सुगन्धिस्रक् सुरभिमाला यस्यां सा त्वं किमिति त्वया सह वसामीति चेदाह ॥९०॥ज०म०

आवासइत्यादि । तस्यां पुर्य्यां आवासे गृहे मया सह त्वं वस प्रार्थनायां गी पूर्व्वं सिक्ते पश्चात् संमृष्टे शोधिते सिक्तसंमृष्टे गन्धैश्चन्दनादिभिर्लिप्त-वासिता पूर्व्वलिप्ता पश्चाद्वासिता धूपैः उभयत्र पूर्व्वपरकालसम्बन्धादेकार्थत्वे म कर्म्मधारयः गन्धयतीति गन्धश्चन्दनादिः वासिता करिणी नार्य्यौवासितं सुर-भोक्ष्यते । श्रुतमात्रे खगारावे वासितं वस्त्रवेष्टित इति विश्वः अर्पिता न्यस्ता उर्व्वी महती सुगन्धिः सुरभिः स्रक् माला यस्यां तादृशी च सती स्रुत्सुरभि-पूतेरित्यादिना गन्धादिप्रत्ययः ॥ ९० ॥ म०

सङ्गेत्यादि । हे पौंस्नि पुमांसमर्हति तद्धिताय वा अर्हार्थे हितार्थे वा स्त्रीपुंसाभ्यान्नञस्नञौ स्त्रीप्रत्यये नञस्नञीकक्षरुणतलुनानामुपसंख्यानमिति मां युवानन्नरुणं सङ्गच्छ अङ्गीकुरु गमेः प्रार्थनायां लोट् हृषुगमीत्यादिना छत्वं समगन्मच्छेत्यादिना तङ् न भवति सकर्म्मकत्वात् विशेषतः स्त्रैणं स्त्रियै हितम-र्हन्तं वा पूर्व्ववत्प्रत्ययः तरुणी युवती सती शुभे कल्याणि शोभतइति दृशुपध-लक्षणः कः ममापि तादृशोभर्त्तास्तीति चेदाह राघवः प्रोष्यपापीयानिति पाप-शब्दाद्विन्मतोर्लुगिति ईयसुन् लुक्ः मतुपः प्रोष्यपापीयानिति मपूरव्यंसकादि त्वात्सः देशान्तरं यात्वा पापवत्तरः अतएतमकिञ्चनन्दरिद्रं न विद्यते किञ्चन यस्येति सर्व्वनामाव्ययसंज्ञाया डप्रसर्जनप्रतिषेध इति वचनाद्व्ययसंज्ञा तेन न विभक्तिलोपः जह्रीहि त्यज ईत्वस्य जहातेश्चेति वा वचनाद्विकल्पः ॥९१॥ज०म०

सङ्गेत्यादि । हे पौंस्नि हे पुरुषयोग्ये पुरुषहिते वा हे शुभे कल्याणि तरुणी त्वं स्त्रैणं स्त्रीयोग्यं स्त्रीहितं वा युवानं मां सङ्गच्छ अङ्गीकुरु विधि-निमन्त्रणेत्यादिना प्रार्थनायां गी सदृशयोरावयोर्योग उचित इति भावः स्त्री-पुंसाभ्यां विकारसखेत्यादिना ष्णः मनुष्यस्त्रियोः तरुणशब्दान्नदादित्वादीप् शोभते इति शुभा दृजुङ्त्वात् क्रुग्टन्नाप्रीजुङइति कः ममापि ईदृशोभर्त्तेति चेत् आह राघवः प्रोष्यपापीयान् देशान्तरं गत्वा पापवत्तरः पापवत् शब्दात् गुणा-द्वेष्टेयसूइति ईयसुः लुक्शब्दहिनामिति वतोर्लुक् ओमंश्चडिदिति डित्त्वात् टेर्लोपः मयूरव्यंसकादित्वादत्र समास इति परः खमते गमकत्वात् असमास-

अश्नीतपिवतीयन्ती प्रसिता स्मरकर्म्मणि ।
वशेकृत्य दशग्रीवं मोदस्व वरमन्दिरे ॥ ९२ ॥
मास्म भूर्याहिणी भीरु गन्तुमुत्साहिनी भव ।
उद्भासिनी च भूत्वा मे वक्षःसम्मर्हिनी भव ॥ ९३ ॥

त्वेऽपि न क्षतिः तमकिञ्चनं दरिद्रं जहीहि त्यज किञ्चनेत्यव्ययेनापि समासे मयूरव्यंसकादित्वेन निपातनात् वाच्यलिङ्गतेति परः नञ् तत्सदृशार्थआदित्वाददित्यन्ये न विद्यते किञ्चनमस्येति बहुव्रीहौ नाव्ययकार्थमिति केचित् स्वमते कुत्सिते किञ्चनं क्लीवदृति कोषादनव्ययेन किञ्चन शब्देन समासः वस्तुतोऽस्येवमकिञ्चनशब्दोनिर्धनवाची वाच्यलिङ्गः तथाच कोषः निःस्वाकिञ्चनदुर्व्विधाढ्यति आद्योरित्यादिना ढाकढत्वं ॥ ९१ ॥ भ०

अश्नीत्यादि । अश्नीत पिवतेति मयूरव्यंसकादित्वात्सः तत्र ह्याख्यातमाख्यातेन क्रियासातत्य दृति पठ्यते सततमश्नीतपिवतेत्येवम्भूत्यजनानादेष्टुमिच्छतीति सुप आत्मनः क्यच् अश्नीतपिवतीयन्ती प्रसिताःस्मरकर्म्मणि आधिक्येन प्रवृत्ता कामव्यापारे प्रसितोत्सुकाभ्यान्तीयाचेति चकारात्सप्तमी वशेकृत्यानुवर्त्तिनन्दशग्रीवङ्कृत्वा साक्षात्प्रभृतित्वाद्गतिसंज्ञा मोदस्व हर्षञ्जनय वरमन्दिरे श्रेष्ठगृहे स्थिता ॥ ९२ ॥ ज० भ०

अश्नीत्यादि । दशग्रीवं वशेकृत्य आयत्तीकृत्य वरमन्दिरे श्रेष्ठगृहे त्वं मोदस्व हर्षं जनय वशे इति सप्तम्यन्तप्रतिरूपकोऽव्ययः हृस्तेषाणावित्यादिना साक्षादादित्वात् समासः कीदृशी अश्नीत पिवतेति सत्यजनानादेष्टुमिच्छन्ती अश्नीतपिवतेति सततं नियोगो यस्यां क्रियायां सा अश्नीतपिवता दैक्यं सोऽव्ययदृति समासः तत्र हि सामान्यत्वात् पदमात्रस्यैव ग्रहणं तेन क्वचित् स्याद्यन्तस्य क्वचित्याद्यन्तस्य क्वचिदुभयस्य चैक्यमिति लब्धं त्याद्यन्तस्यान्यप्रत्ययान्तत्वाभावेऽपि समासे अन्यपदार्थत्वाल्लिङ्गत्वं तेनात्र क्रियाविशेषणार्थत्वात् स्त्रियामत आप् क्तेर्लुक्त्येचेत्यत्र स्त्रादिक्तेरेव ग्रहणमभिधानात् तेन त्यादिक्तेर्न लुक् निपातादूपसिद्धिरिति परे अश्नीतपिवतामिच्छतीति क्यः स्मरकर्म्मणि कामचेष्टायां प्रसिता तत्परा प्रसितोत्सुकाभ्यांतात्पर्ये तृतीया सप्तम्यावितिपरः स्वमते विषयविवक्षा षिञ्बन्धने क्तः ॥ ९२ ॥ भ०

मास्मेत्यादि । हे भीरु मास्म भूर्याहिणी प्रतिकूला मा भूः यास्यामीत्यसमर्थङ्कृत्वामीति क्त्वा स्योत्तरेलङ्चेति चकारात् लुङ् गन्तुमुत्साहिनी उद्युक्ता

तां प्रातिकूलिकीं मत्वा जिहीर्षुर्भीमविग्रहः।
बाह्वपपीडमाश्लिष्य जगाहे द्यां निशाचरः॥ ९४॥
त्वस्न्तीं तां समादाय यातो रात्रिञ्चरालयम्।
तूष्णींभूय भयादासाञ्चक्रिरे खगपक्षिणः॥ ९५॥

भव शकष्टषेत्यादिना त्वसुन् उत्याहिनीति सहोपपदत्वात् ततश्चालङ्कृतशरीरत्वादुद्भासिनी शोभमाना भूत्वा नोऽस्माकं वक्षःसम्मर्दिनी स्तनाभ्यासुरस्यलस्य पीडिका भव यहोत्याहोद्भाससम्मर्दानाङ्कृहादिषु पठितत्वात् कर्त्तरि णिनिः ऋत्रेभ्योङीप्॥ ९३॥ज०म०

माश्रेत्यादि। हे भीरु याहिणी प्रतिकूलार्थंयाहिणी त्वं माश्म भूः न भव गन्तुमुत्याहिनी उद्युक्ता भव उद्भासिनी गत्वालङ्कारादिभिः शोभमाना भूत्वा नोऽस्माकं वक्षःसम्मर्दिनी स्तनाभ्यासुरस्यलस्य पीडिका भव सर्व्वत्र यहादित्वाणिन् चकारः समुच्चये अस्मद् एकत्वे बहुत्वमभिधानात् गौरवव्यञ्जकं॥९३॥भ०

तामित्यादि। यदैवमभिधीयमाना न प्रतिपन्ना तदा तामतिकूलिकीमतिकूलवर्त्तिनीं मत्वा ज्ञात्वा ओजःसहोबलसा वर्त्तत इत्यधिकृत्य प्रतिकूलं बर्त्तत इत्यधिकृत्यैव तत्प्रत्यनुपूर्व्वेत्यादिना ठक् जिहीर्षुः हर्त्तुमिच्छुः भीमविग्रहः भीषणशरीरः दृष्टराक्षसशरीररूपः सुखेन ह्रियत इति बाह्वपपीडमाश्लिष्य बाहुभिरुपपीड्य सम्यग्बाह्वोपपीड इति चकारात् तृतीयान्त उपपदे खसुल् जगाहे रथेनोत्पत्य द्यामाकाशन्निशाचरो गाहृतेश्च दिवशब्दसमानार्थो द्योशब्दश्चौणादिकः गमेर्डो इत्यत्र द्युते- स्वे वि वचनात् औतोऽम्शसोरित्यात्वं कालाधैस्तु दिव्शब्दादेव व्युत्पादयितुं शक्यमवधीयते वाभ्येति दिव अभि विकल्पेनाकारादेश इति॥ ९४॥ज०म०

तामित्यादि। उक्तवाक्यानङ्गीकारात् तां सीतां प्रातिकूलिकीं प्रतिकूलवर्त्तिनीं मत्वा जिहीर्षुर्हर्त्तुमिच्छुर्निशाचरो रावणो भीमविग्रहो भयङ्करमूर्त्तिः सन् बाह्वपपीडं बाहुभिरुपपीड्य आश्लिष्य तां गृहीत्वा द्यामाकाशं जगाहे गाहृङ्विलोडे गतवानित्यर्थः तृतीयान्ताद्युपपीडोणमिति परः खसते बाहुभ्यासुपपीड्यः पीडनं यत्रेत्याश्लेषक्रियाविशेषणं उपपीडोपजन्तः द्यामिति द्योशब्दस्य दिव्शब्दस्य वा अभि रूपं प्रतिकूलं यथा स्यात्तथा वर्त्तत इति क्रियाविशेषणस्य कर्म्मत्वात् ढधेकादिति ष्णिकः॥ ९४॥ भ०

त्वस्नेत्यादि। त्वस्न्तीं च तां तद्रूपदर्शनात् समादाय गृहीत्वा यातो

उच्चैरारस्यमानां तां कृपणां रामलक्ष्मणौ ।
जटायुः प्राप पक्षीन्द्रः परुषं रावणं वदन् ॥ ९६ ॥

एते प्रकीर्णकाः ।

अतःपरं टाधिकारः ।

द्विषन् वनेचराग्र्याणां त्वमादायचरो वने ।
अग्रेसरो जघन्यानां माभूः पूर्व्वसरो मम ॥ ९७ ॥

गच्छतोरावणात् यातेः शतरि पञ्चम्यां रूपम् किंयातो रात्रिञ्चरालयं लङ्कां रात्रौ चरतीति चरेष्टः रात्रेःकृतिविभाषेति सुम् तस्माद्रावणाद्यत् भयन्ततो भयात् तूष्णींभूय तूष्णीमिति भव इति ह्वाचेति समासे ल्यवादेशः आसाञ्चक्रिरे आसिताः दयायासश्चेत्याम् मृगपक्षिणः मृगाश्च पक्षिणश्च समानजातीयानामिति वचनादेकवद्भावोऽत्र न भवति ॥ ९५ ॥ ज०म०

त्रसन्तीमित्यादि । त्रसन्तीं बिभ्यतीं तां सीतां समादाय गृहीत्वा रात्रिञ्चरस्यालयं लङ्कां यातो गच्छतोरावणाद्भयात् मृगाश्च पक्षिणश्च तूष्णींभूय मौनिनोभूत्वा आसाञ्चक्रिरे स्थितवन्तः आसङ्उपवेशे ब्विजादीत्याम् श्वस्त्रन्वामः यातइति शतन्तं रात्रौ चरतीति पचाद्यित्वादन् रात्रेर्म्नुवाक्रति तूष्णीमित्यव्ययं मौनार्थे वर्त्तते व्यख्यनुकारइत्यादिना जर्य्यादित्वात् समासे ह्वोयप् ॥ ९५ ॥ भ०

उच्चैरित्यादि । तां सीताञ्जटायुः पक्षीन्द्रः रावणम्परुषन्निष्ठुरं वदन् प्राप प्राप्तवान् कीदृशीं उच्चैरारस्यमानां हा राम हा लक्ष्मणेति शब्दौ द्वौ उच्चैर्महता ध्वनिना पुनःपुनारसन्तीमित्यर्थः रसेः शब्दकर्म्मकत्वात् क्रियासमभिहारेयङ् कृपणान्दीनाम् इति प्रकीर्णकाण्डः प्रथमः समाप्तः ॥ ९६ ॥ ज० म०

उच्चैरित्यादि । उच्चैर्यथा स्यात्तथा रामलक्ष्मणौ रारस्यमानां हा राम हा लक्ष्मणइति पुनःपुनराह्वयमानां कृपणां दीनां सीतां जटायुः पक्षिराजः प्राप रावणं पुरुषं निष्ठुरं वदन् वदिर्द्विकर्म्मकः रसशब्दे मूलरसेत्यादिना यङ् । इति गौराङ्गमल्लीकपुत्रोभरतमल्लिकः । प्रकीर्णकाण्डव्याख्यानं सुग्धबोधमतेऽकरोत् ॥ ९६ ॥ भ०

इतः परमधिकारकाण्डमुच्यते यत्र प्राधान्येनैकैकमधिकृत्य लक्षणमुद्दिश्यतम् तदधिकारकाण्डम् शेषलक्षणेषु प्रकीर्णकमेव द्रष्टव्यम् एवञ्च कृत्वा अन्तरान्तरा तत्सूचनार्थमप्रकीर्णकश्लोकाभिधानमत्र च काण्डे निर्दिष्टसंख्यकाश्चत्वारः परि-

यशस्करसमाचारं ख्यातं भुवि दयाकरम् ।
पितुर्वाक्यकरं रामं धिक्कां दुन्वन्तमत्वपम् ॥ ६८ ॥

छेदाः तत्र प्रथमे आद्यं टप्रत्ययमधिकृत्योच्यते सर्गार्थस्य विवक्षितस्यापरिसमाप्तत्वात् तमेवाभिसन्धायाह । द्विषद्भित्यादि । एवञ्च कृत्वा मिश्रक उच्यते द्वयोरत्र प्राधान्येन विवक्षितत्वात् परुषं वदन् क्रीडयं हे द्विषन्नाभूः पूर्व्वसरो ममेति ममाग्रतोभूत्वा मागा इत्यर्थः पूर्व्वं सरतीति पूर्व्वं कर्त्तरीति टः यतस्त्वमग्रेसरोजघन्यानामग्रेसरतीति पुरोयतइत्यादिना टः जघन्यइति शाखादिभ्योयइतिवार्थे यः पापानामधमस्त्वम् कृतः आदायचरोवने आदाय चरतीति भिक्षासेनेत्यादिना वने चरन्तीति वनेचराः अधिकरणे चरेष्टः तेषामग्र्याः प्रधाना ऋषयः तानादायचरसि भक्षयसि कर्म्मणि षष्ठी ॥ ६७ ॥ ज०म०

इतः प्रभृत्यधिकारकाण्डमुच्यते एकैकं विषयमाश्रित्य लक्षणप्रदर्शनं यत्र तदधिकारकाण्डं तत्रापि लक्षणान्तरसम्बन्धात् प्रकीर्णतास्तीति सूचनार्थं मध्ये मध्ये प्रकीर्णश्लोकाभिधानं विवक्षितस्य सर्गार्थस्यापरिसमाप्तत्वात् सर्गमध्ये काण्डान्तरारम्भोन दोषाय एवञ्चायं सर्गोमिश्रक उच्यते द्वयोरत्र प्राधान्येन विवक्षितत्वात् । अथ टाधिकारः । द्विषद्भित्यादि । परुषं वदन्निति यदुक्तं तत्किमित्याह हे वनेचराग्र्याणां मुनीनां द्विषन् शत्रो त्वं मम पूर्व्वसरोऽग्रयायी माभूः यतस्त्वं जघन्यानां नीचानां अग्रेसरः प्रथमः वने आदाय गृहीत्वा अर्थात् सीतां चरसि गच्छसीति आदायचरः द्विषद्भिति द्विषः शत्रौ शत्ररिति परः खमते द्विषच्छब्दः शत्रुवाचित्वे रूढएव विद्वेषार्थंतु कीपमवदिति शत्रः उभयथा सम्बन्धे षष्ठी वने चरतीति पचादित्वादन् अभिधानात् सप्तम्यलुक् अग्रेभवोऽग्र्यः श्रेष्ठ उच्यते रेफान्तपाठेऽग्रशब्दएव श्रेष्ठार्थः तथाच । अग्रमालम्बने व्राते परिमाणे फलस्य च । प्रान्ने समन्तादधिके प्रधाने प्रथमार्धयोरिति विश्वः । दामागैहागित्यादौ यञ्वर्জ्जनात् न दाञइत्वं चरेः पूर्व्ववदन् गमकत्वात् दत्तार्घाः सिद्धसंघैरितिवत् क्रियायाः कारकापेक्षायामपि यत्नेन समासः अविवक्षितकर्म्मत्वात् सापेक्षत्वाभावेन वा समासः असमासेऽपि न क्षतिः मयूरव्यंसकादित्वात् सापेक्षत्वेऽपि समास इति परः अग्रे इत्येकवचनान्तमव्ययं सकुष्टइति टः जघनं प्रशाङ्गागः तत्तुल्योजघन्यः विकारसंघेत्यादिना तुल्यार्थे ष्ण्यः ॥ ६७ ॥ भ०

यशेत्यादि । रामन्दुन्वन्तमुपतापयन्तमत्वपन्निर्लज्जान्धिक् त्वां गर्हां टुदु-

अहमन्तकरो ननं ध्वान्तस्येव दिवाकरः ।
तव राक्षस रामस्य नेयः कर्म्मकरोपमः ॥ ६६ ॥

उपतापे इत्यस्य सौवादिकस्य शतरि ङ्सुपोः सार्व्वधातुक इति यणादेशे रूपम् कीदृशं रामं यशस्करसमाचारं समाचरणं समाचारः चरितं भावे घञ् यशस्करोतीति यशस्करः कृञोहेत्वित्यादिना टः विसर्ज्जनीयस्य सः यशस्करणहेतुभूतः समाचारोयस्य ख्यातम्भुवि प्रसिद्धन्दयाकरङ्करणाकरणशीलं ताच्छील्ये टः पितुर्वाक्यकरम्पितुर्वचनानुष्ठाने अनुकूलं आनुलोम्ये टः ॥ ६८ ॥ ज० म०

यशस्करेत्यादि । रामं दुन्वन्तं उपतापयन्तं अत्यं परस्त्रीहरणेन निर्लज्जं त्वां धिक् धिक्समयेत्यादिना द्वौ टुदुपतापे स्वादित्वात् शतरि तुः-सुध्वोरिति वः रामं कीदृशं यशस्करः समाचारोयस्य तं यशःकरोतीति सुकृष्टइति टः अत्र ढात्पक्षिति सूत्रात् ढादित्यनुवर्त्तते सेतुकखेति वेः सः कृञोहेत्वादावर्थे टइति परः स्मते यशस्करी विद्येति निर्हिंग्रता विद्याया यशस्करणे हेतुत्वात् हेत्वाद्यर्थः सूचितः अन्यथा विद्येति यशसस्य वैयर्थ्यं स्यात् हेत्वाद्यर्थानुक्तावपि न क्षतिः सम्यगाचरणं समाचारश्चेष्टा घञ्ऽलनटोऽर्थे इति घञ् भुवि ख्यातं दयाकरणशीलं पूर्ब्बवट्टः परमते ताच्छील्यार्थेऽपि पितुर्वाक्यानुष्ठानेऽनुकूलं पूर्ब्बवट्टः परमतेऽनुकूलार्थेऽपि वाक्यशब्देनात्र तदभिधेयमुच्यते ॥ ६८ ॥ भ०

अहमित्यादि । हे राक्षस अहन्तव नूनमवश्यमन्तकरः विनाशयिता कीदृशः रामस्य नेयो वश्यः अचोयत् कर्म्मकरोपमः भृतकतुल्यः कर्म्मणि भृताविति टः ध्वान्तस्येव दिवाकरः यथान्धकारस्यान्तकरोदिवाकरः सूर्य्यः तथा अन्तकरदिवाकरौ दिवाविभेति टप्रत्ययान्तौ एवमुक्ता खस्मपातेति सम्बन्धः ॥ ६६ ॥ ज० म०

अहमित्यादि । हे राक्षस नूनं निश्चितं अहं तव अन्तकरः नाशयिता अन्तं करोतीति टः यथा दिवाकरः सूर्य्योध्वान्तस्य अन्धकारस्य अन्तकरः दिवाशब्दोऽयमाधाररूपदिनवचनोऽव्ययः तेन दिवा दिवसे प्राणिनश्चेष्टायुक्तान् करोतीति निशादित्वाट्टइति परः स्मते दिवाशब्दोऽयमव्ययः समस्यन्तत्वं प्रायिकं तेन दिवा दिनं करोतीति पूर्ब्बवट्टः बाहुल्याद्वा दिवा दिवसे करोरञ्निर्यस्य इति केचित् ध्वान्तमिति ध्वनेस्तमसि क्तो क्षुब्धस्वान्तेत्यादिना निपातः अहं कीदृशः रामस्य नेयः वश्यः वश्यः प्रणयी निभृत

सतामरुष्करं पक्षी वैरकारं नराशिनम् ।
हन्तुं कलहकारोऽसौ शब्दकारः पपात खम् ॥ १०० ॥

इति टाधिकारः ।

अतः परं प्रकीर्णकाः ।

धुन्वन् सर्व्वपथीनं खे वितानं पक्षयोरसौ ।
मांसशोणितसन्दर्शं तुण्डघातमयुध्यत ॥ १०१ ॥

इत्यमरः कर्म्मकरोपमः भृतकतुल्यः कर्म्म करोतीति टः कर्म्मशब्दादुभतौ ट इति परः ॥ ९९ ॥ भ०

सतामित्यादि । एवमुक्ता असौ जटायुः पक्षी खमाकाशमपपात पतितः किमर्थं नराशनं राक्षसं हन्तुं हनिष्यामीति कीदृशं राक्षसं सतामरुष्करं धर्म्मे स्थितानाम्पीडाकरम् अरुःशब्दः पीडोपलक्षणपरः दिवाविभेति टः वैरकारं वैरकरणशीलं कलहकारः पक्षी कलहयितुमनुकूलः अनयोर्नशब्दश्लोकेति टे प्रतिषिद्धेऽणेव भवति कर्म्मण्यणः प्राप्तिरस्तीति टाधिकार उदाहृतः कियत्खम्पपात यावति दूरे शब्दपातस्तावत्खमिति टाधिकारः समाप्तः ॥ १०० ॥ ज० भ०

सतामित्यादि । एवमुक्ता असौ पक्षी जटायुर्नराशिनं राक्षसं हन्तुं खमाकाशं पपात जगाम कीदृशं राक्षसं सतां साधूनांअरुष्करं व्रणकरं पीडाकरमित्यर्थः पूर्व्ववद्वृः निष्पतन्त्य इतिवत् षत्वं वैरं विरोधं करोतीति वैरकारस्तं ढाढ्यषस्थित्यस्य कुम्भकारइत्युदाहरणेन कुम्भादेःक्षजः षण् अन्यस्मात् सृकृष्टइत्यस्य विषयइति सूचितं तेनात्र कुम्भादित्वात् षण् पक्षी कीदृशः कलहकारः कलहं करोतीति पूर्व्ववत् षण् एवं शब्दकारः शब्दपातमिति पाठे शब्दस्य पातोयत्रेति खविशेषणं यावद्दूरं शब्दगमनं तावद्दूरमित्यर्थः शब्दस्येव पातोगतिर्यत्रेति पतनक्रियाविशेषणं वा एतेन यथा शब्दस्य शीघ्रगमनं तथास्येति ध्वनितं इति । टाधिकारः ॥ १०० ॥ भ०

इतः प्रकीर्णकश्लोकानाह । धुन्वन्नित्यादि । असौ पक्षी अयुध्यत युध्यते स्म युधेर्हेवादिकस्य लङि रूपम् तुण्डघातमिति क्रियाविशेषणम् तुण्डेन चञ्चुना घातोहननं यस्मिन् युद्धइति करणे हन इति न षत्वम् कषादिषु यथाविध्यनुप्रयोगात् अहिंसार्थत्वाच्च तदारम्भस्य यथा प्राद्घातम्भूमिं हन्तीति हिंसार्थानाञ्च

न बिभाय न जिह्राय न चक्लाम न विव्यथे ।
आह्वानो विध्यमानोऽपि रणान्निवर्तते न च ॥ १०२ ॥
पिशाचमुखधौरेयं सच्छत्रकवचं रथम् ।

समानकर्म्मकाणामित्यनेनापि न भवति समानकर्म्मकताभावात् अकर्म्मकत्वाद्युधेः तेन भावे घञ् धुन्वन् कम्पयन् खे आकाशे पक्षयोर्वितानं सर्व्वपथीनं सर्व्वः पन्थाइति पूर्व्वकालेत्यादिना सः कृकूरिति समासान्तोऽकारः सर्व्वपथान् व्याप्नोतीति तत्सर्व्वादेरित्यादिना खः मांसशोणितसन्दर्शङ्कात्स्त्रेन मांसं शोणितञ्च दृष्ट्वा कर्म्मणि दृशिविदोः साकल्य इति णमुल् अमैवाव्ययेनेति सः ॥ १०१ ॥

अथ प्रकीर्णकाः । धुन्वन्नित्यादि। असौ जटायुः खे आकाशे पक्षयोर्वितानं विस्तारं धुन्वन् कम्पयन् मांसशोणितसन्दर्शं यथा स्यात् तथा तुण्डघातं यथास्यात् तथा अयुध्यत युध्यौङ् युद्धे मांसरक्तयोरर्थाद्रावणस्य सम्यग्दर्शोदर्शनं यत्र तुण्डस्यावातो यत्र चेति युद्धक्रियाविशेषणं दर्शघातौ घञन्तौ परे तु साकल्येन मांसं शोणितञ्च दृष्ट्वा रावणस्येत्यर्थात् दृशोणमसाकल्ये एवं तुण्डेन हत्वा तुण्डघातं तृतीयान्तादासक्तौ णम् तुण्डघातेन युद्धसम्भवादासक्तिरत्र गम्यतइत्याहुः वितानं कीदृशं सर्व्वश्वासौ पन्थाश्चेति सर्व्वपथः पथ्यक्षुरःसे इति अः सर्व्वपथं व्याप्नोतीति ढक्रेकादिति ईनः ॥ १०१ ॥ भ०

नवीत्यादि । आह्वानः पक्षी प्रहरन् आङोयमहन इति तङ् न बिभाय न भीतः तस्माद्न जिह्राय न लज्जितः सम्यङ् मया न हत इति न चक्लाम न क्लान्तः न विव्यथे व्यथोलिटीति समसारणम् जितश्रमत्वात् विध्यमानो वा वाशब्दश्चार्थे परेण हन्यमानश्च न विव्यथे न पीडां भेजे सत्वाधिकत्वात् रणाच्च न निवर्त्तते न निवृत्तः अभग्नोत्साहत्वात् ॥ १०२ ॥ ज०भ०

नवीत्यादि । असौ पक्षी आह्वानः प्रहरन् न बिभाय न भीतः मया ताडितोऽपि न हत इति न जिह्राय न लज्जते स्म न चक्लाम नासमर्थोबभूव न विव्यथे न पीडितो भवति स्म विध्यमानः परेण ताड्यमानोऽपि रणात् न निवर्त्तते न निवृत्तः अभग्नोत्साहत्वात् सर्व्वत्र ठी व्यथेस्तु व्यथयतेति जिः आह्वान इति आत्माङ्ढादढाञ्चाह्वनयम इति मं किंवा आह्वानः शत्रुहिंसनशक्तः शक्तिवयस्त्वाच्छील्ये इति यानः ॥ १०२ ॥ भ०

पिशेत्यादि । युधि सङ्ग्रामे पक्षी रथं बभञ्ज भग्नवान् तस्य पुष्पकादन्यत्वात् तथाहि कद्रूधवत् कुत्सितरथमिव रघवदयोग्येति कदादेशः धुरं

युधि कद्र्थवद्भीमं बभञ्ज ध्वजशालिनम् ॥ १०३ ॥

एते प्रकीर्णकाः ।

अतःपरं अभधिकारः ।

सन्त्रासयाञ्चकारारिं सुरान् पिप्राय पश्यतः ।

स त्याजयाञ्चकाराथ सीतां विंशतिबाहुना ॥ १०४ ॥

वहन्ति धौरेया अश्वाः धुरोयदूजौ पिशाचस्येव सुखं येषान्ते धौरेया यत्र रथे तस्मिंश्चासुखधौरेयं सच्छोभनं शस्त्रङ्कवचञ्च यस्मिन् तन्भीमम्भयानकन्तथा धुर्य्यत्वात् ध्वजशालिनं ध्वजवन्तं शालिश्कब्दः किन्प्रत्ययान्तस्तद्वन्तमाह अन्यस्त्वाह ध्वजेन शालितुं श्लाघयितुं शीलमस्येति णिनिः अनेकार्थत्वाद्धातूनामिति । एते प्रकीर्णकाः ॥ १०३ ॥ ज०म०

पिशाचेत्यादि । जटायुः युधि संग्रामे रावणस्य रथं बभञ्ज कद्र्थवत् कुत्सितरथमिव कत्कच्चित्रथवद् इति कुशब्दस्य कदादेशः कीदृशः पिशाचस्येव सुखं येषां तेऽश्वा धौरेया यत्र धुरं वहतीत्यर्थे ढधेकादिति ष्ठेयः सत् शोभनं विद्यमानं वा कृत्रं कवचं वा यस्मिन् कृत्रकवचाभ्यां सह रथं बभञ्जेत्यर्थो वा भीमं भयानकं ध्वजशालिनं ध्वजयुक्तं शालिश्कब्दस्तद्वत्तायां अस्त्यर्थे शालिन् प्रत्ययइति वृद्धाः ध्वजेन शलते शोभते यद्वादित्वात्सिन् धातूनामनेकार्थत्वात् शालिरत्र दीप्त्यर्थ इति केचित् ध्वजेन शाडयितुं शीलं यस्येति डलयोरैक्यमिति स्मरणात् शाडृश्लाघायामित्यस्य रूपमित्यपरे शलञ्कृश्लाघदृत्यस्मात् ङ्याल्लकथनेदृत्यस्माद्वा ञेर्णिच्चिति केचित् । इति प्रकीर्णकाः ॥ १०३ ॥ भ०

इतःप्रभृत्यामभधिकृत्याह सन्त्रेत्यादि । अथैतस्मिन् युद्धप्रस्तावे स पक्षी सीतां विंशतिबाहुना रावणेन त्याजयाञ्चकार त्याजितवान् गत्यादिषु त्यजेरसंग्रहात् तृतीयैव भवति कस्मात्त्याजितवानित्याह सन्त्रासयाञ्चकारारिं यस्मादरिं रावणन्त्रासितवान् अकर्म्मकत्वात् त्रासेरण्यन्तावस्थायामरेः कर्म्मत्वम् आभ्यां हेतुमण्यन्ताभ्याम् कारितत्ययादित्यादिना आम् आमोऽमित्यमव्ययन्तत्वात् आम इति लेर्लुक् अयामन्तेत्यादिना अयादेशः आमकारान्तस्य कृत्संज्ञायामातिपदिकत्वे प्रथमैकवचनम् तस्यायादिति लुक् स्वरादिषु आमआमिति पठितत्वादव्ययत्वम् मन्त्रज्ञानभिव्यक्तपदार्थत्वात् कृञ्चानुप्रयुज्यत इत्यादिना लिट् परस्य कृञोऽनुप्रयोगः कर्त्रभिप्रायाभावाभावेऽनुप्रयोगे तङ् न भवति सुरांश्च पश्यतो

असौतो रावणः कासाञ्चक्रे शस्त्रैर्निराकुलः ।
भूयस्तं बेभिदाञ्चक्रे नखतुण्डायुधः खगः ॥ १०५ ॥

युद्धझटायुः पित्राय प्रीणितवान् शतुत्वासनं सीतात्याजनञ्च देवानामीतेः कारणम् ॥ १०४ ॥ ज० म०

अथामधिकारः । सन्वेत्यादि । स पक्षी अरिं रावणं सम्यक् त्रासयाञ्चकार अतएव पश्यतो युद्धमवलोकयतः सुरान् देवान् पित्राय प्रीणितवान् अथ त्रासानन्तरं विंशतिबाहुना रावणेन सीतां त्याजयाञ्चकार त्यजेर्धोऽजेरित्यस्य विषयाभावात् प्रयोज्यकर्तरि तृतीया त्यजेरकर्मकत्वात् प्रयोज्यकर्तुः कर्मत्वं उभयत्र प्रत्ययानन्तत्वात् द्विजादीत्याम् भस्त्रुच्चाम इति क्रञोऽनुप्रयोगः स्नोर्नुरित्यनुस्वारः जमेजमनोरिति जः अत्र विरामस्वीकारात् अनुस्वारस्य वर्णान्तरं वा भवतीति कालापाः पित्रायेति अनेकाचधातोराम् नत्वेकाचद्वत्युपन्यस्तं विंशतिबाहुना इति स्वाभिप्रायप्रदेन रावणस्य त्रासाधिक्यं जटायोर्वीर्याधिक्यञ्च सूचितम् ॥ १०४ ॥ भ०

असीत इत्यादि । असीतः परित्यक्तसीतो रावणः आकाशस्थः कासाञ्चक्रे कुत्सितमभिहितवान् एह्येहीति विहगाधिपेति कासृशब्दकुत्सायामित्यनुदात्तेत्कासित्यादिना आम् शस्त्रैः इत्यनृते तृतीया निराकुलः पूर्वमबाहुभिः सीताग्रहणे व्याकुलत्वात् भूयः पुनरपि खगः पक्षी डप्रकरणे अन्येष्वपि दृश्यत इति वचनात् गमेर्डः तन्निगाचरं बेभिदाञ्चक्रे अत्यर्थमभिन्नवान् बेभिद्यतेर्यङन्तादाम् नखतुण्डान्येवायुधानि यस्य ॥ १०५ ॥ ज० म०

असीत इत्यादि । असीतस्त्यक्तसीतो रावणः आकुलः सन् शस्त्रैः कासाञ्चक्रे शुशुभे कासृङ्कुशब्दे धातूनामनेकार्थत्वात् अत्र दीप्त्यर्थः दीप्त्यर्थोऽपि दन्त्यान्तकासृङ्धातुरस्तीति केचित् यद्वा पक्षिणं प्रति एहि एहि खगाधम त्रासयेत्यादि कुत्सितशब्दं कृतवान् अस्मिन् पक्षे शस्त्रैरिति विशेषणे तृतीया दरिद्राकाशकासेति पक्षे आम् पूर्वं सीताग्रहणे व्याकुलः सम्प्रत्यनाकुलः भूयः पुनरपि खगः पक्षी तं रावणं बेभिदाञ्चक्रे अत्यर्थं भिनत्ति स्म कीदृशः नखतुण्डप्रहरणः भिदेर्मूलसूत्रभूचाटेत्यादिना यङ् प्रत्ययानन्तत्वात् द्विजादीत्यादिना आम् यङोलुक् यङ्लुक्यलोपे अरे नगुद्री इति निषेधात् न गुणः द्विजादीत्यादौ स्वामिति विषये सम्प्रमी तेन यङ् लुकि परस्मैपदविषये क्रञ उभयपदित्वात् आत्मनेपदवदनुप्रयोगः खे गच्छतीति कृनजनादिति डः ॥ १०५ ॥ भ०

हन्तुं क्रोधवशादीहाञ्चक्राते तौ परस्परम् ।
न वा पलायाञ्चक्रे विद्ययाञ्चक्रे न राक्षसः ॥ १०६ ॥
उपासाञ्चक्रिरे द्रष्टुं देवगन्धर्वकिन्नराः ।
छलेन पक्षौ लोलूयाञ्चक्रे क्रव्यात् पतत्रिणः ॥ १०७ ॥
प्रलुठितभवनौ विलोक्य क्षत्तम्
दशवदनः खचरोत्तमं प्रहृष्यन् ।

हन्तुमित्यादि । तौ पक्षिरावणौ क्रोधवशात् क्रोधाधीनतया परस्परमन्योन्यं हन्तुमीहाञ्चक्राते चेष्टां कृतवन्तौ इजादेरित्यादिना आम् विः पक्षी जनिघसिभ्यामित्यधिकृत्य वेजोऽडित्यौणादिक इक् नवा नैव वाशब्द एवार्थे पलायाञ्चक्रे पलायितः उपसर्गस्यायतावितिवत्वम् राक्षसश्च न दयाञ्चक्रे न दयते स्म पक्षिणङ्क्त्वहं कथं व्यापादयामीति उभयत्रापि दयायासश्चेत्याम् ॥ १०६ ॥ ज० भ०

हन्तुमित्यादि । तौ पक्षिरावणौ क्रोधवशात् क्रोधाधीनतया परस्परमन्योन्यं हन्तुमीहाञ्चक्राते ईहङ्चेष्टे परस्परं व्यतिलुनन्तीत्युदाहरता व्यतीहारे परस्परशब्दोमनीषादित्वान्निपातित इति क्वचितं विः पक्षी न पलायते स्म राक्षसोऽपि हन्तुं न दयां कृतवान् सर्वत्र व्विजादीत्याम् पलायाञ्चक्र इति परापूर्व्वस्यायधातो रूपं रेफस्य लत्वं मनीषादित्वात् मामाङ्नञ् नहिनोनवा इत्येते प्रतिषेधार्थाः एवार्थे अत्र वाशब्द इत्यन्ये ॥ १०६ ॥ भ०

उपेत्यादि । देवगन्धर्वकिन्नरा द्रष्टुं युङन्द्रक्ष्याम इति उपासाञ्चक्रिरे उपगताः पूर्व्ववदाम् क्रव्यात् रावणः क्रव्यमांसमत्तीति क्रव्यात् अदोनन्न इति विट् पतत्रिणः पक्षिणः पक्षौ लोलूयाञ्चक्रे अत्यर्थं लूनवान् यङ्प्रत्ययान्तत्वादाम् छलेन मायया प्रसह्य जेतुन्न शक्यत इति भङ्क्तेनेति पाठान्तरम् ॥ १०७ ॥ ज० भ०

उपेत्यादि । देवा गन्धर्वाः किन्नराश्च द्रष्टुं अर्थात् युद्धं उपासाञ्चक्रिरे उपगताः आसङ्उपवेशे व्विजादीत्याम् दीव्यतीति देवः पचाद्यजन्तो गानं धर्म्मोऽस्येति गन्धर्वो मनीषादिः नराकृतित्वात् कुत्सितो नरः किन्नरः स्वरूपार्थे किं शब्द इत्यन्ये क्रव्याद्रावणः छलेन कपटेन पतत्रिणः पक्षिणः पक्षौ लीलूयाञ्चक्रे अत्यर्थं चिच्छेद त्यान्तत्वादाम् क्रव्यं मांसमत्तीति क्विप् ॥ १०७ ॥ भ०

प्रलुठितमित्यादि । खचराः पक्षिणः खे चरन्तीति अधिकरणे चरेष्टः

रथवरमधिरुह्य भीमधुर्य्यम्
स्वपुरमगात् परिगृह्य रामकान्ताम् ॥ १०८ ॥

इति भट्टिकाव्ये पञ्चमः सर्गः ॥

तेषामुत्तमं जटायुं कृत्तं छिन्नं लूनपक्षत्वात् अवनौ भुवि प्रलुठितं विलोक्य प्रहृष्यन् हर्षं प्राप्नुवन् निहतोविघ्नकारीति दशाननो रथवरं स्मरणात् प्राप्तं पुष्पकाख्यमारुह्य भीमधुर्यं रामकान्तां सीतां तथैव परिगृह्य स्वपुरमगात् गतवान् ॥ १०८ ॥ ज० म०

इति जयमङ्गलाख्यायां पञ्चमः सर्गः ॥

विलुठितमित्यादि । कृत्तं छिन्नं लूनपक्षत्वात् अवनौ भूमौ विलुठितं पतितं खचरोत्तमं जटायुं विलोक्य प्रहृष्यन् हृष्टोभवन् रावणो रथवरं अधिरुह्य रामकान्तां सीतां परिगृह्य स्वपुरं लङ्कां अगात् गतः रथानां वरः श्रेष्ठः पुष्पकाख्यः स्मरणादुपागतः तं कीदृशं भीमा धूर्या अश्वा यत्र धुरं वहतीति ढधेकादिति यः ॥ १०८ ॥ भ०

इति गौराङ्गमल्लिकात्मजश्रीभरतमल्लिकविरचितायां सुग्धबोधिन्यां
भट्टिटीकायां सीताहरणो नाम भिन्नकः पञ्चमः सर्गः ॥

षष्ठः सर्गः ।

ओषाञ्चकार कामाग्निर्दशवक्त्रमहर्निशम् ।
विदाञ्चकार वैदेहीं रामादन्यनिरुत्सुकाम् ॥ १ ॥
प्रजागराञ्चकारारेरीहासुनिशमादरात् ।
प्रबिभयाञ्चकारासौ काकुत्स्थादभिशङ्कितः ॥ २ ॥

अत्राधिकारस्यापरिसमाप्तत्वात्तमेव विदत्याह ॥ ओषाञ्चकारेत्यादि । अथ शब्दोवक्ष्यमाणतृतीयश्लोके यः सोऽत्र द्रष्टव्यः अथ तस्मिन् सीतापरिग्रहे जाते कामाग्निः कामोऽग्निरिव दशवक्त्रं दशाननमोषाञ्चकार ददाह उषदाहे उषविदेत्याम् अहर्निशं अहश्च निशा च सर्वोद्वन्द्वोविभाषैकवद्भवतीत्येकवद्भावादत्यन्तसंयोगे द्वितीया अह्नोनकारस्य रोऽसुपीति रत्वं कस्माद्दाह इत्याह रावणो वैदेहीमन्यनिरुत्सुकां रामादन्यस्मिन् सर्व्वत्र निरभिलाषां विदाञ्चकार अगुणत्वं विदेस्तथेति विदेरगुणत्वात् गुणाभावः ॥ १ ॥ ज० म०

ओषामित्यादि । अत्रापि स एवाधिकारः अपरिसमाप्तत्वात् कामोऽग्निरिव दशवक्त्रं रावणं अहर्निशं ओषाञ्चकार उषदाहे दरिद्राकासकाशेति पक्षे आम् अहश्च निशा च इति समाहारद्वन्द्वः सदाध्वादीति ह्रौ दशवक्त्रपदन्यासेन विंशत्या नेत्रैरेकदैव सीतासौन्दर्य्यातिशयविलोकनात् कामपीडानिर्भरत्वं द्योत्यते वैदेहीं रामादन्यस्मिन् सर्व्वत्र निरुत्सुकां निरभिलाषां विदाञ्चकार ज्ञातवान् ङाम्वाद्यामिति वेत्ते ङाम् ङिच्चान्न गुणः ॥ १ ॥ भ०

प्रजागराञ्चकारेत्यादि । अरेरामस्य ईहासु चेष्टासु गुरोश्च इत्यकारः आदरादादरेण प्रजागराञ्चकार जागरितवान् शत्रुचिकीर्षितज्ञानपरीवभूवेत्यर्थः पूर्व्ववदाम् अनिशमिति निशाक्रियाविच्छेदो नास्ति यस्मिन् प्रजागरणइति निशेति क्रियाविच्छेदोपलक्षणं प्रायेण हि निशायामपि क्रियाणां प्रवर्त्तनं किमिति जागरितवानित्याह काकुत्स्थादसौ प्रबिभयाञ्चकार प्रभीतवान् भीह्रीत्यादिनाम् ह्रुवत् कार्य्ये धातोर्गुणायादेशौ अभिशङ्कितः किमयं करिष्यतीति ॥२॥ज०म०

प्रजेत्यादि । असौ रावणोऽरेरामस्य ईहासु चेष्टितेषु अनिशं निरन्तरं

न जिह्रयाञ्चकाराथ सीतामभ्यर्थ्य तर्ज्जितः ।
नाप्नूर्ज्जां बिभरामास वैदेह्यां प्रसितो भृशम् ॥ ३ ॥
विदाङ्कुर्व्वन्तु रामस्य वृत्तमित्यवदत् स्वकान् ।
रक्षांसि रक्षितुं सीतामाशिषच्च प्रयत्नवान् ॥ ४ ॥

अथ प्रकीर्णकाः ।

प्रजागराञ्चकार सावधानोबभूव आदरात् आदरं कृत्वा यवर्थे पञ्चमी हेतौ वा काकुत्स्थात् प्रबिभयाञ्चकार अतिभीतः जिभीलिभीत्यां पशाम्बाभीह्रीति पशाम् शित्त्वाद्वृत्वे ह्वादीरेद्विः णुर्धूङ्दृति गुणः भस्क्रन्वामदृति क्रजनुप्रयोगः अतिशङ्कितः किमयं करिष्यतीति नानाविकल्पव्याकुलः ॥ २ ॥ भ०

न जिह्रयाञ्चकारेत्यादि । सीतामभ्यर्थ्य याचित्वा न जिह्रयाञ्चकार न लज्जितः तर्ज्जितः भर्त्सितोऽपि तयैवेत्यर्थात् नाप्नूर्ज्जां बलं बिभरामास धारितवान् क्रजिति प्रत्याहारग्रहणादस्तेरप्यनुप्रयोगः ह्रीधातोर्गुणायादेशौ डुभृञ्धारणपोषणयोः उभयत्रापि पूर्ब्ववदाम् स्रुवच्च कथं न धारितवान् इत्याह वैदेह्यां प्रसितः प्रसक्तः भृशमत्यर्थम् ॥ ३ ॥ ज० म०

न जीत्यादि । अथ सीताया अन्यनिरूत्सुकत्वज्ञानानन्तरं सीतामभ्यर्थ्य बहुधा अनुनीय तया तर्जितोभर्त्सितोऽपि रावणो न जिह्रयाञ्चकार ह्रीलिलज्जे जर्ज्जां बलमपि न बिभरामास भृभिभृतिपुष्ट्योः उभयत्र पूर्ब्ववत्पशाम् पृभ्वादेर्ङिः खेरेदृति भृधातोः खेर्ङिः आमोऽनुप्रयोग अस्तेर्भूर्न भवतीति परः स्वमते भस्क्रन्वामदृत्यत्र असजधार्थे दृत्यस्य ग्रहणं नत्वस्तेः यद्वा व्याकरणान्तरसंवादात् अस्तेरेवानुप्रयोगः कृतभ्वादेशस्यास्तेरनुप्रयोगस्य वैयर्थ्यं भुवोऽनुप्रयोगस्योक्तत्वात् तेनाभोऽनुप्रयोगे भूररेदृत्यस्य न विषयदृति बोध्यं जर्ज्जः सेभ्क्तात्सरोरिति अप्रत्ययः स्त्रीत्वञ्च जर्ज्जमिति पाठे क्विप् कृतदृत्याह वैदेह्यां प्रसित आसक्तः तच्चिन्तया बलक्षयात् ॥ ३ ॥ भ०

विदाङ्कुर्व्वन्त्वित्यादि । स्वकानात्मीयान् शुकसारणादीन् अवदद्उक्तवान् किमित्याह रामस्य वृत्तमनुष्ठितं किन्नस्नेहा गन्तासद्यमोऽस्ति न वेति विदाङ्कुर्व्वन्तु विदांकुर्व्वन्त्वित्यन्यतरस्यामिति निपातितं सीतां रक्षितुं रक्षांसि आशिषदादिष्टवान् शासेः सत्तीत्यङ् शासदद्ङ्हलोरिति शासेरुपधायादुत्वं शशिवसीति षत्वं प्रयत्नवान् प्रयत्नपरः । आमधिकारो गतः ॥ ४ ॥ ज० म०

रामोऽपि हतमारीचो निवर्त्स्यन् खरनादिनः ।
क्रोष्टून् समश्रृणोत् क्रूरान्रसतोऽशुभशंसिनः ॥ ५ ॥
आशङ्कमानो वैदेहीं खादितां निहतां हृतां ।
स शत्रुघ्नस्य सोदर्यं दूरादायान्तमैक्षत ॥ ६ ॥

विदामित्यादि । रामस्य वृत्तं चेष्टितं भवन्तो विदाङ्कुर्वन्तु जानन्तु इति स्वकान् आत्मीयान् दूतान् रावणोऽवदत् ङाम्वाड्यां ग्यान्नुक्न्विति वेक्तेर्ङाम्ग्यां क्नङन्नुप्रयोगएव प्रयत्नवान् सन् सीतां रचितुं रचांसि आशिषत् आदिष्टवान् चकारः ससुच्चये शासुअनुशिष्टौ शासुलिङ्याशिषि ङः शासुडिङ्सङ्ङे इति दत्वं क्विलात्कृतदृति षत्वम् । इत्यामधिकारः ॥ ४ ॥ भ०

अथ प्रकीर्णश्लोकानाह । राम इत्यादि । हतमारीचो रामोऽपि निवर्त्स्यन् प्रत्यागमिष्यन् बलादिलक्षण इटि प्राप्ते न दृङ्भ्रदृतीण् निषेधः क्रोष्टून् शृगालान् रसतः शब्दायमानान् अश्रृणोत् संश्रुतवान् सकर्मकत्वात् समोगमीत्यात्मनेपदं न भवति लङिरूपं क्रूरान् भीषणान् यतः खरनादिनः खरवन्नदन्ति कर्त्तरीति णिनिः अशुभशंसिनः अनिष्टसूचनशीलान् ॥ ५ ॥ ज० म०

अथ प्रकीर्णकाः । राम इत्यादि । हतो मारीचो येन स रामोऽपि निवर्त्स्यन् प्रत्यागमिष्यन् रसतः शब्दं कुर्वतः क्रोष्टून् शृगालान् समश्रृणोत् क्रोष्टूनां शब्दं श्रृणोति स्मेत्यर्थः रसतइति तद्विशेषणात् तथाचोक्तं सविशेषणे हि विधिनिषेधौ विशेषणमुपसंक्रामतः सति विशेष्ये बाधे इति यद्यपि शब्दएव श्रूयते नतु शृगालः तथापि शृगालस्यायं शब्दइति ज्ञाने शृगालोऽपि विषयइति तस्यापि ज्ञानकर्मत्वमविवादं औपचारिकोऽयं प्रयोग इत्यन्ये अनेकार्थत्वात् श्रृणोतिरिह दर्शनार्थइति केचित् दृङ्धौनेम्येस्यसनोरिति दृतेरिमुनिषेधः मे ततएव यं खरनादिनो गर्हभवत् नदतः यङादित्वात् णिन् कर्त्तर्युपमान उपपदे णिन्निति परः अतएवाशुभशंसिनः अशुभं शंसितुं सूचयितुं शीलं येषामिति ताच्छील्ये णिन्निति परः स्मते यङादित्वात् अतएव क्रूरान् भयदान् । अपि सम्भावनाप्रश्नशब्दगर्हासमुच्चये । तथा युक्तपदार्थेषु कामचार क्रियासु चेति विश्वः ॥ ५ ॥ भ०

आशङ्कमान इत्यादि । तथाविधाशुभश्रवणादाशङ्कमानो वितर्कयन् वैदेहीं किं खादितां निशाचरादिना ततः निहतां त्यक्तप्राणां अहो स्वयमेवायुःक्षयामृतां वा स रामः शत्रुघ्नस्य सोदर्यं भ्रातरं सोदराद्यः आयान्तमागच्छन्तमारादैक्षत दृष्टवान् ईक्षेर्लुङि ॥ ६ ॥ ज० म०

सीतां सौमित्रिणा त्यक्तां सध्रीचीं त्वस्रमेकिकाम् ।
विज्ञायाभंस्त काकुत्स्थः क्षये क्षेमं सुदुर्लभम् ॥ ७ ॥
एते प्रकीर्णकाः ।

आशङ्क्येत्यादि । अमङ्गलश्रवणात् वैदेहीं राक्षसादिभिर्भक्षितां मृगाला-दिभिर्वा निहतां स्वयमेवायुःक्षयात् मृतां वा आशङ्कमानस्तर्कयन् रामः भ्रातुश्च सोदर्यंत्र लक्ष्मणं आयान्तं आराद्दूरादैक्षत ईक्षेर्धी समान उदरे स्थितः सोदर्यः ढधेकादिति यः रूपनामगोत्रेत्यादिना पक्षे समानस्य सः कनिष्ठभ्रात-सम्बन्धोक्तत्वेन लक्ष्मणस्यापकर्षः सूचितः स्त्रीवचनेन त्यक्तधैर्यत्वात् आराद्दूर-समीपयोः ॥ ६ ॥ भ०

सीतामित्यादि । सौमित्रेरेकाकिनोऽदृष्टत्वान्नियतमनेन त्यक्तेति तां विज्ञाय ज्ञात्वा काकुत्स्थो रामः क्षये गृहे क्षीयतेऽस्मिन्निति अधिकरणेऽच् क्षेमं कल्याणं सुदुर्लभं सुदुःखेन लभ्यतइति ईषदित्यादिना खल् अभंस्त ज्ञातवान् कथं क्षये क्षेमं सुदुर्लभमिति आह सध्रीचीं सहचारिणीं न क्वचिदेकाकिनीं तिष्ठन्तीं सहाञ्चतीति ऋत्विगादिना क्विन् सहस्य सध्रिरित्यञ्चतौ वप्रत्यये सहस्य सध्रादेशः अञ्चतेश्चोप-संख्यानमिति ङीप् अचइत्यकार लोपः चावितिं दीर्घः कुतः त्वस्रुं त्वसनशीलां क्रियाशब्दत्वादूङ् न भवति एकिकां लक्ष्मणेन त्यक्तत्वात् एकादाकिनिच्चासह-हाये इति चकारात्कन् प्रत्ययस्यादितीत्वम् । एते प्रकीर्णकाः ॥ ७ ॥ ज० म०

सीतामित्यादि । सौमित्रिणा त्यक्तां अतएव एकिकां सीतां विज्ञाय काकुत्स्थः क्षये निवासे क्षेमं कुशलं सुदुर्लभं अभंस्त एकाकिनो लक्ष्मणस्या-गमनात् तद्योगज्ञानेऽपि कुतः क्षेमं सुदुर्लभमित्याह त्वस्रुमिति तां कीदृशीं त्वस्रुं त्वसनशीलां क्षिपत्वसेति क्रुः तथाच त्वासान्मृतेति सम्भाव्यते अतएव सध्रीचीं सदा सहचरीं न क्वचिदेकाकिनीं तिष्ठन्तीं सहाञ्चतीति क्विपि सहसन्नि-रःसध्रिसमितिरीति सहस्य सध्रिःअञ्चतेर्गत्यर्थत्वात् नेदित्यूजार्थाञ्चोरित्यस्य विषयाभावात् हसुङ्लोपोऽणाविति नकारलोपः द्विर्द्विर्ह्वाह इति ईप् अचोऽन्त्योपोधश्चेति अकारलोपे निमित्ताभावात् यत्वनिषेधे इकारस्य दीर्घः एकादाकिन्कावसहाये इति परः स्वमते विकारसंघेत्यादिना असहाये स्वार्थे वा कः स्त्रियामप् काण्यनाशीरके इति ह्रस्वं क्षीयतेऽस्मिन्निति अन् क्षिनिवास-गत्योः क्षयेऽपचयकाले इत्यर्थो वा । क्षयोरोगान्तरे वेत्यमरकल्पान्नापचयेष्वयीति विश्वः । एते प्रकीर्णकाः ॥ ७ ॥ भ०

अतःपरं दुहादिः ।

सोऽष्टच्छल्लक्ष्मणं सीतां याचमानः शिवं सुरान् ।
रामं यथास्थितं सर्व्वं भ्राता ब्रूते स्म विह्वलः ॥ ८ ॥
सन्दृश्य शरणं शून्यं भिन्द्रमाणो वनं प्रियाम् ।
प्राणान् दुहन्निवात्मानं शोकं चित्तमवारुधत् ॥ ९ ॥
गता स्यादवचिन्वाना कुसुमान्याश्रमद्रुमान् ।

अतो द्विकर्म्माधिकारः । सोऽष्टच्छदित्यादि अकथितं चेत्यत्र "दुहियाचोत्यादिश्लोकस्थात् धात्वन् प्रयुङ्क्ते कविः तत्र रामोऽष्टच्छत् सीतामिति प्रधानं कर्म्म लक्ष्मणमित्यकथितं कर्म्म याचमानः प्रार्थयमानः शिवं कल्याणं अर्थात् सीतायाः शिवं प्रधानं कर्म्म सुरान् देवान् इत्यकथितं कर्म्म भ्राता लक्ष्मणः सर्व्वं यथावत् स्थितं ब्रूते स्म उक्तवान् सर्व्वमिति प्रधानं कर्म्म रामामित्यकथितम् ॥ ८ ॥ ज० म०

अथ द्विकर्म्मकप्रकरणं । स इत्यादि । स रामः सीतां लक्ष्मणं अपृच्छत् दुहादेः कर्म्म हेतुः कर्म्मेति परः स्मते याच्चार्थेत्यादीनां स्वभावाद्द्विकर्म्मकत्वसूत्रं कर्म्मद्वयन्तु तात्पर्य्यलभ्यमेव सीतामिति प्रधानं कर्म्म लक्ष्मणस्य हेतुत्वमर्थाल्लभ्यत एव तेनात्र न लक्ष्मणमिति कीदृशो रामः सुरान् शिवं याचमानः दातुं प्रेरयन् अर्थात् सीतायाः शिवमिति प्रधानं कर्म्म भ्राता लक्ष्मणो विह्वलो विह्वलः सन् सर्व्वं यथास्थितं सीताप्रेरणादिकं रामं उक्तवान् वचनेन बोधितवान् रामामिति हेतु कर्म्म ॥ ८ ॥ भ०

संदृश्येत्यादि । रामः शरणं गृहं शून्यं संदृश्य दृष्ट्वा शोकं चित्तमवारुधत् चित्तं शोकं प्रावेशयत् कीदृशः प्रियां जानकीं वनं भिन्द्रमाणः प्राणान् दुहन्निव त्यजन्निव प्राणानिति प्रधानं कर्म्म आत्मानमित्यकथितं आत्मनः प्राणान् त्यजन्निव ॥ ९ ॥ ज० म०

संदृश्येत्यादि । रामः शरणं गृहं शून्यं संदृश्य शोकं चित्तमवारुधत् शोकमन्तः स्थापयित्वा चित्तमपाहृणोत् शोकं प्रावेशयदिति वार्थः रुधिरौञ् आवृतौ दूरित्वात् शासुलिह्रादिति पक्षे ङः कीदृशः प्रियां सीतां वनं भिन्द्रमाणः दातुं प्रेरयन् प्रियामिति प्रधानं कर्म्म आत्मानं प्राणान् दुहन्निव मोचयन्निव आत्मानमिति कर्म्म हेतुः ॥ ९ ॥ भ०

आ यत्र तापसान् धर्म्मं सुतीक्ष्णः शास्ति तत्र सा ॥ १० ॥

इति दुहादिर्हिकर्म्मकः ।

अतः परं प्रकीर्णकाः ।

आः कष्टं वत ह्रो चित्रं ह्रं मातर्दैवतानि धिक् ।

ह्रा पितः क्वासि हे सुभ्रु बह्वेवं विललाप सः ॥ ११ ॥

गतेत्यादि । यत्र यस्मिंस्तपोवने सुतीक्ष्णो नाम ऋषिः धर्म्मं शास्ति शिक्षयति धर्म्ममिति प्रधानं कर्म्म तापसानित्यकथितं तत्र तपोवने गता स्यात् सम्भावने लिङ् आकारो निपातः स्मरणे किं कुर्व्वती कुसुमान्यवचिन्वाना कुसुमानीति प्रधानं कर्म्म आश्रमद्रुमानित्यकथितं अवचिन्वानेति चिनोतेः कर्त्रभिप्राये तङ् । दुह्यादिदण्डकोगतः ॥ १० ॥ ज० म०

गतेत्यादि । बह्वेवं विललाप स इति वक्ष्यमाणश्लोकेनान्वयः यत्र सुतीक्ष्णो मुनिस्तापसान् धर्म्मं शास्ति तत्र सा गता स्यात् सम्भावने खी लोपोऽस्यसोरिति अस्तेरकारलोपः किं कुर्व्वती आश्रमद्रुमान् कुसुमानि अवचिन्वाना द्रुमान् विघट्टयन्ती पुष्पाण्याददाना आ इत्यव्ययशब्दः स्मरणार्थे प्रयुज्यते यदुक्तं मर्य्यादायामभिविधौ क्रियायोगेषदर्थयोः । य आकारः स डित्प्रोक्तो वाक्यस्मरणयोरङितिति । आमिति क्वचित् पाठः सोऽपि स्मरणार्थ एव । इति द्विकर्म्मकाः ॥ १० ॥ म०

प्रकीर्णकानाह ! आः कष्टमित्यादि । शोकेनाक्रान्तमना विलपन्नाह आः पीडायां प्रियवियोगपीडितः आः इत्याह अस्मद्वियोगेन पिता प्राणांस्त्यक्तवानित्यभिप्रायः कष्टमित्याह कष्टं कृच्छ्रं भर्त्तुर्मरणादस्मद्वियोगाच्च मातुः कावस्थेत्यभिप्रायेणाह वत इति वतशब्दः खेदे सौमित्रिरपि तया सीतया अन्यादृशः सम्भावित इति विस्मितो ह्रीत्याह ह्रीशब्दो विस्मये यदि नामस्त्रिया मूर्खतया तथाभिहितं सौमित्रिणा विदुषा कथं तादृशः शापो दत्त इत्यभिप्रायेणाह चित्रमिति चित्रमाश्चर्य्ये यद्देवंविधोऽपि स्खलतीति सर्व्वमेव दुर्ज्ञातं कैकेयीप्रभवमिति क्रुध्यन् ह्रं मातरित्याह ह्रंशब्दः क्रोधे अथवा सर्व्वमेतत् दैवचेष्टितं न ममानुचितमित्यभिप्रायेणाह धिग्दैवतानीति धिक् कुत्सायां अविज्ञाय चक्षुषा प्राणांस्त्यक्तवन्तं पितरं पुनरहं द्रष्टास्मीत्यभिप्रायेणाह ह्रा पितः अत्र द्रष्टव्योऽसीति ह्रा शोके हे सीते क्व गतासीति भूशब्दादप्राणिजातेरित्यादिनोङ्

इहासिष्टाशयिष्टेह सा सखेलमितोऽगमत् !
अस्रासीत् संस्मरन्नित्थं मैथिल्या भरताग्रजः ॥ १२ ॥

उवर्णान्तमात्रस्य विधानाद्ङीप्रीहिः उपसर्जनत्वञ्च पुनः स्त्रियामूङ् अन्तादिवच्चेति पूर्वं प्रत्यन्तवत्त्वात् प्रातिपदिकत्वं अतः सम्बुद्धौ ह्रस्वत्वं विललाप स एवं कृत्वा बह्वनेकप्रकारं विलापं कृतवान् ॥ ११ ॥ ज० म०

अथ प्रकीर्णकाः । आ इत्यादि । सीतावियोगेन पूर्वदुःखस्मरणात् पितृवियोगपीडितः प्राह आ इति आस्तु स्यात् कोपपीडयोः मद्वियोगेन पिता प्राणान् जहावित्यभिप्रायेणाह कष्टमिति कष्टं कृच्छ्रं पतिमरणान्मद्वियोगाच्च मातुः कावस्था इत्यत आह वतेति खेदद्योतकोऽयं वतशब्दः लक्ष्मणोऽपि सीतया अन्यथा सम्भावित इति विस्मितः प्राह हीति ह्री विस्मयविषादयोः यद्यपि स्त्रीत्वान्मौर्ख्येण तया तथाभिहितं तथापि लक्ष्मणेन तादृशः शापो दातुमनुचित इत्यभिप्रायेणाह चित्रमिति चित्रमाश्चर्यं सर्वमिदं केकयीप्रभवमिति रोषादाह ह्रं मातरिति ह्रंशब्दः क्रोधे भर्त्सने वा तथाविधायामातुरपीदृशोऽकस्मात् मतिविपर्ययो देवकृत एवेत्यत आह दैवतानि धिगिति धिक्शब्दो निन्दाभर्त्सनयोः अविशेषवचनत्वादिति भावः पितुर्व्याख्यादीदृशं दुःखमनुभवन्नहं पित्रा न ज्ञायते नवा पितृदर्शनेन विना ममैतद्दुःखं व्यपगमिष्यतीत्याह हा पितरिति हा विषादशुगार्त्तिषु धिक्समयेत्यादिसूत्रस्थ षष्ठ्यपवादत्वान्नात्र तद्विषयः सामान्येन हाशब्दं प्रयुज्य पश्चात् पितृसम्बोधनमतो न द्वितीयेति दुर्गः वस्तुतस्तु हाशब्दवाच्यं दुःखं स्वविषयमेव पितृशब्देन तस्य सम्बन्धाभावः कथं द्वितीयया भवितव्यं एतत् सकलदुःखं यत्कृत्वा विस्मर्त्तव्यं सापि नास्तीत्याशयेनाह हे सुभ्रु कासीति कोमेऽपि भूपारूढ्यं नास्तीति सुभ्रुपदस्याभिप्रायः एवं स्मृत्वा स रामो बह्वप्रकारं विलापं कृतवान् शोभने भ्रुवौ यस्याः तस्याः सम्बोधनं सुभ्रूरीह्यजिति ह्रस्वः ॥ ११ ॥ भ०

इहेत्यादि । इह प्रदेशे आसिष्ट उपविष्टा इदमोहः इदम् इश् इह अशयिष्ट शयितवती आसेः शीङश्च लुङ् सखेलं सलीलं इतः प्रदेशादगमत् गतवती इत्यमेवंप्रकारं मैथिल्याः स्मरन् अधीगर्थेति कर्मणि षष्ठी भरताग्रजो रामोऽस्रासीत् ग्लानिङ्कृतः ग्लायतेर्लुङ् यमरमेति सगिटौ ॥ १२ ॥ ज०म०

इहेत्यादि । अत्र प्रदेशे सा सीता आसिष्ट जिलासङ् उपवेशे अत्राशयिष्ट उभयत्र टीकं इतः सकाशात् सखेलं सलीलं अगमत् लृदित्त्वात् ङः

इदं नक्तन्तनं दाम पौष्पमेतद्दिवातनम् ।
शुचेवोद्वध्य शाखायां म्लायति तया विना ॥ १३ ॥
ऐच्छिमहि सुप्तां यां मृताशङ्कया वयम् ।
अकाले दुर्मरमहो यज्जीवामस्तया विना ॥ १४ ॥
अत्रेमः परिहासोऽयं परीक्षां मा कृथा मम ।

इत्यमेवंप्रकारेण मैथिल्याः संस्मरन् भरताग्रजो रामोऽग्लासीत् यमरमेति इमसनौ मैथिल्या इति ढेच धीति कर्म्मणि षष्ठी ढधेक्तनोत्यादिना शतर्योगे षष्ठ्याः प्रतिषेधेऽपि नजानिर्दिष्टस्यानित्यत्वाद्वा कर्म्मणि षष्ठी सम्बन्धविवक्षया स्मृत्यर्थयोगे कर्म्मणि वा षष्ठीति परः इह इत्यत्र कुतः क्व कुत्रेत्यादिना निपातितम् ॥१२॥भ०

इदमित्यादि । नक्तन्तनं निशाभवं इदं दाम पुष्पमाला पुनर्दिवातनं दिवसभवं सायमित्यादिना ष्युष्युलौ तट्च पौष्पं पुष्पाणामिति तस्येदमित्यण् शुचेव शोकेनेव सम्पदादिः शाखायामुद्वध्य आत्मानमित्यर्थात् म्लायति ग्लानिं गच्छति ग्लायतेः शित्यायादेशः शाखायां प्रलम्बमानं ग्लानिं गच्छन्तं वीच्येदमुत्प्रेक्षितं कुतः शोकात्तया विना सीताविच्छेदेन ॥ १३ ॥ ज० म०

इदमित्यादि । इदं नक्तन्तनं रात्रिभवं पौष्पं पुष्पसम्बन्धि दाम माला इदञ्च दिवाभवं दाम तया विना शुचा शोकेन शाखायां उद्वध्य अर्थादात्मानं म्लायति म्लानिं प्रयाति शाखास्थितां म्लानमालां वीच्येदमुत्प्रेक्षितं इत्येवं विललापेति व्यवहितश्लोकेनान्वयः स्मरन्नेवं सुमोह स इति वक्ष्यमाणनवम-श्लोकेन वा एवमुत्तरेष्वपि बोध्यं त्यदाद्यचिरेत्यादिना नक्तंदिवाशब्दाभ्यां अव्ययाभ्यां तनट् ॥ १३ ॥ भ०

ऐच्छिमहीत्यादि । यां वयमैच्छिमहि ईक्षितवन्तः ईक्षेः सेटो लुङ् सुप्तां अविच्छिन्ननिद्रत्वात् मृताशङ्कयेति अनिष्टशंसित्वात् प्रियजनहृदयस्य इदानीं तया विना अहो वयं यज्जीवामस्तदकाले दुर्मरमिति विललाप जीवितस्यापूर्णकाले देःखेन मरणमिति खल् ॥ १४ ॥ ज० म०

ऐच्छीत्यादि । वयं सुप्तां यां प्रियां मृता नवेत्याशङ्कया मुहुर्मुहुरैच्छिमहि ईक्षेश्चामहि अनिष्टशंसीनि बन्धुहृदयानीति मृताशङ्कित्वं एते-नानुरागातिशयः सूचितः अहो आश्चर्यं यत्तया विनापि वयं जीवामस्तदस्माद्-कारणे जीवनस्यापूर्णकाले दुःखेन म्रियते ऽयंदुःखोरिति भावे खल् ॥ १४ ॥भ०

मत्तो मान्तर्द्विधाः सीते मा रंस्था जीवितेन नः ॥ १५ ॥

एते प्रकीर्णकाः ।

अतःपरं सिजधिकारः ।

अहं न्यबधिषं भीमं राक्षसं क्रूरविक्रमम् ।

मा धुक्षः पत्युरात्मानं मा न स्निक्षः प्रियं प्रिये ॥ १६ ॥

अक्षेम इत्यादि । परिहसनं परिहासः क्रीडा अयमक्षेमो न कल्याणकरः मम परीक्षां किं मामपश्यन् दुःखमस्ति नवेति मा कृथाः उञ्चेति कित्त्वाद्गुणाभावः हुखादिति सिचो लोपः तस्माद्धेतोः सीते मान्तर्द्विधाः अन्तर्हिता मा भूः अन्तर्द्वावित्यपादानसंज्ञायां पञ्चम्यास्तसिः प्रत्ययोत्तरपदयोश्चेति मदादेशः लुङिस्याध्वोरिच्चेति सिचः कित्त्वमित्वञ्च हुखादिति सिचोलोपः नोऽस्माकं जीवितेन मा रंस्थाः क्रीडां मा कार्षीः रमेरात्मनेपदित्वात्तङ् । एते प्रकीर्णकाः ॥ १५ ॥ ज० म०

अक्षेम इत्यादि । कदाचित् परिहासेनान्तर्हिता सा भवेदित्याशङ्क्योत्तरमिदं अयमन्तर्द्धानरूपः परिहासोऽक्षेमः अशुभः तवादर्शनेन मम दुःखमस्ति नवेत्येवं मत्परीक्षां त्वं मा कृथाः कृञस्यासि दृगुङुर्मढीस्यनिमिति सेः कित्त्वान्न गुणः झषस्खादिति सिलोपः मत्तः सकाशात् मा अन्तर्द्विधाः मत्कर्तृकदर्शनाभावेच्छया व्यवहिता मा भूः धाञस्यासि स्यादोर्डिरिति ङिरगुणत्वञ्च पूर्ववल्लिलोपः यतोऽपायेति यतोऽन्तर्द्विस्तदपादानं सर्व्वत्र हेतुमाह हे सीते नोऽस्माकं जीवितेन मा रंस्थाः क्रीडां न कुरु तवादर्शनेन प्राणा यास्यन्तीति भावः । इति प्रकीर्णकाः ॥ १५ ॥ भ०

सिचं सापवादमधिकृत्याह । अहमित्यादि । यतोऽहं राक्षसं मारीचं क्रूरविक्रमं भीमं भयानकं न्यबधिषं निहतवानस्मि हन्तेर्लुङि चेति बधादेशः अदन्तत्वाद्धलादिलोपाभावः तस्मान्मा धुक्षः न गोपय पत्युरात्मानं अन्तर्द्वावित्यपादानत्वं ख्यात्यात्यूयीत्युत्तं गुहेः सलडगुपधादनिटः क्यः होढः भग्रावकत्वषत्वानि सिपश्च विसर्जनीयः मा न स्निक्षः मा न परिरक्षाः अपितु स्निक्ष्य मां हे प्रिये स्निक्ष आलिङ्गने क्यः ॥ १६ ॥ ज० म०

अथ सापवादसिजधिकारः । स्वमते स्वधिकारः । अहमित्यादि । भीमं भीषणमूर्त्तिं क्रूरविक्रममसह्यपराक्रमं राक्षसं मारीचं अहं न्यबधिषं हतवान्

मास्म द्राक्षीर्मृषा दोषं भक्तं मां मातिचिक्लिशः ।
शैलं न्वधिश्रियद्वा मा नदीं नु प्रत्यदुद्रुवत् ॥ १७ ॥
ऐ वाचं देहि धैर्यं नस्तव हेतोरसुष्ठुवत् ।
त्वं नो मतिमिवाधासीर्नष्टा प्राणानिवादधः ॥ १८ ॥

हनलौगतौबधे अमि व्यांसिः हनबधष्टीति बधादेशः हसादेः सेम् इत्यादौ बधवर्ज्जनात् सेसूत्रसूचनात् प्रकृत्यन्तरत्वाद्वा इम् पत्युर्मत्तः सकाशात् आत्मानं त्वं मा घुक्षः न गोपय गुहञ संवृतौ उदित्त्वाद्वेमूदिति इमोऽभावपक्षे हसषोऽनिमिजुङ इति सक् होढः भभान्तस्येति धः षढोः कः क्किलादिति षः हे प्रिये प्रियं मां मा न श्लिक्षः अपितु अवश्यमेव प्रियमालिङ्क्य द्वौ निषेधौ सातिशयं प्रकृत्यर्थं गमयत इति न्यायात् श्लिषौश्लेषे आलिङ्गनेऽर्थे पूर्ब्बेण सक् ॥ १६ ॥ भ०

मास्मेत्यादि । मृषा दोषं व्यलीकं दोषं मा द्राक्षीः मयीत्यर्थात् स्मोत्तरे लङ्चेति चकारालुङ् सलदृशपधेति क्यस्य न दृश इति निषेधः इरितो वेत्यङ् भावे सिच् सृजिदृशोरित्यम् झलन्तलक्षणा दृङ्क्षः व्रश्चेत्यादिना षत्वं यतोऽहं भक्तस्ततो मां भक्तं मातिचिक्लिशः नातिक्लेशय क्लिशेरर्थान्नात् सिपि णिश्रीत्यादिना चङ् वा णिलोपः द्विर्व्वचनादिः पुनर्व्विकल्पयन्नाह मयि दोषदर्शनात् मत्प्रतिकूलवर्त्तिनी सती शैलं नु पर्व्वतं किमध्यधिश्रियदाश्रिता ततो नदीं प्रत्यदुद्रुवत् प्रतिगतेत्यर्थः नुशब्दो वितर्के चङ् ॥ १७ ॥ ज० म०

मास्मेत्यादि । मृषा दोषं मास्म द्राक्षीः अर्थान्मयि दोषदर्शनाद्वा अन्तर्हितेत्याशङ्क्य इदमुक्तं दृशेरप्रेक्षे माङ्योग इति टीसञ्ज्ञिधौ दृशेर्व्वर्ज्जनात् इरित्वात् ङः विकल्पपक्षे व्यांसिः वद्रौऽकिदिति रत्वं अनिमित्त्वाद्व्रजवदेति त्रिः शक्वाजेति षड् भक्तं अनुरक्तं मां त्वं मातिचिक्लिशः नातिपीडय क्लिशेर्ज्जिः प्रेरणे जिश्रीत्यङ् द्वित्वं गुणः अग्रङ ङः खः जेर्लोपः निकटे यदि तिष्ठेत्तदा मद्वचनादागच्छेदित्यतोऽन्यद्विकल्पयन्नाह वामेति मय्यपि दोषदर्शनात् प्रतिकूला सती शैलं किं अधिश्रियत् आश्रिता उत नदीं प्रत्यदुद्रुवत् प्रतिगता श्रिजसेवने द्रुगतौ अनयोरङि सुध्वोरिति इयुवौ नुशब्दो वितर्के ॥ १७ ॥ भ०

ऐ वाचमित्यादि । ऐशब्दो निपातोऽभिमुखीकरणे वर्त्तते वाचं देहि प्रार्थनायां लोट् ध्वसोरेद्धावित्येत्वं किमिति चेदाह धैर्यं नोऽस्माकं धीरता तव हेतोरसुष्ठुवत् गलितं नष्टा अदर्शनं गता सती त्वन्नोऽस्माकं मतिं बुद्धिमधासीरिव

रुदतोऽग्निश्चियच्चक्षुरास्यं हेतोस्तवाश्चयीत् ।
च्चियेऽहं मां निरास्यश्चेन्मा न वोचश्चिकीर्षितम् ॥ १९ ॥

बुद्धेरपाटवात् विभाषा धेटश्चोरिति यदा न चङ् तदा यमरमेति सगिटौ प्राणानदधः पीतवती कायस्याचेष्टत्वात् चङि रूपमाह्नोप्रः ॥ १८ ॥ ज० म०

ऐ वाचमित्यादि । ऐ शीते वाचं देहि प्रार्थनायां गी ह्रीर्धारणे धेर्ह्रौ तव हेतोः नोऽस्माकं धैर्यं अस्रुस्रुवत् स्रुतं पूर्ववत् अङ् त्वं नोऽस्माकं मतिं बुद्धिं अधासीरिव पीतवतीव बुद्धेरपाटवात् कार्यान्तरासंक्रमाच्चोत्प्रेक्षेयं नष्टा अदर्शनं गता सती प्राणानपि त्वं अदध इव पीतवतीव देहस्य निश्चेष्टत्वात् धेट्पाने पूर्ववेण विभाषितोऽङ् एचोग्मित्या उस्येचीत्यालोपः अडोऽभावपक्षे श्यांसिः यमरमेति इमसनौ झसस्साञ्झसीम इति सेर्लोपः भूस्याग्निवदेन इति सेर्लुकि प्राप्ते धेशाच्छासाम्र इति पक्षे तदभावः नश अदर्शने क्तः तुरुधो मुचां नश इति क्तस्य नस्य हसुङ् न लोपोऽणावित्यनेन लोपः श्यच्छाजेति षङ् ऐ शब्दोऽयमव्ययोऽभिमुखीकरणे आह्वाने वा । य ऐ शब्दौ तु हेहैवत् स्मृत्यामन्त्रणह्रतिष्विति विश्वः ॥ १८ ॥ भ०

रुदत इत्यादि । तवार्थे त्वां पश्यामीति रुदतो मम चक्षुरग्निश्चियत् उच्छूणं आस्यं सुखं चाश्वयीत् विभाषाधेट्श्वयोरिति चङ् सिचौ चङीयङ् ह्लन्तेति न दृद्धिः दृट् दृटदृटीति सिचोलोपः गुणायादेशौ मां निरास्यश्चेद्यदि मम दर्शनं निरस्यती त्वं तदा च्चियेऽहं च्चियतेर्लुङ् लिङोश्चेति चकारात्च्छित्यात्मनेपदं रिङ्शयगिति रिङ् अतोयक्त्वया चिकीर्षितं कर्त्तुमिष्टं तन्मा मावोचः मा मा भाषिष्ठाः अपितु ब्रूहि अस्तिवक्तीत्यङ् वच उम् ॥ १९ ॥ ज० म०

रुदेत्यादि । तवादर्शनाद्रुदतो मम चक्षुरग्निश्चियत् उच्छूणमतिरोदनात् आस्यमपि अश्वयीत् ज्रिश्रीत्यादिना श्वेर्विभाषितोऽङ् अडोऽभावपक्षे श्यांसिः नेमेकाजादित्यादौ अश्विर्जागुरित्युक्तेर्गुणः त्वं चेत् यदि मां निरास्यः अदर्शनेन निरस्यती तदा अहं च्चिये भविष्यत्यामीथे वर्त्तमानत्वविवक्षा स्रुङ् प्राणत्यागे तदादित्वात् श्यः स्रुङष्टोढेग्रं स्रुद्रिःश्रयग्ढोपे श्रुध्वोरितीयः असुच्चेपणे वक्ष्यसेति ङः वच्यस्यश्विपतामिति अस्यः चिकीर्षितं कर्त्तुमिष्टं त्वं मा न वोचः अवश्यं ब्रूहि वचेर्ब्रुव्रो वा वचोऽरे इति वचादेशः पूर्ववत् ङः वोचादेशश्च ॥ १९ ॥ भ०

लक्ष्मणाचक्ष्व यद्याख्यत्सा किञ्चित्कोपकारणम् ।
दोषे प्रतिसमाधानमज्ञाते क्रियतां कथम् ॥ २० ॥
इह सा व्यलिपद्गन्धैः स्नान्तीहाभ्यषिचज्जलैः ।
इहाहं द्रष्टुमाह्वं तां स्मरन्नेवं सुमोह सः ॥ २१ ॥

लक्ष्मणेत्यादि । हे लक्ष्मण यदि सा किञ्चित्कोपकारणमाख्यदुक्तवती इदन्ते नाप्रियमाचरितं पूर्ववदङ् तदाचक्ष्व कथय अज्ञाते दोषे प्रतिसमाधानं कथं क्रियतां नैवेति भावकर्म्मणि लोट् रिडित्यादिना रिङ् ॥ २० ॥ ज० म०

लक्ष्मेत्यादि । हे लक्ष्मण यदि सा सीता किञ्चित्कोपकारणं आख्यत् कथितवती तदा त्वं आचक्ष्व कथय चक्षिङः प्रार्थनायां शीस्व अदादित्वात् शपोलुक् स्यादेःसीलोपइति ककारलोपः षढोःकःसे किलादिति षः ख्याग्रकथने चक्षिङः ख्याञ् वा वक्ष्यतेति ङः उस्सेचीत्यालोपः अज्ञाते दोषे प्रतिसमाधानं तदपमार्ज्जनार्थं कर्म्म कथं मया क्रियतां कर्त्तव्यं रतनोर्यगिणाविति यकि कृते घोंऽज्ञ्यर इति सामान्यविधिं बाधित्वा ऋद्रिःशयग्ढीप इति विशेषविधिः रित्वेऽपि पूर्ब्बबाधितत्वात् विकृतत्वाद्वा न तेन दीर्घः किंवा यङ्ङ्ग्रक्ये चर्द्रीरित्यत्र दीर्घकरणेन ऋद्रिःशयग्ढीपइत्यनेन कृतरेर्दीर्घो नस्यादिति ज्ञापितं यङ्ङ्ग्रक्ये घोंऽज्ञ्यर इत्यनेन ज्ञौ अस्यावीर्वावित्यनेन चेष्टसिद्धेः ॥ २० ॥ भ०

इहेत्यादि । इह प्रदेशे सा सीता गन्धैर्व्यलिपत्समालिम्पवती मामात्मानञ्चेत्यर्थात् इह स्नान्ती क्रीडापूर्ब्बकमभ्यषिचत् हस्तयन्त्रसृक्तसलिलेन मामभिमुखं सिक्तवतीत्यर्थः षत्वं इह द्रष्टुं तामाह्वं आह्वतवान् लिपिसिचिह्वश्चेति च्लेरङ् एवं स्मरन् सुमोह मोहं गतवान् ॥ २१ ॥ ज० म०

इहेत्यादि । इह स्थाने सा सीता गन्धैर्व्यलिपत् मामात्मानञ्चेत्यर्थात् गन्धयन्तीति गन्धाश्चन्दनादयः ञिलिपौशलेपे इह स्नान्ती सती सा जलैः क्रीडापूर्ब्बकं अभ्यषिचत् अर्थान्मां षिचपशौऽन्तरणे गीकःस्तुस्तुभेत्यादिना अम्व्यवधानेऽपि षत्वं इह द्रष्टुं तामहं आह्वं आह्वतवान् ह्वेर्ज्यर्ङ्ङे सर्व्वत्र वक्ष्यतेत्यादिना ङः स राम एवं स्मरन् सुमोह मोहं गतः स्नान्तीति आदीपोरिति विभाषितनुण् ॥ २१ ॥ भ०

तस्येत्यादि । तस्य रामस्य स्नान्तं मनः क्षुब्धस्वान्तेत्यादिना निपातितं शोकाग्निः शोकोऽग्निरिव अलिपत दीपितवान् परस्मैपदेषु लिपीत्यादिना नित्ये प्राप्ते आत्मनेपदेष्वन्यतरस्यामिति विकल्पेनाङ् स्मरितञ्जितइति क्रियाफल-

तस्यालिपत शोकाग्निः स्वान्तं काष्ठमिव ज्वलन् ।
अलिप्नेवानिलः शीतो वने तं न त्वजिह्लदत् ॥ २२ ॥
स्नानभ्यषिचतामोऽसौ रुदन् दयितया विना ।
तथाभ्यषिक्त वारीणि पित्वभ्यः शोकमूर्च्छितः ॥ २३ ॥
तथार्त्तोऽपि क्रियां धर्म्म्यां स कालेनासुचत् क्वचित् ।

विवक्षायामात्मनेपदं काष्ठमिव स्वान्तं ज्वलन् अतिवर्त्तमानः अनिलो वायुः शीतोऽपि सन् वने तं रामम् अलिप्नेव दीपितवानिव अडभावपक्षे झलो-झलीति सिचो लोपः नतु नैवाजिह्लदत् ह्लादितवान् शोकाग्नेरुद्वतत्वात् ह्लादेर्यन्त्वास्त्रिश्रीति चङ् ॥ २२ ॥ ज० म०

तस्येत्यादि । शोक एवाग्निर्ज्वलन् वर्द्धमानः तस्य रामस्य स्वान्तं मनः काष्ठमिव चिन्तया नीरसत्वात् अलिपत ददाह यद्यपि लेपस्यन्दनादिनोपदेहस्तथा-प्यग्निना लेपो दाह एव पर्य्यवस्यति धातूनामनेकार्थत्वाद्वा शीतोऽपि अनिलः वने तं रामं अलिप्नेव स्पृष्टवानिव सान्द्रेण सम्यगस्पर्शनात् किंवा वह्निना अलिप्त ददाह अतएव न अजिह्लदत् नानन्दयत् शोकाग्नेर्वर्द्धमानत्वात् वक्ष्यमे-त्यादिना आत्मनेपदे लिपादेर्ज्ञोविभाषितः पक्षे ह्यांसिः झस्खादिति सिलोपः ह्लादीङ्मोदने अडभ्यडः स्वः स्वेः सन्वत् ॥ २२ ॥ भ०.

स्नानित्यादि । असौ रामो दयितया विना शोकमूर्च्छितः शोकेन मोहं नीतः स्नातुमारब्धः मूर्च्छेर्हेतुमण्यन्तस्य रूपं स्नाशौचे शतप्रत्ययः रुदन्नम्भः सलिलं अभ्यषिचत स्निग्धवान् शिरस्यञ्जलिना अथ स्नातः पित्वभ्यो वारीणि अभ्यषिक्त दत्तवान् सिचेः पूर्ववद्विभाषाऽङ् सिचिरत्रोत्सर्गे वर्त्तते ततश्चार्था-न्तरवृत्तित्वाज्जलस्य कर्मत्वम् ॥ २३ ॥ ज० म०

स्नानित्यादि । दयितया विना शोकेन मूर्च्छितोऽपि असौ रामो रुदन् स्नान् स्नानं कुर्व्वन् अम्भोऽभ्यषिचत मन्त्रैः संस्कृतवान् स्वशिरसि अञ्जलिना स्निग्धवानित्यर्थो वा तथा स्नातः पित्वभ्यो वारीणि अभ्यषिक्त दत्तवान् पित्वर्थं स्निग्धवान् वा धातूनामनेकार्थत्वात् सिचेः संस्कारक्षेपदानवाचकत्वं तेन जलस्य कर्मत्वं अभ्युक्षणे करणत्वं यथा जलेन सिञ्चतीति पूर्ववत् ङः शीकटति षत्वं मूर्च्छा संमोहे उच्छ्राये आत्मात् क्तः केवलात्तु क्तक्तवत्वोरादितङ् न स्यात् मूर्च्छा जाताऽस्येति इतोऽस्य जातइति इतो वा ॥ २३ ॥ भ०

महतां हि क्रिया नित्या क्लिद्रे नैवावसीदति ॥ २४ ॥
आह्वास स मुहुः शूरान् मुहुराह्वत राक्षसान् ।
एत सीताद्रुहः संख्ये प्रत्यर्थयत राघवम् ॥ २५ ॥
स्वपोषमपुषद्युष्मान् या पक्षिन्मृगशावकाः ।

तथेत्यादि । स रामस्तेन प्रकारेणार्त्तोऽपि क्वचिदपि धर्म्म्यां क्रियां काले नासुचत् न त्यक्तवान् अस्मादेव यतो महतां सत्यपि क्लेशे व्यसने नित्या क्रिया नावसीदति आङ्पूर्व्वादवसीङ्कृञोतेर्वानिष्ठायां कृतिधातौ दृद्भिः सुचेः क्लदनुबन्धत्वादङ् क्लजः शच् रिङि यङौ ॥ २४ ॥ ज० म०

तथेत्यादि । तथा तेन प्रकारेण आर्त्तोऽपि व्याकुलोऽपि स रामः क्वचिदपि काले धर्म्म्यां धर्म्मादनपेतां क्रियां नासुचत् न त्यक्तवान् सुच्लृशपजौमोत्ते लृदित्वात् ङः आङ्पूर्व्वादवसीङ्कृञोः क्तः गेर्धोरनेधिनदृति त्रिः हि यस्मात् महतां क्लिद्रे व्यसने सत्यपि नित्या क्रिया नैवावसीदति नापगच्छति क्रियेति कृःशसेति शः स्त्रीत्वञ्च कृद्भिः शुध्योरितीयः यदकरणे प्रत्यवायः सा नित्या ॥ २४ ॥ भ०

आह्वास्तेत्यादि । पुनः पुनरभिभवितुं शूरानाह्वास आह्वतवान् तथा राक्षसानाह्वत पूर्व्ववत् विकल्पः स्वर्द्धायामाङ्दृत्यात्मनेपदं कथमाह्वतवानित्याह हे सीताद्रुहः सीताहिंसकाः शूरा राक्षसा वा एत आगच्छत आङ्पूर्व्वादिनोलोट् संख्ये संग्रामे राघवं प्रत्यर्थयत प्रत्यर्थिनं कुरुत प्रत्यर्थिनशब्दात्तत्करोतीत्यर्थे णिच् तदन्ताल्लोटः परस्मैपदं अर्थयाजीयामित्यस्य तु स्वार्थिकण्यन्तस्य सर्व्वदात्मनेपदित्वात् प्रत्यर्थयध्वमिति वा स्यात् ॥ २५ ॥ ज० म०

आह्वेत्यादि । स रामो मुहुर्व्वारंवारं शूरान् आह्वास अर्थात् युद्धाय राक्षसानपि आह्वत स्वर्द्धायामाङ् इति मं पूर्व्ववत् ङसौ कथमाह्वत इत्याह हे सीताद्रुहः सीताहिंसकाः यूयं एत आगच्छत आङ्पूर्व्वादिनोगौ संख्ये युद्धे राघवं प्रत्यर्थयत प्रत्यर्थिनं कुरुत प्रत्यर्थिनशब्दात् लेःक्लत्याख्यानेजिरिति क्लतौ जिः जीमंसेति डित्त्वे टेर्लोपः अर्थकङ् याचनदृत्यस्य वा रूपं क्वचिदात्मनेपदिनोऽपि परस्मैपदितेति न्यायात् केचित्तु चुर्भ्वोर्जिर्व्वेति जेरभावपक्षे डित्त्वान्नं जौत्वभयप्रदमेवेत्याहुः ॥ २५ ॥ भ०

स्वपोषमित्यादि । हे मृगपक्षिणां शावकाः पोताः या सीता युष्मान् स्वपोषमपुषत् पुष्टवती स्वेपुष दृति णसुल् यथाविध्यनुप्रयोगः तां प्रब्रूत

अद्युतच्चेन्दुना सार्द्धं तां प्रब्रूत गता यतः ॥ २६ ॥
गिरिमन्वस्पृहद्रामो लिप्सुर्जनकसम्भवाम् ।
तस्मिंश्चायोधनं वृत्तं लक्ष्मणायाशिषन्महत् ॥ २७ ॥

कथयत यतोयत्र आद्यादित्वात्तसिः गता सत्यद्युतत् द्योतते स्म सार्द्धमिन्दुना चन्द्रमसा तुल्यत्वात् ॥ २६ ॥ ज० म०

स्वपोषमित्यादि । एवंप्रकारेण मृगादीनध्याहृत्येति सम्बन्धः हे पक्षिणां मृगाणाञ्च शावकाः शिशवो या सीता युष्मान् स्वपोषं अपुषत् स्वेन आत्मना धनेन वा पुष्टवती अभिधानात् स्वपूर्व्वात् पुषेर्णम् तदनुप्रयोगश्च या इन्दुना सार्द्धं अद्युतत् तस्माद्द्योतनेन इन्दोः स्वभावेन गुणीभूतत्वात् ततोऽप्युत्कर्षः सूच्यते सार्द्धशब्देन समानत्वं वा लक्ष्यते उभयत्र शासुलिहुग्रत्युषादेरिति ङः मे ङ विधानादेव द्युतेः पं उक्तञ्च अतएव पं तां प्रब्रूत वदत त्वत्स्निग्धयास्त्वय्येव कथनं किमर्थं इत्याशङ्कायामाह गतेति यस्माद्गता अन्यत्र मां त्यक्त्वेत्यर्थात् केचित्तु यतोयत्र गता तं देशञ्च ब्रूतेत्यध्याहरन्ति केचित्तु या यतोयत्नात् अपुषत् इन्दुना सार्द्धं साम्यं गता या अद्युतच्च यतीङ्यत्ने इत्यस्य क्विपीत्याङः केचित्तु हे पक्षिमृगशावकाः गतायतः सन्तः तां प्रब्रूत गतं गमनं भावे क्तः न यतन्ते इति अयतः कर्त्तरि क्विप् गताय अयतोऽयत्नवन्तः स्थिराः सन्त इत्यर्थ इत्याङः गताय नास्ति यत् यत्नो येषां तादृशाः सन्त इत्यन्ये ॥ २६ ॥ भ०

गिरिमित्यादि । गिरिं लक्ष्मीकृत्य गतः स्पृहिवादङ् किमर्थं लब्धुमिच्छुः सनिमीमेत्यादिना इस् अत्र लोपश्चभ्यासलोपः खरिचेति चर्त्वं जनकसम्भवां सम्भवत्यस्मादिति सम्भवः हृदोरप् जनकः सम्भवो यस्याः सां सीतां अस्मिन् गिरौ आयोधनं युद्धं महदतिशयत्वात् वृत्तं लक्ष्मणायाशिषत्कथितवान् क्रियायोगे चतुर्थी सत्तीत्यादिनाऽङ् शासदद्ङ्हलोरितीत्वं शासिवसीति षत्वं कथमकथयदित्याह ॥ २७ ॥ ज० म०

गिरीत्यादि । जनकसम्भवां सीतां लब्धुमिच्छू रामोगिरिमनुलक्ष्मीकृत्य अस्पृहत् स्पृहौ गतौ स्पृहिवात् ङः लभेः सनिमीमीमादेत्यादिना अकारस्य इस् खिलोपश्च स्यादेः सीलोपश्च झषभसेरिति षः सम्भवत्यस्मात् सम्भवः जनकः सम्भवो यस्याः जनकात्सम्भवनं यस्या इति वा तस्मिन् गिरौ वृत्तं महदायोधनं युद्धं लक्ष्मणायाशिषत् उक्तवान् तादर्थ्ये चतुर्थी यदभि-

सीतां जिघांसू सौमित्रे राक्षसावारतां ध्रुवम् ।
इदं शोणितमभ्यग्रं संप्रहारेऽच्युतत्तयोः ॥ २८ ॥
इदं कवचमच्योतीत् साश्वोऽयं चूर्णितो रथः ।
एह्यमुं गिरिमन्वेष्टुमवगाहावहे द्रुतम् ॥ २९ ॥

प्रेत्य धात्वर्थस्तव चतुर्थीति परः शासु अनुशिष्टौ शासुलिह्वादिति ङः शास्-ङिच्चसङ्ङिति ह्रस्वं क्लिशादिति षत्वम् ॥ २७ ॥ भ०

सीतामित्यादि । इत्येवं लक्ष्मणायाग्रिमदिति श्लोकचतुष्टयं यावत् सम्बध्यते हे सौमित्रे सीतां हन्तुमिच्छन्तौ राक्षसावारतामागताविति ध्रुवं निश्चितं उत्प्रेक्षायामित्यन्ये आङ्पूर्व्वादर्तेरादादिकादेवाङ् पुषादिसूत्रे शास्ति-साहचर्य्येण तस्यैव ग्रहणात् अदशोङीति गुणः आङ्विनाप्यङागमे कृते रूपमिदं हन्तेः सनि अज्झनगमांसनीति दीर्घः अभ्यासाच्चेति घत्वं कुतोज्ञातमित्याह इदमभ्यग्रं शोणितं तयोः संप्रहारे युद्धे अच्युतत् गलितं च्युतिरत्रणेऽकर्म्मकोऽत्र इरितो वेत्यङ् सीतां भक्षयितुं तयोरेव विवादो दृत्त इति भावः ॥ २८ ॥ ज० म०

सीतामित्यादि । इत्येवं लक्ष्मणायाग्रिमदिति श्लोकचतुष्टयेषु सम्बध्यते हे सौमित्रे ध्रुवं निश्चितं उत्प्रेक्षे वा सीतां हन्तुमिच्छू राक्षसावारतां आङ्-पूर्व्वात् ऋलिगत्यर्त्तिसूत्रात् ऋप्रापणेचेत्यस्माद्वा वर्त्तमानेत्यादिना पक्षे ङः ह्रस्वो-र्णुरिति गुणः आङ्विनापि रूपमेतत् हन्तेः सनिघोर्ऽझनिङमामिति दीर्घः खेर्हीघः कुतोज्ञातमित्याह तयोरेव संप्रहारे युद्धे इदं अभ्यग्रं अभिनवं शोणितं अच्युतत् गलितं च्युतिरत्रणेऽकर्म्मकः इरित्वात् शासुलिह्वादित्यादिना पक्षे ङः सीतामत्तुं तयोरेव विरोधो जात इति भावः ॥ २८ ॥ भ०

इदमित्यादि । इदं कवचमच्योतीत् भ्रष्टं आङ्भावे सिजेव भवति अयं रथः साश्वश्चूर्णितः आस्ते यतश्चैवं तस्मादेहि आगच्छ द्रुतं किं पश्याद्रिलम्बसे अमुं गिरिमवगाहावहे विलोडयावः किमर्थं अन्वेष्टुं सीतामित्यर्थात् एतत्सर्व्व-पर्व्वतसमीपे कथ्यते ॥ २९ ॥ ज० म०

इदमित्यादि । कवचमिदं अच्योतीत् भ्रष्टं इरित्वात् ङाभावपक्षे अश्वैः सह चूर्णितोऽयं रथश्चास्ते यत एवं तस्मात् द्रुतं शीघ्रं एह्यागच्छ आङ्पूर्व्वस्येणोर्हौ रूपं अन्वेष्टुमर्थात् सीतां अमुं गिरिं आवां अव-गाहावहे सर्व्वतः पर्य्यटावः ॥ २९ ॥ भ०

मन्युर्मन्ये ममास्तम्भीद्विषादोऽस्तभदुद्यतिम् ।
अजारीदिव च प्रज्ञा बलं शोकात्तथाजरत् ॥ ३० ॥
गृध्रस्येहाश्वतां पत्त्रौ क्षत्त्रौ वीक्षस्व लक्ष्मण ।
जिघांसोर्नूनमापादि ध्वंसोऽयं तां निशाचरात् ॥ ३१ ॥
क्रुद्धोऽदीपि रघुव्याघ्रो रक्तनेत्रोऽजनि क्षणात् ।

मन्युरित्यादि । मन्युर्मम शोकः मन्ये इत्यहं सशोकः सुहृज्जनेऽस्तम्भीत् स्तब्धवान् विषाद उद्यतिमस्तभत् अत्र पक्षे अनुनासिकलोपः प्रज्ञा च तत्र विवेकिनी बुद्धिः अजारीत् विवेकवैकल्यात् जीर्णेव तथाशब्दः समुच्चये बलं शोकादजरत् जीर्णं स्वकार्याकरणात् गृध्रशोऽतीति गुणः जस्तम्भित्यादिना सिजङौ ॥ ३० ॥ ज० म०

मन्युरित्यादि । हे सौमित्रे मन्युः शोको मम मन्ये स्तब्धमूर्त्तिशिराहृदय-मस्तम्भीत् शोकजन्यवायुना मन्यास्तम्भोनाम व्याधिर्जात इत्यर्थः मन्युशोकौ तु पुक् स्त्रियां पश्चाद्गौवाशिरामनेत्रेति चामरः विषाद उत्साहविपर्यय उद्यतिं उद्यममस्तभत् स्तम्भुधातुः सौत्रिकः शासलिदुदिति वाङ् हसुङ् न लोपः ङाभावपक्षे ष्यांसिः उत्पूर्वाद्यमेः क्तौ वनतनाद्यनिमामिति मलोपः मम प्रज्ञा बुद्धिश्चाजारीत् कर्त्तव्यमूढत्वाज्जीर्णेव तथा मम बलं शोकात् अजरत् कार्याक्षमत्वाज्जीर्णमिव पूर्ववद्दाङः दश्नोर्णुरिति गुणः पक्षे सिः व्रजवदेति त्रिः तथेति समुच्चयाभ्युपगमसादृश्येष्विति वृद्धाः ॥ ३० ॥ भ०

गृध्रस्येत्यादि । हे लक्ष्मण इह प्रदेशे गृध्रस्य पत्त्रौ क्षत्त्रौ छिन्नौ अश्वतां सूनौ पूर्ववद्ङिः श्वयतेरः इति वीक्षस्व नूनमवश्यं सीतां जिघत्सोरत्तु-मिच्छोर्गृध्रस्य अदेर्लुङ्सनोर्घल्लृ निशाचरादयं ध्वंसः पत्त्रच्छेद आपादि उत्पन्नः कर्तरि लुङ् चिण्तेपद इति च्लेश्चिणादेशः तशब्दस्य चिणोलुक् ॥ ३१ ॥ ज०म०

गृध्रेत्यादि । हे लक्ष्मण इह स्थाने गृध्रस्य क्षत्त्रौ छिन्नौ पक्षौ अश्वतां वायुना मांसादिपरिणामेन वा दृङ्गतौ इति वीक्षस्व पश्य टुओश्विगति-दृङ्ग्योः पूर्वेण वा ङः वच्यसश्विपतामिति श्वः नूनं निश्चितं तां सीतां जिघांसो-र्गृध्रस्य अयं ध्वंसः पत्त्रच्छेदः निशाचरादापादि उत्पन्नः पदस्तनीण्घे इति कर्त्तरि इण् इणस्तनूलोपः जिघत्सोरिति पाठे अत्तुं भोक्तुमिच्छोः घस्लृदःस-नीति अदेर्घस्लृः सत्सरे ॥ ३१ ॥ भ०

अबोधि दुःस्थं त्रैलोक्यं दीप्तैरापदि भानुवत् ॥ ३२ ॥
अतायिस्योत्तमं सत्त्वमध्यायि कृतकृत्यवत् ।
उपाचायिष्ट सामर्थ्यं तस्य संरम्भिणो महत् ॥ ३३ ॥

क्रुद्ध इत्यादि । तदेवं रघुव्याघ्रो रामः क्रुद्धोऽदीपि दीप्तवान् चणाच्च रक्तनेत्रोऽजनि जातः जनिवध्योश्चेति न वृद्धिः त्रैलोक्यं निहन्मि यस्मिन् हन्यमानेऽपि सीतादुःखोऽपि नश्यन्ति इत्यभिप्रायेण दुःस्थमबोधि बुध्यते स्म किंवा रामस्य दाराहियन्ते तदान्येषु का कथा इति दुःस्थं त्रैलोक्यमबोधि दीप्तैस्तेजोभिर्हेतुभिरापूरि वर्द्धते स्म भानुवदादित्यवत् दीप्तैरिति भावे निष्ठा सर्व्वत्र कर्त्तरि लुङ् दीपजनेत्यादिना चिण् ॥ ३२ ॥ ज० म०

क्रुद्ध इत्यादि । लक्ष्मणायैवमुक्त्वा रघुव्याघ्रो रामः क्रुद्धः सन् अदीपि जज्वाल चणाच्च रक्तनेत्रोऽजनि जातः त्रैलोक्यमेवं दुःस्थं अबोधि ज्ञातवान् शत्रुमलब्ध्वा तन्नाशाय त्रैलोक्यमपि नाशयिष्यामीत्याशयः येनाहमपि दुःस्थः कृतस्तेन सुतरां जगद्दुःस्थमिति वा दीप्तैस्तेजोभिर्हेतुभिरापूरि वर्द्धते स्म भानुरिव दीपेर्भावे क्तः सर्व्वत्र पदस्तनीणुषे इत्यादिना कर्त्तरि पाचिक इण् इणस्तनूलोपः जनवधः सेम इत्यादिना जनेर्हुस्वः ॥ ३२ ॥ भ०

अतायीत्यादि । अस्य रामस्य उत्तमं सत्त्वमभिप्रायः शोकव्यसनयोरविकारत्वात् अतायि सन्ततं नान्तरा विच्छिद्यते स्म अध्यायि दृंहितं कृतकृत्यवत् समाप्तक्रियवत् हस्ततलस्थं शत्रुवधं मन्यमानस्य उभयत्रापि पूर्ब्ववच्चिण् तस्य रामस्य संरम्भिणः शत्रुविषये क्षुभितचित्तस्य सामर्थ्यं बलमुपाचायिष्ट स्वयमेवोपचीयते स्म चिनोतेरचः कर्म्मकर्त्तरीति चिण् पक्षे चिण्वदिट्चेति ॥ ३३ ॥ ज० म०

अतेत्यादि । अस्य रामस्य सत्त्वं व्यवसायः स्वभावो वा अतायि सन्ततं बभूव नान्तरा विहन्यते स्म उत्तमं व्यसनेऽपि अविकृतं तायृङ्पातनसन्तत्योः अध्यायि वर्द्धते स्म कृतकृत्यवत् समाप्तक्रिय इव क्रोधोत्साहाधिक्यात् विहितो वैरिवधइत्यध्यवसायात् प्रायीङ् वृद्धौ उभयत्र पूर्ब्ववद्वा इण् संरम्भिणः शत्रुविषये क्रुद्धस्य तस्य रामस्य सामर्थ्यं महदुपाचायिष्ट स्वयमेवोपचीयते स्म हनश्चवृद्धश्च इति चिनोतेः सेर्म्भिण् कर्म्मकर्त्तरि चायृङः निशानेऽर्च्चे इत्यस्यानेकार्थत्वात् कर्त्तव्येवेदं रूपमित्यन्ये सत्त्वं गुणे पिशाचादौ बले द्रव्यस्वभावयोः । आत्मनि व्यवसाये च चित्ते प्राणिषु जन्तुष्विति विश्वः ॥ ३३ भ०

अदोहीव विषादोऽस्य समरुद्धेव विक्रमः ।
समभावि च कोपेन न्यश्वसीच्चायतं मुहुः ॥ ३४ ॥

अथ प्रकरणं कथ्यते ।

अथालम्ब्य धनू रामो जगर्ज्ज गजविक्रमः ।
रुणद्धि सवितुर्मार्गं भिनद्मि कुलपर्व्वतान् ॥ ३५ ॥

अदोहीत्यादि । अस्य रामस्य विषादः प्रागुत्पन्नोऽदोहीव स्वयं चरित इव अथवा अदोहीव प्रपूर्य्यते स्मेव विक्रमः पुरुषकारः समरुद्धेव संरुध्यते स्म इव कर्म्मवदित्यादिना कर्म्मवद्भावेन प्राप्तस्य चिणो नरुध इति निषेधः तेन सिजेव भवति झलोझलीति सिचो लोपः झषस्तथोर्धोधः झलाञ्जशञ्झशीति धत्वजस्त्वे कोपेन च समभावि सम्भूतं चिण् भावकर्म्मणोरिति भावे चिण् त्रैलोक्यदौःस्थावबोधाज्जातखेदः सन् आयतं दीर्घं न्यश्वसीत् निश्वसितवान् ह्यन्तेति ढढ्रिन भवति शुङ्डरिति सर्व्वत्र योज्यम् ॥ ३४ ॥ ज० म०

अदोहीत्यादि । अस्य रामस्य प्रागुत्पन्नो विषादः स्वयमेवादोहि इव क्रोधातिशयात् स्वयं चरित इव पूर्य्यते स्मेवेत्यन्ये वेणजडुह इति कर्म्मकर्त्तरि वा इण् विक्रमोऽपि समरुद्धेव स्वयमेवान्तः प्रविष्ट इव नतपरुधसढेति कर्म्मकर्त्तरि इण् निषेधः झस्खादिति सिलोपः अस्य कोपेन समभावि सम्भूतं रतनोर्ऽगिणाविति भावे इण् कोपात् मुहुर्व्वारंवारं आयतं दीर्घं यथा स्यात्तथा रामो न्यश्वसीत् हसादेः सेम इत्यादौ श्वसवर्ज्जनात् न ढद्धिः इति सिजधिकारः ॥ ३४ ॥ भ०

इतः प्रभृति श्लोकत्रयं प्रकरणमधिकृत्याह । अथेत्यादि । अथानन्तरं रामोधनुरालम्ब्य गृहीत्वा जगर्ज्ज विष्फुर्ज्जितवान् धनूराम इति ट्वुलोप इति दीर्घः गजगतिः सवितुः सूर्य्यस्य मार्गं पन्थानं रुणद्मि आवृणोमि शरैरित्यर्थात् तथा भिनद्मि विदारयामि कुलपर्व्वतान् ॥ ३५ ॥ ज० म०

अथ नञ्शब्दाधिकारः । स च समते श्लोकत्रयं । अथेत्यादि । अनन्तरं गजपराक्रमोरामो धनुरालम्ब्य गृहीत्वा जगर्ज्ज सिंहनादं चकार किं कृत्वा जगर्ज्जेत्याह अहं सवितुः सूर्य्यस्य मार्गं पन्थानं रुणद्मि आवृणोमि अर्थात् शरैः वृद्धत्वादेव मम ईदृशं कर्म्म संवृत्तं इदानीं महतां दण्डभयादन्योऽपि सीतां दास्यति नच पुनरेवं कोऽपि करिष्यतीति भावः अतएव न हरेच्छ्लोक इति लोकोऽयमिति वक्ष्यति कुलपर्व्वतान् पृथिव्या अवस्तम्भकान् पर्व्वतानपि अहं

रिणच्मि जलधेस्तोयं विविनच्मि दिवः सुरान् ।
क्षुणद्मि सर्पान् पाताले छिनद्मि क्षणदाचरान् ॥ ३६ ॥
यमं युनज्मि कालेन समिन्धानोऽस्त्रकौशलम् ।

भिनद्मि विदारयामि रुधिरौघ आहतौ अधौभिर्दिभिर्दि दिवस्तुदरुधेति श्नेव श्यनादिवत् प्रकृतिप्रत्ययोः साहाय्यकारित्वान्न श्ण् दिवस्तुदरुधक्रादेरिति षष्ठेऽकवचनान्तं पदं तेन दिवादिप्रभृतीनां सम्बन्धे श्यनादयोरेपरेनिर्दिष्टा-दित्यर्थः ते कुत्र भवन्तीत्याशङ्क्य दृत्तावुक्तं एभ्यइति तेन सूत्रे षष्ठीनिर्देशात् रुधादेः श्ण् णित्त्वादन्त्याच्चउत्तरः एभ्यइति दृत्तौ पञ्चमीनिर्देशादन्त्ये प्रकृतेरुत्तरइति बोध्यं न च सूत्रे पञ्चमीनिर्देशेऽपि णित्त्वात् श्ण् रुधादेरन्त्या-दचः परे भवितुमर्हति णमिदित्त्वस्य षष्ठ्यन्तएव विषयत्वात् शासुलिदृद्युत्सुधा-देरिति पञ्चम्यन्तत्वात् प्रकृतेः परोऽचः न तु ङित्त्वादन्त्यस्य स्थाने इत्यादिदर्श-नात् षष्ठीनिर्देशेऽपि पञ्चम्यर्थोगम्यते तथाहि अनडुत्सुपयोलक्षणानामेकत्व-वाचिनाम् । नित्यं कः स्याद्वहुत्वेहौ वा स्याद्धित्वबहुत्वयोरिति । अन्यत्रापि नित्यात्वतां स्वरान्तानां स्तृजिदम्भ्योश्च वेट्यलि । स्तृचि नित्यानिटः सुश्चेट्ट्यें-ऽदांनित्यमिट् यलीति ॥ ३५ ॥ भ०

रिणच्मीत्यादि । जलधेस्तोयं रिणच्मि रिक्तीकरोमि रिचिरविरेचने दिवः स्वर्गात् सुरान् विविनच्मि पृथक्करोमि विचिर पृथग्भावे क्षुणद्मि चूर्ण-यामि सर्पान् पाताले क्षुदिरमेषणे अट् कुम्राडिति णत्वं छिनद्मि क्षणदाचरान् राक्षसान् द्विधा करोमि छिदिरद्वैधीकरणे ॥ ३६ ॥ ज०भ०

रिणच्मीत्यादि । जलधेः समुद्रस्य तोयं रिणच्मि रिक्तीकरोमि रिचि-र्जधोर्विरेके रेफात् ग्रणोणत्वं सुरान् दिवः स्वर्गात् विविनच्मि पृथक्करोमि विचिर्लिधौज् पृथक्त्वे विपूर्वः सुरायोगात् सुराः अर्शआदित्वादः तदुक्तं सुरापरिग्रहाद्वेवाः सुरा इत्यभिविस्तृताइति किंवा सुरन्ति भान्ति द्रवन्ते वा इति सुरा सुरशुभ्रश्ययोरित्यसात् कृगृज्ञाम्रीजुङइति कः पाताले सर्पान् क्षुणद्मि चूर्णयामि अधौक्षुदिर्क्षुदि क्षुत्सम्पेषणं षकारादणत्वं पतन्ति लोका-अस्मिन्निति पातालं निपातनात् क्षणदाचरान् छिनद्मि द्वैधीकरोमि छिदिर्धौज्-छेदे ॥ ३६ ॥ भ०

यममित्यादि । यममपि कालेन तदधीनेन मृत्युना युनज्मि सम्बध्नामि अस्त्रकौशलं समिन्धानः संवर्द्धयन् जिइन्धीदीप्तौ आत्मनेपदिनोलटः शानच्

शुष्कपेषं पिनष्म्युर्व्वीमखिन्दानः स्वतेजसा ॥ ३७ ॥
भूतिं तृणह्मि यज्ञाणां हिनस्मीन्द्रस्य विक्रमम् ।
भनज्मि सर्व्वमर्य्यादास्तनच्मि व्योमविस्तृतम् ॥ ३८ ॥
न तृणेह्मीति लोकोऽयं मां विन्ते निष्पराक्रमम् ।
एवं ब्रुवन् दाशरथिरष्टाग्घनुषा शरम् ॥ ३९ ॥

आन्नलोपः आसोरक्लोपः उर्व्वीं शुष्कां कृत्वा चूर्णयामि पिष्लृसंचूर्णने शुष्कचूर्णरूपेषपिषदृति णसुल् अखिन्दानः स्वतेजसा दैन्यमभजन् अपरिश्राम्यन् खिददैन्ये पूर्व्ववल्लोपः ॥ ३७ ॥ ज० म०

यमभित्यादि । यमभपि कालेन मृत्युना अहं युनज्मि हन्मीत्यर्थः युजिर्धांञ्युतौ अस्त्रकौशलं समिन्धानः वर्द्धयन् इन्धीञ् धञ्दीप्तौ धानः नणोनलोप्यइत्युङ्लोपः नणोनेऽणाविति नस्य अकाररहितत्वं उर्व्वीं शुष्कपेषं पिनष्मि चूर्णयामि धौपिष्लृ चूर्णने शुष्कचूर्णरूपात् पिषोणम् गतार्थत्वे तदनुप्रयोगश्चेति परः स्वमते चरणश्चेत्यस्य योगविभागात् चैशुष्यचो मकव इति शुषेः क्लस्य कः स्वतेजसा अखिन्दानः दैन्यमभजन् अपरिश्राम्यन् वा खिदङ्ध्यौदैन्यके नणोनेऽणौ ॥ ३७ ॥ भ०

भूतिमित्यादि । यज्ञाणां भूतिं सम्पदं तृणह्मि उत्पादयामि उत्पदिर्हिंसानादरयोः इन्द्रस्य विक्रमं हिनस्मि अपनयामि हिंसि हिंसायां इदितोनुम् तस्य आन्नलोपः सर्व्वमर्य्यादाश्च व्यवस्थाः सर्व्वेषां भनज्मि भर्द्दयामि भञ्जोआमर्द्दने आन्नलोपः तनच्मि व्योमविस्तृतं सङ्कोचयामि स्तृञआच्छादने क्लान्तेन चौरादिकस्य रूपं तञ्चसङ्कोचे आन्नलोपः कस्मादेवं प्रवृत्तस्वमिति चेदाह ॥ ३८ ॥ ज० म०

भतिमित्यादि । यज्ञाणां भूतिं सम्पदं तृणेह्मि नाशयामि तृहञ् धिनादरेच चकारादिंसायां इन्द्रस्य विक्रमं हिनस्मि अपनयामि हिंसधिकिहिंसे नणोनलोप्य इति इदित्वात् कृतनुणो लोपः सर्व्वेषां मर्य्यादा व्यवस्था भनज्मि निवर्त्तयामि भञ्जोधौ मोटने व्योम्न आकाशस्य विस्तृतं विस्तारं तनच्मि सङ्कोचयामि तञ्चुधसंकुचि तनञ्मीति पाठे तञ्जुधसङ्कोचे स्तृनञ्स्तृताविस्यस्माद्भावे क्तः व्योमविशेषणे विस्तृतमिति निरर्थकं स्यात् ॥ ३८ ॥ भ०

न तृणेह्मीत्यादि । न तृणेह्मि न मारयामि इति कृत्वा तृहिहिंसि हिंसायां अस्मत्कृतम् इदम् अयं लोको मां निष्पराक्रमं निर्वीर्य्यं विन्ते विचारयति

अथ प्रकीर्णकाः ।

न्यवर्त्तयत्सुमित्राभूस्तं चिकीर्षुं जगत्त्रयम् ।
ऐक्षेतामाश्रमादाराद्गिरिकल्पं पतत्रिणम् ॥ ४० ॥
तं सीताघातिनं मत्वा हन्तुं रामोऽभ्यधावत ।

विदविचारण इत्यस्मादात्मनेपदिनः अम् अल्लोपः एवमुक्तेन प्रकारेण वदन् दाशरथिः धनुषा शरम् अष्टणक् घृणत्ति स्म घृवीसंपर्के लङि अम् हल्ङ्यादिलोपः कुत्वं इति अम् विकरणनिदर्शनम् ॥ ३९ ॥ ज० म०

न हणेत्त्रीत्यादि । कथमेवं प्रवृत्तिरित्याह अहं न हणेद्धि न हन्मि इति ज्ञात्वा मनसीत्यर्थात् अयं लोकः मां निष्प्रराक्रमं विन्ने विचारयति तेन मे मत्प्रहारो दत्त इति भावः धौविदङ् मीमांसे नणोर्नेऽणौ हृहधहिंसे हृहरणपिङ्क्षे इति नणरण् ऋकारात् णत्वं दाशरथीराम एवं वदन् धनुषा शरं अष्टणक् युनक्ति स्म घृवीच्सम्पर्के हसङ्ग्रादिसेरिति दिलोपः चुडिति कुङ् ऋतोणत्वं घ्रणाति हिनस्तीति शरोऽनन्तः तालव्यादिः दन्त्यादिरयन्ति चित्रयुङ्क्तः शरः सर इति त्रिकाण्डशेषः । इति नशब्दाधिकारः ॥ ३९ ॥ भ०

इतः प्रकीर्णकश्लोकानाह । न्यवर्त्तयदित्यादि । तं रामं जगत्त्रयं चिकीर्षुं कर्त्तुमिच्छुं सुमित्राभूर्लक्ष्मणो न्यवर्त्तयत् निवर्त्तितवान् भ्रातः अलं कोपेन त्वया सार्द्धं कः संग्रामे युद्धं दातुं समर्थः यदत्र युक्तं तत्प्रतिविधीयतामिति भवनं भूः सम्पदादित्वात् क्विप् सुमित्रायां भूर्यस्य ऐक्षेतां रामलक्ष्मणौ दृष्टवन्तौ लङि रूपं पक्षिणं गिरिकल्पं महाप्राणित्वात् आश्रमादारात् समीपे दूरान्तिकार्थैरिति पञ्चमी ॥ ४० ॥ ज० म०

अथ प्रकीर्णकाः । न्यवेत्यादि । इत्थं जगतः त्रयं कर्त्तुमिच्छन्तं तं रामं सुमित्राभूर्लक्ष्मणो न्यवर्त्तयत् निवारयामास अन्यापराधेनान्यदण्डानौचित्यात् सुमित्रा भूरुत्पत्तिस्थानं यस्य सुमित्रायां भूर्भवनं यस्येति वा सुमित्राया भवतीति वा क्विप्तमिदं रूपं अथ रामलक्ष्मणौ आश्रमादारात् समीपे गिरिकल्पं पर्वततुल्यं पतत्रिणं पक्षिणं ऐक्षेतां दृष्टवन्तौ अन्यारभ्यार्थारादिति पञ्चमी ॥ ४० ॥ भ०

तमित्यादि ॥ तं सीताघातिनं सीता हतानेनेति मत्वा रामो हनिष्यामीत्यभ्यधावत धावुगतिशुद्ध्योरित्यस्मात्लङि स्वरितेत्वादात्मनेपदं तं हन्तुमुद्यतं रामं जटायुराह मा वधिष्ठा इति हे राम मां जटायुं मा वधिष्ठाः मा वधीः

मा बधिष्ठा जटायुं मां सीतां रामाहमैक्षिषि ॥ ४१ ॥
उपास्थितैवमुक्ते तं सखायं राघवः पितुः ।

बधबन्धने इत्यस्मादनेकार्थत्वादात्मनेपदिनः सेटोलुङि रूपं न हन्तेः सत्वाङ्गि आङो यमहनइत्यात्मनेपदं नास्ति अकर्मकादित्यनुवृत्तेः स्वनामपरिकीर्त्तनं तव पितुरहं सखेति ख्यापनार्थं सीतामैक्षिषि दृष्टवानहं लुङुत्तमैकवचने अतो मां मा बधिष्ठाः ॥ ४१ ॥ ज० म०

तमित्यादि । तं पक्षिणं सीताघातिनं सीतामयं कृतवान् इति मत्वा हन्तुं रामोऽभ्यधावत वेगेन अभिमुखं गतवान् धावुञ्जवे सृजि उपास्थितैवमुक्तेतमिति वक्ष्यमाणश्लोकेनान्वयाद् मा बधिष्ठा इत्यादिपद्यार्द्धं हन्तमुद्यतं रामं प्रति जटायुवाक्यमिति गम्यते हे राम जटायुं मां त्वं मा बधिष्ठा न मारय हन्तेस्थासच्यांसिः हनबधष्टीढ्वलीति बधादेशः धात्वन्तरत्वात् वसोरस्तीम् आत्मने पदमिच्छन्ति परस्मैपदिनां क्वचिदिति परवाक्यात् स्वमते बाहुल्यात् आत्मनेपदं किं वा आङ्पूर्व्वहन्तेः आत्माङ्कादाद्दाच्चहनयम इति मं आत्माङ्कादित्यस्य क्वचिद्व्यभिचारात् तथाच गाण्डीवी कनकश्रिलानिभं भुजाभ्यामाजघ्ने विषमविलोचनस्य वक्त्र इति किं वा जटायुमिति नामकीर्त्तनेन तव पितुः सखा अहमिति ज्ञापितं तेन च तव पितुः सख्यदार्ढ्यनाहं तव स्वाङ्गमिव मम हिंसया तव स्वाङ्गहिंसाव्यथेति आरोपितात्माङ्गत्वादात्माङ्कादित्यात्मनेपदं किं वा आत्माङ्कादित्यत्र आत्मशब्देनात्मीयोऽपि लक्ष्यते किं वा धातूनामनेकार्थत्वाद्वधङ्निन्दे च इत्यस्य रूपं कित्तिजगुपदृत्यादौ निन्दाबधेः सन्विधानादत्र न सन् जटा आयुर्यस्येति व्युत्पत्त्या तस्य च प्रवयसोजटायुषः स्वर्गिणःकिमनु शोच्यतेऽधुनेति दर्शनाच्च जटायुमिति चिन्त्यमिति भ्रान्त्या वदन्ति यतो बाहुल्यादिनधातोरण् प्रत्यये आयुशब्दोऽयमुदन्तोऽपि दृश्यते यथा वायुना जगदायुनेति जटायुश्च जटायुरिति शब्दभेदः पौलस्त्यस्य जटायुषा विधटितः काञ्चनोयमसोऽयं रथः पश्यैते मुरतः पिशाचवदनाः कङ्कालशेषाः हताः । खङ्गच्छिन्नजटायुपक्षतिरितः सीताञ्चलन्तीं वहन्नन्तर्व्याकुलविद्युदम्बुद इव द्यामभ्युदस्यादरिरित्येतत्पद्यरुनादिवृत्तावुज्वलदत्तेन जटायुशब्दस्य सन्नोदन्तत्वेन द्वैरूप्यज्ञापनायोदाहृतं अहं सीतामैक्षिषि दृष्टवान् त्वां सि इम् अतोऽपि मा बधिष्ठा इति भावः ॥ ४१ ॥ भ०

उपास्थित इत्यादि । पक्षिणैवमुक्ते सति राघवस्तं रणभङ्गानुष्ठानेन

पप्रच्छ जानकीवार्त्तां संग्रामञ्च पतत्त्रिणम् ।
ततो रावणमाख्याय द्विषन्तम् पततां वरः ॥ ४२ ॥
व्रणवेदनया ग्लायन्ममार गिरिकन्दरे ।
तस्याग्न्यस्रुक्रियां कृत्वा प्रतस्थाते पुनर्व्वनम् ॥ ४३ ॥

उपास्थित परिचितवान् संगतकरण आत्मनेपदं स्थाध्वोरिच्चेतीत्वं च्लेरङादेशादिति सिचोलोपः पितुः सखायं मम पितुः सखायमिति कृत्वा सखिशब्दाद्द्वितीयैकवचने रूपं सख्युरसम्बुद्धाविति णित्वाद्वृद्धिरायादेशः पप्रच्छ पृष्टवान् तं पत्त्रिणं जटायुं किं जनाकीवार्त्तां संग्रामञ्च तत उपस्थानानन्तरं रावणं द्विषन्तं शत्रुं आख्याय कथयित्वा रावणेन हृतां सीतेति पततां पत्त्रिणां वरो जटायुर्ममारेति परेणान्वयः ॥ ४२ ॥ ज०म०

उपेत्यादि । पत्त्रिणा एवमुक्ते सति राघवस्तं पितुः सखायं उपास्थित आराधितवान् सैवाध्वसङ्ग इति सं स्थादेर्डिःसीमे इति डिर्गुणाभावश्च झस्सादिति सिलोपः तत उपस्थानानन्तरं द्विषन्तं शत्रुं रावणमाख्याय सीता तेन हृतेति कथयित्वा पततां पत्त्रिणां वरः श्रेष्ठो जटायुर्ममारेति वक्ष्यमाणश्लोकेन सम्बन्धः ॥ ४२ ॥ भ०

व्रणेत्यादि । व्रणकृता वेदना पीडा मध्यपदलोपी समासः तया ग्लायन् ग्लानिं गच्छन् शतर्य्यायादेशः ममार मृतः क्व गिरिकन्दरे यं गिरिमन्वस्रृपत् तस्य निम्नप्रदेशे कन्दं रातीति व्युत्पत्तिमात्रं तस्य जटायोरग्न्यस्रुक्रियां दाहसदृकदानञ्च कृत्वा पुनर्भूयो वनमरण्यं प्रतस्थाते प्रस्थितौ समवप्रविभ्य इत्यात्मनेपदम् ॥ ४३ ॥ ज० म०

व्रणेत्यादि । व्रणेन या वेदना तया ग्लायन् ग्लानिं गच्छन् ममार अथ गिरिकन्दरे यं गिरिमन्वस्रृपद्रामस्तस्य निम्नप्रदेशे गुहायां वा अग्निक्रियां दाहं अस्रुक्रियां तर्पणं च कृत्वा पुनर्व्वनं प्रतस्थाते अर्थाद्रामलक्ष्मणौ प्रतिज्ञानिर्णयेत्यादिना प्रस्थो मं सृडन्ढीढ्रमिति नियमात् ढीढं । अथालम्ब्य धनूराम इत्यादिपद्यार्द्धादनन्तरं सीताविरहदुःखार्त्तः कोपसंरक्तलोचन इति यमं युनज्मि कालेनेत्यादिपद्यार्द्धादनन्तरं विनज्मि धाम सर्व्वेषां हरेच्छ्रिय सकलं जगदिति एवं वदन् दाशरथिरित्यादि पद्यार्द्धादनन्तरं जगन्नाथाय सन्नद्धस्तृणवत् स्वेन तेजसेति न्यवर्त्तयत् सुमित्राभूरित्यादिपद्यार्द्धादनन्तरं तेजःक्षात्रं विहरन्तं दिधक्षन्तमिवानलमिति तं सीतापतिनं मत्वेत्यादिपद्यार्द्धा-

सत्वानजस्रं घोरेण बलापकर्षमश्नता ।
क्षुध्यता जग्टह्राते तौ रक्षसा दीर्घबाऽहना ॥ ४४ ॥
भुजौ चक्रततुस्तस्य निस्त्रिंशाभ्यां रघूत्तमौ ।
स च्छिन्नबाऽहरपतद्विह्वलो ह्वलयन् भुवम् ॥ ४५ ॥

इति प्रकीर्णकाः ।

इनन्तरं प्रोवाच स तदा पक्षी भयाद्रामेण तर्जित इति उपास्थितैवसुक्ते तमित्यादि पद्यार्द्धादनन्तरं पप्रच्छ जानकीवार्त्तां संग्रामञ्च पतत्रिणमिति तस्याग्न्यस्त्रक्रियां कृत्वेत्यादि पद्यार्द्धादनन्तरं विराधमीयिवांसौ तां विचिन्वानावितस्तत इति पद्यार्द्धं केनचित् क्वचित् पुस्तके प्रक्षिप्तं सर्व्वमिदं प्राचीनैरुपेक्षितत्वादमूलमेव तत्रापि धान्वन्य धनूराम इत्यादि पद्यार्द्धादनन्तरं सीताविरहदुःखार्त्तः कोपसंरक्तलोचन इति पद्यार्द्धमतीवायुक्तं नशब्दाधिकारे नशब्दाभावात् ॥ ४३ ॥ भ०

सत्वानित्यादि । तौ रामलक्ष्मणौ रक्षसा राक्षसेन जग्टह्राते ग्टह्णीतौ कर्म्मणि लिट् किं नाम्ना दोर्घबाऽहना अन्वर्था चेयं संज्ञा एक एकेन बाऽहना द्वितीयोद्वितीयेन क्षुध्यता बुभुक्षमाणेन घोरेन भीमेन सत्वान् अजस्रं सदा नञ्पूर्व्वाज्जसो नाम कर्म्मेति रः अश्नता भुञ्जानेन किं कृत्वा बलापकर्षं बलादाकृष्येव पाकादिकमनपेक्ष्य अपादाने परीप्सायामिति णमुल् ॥ ४४ ॥ज०भ०

सत्वानित्यादि । तौ रामलक्ष्मणौ दीर्घबाऽहनाम्ना रक्षसा जग्टह्राते ग्टह्णीतौ कर्म्मणि ठी क्षुध्यता बुभुक्षुणा दिवादित्वात् श्यन् बलापकर्षं सत्वान् प्राणिनोऽजस्रं निरन्तरं अश्नता भक्षयता बलादपकृष्य त्वरया परिष्कारादिकमकृत्वैव पक्षच्यन्तात्त्वरायां णमिति परः स्वमते बलेनापकर्षोऽपकर्षणं यत्रेति सत्वभक्षणक्रियाविशेषणं एतेन त्वरयापरिष्कारादिकं तदपि प्राप्तं परिष्कृतत्वादौ बलहेतुत्वस्य वैयर्थ्यात् चणम्बेत्यस्य योगविभागाद्वा चणम् घोरेण भयदेन नञ्पूर्व्वाज्जसेर्हिंसदीपकस्याजसेति रः ॥ ४४ ॥ भ०

भुजावित्यादि । रघूत्तमौ रामलक्ष्मणौ तस्य योजनबाहोः बाह्व यथास्थानमागतौ चक्रततुः छिन्नवन्तौ कर्तीछेदने इत्यस्य रूपं काभ्यां निस्त्रिंशाभ्यां खड्गाभ्यां निर्गतस्त्रिंशतोऽङ्गुलिभ्य इति वाक्ये डच्प्रकरणे संख्यायास्तयुरुधस्योपसंख्यानमिति त्रिंशच्छब्दाड्डच्विधिः निरादय इति समासः टिलोपः स च्छिन्नबाऽहः छत्तभुजः सन् अपतत् पतितः पतेर्लङि रूपं लदित्वादङ् विह्वलो

अथ कृत्याधिकारः ।

प्रष्टव्यं पृच्छतस्तस्य कथनीयमवीवचत् ।
आत्मानं वनवासञ्च जेयञ्चारिं रघूत्तमः ॥ ४६ ॥

व्याकुलः भुवं भूमिं ह्वलयन् ह्वलचलने घटादित्वे ह्वस्वत्वं । इति प्रकीर्णकाः ॥ ४५ ॥ ज० म०

भुजाविति । रघूत्तमौ निस्त्रिंशाभ्यां तस्य रक्षसो भुजौ खड्गग्रहणोद्यतौ चक्रतुः कृतोऽपकर्षं त्रिंशतोऽङ्गुलीभ्योनिर्गतः निस्त्रिंशः निशः शतोऽ इति स्फूर्ते निश इति निर्हेशात् निष्प्रतन्य इत्यादिवत् ज्ञापकप्राप्तस्य षत्वस्याभावः त्रिंशतोऽङ्गुलीभ्योऽधिकं परिमाणं खड्गस्योक्तं निस्त्रिंशः करखड्गयोरिति कोषः स छिन्नबाहुः सन् भुवं ह्वलयन् कम्पयन् न्यपतत् ह्वलह्मलचाले ज्वलह्वलेत्यादिना अगेर्व्वा ह्वस्वः विह्वलो व्याकुलः । इति प्रकीर्णकाः ॥ ४५ ॥ भ०

इतः परं कृत्याधिकारः । प्रष्टव्यमित्यादि । स योजनबाहुः निहतो रामं प्रपच्छ को भवान् कस्य पुत्रः कथं तव वनवासः कस्माच्चोद्विग्नः सन् भ्रमसीति प्रष्टव्यं प्रश्नार्हं पृच्छतस्तस्य तव्यत्तव्यानीयर इति तव्यत् ब्रूञेति षत्वं टत्वञ्च रघूत्तमः इदानीं कथनीयं कथनार्हं तस्मात्मानुरूपं पूर्व्वेणानीयर अवीवचद्वक्ति स्म वचभाषणे चौरादिकः स्वार्थिकोणिच् लुङ् चङ् णिलोपह्रस्वः द्विर्व्वचनसन्वद्भावेत्वदीर्घत्वेषु रूपं किन्तदित्याह आत्मानं रामो दाशरथिरिति वनवासं पितुरादेशात् वनवासं जेयं चारिं यः कनकस्थगच्छलेन रावणः सीतामपहृतवान् ॥ ४६ ॥ ज०म०

अथ कृत्याधिकारः । खमते ल्यासव्यानीयष्णक्यप्केलिमाः । प्रष्टव्यमित्यादि । कस्त्वं कथमिहागत इत्यादि प्रश्नार्हं पृच्छतस्तस्य राक्षसस्य सम्बन्धे रघूत्तमः कथनार्हं प्रश्नानुरूपं अवीवचत् कथितवान् वचकच्सन्देशे किन्त्वाद्युरादिः जिश्रीत्यङ् अग्रडुग्रडः खः खेःसन्वत् जेर्लोपः किन्तदित्याह आत्मानं पित्रादिसम्बन्धेन वनवासं वनवासकारणमर्थात् जेयं जेतव्यमरिं शत्रुं रावणं शत्रुतावीजसहितमित्यर्थात् प्रच्छौशत्रीशे तव्ये शक्ऋाजिति षङ् शतरि तु अहस्वपाद्योरिति जिः कथत्कवाक्यप्रबन्धे हसाक्षोमोऽग्निस्त्योरित्यकारलोपेऽपि स्थानिवद्भावान्नजित्यत्रेजुङतोरिति त्रिः जेर्लोपः ते ल्याः शक्याहेति अर्ह इत्यर्थे सर्व्वत्र ल्याः ॥ ४६ ॥ भ०

लभ्या कथन्नु वैदेही शक्यो द्रष्टुं कथं रिपुः ।
सह्यः कथं वियोगश्च गद्यमेतत्त्वया मम ॥ ४७ ॥
अहं राम श्रियः पुत्रो मद्यपीत इव भ्रमन् ।
पापचर्य्यो मुनेः शापाज्जात इत्यवदत्स तम् ॥ ४८ ॥
प्रयातस्तव यस्त्वं शस्त्रपूतो ब्रवीमि ते ।

लभ्येत्यादि । कथं केन प्रकारेण उपायेन लभ्या वैदेही प्राप्या पोरदुपधादिति यत् शक्यः केन प्रकारेण द्रष्टुं शक्यः शकिसहोरिति यत् वियोगश्चायं सीतायाः कथं केन प्रकारेण सह्यः सोढव्यः रुकिसहोरेति यत् गद्यमेतत् कथनीयमेतत् गदमदेत्यादिना यत् ममेति शेषविवक्षायां षष्ठी त्वं पुनः कः इति पृष्ट आह ॥ ४७ ॥ ज० म०

लभ्येत्यादि । इत्यपि अवीवचदिति सम्बन्धः नु प्रश्ने कथं वैदेही लभ्या रिपूरावणः कथं द्रष्टुं शक्यः अज्ञातदेशत्वात् कथं वियोगः सीताया इत्यर्थात् सह्यः एतत्सर्वं त्वया मम सम्बन्धे गद्यं वाच्यं लभङ्क्षौङ्शप्राप्तौ शकयञ्शकि क्त्वनशक्तौ सहङ्मर्षे एभ्यः पूशकसहेत्यादिना यः गदभाषे इत्यस्मात् गदमदयमेति यः त्वयेति त्यभावक्तेति कर्त्तुः षष्ठी निवृत्तिपक्षे तृतीया ॥ ४७ ॥ भ०

अहमित्यादि । हे राम अहं श्रियः पुत्रः मद्यपीत इव वाहिताग्न्यादित्वान्निष्ठान्तस्य परनिपातः कार्य्याकार्य्यविवेकाभावात्पापचर्य्यो राक्षसः मुनेः स्थूलशिरसः शापाज्जात उत्पन्नः माद्यत्यनेनेति मद्यं चरितव्यं चर्य्यमेतौ पूर्ववद्यत्प्रत्ययान्तौ पापं चर्य्यं यस्येत्यवदत् स योजनबाहुस्तं रामं वाक्यार्थोऽत्र कर्म्म ॥ ४८ ॥ ज० म०

अहमित्यादि । इति स योजनबाहुस्तं रामं अवदत् किन्तदित्याह हे राम अहं श्रियोऽप्यरसः पुत्रः मद्यपीतः पीतमदिर इव भ्रमन् कार्य्याकार्य्यविवेकशून्यत्वात् कृतापराधो मुनेः स्थूलशिरसः शापात् पापचर्य्यः पापहेतुकर्म्मा राक्षसो जातः एतत् कथनं तद्वाक्ये रामप्रीत्यर्थं मदीभिर्यञ्जिहर्षे मद्यतेऽनेनेति मद्यं अभिधानात् गदमदयमेत्यादिना ढभावे विहितोऽपि यः करणे पीतं मद्यं येनेति अग्नाहितादित्वात् क्तान्तस्य वा परनिपात इति रः स्मरते गमकत्वात् पापं चर्य्यं चरणीयं यस्य गदमदयमचरेति यः ॥ ४८ ॥ भ०

प्रयात इत्यादि । इदानीं तव यस्त्वं बध्यत्वं प्रयातः यमेः पूर्ववत् यत् शस्त्रपूतस्त्व शस्त्रेण पावितः सन् देवीभूतो ब्रवीमि ते तुभ्यं कथयामि

रावणेन हृता सीता लङ्कां नीता सुरारिणा ॥ ४९ ॥
ऋष्यमूकेऽनवद्योऽस्ति पण्यभ्रातृबधः कपिः ।
सुग्रीवो नाम वर्य्योऽसौ भवता चारुविक्रमः ॥ ५० ॥

युष्मदस्तुर्य्येकवचनस्य तेमयावेकवचन इति ते आदेशः क्रियायोगे चतुर्थीं कथनीयमाह रावणेन सुरारिणा हृता सीता लङ्कां नीता ॥ ४९ ॥ ज० भ०

प्रयात इत्यादि । इदानीं तव यस्त्वं बध्यत्वं प्रयातः प्राप्तः सन् तव शस्त्रेण पूतः पापान्निर्मुक्तः पूर्व्वदशां लब्ध्वा ते तुभ्यमहं ब्रवीमीति तादर्थ्ये चौ यमेः पूर्व्वेण यः पूल्लिगुदित इत्यनेन वेमत्वात् नेमडीश्वीदिद्वेम इति पूङः क्त्वावत्वोरनिमत्वं वचनीयमाह रावणेन सुरारिणा सीता हृता लङ्कां नीता प्रापिता च एतेन लङ्कायां रिपुर्द्रष्टव्य इति शक्योद्रष्टुं रिपुः कथमित्यत्रोत्तरमुक्तम् ॥ ४९ ॥ भ०

वैदेही प्राप्या कथमिति यमुपेत्य पृष्टवान् तं कथयन्नाह ऋष्यमूक इत्यादि । ऋष्यमूकपर्व्वते सुग्रीवोनाम कपिः चारुविक्रमो महापराक्रमोऽस्ति असौ भवता वर्य्योवरणीयः प्रार्थनीयः वर इच्छायामिति चौरादिकाद्यत् यद्वा अवद्यपण्येत्यत्र दृजो वर्य्येति स्त्रियामनिरोधे अनिरोधा सततप्रवर्त्तनी वर्य्या प्रीतिर्यस्येत्यर्शआद्यच् भवता सहवर्य्यः प्रीतिमान् समानव्यसनत्वात् यतः पण्यभ्रातृबधः सः पण्योविक्रेतव्यो भ्रातुर्वालिनोबधोयेन यद्येवं तदा कथं मया पापीयान् वर्य्यइत्यत आह अनवद्यः अगर्हणीयः दारापहारित्वेन आततायिनोभ्रातुर्बधेन निर्दोषत्वादिति भावः ॥ ५० ॥ज० म०

ऋष्येत्यादि । लभ्या कथं नु वैदेहीत्यत्रोत्तरमिदं सुग्रीवो नाम कपिर्ऋष्यमूकनामपर्व्वते अस्ति असौ सुग्रीवोभवता वर्य्यः वरणीयः यतश्चारुविक्रमः अनुपकारकेण मया हृतोऽसौ मत्कार्य्यं कथं साधयिष्यतीत्याह पण्यभ्रातृबधः पण्योविक्रेतव्यो भ्रातुर्वालिनो बधो येन भवता वालिबधं कारयित्वा सीतोद्धारं करिष्यतीति भावः पण्यतुल्यत्वात्पण्यव्यपदेशः तर्हि पापात्मनस्तस्य वरणमनुचितं नच तद्वचनेऽपि विश्वास इत्यत आह अनवद्यः अनिन्द्यः दारापहारित्वेनाततायिनो भ्रातुर्बधे निर्दोषत्वात् नञ्पूर्व्वोवदिः प्रणङ्व्यवहृतौ स्तुतौ वृजगसम्भक्तौ एषां यान्तानां पण्यवद्यवर्य्येत्यादिना निपातनात् तथा रूपं केचित्तु वरत्केप्से इत्यस्मात्तव्यानीयया इति ये वर्य इति रूपमित्याहुः ऋषयोऽमूका अध्ययनशीला यत्र स ऋष्यमूकः मूर्द्धन्यषकारवानयं ऋष्यो ऋगविशेषो मूको-

तेन वह्नेन हन्तासि त्वमर्य्यं पुरुषाग्निनाम् ।
राक्षसं क्रूरकर्म्माणं शक्रारिं दूरवासिनम् ॥ ५१ ॥
आस्ते स्मरन् स कान्ताया हृताया बालिना कपिः ।
दृषो यथोपसर्य्याया गोष्ठे गोर्दण्डताडितः ॥ ५२ ॥

यत्नेति वा बलदश्याद्यस्यलीति यमकात् तालव्यशकारवानिति केचित् केचित्तु ऋक्षोऽद्रिभेदे भल्लूके इति विश्वप्रकाशे एकदेशेनापि संज्ञा गम्यत इति न्यायात् ऋक्षमूक इत्येव संज्ञामाहुः नामेति प्रकाश्यसम्भावनाक्रोधाभ्युपगमेष्वव्ययं अन्यथा भेदके तृतीया स्यात् ॥ ५० ॥ भ०

तेनेत्यादि । तेन सुग्रीवेण त्वं राक्षसं हन्तासि, निहनिष्यसि वह्नेन वहत्यभिप्रेतमनेनेति वह्नं करणमिति यत् कीदृशमर्य्यं स्वामिनं पुरुषाग्निनां राक्षसानां अर्य्यः स्वामिवैश्ययोरिति यन्निपात्यते क्रूरकर्म्माणं पापाचारं शक्रारिं रावणं यद्येवमहमेव हन्तुं समर्थ इत्यभिप्रायेणाह दूरवासिनं समुद्रान्तरितवासित्वात् एकाकिना हन्तुं न शक्यत इति भावः ॥ ५१ ॥ ज० म०

तेनेत्यादि । तेन सुग्रीवेण त्वं राक्षसं रावणं हन्तासि स्वांरूपं वह्नेन उह्यतेऽर्थोऽनेनेति वह्नस्तेन कीदृशं पुरुषाग्निनां राक्षसानां अर्य्यं स्वामिनं क्रूरकर्म्माणं पापाचारं शक्रस्यापि अरिं एतेन दुर्ज्जयत्वं दर्शितं दूरे वसन्तं एतेन समुद्रान्तरितत्वात् सहायं विना न हन्तुं शक्यत इति भावः वहैऔ प्रापणे ऋलिगत्यां अनयोः पूर्व्वेण निपातः ॥ ५१ ॥ भ०

यद्यनवद्यस्तदा कथमस्य प्रणयोभ्रातृवध इत्याह आस्ते इत्यादि । बालिना हृतायाः कान्तायाः स्मरन्नास्ते कोऽन्यः समर्थः स्यात् यस्तं हत्वा त्वया मां योज्यते अधीगिति कर्म्मणि षष्ठी कस्येव दृषो यथा उपसर्य्याया आसन्नप्रसवाया गोः स्मरन् गोष्ठे आस्ते उपसर्य्याकाल्याप्रजन इति निपातितं दण्डताडितः सन् दण्डस्थानीयोऽत्र बाली ॥ ५२ ॥ ज० म०

आस्त इत्यादि । तुल्ययोः सख्यनैविद्यसूचनाय प्रणयभ्रातृवधत्वादोषदर्शनाय वा इदमाह स कपिः सुग्रीवो बालिना हृतायाः कान्तायाः स्मरन् आस्ते कुतो मया सा लब्धव्येति कर्म्मणि षष्ठी यथा उपसर्य्याया आसन्नगर्भग्रहणाया गोः स्मरन् दृषो गोष्ठे गोस्थाने दण्डेन ताड़ितः सन् तिष्ठति तद्वत् दण्डतुल्योऽत्र बाली उपलक्ष्यते दृषभेण गम्यते उपसर्य्या ऋतुमत्यां प्रणयावद्येत्यादिना निपात्यते ॥ ५२ ॥ भ०

तेन सङ्गतमार्य्येण रामाजर्य्यं कुरु द्रुतम् ।
लङ्कां प्राप्य ततः पापं दशग्रीवं हनिष्यसि ॥ ५३ ॥
अनृतोद्यं न तत्रास्ति सत्यवद्यं ब्रवीम्यहम् ।
मित्रभूयं गतस्तस्य रिपुहत्यां करिष्यसि ॥ ५४ ॥

तेनेत्यादि । हे राम तेन वानरेण संगतं सख्यं अजर्यं अमपार्यं न जीर्यत इत्यस्मिन् वाक्ये अजर्यं संगतमिति निपातितं आदौ विशेष्यस्योपात्तं संगतं तद्विशेषणमजर्यं कुरु द्रुतं यावत्तस्थानेन युष्मद्विधेन संगतं न भवति आर्य्येण सदाचारेण कृतलोकार्य्यत् ततः सङ्गतात् लङ्कां प्राप्य गत्वा पापं पापीयांसं रावणं हनिष्यति ॥ ५३ ॥ ज० म०

तेनेत्यादि । हे राम तेन सुग्रीवेण सह द्रुतं शीघ्रं अजर्यं मैत्रीं कुरु कीदृशं सङ्गतं समयक्रमेण उचितं सङ्गतपदस्य सख्यवाचित्वेऽजर्यस्य तथार्थत्वाद्वैयर्थ्यं स्यात् केचित्तु सुग्रीवेण सह सङ्गतं सख्यं कुरु कीदृशं अजर्यं अनपायं सङ्गतार्थस्यापि अजर्यशब्दस्योपचारादन्यत्र प्रवृत्तिरित्याहुः न जीर्यतीत्यजर्यं सङ्गतं पूर्ववद्विपातितं स्नेहोमैत्रीप्रीतिरजर्यसभाजनसङ्गतं प्रोक्तमिति हलायुधः आर्य्येण सदाचारेण ऋधातोर्हृषासोरिति घ्यणि रूपं आरात् पापेभ्योदूरे यातीति आर्य्य इति केचित् तदा मनीषादिः द्रुतशब्देन यावद्भवद्विधेनान्येन सह तस्य सख्यं न जातमिति व्यज्यते ततः सङ्गतानन्तरं लङ्कां प्राप्य दशग्रीवं पापं त्वं हनिष्यसि स्वसङ्गेन हतीम् ॥ ५३ ॥ भ०

ननु यावत्कार्यं न सिध्यति तावन्मां सङ्गच्छति कृतकृत्यस्तु नैवेत्यत आह अनृतोद्यमित्यादि । सत्यमुद्यत इति कर्मणि यत् अहं सत्यं वचो ब्रवीमीत्यर्थः अनृतोद्यं तत्र सुग्रीवे नास्ति अनृतमसत्यं उद्यं वचनं अनृतोद्यं भावे क्यप् यजादित्वात्प्रसारणं उभयत्रापि वदः सुपि क्यप् चेति चकाराद्यस्मादेवं तस्मान्मित्रभूयं मित्रभावं गतः भुवो भावे क्यप् रिपुहत्यां शत्रुहत्यां करिष्यसि हनस्तचेति क्यप् तकारस्यान्तादेशः ॥ ५४ ॥ ज० म०

अनृतोद्यमित्यादि । स्वकार्यं साधयित्वा यदि मामुपेक्षते तदा किं स्यादित्याह अहं सत्यवद्यं सत्यवचनं ब्रवीमि तत्र सुग्रीवेऽनृतोद्यं मिथ्यावचनं नास्ति यदैवाचि लेर्ब्दः क्यपयाविति क्यप् अहरवपाद्योरिति जिः तस्मात्तस्य सुग्रीवस्य मित्रभूयं मित्रभावं गतः सन् रिपुहत्यां शत्रुवधं करिष्यसि भूहनः क्यप्भावे गतश्चेति क्यप् नस्य तस्य लिङ्गभेदोऽभिधानात् ॥ ५४ ॥ भ०

आदृत्यस्तेन दृत्येन स्तुत्यो जुष्येण सङ्गतः ।
दृत्यः शिष्येण गुरुवन्नृध्यमर्थमवाप्स्यसि ॥ ५५ ॥
नाखेयः सागरोऽप्यन्यस्तस्य सद्भृत्यशालिनः ।
मन्युस्तस्य त्वया मार्ग्यो वध्यः शोकश्च तेन ते ॥ ५६ ॥

आदृत्य इत्यादि । तेन संगतः सन् गृध्यमभिलषणीयमवाप्स्यसि ऋदुपधादिति क्यप् कीदृगः कीदृशेनेत्याह आदृत्यः आदरणीयः दृत्येन वरणीयेन स्तुत्यः स्तवार्हः जुष्येण सेव्येन हनूमत्प्रभृतीनां क इव शिष्येण गुरुरिव यथोपाध्यायः शिष्येणकार्थः अनुगम्यस्तद्वदिति एतिस्तुशास्त्यादिना क्यप् हस्वान्नात्तुक् ॥ ५५ ॥ ज० म०

आदृत्य इत्यादि । न केवलं रिपुहननमन्यदध्यस्तीत्याह तेन शिष्येणेव गुरुरिव त्वं सङ्गतः सन् गृध्यमाकाङ्क्षणीयमर्थमवाप्स्यसि त्वं कीदृशस्तेन वा कीदृशेन आदृत्य आदरणीयः दृत्येन वरणीयेन स्तुत्यः स्तवार्हः जुष्येण सेवार्हेण जनानामर्थात् तेन तुल्ययोरुभयोः सङ्गतं योग्यं दृत्यः अनुगन्तव्यः अर्थात्तेन भवतोगुरुत्वेन तस्य शिष्यत्वेन मैत्रीकरणेऽपि न ते मानहानिरिति सूचितं दृङ्गादरे दृञदृतौदृञ्छ्रुस्तुतौ शकीञिजुषस्तृदिसेवे दृणगतौ शासुच्छ्रुशासने गृधिर्यृलिप्से एभ्योदृभ्रुजुषेत्यादिना क्यप् स्वस्य तनूपिति ॥ ५५ ॥ भ०

नाखेय इत्यादि । तस्य सुग्रीवस्य सद्भृत्यशालिनः हनूमदादिभृत्ययुक्तस्य भृञोऽसंज्ञायामिति क्यप् अन्योद्वितीयः सागरोऽपि नाखेयो न खननीयः अपितु खननीयएव अपिशब्दः सम्भावनायां तस्य कारणं सद्भृत्यशालित्वं ईचखन इति व्यवीकारौ तस्य शरीरस्य मन्युस्त्वया मार्ग्योऽपनेयः ते तव तेन च शोकोऽज्यः अजेर्विभाषेति यद्विकल्पे ण्यत् ॥ ५६ ॥ ज० म०

नाखेय इत्यादि । हनूमदादिसद्भृत्यशालिनस्तस्य सुग्रीवस्य अन्योऽपि सागरो न अखेयः अपि तु शक्यखनन एव एतेन तन्मैत्रं बद्धसंहायत्वं समुद्रलङ्घनमपि सुकरमिति सूचितं खनुङ्विदारे खनाखेरेवे इति टेरेत्वं तस्मात् प्रथमं त्वया तस्य मन्युर्दैन्यं मार्ग्यो मार्ज्जनीयः पश्चात्तव शोकस्तेन अज्यः अपनेयः एतेन सद्भृः कथं वियोगसेत्रोत्तरं दत्तं सुग्रीवेणाचिरादेव वियोगापनयात् अपिशब्दः सम्भावनया अजलूषगुदौ डदवदजेति वा क्यप् पक्षे हस्वयोरिति घ्यण् चजोःकगौधितीति गत्वं अजोऽकङितीति त्रिः ॥ ५६ ॥ भ०

स राजसूययाजीव तेजसा सूर्य्यसन्निभः ।
अष्टषोद्यं वदन् रुच्यो जगाहे द्यां निशाचरः । ५७ ॥
अक्लृप्तपच्याः पश्यन्तौ ततो दाशरथी लताः ।
रत्नान्नपानकुप्यानामाटतुर्नष्टसंस्तुती ॥ ५८ ॥
सस्तुत्तरन्तावव्यथ्यौ नदान् भिद्योद्भ्रसन्निभान् ।

स इत्यादि । स निशाचरो द्यामाकाशं जगाहे गतः राजसूययाजीव राज्ञा सूयते राजा वा अनेन सूत इति राजसूयः क्रतुः तेनेष्टवान् स राजसूय-याजी करणे यज इति णिनिः तद्वदित्यर्थः रुच्यः प्रियोजातो रामस्येत्यर्थात् राजसूयसूत्यादिना क्यवन्तो राजसूयादयः ॥ ५७ ॥ ज० भ०

स राजेत्यादि । इत्येवमष्टषोद्यं स त्यवचनं वदन् स निशाचरो योजन-बाहुर्द्यां स्वर्गं आकाशं वा जगाहे गतः राजसूयनामयज्ञकर्त्तेव तेजसा सूर्य्यत-ुल्यः रुच्यः रामस्य रुचिविषयः प्रिय इति यावत् सुजनसन्धाक्लेदपीडामन्थे राज्ञा सूयते सोमोऽनेति राजसूयः पाय्यधार्य्येत्यादिना निपातितः राजसूयेन यजते राजसूययाजी यज्ञादित्वात् णिन् सरतीति सूर्य्योऽर्कः रोचते रुच्यः एतौ गट्ह्युविनीयेत्यादिना निपातितौ सूर एव सूर्य्यः स्वार्थेय इति गोयीचन्द्रः नञ्पूर्व्वष्टषाशब्दाद्देर्नित्यं क्यप् ष्टषोद्यं नित्यमित्युतेः ॥ ५७ ॥ भ०

अक्लृप्तपच्या इत्यादि । ततो निशाचरगमनानन्तरं दाशरथी रामलक्ष्मणा-वाटतुर्गतवन्तौ कीदृशौ नष्टा संस्तुतिर्ययोः केषां संस्तुतिः रत्नान्नपानकुप्यानां रत्नान्नपानानि प्रसिद्धानि कुप्यं स्वर्णरजताभ्यामन्यत् वस्तु तत् क्यप् गकारस्य ककारः कर्म्मणि षष्ठी लताः पश्यन्तौ क्लृप्ते पच्यन्ते इति क्लृप्तपच्याः पूर्व्ववत् क्यप् पश्चान्नञ्समासः स्वयमेव पच्यन्ते यास्ता इत्यर्थः ॥ ५८ ॥ ज० भ०

अक्लृप्तेत्यादि । ततस्तद्गमनानन्तरं लताः पश्यन्तौ दाशरथी रामलक्ष्मणौ व्याटतुः व्यटगतौ लताः कीदृश्यः अक्लृप्तपच्याः क्लृप्ते चेते स्वयमेव पच्यन्त इति क्लृप्तपच्याः पूर्व्वेण निपातः पश्चान्नञ्समासः कीदृशौ रत्नानां अन्नस्य पानस्य कुप्यानां ताम्रादीनाञ्च नष्टा सम्यक् स्तुतिर्ययोः गुणभूतापि क्रिया साधनसम्बन्धमनुभवतीति कर्म्मणि षष्ठी रुम्बन्धविवक्षयेत्यन्ये कुप्यत इति कुप्यं स्वर्णरूप्याभ्यामन्यद्वस्त्रं पूर्व्ववन्निपातः ॥ ५८ ॥ भ०

सस्तुत्तरन्तावित्यादि । तौ तस्मिन् वने शबरीमापतुः प्राप्नवन्तौ अव्यथौ न व्यथेते इति पूर्व्ववत् क्यप् परिश्रमवर्जितावित्यर्थः नदान् सस्तुत्तरन्तौ कीदृ-

सिध्यतारामिव ख्यातां शवरीमापतुर्वने ॥ ५९ ॥
वसानां वल्कले शुद्धे विपूयैः कृतमेखलाम् ।
श्यामामञ्जनपिण्डाभां दण्डिनीमजिनास्तराम् ॥ ६० ॥

शान् भिद्योद्यसन्निभान् भिद्योद्यौ नदविशेषौ भिद्योद्याविति पूर्ववत् निपातितं भिनत्ति कूलमिति भिद्यः उज्झत्युदकमिति उद्यः उद्झउत्सर्गे दकारात्परस्य धकारो निपात्यते तत्सदृशान् नदान् सिध्यतारामिव ख्यातां सिध्यन्त्यस्मिन्निति सिध्यः पुष्यसिध्यौनक्षत्रे इति निपातनात् पुष्याख्यां तारामिव ख्यातां शवरीम् ॥ ५९ ॥ ज० म०

सशुक्तरन्नावित्यादि । तौ वने शवरीमापतुः प्राप्नवन्नौ न व्यथेते अव्यथ्यौ नदान् सशुक्तरन्नौ कीदृशान् भिद्योद्यसन्निभान् कूलं भिनत्तीति भिद्योनदः वार्युज्झतीति उद्यो नदः तयोस्तुल्यान् शवरीं कीदृशीं सिध्यतारामिव कार्यप्रसाधकत्वात् ख्यातां प्रसिद्धानुभवां कार्यं साधयतीति सिध्या सर्व्वत्र गृह्यविनीयेत्यादिना निपातः ॥ ५९ ॥ भ०

वसानामित्यादि । वसानां परिदधानां वल्कले विपूयैर्मुञ्जैः कृतमेखलां कृतकटिसूत्रां यद्यपि विपूर्व्वस्य पवतेर्विपूय इत्यादिना सुञ्जे निपातितं तथापि सुञ्जानामनुपहृतत्वं ज्ञापयितु विपूयैरिति विशेषणं पवित्रैरित्यर्थः सुञ्जशब्दस्तदानीं सामान्यमाह विपूयैरित्युक्ते सुञ्जैरित्युपादानमनर्थकं एवं कृत्वा पाठान्तरमुच्यते वसानां वल्कले शुद्धे विपूयैरिति श्यामां कृष्णां श्यायोम इति निङागमत्वं अञ्जनपिण्डस्येवाभा यस्या अस्तीति तां कृष्णां दण्डिनीं गृहीतदण्डां आस्तीर्यत इति आस्तरः कृदोरप् अजिनमास्तरउत्तरासंगोयस्यास्तामजिनास्तराम् ॥ ६० ॥ ज० म०

वसानामित्यादि । दृष्ट्वा तामसुचद्वाम इति तृतीयश्लोकेनान्वयः शुद्धे वल्कलद्वयं वसानां वसलङस्तृतौ स्तृतिराच्छादनं विपूयैर्मुञ्जैः कृतमेखलां कृतकटीसूत्रां पूङश्चोधे पूर्व्ववन्निपातः शुद्धे इत्यत्र सुञ्जैरिति पाठे विपूयैरित्यस्य पवित्रैरित्यर्थः यद्यपि विपूयशब्दो सुञ्जे रूढस्तथाप्यन्वयवशात् पवित्रार्थः श्यामां व्रतेन क्षीणां क्षैशुष्यचोमकव इति क्षस्य मः अञ्जनपिण्डवदाभा यस्यास्तां तद्वदाभातीति वा दण्डिनीं पलाशदण्डवतीं अजिनमास्तरः शयनीयं यस्याः आस्तर उत्तरासङ्ग इति केचित् ॥ ६० ॥ भ०

प्रगट्ह्य पदवत् साध्वीं स्पष्टरूपामविक्रियाम् ।
अगट्ह्यां वीतकामत्वादेवगट्ह्यामनिन्दिताम् ॥ ६१ ॥
धर्म्मैकृत्यरतां नित्यमदृष्यफलभोजनाम् ।
दृष्ट्वा तामसुचद्रामो युग्यायात इव अमम् ॥ ६२ ॥

प्रगट्ह्येत्यादि । अविक्रियामजातविकारां अतएव स्पष्टरूपां एवञ्च साध्वीं साधुचरितां कमिव प्रगट्ह्यपदवत् यस्य पदस्य प्रगट्ह्यसंज्ञा तत्पदं प्रगट्ह्यं प्रत्यपिभ्यां यक्षेरित्यनुवृत्तौ पदास्वैरित्यादिना प्रपूर्वाद्यक्षेः पदेऽभिधेये क्यप् यथा तत्पदमविकाररूपत्वात् स्पष्टं साधु च श्रुतप्रगट्ह्या अचीति प्रकृतिभावेन खरसन्धप्रभावादित्यर्थः कथमजातविक्रियेति चेदाह अगट्ह्यां यक्षेः स्वैरविषये क्यप् अगट्ह्यामस्वैरिणीमस्वतन्त्रा नभवतीत्यर्थः कस्मात् वीतरागत्वात् वीतरागाप्यस्वतन्त्रा भवति देवगट्ह्याममरपत्नीं पत्न्यविषये क्यप् एवं चानिन्दितामगर्हितां ॥ ६१ ॥ ज० म०

प्रगट्ह्येत्यादि । नास्ति विक्रिया रागादिविकारो यस्यास्तामविक्रियां स्पष्टं अकौटिल्यं व्यक्तं रूपं स्वभावो यस्यास्तां स्पष्टरूपां साध्वीं साधुचरितां अतएव प्रगट्ह्यपदतुल्यां यत्र नाजोन्तोऽनाङ्गिप्लुचेत्यादिना सन्धिनिषेधः क्रियते तत्र पाणिनिना प्रगट्ह्यसंज्ञाकृता गट्ह्यविनोयेत्यादिना पदादौ गट्ह्यं निपातितं पदादिविषयस्तूदाहरणेऽभिहितः तथाहि प्रगट्ह्यं पदमित्यादि तदपि पदं विकाररहितं अतएव स्पष्टरूपं दीर्घादिविकारे सत्येव रूपस्यान्यथाभावात् साधु च भवति अर्थप्रतिपादकत्वं धर्म्मजनकत्वं व्याकरणव्युत्पाद्यत्वं वा पदस्य साधुत्वं अविक्रियत्वे हेतुमाह अगट्ह्यां स्वतन्त्रां विगतकामत्वात् सरागा हि भोगार्थं परतन्त्रा भवति गट्ह्या परतन्त्रा पश्चान्नञ्समासः देवगट्ह्यां देववर्ग्यां देवपत्न्यामिनीं अतएवानिन्दितां वीतकामत्वादित्यत्र पूर्वं स्त्रीत्वाविवक्षया त्वप्रत्ययः स्त्रीत्वविवक्षा चेत् पुंवत्स्त्रुक्त इति पुम्वद्भावः ॥ ६१ ॥ भ०

धर्म्मैकृत्यरतामित्यादि । पुण्यकर्म्मरतां नित्यं अदृष्यफलभोजनां दृष्याणीन्द्रियविकारनिमित्तानि फलानि भोजनं यस्याः पश्चान्नञ्समासः विभाषाकृदृषोरिति क्यप् दृष्ट्वा तां तथाविधां अममसुचत् सुक्तवान् तद्दर्शनाह्लादितत्वात् युग्यायात इव वाहनं प्राप्त इव क्यप् युग्यञ्च पत्र इति निपातितम् ॥ ६२ ॥ ज० म०

धर्म्मेत्यादि । नित्यमविरतं धर्म्मस्य कृत्ये करणे रतां दृष्यं वैद्यशास्त्रोक्तवीर्य्यकरं विकारोत्पादकं तद्भिन्नं फलमेव भोजनं यस्याः युज्यतेऽनेनेति वेति

स तामूचेऽथ कच्चित्त्वममावास्यासमुन्नये ।
पितॄणां कुरुषे कार्य्यमवाच्यैः स्वादुभिः फलैः ॥ ६३ ॥
अवश्यपाव्यं पवसे कच्चित्त्वं देवभाग्घविः ।
आसाव्यमध्वरे सोमं द्विजैः कच्चिन्नमस्यसि ॥ ६४ ॥

घञलनटोऽधे इति अनट् तेन भोजनं यस्या इति वा क्रञदुदक्रतौ दृषुसेचने आभ्यां क्रदृषस्रजेत्यादिना वा क्यप् एवम्भूतां तां श्वश्रूं दृष्ट्वा चित्तप्रसन्नतया रामः श्रमसमुचत् त्यक्तवान् सुचृशजेभोक्षे क्तदित्वात् ङः युगेन वाहनेनाश्वादिना आगत इव रट्हुविनीयेत्यादिना युजः क्यपि युगंत्र निपातितम् ॥६२॥ज०

स इत्यादि । अथानन्तरं त्यक्तश्रमः स रामस्तां श्वश्रूमूचे उक्तवान् कच्चित् किं त्वं अमावास्यायाः सम्माप्तौ पितॄणां कार्यं तव प्रीत्यर्थं ब्राह्मणभोजनं स्वादुभिर्मिष्टैः फलैः अवाच्यैरवचनीयैः कुरुषे अमा सह वसतोऽस्यां चन्द्रार्काविति अमापूर्वकवसधातोः क्यप् ॥ ६३ ॥ ज० म०

स तामित्यादि । अथ श्रमत्यागानन्तरं स रामस्तां श्वश्रूं ऊचे कथितवान् मुलञऽङौ वचोऽरे कच्चिदिति कामप्रवेदनेऽव्ययं त्वं फलैरमावास्यायास्तिथेः सम्प्राप्तौ सम्प्राप्तौ पितॄणां सम्बन्धि कार्यं कुरुषे कीदृशैः फलैः अवाच्यैः अनिन्द्यैः स्वादुभिर्मिष्टैः अमा सहार्थेऽव्ययं सहवसतोऽस्यां चन्द्रार्कावित्यमावास्या यद्वा अमा नाम रवेरश्मिः सूर्यलोके प्रतिष्ठिता । तस्यां सोमोवसत्यस्यामावास्या प्रकीर्त्तिता । पाय्यधाय्येत्यादिना घ्यण निपातः क्रदृषस्रजेत्यस्याप्रवृत्तिपक्षे क्रञोहस्वृवासोरिति घ्यण् वाच्यं वचनीयं निन्द्यमेव रूढं भुजवचेति घ्यणि कत्वनिषेधः ॥ ६३ ॥ भ०

अवश्यपाव्यमित्यादि । देवभाक् देवान् भजत इति भजोखिः तद्भविः कच्चित् किं पवसे पवित्रीकरोषि सन्त्वादिना भयोहोऽन्यतरस्यामिति हकारस्य पूर्वसवर्णः पूजपवन इति भौवादिकः कीदृशमवश्यपाव्यमवश्यम्भावेन पावयितव्यमित्यर्थः ओरावश्यके ण्यत् मयूरव्यंसकादित्वात्समासः लुम्मेदवश्यमः क्रत्वेतुंकाममनसोवनीति मकारलोपः सोममौषधिविशेषं आसाव्यमभिषवार्हं अध्वरे यज्ञे द्विजैः सह कच्चित्त्वं नमस्यसि आसुपुवपीति यत् ॥६४॥ ज० म०

अथेत्यादि । कच्चित्त्वं देवभाग्घविर्हिंव्यं पवसे अग्निसंस्कारादिना पवित्रीकरोषि देवाय दातुमित्यर्थात् देवान् भजत इति ढाङ्गजवहसहोविण् ग्रहोसयाहेति हस्य धत्वं हविः कीदृशं अवश्यपाव्यं अवश्यम्भावेन पवित्रं पवित्रीकर्त्तुं

आचाम्यं सन्ध्ययोः कच्चित् सम्यक्तेन प्रहीयते ।
कच्चिदग्निमिवानाय्यं काले सम्मन्यसेऽतिथिम् ॥ ६५ ॥
न प्रणाय्यो जनः कच्चिन्निकाय्यं तेऽधितिष्ठति ।
देवकार्य्यविघाताय धर्म्मद्रोही महोदये ॥ ६६ ॥

योग्यं प्रभृतीभ्यणोरावश्यक इति घ्यण् णिजत्यन्तेजुङतोरिति त्रिः ओदौतोऽव्यक्तक्रियाद्यक्यङ्या इति अव्यङ्भावात् जलायवायाव इति आवादेशः क्रियाविशेषणस्य द्वितीयान्तत्वात् तत्पुरुषः समासः द्यादित्यन्तपूर्व्वदानां षसंज्ञा इति सामान्योक्तेः मयूरव्यंसकादित्वात् समास इति न्यासः सम्तुम्मनःकामेऽवश्यमित्यादिना मलोपः कच्चित् त्वं द्विजैः सार्द्धं सोमं लताविशेषं नमस्यसि नमःकरोषीति नमस्तपोवरिव इति क्यः सोमं किम्भूतं अध्वरे योगे आसाव्यं अभिषवनीयं सन्धानार्हं हसृग्वासोरिति घ्यण् द्विजैरासाव्यमिति वान्वयः ॥ ६४ ॥ भ०

आचाम्यमित्यादि । प्रभातेऽपराह्णे च सन्ध्ययोर्यदाचाम्यस्मपस्पर्शनं पूर्व्ववत् यत् कच्चित्सम्यक् यथावत्तव तत्र न प्रहीयते काले आतिथ्योक्तकाले कच्चित् संमन्यसे पूजयसि यथा अग्निं आनाय्यम् मन्यसे तद्वत् आनाय्योनित्य इति नयतेराङ्पूर्व्वस्य यत् अयादेशौ निपात्येते ॥ ६५ ॥ ज० म०

आचाम्यमित्यादि । कच्चित्ते तव सायं प्रातः सन्ध्ययोः सम्यगाचाम्यं आचमनं स्वयमेव न प्रहीयते न भ्रश्यते कर्म्मकर्त्तरि प्रत्ययः पूषकसहेत्यादौ चमादिवर्ज्जात् हसन्तत्वाद्घञ् जनबधः सेम इत्यादौ आचमवर्ज्जनान्न हुखः कच्चित् त्वं काले आतिथ्योचिते अतिथिं सम्मन्यसे पूजयसि यथा आनाय्यमग्निं दक्षिणाग्निं सम्मन्यसे तद्वत् आङ्पूर्व्वस्य णीञोघ्यणि पाय्यधाय्येत्यादिना निपातः ॥ ६५ ॥ भ०

न प्रणाय्य इत्यादि । महानुदयः स्वर्गापवर्गाणां यस्याः सा तथा हे महोदये देवकार्य्यविघाताय देवानर्हं हनिष्यामीति भाववचनाच्चेति भविष्यति घञ् तुमर्थाच्चभाववचनादिति चतुर्थी प्रणाय्योऽसम्मतोजनः प्रणाय्योऽसम्मताविति निपातितं कच्चित् निकाय्यं गृहं ते तव नाधितिष्ठति नाधिवसति प्राय्येत्यादिना निवासे चिनोतेर्निपूर्व्वात् घ्यदायादेशौ आदेः कुत्वञ्च अधिशीङ्स्थासां कर्म्मेति कर्म्म धर्म्मद्रोही धर्म्मद्रोहशीलः ॥ ६६ ॥ ज० म०

नेत्यादि । हे महोदये कच्चित् प्रणाय्योऽसम्मतो जनश्चौरादिस्ते तव निकाय्यं निवासं देवकार्य्यविघातार्थं नाधितिष्ठति धर्म्मद्रोही धर्म्मद्रोहशीलः

कुण्डपाय्यवतां कञ्चिदग्निचित्यावतां तथा ।
कथाभीरमसे नित्यमुपचाय्यवतां शुभे ॥ ६७ ॥
इति क्रत्याः ।

अथ प्रकीर्णकाः ।

वर्द्धते ते तपो भीरु व्यजेष्टा विघ्ननायकान् ।
अजैषीः कामसंमोहौ संप्राप्था विनयेन वा ॥ ६८ ॥

धर्म्माय द्रुह्यतीति यज्ञादित्वाद्यिन् धर्म्मद्रोहोऽस्यास्तीति वा प्रपूर्व्वणीजोण्यिन् प्रणाय्यः निपूर्व्वचिनोतेर्घ्रयिन् निकाय्यः द्वौ पूर्व्वेण निपात्येते कर्म्मक्रियेत्यादिना निकाय्यस्याधारत्वे कर्म्मत्वं महानुदयः स्वर्गापवर्गफललक्षणस्तत्त्वज्ञानमेव वा यस्यास्तस्याः सम्बोधनं महोदयः कान्यकुब्जेष्वाधिपत्यापवर्गयोरिति विश्वदर्शनात् ततोऽर्शआदित्वाद् इत्यत्वे विघातायेति हनोघञि खेहेर्घोऽणिति चेति घः हनस्तङ् ॥ ६६ ॥ भ०

कुण्डपाय्यवतामित्यादि । कुण्डेन पीयतेऽत्र क्रतौ कुण्डपाय्यः क्रतुः क्रतौ कुण्डपाय्यसञ्ज्ञायामिति निपातितं कञ्चित्कथाभीरमसे क्रीडोप इति दीर्घः तथाग्निचित्यावतां आहिताग्निकानां कथाभीरमसे चित्याग्निचित्येचेति निपात्यते अग्निचयनमग्निचित्या भावे क्यप् तुक् तद्वतां तथोपचाय्यवतां उपचीयते इत्युपचाय्योऽग्निः अग्नौ परिचाय्येति निपातितः उपपूर्व्वाच्चिनोतेर्ण्यदायादेशौ तद्वतां कथाभीरमसे शुभे कल्याणि । इति क्रत्याधिकारः ॥ ६७ ॥ ज० म०

कुण्डेत्यादि । हे शुभे कल्याणि कञ्चित् त्वं कुण्डपाय्यवतां तथा अग्निचित्यावतां तथा उपचाय्यवतां कथाभिर्नित्यं रमसे क्रीडसि कुण्डैः पीयतेऽत्र सोम इति कुण्डपाय्यः क्रतुविशेषः पाय्यधाय्येत्यादिना निपातः स विद्यते येषां इति मोऽश्भभपाद्व्रतुः अग्नेश्चयनं राशीभाव इत्यग्निचित्या पूर्व्ववन्निपातः उपचीयत इत्युपचाय्योऽग्निः पूर्व्ववन्निपातः अग्निविशेषोयज्ञविशेषाङ्गम् । इति क्रत्याः ॥ ६७ ॥ भ०

अतःपरं प्रकीर्णकाः । वर्द्धत इत्यादि हे भीरु कातरचित्ते तव तपोवर्द्धते तस्य च ये विघ्नास्तेषां ये नायकाः प्रणेतारस्तान् व्यजेष्टाः जितवत्यसि लुङिविपराभ्यांजेरित्यात्मनेपदं कामसम्मोहौ कञ्चिदजैषीः जितवत्यसि सिचि वृद्धिः

नायस्यसि तपस्यन्ती गुरून् सम्यगतूतुषः ।
यमान्नोदविजिष्ठास्त्वं निजाय तपसेऽतुषः ॥ ६९ ॥
अथार्घ्यं मधुपर्काद्यमुपनीयादरादसौ ।
अर्चयित्वा फलैरन्नैः सर्वत्रास्यदनामयम् ॥ ७० ॥

इति प्रकीर्णकाः ।

विनयेन वा संप्राप्थाः संप्राप्नासि कर्मणि लुङ् झलोझलीति सिचोलोपः अत्वानुक्तमिति कच्चिदिति प्राह्यम् ॥ ६८ ॥ ज० म०

अथ प्रकीर्णकाः ।

वर्तत इत्यादि । कच्चिदित्यत्वानुषङ्गनीयं हे भीरु कच्चित्ते तव तपोवर्तते कच्चित् त्वं तपसो विघ्नानां नायकान् प्रणेतॄन् व्यजेषा अभिभूतवत्यसि विपराजीति मं कच्चित् त्वं कामधनङ्गविकारं सम्मोहमविद्याञ्च अजैषीः व्रजवदेति त्रिः कच्चिद्विनयेनापि त्वं सम्प्राप्थाः सम्प्राप्नासि कर्मणि ढी सम्बोधनमहिम्नार्थावगमात् कच्चिदित्यस्यानुषङ्गं केचिन्नेच्छन्ति ॥ ६८ ॥ भ०

नायस्यसीत्यादि । तपस्यन्ती तपश्चरन्ती कच्चिन्नायस्यसि न खिद्यसे तपश्चरणशालीभूतेत्यर्थः कर्मणोरोमन्थेति क्यङ् तपसः परस्मैपदञ्च गुरून् आचार्यादीन् सम्यक् यथावदनुवृत्त्याऽतूतुषः तोषितवत्यसि तुषेर्ण्यन्तस्य लुङि रूपं चङिणिलोपादि यमान्मृत्योर्नोदविजिष्ठाः नाभैषीः पुण्यवतां मृत्योर्भयमित्यर्थः ओविजेरात्मनेपदं लुङि सिचइट् विज इति सिचोडित्त्वे न गुणः निजायात्मीयाय अतुषः तुष्टवत्यसि ॥ ६९ ॥ ज० म०

नायेत्यादि । अत्रापि कच्चिदनुषज्यते तपस्यन्ती तपःकुर्व्वती त्वं कच्चिन्नायस्यसि न खिद्यसे अत्यन्ताभ्यासात् नमस्तपोवरिव इति क्यः दैर्घ्यमुयतने कच्चित्त्वं गुरूनाचार्यादीन् सम्यगतूतुषः तोषितवत्यसि तुषिस्त्वौजित्यपुष्टौ अत्रान्तादङ् अत्रङ्गुत्रङःस्वःखेः सन्वदिति खेर्घः कच्चित्त्वं यमान्न उदविजिष्ठाः नाभैषीः पुण्यवतां मृत्योर्भयं नास्तीति भावः यम इन्द्रियनिग्रहे वा कियत्कालं यमः कार्य इति भयं दूरीभूतमित्यर्थः विजङीग्रोर्भीकम्पे विजेर्नुर्नमीत्यगुणत्वं कच्चित्त्वं निजाय स्वकीयाय तपसे अतुषः तुष्टासि अश्रद्धावती असिद्धित्वशङ्काशून्या वासीत्यर्थः पुषादित्वात् ङः ॥ ६९ ॥ भ०

अथेत्यादि । अथानन्तरमसौ शबरी अर्घ्यमर्घार्थं पादार्घाभ्याञ्चेति यत् मधुपर्काद्यं मधुपर्कमिश्रमुदकं मधुपर्कः तदाद्यं आदौ भवमाद्यं तदुपनीयादरात्

अतःपरं क्रदधिकारः ।

सख्यस्य तव सुग्रीवः कारकः कपिनन्दनः ।
द्रुतं द्रष्टासि मैथिल्याः सैवमुक्त्वा तिरोऽभवत् ॥ ७१ ॥
नन्दनानि मुनीन्द्राणां रमणानि वनौकसाम् ।

फलैरर्चयित्वा अर्च्यौ अर्चनार्हौ एवत् रामलक्ष्मणौ सर्वत्रलोकेषु अनामयं कल्याणं आख्यत्कथितवती अस्तीत्यङ् । इति प्रकीर्णकाः ॥ ७० ॥ ज० म०

अथेत्यादि । एवं प्रश्नानन्तरं असौ शबरी मधुपर्केणार्घं सहितं अर्घ्यं-मुपनीय अर्च्यौ अर्चार्हौ रामलक्ष्मणौ फलैरादरात् अर्चयित्वा सर्वत्र पूर्व्व-पृष्टेष्वर्थेषु अनामयं कुशलं आख्यत् उक्तवती वक्ष्यमाणेति ङः मूल्ये पूजा-विधावर्घः अर्घशब्दात्तदर्थे विकारसंघेति यः मधुपर्कादिमिति पाठे आदौ भव आद्यः मधुपर्क आद्योयस्येत्यर्घप्रविशेषणं वद्वा आदिरेवाद्यः अर्घ्यमधुपर्कादि पूजोपहारद्योपनीयेत्यर्थः आमयशब्दोलक्षणया अनिष्टमात्रे प्रयुज्यते । इति प्रकीर्णकाः ॥ ७० ॥ भ०

अथ क्रदधिकारमाह । क्त्यानां तदन्तभाविऽपि भावकर्म्मणोःक्त्या इति विशेषप्रतिपादनार्थः पृथगधिकारः तत्रोपपदं सप्तमीस्थमित्यादिना एतदभ्यधि-क्रियते तान् द्रुतोदर्शयन्नाह सख्यस्येत्यादि सा शबरी तिरोऽभवदन्तर्भूता एवमुक्त्वा किं तदित्याह तव सख्यस्य सखित्वस्य सख्युर्व्वा कर्म्मषष्ठी कारकः सुग्रीवः ण्वुल्तृचाविति ण्वुल् त्वया सह मैत्रीं करिष्यति कपिनन्दनः कपीनां नन्दयिता नन्द्यादिभ्योल्युः क्रद्योगे षष्ठी असीति वर्त्तमाने लट् ॥७१॥ज०म०

अथ क्रदधिकारः । यद्यपि क्त्यानां क्त्वमस्ति तथापि भावकर्म्मणोस्तद्वि-धानमिति सूचनाय पृथक् प्रदर्श्य कर्त्तरि शेषानाह तत्र निरुपपदसोपपदयोर्निरुप-पदं प्रयोगबाहुल्यादादौ दर्शयति सख्यस्येत्यादि । सा शबरी एवमुक्त्वा तिरो-ऽभवत् अन्तर्हिता किमवदित्याह सुग्रीवस्तव सख्यस्य कारकः सख्यं करिष्यति सख्युर्भावः कर्म्म वा सख्यं विकारसंघेति यः ढधेक्रतीत्यादिना कर्म्मणि षष्ठी कपीनां नन्दयिता कपेः पुत्रो वा यद्दनन्द्यादेरिति अनः ततो द्रुतं मैथिल्या-द्रष्टाऽसि प्रेक्षको भविष्यसि अस्तेर्भविष्यत्यामीष्ये की अभिधानात् असीति युष्मदर्थे अव्ययमिति वा क्षणकौघे इत्यादिषु कालस्यानिर्द्देशात् त्रिष्वपि कालेषु क्त्वादयो भवन्तीति बोध्यं ढधेर्वद्रोऽकिदिति रः ॥ ७१ ॥ भ०

नन्दनानीत्यादि । तत उक्तादनन्तरं वीरौ राघवौ रामलक्ष्मणौ वनानि

वनानि भेजतुर्वीरौ ततः पाम्नानि राघवौ ॥ ७२ ॥
भृङ्गालीकोकिलक्रुञ्चिर्व्वाशनैः पश्य लक्ष्मण ।
रोचनैर्भूषितां पम्नामस्माकं हृदयाविधम् ॥ ७३ ॥
परिभावीणि तारानां पश्य मत्र्योनि चेतसाम् ।

भेजतुः सेवितवन्तौ एत्वाभ्यासलोपौ हृफलेत्यादिना पाम्नानीति पम्नाया अदूरं अदूरभवत्वेऽण् मुनीन्द्राणां नन्दनानि प्रमोदकारिणी वनौकसां वनेचराणां उच्चसमवाये अस्मादौणादिकोऽसुम् पृषोदरादित्वाद्वर्णविपर्ययः तेषां रमणानि रतिजनकानि नन्द्यादित्वात् ल्युः कर्म्मणि षष्ठी ॥ ७२ ॥ ज० म०

नन्दनानीत्यादि । ततोऽनन्तरं राघवौ पाम्नानि वनानि भेजतुः सेवितवन्तौ जग्मतुरित्यर्थः भजजोभागसेवयोः तृफलभजत्रपेति अतएत्वं खिलोपश्च पम्नानामसरःसम्बन्धीनि पम्नाया अदूरभवानीत्यर्थे वा विकारसंघेत्यादिना ण्यः मुनीन्द्राणां नन्दनानि प्रमोदकानि वनौकसां वनवासिनां रमणानि क्रीडाजनकानि उभयत्र अहनन्दिपचादेरिति अनः कर्म्मणि षष्ठी ॥ ७२ ॥ भ०

भृङ्गालीत्यादि । हे लक्ष्मण पम्नां पश्य अस्माकं हृदयाविधं हृदयं विध्यतीति अहिज्यादिना संप्रसारणं नहिवृतीति दीर्घः भूषितां कैर्भृङ्गालीभिः भ्रमरपंक्तिभिः कोकिलैः क्रुञ्चिश्च वाशनैः कूजद्भीरोचनैः शोभनैः क्रुञ्चिति ऋत्विगादिना किन् निपातनसामर्थ्यादनुनासिकलोपाभावः संयोगाच्च लोपः किन्प्रत्ययस्येति कुत्वम् ॥ ७३ ॥ ज० म०

भृङ्गेत्यादि । राम इत्युवाचेत्यर्थाल्लभ्यते हे लक्ष्मण पम्नां पश्य कीदृशीं भृङ्गालीभिर्भ्रमरपङ्क्तिभिः कोकिलैः क्रुङ्भिः क्रौञ्चैश्च भूषितां क्रुङ्गत्यां त्वासुदित्यादिना क्विच्चकारेत्त्वं क्विप् संशयनिवारणार्थं नतु अव्ययार्थमिति बोध्यं विविधिपाठ इत्येके ञुङित्यादौ क्रुञ्चः पृथक्पाठात् प्राक्कुङ् म्नोर्नुः अमेऽमनोरिति ङस्यान्तस्य लुप् कीदृशैः वाशनैः कूजद्भिः वाशङ्शब्दे रोचनैः शोभमानैः उभयत्र नन्द्यादित्वादनः पुनः किम्भूतां अस्माकं हृदयाविधं चेतः-पीडयन्तीं हृदयं विध्यतीति क्विप् अहस्पथाद्योरिति जिः वीरुद्रोधश्छाविति दीर्घनिर्देशात् क्वचित् क्विवन्ते पूर्वपदस्य दीर्घत्वमिति दीर्घः आङ्पूर्व्वस्य रूपं वा ॥ ७३ ॥ भ०

परिभावीनीत्यादि । जलेजानि पद्मानि पश्य तत्पुरुषे कृतीत्यादिना-ऽलुक् सप्तम्याः उद्भासीनि भासमानानि अतएव तारागां परिभावीणि तिर-

उद्भासीनि जलेजानि दुन्वन्त्यदयितं जनम् ॥ ७४ ॥
सर्व्वत्र दयिताधीनं सुव्यक्तं रामणीयकम् ।
येन जातं प्रियापाये कहदं हंसकोकिलम् ॥ ७५ ॥
पत्तिभिर्विहदैर्यूनां शाखिभिः कुसुमोत्किरैः ।

स्कारोणि ततस्तेषां मन्थीनि पीडाकारीणि अतो जनमदयितं प्रियारहितं दुन्वन्ति टुदुउपतापे सौवादिकः मन्थोद्भासपरिभूयो ग्रहादित्वान्निनिः ॥ ७४ ॥ ज० म०

परीत्यादि । हे लक्ष्मण जलेजानि पद्मानि पश्य हनजनादिति डः सरसिजमित्युदाहरणेन कचित् समासे सप्तम्या अलुगिति स्मृचितं तत्पुरुषेकृति-बहुलं सप्तम्या अलुगिति परः कीदृशानि उद्भासीनि शोभमानानि अतएव तारापां परिभावीणि तिरस्कारकाणि समानीत्यर्थो वा ढधेलक्त्यव्येति कर्म्मणि षष्ठी नोऽचोऽन्तरदुर्गेरित्यादौ भूवर्ज्जनात् न णत्वं किन्तु घ्रुर्णोऽदान्त इत्यादिना समासाद्विहितेन स्यादिना सहितत्वात् विकल्पेन णत्वं नोऽचोऽन्तरित्यादिना उपसर्गमात्राश्रयस्यैव णत्वनिषेधात् अतएव चेतसां मन्थीनि पीडकानि सर्व्वत्र ग्रहादित्वान्निन् अतएव अदयितं प्रियारहितं माद्यं जनं दुन्वन्ति पीडयन्ति टुदुउपतापे शतरि स्वादित्वात् नुः ॥ ७४ ॥ भ०

सर्व्वत्रेत्यादि । हे लक्ष्मण सर्व्वत्र यत्किञ्चिद्रामणीयकं रमणीयस्य भावः योपधाद्वुञ् तत्सर्व्वं दयिताधीनं दयितायत्तं अखण्डत्वेत्यादिना खः सुव्यक्तं स्पष्टं कुतः येन प्रियाया अभावे सति हंसकोकिलं हंसाश्च कोकिलाश्चेति शकुनित्वात् द्वन्द्वैकत्वं कहदं कुत्सितप्रलपितं वदतीति पचाद्यच् कुत्सितं वद इति रथवदयो-श्चेति कोः कत् दयितायां सत्यां मधुरप्रलपितमिदमिति ॥ ७५ ॥ ज० म०

सर्व्वत्रेत्यादि । हे लक्ष्मण रामणीयकं यत्किञ्चित् रमणीयत्वं तत्सर्व्वत्र दयिताधीनं प्रियानिमित्तकमिति सुव्यक्तं स्पष्टमेव कथमित्याह येन हेतुना प्रियाया अपाये विरहे सति हंसकोकिलमपि कहदं कुत्सितवादि जातं यदा सीतासीत्तदा मधुरालापीदमासीदिति भावः कुत्सितं वदतीति कत्कचित्तिरथवद इति कदादेशः रमणीयस्य भाव इति विकारसंघेति कण् हंसाश्च कोकिलाश्चेति समाहारद्वन्द्वः ॥ ७५ ॥ भ०

पत्तिभिरित्यादि । उहदिहिंसानादरयोरित्यस्मादिगुपधः कः यूनां

अन्नो यो यस्य वा नास्ति प्रियो ग्लानो भवेन्न सः ॥ ७६ ॥
ध्वनीनामुद्भमैरेभिर्म्मधूनामुद्भयैर्भृशम् ।
आजिघ्रैः पुष्पगन्धानां पतङ्गैर्ग्लपिता वयम् ॥ ७७ ॥

विदग्धैः हिंसकैः पक्षिभिः शाखिभिर्द्वयैश्च व्रीह्यादित्वादिनिः कुसुमोत्किरैः उत्किरन्तीत्युत्किराः पूर्ववत् कः कुसुमानामुत्किराः क्रद्योगलक्षणां षष्ठीं विधाय समासः तैर्हेतुभूतैः करणभूतैर्वा स ग्लानो न भवेत् प्रकर्षेण ग्लायते ग्लानः आतश्चोपसर्गे कः योऽन्नः गुणदोषानभिज्ञः पूर्ववत्कः यस्य प्रियो नास्ति तस्य प्रयोजनाभावः सर्वत्र विवेकित्वात् प्रीणातीति प्रियः इगुपधेति कः ॥७६॥ज०म०

पक्षिभिरित्यादि । पक्षिभिः शाखिभिश्च स एव जनः ग्लानो ग्लानिमान्न भवति यो जनोऽन्नोगुणदोषानभिज्ञो भवति यस्य वा जानतोऽपि प्रियोजनो नास्ति सर्वत्र विरक्तत्वात् नत्वस्मद्विधोऽभिज्ञः प्रियानुरक्तश्चेति भावः पक्षिभिः शाखिभिश्च क्रीडद्भैः यूनामर्थाद्विरहिणां विदग्धैर्हिंसकैः शाखिभिः क्रीडद्भैः कुसुमोत्किरैः पुष्पविक्षेपकैः तुदुजधिनादरेच चकाराद्धिंसायां क्रयविक्षेपे ग्लागबोधने प्रीजप्रीतौ एभ्यः कृगृज्ञाप्रीजुङ इति कः दधेक्रतीति कर्म्मणि षष्ठी ग्लायतीति ग्लानः एचोऽशित्या इत्यत्र अधितीति विषये सप्तमी हनजनादिति डः ॥ ७६ ॥ भ०

ध्वनीनामित्यादि । पतङ्गैर्म्मधुरैर्ग्लपिताः पीडिता वयं ग्लास्नावनुवमांचेति भित्त्वात् ह्रस्वः पतेरङ्गच्पक्षिणीत्यौणादिकः ध्वनीनामुद्भमैः ध्वनीन् कुर्व्वद्भिः भ्वाधातोः पात्रेति शः पाध्राधेति धमादेशः मधूनामुद्भयैः मधूनि पुनः पुनः पिबद्भिः धेट्पान इत्यस्यादेशः आजिघ्रैः पुष्पगन्धानां पुष्पगन्धान् गृह्णद्भिः पाध्राधेति शः क्रद्योगलक्षणा षष्ठी ॥ ७७ ॥ ज० म०

ध्वनीनामित्यादि । एभिः पतङ्गैर्व्वयं ग्लपिताः पीडिताः विशेषेण महिम्ना भ्रमरैरिति गम्यते एभिरित्यङ्गुलीनिर्द्दिष्टत्वेन वा क्रीडद्भैः ध्वनीनां गुञ्जितानां उद्भमैः कारकैः मधूनां उद्भयैः पानकारिभिः पुष्पगन्धानां आजिघ्रैः ग्रहणकारिभिः भृशमत्यर्थमिति सर्वत्र क्रियाविशेषणं घ्राशब्दाग्नियुतौ ध्वनौ अनेकार्थत्वादत्र करोत्यर्थः धेटपाने घ्रागन्धग्रहणे एभ्योधेटश्चपाघ्राध्मः श इति श्नित्त्वात् स्यादानपात्रेत्यादिना घ्रा धम घ्राजिघ्र पतङ्गः पक्षिसूर्य्ययोः पतोगच्छतीति गर्द्वजङ्गौरङ्गम इत्यादिना खे निपातः ग्लायतेर्ज्ञग्लस्य ज्वलह्वलह्मलग्लेति वा ह्रस्वः ॥ ७७ ॥ भ०

धारयैः कुसुमोर्म्मीणां पारयैर्बाधितुं जनान् ।
शाखिभिर्हा हता भूयो हृदयानामुदेजयैः ॥७८॥
ददैर्दुःखस्य मादृभ्यो धायैरामोदमुत्तमम् ।
लिम्पैरिव तनोर्व्वातैश्चेतयः स्याज्ज्वलो न कः ॥ ७९ ॥

धारयैरित्यादि । हा कष्टं शाखिभिर्द्रुमैर्भूयोऽत्यर्थं वयं हताः कामशराणां धारणात् तदेवाह कुसुमानां ये ऊर्म्मयः भङ्गाः प्रकाशा वा तान् धारयद्भिः ऊर्म्मिस्तरङ्गे पीडायां वेगे सङ्गप्रकाशयोः । उत्कण्ठावस्त्रसंकोचबोधेषु च प्रकीर्त्तित इति विश्वः समूहेऽपीति अतएव जनान् मद्विधान् बाधितुं पारयद्भिः यतो हृदयानामुदेजयैः उत्कण्ठाजनकैरिति भावः धृञ्धारणे पॄपालनपूरणयोः एजृकम्पने च एभ्योणिजन्तेभ्यः जनुपसर्गाल्लिम्पविन्देत्यादिना ग्यः उदेजीति सूत्रे निर्देशात् अनुपसर्गादिति न निषेधः ॥ ७८ ॥ ज० भ०

धारयैरित्यादि । हा कष्टं शाखिभिर्द्रुमैर्वयं भूयोऽत्यर्थं हताः कीदृग्यैः कुसुमानामुर्म्मयः प्रकाशाः संज्ञा वा तेषां धारयैः धारकैः अतएव जनान् बाधितुं पीडयितुं पारयैः पारयद्भिः यतोहृदयानामुदेजयैः उत्कम्पकैः धृञ्ङःस्थितौ पॄलिपालनपूरणयोः ह्वस्वान्तो जुहोत्यादिः दीर्घान्तः क्र्यादिकश्च एजृकम्पे उत्पूर्व्वः एभ्यः प्रेरणजन्तेभ्यः साहिसातीत्यादिना ग्यः पारत्कतीरवत् कृत्यस्य न यकृणं प्रेरणजन्तैः साहचर्य्यात् अगेरिति प्रतिषेधेऽपि उदेजेः ग्यः क्त द्वितसमासानामभिधानं नियामकमित्युक्तेः ऊर्म्मिस्तरङ्गे पीडायां वेगे सङ्गप्रकाशयोः । उत्कण्ठावस्त्रसङ्कोचकोषयोरपि कीर्त्तितेति विश्वः समूहेति जयमङ्गला ॥ ७८ ॥ भ०

ददैरित्यादि । वातैर्ददैः दुःखस्य दुःखं ददद्भिः केभ्यो मादृभ्यः अस्मादृशेभ्योविरहिभ्यः त्यदादिषदृश इति किन् दृक्षवत्तुल्यित्याकारः धायैरामोदमुत्तमं आमोदं प्रियासङ्गमेन हर्षं यावत् विरहिभ्योदत्तस्य दुःखस्य धायैः पोषकैरित्यर्थः उत्तममिति क्रियाविशेषणं उत्तममामोदं धायैः कुसुमानां परिमलं धारयद्भिरिति व्याख्याने अनित्यत्वात् कृत्ययोगे कर्म्मषष्ठ्यभावः लिम्पैरिव तनोः शरीरं लिम्पद्भिरिव वातैर्हेतुभिः कोनाम विरहाग्निना यश्चेतयमानः ज्वालाज्वलन्नग्निरिव न स्यात् किन्तु भवेदेवेति भावः ददैर्धायैरिति स्याद्यधेति आकारान्तलक्षणे ये प्राप्ते ददातिदधात्योरिति आर्णौभवतः ये आतोलोपः

अवश्यायकणास्रावास्चारुमुक्ताफलत्विषः ।
कुर्व्वन्ति चित्तसंस्रावं चलत्पर्णाग्रसम्भृताः ॥ ८० ॥

णेतुयुक् लिम्पश्चेतय इति अनुपसर्गादिति णः ज्वलइति ज्वलिति कृशल्नेभ्योण इति णस्य विकल्पचाद्यच् ॥ ७९ ॥ ज० म०

ददैरित्यादि । कश्चेतयश्चेतनावान् जनोऽर्थाद्विरही वातैर्हेतुभिर्ज्वलोन स्यात् अग्निरिव न भवति वायुभिश्चेतः सन्तोषात् सर्व्वएव ज्वलो दीप्तिमान् स्यादिति वा केवलं महिधानां विरहिणां कष्टमित्याह मादम्भ्रोदुःखस्य ददैर्दलभिः यतः उत्तममामोदं पुष्पसम्बन्धिनं धाधैर्धारयद्भिः क्वचिद्विशेषेऽपि सामान्यप्रवृत्तिरिति न्यायात् ढधेक्रतीति कर्म्मणि षष्ठीं बाधित्वा कर्म्मक्रियेत्यादिना द्वितीया तनोर्देहस्य लिम्पैर्लेपकारिभिरिव ददद्दाने पचादित्वादन् अहमिव दृश्यते इति तदादिभवत्यमानेत्यादिना कर्म्मणि क्विप् श्रेर्ङाडुधाञ्ल्हधारणे पुष्टौ दासंज्ञकत्वात् स्वसव्यधेन तनदावहृस्य इति नः यनञ्णिल्कृदिण्यातः जिलिमौग्यपञ्जलेमे साहिसातीत्यादिना ग्रः सुचादित्वात् नुण् चिवकङ्क्ष्माने इत्यस्मात् अभिधानात् ग्रः धेटदृश्येत्यत्र योगविभाग इत्यन्ये साहिसातीत्यादौ चेतीति लिपिकरप्रमादात् पतितमित्यन्ये जज्वलज्वलनत्विषोः दुनीभूज्वलेत्यस्याप्रवृत्तिपक्षे पचादित्वादन् ॥ ७९ ॥ भ०

अवश्यायेत्यादि । अवश्यायतइत्यवश्यायः तस्य कणा विन्दवः आस्रवन्तीत्यास्रावाः क्षरन्तः स्राद्यर्थति णः कर्त्तरि तयोर्विशेषणसमासे राजदन्तादिति परनिपातः ते कुर्व्वन्ति चित्तसंस्रावं संस्रवतीति संस्रावः पूर्व्ववणः चित्तं संस्रावं चलत्कुर्व्वन्ति इत्यर्थः पूर्व्ववत् समासपरनिपातौ कीदृशाश्चलत्पर्णाग्रसंस्थिताः अतएव चारुमुक्ताफलत्विषः दर्शनीयमुक्ताफलानुकारिणः सीताहारस्थमुक्ताफलानि स्मारयन्तीत्यर्थः ॥ ८० ॥ ज० म०

अवेत्यादि । अवश्यायकणास्रावाश्चित्तसंस्रावं कुर्व्वन्ति अवश्यायस्य नीहारस्य कणा विन्दवः आस्रवन्तीति आस्रावाः कर्म्मधारये गमकत्वात् विशेषणस्यापि परनिपातः स्रुगतौ दुनीभूज्वलेत्यादिना पक्षे णः चित्तञ्च तत् संस्रावं चलञ्चेति पूर्व्ववत् कीदृशाः चलतां पत्राणां अग्रेषु संश्रिताः चलन्तश्च ते पत्राग्रसंश्रितास्तेति वा स्थूलीभूतागलिता इत्यर्थः अतएव चारुणः शोभनस्य मुक्ताफलस्य त्विट् दीप्तिर्येषु ते तथा सीताहारस्थितानि मुक्ताफलानि स्मारयन्त इत्यर्थः श्यैङ्गतौ घञिः यनञ्णिल्कृदिण्यात इति यन् ॥ ८० ॥ भ०

अवसायो भविष्यामि दुःखस्यास्य कदा न्वहम् ।
न जीवस्यावहारो मां करोति सुखिनं यमः ॥ ८१ ॥
दह्येऽहं मधुनो लेहैर्दावैरुग्रैर्यथा गिरिः ।
नायः कोऽत्र स येन स्यां वताहं विगतज्वरः ॥ ८२ ॥
समाविष्टं ग्रहेणेव ग्राहेणेवात्तमार्णवे ।
दृष्ट्वा गेहान् स्मरस्येव वनान्तान् मम मानसम् ॥ ८३ ॥

अवसाय इत्यादि । कदा नु काले अहं दुःखस्यानुभूयमानस्य अवसायोऽन्तकरो भविष्यामि येन जीवस्यावहारोऽवहर्त्ता यमो मां सुखिनं न करोति मारयतीत्यर्थः अवस्यति इति अवसाय घोऽन्तकर्मणि अवहरतीत्यवहारः ण्यासश्रंथेति सर्व्वत्र णः युक् ॥ ८१ ॥ ज० म०

अवेत्यादि । नु प्रश्ने वितर्के वा कदा अहं अस्य दुःखस्य अवसायोऽन्तकरो भविष्यामि येन जीवस्यावहारोऽपकारको भूत्वा अद्यापि यमो मां दुःखिनं न करोति विना मरणं न दुःखमपगमिष्यतीत्यर्थः घोयनाशे हृञ् हृत्यां आभ्यामेव पूर्व्वाभ्यां ण्यासश्रंथेन तनदावहृस इति यः ॥८१॥ भ०

दह्येऽहमित्यादि । मधुनो लेहैर्भृङ्गैः अहं दह्ये ण्यासश्रंथेति णः दावैर्वनाग्निभिरुग्रैः प्रचण्डैर्यथा गिरिर्दह्यते तद्वत् अत्र को नायः नयतीति नायः उपायः ईप्सितप्रापकः उभयत्र दुन्योरिति णः येन नायेन विगतज्वरः विगतपीडः स्यामिति आशंसायां लिङ् वत खेदे ॥ ८२ ॥ ज० म०

दह्य इत्यादि । मधुनो लेहैर्मधुलिहद्भिर्भ्रमरैरहं दह्ये कर्म्मणि को यथा उग्रैः प्रचण्डैर्दावैर्वनाग्निभिर्गिरिर्दह्यते तद्वत् अत्र स को नायोऽभिमतप्रापक उपायः येनाहं विगतज्वरो विगतसन्तापः स्यां तु प्रश्ने वितर्के वा वत खेदे अस्तेः स्यां लोपोऽस्यसोरिति अकारलोपः लिङोऽसादे पचादित्वादनु टुदु उपतापे दुगतौ वा णीञ् प्रापणे दुनीभूज्वलेति वैकल्पिको णः दवदावौ वनानले इत्यमरः ॥ ८२ ॥ भ०

समाविष्टमित्यादि । वनान्तान् वनपर्य्यन्तान् स्मरस्य कामस्य गेहमिव उन्मादकत्वात् गेहेक इति गेहेः कः अर्द्धर्चादिपाठात् पुंलिङ्गता स्थितस्येत्यर्थात् योज्यं अन्यथा कथं समानकर्तृकत्वं मानसस्येतः ज्योतिषिग्रहः ग्राहेणेवात्तमार्णवे अर्णः पानीयं यत्रास्तीति केशाद्योऽन्यतरस्यामिति तत्रार्णसोलोपश्चेति

वाताहतिचलच्छाखा नर्त्तका इव शाखिनः ।
दुःसहा ह्री परिक्षिप्ताः क्वणद्भिरलिगाथकैः ॥ ८४ ॥
एकहायनशारङ्गगती रघुकुलोत्तमौ ।
लवकौ शत्रुशत्रूणामृष्यमूकमगच्छताम् ॥ ८५ ॥

भूमनिन्दाप्रशंसास्वित्यादौ वः सलोपश्चेति अर्थवे सत्रे वर्त्तमानेन याहेण कुम्भीरादिना आत्तं गृहीतं आङ्पूर्व्वस्य दाञोऽचउपसर्गात्तः ॥८३॥ ज० म०

समेत्यादि । वनान्तान् वनस्वरूपान् तत्प्रभोपदेशान् वा दृष्ट्वा स्थितस्य मम मानसं याहेण सूर्य्यादिना समाविष्टमिव आत्मदीकृतमिव इत्यर्थः उपहतत्वात् सत्रे याहेण कुम्भीरादिना आत्तं गृहीतमिव अतिगभीरशोकमग्नत्वेऽपि कामपीडितत्वात् स्थितस्येत्यध्याहारेणैककर्त्तृकत्वे पूर्व्वकाले क्त्वाच् वनान्तान् कीदृशान् स्मरस्य गृहानिव याहेः सूर्य्यादौ अन् जलजन्तौ घञ् निलयेऽलिजि स्वाभिधानात् गृहाः पुंसि च भूम्न्येव निकायनिलयालया इत्यमरः आङ्पूर्व्वदाञः क्तौ ग्यचस्तवेति पक्षे तादेशः अर्णो जलं विद्यते अस्येति केशादित्वात् वः मनीषादित्वात् सलोपः मन एव मानसं स्वार्थे अणः केचित्तु मन एव जानातीति व्यवहारात् मनस एव दर्शनकर्त्तृकत्वं विवक्षितमित्युक्त्वा स्थितस्येति नाध्याहरन्ति अन्तःप्रान्तेऽन्तिके नाशे स्वरूपेऽपि मनोहर इति विश्वः ॥ ८३ ॥ भ०

वातेत्यादि । हा कष्टं एते शाखिनः नर्त्तका इव शिल्पिनिघ्नं दुःसहा दुःखेन सह्यन्त इति दैषदित्यादिना खल् नर्त्तकैः साधर्म्यमाह वाताहतिचलच्छाखा वाताहतिभिः चलन्त्यः शाखा बाहुलता इव येषां ते अलयो भ्रमरा गाथका इव गस्थकन् तैश्च परिक्षिप्ताः परिवेष्टिता इति ॥ ८४ ॥ ज० म०

वातेत्यादि । एते शाखिनो दुःसहा दुःखेन सह्यन्ते दैषदुःसोरिति खल् ह्री विषादे नर्त्तका इव नृत्यन्तीति नृत्यसनरनृज इति थकः ऋतादेः शिल्पिनि कञ इति परः स्वमते शिल्पिविशेषोऽर्थाद्गम्यते नर्त्तकसाधर्म्यमाह वाताहतिचलच्छाखाः वातस्याहतिभिश्चलन्ती शाखा बाहुलता येषां अलयो भ्रमरा एव गाथका गायनास्तैः परिक्षिप्ताः परिवेष्टिताः गायन्तीति गोपनट्यथकाविति थकः गायतेरेतौ स्तोत्रे इति वृत्तावुक्तत्वात् गैगाने इत्यस्यैव ग्रहणं नतु गाङः क्वणद्भिः शब्दायमानैः ॥ ८४ ॥ भ०

एकहायनेत्यादि । रघुकुलोत्तमौ रामलक्ष्मणौ ऋष्यमूकमगच्छतां गतवन्तौ कथंभूतं हायनः संवत्सरः स एको यस्य शारङ्गस्य मृगस्य तस्येव

तौ वालिप्रणिधी मत्वा सुग्रीवोऽचिन्तयत् कपिः ।
बन्धुना विग्टहीतोऽहं भूयासं जीवकः कथम् ॥ ८६ ॥
स शत्रुलावौ मन्वानो राघवौ मलयं गिरिम् ।
जगाम सपरीवारो व्योमभायमिवोत्थितम् ॥ ८७ ॥

गतिर्ययोः शीघ्रगामित्वात् हस्वत्रीह्किालयोरिति ह्रधातोरर्युट् आतो युक् तौ शत्रुशक्तीनां लवकौ अपनेतारौ प्रहृल्वः समभिहार इति वुन् तत्समभिहार-यहणं साधुकारित्वोपलक्षणार्थं ॥ ८५ ॥ ज० म०

एकेत्यादि । एतद्वचनानन्तरं रघुकुलस्य उत्तमौ श्रेष्ठौ रामलक्ष्मणौ ऋष्यमूकं पर्वतं अगच्छतां कीदृशौ एकहायनशारङ्गगती, एको हायनो वत्सरो वयो यस्य तादृशस्य शारङ्गस्य हरिण इव मृगस्येव वा गतिर्गमनं ययोः शीघ्र-गामित्वात् जहातेर्णनटि हायनो निपातितः हाङोरुपमित्यन्ये शत्रुशक्तीनां लवकौ छेदकौ लुनातेः प्रुडुसुहृल्लोऽकः इत्यकः घ्रादेः साधुकारिण्यर्थेऽक इति परः शारङ्गशातके भृङ्गे कुरङ्गे च मतङ्गजे ॥ ८५ ॥ भ०

तावित्यादि । तौ रामलक्ष्मणौ वालिनः प्रणिधी चरौ मत्वा सुग्रीवः कपिरचिन्तयत् चिन्तितवान् प्रणिधीयते नियुज्यते कार्य्येषु प्रणिधिः उपसर्गेधोः किः बन्धुना भ्रात्रा विग्टहीतो विरोधितः सन् कथं जीवको भूयासमिति आशंसायां लिङ् जीवेरायिषि वुन् । इति निरूपपदकृदधिकारः ॥८६॥ज०म०

तावित्यादि । रामलक्ष्मणौ वालिनः प्रणिधी चरौ मत्वा सुग्रीवः कपिरचिन्तयत् बन्धुना वालिना विग्टहीतो विरोधितोऽहं कथं जीवको भूयासं प्रणिधीयते कर्म्मणि प्रयुज्यतेऽसाविति दासंज्ञकत्वात् किर्दोऽन्तर्गेरित्यनेन भावविहितोऽपि किः कृद्योऽक भाव इत्युक्तेरत्र कर्म्मणि बोध्यः केचित्तु कभावे-ऽमीदित्यस्मात् मण्डूकप्लुताधिकारादत्र कभाव इत्यनुवर्त्तते हृत्तौ तु कारकानु-पदेशोलिपिकरप्रमादात् इत्याहुः आशिषीति जीवतेरकः । इति निरूप-पदाधिकारः ॥ ८६ ॥ भ०

इतः प्रभृति तत्रोपपदं सप्तमीस्थमिति अस्रोपपदस्थानेन क्तो दर्शयन्नाह स इत्यादि । स सुग्रीवः सपरीवारः सपरिकरः उपसर्गश्चेति दीर्घः कपीनाम-मनुष्यत्वात् मलयं गिरिं जगाम राघवौ शत्रून् लुनातीति कर्म्मण्यण् शत्रूणामुन्मूलकाविति मन्वानोऽवगच्छन् मनुबोधन इत्यस्मादात्मनेपदिनस्तनादिभ्य

धर्म्मदं मारुतिं दूतं विषमस्थः कपिद्विपम् ।
शोकापनुदमव्यग्रं प्रायुङ्क्त कपिकुञ्जरः ॥ ८८ ॥

ङः व्योममायमिवोत्थितं व्योम आकाशं मिमीत इति ङ्वावमश्चेत्यण् नमः परिच्छेत्तुमिवोत्थितं कियत्प्रमाणमस्येति ॥ ८७ ॥ ज० म०

अथ सोपपदाधिकारः । यस्मात् पराङ्गातोः प्रत्ययास्तदुपपदं स इत्यादि । स सुग्रीवो राघवौ शत्रुत्रावौ शत्रूणां च्छेदकौ मन्वानः परीवारैः परिजनैः सह मलयं गिरिं जगाम व्योममायं आकाशस्य परिमाणं कुर्व्वाणमिव उत्थितं अतिदैर्घ्यादियस्मात्तौ वा शत्रून् लुनातीति व्योम मातीति च ढात्मण्वनञित् ङादिति प्रातोयन् मनदङबोधे ङित्त्वान्नं दित्त्वात्तनादिः परिपूर्व्वाद्भोवञ् परेरिकारस्य दीर्घत्वमभिधानात् ॥ ८७ ॥ भ०

धर्म्मदमित्यादि । कपिकुंजरः सुग्रीवः हनूमन्तं दूतं प्रायुङ्क्त प्रस्थापितवान् इन्द्रारकनागकुञ्जरैरित्यादिना कर्म्मधारयः सः इत्तान्नं ज्ञातुमित्यर्थात् प्रायुङ्क्त इति प्रोपाभ्यांयुजेरित्यात्मनेपदं रुधादित्वात् श्नम कपिकुञ्जरः किम्भूतः विषमे दुर्गपर्व्वते तिष्ठतीति विषमस्थः सुग्रिय इति कः मारुतिं कीदृशं धर्म्मं कल्याणं ददातीति धर्म्मदः आतोऽनुपसर्गे क इति कः श्रेष्ठत्वमाह कपिश्रेष्ठं कपिश्रेष्ठं ह्यस्यां पिवतीति द्विपः कपिरयं द्विपइव उपमितं व्याघ्रेत्यादिना कर्म्मधारयः पुनः कीदृशं शोकापनुदं शोकमपनुदति तुन्दशोकयोरिति कः अव्यग्रं सुचित्तमित्यर्थः ॥ ८८ ॥ ज० म०

धर्म्मदमित्यादि। कपिकुञ्जरः सुग्रीवो मारुतिं हनूमन्तं दूतं प्रायुङ्क्त प्रस्थापितवान् इत्तान्नं ज्ञातुमित्यर्थात् कीदृशः विषमस्थः विषमे कृच्छ्रे तिष्ठतीति हनजनादिति डः एवम्भूतोऽपि महासत्त्वत्वाद्व्यग्रोऽव्याकुलः यद्वा विषमे दुर्गे स्थितः अतएव अव्यग्रः अक्षोभितमनाः कीदृशं मारुतिं धर्म्मं ददातीति धर्म्मदं सुखदायकं पूर्ब्ववद्डः धर्म्मो यातसुखानिचेत्यमरः कपिद्विपं कपिश्रेष्ठं शोकमपनुदति शोकापनुदं कगङ्घाग्रीजुङ इति कः कपिर्द्विपइव कपिः कुञ्जरइव गमकत्वात् विशेषणस्यापि परनिपातः ह्यस्यां पिवतीति द्विपः पूर्ब्ववत् डः कुञ्जोदन्तौविद्यतेऽस्येति मध्वादित्वात् रः कुञ्जःकुञ्जे निकुञ्जेऽपि हनौ दन्तेऽपि दन्तिनामिति विश्वः मरुतस्यापत्यमिति वाह्वाद्यत इति ञिण् आञ्जनेयो हनूमान् स्याद्धनुमानपि मारुतिरिति कोषः अव्ययमिति क्वचित् पाठः तादृशस्य दूतस्य योग्यत्वात् तुजेर्घ्रां रुधादित्वात् श्नम् मणोऽन्ने णावितिमादेशः ॥ ८८ ॥ भ०

विश्वासप्रदवेशोऽसौ पथिप्रज्ञः समाहितः ।
चित्तसंख्यो जिगीषूणामुत्पपात नभस्तलम् ॥ ८९ ॥
सुरापैरिव घूर्णद्भिः शाखिभिः पवनाहतैः ।
ऋष्यमूकमगाद् भृङ्गैः प्रगीतं सामगैरिव ॥ ९० ॥

विश्वासेत्यादि । असौ मारुतिर्नभस्तलमुत्पपात विश्वासं प्रददातीति विश्वासप्रदः प्रेदाङ्ग इति कः विश्वासप्रदोवेशोयस्य भित्तुवेष इत्यर्थः वेष्यते आत्मानेनेति अकर्त्तरि चकारके षडङ् विष्लृव्याप्ताविति अस्यरूपं पन्थानं प्रजानातीति पथिप्रज्ञः समाहितः अभ्रान्तचित्तः दृदङ्ग मया तत्र वक्तव्यमिति जिगीषूणां जेतुमिच्छतां चित्तसंख्यः चित्तं संख्याति परिच्छिनत्तीति समिख्य इति कः ॥ ८९ ॥ ज० म०

विश्वासेत्यादि । असौ मारुतिर्नभस्तलमुत्पपात कीदृशः विश्वासप्रदोवेशोयस्य स तथा भित्तुवेशत्वात् शौविग्रप्रवेशे वञ्चि वेशः विषिर्लिञोऽङ्व्याप्ताविति अस्य मूर्द्धन्यान्तस्य रूपमित्यन्ये पन्थानं प्रजानाति इति कगत्तात्प्रीति कः समाहितः अभ्रान्तचित्तः जिगीषूणां जेतुमिच्छूनां स्वपक्षाणां परपक्षाणाञ्च चित्तं संख्याति परिच्छिनत्तीति हनजनादिति डः संपूर्व्वस्य ख्यालख्याताविति अस्य प्रयोगोनास्तीति ये वदन्ति तन्मते चञ्चिङोरूपं तदा चञ्चिङः कशाजख्याजरे इत्यत्र अर इति विषयसप्तमी ॥ ८९ ॥ भ०

सुरापैरित्यादि । मारुतिर्ऋष्यमूकमगात् शाखिभिरुपलक्षितं घूर्णद्भिः कम्पमानैः पवनाहतत्वात् अतएव सुरापैरिव मत्तैरिव गायोष्टगित्यत्र सुरासीध्वोरिति टक् प्रगीतं प्रगीयतेऽत्रेति अधिकरणे क्तः कैर्भृङ्गैः सामगैरिव सामवेदपाठकैरिव गायन्तीति टक् ॥ ९० ॥ ज० म०

सुरापैरित्यादि । स मारुतिर्ऋष्यमूकमगात् कीदृशं शाखिभिरुपलक्षितं कीदृशैः पवनेनाहतैः अतएव घूर्णद्भिः कम्पमानैः घूर्णजश्चभ्रमणे यतुः अतएव सुरापैर्मद्यपैरिव सुरां पिबन्तीति हनजनादिति डः भृङ्गैः प्रगीतं नादितम् गीयते यत्रेति भौव्यगत्येति आधारे क्तः क्तस्योःकभावइत्युक्तेः अपवादेऽप्युत्सर्गप्रवृत्तिः क्वचिदिति न्यायात् कासुकसङ्घार्थक्तेन इत्यनेन षष्ठीप्राप्तौ साधनकृत्वित्यादिना कर्त्तरि तृतीया भावक्तान्तादर्शआदित्वादिति भृङ्गकर्त्तृकसङ्गीतयुक्तमिति वार्थः प्रकृष्टं गीतं यत्रेति वा सामगैरिव सामवेदं गायन्तीति हनचरगष्टक् ॥ ९० ॥ भ०

तं मनोहरमागत्य गिरिं वर्म्महरौ कपिः ।
वीरौ सुखाहरो ऽवोचद् भित्तु भिक्षार्हविग्रहः ॥ ९१ ॥
बलिनावसुमद्रीन्द्रं युवां स्तम्बेरमाविव ।
आचक्षाथामिथः कस्माच्छङ्करेणापि दुर्गमम् ॥ ९२ ॥

तमित्यादि । ऋष्यमूकं गिरिमागत्य कपिर्वीरौ रामलक्ष्मणौ अवोचत् उक्तवान् कीदृशं मनोहरं रम्यत्वात् मनोहरतीति हरतेरनुद्यमनेऽच् वर्म्महरौ कवचं हर्त्तुं क्षमौ सम्भाव्यमानवयसावित्यर्थः वयसिचेत्यच् सुखाहरः सुखाहरणशीलः आङिताच्छील्ये हृत्यच् भित्तुः परिव्राट्वेशः न कपिरूपः यतोविश्वासप्रदवेश इत्युक्तं भिक्षार्हविग्रहः भिक्षायोग्यशरीरः क्षमत्वादित्यर्थः भिक्षामर्हतीत्यच् ॥ ९१ ॥ ज० म०

तमित्यादि । तं ऋष्यमूकं गिरिं आगत्य आगम्य कपिर्हनूमान् वीरौ रामलक्ष्मणौ अवोचत् कथितवान् गिरिं कीदृशं रम्यत्वात् मनोहरं हरतीति हरः पचादित्वादच् मनसो हरः मनोहरः कीदृशौ तौ वर्म्महरौ कवचधरौ पूर्ब्ववदच् कपिः कीदृशः सुखाहरः सुखकारी अर्थात्तयोः पूर्ब्ववदच् परे तु अवहने कर्म्मणः परात् हृञोऽच् वयोबोधकवहने च आङ्पूर्ब्वात्तु ताच्छील्ये एवेत्याङ्ः मन्यते मनोहरतीति मनोहरस्तं वहने तु भारहार इत्यादि बोध्यं वर्म्म हर्त्तुं क्षमौ वर्म्महरौ अत्र सम्भाव्यमानं वयो गम्यते तरुणावित्यर्थः सुखमाहर्त्तुं शीलमस्य सुखाहरः भित्तुर्यतिरूपः भित्तृणशीलो वा सम्भित्तार्थसङः भिक्षार्हविग्रहः भिक्षायोग्यशरीरः भित्तुकवेशपरिग्रहात् नतु वानरमूर्त्तिः विश्वासप्रदवेश इत्युक्तं भिक्षामर्हतीति भिक्षार्हः पचादित्वादच् ॥९१॥ भ०

किमवोचदित्याह बलिनेत्यादि । युवां अमुं अद्रीन्द्रं कस्मात् कारणादिथः प्राप्तौ इणगतावित्यस्माद्वर्त्तमानसामीप्ये भूते लटस्थस् एतदाचक्षाथां कथयतं लोटि रूपं बलिनौ बलवन्तौ यत् शङ्करेणापि महादेवेनापि दुर्गमं दुःखेन गम्यते कावित्र स्तम्बेरमाविव यथा मत्तद्विपौ प्राप्नुतस्तद्वत् स्तम्बकरणयोरित्यच् कर्त्तरि हस्तिन्यभिधेये हस्तिस्तूचकयोरिति वचनात् शङ्कर इति शमि धातोरित्यच् ॥ ९२ ॥ ज० म०

बलीत्यादि । किमवोचदित्याह युवां अमुं अद्रीन्द्रं ऋष्यमूकं कस्मात् कारणात् इथः प्राप्नुथः इणगतौ भूतसामीप्ये लो अभिधानात् एतत् युवामा-

व्याघ्रं गुहाशयैः क्रूरैः क्रव्याद्भिः सनिशाचरैः ।
तुङ्गशैलतरुच्छन्नं मानुषाणामगोचरम् ॥ ९३ ॥

उत्कृष्टाधिकारः ।

सत्वमेजयसिंहाढ्यान् स्तनन्धयसमत्विषौ ।
कथं नाडिन्धमान्मार्गानागतौ विषमोपलान् ॥ ९४ ॥

चन्द्रायां कथयतं प्रार्थनायां गी अद्रीन्द्रं कीदृशं शङ्करेण महादेवेनापि दुर्गमं दुःखेन गम्यत इति ईषद्दुःसोरिति खल् अतएवात्र गमनात् युवां बलिनौ बलमस्ति ययोरिति नैकाजादिति इन् अत्वातिशयेन अस्त्यर्थौ बोध्यः । तथा च भूमनिन्दाप्रशंसासु नित्ययोगेऽतिशायने । संसर्गेऽस्ति विवक्षायां भवन्ति मतुवादय इति स्तम्बेरमाविव हस्तिनौ यथा प्राप्नुयस्तद्वत् स्तम्बेरमत इति प्रचादित्वादन् अभिधानात् सप्तम्यलुक् हस्तिनेव रूढः यं कल्याणं करोतीति शङ्करः कृकट इति टः अभिधानात् संज्ञा गम्यते ॥ ९२ ॥ भ०

व्याघ्रमित्यादि । दुर्गमत्वदर्शनाय दृढमुच्यते कीदृशमद्रीन्द्रं क्रव्यमपक्वमांसं भक्षयद्भिः सिंहादिभिः सनिशाचरैः राक्षससहितैर्व्याघ्रं क्रव्येचेति विट् गुहाशयैः गुहायां शेरते इति शीङोऽधिकरणेऽच् तुङ्गाः उच्चाः शैलाः शिलायां भवा ये तरवस्तैश्छन्नं व्याघ्रं अतएव मानुषाणामगोचरं अगम्यं गोचरसञ्चरेत्यादिना निपातितः ॥ ९३ ॥ ज० भ०

व्याघ्रमित्यादि । दुर्गमत्वं दर्शयन्नाह अद्रीन्द्रं कीदृशं क्रव्याद्भिः किरातादिभिः सिंहादिभिर्व्याघ्रं क्रव्यं मांसमदन्तीति क्विप् क्रव्यशब्ददोऽपक्वे क्विप् अपक्वेऽण्क्विपाविति परः स्वमते पक्वापक्वविशेषानुक्तौ न चातिरर्थानतिशयत्वात् कीदृशः गुहाशयैः गुहायां शेरत इति पचादित्वादन् शीङोऽधिकरणादनेति परस्तूक्त्वं क्रूरैर्निर्दयैः कठिनैर्वा सनिशाचरैः राक्षससहितैः पुनः कीदृशं तुङ्गशैलतरुच्छन्नं तुङ्गैः शैलैस्तरुभिश्च छन्नं सर्वतो व्याघ्रं अतएव मानुषाणामगोचरं अगम्यं । द्विपन् वनेचराख्याणामित्यारभ्य चरादेष्ट इत्यादिप्रकरणस्य प्रागुक्तत्वात् अत्र तत्याग इत्यत्र आह उत्कृष्टाधिकार इति ॥ ८२ ॥ भ०

सत्वमित्यादि । युवामिमान् मार्गानागतौ सत्वमेजयसिंहाढ्यान् सत्वमेजयन्ति ये सिंहाः एजेः खश् अरुर्द्विषेति मुम् तैराढ्यान् व्याघ्रान् सिंहग्रहणं तद्वद्धिंस्रोपलक्षणार्थं हिनस्तीति सिंहः पृषोदरादित्वाद्वर्णविपर्ययः नाडिन्धमा-

उत्तीर्णौ वा कथं भीमाः सरितः कूलसुद्दहाः ।
आसादितौ कथं ब्रूतं नगजैः कूलसुद्रुजैः ॥ ९५ ॥
रामोऽवोचद्वनूमन्तमावामभ्रंलिहं गिरिम् ।
ऐव विद्वन् पितुः कामात् पान्तावल्पम्यचान् मुनीन् ॥९६॥

निति उन्नीचाधिरोहणान्मुड्मुर्मुड्निश्वासैर्नाडिन्धमन्तीति नाड़ीसुध्मौत्येति खश् खित्यनव्ययस्येति हुखः विषमोपलान् उन्नतपाषाणयुक्तान् स्तनन्धयसमत्विषौ बालवत्सुकुमारौ सामर्थ्यं पुनर्युवयोरचिन्त्यं स्तनं धयतः पिबतः नासिकास्तनयोरिति खश् अरुर्द्विषदिति सुम् ॥ ९४ ॥ ज० म०

अथ खशाद्यधिकारः सत्वमित्यादि । युवां कथं द्रुमान् मार्गान् आगतौ एतत् ब्रूतमिति वक्ष्यमाणश्लोकेनान्वयः कीदृशान् सत्वमेजयसिंहाढ्यान् सत्वान् प्राणिन एजयन्ति कम्पयन्ति भीषयन्तीति यावत् खशेजेरिति खश् खित्यव्याजिति मन् तादृशा ये सिंहास्तैराढ्यान् व्याप्तान् हिनस्तीति सिंहः पचादित्वादन् निपातनात् वर्णविपर्ययः नाडिन्धमान् मुड्मुर्मुड्नार्डीं निःश्वासैर्धमन्ति उपतापयन्तीति नाडीशुनीस्तनेत्यादिना खश् स्वादानमेत्यादिना धीधमादेशः पूर्ब्बेण मन् हुखश्च विषमोपलान् उन्नतानतप्रस्तरयुक्तान् युवां कीदृशौ स्तनन्धयसमत्विषौ स्तनं धयति पिबतीति स्तनन्धयो बालकः पूर्ब्बवत्खश् मन् च तेन समा त्विट् दीप्तिर्ययोः एतेन सौकुमार्यं दर्शितं स्तनन्धयशब्देनार्थात् तद्दीप्तिरुपलक्ष्यते दीप्तौ तत्समत्वसुचितं परम्परया धर्म्मसाम्यं धर्म्मसाम्यं वा गम्यते ॥ ९४ ॥ भ०

उत्तीर्णावित्यादि । कथं वा केनोपायेन युवां सरितो नदीरुत्तीर्णौ भीमास्त्रासकरीः यतः कूलसुद्दहाः कूलमापूर्य्य वहन्त्यः उदिकूल इति खश् गजैः कूलसुद्रुजैः कूलं भिन्द्भिः कथं नासादितौ न व्यापादितौ इति ब्रूतं कथयतं ॥ ९५ ॥ ज० म०

उत्तीर्णावित्यादि । कथं वा युवां सरितो नदीरुत्तीर्णौ तरणमपि गतिः तेन गत्यर्थादित्यादिना कर्त्तरि क्तः कीदृशीः कूलसुद्दहाः कूलान्यापूर्य्य वहन्ति कूलं तीरमपि जलानि प्रापयन्ति वा अतएव भीमास्त्रासकरीः गजैर्हस्तिभिः कथं वा युवां नासादितौ न प्राप्तौ न मारितावित्यर्थः कर्म्मणि क्तः कीदृशैः कूलसुद्रुजैः मत्ततया कूलं भिन्द्भिः एतद्युवां ब्रूतं कथयतं उभयत्र कूलाद्रुजुद्दह इति खश् खित्यव्याजिति मन् ॥ ९५ ॥ भ०

अमितम्यचमीशानं सर्व्वभोगीणमुत्तमम् ।
आवयोः पितरं विद्धि ख्यातं दशरथं भुवि ॥ ९७ ॥

राम इत्यादि । हनुर्वदनैकदेशः सोऽस्यास्तीति निन्दायां मतुप् अन्येषामपि दृश्यत इति दीर्घः हनूमान् हनुमानपीति विश्वदर्शनात् ह्रस्वं तस्य किल जातमात्रस्य आदित्यरथं गच्छतो हनुद्वयं भग्नमिति श्रूयते तं रामोऽवोचत् उक्तवान् तत् किमित्याह हे विद्वन् यदसुं गिरिमावामेव आगतौ तत् पितुः कामादभिप्रायात् आङ्पूर्व्वादिणोलङि रूपं अभ्रंलिहमुच्चैस्तरं अभ्रं लेढीति वहाभ्रंलिह इति खश् किं कुर्व्वाणौ पान्तौ रक्षन्तौ सुनीन् अल्पंपचान् अल्पसन्तुष्टान् अल्पं पचन्तीति मितनखे चेति मितेत्यर्थग्रहणात् खश् चकारस्यानुक्तसमुच्चयार्थत्वाद्वा ॥ ९६ ॥ ज० म०

राम इत्यादि । रामो हनूमन्तं अवोचत् पर्व्वताघातभग्नत्वात् कुत्सिता हनूरस्यास्तीति निन्दायां मतुः हनुशब्दात् तन्वादेर्व्वा इति पाक्षिकऊप् उतोऽयुङ्रज्वादेरित्यस्य प्रत्युदाहरणे रज्वादौ तु हनुरिति क्वचित् पुस्तके दृश्यते तत्तु लिपिकरप्रमादादिति केचित् नाम्नग्रस्त्यर्थेऽचोर्घ इति केचित् हनूमान् हनुमानपीति विश्वदर्शनाह्रस्वमेव किमुक्तवानित्याह हे विद्वन् आवां पितुः कामादभिलाषादसुं गिरिं ऐव आगतौ इणोधीव अदादित्वात् शपोलुक् अभ्रंलिहमाकाशं लेढि प्राप्नोतीति तृभ्रुवट्दजोत्यादिना अभिधानादनाम्नग्रपि खः खितीति मन् अभिधानात् गुणाभावः आवां कीदृशौ सुनीनां पान्तौ रक्षन्तौ पालरक्षणे शतुः कीदृशान् अल्पंपचान् स्वल्पसन्तुष्टान् दरिद्रान् वा घटीखारीत्यादौ मितनखमानादित्यत्रार्थस्यैव ग्रहणं तेनाल्पशब्दात् पचः खश् अल्पं यथास्यात्तथा पचानिति केचित् सुनिरक्षणेन दुष्टहिंसाप्रवृत्तयोरावयोः कुतः सिंहादिभयं तादृशोश्च सरिदुत्तरणमपि नाशक्यमिति पूर्व्वग्रन्थेषु सर्व्वत्रोत्तरं सूचितम् ॥ ९६ ॥ म०

कः पुनः पिता यदादेशादागतावित्यत आह । अमितम्यचमित्यादि । आवयोः पितरं दशरथनामानं भुवि विख्यातं विद्धि जानीहि डुभृञ्धारणपोषणयोर्धिः अमितम्यचं महामन्त्रिणं पूर्व्ववत् खश् मुम् च ततोनञ्समासः ईशानशीलं स्वामिनमित्यर्थः ताच्छील्येत्यादिना चानश् सर्व्वभोगीणं सर्व्वसत्वभोगाय हितं आत्मनिविसर्जनेति खः भोगशब्दोऽत्र शरीरवाची अदभक्षणादिना गात्रम् ॥ ९७ ॥ ज० म०

ऊलेन दयितारण्याद्रक्षसारुन्तुदेन नः ।
अस्रूर्य्यम्पश्यया मूर्त्या हृता तां मृगयावहे ॥ ९८ ॥
प्रत्यूचे मारुतीरामम्मि वालीति वानरः ।
शमयेदपि संग्रामे यो ललाटन्तपं रविम् ॥ ९९ ॥

अमितमित्यादि । कः पिता यदादेशादत्रागतावित्याह आवयोः पितरं दशरथं विद्धि जानीहि ऊधसोऽहिः कीदृग्यं अमितम्भवं प्रचुरान्नप्रदं घटीखारीत्यादिना खश् पश्चान्नञ्समासः ईशानं ऐश्वर्ययुक्तं ईशलङ्ऐश्वर्ये शानः सर्वभोगाय सर्वशरीराय हितं भुज्यतेऽनेनेति भोगः शरीरं ततो विकारसंघेत्यादिना हितार्थे ईनः घृणोऽदान्ते इत्यादावतद्धादित्यस्य योगविभागात् णत्वं उत्तमं श्रेष्ठं भुवि ख्यातं पृथिव्यां प्रसिद्धं सर्वज्ञातत्वात् ॥ ९७ ॥ भ०

यदि पितुरादेशादागतौ किमत्र गमनेनान्वेषयथ इत्याह । ऊलेनेत्यादि । नोऽस्माकं दयिता अरण्याद्रात्रसेन हृता कीदृग्येन अरुन्तुदेन मर्म्मस्पृशा विध्यरुषोस्तुद इति खश् सुम् अस्रूर्य्यम्पश्यया आदित्यगोप्यया मूर्त्या शरीरेणोपलक्षिता अस्रूर्य्यललाटयोरिति खश् तां हृतां मृगयावहे गवेषयावः मृग अन्वेषणे स्वार्थिकण्यन्तः युवयोः पौरुषान्वितत्वात् कथं हृतेत्याह ऊलेन ऊद्मना ॥ ९८ ॥ ज० म०

ऊलेनेत्यादि । पितुराज्ञया दण्डकागमनेऽपि कथं अत्रागमनमित्याह अस्माकं दयिता अरण्याद्रक्षसा हृता कथं युवयोरग्रे हृतेत्याह ऊलेन ऊद्मना नतु बलात् कीदृग्येन रक्षसा अरुन्तुदेन मर्म्मस्पृशा घटीखारीत्यादिना खश् खित्यव्यजिति मन् स्यादेः सोलोपः अस्मद एकत्वे बहुत्वविवक्षा तां हृतां मृगयावहे अन्वेषयावः मृगत्कङ्मार्गणे मार्गणमन्वेषणं मूर्त्या शरीरेणोपलक्षिता विशेषणे तृतीया कीदृश्या अस्रूर्य्यम्पश्यया सूर्य्यमपि न पश्यन्त्या अतिगोप्ययेत्यर्थः पूर्ब्बेण खश् स्यादानेत्यादिना दृशेः पश्यादेशः सूर्य्येण सह समासोगमकत्वात् ॥ ९८ ॥ भ०

त्वं पुनः कस्य वेत्यत आह । प्रत्यूचे इत्यादि । रामं मारुतिः प्रत्यूचे प्रत्युक्तवान् अस्ति वालीति नाम्ना कपीश्वरः यः संग्रामे युद्धे ललाटन्तपं सर्व्वेषामुपरि वर्त्तमानं पूर्ब्ववत् खश् शमयेत् पराजयेदिति सम्भावने लिङ् वालिशब्दो नान्तः इदन्तश्च तथाच वाली वालिश कथ्यते इति शब्दभेदः ॥ ९९ ॥ज०म०

प्रत्यूच इत्यादि । मारुतिर्हनूमान् रामं प्रत्यूचे किमित्यूचे इत्याह वालीति

उग्रम्पश्येन सुग्रीवस्तेन भ्रात्रा निराकृतः ।
तस्य मित्रीयतो दूतः संप्राप्तोऽस्मि वशम्वदः ॥ १०० ॥
प्रियम्वदोऽपि नैवाहं ब्रवे मिथ्या परन्तप ।
सख्या तेन दशग्रीवं निहन्तासि द्विषन्तपम् ॥ १०१ ॥

भ्रात्रा वानरोऽस्ति यः संग्रामे ग्रहत्ते रविं सूर्य्यमपि शमयेत् पराजयेत् प्रौढ्यासम्भावनेति स्त्री कीदृशं रविं ललाटन्तपं सर्व्वेषामुपरिवर्त्तिनं मध्याह्नकालीनमपि प्रचण्डमपीत्यर्थः यद्वा सूर्य्योऽपि चेत्तस्य ललाटं तपति तदा तमपि शमयेत् सुतरामेवान्यायकारिणमित्यर्थः घटीखारीलादिना खश् ॥ ९९ ॥ भ०

उग्रम्पश्येनेत्यादि । तेन भ्रात्रा उग्रंपश्यता पापं विजानता उग्रं पश्येत्यादिना निपातितं यस्य सुग्रीवो निराकृतोऽभिभूतस्तस्य हि दूतः प्राप्तोऽस्मि वशम्वदः वशमनुकूलं वदतीति वशम्वदः प्रियवशेवदःखच् कीदृशस्य मित्रीयतो मित्रमिच्छतः सुप आत्मनः क्यच् ॥ १०० ॥ ज० म०

उग्रमित्यादि । तेन भ्रात्रा वालिना सुग्रीवो निराकृतः देशाद्विःसारितः कीदृशेन उग्रम्पश्येन पापं पश्यता उग्रदृष्टिना वा घटीखारीत्यादिना खश् तस्य सुग्रीवस्य दूतोऽहं सम्प्राप्तोऽस्मि आगतोऽस्मि कीदृशस्य मित्रीयतः आत्मनो मित्रमिच्छतः तथा भवन्तमेव क्योऽव्याद्यर्थेति क्यः अवर्णस्य ईत्वं ततः शत्रः वशमनुकूलं वदतीति वशम्वदः प्रियवशादित्यादिना खः अस्मीति क्रियापदं अस्मदर्थेऽव्ययं वा ॥ १०० ॥ भ०

किन्तेन सख्येनेति चेदाह प्रियम्वद इत्यादि । प्रियम्वदतया लोको मिथ्या वदति अहं प्रियम्वदोऽपि पूर्ब्बवत् खच् परंतप शत्रूणामुपतापद द्विषदिति खच् वाचंयमपुरन्दरौ चेत्यत्रागमो निपात्यते नैवाहं मिथ्या ब्रुवे वदामि तेन सुग्रीवेण सख्या मित्रेण दशग्रीवं निहन्तासि हनिष्यसि हन्तेर्लुटि रूपं कीदृशं द्विषन्तपं शत्रूणामुपतापयितारं पूर्ब्बवत् खच् ॥ १०१ ॥ ज० म०

प्रियमित्यादि । किन्तेन मित्रेणेत्याह तेन सुग्रीवेण सख्या त्वं दशग्रीवं हन्तासि निहनिष्यसि हन्तेर्डौ कीदृशं द्विषन्तपं शत्रूणामुपतापकं तपश्च इत्यादिना द्विषच्छब्दात्तपोऽभिधानादसंज्ञायामपि खः मनीषादित्वात्तलोपे खित्यव्याजिति मन् किंवा द्वेष्टीति द्विषः कृग्टृज्ञाग्रीजुङ इति कः तस्मात्तपः खः प्रियम्वदत्वान्मृषा ब्रवीषि चेदाह हे परन्तप शत्रूणामुपतापक प्रियम्वदोऽपि मनु नैव मिथ्या ब्रुवे वदामि परन्तपेति रामसम्बोधनात् द्विषन्तपमिति रावण-

वाचंयमोऽहमनृते सत्यमेतद्ब्रवीमि ते ।
एहि सर्व्वंसहं मित्रं सुग्रीवं कुरु वानरम् ॥ १०२ ॥
सर्व्वंकषयशःशाखं रामकल्पतरुं कपिः ।
आदायाभ्रंकषं प्रायान्मलयं फलशालिनम् ॥ १०३ ॥
मेघंकरमिवायान्तंहर्तुं रामं क्लमान्वितः ।
दृष्ट्वा मेने न सुग्रीवो वालिभानुं भयङ्करम् ॥ १०४ ॥

विशेषणात् द्वयोः साम्यसत्त्वं तेन तज्जयाय रामस्य मित्रान्तरापेक्षा युक्तेति भावः प्रियम्बद इति प्रियवशादिति खः परत्वमेत्यत्र द्विवचनपक्षे खः ॥१०१॥भ०

वाचंयम इत्यादि। वाचंयमपुरन्दरौचेत्यमागमो निपात्यते तस्मात् सत्यमेतत् पूर्व्वोक्तं ब्रवीमि ते तुभ्यं तादर्थ्ये चतुर्थी यत एवं तस्मादेहि आगच्छ सुग्रीवं वानरं मित्रं कुरु कीदृशं सर्व्वंसहं सर्व्वं सहत इति भूसर्व्वयोरिति खच् ॥ १०२ ॥ ज० म०

वाचमित्यादि। न मिथ्या ब्रुव इति प्रागुक्तं दृढयन्नाह अहं अनृते असत्ये वाचंयमो मौनी तस्माद्दास्यीवं निहन्तासि इति यदुक्तं एतत्तुभ्यं सत्यमेव ब्रवीमि तादर्थ्ये चतुर्थी तस्मात् एहि आगच्छ सुग्रीवं वानरं मित्रं कुरु कीदृशं सर्व्वंसहं सर्व्वकार्य्यक्षमं तृभूसहेत्यादिना अभिधानादसंज्ञायामपि खः वाचंयम इति वाचाशब्दात् यमः पूर्व्ववत् खः खित्यव्याजिति मन् तुरुस्व परे तु वाक्शब्दोपपदेन साधयन्ति ॥ १०२ ॥ भ०

सर्व्वंकषेत्यादि। रामः कल्पतरुरिव यत्नमादाय गृहीत्वा कपिः प्रायात् गतः कीदृशं रामं सर्व्वं कषयशःशाखं सर्व्वं कषन्ति व्याप्नुवन्ति यानि यशांसि सर्व्वकूलेत्यादिना खश् तान्येव शाखा यस्य फलशालिनमभिमतफलसम्पादनात् अभ्रंकषमुच्चैस्तरं मलयं पूर्व्ववत् खच् ॥ १०३ ॥ ज०म०

सर्व्वमित्यादि। राम एव कल्पतरुः तमादाय कपिर्हनूमान् मलयं प्रायात् प्रगतः रामं कीदृशं सर्व्वं कषयन्ति व्याप्नुवन्ति सर्व्वं पापं नाशयति वा यानि यशांसि तान्येव शाखा यस्य तं फलशालिनं अभिमतफलसम्पादनात् मलयं कीदृशं अभ्रंकषं आकाशव्यापकं अत्युच्छ्रितत्वात् फलशालिनमिति मलयस्य विशेषणात् अमपहारकत्वं सूचितमिति केचित् प्रियवशाद्वयत्तीत्यादिना खः ॥१०३॥भ०

मेघंकरमित्यादि। राममायान्तं दृष्ट्वा सुग्रीवो वालिनं भानुमिव भयंकरं भीतिजनकं न मेने न बुबुधान् मेघत्तीत्यादिना खच् क्लमान्वितो ग्लानो वालि-

उपाग्न्यकुरुतां सख्यमन्योन्यस्य प्रियङ्करौ ।
क्षेमङ्कराणि कार्य्याणि पर्य्यालोचयतां ततः ॥ १०५ ॥
आश्रितम्भवमुत्क्रुष्टं वल्गितं शयितं स्थितम् ।
बह्वमन्यत काकुत्स्थः कपीनां स्वेच्छया कृतम् ॥ १०६ ॥

भानुना पीडितत्वात् क्रीडयं रामं मेघंकरं ऋतुमिव प्रावृट्कालमिव पूर्ब्ववत् खच् ॥ १०४ ॥ ज० म०

मेघमित्यादि । राममागतं दृष्ट्वा सुग्रीवो भानुमिव वालिनं भयङ्करं भीतिजनकं न मेने न मन्यते स्म क्रीडयः क्लमेनान्वितः ग्लानः रामं क्रीडयं मेघङ्करं मेघोत्पादकं ऋतुमिव वर्षाकालमिव वर्षाकालस्य सूर्य्याच्छादकत्वेन क्लान्तश्रमभयापहारित्वात् साम्यं प्रियवशाङ्गयर्त्तिमेवादिति खः ॥ १०४ ॥ भ०

उपाग्नीत्यादि । उपाग्नि अग्निसमीपे रामसुग्रीवौ सख्यमकुरुतां कृतः प्रभृत्यावयोः सख्यमिति अन्योन्यस्य प्रियङ्करौ क्षेमप्रियभद्रेभ्यण्चेति चकारात् खच् ततः सख्यकरणानन्तरं क्षेमङ्कराणि हितजनकानि यथा कार्य्याणि प्रत्यालोचयतां निरूपितवन्तावित्यर्थः । मठपुटेत्यत्र चुरादिकाण्डे धातौ लोचृ पश्यते तस्य लङि रूपम् ॥ १०५ ॥ ज० म०

उपाग्नीत्यादि । रामसुग्रीवौ उपाग्नि अग्निसमीपे सख्यं मैत्रीं अकुरुतां चक्रतुः अग्निसाक्षिकं सख्यमिति भावः अन्योन्यस्य प्रियङ्करौ प्रियं कुरुत इति क्षेमप्रियमद्रात्कुर्व्वेति खः विकारसंघेति सखिशब्दात् भावे यः ततः सख्यानन्तरं परस्परस्य क्षेमङ्कराणि कुशलजनकानि कार्य्याणि पर्य्यालोचयतां निरूपितवन्तौ लोचृक्भासीत्यस्य घ्यां रूपं पूर्ब्ववत् खः ॥ १०५ ॥ भ०

आश्रीत्यादि । आश्रितम्भवमश्नं आश्रितेभुवः करणभावयोरिति खच् उत्क्रुष्टं किलकिलायितं वल्गितं धावनं तथा शयितं स्थितञ्च कपीनां स्वेच्छया कृतं एतत्काकुत्स्थो बह्वमन्यत श्लाघितवान् पुण्यभाज इमे यदेषां स्वेच्छाविहारिणां चेष्टितं अस्माकन्तु शोकसन्तप्तानां न किञ्चिदस्तीति सर्व्वत्र भावे निष्ठा ॥ १०६ ॥ ज० म०

आश्रितमित्यादि । आङ्पूर्ब्वादश्नातेः क्तः आश्रितस्य हृप्तेर्भोजनस्य भवनं आश्रितम्भवं भावघेत्याश्रिताङ्गव इपि खः उत्क्रुष्टं शब्दकरणं वल्गितं गमनं शयितं शयनं पूर्ब्वोक्तेत्यादिना गुणः स्थितं अवस्थानं दोषोमास्यामिति ङिः सर्व्वत्र भावे क्तः कपीनामेतत्सर्व्वं स्वेच्छया कृतं काकुत्स्थो बह्व मन्यत

ततो बलिन्दमप्रख्यं कपिर्विश्वम्भराधिपम् ।
सुग्रीवः प्राब्रवीद्रामं वालिनो युधि विक्रमम् ॥ १०७ ॥
वसुन्धरायां क्रुद्धायां नास्ति वालिसमो बली ।
हृदयङ्गममेतत्त्वां ब्रवीमि न पराभवम् ॥ १०८ ॥
इति खजधिकारः ।

स्तुतवान् पुरुषा एते खेच्छयैवं व्यवहरन्ति अस्माकन्तु शोकसन्तप्तानां न किञ्चिदस्तीति भावः स्वभावसिद्धत्वादाहार्य्यशोभारहितत्वात् प्रशंसा वा ॥ १०६ ॥ भ०

तत इत्यादि । ततः कार्य्यालोचनानन्तरं सुग्रीवोऽब्रवीत् लङि ब्रुवईट् किमुक्तवान् वालिनो युधि विक्रमं शौर्य्यमिति प्रधानं कर्म्म रामभित्यकथितं कोदृशं रामं बलिन्दमप्रख्यं विष्णुतुल्यं बलिं दमयतीति संज्ञायां तृष्टृटजोत्यादिना खच् अमन्तस्य मित्वह्रस्वत्वे तथा विश्वं बिभर्त्तीति विश्वम्भरा तस्या अधिपं अधिपातीत्यधिपः आतश्चोपसर्ग इति कः ॥ १०७ ॥ ज० म०

तत इत्यादि । कार्य्यालोचनानन्तरं सुग्रीवः कपिर्युधि संग्रामे वालिनो विक्रमं रामं प्राब्रवीत् रामं कोदृशं बलिन्दमप्रख्यं बलिं दमयतीति बलिन्दस्त्रिविक्रमस्तेन तुल्यं तृष्टृ इत्यादौ अन्तदमो यत्नेण अरिन्दम इत्युदाहरणे कर्म्मोपपदेन सूचितं केवलस्य दमेरन्तर्भूतअर्थत्वात् सकर्म्मकत्वमिति केचित् सकर्म्मकोऽपि दमिर्दृश्यत इति गोयीचन्द्रेणोक्तम् दमित्वा परिसंघातानिति निदर्शितं विश्वं बिभर्त्तीति विश्वम्भरा पृथ्वी पूर्ब्ववत् खः तस्या अधिपं स्वामिनं अधिपातीत्यधिपः हनजनादिति डः ॥ १०७ ॥ भ०

वसित्यादि । वसुन्धरायां पूर्ब्ववत् खच् वालिना समोऽन्यो बली बलयुक्तो नास्तीति हृदयङ्गमं मम स्वानुभवं ब्रवीमि मम स्वानुभवं हि वस्तु हृदयङ्गमभित्युच्यते तेन संज्ञायामित्यधिकृत्य गमयेति खच् न पुनस्त्वां पराभवमभिभवं ब्रवीमि ॥ १०८ ॥ ज० म०

वसित्यादि । क्रुद्धायां समस्तायां वसुन्धरायां पृथिव्यां वालितुल्यो बलवान् नास्ति वसु धरतीति तृष्टृ इत्यादिना खः एतत्तु हृदयङ्गमं आत्मानुभूतमेव त्वां ब्रवीमि हृदयं गच्छतीति पूर्ब्ववत् खः अनुभूतस्येयं संज्ञा न पुनस्त्वां पराभवं ब्रवीमि तस्माद्भवतः पराभवं न त्वां वदामि तेन नास्ति बालिसमो बलीति प्रागनुभूतं कथितं न तु त्वत्तोऽधिकोऽयमिति सम्मति ज्ञापितम् । इति खजधिकारः ॥ १०८ ॥ भ०

दूरगैरन्तगैर्बाणैर्भवानत्यन्तगः श्रियः ।
अपि संक्रन्दनस्य स्यात् क्रुद्धः किमुत वालिनः ॥ १०९ ॥
वरेण तु मुनेर्व्वाली सञ्जातो दस्युहो रणे ।
अवार्य्यप्रसरः प्रातरुद्यन्निव तमोपहः ॥ ११० ॥
अतिप्रियत्वान्न हि मे कातरं प्रतिपद्यते ।

एवम्भराक्रमोऽसौ तत्र किं त्वं करिष्यसीत्याह दूरगैरित्यादि । यतो भवान् क्रुद्धः सन् संक्रन्दनस्यापि शक्रस्यापि नन्द्यादिभ्योल्युः बाणैः करणभूतैः दूरगैः दूरं गच्छन्तीति अन्तगैः कार्य्यसमापकैः अन्तात्यन्त्यादिना डः श्रियो लक्ष्म्याः अत्यन्तगः विनाशयिता स्यात् अत्यन्तं पर्य्यवसानं गच्छतीति किं पुनर्वालिनो लक्ष्म्या अत्यन्तगो भवान्विनाशयितेति ॥ १०९ ॥ ज० म०

दूरगैरित्यादि । रामं प्रोत्साहयन्नाह भवान् क्रुद्धः सन् संक्रन्दनस्य इन्द्रस्यापि श्रियो लक्ष्म्या बाणैरन्तगो भवेत् किं पुनर्वालिनः श्रियः सुतरामेतल्लक्ष्म्या नाशयिता स्यात् बाणैः कीदृशैदूरगैः दूरपातिभिः अन्तगैः कार्य्यसमापकैः दूरमन्तञ्च गच्छतीति हनजनाङ्गमादेर्डः दितिगर्भं संक्रन्दितवान् इति नन्द्यादित्वादनः ॥ १०९ ॥ भ०

वरेणेत्यादि । मुनेस्तु वरेण दस्युहः दस्ून् शत्रून् बध्यादिति आशिषि हन इति डः अतो रणे अवार्य्यप्रसरोऽनभिभवनीयगतिः सञ्जातः क इव तमोपह इव तमोपहः आदित्यः तमोऽपहन्तीति अपेक्लेशतमसोरिति डः प्रातः प्रभाते उद्यन् उद्गच्छन् उत्पूर्व्वादिनः शतरि इणो यण् अवार्य्यप्रसरस्तद्वदसावपि सर्व्वं वाक्यं सावधारणं भवतीति प्रातरप्युद्यन्नवार्य्यप्रसर एवेति तेन सर्व्वकाले अस्यावार्य्यप्रसरत्वं सिद्धं नतु प्रातरेवोद्यन्नवार्य्यप्रसर इति ॥ ११० ॥ ज० म०

वरेणेत्यादि । रामस्याध्यवसायं जिज्ञासुः पुनरपि वालिविक्रममाह मुनेर्व्वरेण तु दस्युहः स वाली रणेऽवार्य्यप्रसरः सञ्जातः काले उद्यन् तमोपहः सूर्य्य इव दस्ून् शत्रून् हन्तीति हनजनादिति डः हन्तेराशिषि ड इति परे तन्मते वाली दस्ून् बध्यादिति मुनेर्व्वरेण अवार्य्यप्रसरो जातः स्वमते आशीरर्थानुक्तौ न क्तिः वरेण दस्युहन्तृत्वे आशीर्गम्यत एव अवार्य्योऽस्खलनीयः प्रसरो गतिर्यस्य स तथा स्कृगतौ अनि स्कृं उत्पूर्व्वस्येणः शतरि उद्यन् तमोऽपहन्तीति पूर्व्ववत् डः तमःक्लेशार्थेभ्योऽपपूर्व्वहन्तेर्ड इति परः ॥ ११० ॥ भ०

चेतो वालिबधं राम क्लेशापहसुपस्थितम् ॥ १११ ॥

इति डाधिकारः ।

शीर्षघातिनमायातमरीणां त्वां विलोकयन् ।
पतिघ्नीलक्षणोपेतां मन्येऽहं वालिनः श्रियम् ॥ ११२ ॥
शत्रुघ्नान् युधि हंसिघ्नो गिरीन् क्षिप्यन्नकृत्रिमान् ।
शिल्पिभिः प्राणिघेः क्रुद्धस्वया जय्योऽभ्युपायवान् ॥ ११३ ॥

अतीत्यादि । हे राम मदीयं चेतो वालिबधं कर्मीभूतसुपस्थितं प्राप्तं न हि प्रतिपद्यते नैव प्रत्येति यस्मात् कातरं व्याकुलं वालिनोऽतिबलयुक्तत्वात् कीदृशं बधं क्लेशापहं दुःखस्योन्मूलकं पूर्ववड्डः अतिप्रियत्वाद्वालिबधस्य यस्य हि यत्प्रियं तत्सिद्धमपि असौ न प्रत्येति ॥ १११ ॥ ज० म०

अतीत्यादि । हे राम वालिबधस्यातिप्रियत्वात् मे मम चेतो वालिबधसुपस्थितसुपपन्नमपि न प्रतिपद्यते न प्रत्येति यतः कातरं वालिभयाद्व्याकुलं उपस्थितेऽपि प्रिये कातरस्य प्रतीतिर्नास्तीति भावः बालिबधं कीदृशं क्लेशापहं दुःखस्योन्मूलकं अतएवास्यातिप्रियत्वं क्लेशमपहन्तीति पूर्ववत् डः ॥१११॥ भ०

उपस्थितोऽस्य बध इति कथं ज्ञायत इत्याह शीर्षेत्यादि । अरीणां शीर्षघातिनं कुमारशीर्षयोर्णिनिः निपातनात् शिरसः शीर्षभावः आयान्तं विलोकयन् वालिनः श्रियं पतिघ्नीलक्षणोपेतामहं मन्ये पतिं हन्ति यल्लक्षणं तेनोपेताभिवेतीवार्थोऽत्र द्रष्टव्यः असमुष्यकर्तृकेचेति टक् गमहनेत्युपधालोपः होहन्तेरिति कुत्वम् ॥ ११२ ॥ ज० म०

शीर्षेत्यादि । वालिबधस्योपस्थितत्वं दर्शयन्नाह आगतं त्वां विलोकयन्नहं वालिनः श्रियं पतिघ्नीलक्षणोपेतां मन्ये श्रियो वालिपत्नीत्वेन निरूपणात् पतिहन्तृचिह्नयुक्तत्वात् वालिबधो गम्यते पतिं हन्तीति हनचरगदृक् हनगमित्युङ्लोपः हनोझोघ्नः असमुष्यकर्तृकाद्धन्तेष्टगिति परः त्वां किम्भूतं अरीणां शीर्षघातिनं शिरश्छेदिनं यङादित्वाच्छिनु कुमारशीर्षाभ्यां हन्तेर्णिन्निति परः उत्प्रेक्षाव्यञ्जकोऽत्र मन्येशब्दः अन्यथास्थितस्यान्यथा कथनात् ॥ ११२ ॥ भ०

शत्रुघ्नानित्यादि । किञ्च युधि संग्रामे वाली त्वया जय्यः शक्यो जेतुं यदि युष्मदस्त्राणां शक्तिर्दृष्टा ताञ्च द्रष्टुमिच्छामीति वक्ष्यमाणाभिप्रायः जय्यजय्यौ शक्यार्थे ण्यत्ययादेशनिपातनं कीदृशः अभ्युपायवान् युद्धोपाययुक्तः किं कुर्वन्

आढ्यङ्करणविक्रान्तो महिषस्य सुरद्विषः ।
प्रियङ्करणमिन्द्रस्य दुष्करं कृतवान् बधम् ॥ ११४ ॥

क्रुध्यन् क्षिप्यन् गिरीन् दिवादित्वाच्छ्यन् अकृत्रिमान् देवनिर्मितान् शत्रुघ्नान् शत्रून् हन्तीति अमनुष्येति टक् हस्तिघ्न इव हस्तिघ्नः हन्तुं शक्तः शक्तौ हस्तिकपाटयोरिति खलस्य मनुष्यकर्तृकार्थारम्भकत्वात् वाली चामनुष्यः शिलिभिर्युद्धकुशलैः वानरैः सह क्षिप्यन् सहार्थस्य गम्यमानत्वात् सहयोगे तृतीया पाणिघैः पाणिवादकैः ते हि हस्तियुद्धेऽन्यस्य वाद्यस्यासम्भवात् हस्तिसुखमेव वादयित्वा गिरीन् प्रहरणान् क्षिप्यन्ति पाणिघताडघौशिलिनीति कर्त्तरि निपातनम् ॥ ११३ ॥ ज० म०

शत्रुघ्नानित्यादि । प्रत्ययजनककर्म्मद्वारा रामविक्रमं ज्ञातुमिच्छन् महतामपतः साक्षात् स्वाभिप्रायकथनायुक्तत्वात् छलेन रामं स्तुवन्नेवाह ईदृशोऽपि वाली त्वया जयः जेतुं शक्यः पश्यावद्येत्यादिना निपातः कीदृशः अभ्युपायवान् युद्धोपाययुक्तः क्रुध्यन् सन् गिरीन् क्षिप्यन् क्षिप्यौ सुदि कीदृशान् अकृत्रिमान् देवनिर्म्मितान् एतेन स्वभावसिद्धसुश्लिष्टत्वं सूचितं शत्रुघ्नान् क्षिप्यमाणा गिरयः शत्रुं घ्नन्ति शत्रुं हन्तुं गिरीन् क्षिपतीति भावः पतिघ्नवत् टक् पुनः कीदृशः हस्तिघ्नः हस्तिनं हन्तीति पूर्ब्ववत् टक् हस्तिकपाटाभ्यां हन्तेः शक्तौ टगिति परः तेन हस्तिनं हन्तुं शक्त इत्यर्थः खमते अर्थादेव शक्तिर्गम्यते शिलिभिर्युद्धकुशलैर्वानरैरुपलक्षितः पाणिघैः पाणिवादकैः युद्धे तेषां वाद्यान्तराभावात् हर्षेण हस्तियुगमेव वादयन्ति विशेषणे तृतीया शिलिभिः सह गिरीन् क्षिपन् इति वा सम्बन्धः एतेन तत्सदृशास्तत्सहाया अपि सन्तीति सूचितं पाणिभ्यां पाणी हन्तीति पाणिघो निपातनात् ॥ ११३ ॥ भ०

आढ्यमित्यादि । अनाढ्यमाढ्यं करोत्यनेनेति आढ्यसुभगेत्यादिना करणे ख्युन् आढ्यङ्करणं विक्रान्तं यस्य वालिनः अनाढ्यः सन् विक्रान्तेनाढ्योभूत इत्यर्थः महिषस्य सुरद्विषो दुन्दुभेर्बधं मरणं यः कृतवान् दुष्करं कृच्छ्रसाध्यं प्रियङ्करणमिन्द्रस्य तुष्टिकरं अप्रियं प्रियङ्करोत्यनेनेति पूर्ब्ववत् ख्युन् ॥११४॥ ज०म०

आढ्यमित्यादि । किञ्च वाली युधि महिषस्य देवशत्रोर्बधं कृतवान् कीदृशः अनाढ्य आढ्यः क्रियते येन तादृशं विक्रान्तं विक्रमो यस्य स तथा अनाढ्यः सन्नपि विक्रमेणाढ्यो भूत इत्यर्थः नञ्मपलितेत्यादिना खनट् बधं कीदृशं इन्द्रस्य प्रियङ्करणं प्रीङ्प्रीतौ कृगत्राप्रीति कप्रत्यये प्रियः प्रीतिमान्

प्रियम्भावुकतां यातस्तं क्षिपन् योजनं हतम् ।
स्वर्गे प्रियम्भविष्णुश्च कृत्स्नं शक्रोऽप्यबाधयत् ॥ ११५ ॥
जिज्ञासोः शक्तिमस्त्राणां रामो न्यूनधियः कपेः ।
अभिनत् प्रतिपत्त्यर्थं सप्त व्योमसृगस्तरून् ॥ ११६ ॥

महिषभयेन प्रागप्रियः प्रियः क्रियते अनेनेति पूर्ववत् खनट् प्रीतिजनकमित्यर्थः यद्वा इन्द्रो लोकानामप्रिय आसीत् शत्रुबधाच्चमत्वात् पुत्रकृतशत्रुबधेन तु प्रियः क्रियत इत्यर्थः यतो दुष्करं कर्तुसाध्यं एतेन इन्द्रादप्यधिकोऽयं बलीति सूचितम् ॥ ११४ ॥ भ०

प्रियमित्यादि । तमेवं सुरद्विषं हतं पादाङ्गुष्ठेन योजनमध्वानं क्षिपन् क्षिपेस्तौदादिकस्योभयपदिनो रूपं प्रियम्भावुकतां यातस्तथा स्वर्गे प्रियम्भविष्णुरासीत् कर्त्तरि भुव इत्यनेनाढ्यादिष्वपपदेषु खिष्णुच्खुकञौ शक्रोऽपि समर्थोऽपि कृत्स्नं लोकमित्यर्थात् अबाधयत् अपीडयत् बधसंयमन इति चौरादिकः तस्य यतरि रूपं स ईदृशस्त्वया शक्यो जेतुं यदि त्वदस्त्राणां सामर्थ्यं दृष्टमित्यभिप्रायेणाब्रवीत् सुग्रीवः ॥ ११५ ॥ ज० भ०

प्रियमित्यादि । तं हतं महिषं पदाङ्गुष्ठेन योजनं अध्वानं क्षिपन् प्रेरयन् प्रियम्भावुकतां प्राप्तः प्राक् यस्माप्रिय आसीत् दुष्टबधात् तस्मापि प्रियभावं प्राप्तः बाधितुं शक्तः समर्थोऽपि कृत्स्नं लोकं अबाधयत् अपीडयत् स्वर्गस्य प्रिय आसीत् तस्मापि प्रियोभूतः भुवोघे खिष्णुखुकञाविति ञ्वर्थे खिष्णुखुकञौ बधक् बन्धे क्षित्वाद्युरादिः योजनशब्देनात्र योजनान्तरितदेशो लक्ष्यते सदाध्वादिव्याप्ताविति योजनात् द्वितीया एवं सुग्रीवः प्राब्रवीद्रामभिति प्रागुक्तेन सम्बन्धः ॥ ११५ ॥ भ०

रामोऽपि तदभिप्रायं विदन् यत् कृतवान् तदाह । जिज्ञासोरित्यादि । अस्त्राणां शराणां शक्तिं जिज्ञासोः ज्ञातुमिच्छोः कपेः सुग्रीवस्य न्यूनधियः स्वल्पबुद्धेः यतः प्रमाणान्तरेणापरिज्ञानात् प्रत्यक्षेण ज्ञातुमिच्छतीति प्रतिपत्त्यर्थं संप्रत्ययार्थं रामः सप्त तरून् तालान् पङ्क्त्या स्थितान् एकेन शरेणाभिनत् व्योमसृगः सृगोऽनुदके किन् ॥ ११६ ॥ ज० भ०

जिज्ञासोरित्यादि । यदि तवास्त्राणां भेदकत्वं दृष्टं स्यात्तदा त्वया तादृशो वाली जेतुं शक्यत इति सम्भाव्यत इति सुग्रीवाभिप्रायं रामोऽपि ज्ञातवान् यतो न्यूनबुद्धेरतएवास्त्राणां शक्तिं ज्ञातुमिच्छोः कपेः सुग्रीवस्य प्रतिपत्त्यर्थं सम्प्रत्ययार्थं

ततो वालिपशौ बध्ये रामर्त्विग्जितसाध्वसः।
अभ्यभून्निलयं भ्रातुः सुग्रीवो निनदन् दृषक्॥ ११७॥
गुहाया निरगाद्वाली सिंहो रुगमिव द्युवन्।
भ्रातरं युद्धिये: संख्ये घोषेणापूरयन्दिशः॥ ११८॥

रामः सप्त तालान् अभिनत् भिदेर्घञ् रुधादित्वात् श्नम् व्योमस्तृणः अत्युक्तितानित्यर्थः व्योम स्तृणन्तीति त्रासुसिति क्विप् उदकवर्ज्जसुपपदात् स्तृणः किविति परः॥ ११६॥ म०

तत इत्यादि। ततस्तद्भेदादनन्तरं सुग्रीवो भ्रातुर्निलयमभ्यभूत् अभिभूतवान् कीदृशः दृषक् दृष्टः ऋत्विगित्यादिना निपातितं दृषेः किन् द्विर्व्वचनं किन्प्रत्ययस्य कुरिति कुत्वं खकारः चर्त्वं ककारः यस्माद्वालिनि पशाविव बध्ये बधार्हे रामेण ऋत्विजा याजकेन जितसाध्वसः अपनीतसाध्वसः तस्माद्दृषक् ऋतौ यजति ऋतुं वा यजति ऋतुप्रयुक्तो वा यजतीति ऋतुपूर्व्वाद्यजेः किन् यजादित्वात्संप्रसारणम् इदमृत्विक्शब्दनिर्व्वचनं रूढितस्तु याजयित्रेषु ब्राह्मणेषु किन्प्रत्ययस्य कुः निनदन् किलकिलाशब्दं कुर्व्वन्॥ ११७॥ ज० म०

तत इत्यादि। प्रत्ययानन्तरं सुग्रीवो निनदन् शब्दं कुर्व्वन् भ्रातुर्व्वालिनो निलयं निवासं अभ्यभूत् अभिभूतवान् भूस्यापिवेति सेर्लुक् वालिनि पशाविव बध्ये सति रामेणैव ऋत्विजा याजकेन जितमपनीतं साध्वसं भयं यस्य येन वा स तथा अतएव दृषक् दृष्टः ऋतौ यजतीति त्रासुसिति क्विप् अहस्वपाद्योरिति जिः ञ्नुङितीति कुङ् दृषप्रागल्भ्ये क्विपि दृषक् दृब्ज्नुङ्स्वागित्यादिना निपातः ऋत्विजा पशुरपि हन्यत इति भावः॥ ११७॥ म०

गुहाया इत्यादि। तस्य शब्दमाकर्ण्य गुहाया निरगाद्वाली निर्गतः इणोगा लुङि गातिस्थेति सिचोलुक् भ्रातरं द्युवन् अभिगच्छन् द्युअभिगमने अस्मादादिकस्य वर्त्तमानसामीप्ये लटः शतरि उवङादेशे रूपं संख्ये युद्धे भियो सुङ् भीतेर्योक्ता कर्म्मणि क्त भीतिं युद्धमित्यर्थः युजेः पूर्व्ववत् किन् युजेरसमास इति नुम् संयोगान्तलोपः किन्प्रत्ययस्य कुः ङकारः कः कमिव सिंहो रुगमिव द्युवन् घोषेण दिश आपूरयन् दिशन्ति ता इति दिशः पूर्व्ववत् किन्॥ ११८॥ ज० म०

गुहेत्यादि। सुग्रीवस्य शब्दं श्रुत्वा वाली गुहायाः सकाशात् निरगात् निर्गतः इणोगाद्यां भूस्यापिवदेण इति सेर्लुक् सिंहो यथा रुगं द्यौति तद्वत् भ्रातरं द्युवन् आभिमुख्येन गच्छन् द्युलभिसर्पणे भविष्यत्सामीप्ये की अभि-

व्यायच्छमानयोर्मूढो भेदे सदृशयोस्तयोः ।
बाणमुद्यतमायंसीदिक्ष्वाकुकुलनन्दनः ॥ ११९ ॥
ऋष्यमूकमगात् क्लान्तः कपिर्मृगसदृग् द्रुतम् ।
किष्किन्धाद्रिसदात्यर्थं निष्पिष्टः कोष्णमुच्छ्सन् ॥ १२० ॥

घानात् संख्ये युद्धे भियोयुङ्भयस्य प्रयोक्ता भयप्रद इत्यर्थः युजेः क्विप् युजिरोऽसेनुन्घाविति नुण् ङित्यादौ युजेःपृथक् ग्रहणात् प्राङ्ङ् ञ्नोर्नुः ङ्णेऽम् नोरिति ङः स्यान्तस्य लुप् घोषेण शब्देन दिश आपूरयन् दिशतीति दिक् त्वासुसिति क्विप् ॥ ११८ ॥ भ०

व्यायच्छेत्यादि । तयोर्वालिसुग्रीवयोर्व्यायच्छमानयोः कलहायमानयोः सदृशयोः समानयोः भेदे पृथक्त्वे मूढो भ्रान्तः सन् इक्ष्वाकुकुलनन्दनो रामो बाणमुद्यतं सज्जीकृतमायंसीत् उपसंहृतवान् समदाङ्भ्यो यमो यन्थ इति तङ् न भवति अकर्त्रभिप्रायत्वात् तत्र कर्त्रभिप्राय इति वर्त्तते आङोयमहन इत्यनेनापि न स्यात् सकर्मकत्वात् तत्राकर्मकादिति वर्त्तते समानपूर्व्वस्य दृशेः समानान्ययोरित्युपसंख्यानात् त्यदादिष्वित्यादिना कञ् दृक्दृशवतुष्विति समानस्य सभावः ॥ ११९ ॥ ज० म०

व्यायेत्यादि । इक्ष्वाकुकुलनन्दनो रामस्तयोर्वालिसुग्रीवयोर्भेदे विवेचने मूढः भ्रान्तः सन् वालिवधायोद्यतं कृतसन्धानमपि बाणं सुग्रीववधशङ्कया आयंसीत् संहृतवान् यमरमणमात इति इमसनौ कीदृशयोस्तयोः व्यायच्छमानयोः कलहायमानयोः युध्यमानयोर्वा आत्माङ्कढादढाङ्नाहनयम इति नं सदृशयोराकृत्या अन्योन्यं तुल्ययोः मूढत्वे हेतुरयं समानो दृश्यत इति त्यदादिना टक् समानेदं किमद इति समानस्य सादेशः ॥ ११९ ॥ भ०

ऋष्यमूकमित्यादि । कपिः सुग्रीवः किष्किन्धाद्रिसदा वालिना किं किं दधातीति किष्किन्धा गुहा आतोऽनुपसर्गे कः पारस्करादिदर्शनात् पूर्व्वस्य सुडागमो मलोपः षत्वञ्च निपात्यते तदुपलक्षितोऽद्रिः किष्किन्धाद्रिः तत्र सीदतीति सत्सूद्विषेत्यादिना क्विप् तेनात्यर्थं निष्पिष्टत्वात् क्लान्तः सन् ऋष्यमूकं द्रुतमगात् समानोपपदात् दृशेः पूर्व्ववत्क्विन् कोष्णमीषदुष्णमुच्छ्सन् कवञ्चोष्ण इति चकारात् कोः कादेशः ॥ १२० ॥ ज० म०

ऋष्येत्यादि । कपिः सुग्रीवः किष्किन्धाद्रिसदा वालिना अत्यर्थं निष्पिष्टः पीडितः अतएव क्लान्तः सन् कोष्णं ईषदुष्णं उच्छ्सन् द्रुतं शीघ्रं ऋष्यमूकं

कृत्वा वालिद्रुहं रामो मालया सविशेषणम् ॥
अङ्गदस्तं पुनर्हन्तुं कपिनाह्वाययद्रणे ॥ १२१ ॥
तयोर्वानरसेनान्योः संप्रहारे तनुच्छिदम् ।
वालिनो दूरभाग्रामो वाणं प्राणादमत्यजत् ॥ १२२ ॥

अगात् गतवान् मृगसदृक् पलायने द्रुतगमनात् मृगतुल्यः क्विपि सदृक् सदृशवत् किखिभिर्वानरीभिरिष्यत इति इष्वेऽन्नात् घञलनट इति अल् निपातनात् किखेः किष्कादेशः किं किं दधातीति किष्किन्धेत्यन्ये किष्किन्धामूर्द्धन्यषकारवती यकारोपान्तापि किष्किन्ध्येति श्रीपतिः किष्किन्धा गुहा तदुपलक्षितेऽद्रिरपि त्वासुसिति क्विप् ॥ १२० ॥ भ०

कृत्वेत्यादि । वालिद्रुहं सुग्रीवं वालिनं द्रुह्यतीति सत्सित्यादिना क्विप् मालया सविशेषणं सचिह्नं कृत्वा भेदपरिज्ञानार्थं रामः अङ्गदस्तं वालिनं अङ्गदं सूत इति पूर्ववक्विन् ओस्नुपीतिः यणादेशः तं रणे हन्तुं कपिना सुग्रीवेणाह्वाययत् अभिभवं कारितवान् ह्वयतेर्हेतुमण्णिचि णाकेत्यादिना पुक् ॥ १२१ ॥ ज० म०

कृत्वेत्यादि । वालिद्रुहं सुग्रीवं वालिभेदज्ञानाय मालया सविशेषणं सचिह्नं कृत्वा रामोऽङ्गदस्तं वालिनं रणे हन्तुं कपिना सुग्रीवेण पुनराह्वाययत् आह्वानमकारयत् घोऽौऽेरित्यादौ अखादनीक्रन्दायशब्दायह्वादेति वर्ज्जनात् अन्तस्य कर्त्तुः कर्मत्वं णाकासाङ्क्षेत्यादिना यन् अङ्गदं सूते जनयतीति त्वासुसित्यादिना क्विप् कव्यादयनेकाच इति वत्वं वालिने द्रुह्यतीति पूर्ववत् क्विप् ॥ १२१ ॥ भ०

तयोरित्यादि । वानरसेनान्योः वानरस्वामिनोः एरनेकाच इति यण् संप्रहारे युद्धे प्रवृत्ते रामो वाणमत्यजत् वालिनस्तनुच्छिदं तनुं शरीरं छिनत्तीति पूर्ववत् क्विप् छेचेति तुक् प्राणादं प्राणापहारिणं प्राणानत्तीति प्राणादं अदोनन्न इति विट् दूरभाक् दूरमवस्थितो रामो दूरं भजत इति भजोखिः ॥ १२२ ॥ ज० म०

तयोरित्यादि । तयोर्वानरसेनानामीश्वरयोः संप्रहारे युद्धे प्रवृत्ते सति दूरभाक् दूरदेशस्थितो रामो वालिनस्तनुच्छिदं अतएव प्राणादं प्राणभक्षकं वाणं अत्यजत् क्षिप्तवान् सेनां नयति तनुं शरीरं छिनत्ति प्राणानत्तीति च त्वासुसिति क्विप् अत्तेरनन्तत्वात् क्विविति परः दूरं भजत इति ढाङ्गजसहवहोविण् ॥ १२२ ॥ भ०

वालिनं पतितं दृष्ट्वा वानरा रिपुघातिनम् ।
बान्धवाक्रोशिनो भेजुरनाथाः ककुभो दश ॥ १२३ ॥
धिग्दाशरथिमित्यूचुर्मुनयो वनवर्त्तिनः ।

वालिनमित्यादि । रिपुघातिनं रिपून् हन्तुं शीलमस्येति सुप्यजातौ णिनिः तं वालिनं पतितं दृष्ट्वा वानरा दश ककुभो दश दिशो भेजुः अनाथाः सन्तः स्वामिनो हतत्वात् बान्धवक्रोशिनो बान्धवा इव क्रोशन्तीति कर्त्तुर्यङ्लुपमान इति णिनिः ॥ १२३ ॥ ज० म०

वालिनमित्यादि । वालिनं पतितं दृष्ट्वा वानरा दश ककुभो दिशो भेजुः पलायिता इत्यर्थः रिपुघातिनं रिपुं हन्तीति अहादित्वाण्णिन् बान्धवाक्रोशिनः बान्धववत् आक्रोशन्तः क्रन्दन्तः कर्त्तुर्यङ्लुपमानेणिन्निति परः स्वमते अहादित्वाण्णिन् इवार्थस्य गम्यमानत्वं अनाथाः वालिनाथेन स्वामिरहिताः ॥ १२३ ॥ भ०

धिग्दाशरथिमित्यादि । येषां सत्यन्यस्थाने हत्वौ च वनएव वर्त्तितुं शास्त्रतो नियमः ते वनवर्त्तिनो मुनयः व्रतइति णिनिः धिगिमं दाशरथिमित्यूचुः उक्तवन्तः येनानपराधेऽपि वालिनीदृशं कृतमिति कपिस्त्रियश्च वालिनमुपेयुः मधुपायिन्यः आभीक्ष्ण्येन मधु पिबन्त्यः बहुलमाभीक्ष्ण्ये इति णिनिः क्रोशन्त्यो हा नाथेति रुदन्त्यः ॥ १२४ ॥ ज० म०

धिगित्यादि । दाशरथिं रामं धिगिति वनवर्त्तिनो मुनय ऊचुः महतामन्यासङ्गघातित्वानौचित्यात् धिक्समयेत्यादिना दाशरथेर्द्वितीया वने वर्त्तन्त इति अहादित्वात् णिन् कपिस्त्रियः क्रोशन्त्यो हा नाथेति क्रन्दन्त्यस्तं वालिनं उपेयुरुपगताः उपपूर्व्वस्येण छ्याउसि रूपं मधुपायिन्यः मधूनि पीतवत्यः अहादित्वात् णिन् यन्ञ्णिलृदिति यन् परमते तु आभीक्ष्ण्ये तु णिन् पुनः पुनर्म्मधु पिबन्ति स्मेत्यर्थः आभीक्ष्ण्यार्थस्य णिनोक्तत्वात् न द्वित्वं स्वमतेऽप्यभिधानादेव ॥ १२४ ॥ ०भ

राममित्यादि । कपिप्रभुर्वाली रामसङ्गैर्महताशब्दैनोपालब्ध उपालब्धवान् लभिरात्मनेपद्यनिट् तस्य लुङि झलोझलीति सिचोलोपः झसस्तथोर्धोधः झलाञ्झशीति शूरमानी शूरमात्मानं मन्यमानः आत्मनेपदे खश्चेति चकारात्णिनिः व्रणवेदनया ग्लायन् ग्लानिमुपगच्छन् साधुमन्यं साधुमात्मानं मन्यमानं रामं तेनैव खश् तस्मिन् सार्व्वधातुके परतोदिवादित्वाच्छ्यन् पूर्व्वपदस्य सुम् असाधुवदसाधुमिव असाधुना तुल्यं वर्त्तते इति वतिः ॥ १२५ ॥ ज० म०

उपेयुर्म्मधुपायिन्यः क्रोशन्त्यस्तं कपिस्त्रियः ॥ १२४ ॥
राममुच्चैरुपालब्ध शूरमानी कपिप्रभुः ।
व्रणवेदनया ग्लायन् साधुम्मन्यमसाधुवत् ॥ १२५ ॥
मृषासि त्वं हविर्याजी राघव च्छद्मतापसः ।
अन्यव्यासक्तघातित्वाद्ब्रह्मघ्नां पापसम्मितः ॥ १२६ ॥

राममित्यादि । व्रणवेदनया ग्लायन् कपिप्रभुर्व्वाली उच्चैः शब्देन राममुपालब्ध निन्दितवान् लभेस्तनि झषस्वाज्झसीति सेर्लोपः ढभान्तथोरिति तस्य धः झष्झषोरिति भस्य वः शूरमानी आत्मानं शूरम्मन्यमानः अभिधानात् मन्यतेरात्मनोमनने णिन् यद्वा शूरसम्बन्धिमानो विद्यतेऽस्येति नैकाजादिति ङन् वीराभिमानवानित्यर्थः शूरश्चासौ मानी चेति वा रामं कीदृशं साधुम्मन्यं साधुमात्मानं मन्यमानं भ्रातृवधूहरणेनोचितस्य दण्डस्यैव करणात् मन्यात्स्वार्थे इति खण् शित्त्वाद्ङ्ये दिवादित्त्वात् श्यन् स्त्रिलव्याजिति मन् असाधुवत् असाधुना तुल्यं असाधात् हननात् च्वात्साम्यइति च्वत् असाधुं यथा निन्दति तथोपालब्धेति वा ॥ १२५ ॥ भ०

मृषासीत्यादि । हे राघव त्वं छद्मना तापसः स त्वं मृषैव मिथ्यैव हविर्याजी हविषा करणेनेष्टवानसि न लोकप्राप्तभय इत्यभिप्रायः करणे यज इति भूते णिनिः इतःप्रभृतिभूत इत्यधिक्रियते यतो ब्रह्मघ्नां पापसंमितः ब्रह्म हतवन्त इति ब्रह्मेत्यादिना क्विप् तेषां पापेन तुल्यः कुतः अन्यव्यासक्तघातित्वात् अन्यस्मिन् सुग्रीवे व्यासक्तं मां हतवान् कर्म्मणि हन इति णिनिः तव कुत्सितग्रहणं कर्त्तव्यमित्युक्तं यदि सुग्रीवेण विरोधः किं तवायातमिति कुत्सितहननं ॥ १२६ ॥ ज० म०

मृषेत्यादि । हे राघव त्वं हविर्याजी मृषा स्वर्गादिफलावाप्तये हविषा करणेन इष्टवानिति मिथ्या ग्रहादित्वात् णिन् करणाद्यजोभूतेणिन्निति परः स्वमते करणादिर्भूतकालश्च विशेषानुक्तेरर्थाद्गम्यते यतश्छद्मना तापसः तपस्वी न तु वस्तुतः अन्यव्यासक्तघातित्वात्त्वं ब्रह्मघ्नां ब्रह्माणं हतवतां पापसम्मितः पापेन सम्मितस्तुल्यः तुल्यपापाश्रयत्वात् पुरुषोऽपि तुल्य इत्युच्यते पापेन करणभूतेन ब्रह्मघ्नां तुल्यत्वन्वयः अन्यस्मिन् सुग्रीवे व्यासक्तं हतवानिति ग्रहादित्वात्स्मिन् कर्म्मणोहनः कुत्वायामिति परः हनस्तङ् खेर्हौधोऽणितिचेति धः ततस्त्वतौभाव इति त्वं ब्रह्माणं हतवानिति त्वासुसिति क्विप् ब्रह्मभ्रूणवृत्रेषु क्विप इति

पापकृत्सुकृतां मध्ये राज्ञः पुण्यकृतः सुतः ।
मामपापं दुराचार किं निहत्याभिधास्यसि ॥ १२७ ॥
अग्निचित्सोमसुद्राजा रथचक्रचिदादिषु ।
अनलेष्विष्टवान् कस्मान्न त्वयापेक्षितः पिता ॥ १२८ ॥

परः स्मते अविशेषात् कालत्रयं प्राग्गमत्रातीतविवक्षा सदानोऽक्षोप इत्यकार-लोपे हनोऽक्षो घ्नः ॥ १२६ ॥ भ०

तदेव दर्शयन्नाह पापेत्यादि । हे दुराचार मामपापं निहत्य पापकृत् कृतकिल्बिषः राज्ञो दशरथस्य पुण्यकृतः सुतः सुकृतां मध्ये किमभिधास्यसि वक्ष्यसि किं क्षेपे न किञ्चिदभिधातव्यमस्तीति भावः सर्वत्र सुकर्मापापेत्यादिना क्विप् ॥ १२७ ॥ ज० म०

पापेत्यादि । हे दुराचार अपापं मां निहत्य सुकृतां शोभनक्रियावतां मध्ये किमभिधास्यसि किं वक्ष्यसि यतस्त्वं पुण्यकृतो दशरथस्य सुतः पुत्रोऽपि भूत्वा पापकृत् पापं सुष्ठु पुण्यञ्च कृतवानसि त्वासुसित्यादिना क्विप् पुण्यादेः कर्म्मणः सोपचयः कर्त्तरि भूत इति परः स्मतेऽविशेषात् सर्व्वं विवक्षितम् ॥ १२७ ॥ भ०

अग्निचिदित्यादि । कस्मात्त्वया पिता नापेक्षितः नानुवृत्तः येनैवं कृतवानसीति कीदृशः अग्निचित् आहिताग्निः अग्निं चितवानिति अग्नौचेरिति क्विप् सोमसुत् सोमं सुतवान् सोमयाजी सोमेसुञ इति क्विप् अनलेषु अग्निषु इष्टवान् रथचक्रचिदादिषु रथचक्रवच्चीयत इति कर्म्मण्यग्न्याख्यायामिति क्विप् आदिशब्दाच्छोनचिदादिग्रहणं अग्न्यर्थोहि तदाकारइष्टकाचय इत्युच्यते तद्द्वारेणाग्निरपि ॥ १२८ ॥ ज० म०

अग्नीत्यादि । कथं त्वया पिता दशरथो राजा नापेक्षितः न चिन्तितः नानुवृत्तो वा येनैवं कृतमिति भावः अग्निचित् आहिताग्निः सोमसुत् सोमयाजी रथचक्रचिदादिषु अग्निविशेषेषु इष्टवान् कृतयज्ञः अग्निं चितवान् सोमं सुतवान् रथचक्रवच्चीयते इति च त्वासुसित्यादिना क्विप् रथचक्रचिदादित्यादि शब्दात् श्येनचिदादिष्वपि अग्न्यर्थेरथचक्राद्याकारइष्टकारचना विशेषः क्रियते तद्द्वारेणाग्निरपि रथचक्रचिदादितयाव्यपदिश्यते इष्टवानिति यजेः क्तवतुः अहस्वपाद्योरिति जिः ॥ १२८ ॥ भ०

मांसेत्यादि । मांसविक्रयिणः कुत्सितकर्म्मकारिणो व्याधस्यापि विगर्हितं

मांसविक्रयिणः कर्म व्याधस्यापि विगर्हितम् ।
मां घ्नता भवताकारि निःशङ्कं पापदृष्टना ॥ १२९ ॥
बुद्धिपूर्व्वं ध्रुवन्न त्वा राजकृत्वा पिता खलम् ।
सह युध्यानमन्येन योऽहिनो मामनागसम् ॥ १३० ॥

निन्दितं कर्म्मणीनिर्विक्रिय इति इनिः तत्र कुत्सितग्रहणं कर्त्तव्यमित्युक्तं निकृष्टकर्म्मकरणेनेति यङ्लुवता पापदृष्टना पापं दृष्टवता दृशेः क्विनिप् न संयोगादमन्तादिति अल्लोपप्रतिषेधः कर्म्म अकारि कृतं कर्म्मणि लुङ् निःशङ्कं शङ्कां त्यक्त्वा किं कुर्व्वता मां घ्नता मारयता हन्तेः शतरि गमहनेत्युपधालोपः होहन्तेरिति कुत्वम् ॥ १२९ ॥ ज० म०

मांसेत्यादि । मांसविक्रयिणो व्याधस्यापि यद्विगर्हितं कर्म तत्त्वया मां घ्नता निशङ्कं शङ्कां त्यक्त्वा कृतं पापदृष्टना पापं दृष्टवतापि पापानभिज्ञेन मांसोपजीविना व्याधेनापि अन्यासक्तस्य निष्प्रयोजनत्वाद्धानस्य च हननं निन्द्यते भवता तु पापं जानतापि तत्कृतमिति भावः व्याधस्येति कर्त्तरि सम्बन्धविवक्षा यद्वा व्याधस्यापीदृशं कर्म्म लोकविशेषेण निन्दितमित्यर्थः मांसविक्रयोऽस्यास्तीति नैकाजादिति इन् विक्रीणातेर्भूते कुत्सायामिति परः तन्न साधु अत्र व्याधस्य मांसविक्रयणे कुत्सायाः अभावात् दृसरूपासुसित्यादिना क्विनिप् ॥ १२९ ॥ भ०

बुद्धिपूर्व्वमित्यादि । त्वत्पिता त्वां खलं असाधुचरितं ध्रुवन् गच्छन् ध्रुगतिस्थैर्य्ययोरिति रुदादौ पठ्यते तस्य गतौ ज्ञानार्थे वर्त्तमानस्य शतरि विकरणलोपे उवङादेशे रूपं यत्र राजकृत्वा कस्य तवेत्यर्थात् राजनियुधिकृञ इति क्विनिप् तत्तस्य बुद्धिपूर्व्वं ध्रुवमवश्यं तस्येति व्याख्याने कृत्ययोगे कर्म्मणि षष्ठी भवितव्यं यस्त्वं मामनागसमपापमन्येन सह युध्यानं अन्येन सपत्नीवेण सह योद्धुं प्रवृत्तं सन्हेचेति क्विनिप् अहिनः हिंसितवान् हिंसेर्लङि मध्यमपुरुषैकवचने अमि आत्वलोपे हल्ङ्यादिलोपे रूपं ॥ १३० ॥ ज० म०

बुद्धीत्यादि । खलं दुष्टचरितं त्वां पिता दशरथो यत्र राजकृत्वा राजानं न कृतवान् तद्बुद्धिपूर्व्वं खलत्वविज्ञानपूर्व्वकमेव ध्रुवं निश्चितं त्वामुसित्यादिना क्रञः क्विनिप् खस्यतनूपिति ह्रीचोधीनामित्यादिना त्वादेशः क्वचिदपवादविषयेऽप्युत्सर्गोऽपि प्रवर्त्तत इति न्यायात् ढधेक्रतीत्यस्य विषयेऽपि कर्म्मविक्रयेत्यादिना द्वितीया केचित्तु ध्रुगिस्थैर्य्ये इत्यस्य शतरि ध्रुवन् धातूनामनेकार्थत्वात् ज्ञानार्थः पिता त्वा खलं ध्रुवन् यत्र राजकृत्वा अर्थात्तव तद्बुद्धिपूर्व्वमित्याहुः

पञ्च पञ्चनखा भक्ष्या ये प्रोक्ताः क्रतजैर्द्विजैः ।
कौशल्याज शशादीनां तेषां नैकोऽप्यहं कपिः ॥ १२१ ॥
कथं दुष्टुः स्वयं धर्म्मं प्रजास्त्वं पालयिष्यसि ।
आत्मानुजस्य जिह्रेषि सौमित्रेस्त्वं कथन्न वा ॥ १२२ ॥

अन्ये तु इति निषेधे आशब्दः स्मरणे पीडायां वा राजक्रत्वेत्यत्र तवेत्यर्थाक्षिप्यते मज्ञः प्रश्नेषात् अखलमिति मामित्यस्य वक्ष्यमाणस्य विशेषणमित्याहुः खलत्वमाह यस्त्वं मां अहिनो हतवान् कीदृशं अन्येन सुग्रीवेण सह युध्यानं योद्धुं प्रवृत्तं युधेः पूर्ववत् क्विनिप् अनागसं अनपराधं अहिन इति हिंसिहिंसायां ह्याः सिप् रुधादित्वात् श्नु ननोनलोप्य इति दृदनुबन्धजन्यनकारस्य लोपः हस्वङ्गात्सिसेरिति सेर्लोपः ॥ १२० ॥ भ०

मांसार्थं हत इति चेदाह पञ्चपञ्चेत्यादि । हे कौशल्याज कौशल्याजात सप्तम्यां जनेर्डः ये पञ्च पञ्चनखाः शशकः शल्लकी गोधा खड्गी कूर्मश्च पञ्चम इति क्रतजैः क्रतयुगजातैः सप्तम्यां जनेर्डः द्विजैर्द्विर्जातैः अत्रेष्वपि दृश्यत इति डः सप्तम्यामित्युपलक्षणं असप्तम्यामपि दृश्यते भक्ष्याः भक्षणीयाः प्रोक्ताः तेषामहमेकोऽपि न भविता अहं कपिः तत्किमिति हतोऽहं त्वयेति ॥ १२१ ॥ ज० म०

पञ्चेत्यादि । राजभिर्मांसाय मृगा हन्यन्त इति समानं निराकुर्व्वन्नाह हे कौशल्याज ये पञ्चनखाः पञ्च शशकः शल्लकी गोधा खड्गी कूर्मश्च पञ्चम इत्यादिवाक्येन क्रतजैः सत्ययुगजातैः द्विजैर्ब्रह्मर्षिभिर्भक्षणयोग्याः प्रोक्ताः कथिताः तेषां शशादीनां मध्ये अहं नैकोऽपि यतः कपिरहं अतोऽभक्ष्यत्वान्मम वधोऽयुक्त एव कौशल्यायाः सकाशाज्जातः क्रते जातः द्विर्जात इति च हनजनादिति डः पैतृकधर्म्मोपाहितया कुत्सार्थं मातृस्तोत्रनम् ॥ १२१ ॥ भ०

कथमित्यादि । स्वयमात्मना धर्म्मं दुष्टुः दुस्थः सन् अपदुःसुषुस्थ इत्यौणादिकः कुपत्रयः कथं प्रजाः पालयिष्यसि नैवेति भावः उपसर्गेच संज्ञायामिति जनेर्डः कथं वा सौमित्रेर्भ्रातुरात्मानुजस्य कनीयसः आत्मानमनुजातं स्वनौ कर्म्मणि इति डः न जिह्रेषि न लज्जसे ॥ १२२ ॥ ज० म०

कथमित्यादि । त्वं कथं प्रजाः पालयिष्यसि अपि तु नैवेति भावः यतः स्वयमात्मनो धर्म्मं दुःस्थः दुःखेन तिष्ठतीति हनजनादिति डः दुष्टुरिति पाठे ओणादिकः कुपत्रयः पत्रशब्दाभिधानात् प्रजायन्त इति प्रजा लोकाः पूर्व्वेण

मन्ये किञ्चमहं घ्नन्तं त्वामक्षत्रियजे रणे ।
लक्ष्मणाधिज दुर्वृत्तं प्रयुक्तमनुजेन नः ॥ १२३ ॥
प्रत्यूचे वालिनं रामो नाकृतं कृतवानहम् ।
यज्वभिः सुत्वभिः पूर्व्वैर्जरद्भिश्च कपीश्वर ॥ १२४ ॥

डः स्त्रीत्वं संज्ञा चाभिधानात् आत्मानुजस्य सैमित्रेः कथं न वा जिह्रेषि न लज्जसे आत्मानमनुजातं इति पूर्व्ववत् डः ॥ १२२ ॥ भ०

मन्ये इत्यादि । किञ्चं त्वामहं कुतोऽपि जातं न राजजातं मन्ये पञ्चम्यामजातावितिं डः घ्नन्तं मारयन्तं अक्षत्रियजे रणे क्षत्रियाद्जाते हे लक्ष्मणाधिज लक्ष्मणायज मोऽस्माकमनुजेन भ्राता प्रयुक्तं जातावपि दृश्यते अक्षत्रियज इति उपसर्गे च संज्ञायामित्युक्तं असंज्ञायामपि दृश्यते लक्ष्मणाधिज इति अनौ कर्म्मणीत्युक्तं कर्म्मण्यपि दृश्यते अनुज इति सर्व्वत्रान्येष्वपि दृश्यत इति डः इत्युपपदाधिकारः ॥ १२३ ॥ ज० म०

मन्ये इत्यादि । हे लक्ष्मणाधिज हे दुर्वृत्त दुश्चरित्र अहं त्वां किञ्चं कुतोऽपि जातं कुत्सितादा जातं मन्ये न तु राज्ञो जातं यतः अक्षत्रियजे क्षत्रियाद्जाते रणे मां घ्नन्तं मारयन्तं अस्माकमनुजेन कनिष्ठेन सुग्रीवेण प्रयुक्तं सर्व्वत्र हनजनादिति जनेर्डः परे तु विशेषस्त्वाख्युक्ता अन्यत्रापि दृश्यत इत्यनेन तेषां प्रायिकत्वं बोधयन्ति तथाहि पञ्चम्यन्ताज्जातेर्डः इत्यस्य किञ्च इत्युदाहरणं जातेरपि अक्षत्रियज इत्युदाहृतं उपसर्गात् संज्ञायामित्यस्य प्रजास्वं पालयिष्यसीत्युदाहृतं असंज्ञायामपि अधिज इति कर्म्मणोऽनोरित्यस्य आत्मानुजस्य जिह्रेषीत्युदाहरणं अकर्म्मणोऽपि अनुज इति अतएव महाधिया बोपदेवेन विशेषणोक्तः ॥ १२३ ॥ भ०

प्रत्यूच इत्यादि । रामोऽपि वालिनं प्रत्यूचे प्रत्युक्तवान् किमित्याह हे कपीश्वर पूर्व्वैर्जरद्भिर्वृद्धैः जीर्य्यतेरतृन् यज्वभिः याज्ञिकैः सुत्वभिः सोमयाजिभिः सुयजोर्ङ्वनिप् नाकृतं कृतवानहं अपितु कृतमेव कृतवानहं निष्ठेति भूते क्तवतू ॥ १२४ ॥ ज० म०

प्रत्यूच इत्यादि। रामो वालिनं प्रत्यूचे किं प्रत्युक्तवानित्याह हे कपीश्वर यज्वभिर्याज्ञिकैः सुत्वभिः सोमपोतिभिः पूर्व्वैर्जरद्भिर्वृद्धैर्मान्धात्प्रभृतिभिर्यन्न कृतं तदहं न कृतवान् दृष्टवानिति त्वामुसिति वनिप् सुत्वानिति क्वनिप् स्वस्तनूपिति जीर्य्यतीति शतः जीनोजीर्णोजरन्नपीत्यमरः ॥ १२४ ॥ भ०

ते हि जालैर्गले पाशैस्तिरश्चामुपसेदुषाम् ।
ऋषुणां परदारैश्च सार्द्धं निधनमैषिषुः ॥ १२५ ॥
अहन्तु शुश्रुवान् भ्राता स्त्रियं भुक्तां कनीयसा ।
उपेयिवाननूचानैर्निन्दितस्त्वं लताम्रग ॥ १२६ ॥

ते हीत्यादि । हि यस्मात्ते पूर्व्वोद्दिष्टाः जालैर्गले पाशैश्च तिरश्चां मृगपक्षिसरीसृपाणां तिरोऽञ्चतीति ऋत्विगित्यादिना क्विन् आमि अच इत्यञ्लोपः तेषां निधनं विनाशमैषिषुः दृष्टवन्तः दृषेर्लुङि रूपं कीदृशं उपसेदुषां समीपमुपगतवतां तेषां समीपवर्त्तिनामुपद्रवकारित्वात् भाषायामिति क्वसुः परदारैश्च सार्द्धमूषुषां उषितवतां पूर्व्ववत्क्वसुः वसेर्यजादित्वात्संप्रसारणम् ॥ १२५ ॥ज० म०

तेहीत्यादि । पूर्व्वोक्ते हेतुरयं हि यस्मात् तेऽपि पूर्व्वैर्वृद्धास्तिरश्चां मक्षिमृगादीनां जालैर्गले पाशैश्च निधनं ऐषिषुः इच्छन्ति स्म न केवलं तिरश्चां परदारैः परस्त्रीभिः सार्द्धं ऊषुषां कृतनिवासानाञ्च परदारैः सह वासमग्रिमश्लोके वक्ष्यति अतएव बध्यत्वप्रतिपादकं रूपद्वयमेव त्वयस्ति उभयविशेषणमाह उपसेदुषां समीपमुपगतानां स्वबाह्यस्थितानामप्रीत्यर्थः केचित्तु परदारैः सार्द्धमूषुषामिति तिरश्चामित्यस्य विशेषणं बध्यत्वदर्शनायेत्याहुः तिरोऽञ्चतीति किप् सहसन्निर इति तिर्य्यादेशः तिर्यगञ्चतमृयगिति तिरश्चादेशः उपपूर्व्वसदधीपमवदिति क्वसुः वसोर्धसेकाजिति इम् धुर्हिच्छडीति हित्वं तृफलेति अत एत्वं खिलोपश्च वसोर्वःसेमपीति उः वसेः पूर्व्ववत् क्वसुः इम् च व्यथयहेति खेर्ज्जिः अहखपाद्योरिति प्रकृतेर्ज्जिः क्विलादिति षः दृषु दृक्षायां अन् ऋांसिः अनुस्विद्देः भूयोऽम् ॥ १२५ ॥ भ०

अहमित्यादि । हे लताम्रग हे शाखाम्रग अहं पुनः शुश्रुवान् श्रुतवान् पूर्व्ववत्क्वसुः यदुत भ्राता कनीयसा भुक्तां स्त्रियं त्वमुपेयिवान् सन् अनूचानैर्वेदविद्भिर्निन्दितस्तोमे नैव दोषः उपेयिवाननूचान इति उपेयिवानित्यादिना निपातितौ ॥ १२६ ॥ ज० म०

अहमित्यादि । हे लताम्रग शाखाम्रग अहं शुश्रुवान् किं शुश्रुवानित्याह कनीयसा कनिष्ठेन भ्राता सुग्रीवेण भुक्तां स्त्रियं त्वमुपेयिवान् उपगतोऽसि अतएव अनूचानैर्वेदविद्भिस्त्वं निन्दितः तेन तव बधे मम दोषो नास्तीति भावः हृणोतेरिणश्च पूर्व्ववत् क्वसुः हित्वं वसोर्धसेकाज्जिणात इमित्यस्य खिसहितस्यैकाचोग्रहणं तेन न श्रोरिम् इणस्तु इमि यिणोऽन्यणाविति

अन्वनैषीत्ततो वाली त्रपावानिव राघवम् ।
न्यक्षिपच्चाङ्गदं यत्नात् काकुत्स्थे तनयं प्रियम् ॥ १२६ ॥
म्रियमाणः स सुग्रीवं प्रोचे सद्भावमागतः ।
सम्भविष्याव एकस्यामभिजानासि मातरि ॥ १२८ ॥
अवसाव नगेन्द्रेषु यत्पास्यावो मधूनि च ।
अभिजानीहि तत्सर्वं बन्धूनां समयो ह्ययम् ॥ १२९ ॥

यादेशः खेःकितिर्घः अनुपूर्व्वब्रूञः कानः वचोऽरे पूर्व्ववत् जिः अनूचानः प्रवचने साङ्गेऽधीती गुरोश्च य इत्यमरः । लता ज्योतिष्मती पृक्का शाखा वल्ली प्रियङ्गुरिति विश्वः ॥ १२६ ॥ भ०

अन्वेत्यादि । ततो रामवचनादनन्तरं वाली राघवमन्वनैषीत् अनुनीतवान् देव क्षम्यतां यदजानता मयोक्तमिति नयतेर्लुङ्लिन्वनेन भूतसामान्ये लुङ् त्रपावानिव यथा लज्जावान् कश्चिदनुनयति तद्वत् अङ्गदञ्च प्रियं तनयं काकुत्स्थे रामे न्यक्षिपत् न्यस्तवान् यत्नादादरात् क्षिपेरनद्यतने लङ् लकारप्रत्ययस्यातिङीति प्रतिषेधान्न ङित्त्वम् ॥ १२७ ॥ ज० म०

अन्वेत्यादि । ततो रामवाक्यानन्तरं वाली राघवमन्वनैषीत् अनुनीतवान् णीञ्ञ्यांसिः नेमेकाजिति ह्रस्वनिषेधः व्रजवदेति त्रिः त्रपावानिव वस्तुतो ह्यगस्य भ्रातृवधूहरणेऽपि त्रपा नास्ति किन्तु यथा लज्जावान् कश्चिदनुनयति तद्वत् अङ्गदनामानं प्रियं पुत्रं काकुत्स्थे रामे यत्नात् न्यक्षिपत् समर्पितवान् ॥ १२७ ॥ भ०

म्रियेत्यादि । स वाली म्रियमाणः सन् सद्भावं शोभनभावमागतः सन् सुग्रीवं प्रोचे किमित्याह अभिजानासि स्मरसि एकस्यां मातरि सम्भविष्यावः समभवाव इत्यस्मिन्नर्थे अभिज्ञावचने लृङ्लिन्वनद्यतने लृट् अभिजानासीत्यभिज्ञावचनस्योपपदत्वात् ॥ १२८ ॥ ज० म०

म्रियेत्यादि । म्रियमाणः सन् सद्भावं प्राप्तो वाली सुग्रीवं प्रोचे ब्रूङ्शी वचोऽरे ब्रूङ्शीढेऽमिति शानः तौदादिकः शः ह्रस्वः भ्वोरितीयः किमित्याह एकस्यां मातरि आवां यत्सम्भविष्यावः सम्भूतौ तदभिजानासि स्मर्यैरत्ययदित्वतीत इति भूते तौ ॥ १२८ ॥ भ०

अवेत्यादि । अभिजानीहि स्मर यन्नगेन्द्रेषु अवसाव उषितवन्तौ अत्राभिज्ञावचनस्य यच्छब्दसहितत्वात् न यदीत्यनेन लृटि प्रतिषिद्धे लङेव भवति

दैवं न विदधे नूनं युगपत्सुखमावयोः ।
अश्वद्दभूव तद्दुःस्थं यतो न दृति हाकरोत् ॥ १४० ॥
ददौ स दयितां भ्रातुर्मालाञ्चाग्र्यां हिरण्मयीम् ।
राज्यं सन्दिश्य भोगांश्च ममार व्रणपीडितः ॥ १४१ ॥

अत्र वासमात्रं स्मर्यते मधूनि च यत्पास्यावः तत्र पीतवन्तौ तत्स्मर्त्तमभिजानीहि अत्र विभाषासाकाङ्क्ष इति पक्षे लट् साकाङ्क्षता च प्रयोक्तुर्लक्ष्यलक्षणयोः सम्बन्धे तत्र वासोलक्षणं पानञ्च लक्ष्यमिति यस्माद्बन्धूनामयमेव समयः कालः ॥ १३९ ॥ ज० म०

अवेत्यादि । नगेन्द्रेषु पर्वतश्रेष्ठेषु आवां अवसाव यच्च तत्र मधूनि पास्यावः पीतवन्तौ तत्स्मर्त्तमभिजानीहि स्मर यस्मात् अयं बन्धूनां समयः नेदानीं वैरिचिन्ता युक्तेति भावः वासेकस्मार्थ इति भूते विभाषया तौ वसौ-निवासे धौ ॥ १३९ ॥ भ०

दैवमित्यादि । नूनमवश्यं दैवमावयोः सुखं युगपदेककालं न विदधे न हि विहितवत् परोक्षे लिट् जित्वात्तङ् आतोलोपः यतो यस्मात्तत् दैवं भृशत् नित्यं दुःस्थमननुकूलं नोऽस्माकं बभूव तस्मादितिह एवमकरोत् हृदित्येवं कृतवान् यद्युगपदावयोः सुखविधानं तद्दुःस्थं भृशद्दभूव ह्माकरोदिति भूतानद्यतनपरोक्षे लिटि प्राप्ते हृशत्वतोर्लङ्वेति लङ् चकारात् लिट् तत्र भृशच्छब्दे उपपदे लिडेवोदाहृतः न लङ् हृशब्दे लङेव न लिङपीति ॥ १४० ॥ ज० म०

दैवमित्यादि । नूनं निश्चितं दैवं कर्त्र युगपदेकदा नावयोः सुखं विदधे चकार धाञ्ञ्यां उस्येवोत्यादिना आलोपः यतस्तद्दैवं नोऽस्माकं भृशन्नित्यं दुःस्थं प्रतिकूलं बभूव तस्मादिति प्रागुक्तं युगपत् सुखाभावं अकरोत् ह्मा विषादे ह पादपूरणे वा प्रारम्भ्यर्थप्रसिद्धौ स्यादेतिह्यभिति ह्याव्ययमिति दर्शनात् प्रारम्भ्यर्थप्रसिद्धिमकरोदिति केचित् इति लोकापवादागमयोरिति वर्द्धमानवचनात् लोकापवादं भ्रातृवधूगमनरूपमकरोदिति केचित् यत्तदोः परम्पराकाङ्क्षया तत इति गम्यते ॥ १४० ॥ भ०

ददावित्यादि । स बाली दयितां ताराख्यां भ्रातृ सुग्रीवाय ददौ मालां चाग्र्यां श्रेष्ठां हिरण्मयीं सुवर्णघटितां राज्यं सामात्यादिद्रव्यप्रकृतिं सन्दिश्य दत्वा भोगांश्च राज्याङ्गानि ममार व्रणपीडितः सत्यपि परोक्षे लिट् ॥ १४१ ॥ ज० म०

तस्य निर्व्वर्त्त्य कर्त्तव्यं सुग्रीवो राघवाज्ञया ।
किष्किन्ध्याद्रिगुहां गन्तुं मनः प्रणिदधे द्रुतम् ॥ १४२ ॥
नामग्राहं कपिभिरग्रनैः स्तूयमानःसमन्ता
दन्वग्भावं रघुवृषभयोर्व्वानरेन्द्रो विराजन् ।

ददावित्यादि । स वाली भ्रात्रे सुग्रीवाय दयितां स्वप्रियां हिरण्मयीं स्वर्णमयीं स्वर्णघटितां मालाञ्च ददौ अग्र्यां श्रेष्ठामित्युभयविशेषणं हिरण्यस्य विकारो हिरण्मय इति निपातनात् मयट् यलोपश्च ततो राज्यं भोगांश्च सन्दिश्य दत्वा व्रणपीडितः सन् ममार मृतः ॥ १४१ ॥ भ०

तस्येत्यादि । तस्य मृतस्य कर्त्तव्यं पिण्डोदकादिकरणीयं कृत्वा सुग्रीवो राघवाज्ञया गच्छ वर्षासमयमतीत्य शरद्यागमिष्यसीति आज्ञया किष्किन्ध्याद्रिगुहां गन्तुं मनः प्रणिदधे कृतवान् अत्रापि परोक्षे लिट् ॥ १४२ ॥ ज० म०

तस्येत्यादि । तस्य मृतस्य बालिनः कर्त्तव्यं कर्तुरुचितं पिण्डोदकदानादि निर्व्वर्त्य अङ्गदद्वारा स्वयञ्च यथायोग्यं निष्पाद्य राघवस्याज्ञया किष्किन्ध्यानाम्नीमद्रिगुहां द्रुतं शीघ्रं गन्तुं मनः प्रणिदधे चकार धाञर्थो प्राग्वद्भोग इति णत्वं किष्किन्ध्याद्रिगुहेति सुमेरुपर्व्वतादिवत् एकार्थत्वे कर्म्मधारयः ॥ १४२ ॥ भ०

नामेत्यादि । वानरेन्द्रः सुग्रीवः किष्किन्ध्याद्रिं न्यविशत निविष्टवान् नेर्विश इति तङ् अग्रनैः सुष्ठु कपिभिस्तूयमानः वर्त्तमाने लट् तस्य कर्म्मणि विहितत्वात् लक्षणहेत्वोः क्रियाया इति शानच् नामग्राहं नाम गृहीत्वा नाम्नादिग्रिग्रहोरिति णमुल् समन्तात्सर्व्वतः विराजन् शोभमानः अत्र परस्मैपदसंज्ञकः शब्दः किं कृत्वा रघुवृषभयोरन्वग्भावं अनुकूलो भूत्वा अन्वक्पूर्व्वाद्भवतेरन्यच्यानुलोम्य इति णमुल् तदनुकूलवर्त्तित्वाद्विराजन् कदा न्यविशत अभ्यर्णे निकटे अस्माःपतनसमये प्राह्णीत्यर्थः पर्णलीभूतसानुं पर्णानि सन्ति येषामिति सिध्मादिपाठाल्लच् तदन्तादभूततद्भावे च्विः पर्णलीभूताः सानव एकदेशा यस्याद्रेः मधुव्रीवा मधुमत्ता गुञ्जन्तो द्विरेफा यत्र व्रीव इत्यत्रानुपसर्गात्क्लुव्रीवक्लोशृघा इति निपातितः व्रीडमद इत्यस्मात् क्तप्रत्ययस्य लोपः डडभावश्च निपात्यते शुङ्गेर्लट् क्वचित्प्रथमासमानाधिकरणेऽपि शतृप्रत्ययः । इति सोपपदक्रतः ॥ १४३ ॥ ज० म०

इति भट्टिकाव्यटीकायां जयमङ्गलायामधिकारकाण्डे प्रथमः परिच्छेदः ।
रामस्य सुग्रीवाभिषेको नाम षष्ठः सर्गः ॥

अभ्यर्णोऽम्भः पतनसमये पर्णलीभूतसानुं
किष्किन्धाद्रिं न्यविशत मधुस्त्रोवगुञ्जद्द्विरेफम् ॥ १४३ ॥
इति भट्टिकाव्ये वालिवधो नामाधिकारकाण्डे षष्ठः सर्गः ।

नामेत्यादि । वानरेन्द्रः सुग्रीवः किष्किन्धया गुहाविशेषेणोपलक्षित-मद्रिं न्यविशत प्रविष्टवान् शौविशप्रवेशे विपरीतीति मं कीदृशः अम्भसैरुच्चैः समन्तात् सर्वतो नामग्राहं नाम गृहीत्वा कपिभिः स्तूयमानः कर्म्मणि ग्रानः रतनोरिति यकि घौऽज्यऽरे रघुवृषभयो रामलक्ष्मणयोः अन्वग्भावं अनुकूलो भूत्वा विराजमानः उत्तरपदे वृषभादिशब्दः श्रेष्ठवाचकः स्वभावात् रामकार्य्यं त्यक्त्वा कुतो गृहं गत इत्याह अम्भःपतनसमये वर्षाकाले अभ्यर्णे समीपवर्त्तिनि सति तदा प्रयाणानौचित्यात् तयोराज्ञया गृहं गत इत्यर्थः अभ्यर्ण इति अर्हः क्लान्तस्य समीपार्थे चुम्बवाढेत्यादिना निपातः कीदृशमद्रिं पल्वलीभूताः सानव एकदेशा यस्य यादृशं वेशन्तः पल्वलञ्चाल्पसर इत्यमरः स्त्रियां क्वचिति स्त्रियां अकारस्य ईत्वञ्च मधुना स्त्रोवा मत्ता गुञ्जन्तो द्विरेफा भ्रमरा यत्र स्त्रीदृङ् दर्शनं त्यस्य क्लान्तस्य स्त्रीवः पूर्व्वेण निपातितः नामग्राहमिति कर्म्मरूपं नाम्न आदिशिष्य ड्भ्यां चणमिति परः स्वमतेऽभिधानात् किम्वा नाम्नो ग्राहो ग्रहणं यत्रेति स्तुतिक्रियाविशेषणं अन्वग्भावमिति आनुकूल्येऽन्वोभुवस्णमिति परः स्वमते ऽन्वाप्यभिधानात् यद्वा रघुवृषभविषये अनुगतो भावो यत्रेति दीप्तिक्रियाविशेषणं एतेन विनयित्वं दर्शितं । इति सोपपदक्रदधिकारः ॥ १४३ ॥ भ०

इति सद्वैद्यहरिहरखानवंशसम्भवगौराङ्गमल्लीकान्तात्मजश्रीभरतसेनविरचितायां सुग्धबोधिन्यां भट्टिटीकायामधिकारकाण्डे प्रथमपरिच्छेदः । काव्यस्य षष्ठः सर्गः ॥

सप्तमः सर्गः।

ततः कर्त्ता वनाकम्मं ववौ वर्षाप्रभञ्जनः।
नभः पूरयितारश्च ससुन्नेसुः पयोधराः॥ १॥

इतस्ताळीलिकं कृतमधिकृत्योच्यते ताळीलिकमित्युपलक्षणं तद्धर्म्मतत्साधुकारिष्वपि द्रष्टव्यं यत आकृस्तळीलतद्धर्म्मतत्साधुकारिष्विति तत्राधिक्रियते। तत इत्यादि। ततः प्रवेशानन्तरं वर्षाप्रभञ्जनः प्रावृड्वातो ववौ वाति स्म वागतिगन्धनयोरिति कर्त्ता वनाकम्मं साधु कुर्व्वन् तृन्निति तृन् न लोकेति षष्ठीप्रतिषेधः पयोधरा मेघाश्च ससुन्नेसुः ससुन्नताः कीदृशा नभः पूरयितारः तृन्॥ १॥ ज० म०

अथ ताळीलिकाः कृत उच्यन्ते। ताळीलिका इत्युपलक्षणं परमते तच्छीलतद्धर्म्मतत्साधुकारिष्वर्थेषु तृनादिदर्शनात् स्वमते यद्यपि तृनादीष्वादिविधायकसूत्रेषु तच्छीलाद्यर्थो नोक्तस्तथापि ढघेक्ततीत्यादौ शीलार्थतृनुभव्यर्णार्थिणिनीति ज्ञापकात् तृनिष्वादयः कतिचित्प्रत्यया अभिधानात् शीलाद्यर्थेष्वपि भवन्तीति बोध्यं उक्तं हि कृत्तद्धितसमासानामभिधानं नियामकमिति शीलाद्यर्थाकथनेऽपि नाधिक्षतिः प्रकृतार्थस्य तद्बोधकत्वात् तथाहि ततः कर्त्ता वनाकम्ममित्यादौ वनस्य ईषत्कम्मकारित्वेनैव वायोः साधुत्वं गम्यते एवमन्यत्रापि। तत इत्यादि। ततोऽनन्तरं वर्षाकालसम्बन्धी प्रभञ्जनो वायुर्व्ववौ वहति स्म बालगमनहिंसयोः णवातोर्डौ कीदृशः वनानामीषत्कम्पनं कर्त्ता साधु कुर्व्वन् एतेन मान्द्यं सौगन्ध्यञ्च परमते साधुकारिणि तृन् स्वमते ईषत्कम्मकारित्वेनैव साधुत्वं गम्यते तृस्कौघे इति तृन् ढघेक्ततीत्यादौ शीलार्थतृन्निति शीलार्थ इत्युपलक्षणं तेन तत्साधुकार्य्यस्यापि ग्रहणं शीलार्थतृन्नित्यत्र शीलाद्यर्थ तृन्निति पाठं केचिद्वदन्ति किम्वा शीलार्थे तृन् वनानामीषत्कम्पकरणशील इत्यर्थः अतएव कर्म्मणि न षष्ठी वर्षासु वायोरतिशयत्वं वर्णनीयमिति सम्प्रदायानुरोधात् वनानामाकम्मं कर्त्तेति केचित् पयोधरा मेघाः ससुन्नेसुः सम्यगुन्नताः परिदृष्टा बभूवुः दिशो व्याप्नुवन्त इत्यर्थः नमेरूसि तृफलेत्यादिना अतएव खिलोपश्च

तर्पणं प्रजनिष्णूनां शस्यानाममलं पयः ।
रोचिष्णवः सविस्फूर्ज्जा सुसुचुर्भिन्नवद्घनाः ॥ २ ॥
निराकरिष्णवो भानुं दिवं वर्त्तिष्णवोऽभितः ।
अलङ्करिष्णवो भान्तस्तडित्वन्तश्चरिष्णवः ॥ ३ ॥

पयोधरतीति पचादित्वादन् पयोधरतीति वाक्ये ढात्वस्थित्यस्य विषयाशङ्का चेत् तदा धरतीति धरः पयसोधरः पयोधर इति वाक्यं कीदृशाः नभ आकाशं पूरयितारः पूरणशीलाः पूरक् पूर्त्तौ पूर्ब्बवत् ॥ १ ॥ भ०

तर्पणमित्यादि । घना अमलं पयो सुसुचुः भिन्नवत् भिन्ना इव कीदृशं पयः तर्पणं शस्यानां तर्पणं तर्पयतीति ल्युट्यल्युटोबहुलमिति कर्त्तरि ल्युट् प्रजनिष्णूनां साधु प्रादुर्भवतां रोचिष्णवः साधु दीप्यमानाः सविस्फूर्जाः सवज्रनिस्वनाः अलंक्रञ्जित्यादिना ष्णुच् ॥ २ ॥ ज० भ०

तर्पणमित्यादि । घना निर्म्मलं पयो सुसुचुः त्यक्तवन्तः भिन्नवत् भग्ना इव यथा घटादयो भग्नाः सन्तो बहुजलं त्यजन्ति तद्वत् कीदृशं पयः प्रजनिष्णूनां प्रकृष्टजननशीलानां साधु प्रादुर्भवतां वा शस्यानां तर्पणं तृप्तिकारकं तर्पयतीति नन्द्यादित्वादनः परमतेऽत्रापि शीलार्थः कुक्कविकाव्यमिव नीरसस्य रमणीयमिति देशवर्णनायां श्लेषात् सस्यशब्दोदन्यद्दयवानित्येके तालव्या अपि दन्त्याः सुः शस्यशूकरशालय इत्यन्ये घनाः कीदृशाः रोचिष्णवो दीप्तिशीलाः साधु दीप्यमाना वा सविस्फूर्जा वज्रनिर्घोषसहिताः जिभ्राजभूसुहेत्यादिना प्रपूर्ब्बजनेरुचश्च ष्णुः ट्वोस्फूर्ज्जावज्रनिर्घोषे सेमक्लात्सरोरिति ञः ॥ २ ॥ भ०

निरेत्यादि । भानुं निराकरिष्णवो निराकरणशीला घनाः पयो सुसुचुरिति योज्यं दिवमभितो वर्त्तिष्णव आकाशमभितो वर्त्तनस्वभावाः पूर्ब्बपश्चिमयोर्व्वर्त्तनहेतुत्वात् पर्य्यभिभ्यां सर्वोभयार्थे तसिः अभितः परित इति द्वितीया तडित्वन्तः सविद्युतः अतएव भान्तो दीप्यमानाः एवञ्च कृत्वा अलङ्करिष्णवोऽलङ्करणशीला इव दिशश्चरिष्णवः इतस्ततो गमनशीलाः पूर्ब्बवदिष्णुच् ॥ ३ ॥ ज० भ०

निरेत्यादि । कीदृशा घनाः भानुं निराकरिष्णव आछादका इत्यर्थः दिवमभित आकाशस्योभयभागे पूर्ब्बे पश्चिमे च वर्त्तनशीलाः धिक्समयेत्यादिना अभियोगे द्वितीया तडित्वन्तो विद्युद्युक्ताः अतएव भान्तो दीप्यमानाः एवञ्चालङ्करिष्णवो दिवमिति सम्बध्यते साधु भूषयन्तः चरिष्णवः इतस्ततो गमनशीलाः

तान् विलोक्यासहिष्णुः सन् विललापोन्मदिष्णुवत् ।
वसन् माल्यवति ग्लास्नूरामो जिष्णुरधृष्णुवत् ॥ ३ ॥
भ्रमी कदम्बसंभिन्नः पवनः श्रमिनामपि ।
क्लमित्वं कुरुतेऽत्यर्थं मेघशीकरशीतलः ॥ ५ ॥

पूर्व्वेण दृष्णुः ढवेक्रतीत्यादौ उदन्तवर्ज्जनात् न कर्म्मणि षष्ठी तडिच्छब्दात् मोऽनुभूपाहतुः नदन्तसाविति पदनिषेधात् न चपोऽवेजव् इत्यनेन तकारस्य दत्वं यद्यपि तडित्वान् वारिदोऽम्बुभृदित्यमरेणोक्तं तथाप्यत्र विद्यमानतडिद्योगप्रतिपत्त्यर्थमुक्तं अत्र तु गोशब्दादिवद्वृद्धिरेव यद्वा तडित्वन्तो मेघाः पयो मुमुचुः कीदृशाः घना निविडाः ॥ २ ॥ भ०

तानित्यादि । तान् घनान्विलोक्य असहिष्णुरसहनशीलो रामः माल्यवति पर्व्वते वसन्विललाप उन्मदिष्णुवत् उन्मादनशीलः उन्मत्तस्तद्वत् पूर्व्ववदिष्णुच् ग्लास्नुः ग्लानशीलः जिष्णुर्जयशीलः अधृष्णुवदप्रगल्भ इव शोकाभिभूतत्वात् ग्लाजिस्थश्वष्णुः धृष्णुरिति त्वसिगटधोत्यादिना क्नुः ॥ ४ ॥ ज० म०

तानित्यादि । तान् घनान् विलोक्य असहिष्णुः सन् असमाशीलो भवन् रामो माल्यवति पर्व्वते वसन् उन्मदिष्णुवदुन्मत्तवत् विललाप विलापं कृतवान् सन् पण्डितोऽपि उन्मदिष्णुरिव विललापेति वा योजना जिष्णुर्जयशीलोऽपि अधृष्णुवत् अप्रगल्भ इव ग्लास्नुः ग्लानिशीलः सहोन्मदिभ्यां पूर्व्वेण दृष्णुः ग्लाग्लास्येत्यादिना ग्लायतेः स्नुः ष्णुक्भूजेरिति जयतेः ष्णुक् त्विपत्वसगटधेत्यादिना धृषः क्नुः ॥ ४ ॥ भ०

किं तद्विललपनमित्याह भ्रमीत्यादि । भ्रमी भ्रमणशीलः कदम्बसम्भिन्नः कदम्बगन्धसंश्लिष्टः श्रमिनामपि श्रमनशीलानामपि क्लमित्वं कुरुते अत्यर्थं ग्लानिं कुरुते श्रमित्यष्टाभ्योषिनुण् नोदात्तोपदेशेत्यादिना उपधावृद्धिप्रतिषेधः ॥ ५ ॥ ज० म०

भ्रमीत्यादि । इतःप्रभृति एवं विललापेति पूर्व्वेण सम्बन्धः पवनः श्रमिनां ग्लानिशीलानामपि क्लमित्वं मनसो ग्लानिशीलत्वं कामहेतुकमित्यर्थात् अत्यर्थं अतिशयितं कुरुते कीदृशः भ्रमी भ्रमणशीलः मन्दत्वात् कदम्बपुष्पेण सम्भिन्नः सुरभीकृत इत्यर्थः मेघस्य शीकरैः शीतलः शीकरोऽम्बुकणाः स्मृता इत्यमरः भ्रम्यचाले श्रमुश्रथ दूर्गमे क्लमुभिर्ग्लानौ एभ्यो ग्रहादित्वात् णिन् जनबधः सेम इति क्लमः ॥ ५ ॥ भ०

संज्वारिणेव मनसा ध्वान्तमायासिना मया ।
द्रोहि खद्योतसम्पर्कि नयनामोषि दुःसहम् ॥ ६ ॥
कुर्व्वन्ति परिसारिण्यो विद्युतः परिदेविनम् ।
अभ्याघातिभिरामिश्रा घातकैः परिराटिभिः ॥ ७ ॥
संसर्गी परिदाहीव शीतोऽप्याभाति शीकरः ।
सोढुमाक्रीडिनोऽशक्याः शिखिनः परिवादिनः ॥ ८ ॥

संज्वेत्यादि । मयैतत् ध्वान्तं तमो दुःसहं दुःखेन सह्यत इति मनसा करणभूतेन कीदृशेन संज्वारिणेव रोगशीलेनेव आयासिना आयासशीलेन मयेति द्रोहि अपकारशीलं ध्वान्तं खद्योतसम्पर्कि ज्योतिरिङ्गणसंसर्गशीलं नयनामोषि चक्षुर्मोषणशीलं संपृचानुरुधेत्यादिना सर्व्व घिनुण्यन्ताः ॥६॥ज०म०

संज्वेत्यादि । मया मनसा करणेन ध्वान्तं तमो दुःसहं दुःखेन सह्यते संज्वारिणेव रोगशीलेनेव आयासशीलेन ध्वान्तं कुतो दुःसहं इत्याह द्रोहि अपकारशीलं खद्योतसम्पर्कि ज्योतिरिङ्गणसंसर्गशीलं नयनामोषि नेत्रापहारकं ज्वर्म्मरोगे दृर्यस्युयतने ल्हदुह्युजिघांसे पृच्धीचसंपर्के सघलुटने एभ्योपहादित्वात् णिन् पृचः कङ् निपातात् एभ्यो घञन्तेभ्योऽस्त्यर्थे इन् वा ॥६॥ भ०

कुर्व्वन्तीत्यादि । एता विद्युतः परिदेविनं परिदेवनशीलं कुर्व्वन्ति मामित्यर्थात् कीदृश्यः परिसारिण्यः परिसरणशीलाः घातकैः पक्षिविशेषैः परिराटिभिः परिरटनशीलैः एवम्भाभ्याघातिभिः अभिहननशीलैः दुःखोत्पादनात् आमिश्रा युक्ताः विद्युतः पूर्व्ववद्विनुण् ॥ ७ ॥ ज० म०

कुर्व्वेत्यादि । विद्युतोऽर्थान्मां परिदेविनं विलापशीलं कुर्व्वन्ति परिसारिण्यः परिसरणशीलाः दुःखोत्पादकतया अभिहननशीलैः परितो रटनशीलैश्चातकैः पक्षिविशेषैर्युक्ताः स्वगतौ देवदेवने बधे रटवाचि एभ्यो अहादित्वाणिन् विपूर्व्वात् द्योतनेः क्विप् विद्युत् ॥ ७ ॥ भ०

संसर्गीत्यादि । संसर्गी संसर्जनशीलः शीतोऽपि शीकरो विन्दुः परिदाहीव परिदहनशील इवाभाति शिखिनश्च मयूराः सोढुमशक्याः आक्रीडिनो नर्त्तनशीलाः परिवादिनः परिवदनशीला इव इवशब्दस्यात्र लुप्तो द्रष्टव्यः पूर्व्ववद्विनुण् ॥ ८ ॥ ज० म०

संसेत्यादि । शीकरः शीतोऽपि संसर्गसाधुकारी अपि सन् परिदहनशील

एता दैवानुरोधिन्यो द्वेषिण्य इव रागिणम् ।
पीडयन्ति जनं धाराः पतन्त्योऽनपकारिणम् ॥ ९ ॥
कुर्य्याद्योगिनमप्येष स्फूर्जावान् परिमोक्षिनम् ।
त्यागिनं सुखदुःखस्य परिक्षेप्यम्भसाहृतुः ॥ १० ॥
विकत्थी याचते प्रत्तमविभ्रमी सुहृज्जलम् ।

इव आभाति शिखिनो मयूराः सोदुमशक्याः क्रीडशाः आक्रीडनशीलाः परि सर्व्वतो वदनशीलाः साधुभाषिणो वा रङ्गोऽपधकानासन्निनाविति क्षापकात् क्षति घिन्नि प्रत्ययोऽस्तीति प्राप्तं तेन सृजेर्घिनि चजोःकगाविति गत्वं घञन्ता-दस्यर्थे इन् वा दहिक्रीडवदिभ्यो यङ्हादित्वात् णिन् ॥ ८ ॥ भ०

एता इत्यादि । एता धाराः पतन्त्यो द्वेषिण्य इव द्वेषणशीला इव जनं रागिणं रागशीलं अनपकारिणमनपराधशीलं पीडयन्ति दैवानुरोधिन्यः भाग्यानुरोधात् प्रवर्त्तनशीलाः पूर्व्ववत् घिनुण् घिनुनि च रङ्गेरुपसंख्यानमित्य-नुनासिकलोपः कृतान्नुनासिकनिर्द्देशाद्वा लोपनिपातनम् ॥ ९ ॥ ज० म०

एता इत्यादि । एताः पतन्त्यो धाराः द्वेषशीला इव अनपकारशीलमपि जनं पीडयन्ति दैवानुरोधात् प्रवर्त्तनशीलाः रुधद्विषद्भ्यो यङ्हादित्वात् णिन् रनृजेः संसर्गिवत् घिनि रनृजोऽपसर्गेति नलोपः घञन्तनिष्पादितरागशब्दात् इन् वा ॥ ९ ॥ भ०

कुर्य्यादित्यादि । एष ऋतुरम्भसां जलानां परिक्षेपी परित्यजनशीलः कर्म्मणि षष्ठी योगिनमपि योगशीलमपि सुखदुःखस्य त्यागिनं त्यागशीलं कर्म्मणि षष्ठी परिमोक्षिनं परिमोक्षनशीलं कुर्य्यात् कीदृशः स्फूर्जावान् वज्रनिर्घोषयुक्तः पूर्व्ववद्घिनुण् ॥ १० ॥ ज० म०

कुर्य्यादित्यादि । एषोऽम्भसां परिक्षेपी परित्यागशील ऋतुर्योगिनं शास्त्रवि-धिना योगे साधुकारिणमपि सुखदुःखस्य त्यागशीलमपि परि सर्व्वतो मोक्षशीलं कुर्य्यात् यतः स्फूर्जावान् वज्रनिर्घोषयुक्तः तेन कामस्य भयस्य चोत्पादात् केचित्तु योगिनं कान्तायुक्तं वज्रनिर्घोषेण सुखत्यागिनं कान्तालिङ्गनेन च दुःखत्यागिनमित्याहुः युजेः संसर्गिवत् घिनुण् घञन्तादिन् वा सुहृत्तिपिभ्यां यङ्हादित्वान्निन् ॥ १० ॥ भ०

विकत्थादि । चातको मानसं निकृन्तन्निव खण्डयन्निव प्रत्तं प्रदत्तं अचउपसर्गात्तः जलं याचत इति प्रधानं कर्म्म पर्य्यन्यमित्यकथितं विकत्थी

पर्ज्जन्यचातकः पत्ती निकृन्तन्निव मानसम् ॥ ११ ॥
प्रलापिनो भविष्यन्ति कदा न्वेतेऽपलाषिणः ।
प्रमाथिनो वियुक्तानां हिंसकाः पापदर्दुराः ॥ १२ ॥
निन्दको रजनिम्मन्यं दिवसं क्लेशको निशाम् ।
प्राट्यनैषीत् काकुत्स्थः कथञ्चित्परिदेवकः ॥ १३ ॥

विकत्थनशील इव पर्ज्जन्योऽपि मह्यं जलं ददाति इवशब्दोलुप्तोऽत्र द्रष्टव्यः अविस्रम्भी अविश्वासशीलः मानसखण्डनात् वौकषलसेति घिनुण् ॥११॥ज०भ०

विकेत्यादि । चातकः पक्षिविशेषो मम मानसं निकृन्तन्निव खण्डयन्निव व्योम्नि सञ्चः पुनः पुनः प्रदत्तमपि जलं पर्य्यन्यं मेघं याचते याचिर्द्विकर्म्मकः यतोऽविस्रम्भी अविश्वासशीलः तृषाव्याकुलत्वात् प्राप्तेऽपि जले जलं याचत इत्यर्थः विकत्थी श्लाघाशीलः कत्थङ्श्लाघे खन्मुङ्विश्वासे दन्त्यादिः आभ्यां अकृदित्वात् णिन् प्रपूर्व्वस्य दाञोग्यचस्तवेति तादेशः ष्टुत्वेकेत्यस्यान्यप्रत्यये चवर्गतृतीयो निपात औणादिक इत्यर्ज्जुनदत्तः कृतीशपछिदि सुचादित्वात् नुणरधोसचामिति नुण् ॥ ११ ॥ भ०

प्रलापीत्यादि । एते पापदर्दुराः पापास्च ते दर्दुरास्तेत्याक्रोशाभिधानं कदा नु अपलाषिणो भविष्यन्ति अपलषणशीलाः व्यपगतकामा इत्यर्थः लषकान्तौ अमेचलष इति घिनुण् प्रलापिनः प्रलपनशीलाः प्रमाथिनः प्रमथनशीलाः चेतसामित्यर्थात् प्रेलमेत्यादिना घिनुण् अतएव वियुक्तानां भार्य्याविरहिणां प्रमाथिनः साधुप्रमथनकारिणः यतो हिंसकाः हिंसाशीलाः लषलषभ्यो अकृदित्वात् णिन् हिंसेः लषकौघे इति णकः एवं विललापेति सम्बन्धनीयमेतत्पर्य्यन्तम् ॥ १२ ॥ भ०

निन्देत्यादि । काकुत्स्थो दिवसं रजनिम्मन्यं रजनीमात्मानं मन्यमानं घनान्धकारित्वात् आत्ममानेखञ् खित्यनव्ययस्येति ह्रस्वत्वं निशाञ्च प्राट्षि कथमप्यनैषीत् नीतवान् निन्दकः निन्दनशीलः नक्तन्दिनसेत्यर्थात् क्लेशकः क्लेशनशीलः परिदेवकः परिदेवनशीलः आत्मन इत्यर्थात् ॥ १३ ॥ ज० भ०

अथोपशरदेऽपश्यत् क्रौञ्चानाञ्चेष्टनैः कुलैः ।
उत्कण्ठावर्द्धनैः शुभ्रं रवणैरम्बरं ततम् ॥ १४ ॥
विलोक्य द्योतनं चन्द्रं लक्ष्मणं शोचनोऽवदत् ।
पश्य दन्द्रमणान् हंसानरविन्दसमुत्सुकान् ॥ १५ ॥

निन्देत्यादि । काकुत्स्थः प्रावृषि वर्षाकाले कथञ्चित् कथमपि दिवसं निशाञ्च अनैषीत् गमयामास कीदृशः निन्दकः निन्दाशीलः अर्थादात्मनः दिन-रात्रयोर्वा दिवसं निशाञ्च निन्दक इति ये वदन्ति तन्मते ढौकनशीलादौ शीलार्थ-त्वन्नित्यत्र त्वन्नित्युपलक्षणं शीलार्थे णकस्यापि ग्रहणं तेन न षष्ठी क्लेशकः क्लेशशीलः परिदेवकः साधु देवनकारी सन् दिवसं कीदृशं रजनिमन्यं आत्मानं रजनिं रात्रिं मन्यमानं तत्तुल्यमिति यावत् घनान्धकारात् णिदिक्लिशिदेविभ्यः ल्युकौघे इति णकः ॥ १३ ॥ भ०

अथेत्यादि । अथानन्तरमुपशरदे शरत्समीप इत्यव्ययीभावे शरत्प्रभृतिभ्य इति समासान्तष्टच् ष्टतीयासप्तम्योर्बहुलमित्यमभावः क्रौञ्चानां कुलैस्ततं व्याप्तम-म्बरं शुभ्रं शुक्लमपश्यत् दृष्टवान् चेष्टनैः व्यापारशीलैः रवणैः शब्दनशीलैः अनयो-श्चलनशब्दार्थत्वात् चलनशब्देत्यादिना युच् उत्कण्ठावर्द्धनैः उत्कण्ठावर्द्धनशीलैः अनुदात्तेत इति युच् क्रौञ्च इति किन्प्रत्ययान्तत्वात् प्रज्ञादित्वादण् ॥ १४ ॥ज० म०

अथेत्यादि । अथानन्तरं उपशरदे शरत्कालस्य समीपे काकुत्स्थोऽम्बर-माकाशमपश्यत् कीदृशं क्रौञ्चानां पक्षिविशेषाणां कुलैः समूहैः ततं व्याप्तं अतएव शुभ्रं धवलं कीदृशैश्चेष्टनैः साधुचेष्टां कुर्वद्भिः उत्कण्ठाया भार्य्याविषयि-काया वर्द्धनैः वृद्धिशीलैः साधूत्कण्ठावृद्धिकारिभिर्वा रवणैः साधुशब्दं कुर्वद्भिः चेष्टवधिरुभ्योनन्द्यादित्वादनः वधिरत्व अत्रनः शरदोऽव्ययीभावे शरद्विषाडय इति अः स्त्रीप्रत्ययेति पक्षे मप्रकृत्तिः क्रुञ्चेव क्रौञ्चः स्वार्थे ष्णः ॥ १४ ॥ भ०

विलोक्येत्यादि । चन्द्रं विलोक्य द्योतनं साधुद्योतमानं अनुदात्तेत-श्चेति युच् शोचनः शोचनशीलः जुचङ्क्रम्येत्यादिना युच् रामो लक्ष्मणमवदत् पश्य हंसान् दन्द्रमणान् घनैर्द्रमणशीलान् द्रमेर्निम्नं कौटिल्य एव भवति नतु क्रियासमभिहार इत्युक्तं तदल्लाद्युच् अतोलोपः यस्यहलः अरविन्दसमुत्सुकान् प्रक्षितेति सप्तमीं विधाय सप्तमीति योगविभागात्सः ॥ १५ ॥ ज० म०

विलोक्येत्यादि । चन्द्रं विलोक्य रामो लक्ष्मणमब्रवीत् चन्द्रं कीदृशं द्योतनं द्योतमानं शोचनः शोकशीलो रामः किमुक्तवानित्याह हंसान् त्वं पश्य

कपिश्चङ्क्रमणोऽद्यापि नासौ भवति गर्द्धनः ।
कुर्व्वन्ति कोपनं तारा मण्डनं गगणस्य माम् ॥ १६ ॥
नावैत्याप्यायितारं किं कमलानि रविं कपिः ।
दीपितारं दिनारम्भे निरस्तध्वान्तसञ्चयम् ॥ १७ ॥

कीदृशान् दन्द्रमणान् कुटिलगमनशीलान् अरविन्देषु पद्मेषु सम्भृतसुकान् द्युत-द्युचयङ्लुगन्तद्रभिभ्योनन्द्यादित्वादनः विपरीतदिशां देशानां गमनमिह वक्रम् ॥ १५ ॥ भ०

कपिरित्यादि । नासौ कपिः सुग्रीवोऽद्यापि चङ्क्रमणः शनैर्गमनशीलो न भवति यतो गर्द्धनोऽभिलाषशीलः स्त्रीष्वित्यर्थात् पूर्व्ववद्युच् तारास्च मां कोपनं कोपनशीलं तद्विषय एव कुर्व्वन्ति कीदृश्यः गगणस्य मण्डनाभरणाः क्रुधमण्डार्थेभ्यश्चेति युच् ॥ १६ ॥ ज० भ०

कपिरित्यादि । असौ कपिः सुग्रीवोऽद्यापि कुटिलगतिशीलो न भवति नाना दिक्षु गमनं न करोतीत्यर्थः यतो गर्द्धनः अभिलाषशीलः अर्थाद्भोगेषु तारा मां कोपनं कोपशीलं कुर्व्वन्ति तद्विषय इत्यर्थात् कीदृश्यः गगणस्य मण्डनं साधुभूषाकारिण्यः यङ्लुगन्तक्रमेर्गृधुकुपमन्थिभ्यश्च नन्द्यादित्वादनः वेदाः प्रमाणमित्यादिवत्सामान्योपक्रमान्मण्डनस्य क्लीवत्वमेकत्वञ्च किम्वा मामित्यस्य विशेषणं आकाशवासित्वाद्गगणभूषणं मामित्यर्थः अहमाकाशवासी सोऽद्यापि गटे तिष्ठतीति कोपहेतुः ॥ १६ ॥ भ०

नावैत्यित्यादि । किमसौ कपिः रविं नावैति नावगच्छति कमलान्याप्यायितारं साधु वर्द्धयन्तं अनुदात्तेतश्चेति प्राप्ते नय इति प्रतिषिद्धे त्वन्नेव भवति ततश्च नलोकेति षष्ठीप्रतिषेधः दिनारम्भे दीपितारं साधु दीप्यमानं पूर्व्ववद्युचि प्राप्ते स्फूर्द्दीपदीक्षेति प्रतिषेधः निरस्तध्वान्तसञ्चयं अपनीतान्धकारसंहतिकं किमसौ शरत्समयं नावैतीत्यर्थः ॥ १७ ॥ ज० भ०

नावैत्यित्यादि । किमसौ कपिरीदृशं सूर्य्यं नावैति शरत्कालमागतं किं न जानातीत्यर्थः कीदृशं रविं कमलानि आप्यायितारं पद्मवृद्धिं साधु कुर्व्वन्तं दिनारम्भे दीपितारं साधु दीप्यमानं अपनीतान्धकारसमूहं प्यायिदीपिभ्यां त्यकौचे इति त्यन् ढधेक्तीत्यादौ शीलार्थस्योपलक्षणत्वान्न कर्म्मणि षष्ठी क्वचिदपवादविषयेऽप्युत्सर्गोऽपि प्रवर्त्तत इति वा द्वितीया ॥ १७ ॥

अतीते वर्षुके काले प्रमत्तः स्थायुको गृहे ।
गासुको ध्रुवमध्वानं सुग्रीवो वालिना गतम् ॥ १८ ॥
जल्पाकीभिः सहासीनः स्त्रीभिः प्रज्ञविना त्वया ।
गत्वा लक्ष्मण वक्तव्यो जयिना निष्ठुरं वचः ॥ १९ ॥
शैले विश्रयिणं क्षिप्रमनादरिणमभ्यमी ।

अतीत्यादि । वर्षुके वर्षणशीले काले अतीतेऽपि गृहे स्थायुकः स्थितिशीलः शरदि नागतत्वात् प्रमत्तः सन् सुग्रीवो वालिना गतं अध्वानं प्राप्तमार्गं ध्रुवमवश्यं गासुकः साधुः गन्ता लषपतेत्युकन् नलोकेति षष्ठीप्रतिषेधः ॥ १८ ॥ ज० म०

अतीत्यादि । असौ सुग्रीवो वालिना गतमध्वानं यममार्गं ध्रुवं निश्चितं गासुकः साधु गमिष्यति यतः वर्षुके दृष्टिशीले काले अतीतेऽपि गृहे स्थायुकः स्थितिशीलः अतएव प्रमत्तः अनवहितः हृषस्थागमिभ्यः शस्थाभूकमेति जुकः ढधेक्रतीत्यादौ उकवर्ज्जनान्न कर्म्मणि षष्ठी ॥ १८ ॥ भ०

जल्पेत्यादि । हे लक्ष्मण त्वया प्रज्ञविना प्रकृष्टगमनशीलेन प्रजोरिनिः जयिना अभिभवनशीलेन जिदक्षीत्यादिना इनिः सुग्रीवो निष्ठुरं वचोऽभिधातव्यः जल्पाकीभिः जल्पनशीलाभिः स्त्रीभिः सहासीनः जल्पभिक्षेति षाकन् षित्वात् ङीष् तन्मध्ये हि परुषमभिधीयमानः परिभवं मन्यत इति भावः ॥ १९ ॥ ज० म०

जल्पेत्यादि । हे लक्ष्मण त्वया गत्वा सुग्रीवो निष्ठुरं वचो वक्तव्यः कथनीयः सुग्रीवस्य गौणकर्म्मत्वात् गौणे याचादय इति तत्रैव प्रत्ययः सुग्रीवः कीदृशः जल्पाकीभिर्ज्जल्पनशीलाभिः साधु जल्पन्तीभिर्वा स्त्रीभिः सह आसीनः उपविष्टः भिक्षजल्पकुट्टेति षाकः षित्त्वादीप् यासोऽस्येत्यनेन आसः ग्रानस्य आ ईत्वं त्वया कीदृशेन प्रजविना प्रकृष्टवेगवता जयिना जययुक्तेन जुजिभ्यामनन्ताभ्यामर्थ्ये इन् किम्वा क्तक्तवितुसमासानामभिधानं नियामकमित्युक्तेरूढवितृष्णादिवत् क्तप्रत्यया अपि क्वचित् सेतोऽनितश्च भवन्ति तेन ग्रहादित्वात् णिनोणकारेत्त्वाविवक्षया दृङ्भावे गुर्घूङ इति गुणः परे तु शीलाचारसाधुषु जुजिप्रभृतित इन् वर्त्तमान इत्याहुः ॥ १९ ॥ भ०

शैल इत्यादि । कपिं क्षिप्रं गत्वा ब्रूहि इत्यकथितं कर्म्म न्याय्यं वच इति प्रधानं कर्म्म अस्य चातिस्रष्टार्थत्वादिदं तदिति न सन्दिश्य अनादरिणमना-

न्याय्यं परिभवी ब्रूहि पापमव्यथिनं कपिम् ॥ २० ॥
सृहयालुं कपिं स्त्रीभ्यो निद्रालुमदयालुवत् ।
अद्वालुं भ्रामरं धारं सद्रुमद्रौ वद द्रुतम् ॥ २१ ॥
स्मरोऽभङ्गुरप्रज्ञो गत्वा भासुरं धनुः ।

दरशीलं कपिं कालातिक्रमणात् आङ्पूर्व्वाद्दृङ् अतएव पापं दुराचारं अव्यथिनं निर्भयशीलं भञ्पूर्व्वोव्यथिः भैत्ते विश्रयिणं तत्र स्थितिशीलं विपूर्व्वः श्रयतिः त्वं चाभ्यमी अभिसुखगमनशीलः अभिपूर्व्वोऽमगत्यादिषु परिभवी साधु परिभवं जनयन् परिपूर्व्वो भवतिः अत्र सर्व्वत्र जिदृक्षीत्यादिना इनिः ॥ २० ॥ज० भ०

भैत्ते इत्यादि । त्वं क्षिप्रमभ्यमी शीघ्रमाभिसुख्येन साधु गतः सन् परिभवी साधु परिभवं कुर्व्वन् न्याय्यं न्यायादनपेतं वचस्तं कपिं ब्रूहि कीदृशं कपिं भैत्ते विश्रयिणं स्थितिशीलं अनादरिणं मयि अनादरशीलं पापं दुराचारं यतोऽव्यथिनं निर्दयशीलं श्रिदृअमनूव्यथानां प्रजविवत् तथा रूपाणि ॥ २० ॥भ०

सृहेत्यादि । स्त्रीभ्यः सृहयालुं कपिं साधु सृहयन्तं सृहिः स्वार्थिकण्यन्तोऽदन्तश्च अयामन्तेत्यादेशः सृहेरीप्सित इति सम्प्रदानसंज्ञा द्रुतं वद ब्रूहि अदयालुवत् अदयनशील इव निद्रालुं निद्राशीलं अस्मात्कार्य्येष्वनवधानत्वात् शयनीय एव सर्व्वदा स्थितत्वात् स्त्रीभिः सह अद्वालुं साध्वभिलषन्तं भ्रामरं भ्रमरैः कृतं क्षुद्राभ्रमरेत्यादिना अञ् मध्वित्यर्थात् नलोकेति षष्ठीप्रतिषेधः सृहिस्पृहीत्यादिना आलुच् अद्वालुत्वादेव धारं साधु पिबन्तं भ्रामरमेव सद्रुं साधु सीदन्तं दाधेट्सिघदसदो रः ॥ २१ ॥ज० भ०

सृहेत्यादि । द्रुतं शीघ्रं त्वं कपिं वद विषादे पौनरुक्त्यं न दोषाय अतिदाढार्थत्वात् कीदृशं स्त्रीभ्यः सृहयालुं सृहशीलं साधु सृहयन्तं वा यस्मादित्येत्यादिना संप्रदानत्वं अदयावन्तमिव निद्रावन्तं भ्रमरैः कृतं भ्रामरं मधु ढधेकादिति ण्यः तत् धारं साधु पिबन्तं तथापि तत्र अद्वालुं अभिलाषवन्तं एतेन पानासक्ततया प्रमत्तत्वं दर्शितं अद्रौ किञ्किन्धापर्व्वते सद्रुं साधु सीदन्तं तिष्ठन्तमित्यर्थः एवं रामो लक्ष्मणमब्रवीदिति पूर्व्वेणान्वयः सृहत्वेप्सेप्सतिस्पृहिसृहीति आलुः निद्रादयाश्चद्वाशब्देभ्यो गोत्रणमेधेत्यादिना निद्रादित्वादस्यैव आलुः निपूर्व्वद्रादयश्चत्पूर्व्वधाञ्इत्येतेभ्यः सृहयालुवदालुरिति परे धेट्सदिभ्यां शतसत्सिघेदोरिति रः ॥ २१ ॥ भ०

स्मरेत्यादि । लक्ष्मणः कपीन् प्राप कीदृशः स्मरः साधु गत्वा स्मरसदः

विदुरो जित्वरः प्राप लक्ष्मणो गत्वरान् कपीन् ॥ २२ ॥
तं जागरूकः कार्य्येषु दन्दश्यूकरिपुं कपिः ।
अकम्पं मारुतीदीप्रं नम्रः प्रावेशयद्गुहाम् ॥ २३ ॥

क्वरच् भङ्गुरा ये स्वयमेव भज्यन्ते भञ्जभासेति घुरच् तान् प्रजानातीति भङ्गुर-. प्रज्ञ इति कः विदुरः साधु वेदो विदिभिदिछिदेःकुरच् जित्वरः साधु जयशीलः इगुपधज्ञीत्यादिना कः ऋरप् गृहीत्वा धनुर्भासुरं भासनशीलं गत्वरान् गमनशीलान् कपीन् अस्थिरप्रकृतीनित्यर्थः गत्वरश्चेति निपातितं गमेः क्वरप्यनुनासिकलोपः ॥ २२ ॥ ज० भ०

रूमेत्यादि । लक्ष्मणो भासुरं दीप्तिशीलं धनुर्गृहीत्वा गत्वरान् अस्थिरप्रकृतीन् तद्भयात् पलायमानान् वा कपीन् प्राप कीदृशः रूमरः साधु सरति गच्छतीति घसस्वदः क्वरः भङ्गुरान् स्वयमेव भङ्गनशीलान् अर्थात् कपीन् प्रजानातीति कगज्ञाग्रीति कः यद्वा नञः प्रश्लेषात् अभङ्गुरा स्थिरा प्रज्ञा बुद्धिर्यस्य स तथा साधु वेत्तीति विदुरः जित्वरो जयशीलः भञ्जिभासिभ्यां भिद्भासभञ्ज इति घुरः क्वरोःकभाव इत्युक्तेः कर्त्तरि विहितोऽपि घुरो भञ्जेः कर्म्मकर्त्तरि बोध्यः भज्यते स्वयमेवेति भङ्गुरः यजोःकगाविति गत्वं वेत्तेश्छिद्भिदिछिद इति कुरः जिगमिभ्यां क्वरप्सहजीमित्यादिना क्वरप् नञ्च तच्च स्वस्ततनूपिति ॥ २२ ॥ भ०

तञ्जेत्यादि । तं लक्ष्मणं कपिर्मारुतिः गुहां प्रावेशयत् विशेर्हेतुमण्ण्यन्तात् लङि रूपं कार्य्येषु कृत्येषु जागरूकः सावधानः जागरूक इति जागर्तेरूकः दन्दश्यूकरिपुं हिंस्रारिं यजजभेत्यादिना दंशेर्यङन्तादूकः लुपसदेत्यादिना यङ् दीप्रं साधु दीप्यमानं अकम्पं अकम्पनशीलं अभीरूमित्यर्थः नम्रः साधु प्रह्वीभूतः सर्व्वत्र नमिकम्पीत्यादिना रः ॥ २३ ॥ ज० भ०

तंजेत्यादि । कपिर्म्मारुतिर्हनूमान् तं लक्ष्मणं गुहां किष्किन्धां प्रवेशयामास प्रवेशोऽपि गतिभेदः तेन घोजौजेः यद्भासनगतीत्यादिना प्रयोज्यकर्त्तुः कर्म्मत्वं गुहेति भिदादित्वात् भीषिचिन्तीत्यादिना ङः स्त्रीत्वञ्च कीदृशो मारुतिः कार्य्येषु जागरूकः साधु सावधानः नम्रः साधु प्रह्वीभूतः तं कीदृशं दन्दश्यूकानां हिंस्राणां रिपुं अकम्पं अकम्पनशीलं निर्भयमित्यर्थः दीप्रं दीप्तिशीलं जाग्रयङन्तदृशिभ्यां जाग्रयङन्तयजेत्यादिना ऊकः दन्शोनलोपोवेति यङ्लुकि नस्य लोपः अमजभेत्यादिना खेर्नुण् कम्पिदीपिणमिभ्यो हिंसदीपेत्यादिना रः ॥ २३ ॥ भ०

कन्याभिरावृतः स्त्रीभिराशंसुः क्षेममात्मनः ।
दृक्षुः प्रसादं प्रणमन् सुग्रीवः प्रावदन्नृपम् ॥ २४ ॥
अहं स्वप्नक् प्रसादेन तव वन्दारुभिः सह ।
अभीरुरवसं स्त्रीभिर्भासुराभिरिहेश्वर ॥ २५ ॥
विद्युन्नाशं रवेर्भासं विभ्राजं शश्वलाञ्छनम् ।
रामप्रत्तेषु भोगेषु नाहमज्ञासिषं रतः ॥ २६ ॥

कन्येत्यादि । सुग्रीवः प्रावदन्नृपं लक्ष्मणं स्त्रीभिरावृतः परिवृतः सन् प्रणमन् ताभिः सहेत्यर्थः कन्याभिः कमनशीलाभिः पूर्ववद्रः आत्मनः क्षेमं कल्याणमाशंसुः प्रार्थयमानः सनाशंसभिक्षउः नलोपेति षष्ठीप्रतिषेधः दृक्षुः प्रसादं प्रसादमिषणशीलः अपि मे स्वामी प्रसन्नः स्यादिति विन्दुरिच्छुरिति निपातनम् ॥ २४ ॥ ज० भ०

कन्येत्यादि । सुग्रीवो नृपं लक्ष्मणं प्रावदत् कन्याभिः कामुकीभिः स्त्रीभिः परिवृतः सन् प्रणमन् अर्थात् ताभिः सह पूर्ववत् रः आत्मनः क्षेमं कुशलं आशंसुः दृक्षुः सनभिक्षाशंसउः अतएव तस्य प्रसादं दृक्षुः साधु दृक्षन् विन्दिच्छू इति निपातः ढधेक्षतीत्यादौ उदात्तवर्जनात् न षष्ठी ॥ २४ ॥ भ०

अहमित्यादि । अहं तव प्रसादेन इह गुहायामवसं उषितवान् स्वप्नक् निद्रालुः चिन्ताभावात् स्वपितर्धोनजिङ् वन्दारुभिर्वन्दनशीलाभिः सह शृङ्वन्द्योरारुः अभीरुः अभयशीलः भियः क्रुक्लुकनौ भासराभिः भासनशीलाभिः ईश्वरः ईशनशीलः स्त्रेशभासेति वरच् ॥ २५ ॥ ज० भ०

अहमित्यादि । किमुक्तवानित्याह हे ईश्वर तव प्रसादेनाहं स्त्रीभिः सह इह गुहायां अवसं उषितवानस्मि अहं कीदृशः स्वप्नक् साधु स्वपन् स्वपतेष्टषष्टषोडृज् इति डृज् अभीरुर्भयहीनः क्रुक्लुकौभिय इति क्रुः कीदृशीभिः स्त्रीभिः वन्दारुभिः प्रणमशीलाभिः साधु स्तुतिं कुर्वाणाभिर्वा शृवन्द्आरुः भासराभिः दीप्तिशीलाभिः साधु दीप्यमानाभिर्वा भासीशिश्यं यायायभास्लसेत्यादिना वरः ॥ २५ ॥ भ०

विद्युदित्यादि । रामप्रत्तेषु रामदत्तेषु भोगेषु रतः सक्तः नाहमज्ञासिषं नाहं ज्ञातवान् लुङि यमरमेत्यादिना सगिटौ विद्युन्नाशं द्योतनशीलाविद्युतः तासां नाशं रवेर्भासः भासनशीलादीप्तीर्विभ्राजं साधु दीप्यमानं शश्वलाञ्छनं

एष शोकच्छिदो वीरान् प्रभो सम्प्रति वानरान् ।
धरासमुद्रशैलानामन्तगान् प्रहिणोम्यहम् ॥ २७ ॥
इति ताच्छीलिकाः समाप्ताः ।

अथ निरधिकारकृत् ।

राघवस्य ततः कार्य्यं कारुर्व्वानरपुङ्गवः ।
सर्व्ववानरसेनानामाघ्राणमनमादिशत् ॥ २८ ॥

चन्द्रं प्राहुडतिक्रान्ता शरदायातेति नाघ्रासिषमित्यर्थः सर्व्वत्र भ्राजभासेति क्विप् ॥ २६ ॥ ज० म०

विद्युदित्यादि। अहं रामेण प्रत्तेषु भोगेषु रतः आसक्तः सन् विद्युतं नाघ्रं सूर्य्यस्य दीप्तिं साधु दीप्यमानं चन्द्रञ्च नाघ्रासिषं न घ्रातवानस्मि शरदागमनं न घ्रातवान् गृहे तिष्ठामीति भावः यमरमेति इमसनौ विभ्राजत इति क्विप् ॥२६॥भ०

एष इत्यादि। हे प्रभो एषोऽहं सम्प्रति वानरान् प्रहिणोमि प्रस्थापयामि कीदृशान् शोकच्छिदः शोकापनोदनशीलान् अन्येभ्योऽपि दृश्यत इति क्विप् वीरान् शूरान् धराशैलसमुद्राणां अन्तं गच्छन्ति ये तानन्तगान् अन्तात्यन्तेति डः धरा पृथ्वी धरासमुद्रशैलानामिति पाठान्तरं अत्र बहुव्रनियम इति पूर्व्वनिपातः यथा वीणाघङ्घुदुन्दुभयः । इति ताच्छीलिककृतः ॥ २७ ॥ ज०म०

एष इत्यादि। हे प्रभो एषोऽहं सम्प्रति वानरान् प्रहिणोमि प्रेरयामि सैन्यानयनायेत्यर्थात् कीदृशान् शोकच्छिदः शोकापनोदनशीलान् त्वासुसिति क्विप् वीरान् समर्थान् अतएव पृथिवीसमुद्रपर्व्वतानामप्यन्तगान् अन्तं गच्छन्तीति हनजनादिति डः प्रभवतीति प्रभुः स्वयंभ्वादिसम्मादिति डुः प्राग्वन्नोणोन्नरदुर्गेरित्यादिना नुविकरणस्य णत्वं इत्येवं सुग्रीवः प्रावदन्नृपमिति पूर्व्वेण सम्बन्धः । इति ताच्छीलिका उक्ताः ॥ २७ ॥ भ०

इतो विशेषाधिकाराभावात् निर्विशेषकृतो दर्शयन्नाह । राघवेत्यादि । ततोऽभिधानानन्तरं वानरपुङ्गवः सुग्रीवः सर्व्ववानरसेनानामाशु शीघ्रमागमनमादिशत् आदिष्टवान् पुमांश्चासौ गौश्चेति गोरतद्धितलुकीति समासान्तष्टच् व्युत्पत्तिभावमेतत् पुङ्गवशब्दस्तु प्रधानमाचष्टे कारुः करोतीति उणादयो बहुलमिति औणादिकः कृपावाजीत्यादिना उण एवमाशु कस्य कर्त्तेत्याह राघवस्य कार्य्यम् ॥ २८ ॥ ज०म०

वयमद्यैव गच्छामो रामं द्रष्टुं त्वरान्विताः ।
कारकामित्रकार्य्याणि सीतालाभाय सोऽब्रवीत् ॥ २९ ॥
ततः कपीनां सङ्घाता हर्षाद्राघवभूतये ।
पूरयन्तः समाजग्मुर्भयदाया दिशो दश ॥ ३० ॥

सम्प्रति निर्विशेषाः क्त्र उच्यन्ते राघवेत्यादि । तत्कथानन्तरं वानरश्रेष्ठः सुग्रीवः सर्व्वेषां वानरसेनानां आशु शीघ्रं आगमनं आदिशत् आज्ञापयामास नान्ध्रान्येतिक्चेति गमेर्डोः पुमांश्चासौ गौश्चेति गोरतार्थे इति यः व्युत्पत्तिमात्रमिदं पुङ्गवशब्दस्तूत्तरपदे प्रधानार्थः कीदृशः राघवस्य कार्य्यं कारुः कर्त्ता अभिधानात् नान्ध्रान्येतिक्चेत्यस्य क्वचिदसंज्ञायामपि प्रवृत्तिरिति तेन उण् रघिगतावित्यस्मात् पूर्व्वेण उक् नञा निर्दिष्टस्यानित्यत्वात् नेदित्यूजार्थाद्धोरित्यस्याप्रवृत्तेर्ईसुङ्नलोपः तस्यापत्यमिति षणः अञूङव्याप्तौ उण् आशु ॥ २८ ॥ भ०

वयमित्यादि । आगमनमादिश्य सुग्रीवोऽब्रवीत् उक्तवान् वयमद्यैव गच्छाम इति रामं द्रष्टुं रामं द्रक्ष्याम इति त्वरान्विताः त्वरिता इत्यर्थः कीदृशा वयं सीतालाभाय सीतां प्राप्स्याम इति कारकामित्रकार्य्याणि रावणवधादेः कार्य्यस्य कर्त्तारो भविष्याम इति गच्छाम इति क्रियायां क्रियार्थायामुपपदे तुमन्ण्वुलौ भविष्यति काले स्यातां मित्रकार्य्याणीति अकेनोर्भविष्यदाधमर्ण्ययोरिति षष्ठीप्रतिषेधे द्वितीयैव स्यात् सीतालाभायेति भाववचनाच्चेति क्रियायां क्रियार्थायामुपपदे भविष्यति घञ् तुमर्थाच्च भाववचनादिति चतुर्थी ॥ २९ ॥ ज० म०

वयमित्यादि । आगमनमादिश्य स सुग्रीव इदमब्रवीत् आदिष्टवान् कपीनित्यर्थात् किमुक्तवानित्याह वयमद्यैव रामं द्रष्टुं गच्छामः अद्यैवेत्यनेन वानरानयनमद्यैव कार्य्यमिति त्वरा सूचिता बहुत्वं सेनासाहित्यात् सीतालाभाय त्वरायुक्ताः तादर्थ्ये चतुर्थी मित्रस्य रामस्य कार्य्याणि रावणवधादीनि कारकाः कर्त्तारः क्वचिदपवादविषयेऽप्युत्सर्गोऽपि प्रवर्त्तत इति षष्ठीविषये द्वितीया ॥ २९ ॥ भ०

तत इत्यादि । आदेशादनन्तरं कपीनां संघाताः समाजग्मुः हर्षात् हर्षेण आदेशादानमेव हर्षहेतुः राघवभूतये अपि नाम राघवस्य संपत्त्यादिति समाजग्मुरित्यस्यां क्रियायां क्रियार्थायामुपपदे भाववचनाच्चेति भविष्यति क्रिन् चतुर्थी इह पूर्व्ववत् पूरयन्तो व्याप्नुवन्तः दश दिशः भयदायाः भयं दास्याम इत्यस्यां क्रियायामुपपदे अण्कर्म्मणि चेत्यण् आतोयुक् ॥ ३० ॥ ज० म०

सुग्रीवान्तिकमासेदुः साधयिष्याम इत्यरिम् ।
करिष्यन्त इवाकस्माद्भुवनं निर्दशाननम् ॥ ३१ ॥
कर्त्तास्मि कार्यमायातैरेभिरित्यवगम्य सः ।
काकुत्स्थपादपच्छायां शीतस्वर्गामुपागमत् ॥ ३२ ॥

तत इत्यादि । तत आदेशात् कपीनां संघाताः समूहा दश दिशः पूरयन्तो व्याप्नुवन्तो राघवस्य भूतये सम्पत्त्यर्थं हर्षादाजग्मुः किष्किन्धायामित्यर्थात् भयदायाः शत्रुभ्यो भयं ददातीति मित्राणां भयं द्यन्ति खण्डयन्तीति वा त्रसव्यधेर्नन्तनदेति थः यनञ्यिदिति यन् ॥ ३० ॥ भ०

सुग्रीवेत्यादि । अरिं शत्रुं साधयिष्यामो व्यापादयिष्याम इति सुग्रीवान्तिकमासेदुः आगताः लट्शेषेचेति चकारात् क्रियार्थायासुपपदे भविष्यति लट् आसेदुरिति क्रियाक्रियार्था अकस्मादतर्कितं भुवनत्वयं निर्दशाननं रावणरहितं करिष्यन्त इव तथाविधमहासंरम्भदर्शनादुत्प्रेक्ष्यते लट्शेषे चेति लट् अत्र क्रियायाः क्रियार्थाया अन्यः शुद्धो भविष्यत्कालः शेषः ॥ ३१ ॥ ज०म०

सुग्रीवेत्यादि । वयमरिं साधयिष्यामः व्यापादयिष्याम इति एतदर्थं सुग्रीवस्यान्तिकं समीपमासेदुरागताः कपीनां संघाता इत्यनुषज्यते अकस्मादतर्कितं यथा स्यात्तथा भुवनं रावणशून्यं करिष्यन्त इव महापराक्रमदर्शनादुत्प्रेक्षेयम् ॥ ३१ ॥ भ०

कर्त्तेत्यादि । एभिरायातैर्वानरैः कार्यं सीतान्वेषणादि कर्त्तास्मि करिष्यामीति अवगम्य अनद्यतने भविष्यति लुट् सुग्रीवः काकुत्स्थपादपच्छायासुपागमत् पद्यन्त इति पादाः पदरुजेति कर्त्तरि घञ् तत्र भविष्यतीति निवृत्तं पादैः पिबतीति पादपो वृक्षः आतोऽनुपसर्गकः काकुत्स्थः पादाप इव समाश्रयणीयत्वात् तस्य छायां शीतस्वर्गां अनुद्वेजनकरीं स्पृशत इति स्वर्गशब्दात् उच्यते अकर्त्तरि चेति घञ् ननु पदरुजेत्यादिना तत्र हि स्पृश उपताप इति वक्तव्यमित्युक्तं स्पृशतीति स्वर्गं उपतापः ॥ ३२ ॥ ज० म०

कर्त्तेत्यादि । आगतैरेभिर्वानरैरहं कार्यं सीतान्वेषणादिरूपं कर्त्तास्मि करिष्यामि त्वां रूपं इत्यवगम्य निश्चित्य सुग्रीवः काकुत्स्थपादपच्छायासुपागमत् रामान्तिकं गतवानित्यर्थः शीतस्वर्गां दुःखरहितामित्यर्थः पद्यत इति कर्त्तरि घञ् पादो मूलं तेन पिबति सेकजलमिति पादपो वृक्षः छाया स्यादातपाभावे शोभायामपि दृश्यते । अत्र लक्षणया समीपदेशवृत्तिः ॥ ३२ ॥ भ०

कार्य्यसारनिभं दृष्ट्वा वानराणां समागमम् ।
अवैन्नाशं दशास्यस्य निर्वृत्तमिव राघवः ॥ ३३ ॥

इति निरधिकारकृत् ।

अतःपरं घञधिकारः ।

ततः कपिसमाहारमेकं निश्चायमागतम् ।
उपाध्याय इवायामं सुग्रीवोऽध्यापिपद्दिशाम् ॥ ३४ ॥

कार्य्येत्यादि । राघवो वानराणां समागमं दृष्ट्वा कार्य्यसारनिभं सीतालाभतुल्यं सरति कालान्तरे तिष्ठतीति कर्त्तरि कारके क्वस्थिर इति घञ् दशास्यस्य रावणस्य नाशं विनाशं निर्वृत्तमिव निष्पन्नमिव अवैत् ज्ञातवान् अवपूर्व्वादिणो लङि रूपं । इति निरधिकाराः कृतः ॥ ३३ ॥ ज० म०

कार्य्येत्यादि । वानराणां समागमं दृष्ट्वा राघवो दशास्यस्य नाशं निर्वृत्तं निष्पन्नमिव अवैत् ज्ञातवान् अवपूर्व्वादिनो ण्यादिण् कीदृशं समागमं कार्य्यसारस्य सीतालाभस्य तुल्यं सरति कालान्तरमिति सारः कर्त्तरि घञ् नञेर्भावे घञ् । इति निरधिकाराः कृत उक्ताः ॥ ३३ ॥ भ०

अतःपरं भावे कर्त्तरि च कारक इत्यधिकृत्य कृदुच्यते । तत इत्यादि । कपिसमागमनानन्तरं सुग्रीवः कपिसमाहारं कपिसमूहं दिशामायाममध्यापिपत् बोधितवान् असुका असुका दिक् दैर्घ्येति गतिबुद्धीत्यादिना समाहारस्य कर्म्मसंज्ञा आयामपरिज्ञानञ्चास्य वालिभयादूरपरिभ्रमणात् एकनिश्चायमागतं एकराशितां प्राप्तं आयाममित्यर्थः निश्चायमिति परिमाणाख्यायामिति घञ् पश्चादेकशब्देन पूर्व्वकालैकेति सः क इव उपाध्याय इति उपेत्याधीयते अस्मादिति इङ इति घञ् ॥ ३४ ॥ ज० म०

अथाकर्त्तरि कारके कृत उच्यते । तत इत्यादि । कपिसमागमानन्तरं सुग्रीवः कपीनां समाहारं समूहं दिशामायामं दैर्घ्यं अध्यापिपत् अध्यापितवान् अस्यां दिशि एतत्पर्य्यन्तं गन्तव्यमिति ज्ञापितवान् आयामज्ञानञ्चास्य वालिभयेन दूरभ्रमणात् घोऽञौजेःशब्दार्थनगतिज्ञेत्यादिना समाहारस्य प्रयोज्यस्य कर्म्मत्वं क्रीजीङोऽजेति इङ आत्वं ह्वीत्यादिना णप् उपाध्याय इव यथा गुरुरध्यापयति तथेत्यर्थः उपेत्याधीयतेऽस्मादिति घञ्जलनटोऽघे इति घञ् कीदृशमायामं एकं निश्चायं ज्ञानं आगतं प्राप्तं अत्यभ्यासात् सर्व्वासां दिशां दैर्घ्यं सुग्रीवस्य

सजलाम्भोदसंरावं हनूमन्तं सहाङ्गदम् ।
जाम्बवन्नीलसहितं चारुसन्द्रावमब्रवीत् ॥ २५ ॥
यात यूयं यमस्यायं दिशं नायेन दक्षिणाम् ।
चिक्षावैस्तोयविस्रावं तर्जयन्तो महोदधेः ॥ २६ ॥
उन्नायानधिगच्छन्तः प्रद्रावैर्वैसुधाभृताम् ।

स्नानारूढमित्यर्थः पूर्ब्बेण घञ् एको निश्चयो निश्चयो यस्येति कपिसमाहारस्य विशेषणं वा एतेनैकवाक्यता दर्शिता एवमागतं यमेर्घञि जनवध इत्यादिना पदे ह्रस्वाभावः ॥ २४ ॥ भ०

सजेत्यादि । सुग्रीवो हनूमन्तमब्रवीत् सजलाम्भोदसंरावं सजलमेघस्येव संरावो यस्य हनूमतः उपसर्गेरुव इति घञ् सहाङ्गदं अङ्गदसहितं तथा जाम्बवं ऋक्षाधिपतिं नीलसहितमब्रवीत् जाम्बवशब्दोऽकारान्तो द्रष्टव्यः चारुसन्द्रावं चारुगतिं समियुदुद्रुव इति घञ् ॥ २५ ॥ ज० म०

सजेत्यादि । सुग्रीवो हनूमन्तमब्रवीत् सजलस्य मेघस्येव संरावः शब्दो यस्य तं अतिगम्भीरस्वनमित्यर्थः पूर्ब्बेण घञ् उपसर्गादुव इति परः अङ्गदेन सह विद्यमानं जाम्बवता नीलेन च सहितं नीलसहितं जाम्बवञ्चाब्रवीदिति वा जाम्बवान् जाम्बवोऽपि चेति विश्वः चारुसंद्रावं मनोहरगतिं पूर्ब्बेण घञ् समलेभ्यो दुव इति परः ॥ २५ ॥ भ०

यातेत्यादि । यूयं यात गच्छत यमस्यायं यमस्थानं श्रयत्येनमिति श्रिणीभुवोनुऽउपसर्ग इति घञ् कर्म्मणि कां दक्षिणां दिशं सामान्याभिधानाद्विशेषाभिधानं नायेन नीत्या सामादिना नीयतेऽनेनेति पूर्ब्ववत्करणे घञ् महोदधेस्तोयविस्रावं तोयध्वनिं तर्जयन्तो न्यक्कुर्व्वाणाः कैः चिक्षावैः स्वैः शब्दैः उभयत्रापि वौक्षुस्रुव इति कर्म्मणि घञ् ॥ २६ ॥ ज० म०

यातेत्यादि । यूयं दक्षिणां दिशं यात गच्छत यमस्यायं यमस्थानं श्रयत्येनमिति घञ् सामान्यविशेषभावात् पौनरुक्त्यभावः यमस्थानं न गन्तव्यमित्याशयो वा नायेन नीत्या सामदानादिना उपलक्षिता यूयमित्यर्थः करणत्वविवक्षा वा णीञःकरणे घञ् महोदधेस्तोयस्य विस्रावं शब्दं चिक्षावैः स्वीयशब्दैस्तर्ज्जयन्तः न्यक्कुर्व्वन्तः क्षुस्रुभ्यां घञ् ॥ २६ ॥ भ०

उन्नेत्यादि । वसुधाभृतां पर्व्वतानां उन्नायानुच्चयानुच्चत्वान्यधिगच्छन्तः जानन्तः अवोदोनिय इति भावे घञ् कैः प्रद्रावैः प्रकृष्टगतिभिः प्रदुस्रुस्रुव

वनाभिलाषान् कुर्व्वन्तः स्वेच्छया चारुविक्रमाः ॥ ३७ ॥
सदोद्गारसुगन्धीनां फलानामलमाश्रिताः ।
उत्कारेषु च धान्यानामनभीष्टपरिग्रहाः ॥ ३८ ॥
संस्तावमिव शृण्वन्तश्छन्दोगानां महाध्वरे ।
शिञ्जितं मधुलेहानां पुष्पप्रस्तारशायिनाम् ॥ ३९ ॥

इति घञ् वनाभिलाषान् वनविध्वंसान् निरभ्योः पूल्वोरिति भावे घञ् स्वेच्छया कुर्व्वन्तः चारुविक्रमाः असाधारणपराक्रमाः यात यूयमिति सम्बन्धः ॥ ३७ ॥ ज० म०

उन्नेत्यादि । प्रद्रावैः प्रहृष्टगमनैर्व्वसुधाभृतां पर्व्वतानां उन्नायान् उच्छ्रितत्वानि अधिगच्छन्तो जानन्तः यूयं यातेति पूर्व्वेणान्वयः वनाभिलाषान् अरण्यविध्वंसान् स्वेच्छया कुर्व्वन्तः चारुविक्रमाः असाधारणशौर्य्याः उत्पूर्व्वणोऽः प्रपूर्व्वद्रोरभिपूर्व्वलूञश्च भावे घञ् ॥ ३७ ॥ भ०

सदेत्यादि । सदा सर्व्वदा उद्गारे भक्षणानन्तरं वमनपूर्व्वके शब्दोद्गारणे यानि सुगन्धीनि फलानि तेषामलं पर्य्याप्तमाश्रिताः लग्नाः गृशब्द इत्यस्मादुत्पूर्व्वादुन्योर्प इति घञ् आङ्पूर्व्वादश्नातेरादिकर्म्मणि क्तः कर्त्तरि चेति कर्त्तरि क्तः क्तयोगे कर्म्मणि षष्ठी नलोकेति निषिद्धातः शेषे षष्ठी उत्कारेषु च राशिषु धान्यानां कृविक्षेप इत्यस्मादुत्पूर्व्वात् कृधान्य इति कर्म्मणि घञ् अनभीष्टपरिग्रहाः अनभिलाषुका इत्यर्थः ॥ ३८ ॥ ज० म०

सदेत्यादि । सर्व्वदा उद्गारे सुजग्धिभिः फलैरलमत्यर्थं आश्रिताः लग्नाः यूयं यातेति सम्बन्धः अन्नभोजन इत्यस्य आङ्पूर्व्वस्य लक्ष्यर्थेनाकर्म्मकत्वात् गत्यर्थाकेत्यादिना कर्त्तरि क्तः शीलादित्वात् वर्त्तमाने क्त इत्यन्ये लक्ष्यर्थानामेति अधिकरणे षष्ठी उत्पूर्व्वात् गृशनिगरणे इत्यस्मात् गृगिशब्द इत्यस्माद्वा घञ् यद्भुक्तं सदुद्गारेऽपि सुगन्धिं प्रकाशयति तदुद्गारसुगन्धि उद्गारः परिणाम इत्यन्ये धान्यानामुत्कारेषु राशिषु अनभीष्टः परिग्रहो येषां ते धान्यानभिलाषुका इत्यर्थः किर आधारे घञ् किरोधान्ये इति परस्मैत्वम् ॥ ३८ ॥ भ०

संस्तेत्यादि । मधुलेहानां भ्रमराणां पुष्पप्रस्तारशायिनां प्रेङ्खोऽयन्न इति घञ् शिञ्जितं शब्दं ग्रहणन्तः यूयं यात छन्दोगानां महाध्वरे संस्तावमिव समूह स्तवनमिव पाठध्वनिविशेषमिव वा यज्ञे समिस्तुव इति वञ् ॥ ३९ ॥ ज० म०

आलोचयन्तो विस्तारमम्भसां दक्षिणोदधेः ।
स्वादयन्तः फलरसं मुष्टिसंग्राह्यपीडितम् ॥ ४० ॥
न्याय्यं यदत्र तत्कार्य्यं पर्य्यायेणाविरोधिभिः ।
निशोपशायः कर्त्तव्यः फलोञ्छायश्च संहृतैः ॥ ४१ ॥

संस्तेत्यादि । मधुलेहानां भ्रमराणां झिङ्कृतं शब्दं ब्रुवन्तो यूयं यातेति सम्बन्धः यद्यपि भूषणानाञ्च झिङ्कृतमित्यमरेणोक्तं तथापि झिजि अव्यक्ते शब्दे इति धात्वर्थमात्रे तात्पर्यं ऋन्दोगानां वेदविदां महायज्ञे संस्तावमिव सम्यक्-स्तवनमिव भावे घञ् पुष्पाणां प्रस्तारे समूहे शायिनां स्थितानां प्रपूर्व्वस्तृञो घञ् ॥ २६ ॥ भ०

आलोचेत्यादि । दक्षिणोदधेरम्भसां विस्तारं विस्तीर्णतां विपूर्व्वात् स्तृणातेः प्रथनेवावशब्द इति घञ् आलोचयन्तो निरूपयन्तः इयानस्य विस्तार इति फलरसमास्वादयन्तः मुष्टिसंग्राह्यपीडितं मुष्टेः संग्राहेण हस्तेन पीडितं ग्रहेः शमिमुष्टाविति घञ् भावे मुष्टिविषये व्युत्पादितत्वात् मुष्टिग्रहणमभि-व्यक्त्यर्थं ज्ञातव्यम् ॥ ४० ॥ ज० म०

आलोचेत्यादि । दक्षिणोदधेरम्भसां विस्तारं विस्तीर्णतां आलोचयन्तो निरूपयन्तो यूयं यातेति सम्बन्धः स्तृञोभावे घञ् मुष्टिसंग्राहेण मुष्टिबन्धेन पीडितं फलरसं आस्वादयन्तः यद्यपि संग्राहोमुष्टिबन्ध इत्यमरमाला तथापि मुष्टिग्रहणमत्राभिव्यक्त्यर्थं संग्राहोमुष्टिरित्यत इति हलायुधवाक्यादन्यत्रापि प्रवृत्तिदर्शनाद्वा ॥ ४० ॥ भ०

न्याय्यमित्यादि । यदत्र न्यायादनपेतं तत्कार्य्यमविरोधिभिर्युष्माभिः परि-न्योनिष्योरिति घञ् पदार्थानामनपचारेणेत्यर्थः व्युपयोः श्येतेः पर्य्याय इति घञ् पर्य्यायेण परिपाट्या परावनुपात्ययदृग इति भावे घञ् अनुपात्ययः पर्य्यायः निशोपशायः कर्त्तव्यः युष्माभिर्निशायामुपशयः पर्य्यायशयनं कर्त्तव्यं व्युपयोः श्येतेः पर्य्याय इति घञ् फलोञ्छायश्च संहृतैः युष्माभिः कर्त्तव्यः हस्ता-दान इति घञ् हस्तादानं चादेयस्य प्रत्यासत्तिः ॥ ४१ ॥ ज० म०

न्याय्यमित्यादि । यत्र यत्न्याय्यं न्यायादनपेतं तत्र तत्कार्य्यं अविरोधिभि-र्युष्माभिः पर्य्यायेण परिपाट्या क्रमेणेति यावत् निशोपशायः निशायां शयनक्रिया कर्त्तव्या संहृतैर्मिलितैः सद्भिः फलोञ्छायः फलादानं कर्त्तव्यः वने हिंस्रादिभया-

सीता रक्षोनिकायेषु स्तोककायैश्छलेन च।
मृग्या शत्रुनिकायानां व्यावहासीमनाश्रितैः॥ ४२॥
सांराविणं न कर्त्तव्यं यावन्नायाति दर्शनम्।
संदृष्टायान्तु वैदेह्यां निग्राहो वोऽर्थवानरेः॥ ४३॥

न्निलितैरेव गन्तव्यमिति भावः निपूर्व्वात्परिपूर्व्वाच्चेण उपपूर्व्वात् श्रीङ उत्पूर्व्वाच्चेश्च घञ् न्यायशब्दात् ढधेकादिति ण्यः॥ ४१॥ भ०

सीतेत्यादि। छलेन युष्माभिः सीता मृग्या रक्षोनिकायेषु निवासेषु निवसन्त्यस्मिन्निति अधिकरणे निवास चित्तीत्यादिना घञ् आदेश्च ककारः स्तोककायैर्युष्माभिः चिन्वन्त्यस्माच्छुभमिति कायः शरीरे घञ् शत्रुनिकायानां अरिसमूहानां निचीयत इति निकायः संघेचानौत्तराधर्य्य इति कर्म्मणि घञ् आदेश्च ककारः तेषां सम्बन्धिनीं व्यावहासीं परस्परहसनं अनाश्रितैः व्यवपूर्व्वाद्धसेः कर्म्मव्यतीहारेणच्स्त्रियामिति स्त्रीलिङ्गे भावे णचं विधाय णचः स्त्रियामञ् न कर्म्मव्यतीहार इति ढद्विप्रतिषेधः॥ ४२॥ ज० म०

सीतेत्यादि। युष्माभिः स्तोककायैः स्वल्पदेहैः सद्भिः रक्षोनिकायेषु राक्षसनिवासेषु सीता मृग्या अन्वेषणीया छलेन न तु प्रकटेन मृगत्कङ्मार्गणे शत्रुनिकायानां शत्रुसमूहानां व्यावहासीं परस्परहसनं अनाश्रितैः उपहसतोऽपि शत्रोरुपहासं कार्य्यसिद्ध्यर्थमकुर्व्वद्भिरित्यर्थः व्यावहासो परस्परविचारणेति केचित् निचीयतेऽस्मिन्निति निकायोनिवासः समूहश्च चीयते सुखदुःखार्थमिति कायोदेहः खदैधावोदेत्यादिना घञि कायनिकायौ निपातितौ व्यवपूर्व्वहसोव्यतीहारे णच् मङ्ग्यणकार इङ्ग्यर्थः दन्त्यनकारस्तु यौर्युमुदान्ते इत्यादौ खध्वरणन इति चिह्नार्थः णनन्नात् स्वार्थे ष्णः ञित्वात् स्त्रियामीप्॥ ४२॥ भ०

सांराविणमित्यादि। संरावणमभिव्याप्य भाषणं न कर्त्तव्यं युष्माभिः यावन्नायाति दर्शनं सीताया इत्यर्थात् संपूर्व्वाद्रौतेरभिविधौ भावइत्युन् तदन्तादणि नुण् इत्यण् तस्मिन्निनण्यनपत्य इति प्रकृतिभावः यस्मात् संदृष्टायां चैतस्यां वैदेह्यां अरेर्निपाहः आक्रोशोऽभिभवलक्षणः वो युष्माकमर्थवान् आक्रोशेऽवन्योर्यञ इति भावे घञ्॥ ४३॥ ज० म०

सामित्यादि। यावद्दो दर्शनं नायाति न प्राप्नोति अर्थात् सीता कर्त्री तावद्युष्माभिः सांराविणं अभिव्याप्य भाषणं कोलाहलरूपं न कर्त्तव्यं संपूर्व्वरुलभ्नौ व्याप्तौ भावे णिन् णिनन्नात् स्वार्थे ष्णः मनुवर्ज्जान्वर्म्मोक्षेण इत्यादिना

प्रग्राहैरिव पात्राणामन्वेष्या मैथिली कृतैः ।
ज्ञातव्या चेङ्गितैर्धर्म्यैर्ध्यायन्ती राघवागमम् ॥ ४४ ॥
वेदिवत् सपरिग्राह्या यज्ञियैः संस्कृता द्विजैः ।
दृश्या मासतमाद्दक्षैः प्रागनिन्दितवेश्मभत् ॥ ४५ ॥

संयोगात्परस्य दृनन्तस्यापत्येण नकारलोपाभाव उक्तस्तेन असंयोगात् परस्य दृनन्तस्यापत्येण नकारलोपः स्याद्वत्वपत्येण इति प्राप्तं तेनात्र नलोपाभावः देवीदासचक्रवर्त्ती तु णिनप्रत्ययोऽकारान्तः णिनन्तादित्यत्र णिनान्तादिति पाठ-इत्याह हि यस्मात् सम्यग्दृष्टायामेव वैदेह्यां अरेर्निग्राह आक्रोशोऽभिभवो वा युष्माकं स्वार्थको भवति ग्रहेर्भावे घञ् ॥ ४३ ॥ म०

प्रग्रेत्यादि । पात्राणां भिक्षाभाजनानां प्रग्राहैरिव कृतैरन्वेष्या मैथीली भिक्षुकवेशैरिव युष्माभिरित्यर्थः ग्रहेः ग्रेलिप्सायामिति भावे घञ् कर्म्मणि षष्ठी इङ्गितैर्धर्म्मैः चेष्टितैः कुलाङ्गनोचितैः ज्ञातव्या सा ध्यायन्ती रामागमं कुलाङ्गना हि प्रोषितभर्तृका सर्व्वदा भर्तुरागमनं ध्यायति ॥ ४४ ॥ ज० म०

प्रग्रेत्यादि । पात्राणां भिक्षाभाजनानां प्रग्रहणैरिव कृतैर्भवद्भिः सीताऽन्वेष्या भिक्षुवेशैरित्यर्थः दृवार्थोऽत्र सम्भावना प्राङ्निर्देशे घञ् कथं सा ज्ञेयेत्याह धर्म्यैर्धर्म्मादनपेतैरिङ्गितैश्चेष्टितैर्ज्ञातव्या राक्षसग्रहेऽन्यस्या-स्तादृशधर्म्मासम्भवात् कौदृशी राघवागमनं चिन्तयन्ती असाधारणं चिह्नमेतत् कुलस्त्री सदा स्वामिनः समागमं ध्यायति स्वधर्म्मञ्च न त्यजतीति भावः ॥ ४४ ॥ भ०

वेदीत्यादि । यथा यज्ञियैर्यज्ञकर्म्मार्हैर्द्विजैः ब्राह्मणैः वेदिः यज्ञस्थली सपरिग्राह्या परिगृहीता संस्कृता तथा साऽपि अतिपवित्रत्वात् ग्रहेःपरौ-यज्ञ इति यज्ञविषये घञ् मासतमादक्षैः प्राग्दृश्या दर्शनार्हा मासस्य पूरणं यदहः नित्यंशतादिमासेत्यादिना तमडागमः अस्मादेव निपातनात् मासस्या-संख्यावाचित्वे डट् मासतमेऽह्नीति हेतुं दर्शयन्नाह तस्याः पूतत्वात्तद्वदनिन्दित-वेश्मभत् मैथिली मङ्गलमाल्याभरणा दर्शनार्हा तां द्रष्टुं भवतां न चिरकालो भवतीति मासावधिना प्रेषिताः ॥ ४५ ॥ ज० म०

वेदीत्यादि । मासतमात् मासपूरणादक्षैः प्राक् सीता युष्माभिर्दृश्या मासा-वधिनैव भवद्भिः प्रेष्यन्ते चिरकालो न कर्त्तव्य इति दृशेः कृदुङ्त्वात् दृभृजुषे-त्यादिना क्यप् मासशब्दात् व्रतादिमासंवत्सरादिति पूरणे तमट् कीदृशी साऽनिन्दितवेश्मभत् मङ्गलमाल्याभरणसत्त्वात् यथा यज्ञियैर्यज्ञकर्म्मार्हैर्द्विजैः

नीवारफलमूलाशाद्दृषीनप्यतिशेरते ।
यस्या गुणा निरुद्वावास्तां द्रुतं यात पश्यत ॥ ४६ ॥
उच्छ्रायवान् घनारावो वानरं जलदारवम् ।
दूराह्वावं हनूमन्तं रामः प्रोचे गजाह्वयः ॥ ४७ ॥
अवग्राहे यथा वृष्टिं प्रार्थयन्ते कृषीवलाः ।

सपरिग्राहा परिगृहीता वेदिस्तैः संस्कृता तथा सापि अतिपवित्रत्वात् पुरोहितैः संस्कृतत्वाच्च परैर्ग्रहो वज् यज्ञविषये परैर्ग्रहो घञिति परः ढधेकादिति यज्ञशब्दात् अर्हतीत्यर्थे इयः ॥ ४५ ॥ भ०

नीवेत्यादि । यस्या गुणा ब्रह्मचर्य्यादयः ऋषीनप्यतिशेरते न्यक्कुर्व्वते तां द्रुतं यात पश्यत तत्र नीवारः अकृष्टपच्यधान्यं नौदधान्य इति घञ् उपसर्गस्य घञीति दीर्घत्वं फलं मोचादि मूलं शालूकादि एतान्यश्नन्ति ये ऋषयः कीदृशा गुणाः निरुद्वावाः स्थिराः उदिश्रयतीति घञ् ॥ ४६ ॥ ज०भ०

नीवारेत्यादि । यस्याः सीतायाः गुणाः शमदमादयो मुनीनपि अतिशेरते न्यक्कुर्व्वन्ति शीङ् अतिपूर्व्वः अतिक्रमे सकर्मकः स्वभावात् कीदृशाः निरुद्वावाः स्थिराः उत्पूर्व्वाद्भवतेर्घञ् कीदृशान् नीवारं हृणधान्यं फलमामलक्यादि मूलं शालूकादि अश्नतः तां यूयं द्रुतं पश्यत यात च निपूर्व्वात् हृञोघञ् अभिधानात् क्वचिदुपसर्गस्य घञ्ते दीर्घ इति व्यतीहार इति दीर्घनिर्देशेन ज्ञापितं तेनैव दीर्घत्वं अतएवेदितोनुण् अतएव यं इत्यादिवचनात् ज्ञापकेन कार्य्यसिद्धिः स्वयमेवोक्ता हृणधान्यानि नीवारा इत्यमरः इति सुग्रीवोऽब्रवीत्स्वयः ॥ ४६ ॥ भ०

उच्छ्रेत्यादि । रामो हनूमन्तं प्रोचे कीदृशः उच्छ्रायवानुन्नतियुक्तः पूर्व्ववद्घञ् घनस्येवारावो यस्य विभाषाङिरुमुवोरिति भावे घञ् गजाह्वयः गजगमनः पक्षे पूर्व्ववदप् कीदृशं दूराह्वावं दूरमाह्वाव उन्नमनं यस्य पूर्व्ववत् घञ् ॥ ४७ ॥ ज० भ०

उच्छ्रेत्यादि । रामो हनूमन्तं वानरं प्रोचे कीदृशः उच्छ्रायवान् उन्नतिमान् महापुरुषलक्षणमेतत् उत्पूर्व्वात् श्रिञोघञ् घनस्येवारावो ध्वनिर्यस्य स तथा गजाह्वयो गजगमनः वानरं कीदृशं जलदारवं मेघशब्दं दूराह्वावं दूरदेशश्रुतिकारिणं आङ्पूर्व्वाभ्यां हुभ्यां घञलौ ॥ ४७ ॥ भ०

अवेत्यादि । अवग्रहो वर्षप्रतिबन्धः अवेग्रह इति पक्षे अप् यथा अव-

प्रार्थयध्वं तथा सीतां यात सुग्रीवशासनात् ॥ ४८ ॥
वणिक् प्रग्राहवान् यद्वत् काले चरति सिद्धये ।
देशापेक्षास्तथा यूयं यातादायाङ्गुरीयकम् ॥ ४९ ॥
अभिज्ञानं गृहीत्वा ते समुत्पेतुर्नभस्तलम् ।
वाजिनः स्यन्दने भानो विमुक्तप्रग्रहा इव ॥ ५० ॥

गृहे कृषीवला दृष्टिं प्रार्थयन्ते तथा प्रार्थयध्वं सीतां यूयं तस्या दुर्लभत्वादत्यन्तादरणीयत्वाच्च यात सुग्रीवशासनात् ॥ ४८ ॥ ज० म०

अथेत्यादि । कृषीवलाः कृषका यथा अवग्राहे दृष्टिप्रतिबन्धे दृष्टिं प्रार्थयन्ते तथा यूयं सीतां प्रार्थयध्वं अतिदुर्लभत्वात् यात सुग्रीवशासनात् न तु मयात्रा क्रियत इति भावः गौरवख्यापनायैकत्वेऽपि बहुत्वं लोकात् अन्यसहितत्वाद्वा अर्थात्कङ्याचने अवाद्दृष्टिप्रतिबन्धे गृहोघञलावितिपरः स्वमते घञलनटोऽधे इत्यस्य सर्व्वविषयत्वात् कृषिशब्दात् गोत्रणमेधेति वलः नाम्नस्त्यर्थेऽचोर्धः ॥ ४८ ॥ भ०

वणिगित्यादि । तुला प्रगृह्यते येन स्तूलेन सप्रग्राहः प्रे वणिजामिति करणे घञ् स तुलासम्बन्धी विद्यते यस्य वणिजः संसर्गे मतुप् यथा तुलाप्रग्राहवान् तदुपलक्षितो वणिक्काले उचिते क्रयसिद्धये चरति तथा यूयं अङ्गुलीयं तुलास्तूलस्थानीयं चिह्नमादाय देशापेक्षाः तत्तद्देशस्थितासत्व हि चिह्नेन रामदूता इति लक्ष्यन्ते ॥ ४९ ॥ ज० म०

वणिगित्यादि । यथा प्रगृह्यवान् तुलास्तूलवान् वणिक् योग्ये काले क्रयविक्रयादिस्वक्रियासिद्ध्यै चरति योग्यदेशमपेक्षते च तथा यूयमपि ममाङ्गुरीयकं तुलास्तूलतुल्यमादाय गृहीत्वा योग्ये काले देशापेक्षाः सीतानिवासदेशमपेक्षमाणा यात गच्छत इति रामः प्रोचे इति सम्बन्धः अनेनैवाङ्गुलीयकेन चिह्नेन सीतया महता भवन्तो ज्ञास्यन्त इति भावः तुला प्रगृह्यते येन स्तूलेन तत्प्रग्राह उच्यते प्रपूर्व्वाद्ग्रहो वणिक् सम्बन्धे रज्जौ च घञलाविति परः स्वमते घञलनटोऽधे इत्यस्यापि विषयो दुर्निवारः ॥ ४९ ॥ भ०

अभीत्यादि । ते वानरा नभस्तलमुत्पेतुः वाजिन इव विमुक्तप्रग्रहाः विमुक्ताः प्रग्रहो नियमरज्जुर्येषामिति रज्जौ चेति विभाषा ग्रहणमनुवर्त्तते घञभावपक्षे ग्रहृदृदृनिश्चिगमश्चेत्यप् स्यन्दने रथे भानोरादित्यस्य किं कृत्वा अभिज्ञानं गृहीत्वा चिह्नमङ्गुलीयकमादाय ॥ ५० ॥ ज० म०

उदक् शतवलिं कोह्या सुषेणं पश्चिमां तथा ।
दिशं प्रास्थापयद्राजा वानराणां क्षतत्वरः ॥ ५१ ॥
प्राचीं तावद्भिरव्यग्रः कपिभिर्विनतो ययौ ।
अप्रयाहैरिवादित्यो वाजिभिर्दूरपातिभिः ॥ ५२ ॥

अभीत्यादि । ते हनूमदादयोऽभिज्ञानं चिह्नमङ्गुरीयकं गृहीत्वा नभस्तलं आकाशं समुत्पेतुः यथा भानोः स्यन्दने रथे विमुक्तप्रग्रहाः शिथिलीकृतबन्धरज्जवो वाजिनोऽश्वा नभो गच्छन्ति तथा एतेनातिशीघ्रत्वं दर्शितं तलशब्दोऽत्र स्वरूपार्थः तलं स्वरूपाधरयोः खड्गमुष्टिचपेटयोरिति विश्वः प्रग्रहोऽश्वनीरज्जुवाचकः ॥ ५० ॥ भ०

उदगित्यादि । वानराणां राजा सुग्रीवः शतवलिं नाम वानरं वानराणां कोह्या सह उदगुदीचीं दिशं प्रास्थापयत् तिष्ठतेर्गत्यन्तस्य लङि रूपं उदीचीशब्दात्प्रथमान्ताद्दिशि वर्त्तमानादस्तात्तिः तस्याञ्चेर्लुक् लुक्तद्धितलुकीति स्त्रीप्रत्ययस्य लुक् तस्मिन्निवृत्तौ भसंज्ञाभावादीत्वमपि निवर्त्तते तसिलादिस्तद्धित एधाच् पर्यन्त इत्यव्ययत्वे द्वितीयालुक् तथैव सुषेणं वानरं पश्चिमां दिशं प्रास्थापयत् क्षतत्वरः त्वरितः ॥ ५१ ॥ ज० म०

उदगित्यादि । वानराणां राजा सुग्रीवः क्षतत्वरस्त्वरान्वितः सन् शतवलिनामानं कपिं उदक् उत्तरस्यां दिशि प्रस्थापयामास तथा सुषेणनामानं पश्चिमां दिशं प्रास्थापयत् वानराणां कोह्या सहेत्युभयत्र योज्यं घोऽजेः शब्दाशनगतीत्यादिना प्रयोज्यस्य कर्म्मत्वं प्रपूर्व्वस्य तिष्ठतेर्गत्यर्थत्वात् उदगिति उदक्शब्दाद्दिग्देशकाले इति सप्तम्याःस्तात् तस्य लुक् चात्मरत्वात् तदन्तस्याव्ययत्वं लोकोपचारात् ॥ ५१ ॥ भ०

प्राचीमित्यादि । कपिभिस्तावद्भिरित्येककोटिसंघातैः सह विनतः प्रणतः सुग्रीव इत्यर्थात् अव्यग्रः अनाकुलः प्राचीं पूर्व्वां दिशं ययौ यथा आदित्योवाजिभिरप्रयाहैः सुकृतबन्धनैः करणभूतैः रश्मौचेति घञ् दूरयायिभिः ॥५२॥ज०म०

प्राचीमित्यादि । विनतनामा वानरोऽव्यग्रोऽनाकुलः स तावद्भिः कोटिसंख्यातैः कपिभिः सह प्राचीं पूर्व्वां दिशं ययौ सुग्रीवाज्ञयेत्यर्थात् यथा आदित्यः सूर्य्योऽप्रयाहैर्मुक्तरज्जुभिर्दूरपातिभिर्वाजिभिरश्वैः सह प्राचीं याति तथा प्रग्राहोघञन्तो रज्जुवाचकः अदितेरपत्यमिति गर्गादित्वात् ष्यञ् केचित्तु विनतो नम्रः सुग्रीवः प्राचीं ययावित्याऽऽसक्तु रामायणविरुद्धम् ॥५२॥ भ०

ययुर्विन्ध्यं शरन्मेघैः प्रावारैः प्रवरैरिव ।
प्रच्छन्नं मारुतिप्रष्ठाः सीतां द्रष्टुं प्लवङ्गमाः ॥ ५२ ॥
परिभावं मृगेन्द्राणां कुर्वन्तो नगमूर्द्धसु ।
विन्ध्ये तिग्मांशुमार्गस्य चेरुः परिभवोपमे ॥ ५३ ॥
भ्रेमुः शिलोच्चयांस्तुङ्गानुत्तेरुरतरान् नदान् ।
आशंसवो लवं भ्रातुः सीतायाश्च विनिश्चयम् ॥ ५४ ॥

ययुरित्यादि । मारुतिप्रष्ठाः हनूमदग्रेसराः सीतां द्रष्टुं विन्ध्याख्यपर्व्वतं ययुः शरन्मेघैः प्रावारैरिव प्रावरणैरिव प्रच्छन्नं वृणोतेराच्छादन इति घञ् प्रवरैः श्रेष्ठैः अनाच्छादने यङ्लुगित्यादिना अप् ॥ ५३ ॥ ज० म०

ययुरित्यादि । प्लवङ्गमा वानराः सीतां द्रष्टुं विन्ध्याख्यपर्व्वतं ययुः प्लवेन गच्छतीति तुम्बुरुदजौत्यादिना खः कीदृशाः मारुतिर्हनूमान् प्रष्ठोऽग्रसरो येषां ते तथा प्रादयश्चेत्यस्य षत्वमभिधानात् मनीषादित्वाद्वा कीदृशं शरन्मेघैः प्रच्छन्नं प्रवरैः श्रेष्ठैः प्रावारैः प्रच्छदपटैरिव अभिधानात् प्राङ्पूर्व्वात् वृञआच्छादने घञ् अन्यत्वात् ॥ ५३ ॥ भ०

परीत्यादि । मृगेन्द्राणां सिंहानां परिभावमभिभवं कुर्वन्तः विन्ध्ये चेरुः भ्रान्ताः परौभुवोऽवज्ञान इति घञ् कीदृशे परिभवोपमे आदित्यमार्गस्य परिभवनं अत्युच्चत्वात् घञभावपक्षे अप् ॥ ५४ ॥ ज० म०

परीत्यादि । ते नगमूर्द्धसु गिरिशिखरे मृगेन्द्राणां सिंहानां परिभावं तिरस्कारं कुर्वन्तो विन्ध्ये चेरुः चरगतौ कीदृशे सूर्य्यवर्त्मनः परिभव इव तस्यात्युच्चत्वात् परिभवशब्देनात्र तत्कर्त्ता लक्ष्यते आदित्यमार्गस्य परिभवेणोपगता मा लक्ष्मीः शोभा यस्येति वा यद्वा तत्परिभवक्रिययैवात्र लोकभयदत्वेन साम्यं विवक्षितं परिपूर्व्वाद्भुवोघञ्लौ स्वभावादवज्ञानार्थता न गच्छतीति नगः हनजनादिति डः ॥ ५४ ॥ भ०

भ्रेमुरित्यादि । उत्पूर्व्वाच्छ्रिणोतेः एरजित्यच् शिलाभिरुच्चयो येषां तान् शिलोच्चयान् भ्रेमुः भ्रमणक्रियायाव्याप्यत्वात्सकर्म्मकता नदान् अतरान् तरित्वमशक्तान् उत्तेरुः उत्तीर्णवन्तः भ्रातुर्लवमुच्छेदनं सीतायाश्च विनिश्चयं विनिर्णयम् आशंसवः आशंसनशीलाः मनाशंसभिक्षउः तरलवौकदोरवितिं अप्प्रत्ययान्तौ विनिश्चय इति यङ्लुगित्यप् ॥ ५५ ॥ ज० म०

आदरेण गमञ्चक्रुर्विषमेष्वप्यसङ्गसाः ।
व्याप्नुवन्तो दिशोऽन्यादान् कुर्वन्तः सव्यधान् हरीन् ॥५६॥
सञ्चेरुः सहसाः केचिदस्खनाः केचिदाटिषुः ।
संयामवन्तो यतिवन्निगदानपरेऽसुचन् ॥ ५७ ॥

सञ्चेरुरित्यादि । ते भीमान् भयदान् शिलोच्चयान् पर्व्वतान् सञ्चेरुः तफलेत्यादिना अतएत्वं खिलोपश्च भ्रमणस्य गतिविशेषत्वात् सकर्म्मकता शिलाभिरुच्चयोऽट्टिर्येषां उच्चीयत इति वा उच्चयस्तूपः शिलाभिरुच्चयः अतस्तान् अन्यैस्तरितुमशक्यान् नदान् उत्तेरुः ततरेऽभिभवन्तु त्यां ऋतोणुःकिट्च्चां शतोर्लवं क्वेदं आशंसव इत्ववः सीतायाविशेष्य निश्चयञ्च आशंसवः सनभिज्ञाशंसउः चितलूभ्योऽल् ॥ ५५ ॥ भ०

आदेत्यादि । विषमेष्वपि प्रदेशेषु गमं गमनं चक्रुः आदरेणानवज्ञया यच्छेरित्यप् असंघसाः त्यक्ताहाराः उपसर्गेद इति अपि घञपोरिति अदेर्घस्लादेशः हरीन् सिंहान् सव्यधान् सप्रहारान् व्यधजपोरित्यप् सप्रहारत्वादन्यादान् परित्यक्ताहारान् कुर्वन्तः नौणचेति निपूर्व्वाद्दरेरणप्रत्ययः तस्मिन्नदेर्न घस्लादेशः चकारादपि तत्र निघसः दिशो व्याप्नुवन्तः सर्व्वव्यापिनः ॥ ५६ ॥ ज० म०

आदेत्यादि । ते विषमेष्वपि देशेषु गमं चक्रुः रामस्य कार्य्यमित्यादरेण न तु परस्य कार्य्यमित्यवज्ञया क्षीद्दशाः असंघसाः सम्यगाहाररहिताः निरन्तरभ्रमणात् दिशो व्याप्नुवन्तः हरीन् सिंहान् सव्यधान् सप्रहारान् अतएवान्यादान् आहाररहितान् कुर्वन्तः गमअदव्यधिभ्योऽल् घस्लदःसन्श्चिल्घञीति अदेर्घस्लादेशः निपूर्व्वाददोनाम्नप्रत्येतिक्चेति णप्रत्ययः घञि तु वस्लादेशाप्रसङ्गात् नेरदोणालाविति परः जेमनं लेपआहारोनिघसोन्यादद्दत्यमरः ॥ ५६ ॥भ०

सञ्चे इत्यादि । सहसाः सस्निताः अस्खना स्तूणीकाः स्खनहसोर्वेत्यप् यतिवत् संयामवन्तः नियमवन्तः यमः ससुपनिविषु चेति घञ् आटिषुः अटितवन्तः अटेर्लुङि रूपं अपरे निगदान्वचनान्यसुचन् नौगदेत्यादिना विकल्पेनापोविधानात् घञ् ॥ ५७ ॥ ज० म०

सञ्चेरुरित्यादि । केचिद्वानराः सहसाः सन्तरेरुः तफलेति अतएत्वं खिलोपश्च केचिदस्खना मौनिनः यतिवत्संयामवन्तः संयमिनः सन्त आटिषुर्गतवन्तः अटगतौ ञ्यासिः अनुस्विद्वेरिति अनउस् अपरे निगदान् असुचन् अन्तःस्थितस्य शब्दस्य बहिर्निःसारणं मोक्षः तं कृतवन्त इत्यर्थः हसस्खननिगदा अलन्ताः संयामो घञन्तः ॥ ५७ ॥ भ०

अथ क्लमादनिःक्वाणा नराः क्षीणपणा इव ।
अमदाः सेदुरेकस्मिन् नितम्बे निखिला गिरेः ॥ ५८ ॥
ततः ससम्मदास्तत्र निरैक्षन्त पतत्त्रिणः ।
गुहाद्वारेण निर्यातः समजेन पशूनिव ॥ ५९ ॥
वीनामुपसरं दृष्ट्वा तेऽन्योन्योपहवा गुहाम् ।

अथेत्यादि । अथ परिभ्रमणादनन्तरं क्लमेन परिश्रमेण अमदाः गतहर्षाः मदोऽनुपसर्ग इत्यप् अतएव निःक्वाणाः निश्शब्दाः क्वणो वीणायाश्चेत्यघोविकल्पेन घञ् वीणादिविषयमेतत् क्वणेर्निपूर्वादनुपसर्गाद्वीणादिविषयाच्च विकल्पेनाप्रत्यय इत्युक्तं एकस्मिन् गिरेर्नितम्बे सेदुः निषसादुः निखिलाः समस्ता वानराः क्षीणपणा इव अर्थरहिता नरा इव पश्यन्त इति पणाः व्यवहाराय क्रते पणे व्यवस्थाप्यन्ते नित्यं पणः परिमाणे इत्यप् ॥ ५८ ॥ ज० म०

अथेत्यादि । भ्रमणानन्तरं ते निखिलाः सर्वे वानराः कस्यचिद्गिरेर्नितम्बे सेदुर्निषण्णा कीदृशाः क्लमेन श्रमेण निःक्वाणा निःशब्दाः अमदा हर्षरहिताः क्षीणपणा नष्टधनादव निःक्वाणो घञन्तः क्वणः शब्दमात्रे घञन्तौ सप्रादेरपि वीणाध्वनौ तु सप्रादेरेवेति परः स्वमते अभिधानं नियामकमित्युक्तेः स एव नियमः क्लमपणमदा अलन्ता पण्यते व्यवच्छिद्यते अनेनेति पणः पणोवराटमात्रे स्यान्मूल्ये कार्षापणे गृहे । क्रयशाकटिकाद्यूतव्यवहारे भृतौ पन इति विश्वः ॥ ५८ ॥ भ०

तत इत्यादि । ततो विश्रामानन्तरं ते तत्र तस्मिन् पर्वते पतत्त्रिणः पक्षिणो निरैक्षन्त ईक्षितवन्तः ईक्षेर्लङि रूपं कीदृशान् गुहाद्वारेण निर्यातः निर्गच्छतः निष्पूर्वाद्याते: शतन्तस्य ङसि रूपं ससम्मदाः सहर्षाः प्रमदसम्मदाविति निपातितं समजेन वृन्देन पशूनिव निर्यातः ससृदोरजपशुघ्वित्यप् ॥ ५९ ॥ ज० म०

तत इत्यादि । उपवेशानन्तरं ते ससम्मदाः सहर्षाः सन्तस्तत्र पर्वते गुहाद्वारेण निर्यातो निर्गच्छतः पतत्त्रिणः पक्षिणो निरैक्षन्त दृष्टवन्तः समजेन समूहेन निर्गच्छतः पशूनिव तद्वदतिस्थूलानित्यर्थः समदसमजावलन्तौ व्यजोऽरे इत्यादौ अलन्तवर्जनाद्राजेर्व्यादेशः संप्राभ्यां महोहर्षे ससङ्ग्रामजः पशुसंग्रहेरणयोरलिति परेषां विशेषसूत्रं निःपूर्वादीक्षेर्घो यातेः शतः ॥ ५९ ॥ भ०

प्राविशन्नाहवप्रज्ञा आह्वावसुपलिप्सवः ॥ ६० ॥
कुर्व्वन्तो हवमाप्तानां पिपासाबधकाङ्क्षिणः ।
द्वारं तमोघनप्रख्यं गुहायाः प्राविशन् द्रुतम् ॥ ६१ ॥

वीनामित्यादि । वीनां पक्षिणामुपसरं नैरन्तर्य्येण निर्गमनं दृष्ट्वा उपसर इव उपसरनैरन्तर्य्यमात्रेणोपलक्षितत्वात् उपसरोहि स्त्रीगवीषु पुङ्गवानामभिगमनमुच्यते स च नैरन्तर्य्येण भवति प्रजनेसर्त्तेरित्यप् वानरा अन्योन्योपह्वाः परस्परमाह्वानं येषां आगच्छतागच्छत प्रविशाम इति ह्वः संप्रसारणमित्यप् संप्रसारणञ्च गुहां प्राविशन् प्रविष्टवन्त आहवप्रज्ञाः युद्धप्रज्ञाः आह्वयते युद्धाय स्पर्द्धतेऽत्रेत्याङि युद्धदृत्यप् संप्रसारणञ्च आह्वावसुपलिप्सवः उदकाधारसुपलब्धुमिच्छवः निपानमाह्वाव इति घञि संप्रसारणं निपात्यते दृद्भिरस्येव अप्प्रत्यये त्वदृद्भिः ॥ ६० ॥ ज० म०

वीनामित्यादि । वीनां पक्षिणामुपसरं उपर्य्यधो गमनं दृष्ट्वा ते वानरा गुहां प्राविशन् कीदृशाः अन्योन्यस्य उपहव आह्वानं येषां ते तथा आहवे युद्धे प्रज्ञाः पण्डिताः अतएव गुहाप्रवेशे निर्भयत्वं आह्वावसुदकाधारसुपलब्धुमिच्छवः उपसरोऽलन्तः अभिधानात् उपर्य्यधोगमनार्थः उपसरो हि स्त्रीगवीषु पुङ्गवानामभिगमनमुच्यते स चोपर्य्यधोभावेन भवतीत्युपसानादिह उपसरशब्देन उपर्य्यधोगामित्वमुच्यत इति केचित् गर्भग्रहणार्थोपसरणे सर्त्तेरणिति परस्रूत्वं तन्मते उपसरोगर्भार्थं यास्यधर्म्माचरणं तच्च वह्निर्निःसरतां पक्षिणां सम्भवत्येव ह्वलिह्वोमेऽदने इत्यस्मादलुबौ उपसर्गेणान्यार्थता परेषां मते ह्वेर्ज्योरूपं अभ्युपनिविभ्योह्वे ओऽल् ह्वश्चेति तथा आङोयुद्धेह्वे ओऽल्ह्वश्चेति आङोनिपाने ह्वश्चेति तेषां सूत्रत्रयम् ॥ ६० ॥ भ०

कुर्व्वेत्यादि । गुहां प्रविश्य तस्याः द्वारमपरं प्राविशन् आप्तानां स्निग्धानां हवमाह्वानं कुर्व्वन्तः भावेऽनुपसर्गस्येत्यप् संप्रसारणं च पिपासा पातुमिच्छा तस्या बधोऽपनयनं हनश्चबध इत्यप् बधादेशश्च तं काङ्क्षितुं शीलं येषामिति काच्छिमाच्छिकांक्षाया इत्यस्मात्सुपजातौ णिनिः इदितोनुम् साधुकारिणि वा कीदृशं द्वारं तमोघनप्रख्यं तमसोघनः मूर्त्तिः काठिन्यं तेन सदृशं मूर्त्तौ घन इति हन्तेरप्रत्ययो घनादेशश्च निपात्यते मूर्त्तिमत्तम इव द्वारमित्यर्थः ॥ ६१ ॥ ज० म०

कुर्व्वेत्यादि । ते आप्तानां स्निग्धानां हवमाह्वानं कुर्व्वन्तो गुहायाद्वारं द्रुतं प्राविशन् कीदृशाः पिपासायास्तृष्णाया बधं हननं काङ्क्षन्तीति अर्हादित्वात्

तस्मिन्नन्तर्घणे प्रघण् प्रघाणे सौधसद्मनः ।
लोहोद्वनघनस्कन्धा ललितापघनां स्त्रियम् ॥ ६२ ॥

णिन् ताच्छील्ये आभिमुख्ये वा णिन्निति परः स्वमतेऽपि तदर्थता प्राप्यते यतो णिन्विधायकसूत्रे अर्थविशेषो नोक्तः किन्तु ढधेक्तेत्यादौ भव्यगेयार्थेणिन्नित्युक्तं तेनाभिधानादर्थविशेषेऽपि णिन् स्यादिति ज्ञापितं द्वारं कीदृशं तमोघनप्रख्यं तमसां घनेन काठिन्येन प्रख्यं सदृशं मूर्त्तिः काठिन्यमुच्यते तदुपचारात् मूर्त्तिमत्तया दृश्येत्यर्थः मेघप्रख्यं तमश्च प्राविशन्निति केचित् हृवमिति ह्रलिहोमे इत्यस्यालन्तस्य रूपं धातूनामनेकार्थत्वात् आह्वानार्थता ह्वेओऽल्लुप्तश्च भावे नञ्पसर्गादिपरः हन्तेरलि हनवधष्टीढ्रलीति वधादेशः काठिन्यादौ हन्तेरल् घनादेशश्चेति परः स्वमते निपातः ॥ ६१ ॥ भ०

तस्मिन्नित्यादि । द्वारमतिक्रम्य यः सावकाशप्रदेशः सोऽन्तर्घण इत्युच्यते तथाह्यन्तर्हन्यते क्रोडीभवत्यस्मिन्निति अनुगतार्थत्वं अन्तर्घणो देश इत्यन्तः पूर्ववाङ्हन्तेरप् घनादेशः घणादेशोवा ये णकारं पठन्ति यत्तु संज्ञीभूतोवाह्वीकेषु देशविशेष इत्युक्तं तत्संज्ञाशब्दमाश्रित्य तस्मिन्नन्तरे यत्सौधसद्म धवलगृहं तस्य प्रघाणे एकदेशे प्रघणः प्रघाणश्चेति निपातितं स्त्रियं ललितापघनां ललिताङ्गीमपश्यन् अपघनोऽङ्गमिति निपातनं लोहोद्वनघनस्कन्धाः यस्मिन् स्थापयित्वा काष्ठादीनि संक्ष्वियन्ते स उद्वनः आधान तद्वत् घनः स्कन्धो येषामिति उद्वनोऽत्याधानमिति निपातनम् ॥ ६२ ॥ ज० म०

तस्मिन्नित्यादि । तस्मिन् गुहाभ्यन्तरे अन्तर्घणे द्वारसमीपे सावकाशप्रदेशे यत् सौधसद्म धवलगृहं तस्य प्रघणे द्वारप्रकोष्ठाभ्यां बहिःप्रदेशे ललितापघनां मनोहरशरीरां स्त्रियं तेऽपश्यन् कीदृशाः लोहोद्वनघनस्कन्धाः यस्मिन् स्थापयित्वा काष्ठादिकं हन्यते स उद्वनः लोहस्य य उद्वनस्तद्वद्वनो निबिडः स्कन्धोयेषां ते तथा लोहवदुद्वनः काष्ठविशेष इत्यन्ये परमते अन्तर्हन्यते यस्मिन्नन्तर्घणोऽभ्यन्तरदेश उच्यते अन्तरोहन्तेरलि देशे घनादेशः विभाषया णत्वं स्वमते मूर्द्धन्यान्तत्वे घणोऽलि रूपं दन्त्यान्तत्वे तु हन्तेर्निपातः परमते प्रकृष्टं हन्यते गम्यतेऽस्मिन्निति प्रघाणः प्राङ्मुहद्वारबाह्यपिण्डके हन्तेर्घञ्लौ घनादेशश्च पूर्वपदस्थान्निमित्तात् संज्ञायां णत्वं स्वमते घणोघञि रूपं प्रघाणप्रघणालिन्दा बहिर्द्वारप्रकोष्ठके इत्यमरः परमते ऊर्द्धं हन्यते यस्मिन् स उद्वनः उदः प्रतिकाष्ठके हन्तेरल् घणादेशश्च स्वमते निपातः निधाय तच्यते यत्र काष्ठे काष्ठं स

सा स्तम्बघ्नपदन्यासान् विघनेन्दुसमद्युतिः ।
परिघोरुभुजानाह हसन्ती स्वागतं कपीन् ॥ ६३ ॥
पिप्रायाद्रिगुहोपघ्नानुद्वान् रुङ्क्षसमागतान् ।
फलैर्नानारसैश्चित्रैः स्वादुशीतैश्च वारिभिः ॥ ६४ ॥

उद्वन इत्यमरकोषे काष्ठ इत्युपलक्षणं घनः पूर्ववत् परमतेऽपहन्यतेऽनेनेत्यपघनो देहः अपादङ्क्हन्तेरल् घनादेशश्च स्वमते निपातः वस्तुतः अन्तर्घणादयो रूढाः व्युत्पत्तिस्तु यथाकथञ्चिदेव ॥ ६२ ॥

सास्तम्बित्यादि । सा स्त्री हसन्ती कपीन् स्वागतं वच आह कीदृशी विघनेन्दुसमद्युतिः विहन्यते अभिभूयते अन्या द्युतिर्येन स विघनः करणेघो-विदुञ्चित्यप् घनादेशश्च स चेन्दुश्चेवि सः तत्सभा द्युतिर्यस्याः स्तम्बो हन्यते येन पादन्यासेन स स्तम्बघ्नः तृणकाष्ठादिः स्तम्बेकच इति करणे कः गमहनेत्युप-धालोपः तादृशः पादन्यासो येषां कपीनामिति परिहन्यते येन परौघ इत्यप् घादेशश्च परिघो अर्गलः तदनुकारिणो विपुला बाहवो येषामिति ॥६२॥ज०म०

सेत्यादि । सा हसन्ती स्वागतमिति कपीनाह कीदृशान् स्तम्बघ्नपदन्या-सान् स्तम्बो हन्यते तृणकाष्ठादिकसुपमर्द्यते येन तादृशः पदन्यासो येषां तान् हन-चरगटगिति कर्त्तरि विहितष्टक् क्ङ्क्वोःकभाव इति अन्यत्र दृश्यते घेऽपि न क्षतिः हनगमित्युङ्लोपे हनोङ्क्वोघ्नः स्तम्बघ्नश्च स्तम्बघनः स्तम्बो येन निहन्यते स्तम्बो गुच्छस्तृणादिन इत्यमरः परिघवदुरवो विपुला भुजा येषां परिघोऽस्त्र-विशेषः परमते परिहन्यतेऽनेनेति हन्तेर्डान्तस्य रूपं रूढशब्दोऽयं सा कीदृशी विघनेन्दुसमद्युतिः विगतोघनो मेघो यस्मात् तादृशस्य घरत्कालीनस्य चन्द्रस्येव दीप्तिर्यस्याः परमते हन्तेरल् मेघे घनादेशश्च स्वमते निपातः ॥ ६३ ॥ भ०

पिप्रेत्यादि । तान्विविधैः फलैर्नानारसैश्च पिप्राय तर्पितवती अद्रिगुहोप-घ्नान् अद्रिगुहैव उपघ्न आश्रयो येषां कपीनां उपघ्न आश्रय इत्यप् उपधालोपश्च निपात्यते संघसमागतान् समूहेनागतान् उद्वान् प्रशस्तान् संघोद्वौ गणप्रशंसयो-रिति समुदोरुपपदयोः हन्तेरपि टिलोपश्च निपात्यते ॥ ६४ ॥ ज० म०

पिप्रेत्यादि । सा फलैर्नानारसैश्च तान् पिप्राय तर्पितवती कीदृशान् अद्रि-गुहा उपघ्न आश्रयो येषां तान् उपादाश्रये हन्तेरल् घ्नश्चेति परः स्वमते हनचरगटगित्यस्य क्ङ्क्वोःकभाव इत्यन्यत्र प्रवृत्तिः अभिधानादाश्रयार्थता स्वादु-पक्वोऽन्तिकाश्रय इत्यमरः उद्वान् प्रशस्तान् परमते उर्द्व हन्यते शायत इति

निधानिधतरुच्छन्ने तस्मिंस्ते लब्धिभैः फलैः ।
तृप्तास्तां भ्राजथुमतीं पप्रच्छुः कस्य पूरियम् ॥ ६५ ॥
रत्नां करोषि कस्मात्त्वं यत्नेनाख्यायतां शुभे ।
स्वप्ने निधिरदाभाति तव सन्दर्शनं हि नः ॥ ६६ ॥

उदःप्रथस्ते हन्ते रल् धादेशश्च खमते हनजनादित्यस्य क्ङ्डोःकभाव इत्यन्यत्र प्रदत्तेर्गमादित्वात् घणोडः संघेन समूहेनागतान् संहननं संहन्यते वास्मिन्निति समोहन्ते रल् समूहे धादेशश्चेति परः खमते उद्भवत् फलैः कीदृशैः नानारसैः नानाविधरसयुक्तैः चित्रैरद्भुतैः वारिभिः कीदृशैः स्वादुशीतैः मधुरशीतलैः॥६४॥भ०

निधेत्यादि । तस्मिन्प्रघणे निधानिधैर्निमित्तानिमित्तैस्तरुभिः छन्ने निधो निमित्तमिति निपूर्व्वाद्धन्ते रपि टिलोपे निपात्यते समारोहपरिणाहाभ्यां निमित्तमित्युच्यते ते कपयः लब्धिभैर्लाभनिर्वृत्तैः द्वितः क्तिः फलैस्तृप्ताः सन्तस्तां स्त्रियं भ्राजथुमतीं शोभावतीं पप्रच्छुः पृष्टवन्तः कस्येयं पूरिति ट्वितोऽथुच् तदन्तान्मतुप् ॥ ६५ ॥ज० म०

निधेत्यादि । तस्मिन् सौधसद्मनः प्रघणे ते वानरास्तां पप्रच्छुः तस्मिन् कीदृशे निधानिधैर्दैर्घ्यविस्ताराभ्यां तुल्यातुल्यैस्तरुभिर्वृक्षैश्छन्ने आवृते परमते निःशेषेण हन्यन्ते ज्ञायन्ते इति नेस्तुल्यारोहपरिणाहे हन्ते र्डोधादेशश्च खमते घणोरूपं विश्वक्समेनिध इत्यमरः ते कीदृशाः लब्धिभैर्लाभेन निर्वृत्तैः फलैस्तृप्ताः लभङ्क्ङषप्राप्तौ द्वितस्तञ्जे त्विमक् ढभात्तथोर्धः तां कीदृशीं भ्राजथुमतीं टुभ्राजृञ्दीप्तौ ट्वितोऽथुभावे किं पप्रच्छुरित्याह कस्येयं पूरिति अग्रिमश्लोकेनाध्वन्वयः ॥ ६५ ॥ भ०

रत्नामित्यादि । हे शुभे कस्माद्धा रत्नां रत्नां करोषि एतद्यत्नेनादरेण नोऽस्माकमाख्यायतां उभयत्रापि यजयाचेति नङ् यस्मात्स्वप्ने निधिवत् निधिरिव तव संदर्शनमाभाति नोऽस्माकमतिदुर्लभत्वात् स्वप्न इति स्वपोनन् निधिरिति उपसर्गेधोः किः ॥ ६६ ॥ज० म०

रत्नामित्यादि । हे शुभे कस्माद्धा त्वं रत्नां रत्नां करोषि अर्थात् पूर्य्याः एतत् यत्नेनादरेणाख्यायतां कथ्यतां हि यस्मात् स्वप्ने निधिरिव तव सन्दर्शनं अतिदुर्लभत्वान्नोऽस्माकमाभाति अतः पूर्व्वमननुभूतत्वात् एवं पृच्छाम इति भावः स्वपरक्षयतेत्यादिना सर्व्वत्र नङ्रत्नेर्णत्वं निधिरिति किर्हेर्डन्तर्गेरिति किः उस्रेचोत्यालोपः ॥ ६६ ॥ भ०

ततो जलधिगम्भीरान् वानरान् प्रत्युवाच सा ।
इयं दानवराजस्य पूः सृष्टिर्विश्वकर्म्मणः ॥ ६७ ॥
निहतश्च स्थितिं भिन्दन् दानवोऽसौ बलद्विषा ।
दुहिता मेरुसावर्णेरहं नाम्ना स्वयम्प्रभा ॥ ६८ ॥
जूतिमिच्छथ चेत्तूर्णं कीर्त्तिं वा पातुमात्मनः ।
करोमि वो वह्निर्यूतीन् पिधध्वं पाणिभिर्दृशः ॥ ६९ ॥

तत इत्यादि । ततस्तस्मादनन्तरं सा प्रत्युवाच जलं धीयते अस्मिन्निति अधिकरणे चेति किः जलधिः समुद्रः तद्वद्गम्भीरानक्षोभ्यत्वात् इयं पूः दानवराजस्य विश्वकर्म्मणः सृष्टिः सृज्यत इति सृष्टिः कर्म्मणि स्त्रियांक्तिन् । इतः स्त्रीलिङ्गमधिकृत्योच्यते ॥ ६७ ॥ ज० म०

तत इत्यादि । तदनन्तरं सा वानरान् प्रत्युवाच कीदृशान् जलधिवत् गम्भीरान् अक्षोभ्यान् जलानि धीयन्तेऽत्रेति ढाड्डे इति किः किं प्रत्युवाचेत्याह दानवराजस्य इयं पूः विश्वकर्म्मणः सृष्टिः पूर्व्वं कस्य पूरिति स्वामिनः कर्त्तुश्च प्रश्न इत्युभयसत्तां सृज्यत इति किः क्तिस्त्रियां इति कर्म्मणि स्त्रियां क्तिः । इतः स्त्रीलक्षदधिकारः ॥ ६७ ॥ भ०

निहेत्यादि । असौ दानवराजः स्थितिं मर्य्यादां भिन्दन् त्यागापापचोभाव इति क्विन् बलद्विषा इन्द्रेण निहतः यस्य चाहं दुहिता स पिता नाम्ना मेरुसावर्णिः अहञ्च नाम्ना स्वयंप्रभेति ॥ ६८ ॥ ज० म०

निहेत्यादि । बलद्विषा इन्द्रेण असौ दानवराजो निहतः यतः स्थितिं मर्य्यादां भिन्दन् त्यजन् अहं मेरुसावर्णिनाम्नो दुहिता कन्या च स्वयंप्रभा पितुरात्मनश्च प्रसिद्धनामोत्कीर्त्तनेन दानववधानन्तरमिन्द्रेणाहमिह नियुक्तेति किंवदन्ती सूचिता तिष्ठतेः क्तिः दोषोमास्थामिति ङिः मर्य्यादा धारणा स्थितिरित्यमरः स्वयंप्रभेति स्वयं प्रभाति शोभत इति आतोऽनुपसर्गेभ्यः अङ्गेरिति ङिः स्वयमात्मना प्रभा यस्या इति वा ॥ ६८ ॥ भ०

जूतिमित्यादि । यदि तूर्णं शीघ्रं जूतिं गमनमिच्छथ कीर्त्तिं वा आत्मनः पातुं रक्षितुं वः युष्मान् वह्निर्यूतीन् वह्निभूतान् जति यूतीत्यादिना निपातितः तत्र यौतेर्जवतेश्च क्तिन् दीर्घत्वञ्च निपात्यते कीर्त्तिरपि कृतुसंशब्दने स्वार्थिको णिच् उपधायाश्चेत्वं तस्मात् क्तिन् अतः पाणिभिः दृशो दृष्टेः पिधध्वं

व्रज्यावतो निरुद्वाक्षान् विद्येवानुष्ठितक्रियान्।
निरचिक्रमदिच्छातो वानरांश्चंक्रमावतः ॥ ७० ॥

क्षादयध्वं अपि पूर्व्वाद्वाजोलोटि द्विर्व्वचनेदधस्तथोस्येति अभ्यासस्य भषभावे आभ्यस्तयोरित्याकारलोपे झलांजशझशीति धातोर्हकारे वष्टि भागुरिरित्युपसर्गाकारलोपे च रूपं ॥ ६६ ॥ ज० म०

जूतिमित्यादि । यूयं चेत् यदि तूर्णं शीघ्रं जूतिं गमनमिच्छथ प्रभुकार्य्यं कृत्वा आत्मनश्च कीर्त्तिं धातुं रक्षितुमिच्छथ तदा पाणिभिर्हस्तैर्दंशञ्चतूंषि पिधध्वं आच्छादयत ततोऽहं वो युष्मान् वहिर्यूतीन् वहिर्देशे यूतिर्मिश्रणं येषां तादृशान् वहिर्गतानित्यर्थः जुमत्यां युतमिश्रणे सातिहेतीति जूतियूती भावकर्म्मण्यन्ते निपात्येते कृत्क्संशब्दे कित्त्वञ्चरादिः कीर्त्यते येति कर्म्मणि क्तिः कीर्त्तिकृत इति कीर्त्तादेशः जेर्लोपः अपिपूर्व्वात् धाञोगीध्वं धादीरेद्धिः खेर्दत्वं आद्योरित्यालोपः झभान्तस्येति खेर्दस्य धत्वं झष्झषोरिति झलघातोर्दत्वं वातोर्दत्वं वातोऽवाथोरिति पक्षे अमेरतोलुक् ॥ ६६ ॥ भ०

व्रज्येत्यादि । सा व्रज्यावती प्रशस्तगमनवती व्रजयजोर्भावे क्यप् प्रशंसायां मतुप् वानरान्निरुद्वाक्षान् निरचिक्रमत् निष्कासितवती क्रमेर्ण्यन्तस्य लुङि सन्वल्लघुनीति सन्वद्भावात् सन्यत इतीत्वं दीर्घोलघोरिति न दीर्घत्वं संयोगपरस्य गुरुत्वात् अनुष्ठितक्रियानाचरिततदुपदिष्टव्यापारान् क्रञ्चःशचेति शः सार्व्वधातुके यक् रिङादेशश्च चङ्क्रमावतः कुटिलगतिमतः अःप्रत्ययादित्यकारः इच्छात इति वानराणामिच्छायाः इच्छेति निपातितं इषेः भप्रत्ययः क्षुभ्नादिषु निपात्यते विद्यासंज्ञायामिति क्यप् यथा विद्या अनुष्ठितक्रियान् कृतपुरश्चरणान् पुरुषानिच्छातोऽभीष्टं सम्पादयति तद्वत्येति ॥ ७० ॥ ज० म०

व्रज्येत्यादि । सा व्रज्यावती प्रशस्तगतिमती वानरानिच्छातो निरचिक्रमत् निष्क्रामयामास यथा विद्या तत्त्वज्ञानं इच्छातः अनुष्ठितक्रियान् विहितध्यानधारणादीन् संसारान्निष्क्रामयति तद्वत् वानरानपि अनुष्ठितक्रियान् आचरिततदुपदिष्टव्यापारान् यतो निरुद्वाक्षान् आच्छादितदृशः सक्ष्यक्ष्णःषः स्वाङ्ग इति षः पक्षे जितेन्द्रियान् अक्षशब्द इन्द्रियवचनः चंक्रमावतः अन्धकारे कुटिलगतियुक्तान् पक्षे तीर्थादिचंक्रमणकारिणः व्रज गतौ भीव्रजयजविदेत्यादिना क्यप् ततोऽत्यर्थं प्रशंसायां मतुः विद्वत्ज्ञाने पूर्व्ववत् क्यप् क्रियत इति क्रिया कृःशसेति शः ऋद्रिःशुध्वोरितीयः क्रमेर्ज्ञत्वात् जिस्थिदृक्षु इत्यङ्

निष्क्रम्य शिक्षया तस्याः स्वपावन्तो रसातलात् ।
ज्ञात्वा मासमतिक्रान्तं व्यथामवललम्बिरे ॥ ७१ ॥
चिन्तावन्तः कथाश्चक्रुरुपधाभेदभीरवः ।
अकृत्वा दृपतेः कार्य्यं पूजां लप्स्यामहे कथम् ॥ ७२ ॥

खेःसत्यत् ख्यस्येत् खःखेरुरिति गुरुत्वान्न दीर्घः दृषद्छायां तुलेक्षेत्यादिना निपातः क्रमेर्यङन्तात् यंस्यादः यङोलुक् ततोवतुः ॥ ७० ॥ भ०

निष्क्रेत्यादि । तस्याः शिक्षया उपदेशेन गुरो सहज इत्यकारः तस्माद्रसातलान्निष्क्रम्य निर्गत्य स्वपावन्तः स्विया उपदेशेन निष्क्रान्ता वयमिति त्वमेति भिद्भिदादिभ्योऽङ् मासमतिक्रान्तं ज्ञात्वा बहिर्निर्गताः सन्तः व्यथां भयं भिदादित्वादङ् अवललम्बिरे वयं मासावधिना प्रेषिताः स च मासो विनैव कार्य्येणातिक्रान्त इति स्वामिनो भयं ॥ ७१ ॥ ज० भ०

निष्क्रेत्यादि । तस्याः स्वयम्भावाः शिक्षया उपदेशेन रसातलात् निष्क्रम्य स्वयं निष्प्रभाभावस्था स्वपावन्तो लब्धायुक्ताः सन्तः राज्ञा अवधित्वेन निश्चितं मासं अतिक्रान्तं ज्ञात्वा ते व्यथां राज्ञः सकाशाद्भयं अवललम्बिरे प्रापुः शिक्षेः सेमन्ताल्लरोरिति अपत्यवः स्वपूषड्लज्जायां षित्वात् भीषिचिन्तिपूजीत्यादिना ङः व्यथभयङ्दुःखेचालेभये घटादित्वात् पूर्ब्बेण ङः यद्यपि कविकल्पद्रुमे घटादेः सानुबन्धत्वं दृश्यते तथापि पूर्ब्बाचार्य्यक्रमदर्शनात् मुग्धबोधस्य कविकल्पद्रुमात् प्राक् कृतत्वेन भीषिचिन्तीत्यादौ आत्वघटादेरित्यस्य न वैयर्थ्यं रुजामिति पाठे तेनैव भिदादित्वात् ङः ॥ ७१ ॥ भ०

चिन्तेत्यादि । उपधानमुपधा परीक्षा आतश्चोपसर्ग इत्यङ् तत्परिशुद्धो हि भृत्यः कार्य्येषु नियुज्यते तदकरणादुपधाया भेदोऽभावः तस्माद्भीरवः चिन्तावन्त इति कर्त्तव्यतामूढाः कथां चक्रुः कृतवन्तः कोदृशीमित्याह अकृत्वा दृपतेः कार्य्यं पूजां लप्स्यामहे कथमिति नैवेत्यर्थः चिन्तादयः चिन्तिपूजीत्यादिना अङन्ताः ॥ ७२ ॥ ज० भ०

चिन्तेत्यादि । दृपतेः कार्य्यं अकृत्वा कथं वयं पूजां लप्स्यामहे अपि तु अवज्ञाता एव भविष्याम इति कथां ते चक्रुः कीदृशाः उपधाभेदभीरवः राज्ञा धर्म्मादिभिर्भृत्यानां या परीक्षा क्रियते सोपधा तस्याभेदः कार्य्यासामर्थ्येन भङ्गः तद्भीरवः अतएव चिन्तावन्तः चिन्तिकथिपूजिभ्योभीषिचिन्तीत्यादिना ङः उपपूर्ब्बात् धाञ आतोऽन्तः अन्नेरिति ङः उपधाधर्म्मादैर्यत्परीक्षणमित्यमरः॥७२॥भ०

प्रायोपासनया शान्तिं मन्वानो वालिसम्भवः ।
युक्त्वा योगं स्थितः शैले विदधंश्चित्तवेदनाम् ॥ ७३ ॥
प्रस्कन्दिकामिव प्राप्तो ध्यात्वा ब्रूते स्म जाम्बवान् ।
धिक् शालभञ्जिकाप्रख्यान् विषयान् कल्पनारुचीन् ॥ ७४ ॥
यां कांचिं राजपुत्रोऽयमनुतिष्ठति तां क्रियाम् ।

प्राय इत्यादि । उपासनेति ग्रयासश्चन्योयुच् प्रायेण उपवासेनोपासना अनशनेनासनमित्यर्थः तया शान्तिं कल्याणं मन्वानोऽवगच्छन् उपायान्तराभावात् वालिसम्भवोऽङ्गदः योगश्चित्तवृत्तिनिरोधः तं युक्त्वा संबध्य शैले स्थितः चित्तवेदनां चित्तपीडां विदधन् घट्टिविदिवन्दिभ्योयुग्वक्तव्य इति युच् ॥ ७३ ॥ ज० म०

प्राय इत्यादि । वालिसम्भवोऽङ्गदो योगं चित्तवृत्तिनिरोधं युक्त्वा आत्मना सह संबध्य शैले स्थितः किं कुर्वन् प्रायेण उपवासेन उपासनया स्थित्वा तस्य सेवया वा तदाचरणरूपया शान्तिं कल्याणं मरणं वा मन्वानः मन्यमानः प्रायश्चानशने मृत्यौ तुल्यवाङ्मल्लयोरपि । शान्तिः शमेऽपि कल्याणे इति च विश्वः जिलासङ्उपवेशे उपपूर्वोऽयं सेवायामपि जीपिश्रन्थिग्रन्थीत्यादिना अनः चित्तवेदनां मनःपीडां विदधन् प्रकाशयन् विदेः पूर्वेण अनः ॥ ७३ ॥ भ०

प्रस्केत्यादि । त्वया का क्रिया कर्त्तव्येत्यन्यैः पृष्टः सन् जाम्बवान् ध्यात्वा विचिन्त्य ब्रूते स्म प्रस्कन्दिकामिव रोगविशेषमिव प्राप्तो यातः उत्साहाभावात् रोगाख्यायांखुल्वुल्वञ्चलं शालभञ्जिका क्रीडाविशेषः संज्ञायामिति खुल् नित्यं क्रीडेत्यादिना सः तत्प्रख्या विषया रूपादयः अतितुच्छत्वात् अतस्तान् धिक् किन्तु कल्पनारुचीन् कल्पनीयान् ॥ ७४ ॥ ज० म०

प्रस्केत्यादि । त्वया किं कार्यमित्यन्यैः पृष्टो जाम्बवान् ऋक्षपतिर्ध्यात्वा ब्रूते स्म उक्तवान् प्रस्कन्दिकां ज्वररोगं प्राप्त इव उत्साहाभावात् स्कन्दिरशोषणे गत्यां नान्नप्रत्येतिक्चेति रोगार्थे णकः स्त्रीत्वमभिधानात् काण्यनाशीरिति अतः इत्थं किं ब्रूते स्म इत्याह विषयान् रूपादीन् धिक् यतः शालभञ्जिका नागरक्रीडाविशेषस्तत्तुल्यान् भन्जोधौमोटने प्रस्कन्दिकावत् संज्ञायां णकः तुल्यत्वमाह कल्पनया विकल्पवशेन पले स्वयं रचनया रुचिरभिलाषो यत्र तान् एतेन सर्वेषां काल्पनिकत्वमिति वेदान्तमतं दर्शितं क्रमेर्ज्ञप्तात् जीपिग्रन्थीति अनः क्रमः कल्पः ॥ ७४ ॥ भ०

अहमप्यनुतिष्ठामि सोऽप्युद्धैवमुपाविशत् ॥ ७५ ॥
उवाच मारुतिर्दृप्ते संन्यासिन्यत्र वानरान् ।
अहं पर्य्यायसंप्राप्तां कुर्व्वे प्रायोपवेशिकाम् ॥ ७६ ॥
अभावे भवतां योऽस्मिन् जीवेत्तस्यास्त्वजीवनिः ।
इत्युक्त्वा सर्व्व एवास्थुर्व्वध्वा योगासनानि ते ॥ ७७ ॥

यामित्यादि । अयं राजपुत्रोऽङ्गदो याङ्कारिं क्रियामनुतिष्ठति तां क्रियां अहमप्यनुतिष्ठामि विभाषाख्यानपरिप्रश्नयोरिञ्चेति करोतेरिञ् पचे कृञः श्नश्चेति श्नः सोऽप्येवमुक्त्वा उपाविशत् अनशनेन स्थितः ॥ ७५ ॥ ज० म०

याङ्केत्यादि । विषयाणां काल्पनिकत्वेन जीवनं विफलमिति यां कारिं क्रियां अयं राजपुत्रोऽङ्गदोऽनुतिष्ठति करोति अहमपि तां क्रियां प्रायोपासनां अनुतिष्ठामि इत्युक्त्वा सोऽपि जाम्बवान् उपाविशत् अनशने स्थितः कृञः प्रश्नाख्याने निरिति निः ॥ ७५ ॥ भ०

उवाचेत्यादि । मारुतिर्व्वानरानुवाच दृप्ते जाम्बवति संन्यासिनि अनशनवति अहमप्यत्र शैले पर्य्यायेण परिपाट्या सम्प्राप्तां प्रायोपवेशिकां अनशनं कुर्व्वे पर्य्यायार्हेत्यादिना ण्वुल् ॥ ७६ ॥ ज० म०

उवाचेत्यादि । मारुतिर्हनूमान् वानरान् उवाच किमुवाचेत्याह अत्र जाम्बवति दृप्ते संन्यासिनि त्यक्ताहारे सति अहमपि पर्य्यायेण क्रमेण प्राप्तां प्रायेण उपवासेन उपवेशिकां स्थितिं कुर्व्वे प्रायः स्याद्भोजनत्यागः सन्न्यासोऽशनं स्त्रामिति हलायुधः उपपूर्व्वाद्विशेः पर्य्यायेण क इति परः स्मते ल्यभावेत्यादौ ल्यणक इत्यनेन स्त्रियां भावे णकः स्यादिति ज्ञापितम् ॥ ७६ ॥ भ०

अभाव इत्यादि । अभावे विनाशे भवतां योऽस्मिन् लोके जीवेत् तस्यास्त्वजीवनिः धिग्जीवितं आक्रोशे नञ्यनिः एवमुक्त्वा सर्व्व एव अस्थुः स्थिताः तिष्ठतेर्गातिस्थेति सिचोलुक् बध्वा योगासनानि विरचय्य पद्मासनादीनि ॥७७॥ज०म०

अभाव इत्यादि । भवतामभावे विनाशेऽस्मिन् लोके यो जीवेत् तस्याजीवनिर्मरणं धिग्जीवनं वास्तु नञोन्याक्रोशेस्त्रीति अनिः इत्युक्त्वा सर्व्व एव ते वानरा योगासनानि पद्मासनानि बद्धा तस्थुः स्थिताः तिष्ठतेष्ठां भूस्थेति सेर्लुक् अनुस् उस्थेचीत्यालोपः ॥ ७७ ॥ भ०

अक्ष इत्यादि । इतः स्त्रीलिङ्गभावं निवर्त्य हृदुदाहियते । कबन्धबधं योजनबाहोर्व्वधमभ्यधुः अभिहितवन्तः अभिपूर्व्वोधाऽभिधाने वर्त्तते कीदृशं

अक्लेश्यमसिनाग्न्यन्तं कबन्धबधमभ्यधुः।
धिङ्नः प्रपतनं घोरं क्लेदान्तत्वमनाथवत् ॥७८॥
ततो मन्दगतः पक्षी तेषां प्रायोपवेशनम्।
अशनीयमिवाशंसुर्म्लेच्छानायादशोभनः ॥७९॥

अक्लेश्यं प्रयासरहितं कस्मात् खसिना सुखमरणात् तच्चाग्न्यन्तं अन्ते तस्याग्निरभूत् अस्माकं धिक् प्रपतनं विनाशं दुःखेन घोरत्वात् क्लेदान्तत्वं अन्ते पूतीभावन्तद्यत्वात्ति अर्शआदित्वादच् अनाथवत् अनाथानामिव अक्लेश्यप्रपतनशब्दौ भावसाधनौ क्त्यल्युटोबहुलमिति ॥ ७८ ॥ ज० म०

स्त्रीलिङ्गक्लदधिकारं निवर्त्य क्लदुच्यते। अक्लेश्यमित्यादि। ते कबन्धस्य योजनबाहोर्ध्वं मरणं अभ्यधुः उक्तवन्तः अभिपूर्वधाजघ्यां रूपं अस्युरितिवत् कीदृशं असिना अक्लेश्यं क्लेशजनकं खड्गेन शीघ्रहननात् नातिदुःखदमित्यर्थः अग्न्यन्तं दाहेन अग्नेरन्तोऽवसानं यत्र अतएव परकालेऽपि न दुःखदमिति भावः अनाथवत् नाथरहितानामिव नोऽस्माकं प्रपतनं मरणं धिक् इत्यभ्यधुरिति सम्बन्धः यतो घोरं उपवासदुःखबाहुल्यात् क्लेदान्तत्वं दाहाभावात् क्लेद एवान्ते यस्य तस्य भावः क्लेदान्तत्वं तद्विद्यतेऽस्येति अर्शआदित्वादः क्लेदस्यान्तत्वं यत्रेति वा क्लेदमन्तभूतं त्वचति संदृणोतीति गमादित्वाड्डः इति वा अस्माकं प्रपतनं क्लेदान्तत्वञ्चेत्युभयं धिक् घोरत्वादिह परत्र चेति केचित् न क्लिश्नातीत्यक्लेश्यः हनृत्यासोरिति ढभावविहितोष्णग् क्लशोऽभाव इत्युक्तेरत्र कर्त्तरि स्यात् यद्वा क्लेश्यं क्लेशः भावे घ्यण् न विद्यते क्लेश्यं यत्रेति विग्रहः प्रपतनमिति भावे घञ्लनटोऽघे इत्यनट् ॥ ६८ ॥ भ०

तत इत्यादि। ततोऽभिहितानन्तरं महान् पक्षी सम्पातिनामा जटायुभ्राता आयात् आगतः मन्दगतो मन्दगमनः नपुंसके भावे क्तः आहिताग्नित्वात्वरानिपातः तेषां यत्प्रायोपवेशनं तदशनीयमिव भोजनीयमिव क्त्यल्युटोबहुलमिति क्त्यः आशंसुः आशंसनशीलः अशोभनः शोभारहितः दावाग्निना प्लुष्टशरीरत्वात् ल्यङ्क्षेति भावे ल्युट् कर्म्मणि च येनेत्येतत्परिहृत्योदाहृतत्वात् ॥ ७९ ॥ ज० म०

तत इत्यादि। तदनन्तरं महान् पक्षी सम्पातिनामा तत्रायात् आगतः यातेर्ध्यां रूपं कीदृशः मन्दगतः मन्दं गतं गमनं यस्य गमेर्भावे क्तः तेषां वानराणां यत् प्रायोपवेशनं तत् अशनीयमिव स्वभक्ष्यमिव तत्प्रिजनकत्वात् आशंसुः

देहव्रश्चनतुण्डाग्रं तं विलोक्याशुभाकरम् ।
पापगोचरमात्मानमशोचन् वानरा मुहुः ॥ ८० ॥
जटायुः पुण्यकृत् पक्षी दण्डकारण्यसञ्चरः ।
कृत्वा राघवकार्यं यः स्वरारूढोऽग्निसंस्कृतः ॥ ८१ ॥
नरकस्यावतारोऽयं प्रत्यक्षोऽस्माकमागतः ।

आर्धधातुकशेषः भावेऽनट् अनीयश्च कृद्योगलक्षणे कर्मणि वानीयः तदा अशनीयं भोजनसाधनं अशोभनः शोभारहितः सूर्यतेजसा दग्धपक्षत्वात् नन्द्यादित्वात्कर्तरि अनः न विद्यते शोभनं यस्येति वा भावेऽनट् ॥ ७९ ॥ भ०

देहेत्यादि । दृश्यते येन तुण्डाग्रेण करणाधिकरणयोरिति करणे ल्युट् देहस्य व्रश्चनमिति कृद्योगात्षष्ठी देहव्रश्चनं तुण्डाग्रं यस्य तं विलोक्य वानरा अशुभाकरं पापस्योत्पत्तिस्थानं आकर इवाकरः पुंसि संज्ञायां घः तत्र हि करणाधिकरणयोरिति वर्त्तते एवं उत्तरत्रापि चात्मानं पापगोचरं पापविषयं पापविषये पतिता वयमिति मुहुरशोचन् शोचितवन्तः गोचरसञ्चरेत्यधिकरणे निपातितः ॥ ८० ॥ ज० भ०

देहेत्यादि । तं पक्षिणं विलोक्य वानराः पापगोचरं पापविषयमात्मानं मुहुर्वारं वारं अशोचन् पापविषयो मदात्मेति सर्वे जगुरित्यर्थः कीदृशं पक्षिणं देहव्रश्चनतुण्डाग्रं दृश्यति अनेनेति व्रश्चनं करणेऽनट् देहस्य व्रश्चनं तुण्डाग्रं यस्य तं यद्वा देहं दृश्यति छिनत्तीति देहव्रश्चनं कर्मण्यनट् इति वचनात् कर्त्तरि अनट् नन्द्यादित्वाद्वा अनः अशुभाकरं अशुभस्य पापस्य आकरस्योत्पत्तिस्थानं आकुर्वन्त्यस्मिन्निति संज्ञायामल् गावश्चरन्त्यस्मिन्निति गोचरोऽलन्तः स्वभावात् प्रत्यासन्नवाची ॥ ८० ॥ भ०

जटेत्यादि । कृत्वा राघवकार्यं अग्निसंस्कृतः अग्निना कृतसंस्कारः स्वः स्वर्गमारूढः जटायुः पुण्यकृत् संचरत्यस्मिन्निति संचरः पूर्ववत् निपातितः दण्डकारण्यं संचरोऽवस्थानं यस्येति ॥ ८१ ॥ ज० भ०

जटेत्यादि । जटायुः पक्षी पुण्यकृत् पुण्यं कृतवान् त्वामुमिति क्विप् स्वयं तनू कीदृशः दण्डकारण्यं सञ्चरः स्थानं यस्य स तथा सञ्चरत्यस्मिन्नित्याधारेऽल् यो राघवकार्यं सीताहरणविज्ञापनादिकं कृत्वा अग्निना संस्कृतः कृतसंस्कारः सन् स्वः स्वर्गमारूढः गत्यर्थाकर्मकेत्यादिना रुहेः कर्त्तरि क्तः रोढः ढ इति धः दुभिरिति ढः द्वौ ढौ इति ढलुक् दीर्घश्च ॥ ८१ ॥ भ०

अचेष्टा यदिहान्यायदनेनात्यामहे वयम् ॥ ८२ ॥
हृदयोदङ्कसंस्थानं कृतान्तानायसन्निभम् ।
शरीराखनतुण्डाग्रं प्राप्यामुं शर्म्म दुर्लभम् ॥ ८३ ॥

नरेत्यादि । अवतीर्य्यते येन कर्म्मणेति अवेस्तृस्त्रोर्घञ् स एवायं नरकस्यावतारः प्रत्यक्षोऽस्माकमागतः यदस्मादयमचेष्टाः निश्चलाः अनेन पक्षिणा अन्यायादयुक्त्या नीयते अनेनेति निपूर्व्वादिणः अध्यायन्यायेति निपातनात् घञ् अत्यामहे भक्षयिष्यामहे कर्म्मणि लट् ॥ ८२ ॥ ज० म०

नरेत्यादि । नरकमवतरति येनाधर्म्मेण स एव प्रत्यक्ष इन्द्रियग्राह्योऽयं पक्षिरूपोऽस्माकमागतः रूपकालङ्कारो वा पक्षिविशेषणं वा अवपूर्व्वात्तरतेः करणे घञ् नरकस्येति कर्म्मणि षष्ठी यदस्मात् इह प्रदेशे अनेन पक्षिणा अन्यायादनौचित्यादयुक्त्या वा वयमत्यामहे भक्षणीयाः यतोऽचेष्टास्चेष्टारहिताः नीयतेऽनेनेति न्यायः निपूर्व्वादिणः करणे घञ् अदःकर्म्मणि तौ ॥ ८२ ॥ भ०

हृदेत्यादि । अमुं पक्षिणं प्राप्य कीदृशं हृदयोदङ्कसंस्थानं उदञ्चति आक्रम्यते अनेनेति उम्रूर्व्वादञ्चतेरुदङ्कोदक इति घञ् निपात्यते हृदयस्योदङ्कः संदंशः तत्संस्थानं तत्सदृशं कृतान्तानायसन्निभं यमजालतुल्यं तत्प्रविष्टस्य दुःखेन निर्गमत्वात् जालमानाय इति नयतेराङ्पूर्व्वात्करणे घञ् निपात्यते आखन्यते येन तुण्डाग्रेण खनोघच् शरीरस्याखनं तादृक् तुण्डाग्रं यस्येति प्राप्य शर्म्म सुखं दुर्लभं कृच्छ्रलभ्यं ईषदित्यादिना खल् अत्र करणाधिकरणयोरिति निवृत्तं तयोरेव कृत्यक्तखलर्था इति योज्यं उपसर्गात् खलघञोरिति प्राप्तस्य नुमः नसुदुर्भ्यामिति प्रतिषेधः ॥ ८३ ॥ ज० म०

हृदेत्यादि । अमुं पक्षिणं प्राप्य अस्माकं शर्म्म सुखं दुर्लभं दुःखेन लभ्यत इति ईषद्दुःसोरिति खल् अमुं कीदृशं हृदयोदङ्कसंस्थानं हृदयमुदञ्चते ऊर्द्धमाक्रम्यते येन तादृशं संस्थानमाकृतिर्यस्य तं ऊर्द्धहृदयाकृतिमित्यर्थः हृदयोद्वेजकाकृतिमिति वा उम्रूर्व्वादञ्चतेः करणे घञ् चजोः कगाविति कत्वं गत्यर्थस्याञ्चतेः सेमक्रत्वाभावात् अङ्धातोरूपमित्यन्ये कृतान्तानायसन्निभं यमजालसदृशं जाले प्रविष्टस्य दुःखेन निर्गम इति भावः आनीयतेऽनेनेति आनायो जालं करणे घञ् आनायः पुंसि जालं स्यादित्यमरः शरीराखनतुण्डाग्रं आखन्यते समन्ताद्विदार्य्यते येन तदाखनं करणेऽल् शरीरस्याखनं तुण्डाग्रं यस्य तं आखरेति पाठे खनोऽडरेति डरः ॥ ८३ ॥ भ०

ईषदाद्यङ्कुरोऽप्येष न परत्राशुभक्रियः ।
अस्मानक्तमितोऽभ्येति परिग्लानो बुभुक्षया ॥ ८४ ॥
संप्राप्य वानरान् पक्षी जगाद मधुरं वचः ।
के यूयं दुरुपस्थाने मनसाप्यद्रिमूर्द्धनि ॥ ८५ ॥

इति क्रदधिकारः

ईषदित्यादि । य एष अस्मानक्तमितः प्रदेशादभ्येति आगच्छति स परत्र परलोके ईषदाद्यङ्कुरोऽपि अनाद्यैरीषदाद्योऽपि न कृतः अशुभेन कर्म्मणेत्यर्थात् कर्तृकर्म्मणोश्च भूकृञोरिति ञ्वर्थे कर्म्मोपपदात्करोतेः खल् यतः परिग्लानो बुभुक्षया योहि कर्म्मणाशुभेन ईषदाद्यङ्कुरोऽपि न कृतः स कथं न बुभुक्षया पीड्यते परिग्लायतीति कर्त्तरि बहुलवचनात् ल्युट् निष्ठान्तो वा संयोगादेरित्यादिना निष्ठानत्वं अशुभक्रियः सत्वद्रोहाभिरतत्वात् ॥ ८४ ॥ ज० म०

ईषदित्यादि । एष पक्षी बुभुक्षया परिग्लानः सन् अक्षुं भक्षयितुं इह प्रदेशे अभ्येति आभिमुख्येनागच्छति इत इति पाठे स्वस्थानादित्यर्थः न एष परत्र परलोके ईषदाद्यङ्कुरोऽपि भविष्यति अनाद्योऽयमीषदाद्योऽपि न करिष्यते केनचित् कर्म्मणेत्यर्थः किंवा यस्मात् परलोके ईषदाद्योऽपि न कृतः शुभकर्म्मणार्थात् तेनायं बुभुक्षया ग्लानः परलोके शुभकर्म्मणा यदाद्यः कृतः स्यात् तदा बुभुक्षया न पीडितः स्यादित्यर्थः ईषद्दुःसोरिति खल् खिलकरणेन कर्तृकर्म्मणोर्व्यवधानमपि प्राग्वं तच्च ईषदाद्यम्भवमित्युदाहरणेन स्पष्टीकृतं करोतेरिहाभूतप्रादुर्भावार्थत्वात् ञ्वर्थो लभ्यते परे तु सुदुरीषद्भ्रः कर्तृकर्म्मभ्यामभूततद्भावे भूकृञः खलभावकर्म्मणोरित्याहुः अशुभक्रियः अशुभकर्म्मा परद्रोहित्वात् परिग्लान इति कर्मावेऽमीति कर्त्तर्यनट् किंवा गत्यर्थाढेत्यादिना कर्त्तरि क्तः सुल्वाद्योदित्यादिना नत्वं इत्येवमशोचन् वानरा सुद्धरित्यन्वयः ॥८४॥ भ०

संप्रेत्यादि । वानरान् संप्राप्य पक्षी जगाद गदितवान् के यूयं अद्रिमूर्द्धनि पर्व्वतशिरसि दुरुपस्थाने दुःखेनोपस्थातुं शक्ये मनसापि किं पुनः शरीरेण आतोयुच् तत्रापि ईषदादयोऽनुवर्त्तन्ते कर्तृकर्म्मणोरिति न ञ्वर्थते । इति क्रदधिकारः ॥ ८५ ॥ ज० म०

संप्राप्येत्यादि । वानरान् संप्राप्य पक्षी मधुरं वचो जगाद किमित्याह के यूयमद्रिमूर्द्धनि पर्व्वतशिखरे स्थिताः मनसापि दुरुपस्थाने दुःखेनैवोपस्थातुं शक्ये किं पुनः शरीरेण आतोऽनोऽदरिद्र इति अनः । इति क्रदधिकारः॥८५॥भ०

अथ प्रकीर्णकाः ।

आत्मनः परिदेवध्वे कुर्वन्तो रामसङ्कथाम् ।
समानोदर्य्यमस्माकं जटायुञ्च सुथादरात् ॥ ८६ ॥
शङ्काधवित्रवचनं प्रत्यूचु र्वानराः खगम् ।
वयं शल्यलवित्रेषो दूता रामस्य भूपतेः ॥ ८७ ॥
केनापि दौष्कुलेयेन कुल्यां माहाकुलीं प्रियाम् ।
हृतां माहाकुलीनस्य तस्य लिप्सामहे वयम् ॥ ८८ ॥

इतः प्रकीर्णकश्लोकानाह

आत्मेत्यादि । आत्मनः परिदेवध्वे शोचथ देवृदेवन इति भौवादिकः यसि नसंयोगाद्यमन्तादित्यलोपो न भवति जटायुञ्च समानोदर्य्यं भ्रातरमस्माकं समानोदरे भवतिदृति यत् आदरात्प्रसुथ प्रस्तुतिं कुरुथ जटायुः पुण्यश्लोकादित्यादिना रामसत्कथाञ्च कुर्व्वन्तः अतः के यूयमिति ॥ ८६ ॥ ज० म०

अथ प्रकीर्णकाः ।

आत्मेत्यादि । यूयं आत्मनः परिदेवध्वे विलपथ देवृङ् देवने रामस्य सङ्कथां कुर्व्वन्तोऽस्माकं समानोदर्य्यं सहोदरं जटायुञ्च आदरेण स्तुथ जटायुः पुण्यश्लोकादित्यादिना तत्स्तुतिं कुरुथ अतः के यूयमिति पूर्व्वेणान्वयः सम्बन्धः समानोदरे भवित इत्यर्थे ढधेकादिति यः रूपनामेति विकल्पविधानात् न समानस्य सादेशः ॥ ८६ ॥ भ०

शङ्केत्यादि । धुनोत्यपनयत्यनेनेति धवित्रं अर्त्तिलूधू इत्यादिना करणे इत्रः किमयं करिष्यतीति शङ्कया धवित्रं वचनं यस्य तं खगं वानराः प्रत्यूचुः शल्यलवित्रा इषवो बाणा यस्य रामस्य भूपतेस्तस्य वयं दूताः पूर्व्ववदित्रं कृत्वा सः ॥ ८७ ॥ ज० म०

शङ्केत्यादि । वानराः खगं प्रत्यूचुः कीदृशं किमयं खगः करिष्यति इत्येवं रूपायाः शङ्काया धवित्रं अपनयनकारकं वचन यस्य तादृशं किमित्याह वयं रामस्य भूपतेर्दूताः कीदृशस्य शल्यानां लवित्राश्छेदकरणानि इषवो यस्य धूञ् गिकम्पे लूञगिछिदिआभ्यां ल्यूधूखनेति करणे इत्रः ॥ ८७ ॥ भ०

केनेत्यादि । तस्य रामस्य प्रियां केनापि दौष्कुलेयेन हृतां दुष्कुलस्यापत्यमिति दुष्कुलाद्ढञ् कुल्यां कुले साध्वीं तत्र साधुरिति यत् माहाकुलीं माहाकुलीनस्येति महाकुलस्यापत्यमिति महाकुलादञ् खञाविति अञ्खञौ लिप्सामहे वयं लब्धुमिच्छामहे ॥ ८८ ॥ ज० म०

त्रिंशत्तममहर्यातं मत्वा प्रत्यागमावधिम् ।
अकृतार्था विषीदन्तः परलोकमुपास्महे ॥ ८९ ॥
क्रियामहे न गच्छामः कौशल्यायनिवल्लभाम् ।
उपलभ्यामपश्यन्तः कौमारीं पततां वर ॥ ९० ॥
एते प्रकीर्णकाः ।

केनेत्यादि । तस्य रामस्य प्रियां वयं लिप्सामहे लब्धुमिच्छामः लभेः सनिमीत्यादिना इस् खिलोपश्च स्यादेरिति सोलोपः झषब्झषोरिति षत्वं प्रियां कौदृशीं केनापि दौष्कुलेयेन दुष्कुलोत्पन्नेन हृतां दुष्कुलशब्दात् अत्रादित्वात् ष्णेयः निष्पतन्त्य इतिवत् मूर्द्धन्यः कुल्यां कुले साध्वीं ढधेकादिति यः माहाकुलीं महाकुलात् जनकात् जातां वाह्वाद्यत इति शिवादित्वात् ष्णः तस्य कीदृशस्य महाकुलीनस्य महाकुलोत्पन्नस्य परमते महाकुलादप्यर्थे खीनः ततः शिवादित्वात् ष्णः किं वा महाकुलाद्दशरथाज्जात इत्यर्थे ढधेकादिति खीनः ॥ ८८ ॥ भ०

त्रिंशदित्यादि । त्रिंशतः पूरणं त्रिंशत्यादिभ्य इति तमट् त्रिंशत्तमं यदहः तत्प्रत्यागमावधिं प्रत्यागमनस्यावधिं यातं अतीतं मत्वा अकृतार्था अनिष्पादितप्रयोजना विषीदन्तो विषादं गच्छन्तो वयं परलोकमुपास्महे प्रायोपवेशनेन क्रियामहे ॥ ८९ ॥ ज० म०

त्रिंशदित्यादि । राज्ञा अस्माकं प्रत्यागमनस्यावधित्वेन निश्चितं त्रिंशतः पूरणं दिनं यातं गतं मत्वा वयं अकृतार्था अनिष्पादितस्वप्रयोजनाः सन्तः विषीदन्तो विषादं कुर्वन्तः प्रायोपवेशनया परलोकं उपास्महे गन्तुमिच्छामः त्रिंशच्छब्दात् त्रिंशत्यादेर्ऋति तमट् ॥ ८९ ॥ भ०

क्रियेत्यादि । हे पततां पक्षिणां वर क्रियामहे न गच्छामः कौमारीं अक्षतपूर्व्वदारपतिं लब्धवतीं कौमारादप्यूर्व्ववचन इति साधुः कौशल्यायनिवल्लभां कौशल्याया अपत्यं कौशल्यायनी रामः कौशल्यकाश्यर्ष्यभ्यांचेति फिञ् फक्फिञोरनादेशः तस्य वल्लभां इष्टां उपलभ्यां प्रशस्तां पोरदुपधादिति यत् उपात्प्रशंसायामिति यत्प्रत्यये नुम् अपश्यन्तोऽनुपलभमानाः । एते प्रकीर्णकाः ॥ ९० ॥ ज० म०

क्रियेत्यादि । हे पततां वर पक्षिणां श्रेष्ठ वयं क्रियामहे न तु गच्छामः अर्थात् प्रभुपार्श्वं यतः कौशल्यायनिवल्लभां रामप्रियां अपश्यन्तः कौशल्याया अपत्यमिति नडादित्वात् फ्यायनः ततः स्वार्थे ष्णिः कौदृशीं उपलभ्यां स्तुत्यां

जगाद वानरान् पत्नी नाध्यगीढ्वं ध्रुवं स्मृतीः ।
यूयं सङ्कुटितुं यस्मात् काले ऽस्मिन्नध्यवस्यथ ॥ ९१ ॥

पूषकसहेति यः उपात्स्तुताविति नुण् कौमारीं जितकार्त्तिकेयभार्यां अतिरूपवतीमित्यर्थः कुमारस्य कार्त्तिकेयस्य पत्नी कुमारी पत्ग्रामपालकान्तादिति ङीप् स्कन्दोमन्दमतिर्विवाहविमुखो धत्ते कुमारव्रतमिति कालनिकं नतु प्रकृतं देवसेना नामेन्द्रकन्या कार्त्तिकेयस्य पत्नी प्रसिद्धा तथाहि शतक्रतोरूपवती देवसेनेति वै सुता । सा महेन्द्रेण रत्यर्थं भार्यार्थिनोपपादितेति स्कन्दपुराणीयं वचनममरकोषटीकायां मधुमाधवेन धृतं अथोपयन्त्रा सदृशेन युक्तां स्कन्देन साक्षादिव देवसेनामिति कालिदासः कुमारीं जयतीति ढधेकादिति णः णित्त्वेन्द्रिः यथोर्लोपः णित्त्वादीप् किंवा कौ पृथिव्यां मारो माया लक्ष्मीरारीर्गतिर्यस्यां लक्ष्मीरूपामित्यर्थः एतेनादरातिशय उक्तः मा लक्ष्मीश्च प्रकीर्त्तिता धने रा रीर्गतिः ख्याता रोदने च प्रकीर्त्तिता इति चैकाक्षरकोषः बहुप्रेयसी इत्युदाहरता द्युतःक इत्यस्य व्यभिचारो दर्शितः तेनात्र काभावः किम्वा कुमार एव कौमारः स्वार्थे ष्णः कौमारस्य भार्यां रामस्य प्रथमपत्नीमित्यर्थः एतेनाप्यादरातिशय उक्तः अन्ये तु कुमारात् प्रथमपत्न्यां ष्ण इत्याहुः स्वमतेऽपि प्रथमपत्नीत्वमर्थाल्लभ्यते तथाहि कुमारशब्देन अकृतदारपरिग्रह उच्यते तद्रूढात्वेन प्रथमपत्नीत्वम् । एते प्रकीर्णकाः ॥ ९० ॥ भ०

इतः किदतिशेषमधिकृत्याह जगेत्यादि । ध्रुवं अवश्यं स्मृतिं स्मृतिशास्त्रं नाध्यगीढ्वं नाधीतवन्त इति पत्नी वानरान् जगाद विभाषालुङ्लुङोरिति विभाषागाङादेशः गाङ्कुटादिभ्य इति ञिचोङित्त्वं घुमास्थेतीत्वं धिचेति सिचोलोपः ढ्रलोपे पूर्वस्य दीर्घमिति मूर्द्धन्यः यस्मादयमस्मिन् काले सङ्कुटितुं अवसातुमध्यवस्यथ अभिप्रायं कुरुथ कुटादित्वात् ङित्त्वम् ॥ ९१ ॥ ज० भ०

अथ किदतिदेशाधिकारः । पाणिनिमते कुटादिसूत्रसमूहैः कानुबन्धत्वातिदेशात् स्वमते त्वगुणाधिकारः । जगेत्यादि । स पत्नी वानरान् किमित्याह ध्रुवं निश्चितं उत्प्रेक्षे वा यूयं स्मृतीर्धर्मसंहिता नाध्यगीढ्वं नाधीतवन्तः इङश्चाध्यं गोङटीथ्योर्ब्रेति गीरादेशः धित्वान्न णुः धेसलोपोवेति सेर्लुक् टीठीढीधोढीति धस्य ढः यस्मादस्मिन् काले सङ्कुटितुं मन्तुं यूयं अध्यवस्यथ इच्छथ कुटिकौटिल्ये प्रभुकार्थं त्यक्त्वा मरणमेवात्र कौटिल्यं धातोरनेकार्थत्वाद्वा कुटांगुरीञ्णतीति नियमादगुणत्वं अध्यवपूर्व्वस्य धोयनाशे इत्यस्य यन्योतृयमादीति ओकारलोपः ॥ ९१ ॥ भ०

नायमुद्विजितुं कालः स्वामिकार्याद्भवादृशाम् ।
हृतभार्येऽपि च्युते राज्याद्रामे पर्युद्यत्सुके भृशम् ॥ ९२ ॥
यत्नं प्रोर्णुवितुं तूर्णं दिशं कुरुत दक्षिणाम् ।
प्रोर्णुवित्रीं दिवस्तत्र पुरीं द्रक्ष्यथ काञ्चनीम् ॥ ९३ ॥
लङ्कां नाम्ना गिरेर्मूर्ध्नि राक्षसेन्द्रेण पालिताम् ।
निर्जित्य शक्रमानीता दृदृशुर्या सुरस्त्रियः ॥ ९४ ॥

अयमेवावसितुं काल इति चेदाह नायमित्यादि । भवादृशां युष्मद्विधानां स्वामिकार्यादुद्विजितुं नायं कालः विजडडिति ङित्त्वं किमिति न भवतीति चेदाह राज्याच्च्युते भ्रष्टे रामे निर्व्वासितत्वात् तत्रापि हृतभार्ये भृशमत्यर्थं पर्युद्यत्सुके सीतायाम् ॥ ९२ ॥ ज० म०

नायमित्यादि । भवादृशां युष्मद्विधानां सत्पुरुषाणां स्वामिकार्यात् उद्विजितुं चलितुं नायं काल समयः कुत इत्याह राज्याच्च्युते भ्रष्टे रामे तत्रापि हृतभार्ये भृशमत्यर्थं पर्युद्यत्सुके च सति तु मार्यां युष्मद्वचनेन ज्ञातमित्यर्थात् विजेर्णुर्निमीत्यगुणत्वम् ॥ ९२ ॥ भ०

यत्नमित्यादि । दक्षिणां दिशं प्रोर्णुवितुं आच्छादयितुं तस्मात् तूर्णं शीघ्रं यत्नं कुरुत तस्यां दिशि पुरीं द्रक्ष्यथ काञ्चनीं प्राणिरजतादिभ्योऽञ् प्रोर्णुवित्रीं अभिव्यापिनीं तत्र रूपं दिव आकाशस्य कर्म्मणि षष्ठी विभाषोर्णोरिति ङित्त्वपक्षे उवङ् अङित्त्वपक्षे च गुणः कुरुतेति सार्व्वधातुकमपिदिति ङित्त्वे विकरणस्य गुणो न भवति तस्य चार्द्धधातुकत्वात् अङित्त्वे धातोर्गुणः अतउत् सार्व्वधातुकमपिदिति ङित्त्वे विकरणस्य गुणो न भवति ॥९३॥ज०म०

यत्नमित्यादि । दक्षिणां दिशं प्रोर्णुवितुं आच्छादयितुं तूर्णं शीघ्रमेव यूयं यत्नं कुरुत तत्र दिशि काञ्चनीं स्वर्णनिर्म्मितां पुरीं द्रक्ष्यथ कीदृशीं दिव आकाशस्य प्रोर्णुवित्रीं अभिव्यापिकां कर्म्मणि षष्ठी ङिदिम्बोर्णोरिति ङित्त्वादगुणत्वे श्रुध्वोरित्युव् पक्षे गुणः काञ्चनस्य विकार इत्यर्थे विकारसंज्ञेति ष्णः यद्वोऽकिञ्ञस इति ञ्ञे ञकारस्य रः ॥ ९३ ॥ भ०

लङ्कामित्यादि । यां पुरीं नाम्ना लङ्कां सुरस्त्रियो दृदृशुः दृष्टवत्यः असंयोगाल्लिट्कितीति कित्त्वं तां यातेति वक्ष्यमाणेन सम्बन्धः गिरेः सुवेलस्य मूर्ध्नि स्थितां राक्षसेन्द्रेण पालितामिति दुर्गमत्वमाख्यातं शक्रं निर्जित्य सुरस्त्रिय आनीता इति च रावणस्य माहात्म्यम् ॥ ९४ ॥ ज०म०

बभूव याधिशैलेन्द्रं स्फुटित्वेवेन्द्रगोचरम् ।
कुधित्वा जगतां सारं सैका शङ्के कृता भुवि ॥ ९५ ॥
अस्फुडित्वा सहस्राक्षं क्लिशित्वा कौशले निजे ।
उदित्वालक्षिरं यत्नात् सैका धात्रा विनिर्मिता ॥९६॥

लङ्कामित्यादि । यां पुरीं नाम्ना लङ्कां सुरस्त्रियो ददृशुः तां दृष्ट्वेति पूर्वेण सम्बन्धः कित्ठीढीपमिति कित्त्वादगुणत्वं गिरेः सुवेलस्य मूर्ध्नि स्थितां आश्लेषाधारसम्बन्धात् स्थितामिति लभ्यते राक्षसेन्द्रेण रावणेन पालितां रक्षितां सुरस्त्रियः कीदृश्यः शक्रमिन्द्रं निर्जित्यानीताः राक्षसेन्द्रेण इत्यनुषङ्गनीयं एतेन तस्य वीर्यमपि ज्ञापितम् ॥ ९४ ॥ भ०

बभूवेत्यादि । अधिशैलेन्द्रं • शैलेन्द्रस्य सुमेरोरुपरि सप्तम्यर्थेऽव्ययीभावः इन्द्रगोचरमिन्द्रनिलयममरावत्याख्यं स्फुटित्वेव तिरस्कृत्येव बभूव इच्छिभवतिभ्यां चेति कित्त्वं जगतां सारङ्कुधित्वा निष्कृष्य सैका भुवि कृता निर्मितेत्यहं शङ्के तां यात स्फुटित्वाक्षुधित्वेति नञ्क्षासेडिति कित्त्वप्रतिषेधे प्राप्ते स्फुडस्फुटेत्यादिना कित्त्वम् ॥ ९५ ॥ ज०म०

बभूवेत्यादि । या पुरी शैलेन्द्रस्य सुमेरोरुपरि इन्द्रस्य गोचरं विषयं अमरावत्याख्यं स्फुटित्वा अभिभूय बभूव अधिशैलेन्द्रं सुरालयं वा सप्तम्यर्थेऽव्ययीभावः अहमेवं शङ्के तर्कयामि जगतां सारसुत्कृष्टभागं कुधित्वा आकृष्य सैवैका भुवि कृता निर्मिता विश्वकर्मणेत्यर्थात् सेमचुधकुषेत्यादौ चुधादिवर्ज्जनात् कित्त्वम् ॥ ९५ ॥ भ०

अस्फुडीत्यादि । सहस्राक्षमिन्द्रमस्फुडित्वा असुखिनं कृत्वा निजैः आत्मीयैः कौशलैः चिरं क्लिशित्वा प्रयत्नं कृत्वा उदित्वा अभिधायालम्पर्याप्तमेवं करिष्यामीति यत्नात् महता प्रयासेन सैका धात्रा विनिर्मिता पूर्ववत्कित्त्वम् ॥९६॥ज०म०

अस्फुडीत्यादि । सहस्राक्षं इन्द्रं अस्फुडित्वा असुखिनं कृत्वा निजे आत्मीये कौशले नैपुण्ये चिरं क्लिशित्वा क्लेशमनुभूय अलं पर्याप्तमेवमेवं करिष्यामीत्युदित्वा कथयित्वा चिरकालेन यत्नात् सैका धात्रा विनिर्मिता इत्यपि अहं शङ्के इत्यनेनान्वयः स्फुडगशसौदे वसोरसेतीम् क्लिश्नुज्चोपतापे पूक्लिशुदित इति वेमक्लिन्मूगओविरोधे इत्यस्य तं वेमूदित्यादिना वदैवाचि सर्वत्र सेमचुधेत्यादिवर्ज्जनात् कित्त्वं वदेर्वजादित्वाज्जिः कुशलस्य भावः कर्म्म वेति त्रिकारसंघेति ष्णः ॥ ९६ ॥ भ०

सुषित्वा धनदं पापो यां गृहीत्वावसद् द्विषन् ।
तां रुदित्वेव शक्रेण यात लङ्कामुपेक्षिताम् ॥ ९७ ॥
विदित्वा शक्तिमात्मीयां रावणं विजिघृक्षवः ।
उक्तं पिपृच्छिषूणां वो मास्म भूत सुषुप्सवः ॥ ९८ ॥
नाविविदिषुमभ्येति सम्यद्रुरुदिषुं नरम् ।
किं सुसुप्सिषुवद्याति द्विषो नापचिकीर्षया ॥ ९९ ॥

सुषित्वेत्यादि । सुषित्वा धनदं वैश्रवणं तस्मात्पुरं पुष्पकञ्च विमानमपहृतं पापः पापाचरणात् यां गृहीत्वा अवसत् उषितः द्विषन् शत्रुः शक्रेण रुदित्वेवोपेक्षितामवधीरितां रुदविदेति किच्चं तत्र चकारेणरुक्त्यनुवर्त्तते॥९७॥ज०भ०

सुषीत्यादि । धनदं कुबेरं सुषित्वा वञ्चित्वा ततएव यां लङ्कां गृहीत्वा पापः कुत्सिताचारो द्विषन् शत्रूरावणोऽवसत् तां यूयं यात गच्छत कीदृशीं शक्रेण इन्द्रेण रुदित्वा क्रन्दित्वेव उपेक्षितां त्यक्तां न तु पारयित्वेति भावः सुषगलुटने लघिरुदरोदे व्युङोवोहसादेरित्यादिना कित्त्वादगुणत्वं यङेः सेमनुधेत्यादिना कित्त्वात् यङ्लुषाद्योरिति जिः यङेरिमोर्घ इति दीर्घत्वम् ॥ ॥९७॥ भ०

विदीत्यादि । आत्मीयां शक्तिं सामर्थ्यं विदित्वा पूर्ववत्कित्त्वं रावणं विजिघृक्षवः विगृहीतुमिच्छवः सुषुप्सवः शयितुमिच्छवो मास्म भूत न प्रमत्ता भवतेत्यर्थः रावणस्य बलीयस्त्वादिदमुक्तं मया वो युष्माकमिपृच्छिषूणां प्रष्टुमिच्छूनां अत्र रुदविदेति सनः कित्त्वे सम्प्रसारणं प्रछेः किरश्च पञ्चभ्यश्चतीडागमः ॥ ९८ ॥ ज०भ०

विदित्वेत्यादि । आत्मीयां शक्तिं सामर्थ्यं विदित्वा ज्ञात्वा रावणं विजिघृक्षवो विरोधयितुमिच्छवः सन्तो यूयं सुषुप्सवः शयितुमिच्छवो मास्म भूत सालस्या असावधानाश्च न भवतेत्यर्थः रावणस्य मायाविन्त्वाद्बलवत्त्वाच्च एतत्सर्वं पिपृच्छिषूणां प्रष्टुमिच्छूनां वो युष्माकं कृते मया उक्तं एतेनाष्टभाषणेऽनौचित्यं परिहृतं सम्बन्धविवक्षया षष्ठी विदज्ञाने व्युङोव इति कित्त्वं यङ उपादाने सनु नेसुगुहयङ इति अनिम् यङ्लुषप्रच्छांजिरिति जिः गुर्नानिमीत्यगुणत्वं होढः झभान्तस्येति धत्वं धढोः क इति कः किलादिति घः सनभ्येति उः प्रछेःसनि क्ङिङ्पङित्यादिना इम् ॥ ९८ ॥ भ०

नाविवीत्यादि । वेदितुं ज्ञातुमिच्छुर्यो न भवति तं नरमविविदिषुं रुरुदिषुं रोदितुमेषणस्वभावं सम्प्रविभूतिर्नाभ्येति नागच्छतीति वो मयोक्तमिति योज्यं

बुभुत्सवो द्रुतं सीतां भुत्सीद्धं प्रब्रवीमि वः ।
मा च भुद्धं मृषोक्तं नः क्षपीट्वं स्वामिने हितम् ॥ १०० ॥
समगध्वं पुरः शत्रो र्मदयध्वं रघूत्तमम् ।

किद्ध यात न गच्छत सुसुधिषुवत् चौरवदित्यर्थः पूर्ववत्किित्त्वं द्विषः शत्रोरपचिकीर्षया अपकर्त्तुमिच्छया दृकोभ्रलीति किित्त्वे गुणो न भवतीति अज्झनगमांसनीति दीर्घः क्षत इड्वातोः ॥ ९९ ॥ ज० म०

नावीत्यादि । सम्यन् सम्पत्तिरविविदिषुं वेदितुं ज्ञातुमनिच्छुं रुरुदिषुं अनध्यवसायात् रोदनेच्छुं नरं पुरुषं न अभ्येति न अभिगच्छति तेन ज्ञापनार्थं प्रब्रवीमि व इति वक्ष्यमाणेन सम्बन्धः द्विषः शत्रोरपचिकीर्षया अपकारेच्छया सुसुधिषुवत् चौरवत् यूयं किं न यात तदैव सीतादर्शनसम्भवात् व्युङोऽव इत्यादिना विदरुदसुषः सनः कित्त्वादगुणत्वं क्षजः सनि धर्वोऽज्झनिङ्गमामिति दीर्घः क्षुनोनिमीत्यगुणत्वे क्षदिरक्षाविति इट् व्यनच्तयीति दीर्घः संख्याद इति अः ॥ ९९ ॥ भ०

बुभुत्सवोत्यादि । बुभुत्सवो ज्ञातुमिच्छवः यदि सीतां बुधेस्मानन्नाङ्गलन्नाङ्गेति किित्त्वं एकाच इति भष्भावः तदा द्रुतं तां भुत्सीध्वं जानीतेति वो युष्मान् ब्रवीमि लिङ् सिचाविति किित्त्वं मृषोक्तं मिथ्योक्तं नोऽस्माकं माच भुद्धं न जानीत अपितु सत्यं भ्रलोभ्रलीति सिचोलोपः भ्रलांजग्भ्रसि किित्त्वं पूर्ववत् अतो यूयं स्वामिने रामाय हितं क्षपीट्वं कुरुत उश्चेति किित्त्वं द्रुणः षीध्वमिति मूर्द्धन्यः ॥ १०० ॥ ज० म०

बुभुदित्यादि । सीतां बुभुत्सवो बोद्धुमिच्छवो यूयं द्रुतं शीघ्रमेव भुत्सीध्वं जानीत इति वो युष्मान् अहं प्रकृष्टं ब्रवीमि अस्माकमुक्तं वचनं मृषा मिथ्या माद्ध भुद्धं न जानीत अपितु सत्यमेव अस्मद एकत्वे वा बहुत्वमभिधानात् स्वामिनो रामस्य हितं क्षपीट्वं कुरुत समार्थेनेत्यादिना षष्ठी स्वामिने इति पाठे शक्तार्थवषडिति चतुर्थी बुध्यौङवेदने सनि गुनोनिमीत्यगुणत्वं भभान्तस्येति भत्वं अन्यत्र ह्याः सीध्वं द्रुग्डुभंढीति किित्त्वादगुणत्वं अपरत्र मायोगेऽमो ऽभावः झस्त्वादिति सेर्लोपः क्षजोह्याः सीध्वं पूर्ववत् किित्त्वं टीठीढीधोढीति धस्य ढत्वं ॥ १०० ॥ भ०

समेत्यादि । इदमहमार्गसे यदुत शत्रोः रावणस्य पुरः अग्रतः समगध्वं सङ्गता भवत आर्गंसायां भूतवच्चेति लुङ् समोगम्हलीति तङ् वागम इति सिचः

नोपायध्वं भयं सीतां नोपायंस्त दशाननः ॥ १०१ ॥
ततः प्रास्थिषताद्रीन्द्रं महेन्द्रं वानरा द्रुतम् ।
सर्वे किलकिलायन्तो धैर्य्यञ्चाधिषताधिकम् ॥ १०२ ॥

कित्त्वे अनुदात्तेत्यनुनासिकलोपः हुस्वादङ्गादिति सिचोलोपः मोदयध्वं रघूत्तमं हर्षयत तत्कार्य्यकरणात् मा च भयमुपायध्वं सूचयत भयं माकार्ष्टेत्यर्थः आडो यमहन इति तङ् यमोगन्धन इति सिचः कित्त्वे अनुनासिकलोपः गन्धनं सूचनं अन्यथा युष्मासु गन्धितभयेषु नियतमसौ दशाननः सीतामुपायंस्त स्वीकृतवान् स्यात् तस्य दुर्वृत्तत्वात् आशंसायां भूतवच्चेति अनिष्टाशंसायां लुङ् उपाद्यमः स्वीकरण इति तङ् स्वीकरणञ्चात्र विवाहनमुक्तं विभाषोपयम इति अकित्त्वपक्षे रूपम् ॥ १०१ ॥ ज० म०

समेत्यादि । इदमहमाशंसे यत् भवतो रावणस्य पुरोऽग्रतो यूयं समगध्वं सङ्गता भवत अभिधानादाशंसायां टौ आशंसायां भूतसामान्यविहितास्त्रेति यरः समोगम्छेति मं हृगुडुम्भटौल्लादिना सेःकित्त्वात् वनतनाद्यनिमामिति मलोपः झस्खादिति सिलोपः रघूत्तमं रामं यूयं मोदयध्वं हर्षयत तत्कार्य्यकरणात् भयं न उपायध्वं न सूचयत न कुरुतेत्यर्थः यमः सूचन इति सेः कित्त्वात् मलोपः आत्मनेपदाधिकारमध्ये यमःसूचन इत्यस्य करणादेव सूचनार्थे यम आत्मनेपदं किं वा उपयमो विवाह इत्यनेन मं तत्र विवाहः स्वीकारः उपाद्यमः स्वीकरण इति परस्मैत्वं यमःसूचने वातूद्वाहे इत्यत्रापि उद्वाहः स्वीकारः स्वीकरणे वेति परस्मैत्वं स्वीकारार्थेन परिणयोऽपि गम्यते तदा भयं न उपायध्वं न स्वीकुरुत दशाननः सीतां न उपायंस्त विवाहेन न स्वीकृतवान् न स्वीकरोतु वा अत्राप्याशंसायां टौ वातूद्वाह इति कित्त्वाभावपक्षे मलोपाभावः इत्येवं जगाद वानरान् पर्व्वतीत्यन्वयः ॥ १०१ ॥ भ०

तत इत्यादि । ततः सम्मातिवचनानन्तरं सर्व्वे वानरा महेन्द्रं पर्व्वतं प्रास्थिषत प्रस्थितवन्तः धैर्य्यञ्चाधिकमाधिषत आहितवन्त आत्मनि तिष्ठतेर्द्धातोश्च स्थाध्वोरिच्चेति कित्त्वमित्वञ्च तिष्ठतेः क्रमवग्निभ्यःस्थ इति तङ् किलकिलायन्तः किलकिलाध्वनिं कुर्व्वाणाः अव्यक्तानुकरणेत्यादिना डाच् तदन्तात् लोहितादिडाज्भ्यः क्यष् वाक्यष इति परस्मैपदम् ॥१०२॥ ज० म०

तत इत्यादि । सम्मातिवचनानन्तरं सर्व्वे वानरा महेन्द्रं पर्व्वतं प्रास्थिषत प्रस्थितवन्तः द्रुतं शीघ्रं सुद्रुरिति पाठे किलकिलायन्त इत्यनेन सम्बन्धः

निकुञ्जे तस्य वर्त्तित्वा रम्ये प्रच्छेदिताः परम् ।
मणिरत्नाधिशयितं प्रत्युदैक्षन्त तोयधिम् ॥ १०३ ॥
अमर्षितमिव घ्नन्तं तटाद्रीन् सलिलोर्म्मिभिः ।
श्रिया समग्रं द्युतितं मदेनेव प्रलोठितम् ॥ १०४ ॥

प्रपूर्व्वात्तिष्ठतेः प्रतिज्ञानिर्णयेत्यादिना मं स्यादोर्ङिरिति ङिरगुणत्वञ्च मान्नो ऽदमत इत्यत् अधिकं धैर्य्यञ्च आत्मनि आधिषत आश्रितवन्तः धाञोजिनञ्प्रत्ये-त्यादिना मं अन्यत् पूर्व्ववत् कीदृशाः किलकिलायन्तः किलकिलाशब्दं कुर्व्वन्तः नैकाचोव्यक्तानुकरणादिति डाच् द्वित्वञ्च डाज्लोहितादेरिति ड्याः पञ्च॥१०२॥भ०

निकुञ्ज इत्यादि । तस्य पर्व्वतस्य निकुञ्जे लतादिपिहितस्थाने वर्त्तित्वा स्थित्वा नञ्क्वासेडिति कित्त्वप्रतिषेधः परं प्रच्छेदिताः उच्चैरव्यक्तशब्दङ्कुर्व्वाणाः निष्ठायोर्ङिति कित्त्वप्रतिषेधः तोयधिम्प्रत्युदैक्षन्तः दृष्टवन्तः लङि रूपं कीदृशं मणिरत्नाधिशयितं क्लोऽधिकरणे चेति क्तः पूर्व्ववत्किन्त्वप्रतिषेधः कीदृशं मणिर-त्नाधिशयितं मणिश्चरत्नमिति स्त्रीरत्नादावपि रत्नशब्दस्य दृष्टत्वात् एकपदव्यभिचारे विशेषणविशेष्यभावः तस्याधिशयितमवस्थानमित्यर्थः ॥ १०३ ॥ ज० भ०

निकुञ्ज इत्यादि । तस्य पर्व्वतस्य निकुञ्जे लतादिपिहितस्थाने रम्यत्वात् वर्त्तित्वा स्थित्वा परमतिशयेन प्रच्छेदिता अव्यक्तशब्दं कर्त्तुमारब्धा वानरास्तोयधिं समुद्रं प्रत्युदैक्षन्त दृष्टवन्तः कीदृशं मणिरत्नाधिशयितं मणिरत्नैर्मणिश्रेष्ठैरधि-शयितं अधिष्ठितं कर्म्मक्रियेत्यादिना अधिपूर्व्वश्शीङ आधारस्य कर्म्मत्वात् कर्म्मणि क्तः आधारे क्त इति केचित् आङि च्छिदकूजने घेट्वादिढे क्त इति कर्त्तरि क्तः भावादिढे वेति पक्षे इम् उभयत्र पूर्गोष्टेत्यादिना गुणः वर्त्तित्वेत्यत्र सेमकुधेत्यादिना किन्त्वनिषेधात् गुणः ॥ १०३ ॥ भ०

अमेत्यादि । सलिलोर्म्मिभिः कल्लोलैः तटाद्रीन् तटस्थान् पर्व्वतान् घ्नन्तं प्रत्युदैक्षन्त अमर्षितमिव क्ष्मेक्षितितिक्षायामिति किन्त्वप्रतिषेधः पश्चात् नञ्सुः श्रिया हेतुभूतया समग्रं संपूर्णं द्युतितमिति कर्त्तरि निष्ठा यदि वा श्रिया कर्त्तृभूतया द्युतितं द्योमितं अवेत्यध्याहृत्य तमैक्षन्तेति योज्यं एवञ्च कृत्वा उदुपधादित्यादिना भावे निष्ठायां विकल्पेन किन्त्वप्रतिषेधात् किन्त्वसदाहृतं मदेनेव मत्ततयेव श्रिया हेतुभूतया प्रलोठितं घूर्णितुमारब्धं आदिकर्म्मणि निष्ठा-यामकिन्त्वसदाहृतम् ॥ १०४ ॥ ज० भ०

अमेत्यादि । तोयधिं प्रत्युदैक्षन्तेत्यत्रान्वयः सलिलोर्म्मिभिर्जलवेगैस्तटाद्रीन्

पूतं श्रीतैर्नभस्वद्भिर्ग्रन्थित्वेव स्थितं रुचः ।
गुम्फित्वेव निरस्यन्तं तरङ्गान् सर्व्वतो मुहुः ॥ १०५ ॥
वञ्चित्वाप्यम्बरं दूरं स्वस्मिंस्तिष्ठन्तमात्मनि ।
त्रपित्वेवानिशं स्वादु पिबन्तं सरितां पयः ॥ १०६ ॥

तटसम्बन्धिनः पर्व्वतान् प्रति अमर्षितमिव क्रुद्धमिव पूर्वार्द्धेत्यादिना क्षमार्थरूपो गुणः पश्चाद्व्रज्रूपासः ऊर्म्मिः स्त्रीपुंसयोर्वीच्यां प्रकाशे वेगभङ्गयोरिति मेदिनी वीचिवाचित्वेऽत्र सलिलपदं स्वरूपकथनार्थं श्रिया हेतुभूतया समयं सम्पूर्णं यथा स्यात्तथा द्युतितं शोभमानं मतथार्थेति कर्त्तरि क्तः दीपितुमारब्धं वा सदा भावादिष्टेवोदुडोऽव्यत इति पक्षे गुणाभावः मदेन मत्ततयेव प्रलोठितं घूर्णितुमारब्धं सदा चञ्चलत्वात् आदिष्टेक्तः पूर्व्वेण पक्षे गुणः ॥ १०४ ॥ भ०

पूतमित्यादि । नभस्वद्भिर्व्वायुभिः श्रीतैः पूतं पवित्रीकृतं पूजयेति विकल्पेनेट् अतएव पक्षे पूजः क्तानिष्ठयो किन्त्वप्रतिषेधोऽत्र न भवति तत्र सेडित्यनुवर्त्तते रुचोदीप्तीर्ग्रथित्वेव संदर्भ्यैव स्थितं नोपधात्वफान्ताद्वेति किन्त्वप्रतिषेधपक्षे रूपं सर्व्वतस्तरङ्गान् गुम्फित्वेव निरस्यन्तं क्षिपन्तं नोपधादिति विकल्पेन किन्त्वप्रतिषेधः यतेत्यध्याहृत्य तमैच्छन्तेति योज्यम् १०५ ॥ ज० म०

पूतमित्यादि । श्रीतैः श्रीतत्वैर्नभस्वद्भिर्व्वायुभिः पूतं पवित्रीकृतं तोयधिं प्रत्युद्वमन्तेत्यनेन सम्बन्धः पूङ्क्रियवमेति इनोऽभावपक्षे पूर्वार्द्धेत्यादौ सेडित्यनुवृत्तेश्च गुणः नभःशब्दान्मोऽभ्रुपाद्वहतुरिति वतुः नदंतसावितिपदत्वनिषेधात् स्रोर्विसर्ग इत्यस्य पदान्तविषयत्वात् विसर्गाभावः रुचो दीप्तीर्ग्रन्थित्वेव स्थितं सर्व्वत्र दीप्तिमत्त्वात् उत्प्रेक्षेयं अन्यकिंगसन्दर्भे यथाचुरुङ इति विकल्पेनाकित्त्वात् नलोपाभावः सर्व्वत्र तरङ्गान् गुम्फित्वेव मुहुः पुनःपुनर्निरस्यन्तं क्षिपन्तं गुन्फशब्दस्यन्थे पूर्व्वेण पक्षे किन्त्वात् हसुङ्क्लोप इति न लोपः ॥ १०५ ॥ भ०

वञ्चीत्यादि । स्थित्यनतिक्रमादम्बरं दूरं वञ्चित्वातिक्रम्य वञ्चिलुञ्चीति किन्त्वप्रतिषेधः स्वस्मिन्नात्मनि स्वरूपे तिष्ठन्तं अत्र नश्चव्यप्रशानिति नकारस्य रुत्वं पूर्व्वस्य त्वनुनासिकादेशः त्रपित्वेव त्रपित इव भूत्वा त्रपिभ्रषीत्यादिना प्रतिषेधः तत्सलिलस्य स्वादुत्वात् सरितामयः स्वादु पिबन्तं अनिशमजस्रम् ॥ १०६ ॥ ज० म०

वञ्चित्वेत्यादि । पुनः कीदृशं तोयधिं अम्बरमाकाशं वञ्चित्वापि अतिक्रम्यापि स्वस्मिन् स्वकीये आत्मनि स्वरूपे तिष्ठन्तं मर्य्यादानतिक्रमात् पृथ्व्या

द्युतित्वा शशिना नक्तं रश्मिभिः परिवर्द्धितम् ।
मेरोर्जेतुमिवाभोगमुच्चैर्द्दिद्योतिषुं मुहुः ॥ १०७ ॥
विलोक्य सलिलोच्चयानधिसमुद्रमभ्रंलिहान्
भ्रमद्भ्रमिकरभीषणं समधिगम्य चाधः पयः ।

उच्चोऽपि भूत्वा तां नातिक्रामतीति भावः वनुचुगत्यां क्षपक्षपक्षेत्यादिना विकल्पेनाकित्त्वात् नलोपाभावः क्षपित्वेव अनिशं सततं स्वादु मधुरं सरितां पयो नदीनां जलं पिबन्तं स्वजलस्य क्षारत्वात् जिघांसापिपासायां पूर्वेण किच्चाद्गुणत्वम् ॥ १०६ ॥ भ०

द्युतीत्यादि । शशिना नक्तं रात्रौ द्युतित्वा दीप्तिमता भूत्वा रश्मिभिः परिवर्द्धितं वृद्धिं नीतं सन्तं तोयधिं मेरोराभोगमाहत्त्वं जेतुमिव सुरुरुच्चैर्द्दिद्योतिषुं वर्द्धितुमिच्छुमित्यर्थः अनेकार्थत्वाद्धातूनां द्युतित्वा दिद्योतिषुमिति रलोव्युपधादिति किच्चाकित्त्वे तत ह्युकारोपधादिकारोपधाच्च रलन्ताङ्गलादेर्धातोः परौ क्ङासनौ वा न कितौ भवत इति सूत्रार्थः ॥ १०७ ॥ ज०म०

द्युतित्वेत्यादि । पुनः कीदृशं तोयधिं शशिना नक्तं रात्रौ द्युतित्वा दीप्तिमता सता रश्मिभिः परिवर्द्धितं वृद्धिं नीतं द्युतलङ् दीप्तौ व्युङोवोहसादेरिति वा किच्चाद्गुणाभावः मेरोराभोगं परिपूर्णतां जेतुमिव तत उच्चैरधिकं मुहुः पुनः पुनः दिद्योतिषुं द्योतनमिच्छन्तं उच्चैर्भूत्वा द्युतिमिच्छन्तं वा धातोरनेकार्थतया उच्चैरूर्द्धं वर्द्धितुमिच्छन्तमिति केचित् द्युतेः सनि द्युत्स्वाप्योरिति खेर्ज्झिः पूर्वेण पक्षे किच्चाभावात् गुणः ॥ १०७ ॥ भ०

विलोक्येत्यादि । कपिवृषाः कपिसुख्या मारुतिं हनूमन्तं द्रुतं परिप्रेषयन् व्यसर्जयन् परिप्रपूर्वादिषु गतावित्यस्मात् हेतुमण्यन्तात् लडिरूपं किं क्त्वेत्याह विलोक्य सलिलोच्चयान् सलिलोर्मीन् ऊर्द्ध्वीयत इत्यैरच् अधिसमुद्रं समुद्रस्योपरि अभ्रंलिहान् दूरमुच्छ्रितान् अधश्च पयः समधिगम्य ज्ञात्वा कीदृशं भ्रमद्भिर्भ्रमिकरैर्भीषणं भयानकं भीषयतीति नन्द्यादित्वाल्लुप्रः गमागमसहं गमनागमनयोग्यं मारुतिं गजेन्द्रस्येव गुरुर्विक्रमो यस्य तरुवृषेषु वानरेषूत्तममिति सप्तमीति योगविभागात्सः । इति ङित्त्वातिदेशाधिकारः ॥ १०८ ॥ ज०म०

इति भट्टिकाव्यटीकायां जयमङ्गलायामधिकारकाण्डे द्वितीयः परिच्छेदः कार्यस्य सीतान्वेषणः सप्तमः सर्गः ॥

विलोक्येत्यादि । अधिसमुद्रं समुद्रस्योपरि सलिलोच्चयान् तरङ्गान् अभ्रं-

गमागमसहं द्रुतं कपिवृषाः परिप्रैषयन्
गजेन्द्रगुरुविक्रमं तरुमृगोत्तमं मारुतिम् ॥ १०८ ॥

इति भट्टिकाव्येऽधिकारकाण्डे द्वितीयः काव्यस्य
सप्तमः सर्गः ॥ ७ ॥

लिहान् ऋत्युच्छ्रितान् विलोक्य अधस्य पयोजलं भ्रमद्भिरितस्ततो गच्छद्भिर्मकरैर्जलजन्तुवर्गैर्भीषणं भयानकं समधिगम्य ज्ञात्वा भयात् स्वयं गन्तुमशक्ताः कपिवृषाः कपिश्रेष्ठा मारुतिं हनूमन्तं द्रुतं परिप्रैषयन् व्यसर्जयन् परिप्रपूर्वादिषगतावित्यस्मात् प्रेरणे आन्तात् घौ मारुतिं कीदृशं गमने चागमने च समर्थं गजेन्द्रस्येव ऐरावतस्येव गुरुर्विक्रमो यस्य तं अतएव तरुमृगेषु वानरेषु उत्तमं श्रेष्ठं जवीं चीयत इत्यत् उच्चयः अधिसमुद्रमिति सप्तम्यर्थेऽव्ययीभावः अभ्रंलिहानिति तुभ्रटदजीत्यादिना अभिधानादसंज्ञायामपि खः गुणावोऽभिधानात् भीषणमिति नन्द्यादित्वादनः कभाऽवेभी इत्यनेन षाऽनट् । इति किदतिदेशाधिकारः ॥ १०८ ॥ भ०

इति सद्वैद्यहरिहरखानवंशसम्भवगौराङ्गमल्लीकात्मजश्रीभरतसेनविरचितायां सुग्धबोधिन्यां भट्टिटीकायां अधिकारकाण्डे
सप्तमः सर्गः ।

अष्टमः सर्गः ।

अगाधत ततो व्योम हनूमानुरुविग्रहः ।
अत्यशेरत तद्वेगं न सुपर्णार्कमारुताः ॥ १ ॥
अभायत यथार्केण सुप्रातेन शरन्मुखे ।
गम्यमानं न तेनासीद्गतं क्रामता पुरः ॥ २ ॥

आत्मनेपदमधिकृत्याह अगाधतेति । ततो विसर्जनानन्तरं हनूमान् ससुद्रलङ्घनाय व्योमाकाशमगाधत प्रस्थितवान् गाधृप्रतिष्ठालिप्सयोरित्यस्मात्लङ् अनुदात्तङित इति अनुदात्तेत्वादात्मनेपदं उरुविग्रहः कामरूपित्वात् तदानीमुत्पादितविपुलकायः तस्य चोत्पततो वेगं गरुडादित्यपवनाः नात्यशेरत नातिशयितवन्तः । ङित्त्वात्तङ् शीङोरुट् शीङः सार्वधातुके गुणः ॥ १ ॥ ज० म०

आत्मनेपदाधिकारः स च स्वमते माधिकारः । अगेत्यादि । ततः प्रेषणानन्तरं हनूमान् ससुद्रलङ्घनाय व्योम आकाशमगाधत प्रस्थितवान् गाधृङ्ओप्रतिष्ठालिप्सयोः ङित्त्वान्नवशः पमे इति मं अगाहतेति पाठे ङागाङ्हविलोडे इत्यस्मात् घी उरुविग्रहः कामरूपित्वात्तदानीमुत्पादितमहाशरीरः सुपर्णार्कमारुता गरुडसूर्यवायवोऽपि तस्य हनूमतो वेगं न अत्यशेरत नातिचक्रमुः शीङ्लञिस्वप्ने लानुबन्धत्वादादादिकः ङानुबन्धान्मं शीङोरेणुरिति गुणः मान्लोरमिति रम् मान्लोऽदनत इति अत् शोभनानि पर्णानि पक्षा यस्य हिरण्मयत्वात् स सुपर्णः ॥ १ ॥ भ०

अभेत्यादि । यथा अर्केण सुप्रातेन सुप्रभातेन नीहाराद्यभावात् शोभनं प्रातरनेनेति सुप्रातः सुश्वेति समासान्तनिपातनं शरन्मुखे शरदारम्भे अभायत दीप्यते स्म भावकर्मणोरिति भावे तङ् तद्वत्तेनाभायत पुरोऽग्रतो यदर्केण गम्यमानमवष्टभ्यमानं वर्त्मेत्यर्थात् कर्मण्यात्मनेपदं तेन हनूमता क्रामता गच्छता क्षिति क्रम इति दीर्घत्वं नागतमासीत् अपितु सर्वमेव गतमिति ॥ २ ॥ ज०म०

अभेत्यादि । शरन्मुखे शरदारम्भे सुप्रातेन सुप्रभातेनार्केण यथा अभायत दीप्यते स्म तथा तेन हनूमता अभायतेति सम्बन्धः भातेर्भावे घ्यां शोभनं प्रातरस्येति सोः स्वः प्रातर्भोऽ इति परः स्वमते प्रातरेव प्रातं स्वार्थे ष्णः व्यटेलोप इति

वियति व्यत्यतन्वातां मूर्त्तौ हरिपयोनिधी ।
व्यत्यैताञ्चोत्तमं मार्गमर्केन्द्वेन्दुनिषेवितम् ॥ ३ ॥
व्यतिजिग्ये समुद्रोऽपि न धैर्य्यन्तस्य गच्छतः ।
अगच्छच्चास्य न गतं प्रचण्डोऽपि प्रभञ्जनः ॥ ४ ॥

टिलोपः तेन समासः पुरोऽयतोऽर्केण गम्यमानं वर्त्मेत्यर्थात् क्रामता गच्छता तेन हनूमता अगतं नाशीत् किन्तु गतमेव तेजसा वेगेन च हनूमतः सूर्य्यसाम्यमुक्तं गमेः कर्म्मणि शानः ॥ २ ॥ भ०

वियेत्यादि । हरिपयोनिधी हनूमत्समुद्रौ मूर्त्तौ स्वदेहौ वियत्याकाशे व्यत्यतन्वातां व्यतिविस्तारितवन्तौ तनोतेर्लङ् कर्त्तरि कर्म्मव्यतीहार इत्यात्मनेपदं उत्तमञ्च मार्गं अर्केन्द्वेन्दुनिषेवितं व्यत्यैतां व्यतिगतवन्तौ इणः परस्य लङ् कर्म्मव्यतीहार इत्यात्मनेपदं प्राप्तं न गतिहिंसार्थेभ्य इति गत्यर्थत्वात् प्रतिषिद्धं तेन तस्तस्तामादेशः तत्र हरेर्गच्छतः पुरतो यस्मिन्वियत्प्रदेशे स्वमूर्त्तिं विस्तारितुमवसरोभविता तत्र पयोनिधिरूर्म्मिभिः स्वमूर्त्तिं वितस्तार पयोनिधेश्च वेलातटङ्कृतो यत्र स्वमूर्त्तिं वितस्तार तथा पयोनिधेर्यन्मार्गं गन्तुमवसरोभविता हरिरुत्पत्य तं मार्गं गन्तुमैच्छत् यच्च हरेर्मार्गं गन्तुमवसरो भविता तं मार्गं पयोनिधिरूर्म्मिभिरैच्छत् यत्र यत्क्रियावसरे क्रियां करोति स तत्र तत्क्रियाकारीत्युपचर्य्यते यथा देवदत्तसाध्यां क्रियां यज्ञदत्तः कुर्व्वन् तत्कारीत्युच्यते ततश्चेतरेणेतरसम्बन्धिन्याः क्रियायाः करणात् अन्यतरसम्बन्धिन्याश्चेतरकरणात्सम्भवति कर्म्मव्यतीहारः ॥ ३ ॥ ज० म०

वियतीत्यादि । हरिपयोनिधी हनूमत्समुद्रौ वियत्याकाशे मूर्त्तौ स्वदेहौ व्यत्यतन्वातां अन्योन्यं विस्तारितवन्तौ तनुङ्विस्तृतौ व्यतीहारे गतिहिंसेत्यादिना मं सूर्य्येन्द्वेन्द्रनिषेवितं अतएव उत्तमं मार्गं आकाशं तौ व्यत्यैतां परस्परं अगमतुः व्यतीहारे गतिहिंसाशब्दार्थहसान्येति गत्यर्थादिवर्ज्जनात् न व्यतीहारे मं इणोर्घ्यां रूपम् ॥ ३ ॥ भ०

व्यतीत्यादि । तस्य हरेर्गच्छतः स्वदेहस्यात्मतां कर्त्तुं योऽवसरो भावी तत्र समुद्रो नातिशयधैर्य्यं कृतवान् तेन तस्य धैर्य्यं न जितं तदानीं तस्योच्छृतकल्लोलत्वात् अपिशब्दाच्च हनूमानपि समुद्रस्य शान्तत्वं कर्त्तुं योऽवसरो भावी तत्र नातिशयधैर्य्यं कृतवान् तेन तस्य धैर्य्यं वा न जितं तदानीं तस्य विपुलकायत्वात् यदेवं हनूमतः समुद्रो हनूमानपि समुद्रस्य धैर्य्यं न व्यतिजिग्ये नाभिबभूव

व्यतिघ्नतीं पथि घ्नन्तं राक्षसीं पवनात्मजः ।
जघानाविश्य वदनं निर्यान् भित्वोदरं द्रुतम् ॥ ५ ॥
अन्योन्यं स्म व्यतियुतः शब्दान् शब्दैस्तु भीषणान् ।
उदन्वांश्चानिलोद्भूतो म्रियमाणा च राक्षसी ॥ ६ ॥

एकवचनस्य प्रत्येकाभिसम्बन्धात् कर्म्मव्यतीहारे पूर्ब्ववदात्मनेपदं संश्लिष्टोर्जेरिति कुत्वं तस्य हनूतो गतं गमनं प्रचण्डोऽपि महान् प्रभञ्जनो वायुर्न व्यत्यगच्छत् न प्राप्नवान् ॥ ४ ॥ ज० म०

व्यतीत्यादि । गच्छतस्तस्य हनूमतो धैर्य्यं समुद्रोऽपि न व्यतिजिग्ये नाभिभूतवान् निर्भयत्वात् अपिशब्दात् सोऽपि समुद्रस्य धैर्य्यं न व्यतिजिग्ये उद्वेगात् क्षोभेऽपि मर्य्यादालङ्घनात् एकवचनेऽपि उभयोरुभयापेक्षित्वाद्व्यतीहारः जेर्गिः सनूक्षोरिति ग्यादेशः प्रचण्डोऽपि प्रभञ्जनो वायुरस्य हनूमतो गतं गमनं न व्यगच्छत् न प्राप्नवान् तस्यातिवेगत्वात् अस्येति ल्यभावक्तेति भावक्तेन योगे कर्त्तरि षष्ठी ॥ ४ ॥ भ०

तस्यातिजवेन गच्छतः पथि राक्षसी संप्राप्ता तामसौ व्यापादितवानित्याह व्यतीत्यादि । हनिष्यास्येनमिति राक्षस्या यो बधकरणावसरः तत्र घ्नन् यः कश्चित्प्राप्तः तस्यैनां हनिष्यामीति यो बधकरणावसरः तत्र घ्नतीन्नदेवमितरेतरक्रियाकरणेन व्यतिघ्नतीं राक्षसीं न गतीत्यादिना हिंसार्थत्वादात्मनेपदप्रतिषेधः तां पवनात्मजो हनूमान् जघान कथं वदनमाविश्य उदरम्भित्त्वा द्रुतं निर्यान् निर्गच्छन् यातेः शतरि रूपम् ॥ ५ ॥ ज० म०

व्यतीत्यादि । पवनात्मजो हनूमान् गच्छन्नेव पथि संप्राप्तां राक्षसीं जघान किं कुर्ब्वन् द्रुतं वदनं प्रविश्य उदरं भित्त्वा विदार्य्य निर्यान् निर्गच्छन् यातेः शतः कीदृशीं घ्नन्तं जनं व्यतिघ्नतीं अन्योन्यं घ्नतीं हिंसार्थवर्ज्जनात् व्यतीहारेऽपि न मं ॥ ५ ॥ भ०

अन्योन्यमित्यादि । अन्योन्यमित्यन्योन्यस्येत्यर्थः कर्म्मव्यतीहारे सर्ब्वनाम्नो द्वे भवतो समासवच्च बहुलं यदा नासमासवत् तदा पूर्ब्वपदस्योत्तरपदस्य च प्रथमैकवचने स्त्रीनपुंसकयोरामभाव इति वक्तव्यं अन्योन्यस्य सर्ब्वभिभिः शब्दैः उदन्वद्राक्षसौ शब्दान् भीषणानात्मीयान् व्यतियुतः स्म मिश्रितवन्तौ युमिश्रण इत्यस्माल्लट् स्म इति भूते लट् इतरेतरेत्यादिना कर्म्मव्यतीहार आत्मनेपदप्रतिषेधः तत्रोदन्वतः शब्दकरणाद्यो भीषणशब्दमिश्रणावसरो भावी तत्र

न्यविक्षत महाग्राहसङ्कुलं मकरालयम् ।
सैका बह्वनां कुर्व्वाणा नक्राणामाश्रितम्भवम् ॥ ७ ॥
कृतेनोपकृतं वायोः परिक्रीणानमुत्थितम् ।
पिता संरक्षितं शक्रात्म मैनाकाद्रिमैक्षत ॥ ८ ॥

राक्षसी म्रियमाणा शब्दान् भीषणानुदन्वच्छब्दैर्युयाव राक्षसाः शब्दकरणाद्यो भीषणशब्दमिश्रणावसरो भावी तत्रोदन्वाननिलोद्भूतः शब्दान् भीषणात् राक्षसीशब्दैर्युयाव ॥ ६ ॥ ज० म०

अन्योन्यमित्यादि । तदानीं हनूमद्वेगेनानिलोद्भूत उदन्वान् समुद्रः म्रियमाणा राक्षसी उभावेतौ शब्दैर्भीषणान् शब्दान् अन्योन्यं व्यतियुतः स्म संमिश्रितवन्तौ युतमिश्रणे कीस्रेनातीत इति अन्योन्यार्थे इत्युक्ते व्यतीहारेऽपि मं अन्योन्यार्थ इति ज्ञापकात् व्यतीहारेऽन्योन्यादयो मनीषादित्वाद्भिन्नातिताः उदकस्य वतौ लोकोपचारादुदनादेशः उदन्शब्दोऽप्यस्ति उक्तं हि पदादयः पृथक्शब्दा इत्येके इति ॥ ६ ॥ भ०

न्यवीत्यादि । महद्भिर्ग्राहैः सङ्कुलं मकरालयं समुद्रं न्यविक्षत प्रविष्टवती नेर्विश इत्यात्मनेपदं श्रसदृगुपधादनिटः क्षः बह्वनां नक्राणामेकापि सती स्वाश्रितम्भवं सुष्ठु तृप्तिं कुर्व्वाणा आश्रिते भव इति भावे खच् ॥ ७ ॥ज० म०

न्यवीत्यादि । राक्षसी एकापि सती बह्वनां नक्राणां कुम्भीराणां आश्रितम्भवं सुष्ठु तृप्तता महाशरीरत्वात् कुर्व्वाणा मकरालयं समुद्रं न्यविक्षत प्रविष्टवती विपराजीत्यादिना निपूर्व्वविशतेर्म्मं हृशषोऽनिमिजुङ इति सक् कीदृशं महद्भिर्ग्राहैर्जलजन्तुभिः संकुलं व्याप्तं आङ्पूर्व्वोऽश्रातिस्तृप्त्यर्थः भावधेत्वाश्रिताङ्खच इति खः ॥ ७ ॥ भ०

कृतेत्यादि । स हनूमान् समुद्रादुत्थितं मैनाकाद्रिमैक्षत वायोरुपकृतमुपकारकृतेन प्रत्युपकारेण परीक्रीणानं परिक्रयं विक्रीवन्तं परिव्यवेभ्यः क्रिय इत्यकर्त्तृभिप्रायविषयं आत्मनेपदं पिता वायुना रक्षितं शक्रात् तेन हि पक्षच्छेदकाले महता वेगेन समुद्रं नीत्वा रक्षित इति श्रूयते ॥ ८ ॥ ज० म०

कृते इत्यादि । स हनूमान् समुद्रादुत्थितं मैनाकनामानमद्रिं ऐक्षत दृष्टवान् ईक्षद्दर्शने ङानुबन्धात्कीदृशं शक्रात् पक्षच्छेदोद्यतात् पिता वायुना संरक्षितं अतएव वायोरुपकृतं उपकारं कृतेन प्रत्युपकारेण परिक्रीणानं परिवर्त्तयन्तं विपराजीति परिपूर्व्वक्रीञो मं शानः ॥ ८ ॥ भ०

खं पराजयमानोऽसावुन्नत्या पवनात्मजम् ।
जगादाद्रिर्विजेषीष्ठा मयि विश्रम्य वैरिणम् ॥ ९ ॥
फलान्यादत्स्व चित्राणि परिक्रीडस्व सानुषु ।
साधवनुक्रीडमानानि पश्य दृन्दानि पक्षिणाम् ॥ १० ॥
क्षणं भद्रावतिष्ठस्व ततः प्रस्थास्यसे पुनः ।
न तत् संस्थास्यते कार्य्यं दक्षेणोरीकृतं त्वया ॥ ११ ॥

खमित्यादि । असावद्रिः उन्नत्या उन्नततया खंपराजयमानोऽभिभवन् पवनात्मजं जगाद मयि विश्रम्य स्थित्वा वैरिणं शत्रुं विजेषीष्ठाः त्वमभिभूयाः आशिषि लिङ् उभयत्रापि विपराभ्यां जेरिति तङ् ॥ ९ ॥ ज० म०

खमित्यादि । असौ अद्रिः पवनात्मजं जगाद कीदृशः सन् उन्नत्या उन्नततया खमाकाशं पराजयमानः अभिभवन् विपराजीति मं किं जगादेत्याह मयि विश्रम्य विश्रामं कृत्वा वैरिणं विजेषीष्ठाः अभिभूयाः ढ्राशिषि पूर्ववन्नम् ॥ ९ ॥ भ०

फलानीत्यादि । चित्राणि नानाविधानि फलानि आदत्स्व गृहाण आङोदोनाङ्याविहरण इत्यात्मनेपदं सानुषु ममैकदेशेषु परिक्रीडस्व विहर पक्षिणाञ्च दृन्दानि साधु शोभनं अनुक्रीडमानानि विहरन्ति सन्ति पश्य उभयत्र क्रीडोनुसम्परिभ्यश्चेति तङ् ॥ १० ॥ ज० म०

फलेत्यादि । चित्राणि अद्भुतानि फलानि त्वमादत्स्व गृहाण आदोजीऽवसरे इति मं आमन्त्रणे गौ आङोरित्यालोपः मम सानुषु एकदेशेषु परिक्रीडस्व विहर पर्यन्ववाङः क्रीड इति मं पक्षिणां दृन्दानि पश्य क्रीडमानि साधु शोभनं अनुक्रीडमानानि विहरन्ति पूर्ववन्नम् ॥ १० ॥ भ०

क्षणमित्यादि । हे भद्र कल्याण क्षणमवतिष्ठस्व ततः पश्चात्प्रस्थास्यसे यास्यसि यच्च कार्यं करणीयं दक्षेणानलसेन त्वया अरीकृतमङ्गीकृतं न च संस्थास्यते अपितु निष्पत्स्यत एवेत्यर्थः सर्व्वत्र समवप्रविभ्यःस्थः इति तङ् ॥ ११ ॥ ज० म०

क्षणमित्यादि । हे भद्र कल्याणयुक्त त्वं क्षणं अवतिष्ठस्व ततः पुनः प्रस्थास्यसे यास्यसि दक्षेण अमलसेन त्वया अरीकृतं अङ्गीकृतं कार्यं न च संस्थास्यते न नाशं गमिष्यति सम्पत्स्यत एवेति भावः प्रतिज्ञानिर्णयेत्यादिना अवसंप्रपूर्व्वेतिष्ठतेर्नम् ॥ ११ ॥ भ०

त्वयि नस्तिष्ठते प्रीतिस्तुभ्यं तिष्ठामहे वयम् ।
उत्तिष्ठमानं मित्रार्थे कस्त्वां न बद्ध मन्यते ॥ १२ ॥
ये सूर्यमुपतिष्ठन्ते मन्त्रैः सन्ध्यात्रयं द्विजाः ।
रक्षोभिस्तापितास्तेऽपि सिद्धिं ध्यायन्ति तेऽधुना ॥ १३ ॥

त्वयीत्यादि । त्वयि विषये अस्माकं प्रीतिरस्ति तेन संशये अस्माभिरन्यो निर्णेता नान्वेषणीयः किन्तु नोऽस्माकं प्रीतिरेव निर्णयं पश्यन्ती त्वयि तिष्ठते प्रकाशनस्येयाख्ययोरेत्यात्मनेपदं विवादपदनिर्णेता स्येय उच्यते तुभ्यन्तिष्ठामहे वयमिति त्वयि विषये अस्माकं चेतो वर्त्तत इति स्वाभिप्रायं तुभ्यं तिष्ठामहे स्वाभिप्रायं निवेदयाम इत्यर्थः अत्र प्रकाशनञ्च स्वाभिप्रायकथनं श्लाघङ्कुङ्-स्थाशपांक्षीप्समान इति सम्प्रदानसंज्ञायां चतुर्थी कस्मादेवं मां श्लाघस इति चेदाह उत्तिष्ठमानं यतमानं उदोऽनूर्ध्वकर्म्मणीत्यात्मनेपदं कस्त्वां न बद्ध मन्यते न श्लाघते ॥ १२ ॥ ज० म०

त्वयीत्यादि । त्वयि नोऽस्माकं प्रीतिस्तिष्ठते निश्चयेनास्ति तद्विषयेऽस्माकं प्रीतिरस्ति न वेति सन्देहे अस्माभिरन्योनिर्णेता नान्वेषणीयः किन्त्वस्माकं प्रीतिरेव त्वां निर्णेतारं करोतीति निर्णयार्थौऽत्र स्थाधातुः त्वमस्मदादेशो न वेत्यत्र त्वद्विषये प्रीतिर्निर्णयं करोतीत्यन्ये वयं तुभ्यं तिष्ठामहे स्थित्वा स्वाभि-प्रायं प्रकाशयामः प्रकाशार्थौऽत्र स्थाधातुः यस्मैदित्येत्यादिना संप्रदानत्वं प्रति-ज्ञानिर्णयेत्यादिना मं अत्र प्रकाशः स्वाभिप्रायकथनं कथं मह्यं श्लाघसे इत्याह मित्रार्थे रामार्थे उत्तिष्ठमानं यतमानं त्वां को न बद्ध मन्यते न श्लाघते अपि तु सर्व्वएव उदोऽनूर्द्ध्वेह इति मं ॥ १२ ॥ भ०

य इत्यादि । ये द्विजा मन्त्रैः करणभूतैः सूर्य्यमुपतिष्ठन्ते प्रत्युपासते उपा-त्मन्त्रकरण इत्यात्मनेपदं सन्ध्यात्रयं त्रिसन्ध्यं अत्यन्तसंयोगे द्वितीया तेऽपि रक्षोभिस्तापिताः उपद्रुताः अधुना ते सिद्धिं ध्यायन्ति किं पुनरहं यत्ते पितुः सुहृत् तदेव दर्शयन्नाह ॥ १३ ॥ ज०म०

य इत्यादि । ये द्विजा ब्राह्मणा मन्त्रैः करणभूतैः सन्ध्यात्रयं व्याप्य सूर्य्य-मुपतिष्ठन्ते उपासते मन्त्रेणोपादिति मं तेऽपि द्विजा रक्षोभिस्तापिता उपद्रुताः सन्तः अधुना इदानीं तव सिद्धिं ध्यायन्ति चिन्तयन्ति अहन्तु तव पितुः सुहृत् सुतरां तथेति भावः यद्वा द्विजातिकुलत्वादपि त्वं श्लाघ्य इति भावः सन्ध्यात्रयमिति सदाध्यादीति द्वितीया ॥ १३ ॥ भ०

अव्यग्रमुपतिष्ठस्व वीर वायोरहं सुहृत् ।
रविर्वितपतेऽत्यर्थमाश्वस्य मयि गम्यताम् ॥ १४ ॥
तीव्रमुत्तपमानोऽयमशक्यः सोढुमातपः ।
आघ्नान इव सन्दीप्तैरलातैः सर्व्वतो मुहुः ॥ १५ ॥
संशृणुष्व कपे मत्कैः सङ्गच्छस्व वनैः शुभैः ।
समारन्त ममाभीष्टाः सङ्कल्पास्त्वयुपागते ॥ १६ ॥

अव्येत्यादि । हे वीर अव्यग्रमनाकुलं मय्युपतिष्ठस्व सन्निहितो भव अकर्म्मकाच्चेत्यात्मनेपदं यतो वायोस्तव पितुरहं सुहृत् रविरत्यर्थं वितपते दीप्यते ऊदित्त्वाभित्यात्मनेपदं तत्राकर्म्मकादिति वर्त्तते तस्मादाश्वस्य विश्रम्य गम्यतां ॥ १४ ॥ ज० म०

अव्येत्यादि । हे वीर अव्यग्रमनाकुलं यथा स्यात्तथा त्वमुपतिष्ठस्व सन्निहितो भव अढादिति मं यतोऽहं वायोस्तव पितुः सुहृन्मित्रं विश्रामौचित्यं दर्शयति रविरत्यर्थं वितपते दीप्यते व्युत्तप इति मं अढत्वात् अतएव मयि आश्वस्य प्राणनिर्वृतिं प्राप्य त्वया गम्यतां ॥ १४ ॥ म०

तीव्रमित्यादि । तीव्रं सुष्ठु उत्तपमानो दीप्यमान आतपः सोढुमशक्यः पूर्व्ववदात्मनेपदं अलातैः उल्मुकैः सन्दीप्तैः सर्व्वत आघ्नान इव ताडयन्निव आङोयमहनइत्यविवक्षितकर्म्मकत्वादात्मनेपदं गमहनेत्युपधालोपः होहन्तेरिति कुत्वम् ॥ १५ ॥ ज० म०

तीव्रमित्यादि । पुनर्व्विश्रामौचित्यमाह तीव्रमुत्तपमानो दीप्यमानोऽयमातपः सोढुं न शक्यः पूर्व्ववत् मं सन्दीप्तैरलातैरङ्गारैर्मुहुर्व्वारं वारं सर्व्वत आघ्नान इव ताडयन्निव आत्माङ्कादढाच्चाहनयमहति मं अविवक्षितकर्म्मत्वात् अङ्गारोऽलातकुलमुकमित्यमरः आलातैरिति पाठे स्वार्थे णः विद्यादलातमालातमिति द्विरूपकोषः ॥ १५ ॥ म०

संशृणुष्वेत्यादि । हे कपे संशृणुष्व आकर्णय समोगमश्लोत्यादिविवक्षितकर्म्मकत्वादात्मनेपदं शुभैः शोभमानैः इगुपधलक्षणः कः वनैर्म्मत्कैः मत्स्वामिकैः अहं स्वामी येषामिति स एषां अस्यामणीरिति कः प्रत्ययोत्तरपदयोश्चेति मदादेशः सङ्गच्छस्व सङ्गतोभव पूर्व्ववदात्मनेपदं समारन्त ममाभीष्टा इति ममाभिप्रेता ये सङ्कल्पा अभिप्रायाः कदा नु मे सुहृत्तया वा कश्चिदेष्यति यस्मा-

के न संविदूते वायोर्मैनाकाद्रिर्यथा सखा ।
यत्नादुपाह्वये प्रीतः संह्वयस्व विवक्षितम् ॥ १७ ॥
द्यामिवाह्वयमानन्तमवोचद्भूधरं कपिः ।
उपकुर्व्वन्नमत्यर्थं प्रकुर्व्वाणोऽनुजीविवत् ॥ १८ ॥

हनुपयोगी स्वामिति ते समारन्न आगताः त्वय्युपागते सति अर्त्तेर्लुङि पूर्ववदात्मनेपदं सर्त्तिशास्त्यर्त्तिभ्यश्चेत्यङि कृदभोर्ङि गुणः आडजादीनाम् भाषाविषयस्य प्रयोगः ॥ १६ ॥ ज० म०

समित्यादि । हे कपे संश्रुणुष्व आकर्णय मत्कैर्मत्स्वामिकैः शुभैः शोभमानैर्निर्भयत्वेन कल्याणयुक्तैर्व्वा वनैः सह सङ्गच्छस्व सङ्गतोभव अहं स्वामी येषामिति विकारसंघेत्यादिना कः समे मानीत्यर्थे वा त्वयि उपागते सति समाभीष्टा वाञ्छिताः सङ्कल्पा अभिप्रायाः सुहृद्दर्शनादिरूपाः समारन्न सङ्गतवन्तः सगतौ सर्व्वत्र समोगम्यृच्छ इत्यादिना मं प्राप्तः अुर्घृतीति अुः जिस्व वक्ष्यतीत्यादिना अर्त्तेर्डः दश्नोर्णुरिति गुणः ॥ १६ ॥ भ०

न चैवम्मिथ्या वायुर्म्मे सुहृदित्याह केनेत्यादि । वायोर्मैनाकाद्रिर्यथा सखेति के न संविदूते न जानन्ति वेत्तेः पूर्ववदात्मनेपदं वेत्तेर्विभाषेति कृत्तस्यात्मनेतः सन् अहं यत्नादुपाह्वये भवन्तमाह्वयामि ततः संह्वयस्व कथय विवक्षितमभिप्रेतं निसस्कृपविभ्योह्व इत्यकर्त्रभिप्राये लट्लोटोरात्मनेपदं तलोऽकर्म्मकादिति निवृत्तं सामान्येन विधानम् ॥ १७ ॥ ज०म०

केनेत्यादि । मत्पितुः सखा त्वमसीति किं प्रमाणमित्याशङ्क्याह मैनाकाद्रिर्वायोर्यथा सखा तथा के जना न संविदूते न जानन्ति अपि तु सर्व्व एव समोगम्यृच्छेति मं अविवक्षितकर्म्मत्वात् मान्नोरमिति रम् अत एवाहं प्रीतः सन् यत्नादुपाह्वये त्वामाह्वयामि त्वमपि विवक्षितं वक्तुमिष्टं संह्वय संकथय इति जगादाद्रिरिति सम्बन्धः निसंश्रुणुष्वेति मं ॥ १७ ॥ भ०

द्यामित्यादि । द्यामिवाकाशमिवाह्वयमानं महत्तया स्पर्द्धमानं स्पर्द्धायामाङ्दित्यात्मनेपदं अत्यर्थमुपकुर्व्वन् आतिथ्येन तमोदग्रं भूधरमवोचत् कपिः प्रकुर्व्वाणः सेवमानोऽनुजीविवत् भृत्यवत् गन्धनेत्यादिना सेवने तङ् ॥ १८ ॥ ज० म०

द्यामित्यादि । कपिर्हनूमान् तं भूधरं मैनाकं पर्व्वतं अवोचत् उक्तवान् कीदृशं द्यामाकाशमाह्वयमानमिव महत्त्वेन स्पर्द्धमानमिव स्पर्द्धायामाङ्दिति मं

कुलभार्य्यां प्रकुर्व्वाणमहं द्रष्टुं दशाननम् ।
यामि त्वरावान् शैलेन्द्र मा कस्यचिदुपस्कृथाः ॥ १९ ॥
योऽपचक्रे वनात्सीतामधिचक्रे न यं हरिः ।
विकुर्व्वाणः स्वरानद्य बलं तस्य निहन्म्यहम् ॥ २० ॥

अत्यर्थमुपकुर्व्वाणमुपकारोद्यतं कीदृशः कपिः अनुजीविवत् भृत्यवत् प्रकुर्व्वाणः सेवमानः सूचनावक्षेपणेत्यादिना सेवायां मं ॥ १८ ॥ भ०

कुलेत्यादि । अहं दशाननं द्रष्टुं यामि कुलभार्य्यां प्रकुर्व्वाणं कुलनारीमभिगच्छन्तं तस्यां साहसा प्रवर्त्तमानमित्यर्थः साहसिक्ये तङ् त्वरावान् त्वरायुक्तः अतः शैलेन्द्र मा कस्यचिद्दशनपानादिकस्य उपस्कृथाः अतिशयवन्माकार्षीरित्यर्थः माङिलुङ् प्रतियत्ने तङ् तनादिभ्यस्तथासोरिति सिचोलुक् उपात्प्रतियत्न इति सुट् कस्यचिदिति क्रुञः प्रतियत्न इति कर्म्मणि षष्ठी ॥ १९ ॥ ज०म०

कुलेत्यादि । किमवोचदित्याह हे शैलेन्द्र अहं त्वरायुक्तः सन् दशाननं द्रष्टुं यामि कीदृशं कुलभार्य्यां कुलपालिकां प्रकुर्व्वाणं साहसेनाभिगच्छन्तं तस्यां साहसात्प्रवर्त्तमानमित्यर्थः सूचनावक्षेपणेत्यादिना साहसे मं कुलस्त्री कुलपालिकेत्यमरः अतएव कस्यचित् मा उपस्कृथाः कस्यापि दृश्यस्य भोज्यस्य पेयस्य वा मदर्थं प्रतियत्नं न कुरु पूर्व्वेण प्रतियत्ने मं सतोगुणान्नराधानं प्रतियत्नः उत्कर्षसमीहा प्रतियत्नमिति केचित् सम्परेः सुसुपादिति सुम् ऋस्स्राञ्जसीति सेर्लोपः कस्यचिदिति समार्थेनेत्यादिना कर्म्मणि षष्ठी एधोदकस्योपस्कृत इत्युदाहरता प्रतियत्ने क्रुञः कर्म्मणि न द्वितीया इति सूचितं गुणोत्कर्षे क्रुञः कर्म्मणि षष्ठीति परः ॥ १९ ॥ भ०

योऽपेत्यादि । यः सीतामपचक्रे अभिबभूव अवक्षेपणे तङ् वनादिति वनमुपगम्य ल्यब्लोपे कर्म्मणि पञ्चमी यं हरिरिन्द्रो नाधिचक्रे न प्रसेहे अधेः प्रसहन इति तङ् तस्य बलं दशाननस्य सामर्थ्यं कीदृशं स्वरान् विकुर्व्वाणं विविधान् स्वरान् कुर्व्वाणं वेः शब्दकर्म्मण इति तङ् तस्य दशाननस्य बलं निहन्मि ॥२०॥ ज० म०

य इत्यादि। यो वनात् सीतामपचक्रे प्रतिभूतवान् सूचनावक्षेपणेत्यादिना अवक्षेपणे मं सूचने ममिति केचित् तदापकारं प्रयुज्य हिंसां सूचयतीत्यर्थः वनादिति हेतौ पञ्चमी वनं प्राप्येति यवर्थे वा हरिरिन्द्रो यं नाधिचक्रे नाभिभूतवान् अधेः शक्लाविति मं शक्तिरभिभवः तस्य दशाननस्य बलं शक्तिमहमद्य

विकुर्व्वे नगरे तस्य पापस्याद्य रघुद्विषः ।
विनेष्ये वा प्रियान् प्राणानुदानेष्येऽथवा यशः ॥ २१ ॥
विनेष्ये क्रोधमथवा क्रममाणोऽरिसंसदि ।
इत्युक्त्वा खे पराक्रांस्त तूर्णं सूनुर्नभस्वतः ॥ २२ ॥

निहन्मि कीटशः स्वरान् विविधान् कुर्व्वाणः द्वितीयान्तपाठे यमित्यस्य विशेषणं शब्दढाढ्येरिति मम् ॥ २० ॥ भ०

विकुर्व्वे इत्यादि । तस्य रघुद्विषो रामशत्रोः पापस्य नगरे पुर्य्यां अहमद्य विकुर्व्वे विविधं चेष्टे अकर्म्मकाच्चेति तङ् तत्र विकुर्व्वाणो यदि वा प्रियानपि प्राणान् स्वास्यर्थं विनेष्ये अपनेष्यामि सम्माननेत्यादिना व्यये तङ् यतो धर्म्मादिषु विनियोगोव्ययः यशो वा उदानेष्ये ऊर्द्धं नेष्यामि तत्प्रापकारकरणात् अतोत्प्रङ्गने तङ् उत्प्लङ्गनसूत्रेणेषणम् ॥ २१ ॥ ज० म०

विकुर्व्वे इत्यादि । तस्य पापाचारस्य रघूणां रामादीनां द्विषो रावणस्य नगरे लङ्कायां अहमद्य विकुर्व्वे विविधं चेष्टे शब्दढाढ्येरिति अकर्म्मकत्वान्मं तत्र च विकुर्व्वाणोऽहं प्रियानपि प्राणान् वा विनेष्ये स्वास्यर्थं त्यक्ष्यामि ज्ञानार्थौत्क्षेप इत्यादिना व्ययार्थे मं व्ययो धर्म्मादिषु विनियोगः अथवा यश उदानेष्ये ऊर्द्धं नेष्यामि पूर्व्वेण क्षेपणे मम् ॥ २१ ॥ भ०

विन इत्यादि । यदि वा क्रोधमात्मनो विनेष्ये अपनेष्यामि कर्त्तरीति कर्त्तरस्य क्रोधकर्म्मणोऽशरीरत्वात् अत्र व्ययो न सम्भवतीति अरिसंसदि शत्रुसभायां क्रममाणः अप्रतिबन्धेन प्रवर्त्तमानः वृत्तिसर्गेत्यादिना वृत्तौ तङ् वृत्तिरप्रतिबन्धः इत्येवमुक्त्वा सूनुर्नभस्वतः वायोस्तनयः खे तूर्णं पराक्रांस्त शीघ्रमुत्प्लुत्येत्युपपराभ्यामित्यनेन सर्गे तङ् सर्ग उत्साहः ॥ २२ ॥ ज० म०

विनेष्य इत्यादि । अथवा क्रोधं विनेष्ये अपनेष्यामि शत्रुहननात् घस्यामूर्त्तेऽदादिति मं अमूर्त्तमशरीरं कर्त्तास्थादुक्तकर्म्मकाद्विपूर्व्वनीञ आत्मनेपदमिति विद्यासागरः स्वमतेऽपि शब्दढाढ्येरित्यतो क्रमङ्कमुक्त्वा वेरित्यनुवर्त्तते इति वाच्यं क्रोधं विनयत इत्युदाहरणदर्शनात् अन्ये तु विपूर्व्वत्वं न वदन्ति तस्य साधु विगणय्य नयन्ति पौरुषं विहितक्रोधरया जिगीषव इत्यादिदर्शनात् किं कुर्व्वन् अरिसंसदि शत्रुसभायां क्रममाणः अप्रतिबन्धेन चेष्टमानः वृत्युत्साहेत्यादिना मं वृत्तिरप्रतिबन्धः इत्येवमुक्त्वा नभस्वतो वायोः सूनुः पुत्रो हनूमान् खे आकाशे तूर्णं शीघ्रं पराक्रांस्त उत्साहं चकार पूर्व्वेणोत्साहे मं आस्फालनरूपोऽत्रोत्साहः क्रमोऽस्य इति नेम् ॥ २२ ॥ भ०

परीक्षितुमुपाक्रंस्त राक्षसी तस्य विक्रमम् ।
दिवमाक्रममाणेव केतुतारा भयप्रदा ॥ २३ ॥
जले विक्रममाणाया हनूमान् शतयोजनम् ।
आस्यं प्रविश्य निरगादणुभूया प्रचेतितः ॥ २४ ॥
द्रष्टुं प्रक्रममाणोऽसौ सीतामम्भोनिधेस्तटम् ।
उपाक्रंस्ताकुलं घोरैः क्रममाणैर्निशाचरैः ॥ २५ ॥

परीत्यादि । तस्य हनूमतो विक्रमं शौर्यं परीक्षितुं राक्षसी उपाक्रंस्त उत्सेहे पूर्ववत्तङ् दिवमाक्रममाणेव यथा केतुः स्वर्भानुः तारा नभस्युल्लक्कति भयङ्करा आङ्उल्लसनङ्इति तङ् तत्र हि ज्योतिरुल्लसनङ्त्युक्तं केतुतारायाश्च ज्योतिःस्वभावत्वात् ॥ २३ ॥ ज०म०

परीत्यादि । तस्य हनूमतो विक्रमं शौर्यं परीक्षितुं राक्षसी उपाक्रंस्त उत्सहते स्म पूर्ववत् मं दिवमाकाशमाक्रममाणा उल्लसपूर्वकं प्राप्नुवती केतुस्वभावा तारेव भयप्रदा भयं प्रददातीति हनजनादिति ङः आङोभोल्लसङ्इति मं आक्रामति धूमः खमित्यत्र उल्लसो न विवक्षते किन्तु व्याप्तिमात्रं ॥ २३ ॥ भ०

जल इत्यादि । विक्रममाणायाः पद्भ्यां विचरन्त्याः वेःपादविहरण इति तङ् जलप्रक्षणात् गतिविशेषं दर्शयति आस्यं शतयोजनं शतं योजनानि यस्य प्रमाणतः तदणुभूय सूक्ष्मीभूय प्रविश्य निरगात् निर्गत उदरं विदार्येत्यर्थात् अप्रचेतितः अविज्ञातः ॥ २४ ॥ ज० म०

जल इत्यादि । जले विक्रममाणायाः पद्भ्यां विहरन्त्या राक्षस्याः शतयोजनमास्यं प्रविश्य हनूमान् अणुभूय सूक्ष्मीभूय अप्रचेतितस्तया अपरिज्ञातः सन् निरगात् निर्गतः कर्णपथेनेत्यर्थात् उदरं भित्त्वेत्यन्ये तत्तु रामायणविरुद्धं शतं योजनानि प्रमाणतो यस्येति विग्रहः वेःपद्भिरिति मं पद्भिरिति बहुत्वनिर्देशेन पादमात्रस्य करणत्वे वेःक्रमोमभिति बोध्यं न तु साधु विक्रमते वाजीत्युदाहरणदर्शनात् बहुपादकरणत्वं वाच्यं वेःपद्भ्यामिति कातन्त्रसूत्रे द्वित्वबहुत्वलक्षणं तेन तन्मते साधु विक्रमते वाजीत्यादिसिद्धम् ॥ २४ ॥ भ०

द्रष्टुमित्यादि । असौ हनूमान् सीतां द्रष्टुं प्रक्रममाणः आरभमाणः आदिकर्म्म यथा भोक्तुं प्रक्रमते इति उदधेस्तटमुपाक्रंस्त गन्तुं प्रारब्धवानित्यर्थः ततश्च प्रोपयोरप्यादिकर्म्मणि समानार्थत्वात् प्रोपाभ्यां समार्थाभ्यामिति तङ्

आत्मानमपजानानः शशमात्रोऽनयद्दिनम् ।
श्लाघ्ये रात्राविति प्राज्ञः प्रत्यज्ञास्त क्रियापटुः ॥ २६ ॥
संजानानान् परिहरन् रावणानुचरान् बहून् ।
लङ्कां समाविशद्रात्रौ वदमानोऽरिदुर्गमाम् ॥ २७ ॥

घोरैः रौद्रैः निशाचरैराकुलं व्याप्तं तटं क्रममाणैः इतस्ततो गच्छद्भिः अनुपसर्गादेति तङ् ॥ २५ ॥ ज० म०

द्रष्टुमित्यादि । असौ हनूमान् निर्गतः सन् सीतां द्रष्टुं प्रक्रममाण आरभमाण उदधेस्तटमुपाक्रंस्त गन्तुमारभते स्म यद्यपि भोक्तुमुपक्रमते इत्यादावारम्भमात्रमुपक्रमेरर्थस्तथापीह गमनारम्भोपाच्यः लाक्षणिकत्वात् द्रष्टुमित्यस्यानुषङ्गेन अम्भोनिधेस्तटमुपाक्रंस्तेति वा प्रोपादारम्भे इति मं घोरैर्भयानकैर्निशाचरैराकुलं व्याप्तं क्रममाणैरितस्ततो गच्छद्भिः वागोरिति मं ॥ २५ ॥ भ०

आत्मेत्यादि । मा कश्चिद्द्राक्षीदिति तथाविधमात्मानं शरीरमवजानानः अपह्नुवानः अपह्नवेत्र इति तङ् योहि शशमात्रो भूत्वा स्थितः तेन कथमात्मा लोके नापलपितः स्यात् अनयद्दिनं अगमयद्दिवसं श्लाघ्ये रात्राविति प्रत्यज्ञास्त प्रतिज्ञातवानित्यर्थः सम्प्रतिभ्यामनाध्याने इत्यात्मनेपदं लुङो भवति आत्मानश्लोकस्थनं श्लाघ्ये इत्यकर्मकाज्ज्ञेत्यकर्मकक्रियावचनत्वादात्मने पदं प्राज्ञः क्रियापटुरिति बुद्धिकौशलं कर्मकौशलञ्च दर्शयति ॥ २६ ॥ ज० म०

आत्मानमित्यादि । असौ शशमात्रः शशपरिमाणो भूत्वा दिनमनयत् गमयामास दक्षमात्रहयषट्मान इति मात्रट् कथं तथाविधस्याल्पकायत्वमित्याह आत्मानमपजानानः अपह्नुवानः निह्नवेत्र इति मं रात्राविहं श्लाघ्ये इति प्रत्यज्ञास्त प्रतिज्ञातवान् संप्रतेरस्मृताविति मं श्लाघ्ये इति अदृादिति मं अविवक्षितकर्मत्वात् जिज्ञप्त्योत्यादिना वा प्राज्ञः क्रियापटुरिति पदद्वयेन बुद्धिकौशलं क्रियाकौशलञ्च दर्शितम् ॥ २६ ॥ भ०

सञ्जेत्यादि । रावणस्यार्थेषु कार्येषु ये चरन्तीति चरेष्टः तान् बहून् सञ्जानानान् चेतयतः परिहरन् अनाध्याने तङ् रात्रौ लङ्कां समाविशत् प्रविष्टवान् अरिदुर्गमां राक्षसदुर्गमां वदमानो भासमानः भासनोपसम्भाषेत्यादिना आत्मनेपदम् ॥ २७ ॥ ज० म०

समित्यादि । असौ हनूमान् रात्रौ लङ्कायां समाविशत् प्रविष्टवान् कीदृशः वदमानः शोभमानो वदन् शोभोपलक्षितं शोभाहेतुकं वा यथा स्यात्तथा

किञ्चिन्नोपावदिष्टासौ केनचिच्चावदिष्ट न ।
सृण्वन् संप्रवदमानाद्रावणस्य गुणान् जनात् ॥ २८ ॥
जल्पितोत्कृष्टसङ्गीतप्रवृत्तस्मितवल्गितैः ।
घोषस्यान्ववदिष्टेव लङ्का पूतक्रतोः पुरः ॥ २९ ॥

कथयन् वा ज्ञानयत्नप्रलोभे वद इति मं ज्ञानपदेन ज्ञानपूर्व्वकत्वात् शोभाप्युच्यत इति कातन्त्रटीकायां व्याख्यातत्वात् प्रकाशनादौ वद इति क्रमदीश्वरसूत्रदर्शनाच्च शोभा च वदत्यर्थस्य लक्षणभावेन हेतुभावेन वा विशेषणं न तु तन्मात्रं वाच्यमिति न्यासः बहून् रावणस्यानुचरान् सेवकान् परिहरन् कीदृशान् संजानानान् चेतयमानान् संप्रतेरसृतावितिं कीदृशीं लङ्कां अरिदुर्गमां शत्रुभिर्दुष्प्रापाम् ॥ २७ ॥ भ०

किञ्चिदित्यादि । असौ प्रविष्टः सन् न किञ्चिदुपावदिष्ट उपसान्त्वितवान् उपसम्भाषायां तङ् केनचिच्चावदिष्ट न न भाषितवान् विमतौ तङ् विमतिर्नानामतिः संशृण्वन् आकर्णयन् जनात् प्रवदमानात् रावणस्य सम्बन्धिनो गुणान् समूह भाषमाणान् व्यक्तवाचामित्यात्मनेपदं जनानां व्यक्तवाक्यम् ॥२८॥ज०भ०

किञ्चिदित्यादि । असौ हनूमान् प्रविष्टः सन् न किञ्चिदुपावदिष्ट न किञ्चित्प्रलोभनवाक्यं भाषते स्म ज्ञानयत्नेत्यादिना प्रलोभे मं केनचित् सह न व्यवदिष्ट नानामतिपूर्व्वकं विचित्रं न भाषते स्म विमतिपूर्व्वकं विचित्रकथनमत्र वदत्यर्थः विमतिव्यक्तसंलोक्योरिति विमतौ मं संप्रवदमानात् समूह व्यक्तं भाषमाणात् जनात् रावणस्य गुणान् शृण्वन् पूर्व्वेण व्यक्तसंलोकौ मम् ॥२८॥ भ०

जल्पीत्यादि । पूतक्रतेरिन्द्रस्य या पूः तस्या अमरावत्याः सम्बन्धिनो घोषस्यान्ववदिष्टेव लङ्का अनुशब्दः सादृश्ये सदृशं वादं कृतवती तैर्जल्पितादिभिः उभयत्रापि जल्पितादिघोषस्य तुल्यत्वात् लङ्केति तत्स्थो जन उच्यते तेन व्यक्तवाग्विषयत्वात् अनोरकर्म्मकादिति तङ् तत्र व्यक्तवाचामिति अनुवर्त्तते न समुच्चारण इति ॥ २९ ॥ ज० भ०

जल्पित इत्यादि । लङ्का जल्पितादिभिः पूतक्रतोरिन्द्रस्य पुरोऽमरावत्या घोषस्य शब्दस्य अन्ववदिष्टेव सदृशभाषणं कृतवतीव उभयत्रापि जल्पितादिघोषणानां तुल्यत्वात् अनुशब्दः सदृशभाषणद्योतकः तद्गतजनानां भाषणेन तद्भाषणमुत्प्रेक्ष्यते अनोरकर्म्मकादिति मं अनुपूर्व्वादकर्म्मकाद्वदेरुक्तौ व्यक्तवाचामित्यात्मनेपदमिति केचित् तन्मते लङ्काशब्देन लक्षणया लङ्कास्थितजन उच्यते व्यक्तवाचामिति तु वोपदेवेन नाङ्गीकृतं अनोरकर्म्मक इति कातन्त्रसूत्रेऽपि व्यक्त-

ऐद्विप्रवदमानैस्तां संयुक्तां ब्रह्मराक्षसैः ।
तथावगिरमाणैश्च पिशाचैर्मांसशोणितम् ॥ २० ॥
यथास्वं सङ्गिरन्ते स्म गोष्ठीषु स्वामिनो गुणान् ।
पानशौण्डाः पथः क्षीवा इन्दैरुदचरन्त च ॥ २१ ॥
यानैः समचरन्नन्ये कुञ्जराश्वरथादिभिः ।

वाचामित्यस्य सम्बन्धो नाङ्कीकृतः जल्पितं व्यक्तभाषणं उत्कुष्टमाक्रान्तं सङ्गीतं सम्यक् गानं प्रस्तुतं नर्त्तनशब्दः क्षितं हास्यशब्दः वल्गितं मत्तवचनम् ॥२६॥भ०

ऐदित्यादि । तां ब्रह्मराक्षसैः संयुक्तां हनूमानैत् जगाम दृष्टो लङ्कि रूपं विप्रवदमानैः परस्परविरुद्धार्थाभिधायिभिः विप्रलापात्मके व्यक्तवाचां सङ्गारणे विभाषाविप्रलाप इति तङ् तथा पिशाचैर्मांसशोणितमवगिरमाणैः भक्षयद्भिः संयुक्तां गिरतेरभ्यवहारार्थत्वादवाङ् इति तङ् मांसशोणितमिति जातिरप्राणिनामित्येकवद्भावः ॥ २० ॥ ज० म०

ऐदित्यादि । हनुमान् तां लङ्कां ऐत् गतवान् दृष्टोध्यां रूपं कीदृशीं ब्रह्मसदृपैस्तत्सम्बन्धिभिर्वा राक्षसैः संयुक्तां कीदृशैः विप्रवदमानैः सम्भूय विरुद्धप्रलापिभिः एको यादृक् वदति अपरस्तादृक् न वदति वितण्डां कुर्व्वद्भिरित्यर्थः तद्योगे वेति मं तद्योग इति तयोः पूर्व्वोक्तयोः विमतिव्यक्तसङ्गोर्योगे युगपत्प्राप्तौ विमतिरिह विरुद्धप्रलापमात्रं तथा पिशाचैः संयुक्तां कीदृशैर्मांसशोणितञ्चावगिरमाणैर्भक्षयद्भिः अवाङ्गिरतेरिति मं मांसशोणितमिति समाहारद्वन्द्वः पिशितमश्नातीति पिशाचो मनोषादित्वात्लत्वम् ॥ २० ॥ भ०

यथेत्यादि । ब्रह्मराक्षसाः पिशाचाश्च यथास्वमात्मीयस्य स्वामिनो गुणान् गोष्ठीषु गोष्ठीमध्ये सङ्गिरन्ते स्म अभ्युपगतवन्तः समः प्रतिज्ञान इति तङ् पानशौण्डाः पानासक्ताः क्षीवा मत्ताः सन्तः पथो मार्गानुदचरन्त उत्क्रम्य गच्छन्ति स्म उदवरः सकर्मकादिति तङ् इन्दैरिति सम्भूयेत्यर्थः ॥ २१ ॥ ज० म०

यथेत्यादि । ब्रह्मराक्षसाः पिशाचाश्च यथास्वं स्वीयस्य स्वामिनो गुणान् गोष्ठीषु गोष्ठीमध्ये सङ्गिरन्ते स्म अभ्युपगतवन्तः समः प्रतिज्ञायामिति मं पाने शौण्डा आशक्ताः अतएव क्षीवाः मत्ताः सन्तः इन्दैः सम्भूय पथो मार्गान् उदचरन्त उत्क्रम्य जग्मुः उञ्चरः सढादिति मम् ॥ २१ ॥ भ०

यानैरित्यादि । अन्ये यानैः कुञ्जरादिभिः समचरन्त सञ्चरन्ते स्म समस्तृतीयायुक्तादिति तङ् अन्ये वन्दीभिरानीताभिः सम्प्रदाने चतुर्थी अधिष्ठ्यवहारश्चतुर्थी-

संप्रायच्छन्त वन्दीभिरन्ये पुष्पफलं शुभम् ॥ २२ ॥
कोपात्काश्चित्प्रियैः प्रत्तमुपायंसत नासवम् ।
प्रेम जिज्ञासमानाभ्यस्ताभ्योऽयशत कामिनः ॥ २३ ॥

चतुर्थ्यर्थे भवतीति वचनाद्वन्दीभ्य इत्यर्थः पुष्पफलं शोभनं सम्प्रायच्छन्न ददति स्म दानस्य साचेच्चतुर्थ्यर्थ इति तङ् पुष्पफलमिति जातेरेकवद्भावः ॥२२॥ ज० म०

यानैरित्यादि । अन्ये कुब्जारादिभिर्यानैः समचरन्त सञ्चरन्ते स्म समस्त्रेति मं अन्ये शुभं शोभनं पुष्पं फलञ्च वन्दीभिः हठकृतस्तोभिः संप्रायच्छन्त संप्रददुः सन्दानोभेऽधर्म्मे नित्यमिति सम्प्रदाने तृतीया वन्दीभिः सह विहरणेच्छया ताभ्यो ददुरित्यधर्म्मः दानः साचेच्चतुर्थ्यर्थ इति मं सेत्यनेन समस्त्रेत्यस्मात् त्वी आक्रियते ॥२२॥ भ०

कोपादित्यादि । काश्चित् स्त्रियः कोपात् अन्यस्त्रीगमनजनितात् आसवं मद्यविशेषं नोपायंसत न स्वीकृतवत्यः विभाषोपयम इत्यकित्त्वपक्षे रूपं उपाद्यमः स्वीकरण इति तङ् पाणियग्रहणपूर्व्वस्य स्वीकरणस्य तत्र स्थितत्वादौपचारिकमत्र स्वीकरणं द्रष्टव्यं समुदाङ्भ्यो यमो यन्त्र इति वा षष्ठ उदाङ्पूर्व्वस्य यम आदानार्थत्वात् अवसरप्राप्तन्तु सूत्रद्वयसमुदाहृतं स्मात् प्रियैः प्रत्तन्दत्तं अत्र उपसर्गात्तः प्रेम जिज्ञासमानाभ्यः किमस्मासु प्रेमास्ति वा न वेति कृतकोपप्रकाशेन ज्ञातुमिच्छन्तीभ्यः ज्ञाङ्सृदृशंसन इति तङ् ताभ्यो योषिद्भ्यः कामिनः अशपत न मे त्वदन्या प्रियास्तीति तदीयशरीरस्पर्शनेन शपथञ्चक्रुः शपा उपलम्भने इत्यात्मनेपदं वाचा उपलम्भनं शरीरस्पर्शनं श्लाघडित्यादिना सम्प्रदानसंज्ञायां चतुर्थी तासां ज्ञापयितुमिष्यमाणत्वात् ॥ २३ ॥ ज० म०

कोपादित्यादि । काश्चित् स्त्रियः कोपात् सपत्नीसङ्गजनितात् प्रियैः प्रत्तं प्रदत्तमासवं मद्यविशेषं नोपायंसत न स्वीकृतवत्यः उपयमोविवाह इति मं विवाहः स्वीकारः उपाद्यमः स्वीकरणे इति क्रमदीश्वरसूत्रदर्शनात् यमः सूचने वाहूद्वाह इति सेः क्त्वाभावपक्षे मलोपाभावः अत्वाप्युद्वाहः स्वीकारः स्वीकरणे चेति परसूत्रदर्शनात् उपयमो विवाह इत्यत्र विवाहः पाणियग्रहणमेवेति चेत् अनुप्रान्तमिवेत्यादौ अयन्योत्सायम इति फलवत्कर्त्तरि उपाद्यन्तं प्रत्तमिति ग्यचस्त्वेति दाञः क्ते तादेशः अन्यासु प्रियस्य स्नेहोऽस्ति न वेति सन्दिह्य कृतकोपेन प्रेम ज्ञातुमिच्छन्तीभ्यस्ताभ्यः स्त्रीभ्यः कामिनोऽशपत न मेऽन्या प्रियास्तीति ज्ञापनार्थं शपथं चक्रुः शपथार्थीगत्यनुकारेणेति मं

प्रादिदृक्षत नो नृत्यं नाशुश्रूषत गायनान् ।
रामं सुस्रूषमाणोऽसौ कपिर्विरहदुःखितम् ॥ २४ ॥
अनुजिज्ञासते वाथ लङ्कादर्शनमिन्दुना ।
तमोपहविसृक्ताश्चुपूर्व्वस्यां दिश्युदैयत ॥ २५ ॥

मिथ्यानिरासार्थं ज्ञापनमिह शपथः वाचा शरीरस्यर्गनमिति पाणिनीयाः यस्मै दित्सेत्यादिना संप्रदानत्वं स्मृदृशनजुज्ञेति क्त्वो नम् ॥ २३ ॥ भ०

प्रादीत्यादि । असौ कपिर्लङ्कायां नो नृत्यं प्रादिदृक्षत गायनान् गायकान् गन्धर्वान् युद्ध नाशुश्रूषत न श्रोतुमिष्टवान् किमिति रामं विरहदुःखितं सुस्रूषमाणः स्मर्तुमिच्छन् सनन्तेभ्यः पूर्व्वं यदात्मनेपदं अज्ञानगमांसनीति दीर्घत्वं उदोष्ठ्यपूर्व्वस्येत्युत्वं ॥ २४ ॥ ज० म०

प्रादीत्यादि । असौ कपिर्लङ्कायां नृत्यं नटनं न प्रादिदृक्षत न द्रष्टुमिच्छति स्म गायनान् नाशुश्रूषत न श्रोतुमिच्छति स्म तन्नीतश्रवणेन गायनश्रवणमुपचर्य्यते यतोऽसौ विरहेण दुःखितं रामं सुस्रूषमाणः स्मर्तुमिच्छन् सर्व्वत्र स्मृदृशनजुज्ञेत्यादिना सनि मं गुनांनिमीलगुणत्वं दृशः शक्त्रजिति षड्ढढोः कः से स्मृस्मृधात्वोर्धोऽज्झनिङ्गमामिति दीर्घः स्मरतेर्ऋदिरणावुरित्युर् गायतेर्गीणनट्थकाविति नथट् ॥ २४ ॥ भ०

अन्वित्यादि । अथैतस्मिन् प्रस्तावे इन्दुना चन्द्रेण उदैयत उदितं इणो भावे लङि रूपं पूर्व्वस्यां दिशि पूर्णेनेति दर्शयति दृश्यते यत् दर्शनं रूपं लङ्कायारूपमनुजिज्ञासतेव पूर्व्वेण प्राप्तस्यात्मनेपदस्य नानोर्ज्ञ इति प्रतिषेधः तमोपहास्तमो विध्वंसमानाः विसृक्ताः प्रेरिता अंशवो यस्मिन् उदय इति ॥२५॥ ज० म०

अन्वित्यादि । अथानन्तरमिन्दुना पूर्व्वस्यां दिशि उदैयत उदितं इणो भावे घौ पूर्व्वस्यां दिशीत्युपादानेन इन्दोः पूर्णत्वं सूचितं कलापन्नः रचितो वा किङ्कुर्व्वता लङ्कायां यद्दर्शनं हनूमतेत्यर्थात् तदनुज्ञातमनुमन्तुमिच्छतेव चन्द्रोदये सत्येव हनूमता लङ्का द्रष्टव्येति तत्र तदनुमतिरुत्प्रेक्ष्यते अन्ये तु दृश्यत इति दर्शनं रूपं लङ्कायारूपं ज्ञातुमिच्छतेवेत्याह स्मृदृशनजुज्ञेत्यत्र अनुवर्त्तनान्न मं तमोपहा अन्धकारविध्वंसका विसृक्ताः प्रेरिता अंशवो यत्नेत्युदयक्रियाविशेषणं यद्यपि परमते क्त्वान्तस्य पूर्व्वनिपातो दृश्यते तथापि विसृक्तशब्दस्यात्र न पूर्व्वनिपातो गमकत्वात् अतएव दैक्यं सोऽन्वये सतीत्युक्तं केचित्तु हन्नेर्भावे क्विप् तमोपहननाय विसृक्ता अंशवो यत्नेत्याहुः ॥ २५ ॥ भ०

आघ्रुघ्रूषन् स मैथिल्या वार्त्तां हर्म्येषु रक्षसाम् ।
ग्रीयमानान्धकारेषु समचारीदशङ्कितः ॥ २६ ॥
शतसाहस्रमारक्षं मध्यगं रक्षसां कपिः ।
ददर्श यं कृतान्तोऽपि व्रियेतासाद्य भीषणम् ॥ २७ ॥
अध्यासिसिषमाणोऽथ वियन्मध्यं निशाकरे ।
कासाञ्चक्रे पुरी सौधैरतीवोल्लासिभिः सितैः ॥ २८ ॥

आघ्रित्यादि । स कपिर्मैथिल्याः सीतायाः वार्त्तामाघ्रुघ्रूषन् श्रोतुमिच्छन् प्रत्याङ्भ्यां घ्रुव इत्यात्मनेपदप्रतिषेधः रक्षसां हर्म्येषु गृहेषु समचारीत् संक्रान्तवान् अतोलान्सेति दृङ्निः ग्रीयमानान्धकारेषु अपगच्छत्तमस्सु शङ्क्लथातने शदेःशित इति तङ् पात्रेति ग्रीयादेशः अशङ्कितः शङ्कारहितः ॥ २६ ॥ ज० म०

आघ्रित्यादि । हनूमान् मैथिल्या वार्त्तामाघ्रुघ्रूषन् श्रोतुमिच्छन् रक्षसां हर्म्येषु सौधगृहेषु समचारीत् संचरित स्म लृतीयायोगाभावात् क्रमस्येति न मं व्रजवदेति त्रिः स्मृदृशनजुत्रेत्यादावङ् वर्ज्जनान्न मं कीदृशेषु ग्रीयमाना अपगच्छन्तोऽन्धकारा येभ्यः शदोऽपि मभिति मं अशङ्कितः निर्भयः कर्त्तरि क्तः अकर्म्मकत्वात् भावे क्तो वा शङ्काजाताऽस्येति इतोऽस्य जात इति इतो वा ॥ २६ ॥ भ०

शतेत्यादि । मध्यं मध्यप्रकोष्ठगतं आरक्षं गोपकं शतसाहस्रं रक्षसां लक्षमात्रं ददर्श विलोकितवान् शतसहस्रं परिमाणमस्येति प्राग्वतेः संख्यापूर्व्वपदानां तदन्तग्रहणमनुकीति वचनात् शतमानविंशतिकेत्यादिना अणि संख्यायाः संवत्सरेत्युत्तरपदवृद्धिः भीषणं भयानकं आसाद्य प्राप्य कृतान्तोऽपि यमोऽपि व्रियेत प्राणान् सन्त्यजेत् व्रियतेर्लुङ्लिङोश्चेति तङ् तत्र हि शित इत्यनुवर्त्तते ॥ २७ ॥ ज० म०

शतेत्यादि । कपिर्मध्यमं मध्यकोष्ठगतं रक्षसामारक्षं ददर्श शतसाहस्रं शतसहस्रं परिमाणमस्येति विंशतिसंख्येत्यादिना तदस्य परिमाणमित्यर्थे ष्णः सुपञ्चालादित्याद्युत्तरपदे वृद्धिः यं भीषणं भयङ्करं आसाद्य प्राप्य कृतान्तोऽपि व्रियेत प्राणान् त्यजति किमुतान्यः विधिनिमन्त्रणेत्यादिना सम्भावनायां खौ स्मृदृशीत्येमभिति मम् ॥ २७ ॥ भ०

अध्येत्यादि । अथ निशाकरे चन्द्रमसि वियन्मध्ये अध्यासितुमारोढु-

इन्दुश्चषकसंक्रान्तमुपायुङ्क्त यथाऽमृतम् ।
प्रयुञ्जानः प्रियावाचः समाजानुरतो जनः ॥ ३९ ॥
संक्षणुवान इवोत्कण्ठामुपाभुङ्क्त सुरामलम् ।
ज्योत्स्नायां विगलन्मानस्तरुणो रत्नसां गणः ॥ ४० ॥

भिच्छति इति पूर्ववत्सन इत्यात्मनेपदं आस्तेरनुदात्तेत्त्वमात्मनेपदनिमित्तं तेनैव सनन्तादपि भवति अत्र सनि इटि कृते अजादेर्द्वितीयस्येति द्विर्वचनं पुरी लङ्का कासाञ्चक्रे शोभते स्म सौधैः सौधानां ज्योत्स्नया चोल्लासमानत्वात् आत्मत्ययवदिति तङ् ॥ ३८ ॥ ज० म०

अथेत्यादि । अथानन्तरं निशाकरे चन्द्रे आकाशस्य मध्यमध्यासितमारोढुमिच्छति सति पुरी लङ्का सौधैर्गृहविशेषैः कासाञ्चक्रे शुशुभे कासृङ्क्लेशब्द इत्यस्यानेकार्थत्वात् दीप्त्यर्थता कासृङ्दीप्तौ दन्त्यान्तोऽस्तीति विद्यासागरः केचित्तु काशाञ्चक्र इति तालव्यशकारवान् पाठः काशृङ्दीप्तावित्यस्य रूपं वदन्ति ॥ ३८ ॥ भ०

इन्दुमित्यादि । एवं शोभितायां लङ्कायां समाजानुरतः पानगोष्ठीरतो जनः चषकसंक्रान्तं मद्यभाजने प्रतिविम्बेन संक्रान्तमिन्दुमुपायुङ्क्त उपभुक्तवान् प्रतिविम्बावच्छिन्नस्य मद्यस्योपलक्ष्यमाणत्वादेवमुक्तं यथाऽमृतं अमृतमिव प्रिया अनुकूला वाचः प्रयुञ्जानः अभिदधानः प्रीयाभ्यामिति तङ् ॥ ३९ ॥ ज० म०

इन्दुमित्यादि । एवं शोभितायां लङ्कायां समाजानुरतः पानगोष्ठीरतो जनश्चषकसंक्रान्तं मद्यपात्रे प्रतिविम्बेन सङ्क्रान्तं चन्द्रमुपायुङ्क्त दर्शनादिक्रियाव्याप्यं चकार चन्द्रस्योपयोगो दर्शनादिरूप एव जयमङ्गलायान्तु चन्द्रमुपायुङ्क्त बभुजे चन्द्रशब्देन तत्प्रतिविम्बावच्छिन्नमद्यभागस्य लक्षितत्वात् यथाऽमृतमिवेत्युक्तं किं कुर्वन् यथाऽमृतं तद्वत् प्रिया वाचः प्रयुञ्जानः प्रीयतामित्याद्यनुकूलवाचोऽभिदधानः युजिर उक्षश्च इति मं महाकाव्योचितं मधुपानवर्णनमिदम् ॥ ३९ ॥ भ०

संक्षणुवान इत्यादि । रत्नसां तरुणो गणः उत्कण्ठां प्रियासु संस्मरणं संक्षणुवान इव समुत्तेजयन्निव समःक्षणुव इति तङ् ज्योत्स्नायां सुरां अलमत्यर्थं प्रसुपाभुङ्क्त अभ्याहृतवान् भुजोनवन इति तङ् विगलन्मानः ॥ ४० ॥ ज० म०

संक्षणुवान इत्यादि । तरुणो युवा रत्नसां गण उत्कण्ठां प्रियाभिलाषं संक्षणुवान इव समुत्तेजयन्निव ज्योत्स्नायां सुरां मदिरां अलमत्यर्थं उपाभुङ्क्त

मध्वपाययत स्वच्छं सोत्पलं दयितान्तिके ।
आत्मानं सुरताभोगविश्रम्भोत्पादनं सुचः ॥ ४१ ॥
अभीषयन्त ये शक्रं राक्षसा रणपण्डिताः ।
अविस्मापयमानस्तान् कपिराटीङ्ढाङ्ढृहम् ॥ ४२ ॥

भक्षितवान् सुरापानादेव विगलन्मानः अपगतमानः सञ्ज्ञोः भुजोऽशने इति मं उत्कण्ठोत्काऽनवाप्तौ योऽभिलाषस्तद्वाप्तये इति ॥ ४० ॥ भ०

मध्वित्यादि । कीदृशं मधु स्वच्छत्वात् सोत्पलतया सुरभित्वात् शोभनं जातं यतः स्वयमात्मानं सुरूरपाययत पायितवत् णेरणाविति तङ् दयितान्तिके दयितस्य समीपे सुरताभोगः सुरतविमर्दः तत्र विश्रम्भः तस्यौत्पादनं जनकं उत्पादयतीति कृत्यल्युटो बहुलमिति कर्त्तरि ल्युट् ॥ ४१ ॥ ज० भ०

मध्वित्यादि । रक्षसां गणो दयितान्तिके रमणीसमीपे आत्मानं मधु सुरूर्वारं वारं अपाययत जिनुजाग्लपिवेति मं यद्वा मध्वेव कर्मभूतमात्मानं अपाययत् निस्नुहमपि रक्षोगणं सुरापानमकारयत् मधुगुणादेव पानात् ओर्द ऽऔधे इति मं अऔ मधुनः कर्मत्वात् मधु कीदृशं स्वच्छं निर्मलं सोत्पलं प्रियाकर्णोत्पलप्रतिबिम्बत्वात् सौरभाय प्रक्षिप्तोत्पलं वा सुरताभोगे सुरतविमर्दे विश्रम्भस्य विश्वासस्य उत्पादनं जनकं कर्मण्यौति कर्त्तरि अनट् भावे ऽनटि रूपकालङ्कारो वा नन्द्यादित्वाल्लाऽनः उत्पादनञ्चमभिति पाठस्तु सुगमएव ॥ ४१ ॥ भ०

अभीत्यादि । एवं रक्षःसु यथार्थं चेष्टमानेषु ये राक्षसा रणपण्डिताः संग्रामविज्ञाः शक्रमभीषयन्त भीतिमयोर्हेतुभय इति तङ् भियो हेतुभये षुक् भयग्रहणमुपलक्षणं तेन त्रयतेरपि भवति तानसौ कपिरविस्मापयमानः विस्मयमकारयन् नित्यं स्मयतेरित्यात्वं ग्टहाद्ग्टहमाटीत् गतवान् लुङि रूपम् ॥ ४२ ॥ ज० भ०

अभीषयन्त्येत्यादि । रणे पण्डिताः कुशला ये राक्षसाः शत्रुन् अभीषयन्त त्रासितवन्तः तान् अविस्मापयमानः विस्मितान् कारयन् मधुपानाद्यासक्ततया तैरविज्ञात इति भावः असौ कपिर्ग्टहात् एकस्मात् ग्टहमपरमाटीत् जगाम भीर्भीष्वेति औ मं भीयादेशश्च अत्र धात्वर्थे इत्यनुवर्त्तते अत्र ध्वर्थौभयं तत्तु राक्षसकर्तृत एव क्षिङः क्षिभ्योर्धात्वर्थे मङ्क्षेति औ इकारस्यात्वं मङ्क्ष अटेत्यां शिः ॥ ४२ ॥ भ०

सीतां दिदृक्षुः प्रच्छन्नः सोऽगर्ह्यत राक्षसान् ।
अवञ्चयत मायाश्च स्वमायाभिर्नरद्विषाम् ॥ ४३ ॥
अपलापयमानस्य शत्रूंस्तस्याध्यवस्यतिः ।
मिथ्या कारयेते चारैर्घोषणां राक्षसाधिपः ॥ ४४ ॥
गूहमानः स्वमाहात्म्यमटित्वा मन्त्रिसंसदः ।
न्यग्भ्योऽपवादमानस्य रावणस्य गृहं ययौ ॥ ४५ ॥

सीतामित्यादि । स कपिः सीतां दिदृक्षुः सीतान्द्रष्टुमिच्छुः प्रच्छन्नः राक्षसानगर्ह्यत व्यामोहयत् स्वमायाभिश्च नरद्विषां मायाश्च अवञ्चयत अतिसंहृतवान् गृधिवञ्चोः प्रलम्भन इति तङ् ॥ ४३ ॥ ज० म०

सीतामित्यादि । सीतां दिदृक्षुर्द्रष्टुमिच्छुः प्रच्छन्नो गुप्तः स कपिः राक्षसान् अगर्ह्यत व्यामोहयत् स्वमायाभिर्नरद्विषां राक्षसानां मायाश्च अवञ्चयत इत्था चकार प्रतारेर्वञ्चिगर्ह्यैरिति मं प्रतारो विसम्वादनं मिथ्याख्यानमिति केचित् ॥ ४३ ॥ भ०

अपेत्यादि । तस्य कपेः शत्रून् राक्षसान् अपलापयमानस्य न्यक्कुर्वतः विभाषा लीयतेरित्यात्वे लियः सम्मानेत्यादिना श्यालिनीकरणे न्यग्भावने आत्मनेपदं मतिरभवत् कीदृशीत्याह मिथ्याकारयत इति अयं आत्मसाधिपतिस्तारैर्दण्डवाहकैः यां घोषणां पुनः पुनः कारयति जाग्रत जाग्रतेति तां मिथ्या कारयते येनाहमविज्ञात एव प्रविष्टः मिथ्योपपदात् कृञोऽभ्यास इति तङ् अभ्यासश्च पुनः पुनः करणम् ॥ ४४ ॥ ज० म०

अपेत्यादि । शत्रून् राक्षसान् अपलापयमानस्य वञ्चयमानस्य तस्य कपेरित्थं मतिरभवत् मिथ्योरिति लियोऽङ्गपूजाभिभवे च लामेरिति चकारात् प्रतारे मं कीदृशी मतिरित्याह राक्षसाधिपो रावणस्तारैर्घोषणां मिथ्या कारयते जाग्रत जाग्रतेत्युच्चैर्घुष्टं मिथ्यैव चारैः कारयति तां कर्तुं चरान् पुनः पुनः प्रयुङ्क्ते निष्फलमेव येनाहमविज्ञात एव भ्रमामि मिथ्याकारेरभ्यास इति मं अभ्यासः पौनःपुन्यं चर एव चारः स्वार्थे ण्यः ॥ ४४ ॥ भ०

गूहेत्यादि । स्वमाहात्म्यं स्वपराक्रमं गूहमानः आदृश्यन् अदृश्यायागोह इत्यूहं स्वरितञित इति तङ् अटित्वा मन्त्रिसंसदः शुकसारणादिगृहाणि गत्वा रावणस्य गृहं ययौ कीदृशस्य न्यग्भ्योऽपवादमानस्य कुप्यतः असूयतो वा अपाद्दद इति तङ् न्यग्भ्य इति कुधदुहेर्ष्येति सम्प्रदानसंज्ञायां चतुर्थी ॥ ४५ ॥ ज० म०

दिशो द्योतयमानाभिर्दिव्यनारीभिराकुलम् ।
श्रियमायच्छमानाभिरुत्तमाभिरनुत्तमाम् ॥ ४६ ॥
नित्यमुद्यच्छमानाभिः स्मरसम्भोगकर्म्मसु ।
जानानाभिरलं लीलाकिलकिञ्चितविभ्रमान् ॥ ४७ ॥
स्वं कर्म्म कारयन्नास्ते निश्चिन्तो या भयध्वजः ।

गूहेत्यादि । असौ स्वमाहात्म्यं स्वपराक्रमं गूहमानः संवरणम् मन्त्रिणां संसदो गृहाणि अटित्वा गत्वा रावणस्य गृहं ययौ क्रीडयस्य गृभ्योऽपवादमानस्य असूयतः जिनुजान्तेत्यादिना अपवादेर्भं यञ्चादित्वेत्यादिना असूयार्थे न सम्प्रदानत्वं गुहश्च संवृतौ उभयपदी गुर्घृङ इति गुणः गुहोर्णोर्हरित्योकारस्य ऋत्वम् ॥ ४५ ॥ भ०

क्रीडयं गृहमित्याह ।

दिश इत्यादि । दिशः द्योतयमानाभिः भासयमानाभिः णिचश्चेति तङ् दिव्यनारीभिः उत्तमाभिः प्रधाननायिकाभिराकुलं व्याप्तं श्रियमनुत्तमामतिशयवतीं आयच्छमानाभिः स्वीकुर्व्वाणाभिः सदृदाङ्भ्य इति तङ् ॥ ४६ ॥ ज० भ०

दिश इत्यादि । क्रीडयं गृहं ययौ दिव्यनारीभिर्दिवि भवाभिः स्त्रीभिराकुलं व्याप्तं क्रीडयीभिः दिशो द्योतयमानाभिः भासयमानाभिः जिनुजान्तेत्यादिना आङ्पूर्व्वयमो मं न विद्यते उत्तमं यस्या इति विपक्षः उत्तमेऽनुत्तमं विद्यादिति द्विरूपकोषः ॥ ४६ ॥ भ०

नित्यमित्यादि । स्मरसम्भोगकर्म्मसु कामोपभोगक्रियासु नित्यमुद्यच्छमानाभिः पूर्व्ववत्तङ् लीलाः स्त्रीणां गृङ्गारचेष्टाविशेषाः तथाचोक्तं लीलाः सलीलाः किलकिञ्चितानि विच्छोकमाध्यायितविभ्रमाणि । विच्छित्तिमाकुट्टमितेञ्जितानि योज्यानि तज्ज्ञैः सुकुमारबन्धैरिति लक्षणज्ञैषां गृत्यशास्त्रे ॥ ४७ ॥ ज० भ०

नित्यमित्यादि । क्रीडयीभिः सुरतसम्भोगकर्म्मसु कामोपभोगक्रियासु नित्यमुद्यच्छमानाभिः उद्यमं कुर्व्वतीभिः जिनुजान्तेत्यादिना उत्पूर्व्वयमो मं लीलाकिलकिञ्चितविभ्रमान् गृङ्गारचेष्टाविशेषान् अलमत्यर्थं जानानाभिः पूर्व्ववत् अभिज्ञो मं प्रियानुकरणे लीलावेशभावाविचेष्टितैः क्रोधाश्रुहर्षभीत्यादेः सङ्करः किलकिञ्चितं विभ्रमस्त्वरया काले भूषास्थानविपर्य्ययः क्रैडयीभिर्दिव्यनारीभिराकुलं गृहं ययाविति सम्बन्धः ॥ ४७ ॥ भ०

स्वार्थं कारयमाणाभि र्यूनो मद्विमोहितान् ॥ ४८ ॥
कान्तिं स्वां वहमानाभिर्यजन्तीभिः स्वविग्रहान् ।
नेत्रैरिव पिबन्तीभिः पश्यतां चित्तसंहतीः ॥ ४९ ॥

स्वइत्यादि । स्वमात्मीयं मोहनादिकर्म्म दिव्यनारीः कारयन् अनुष्ठापयन् एष ऋषध्वजः कामदेवः निश्चिन्त आस्ते ताभिराकुलमिति योज्यं कृक्रोरन्यतरस्यामिति द्विकर्म्मकता यूनः स्वार्थं स्वप्रयोजनं मैथुनाख्यङ्कारयमाणाभिः आकुलं तान् हनूमानिति वक्ष्यमाणेन सम्बन्धः कीदृशान् मद्विमोहितान् मधुपानमदपरवशान् ताभिः ॥ ४८ ॥ ज० म०

स्वमित्यादि । या दिव्यनारीः स्वं कर्म्म मोहनादि कारयन् ऋषध्वजः कामो निश्चिन्तो निराकुलः सन्नास्ते यासां काम यूवास्ति न चिन्ता तद्विरोधिनी ताभिराकुलं गृहं ययौ घोऽजौजेरित्यादिना प्रयोज्यस्य कर्म्मत्वं मदेन विमोहितान् यूनस्तरुणात् स्वार्थं स्वप्रयोजनं कारयमाणाभिः आत्मस्वोभयपदित्वात् शतृशानौ दर्शितौ ॥ ४८ ॥ भ०

कीदृशीभिरित्याह ।

कान्तिमित्यादि । स्वां कान्तिं श्रीभां वहमानाभिः यजन्तीभिः स्वविग्रहान् ददतीभिः कामिभ्यः तत्र स्वं कर्म्मेति णिचश्चेत्यस्य विषयः कान्तिं स्वां स्वविग्रहानिति स्वरितेत इत्यस्य विषयः विभाषोपपदेन प्रतीयमान इति विभाषा आत्मनेपदं इत्यात्मनेपदाधिकारः शेषभूतत्वात्परस्मैपदविधानमाह नेत्रैरिति पश्यतां चित्तसंहतीः चित्तसन्दोहान् पिबन्तीभिरिव गृह्णन्तीभिरिव शेषात्कर्त्तरि परस्मैपदम् ॥ ४९ ॥ ज० म०

कान्तिमित्यादि । स्वां कान्तिं वहमानाभिः धारयन्तीभिः वहौऽप्रापणे जिनुऽअप्रीणनेति फलवत्कर्त्तरि मं मन्मथेनार्पिता छाया शैव कान्तिरिति स्मृता । स्वविग्रहान् स्वदेहान् यजन्तीभिः कामिभ्यो ददतीभिः यजोर्देवाद्यर्थादानसङ्गतिकरणेषु जिनुऽअप्रीणनेत्यादौ जिद्वातोः फलवत्कर्त्तर्यात्मनेपदस्यानित्यत्वं नित्यत्वे हि नवशःपमे इत्यनेन जिद्वातोरुभयपदकथनमनर्थकं स्यात् फलवत्कर्तृनियमितात्मनेपदादन्यत्र परस्मैपदस्य गम्यमानत्वात् ढौढ्रमभिति नियमादन्यत्र किं परस्मैपदं न गम्यते तेनात्र यजेः फलवत्कर्त्र्यपि परस्मैपदं फलवत्कर्त्तरि आत्मनेपदमेव अन्यत्रोभयपदमिति नवशःपमेजित इत्यस्य साफल्यमिति चेत् क्वचिदपवादविषयेऽभ्युत्सर्गोऽभिनिविशत इति न्यायात् नवशःपमेजित इत्यनेनोभयपदित्वं विद्यमानस्य फलवत्त्वाविवक्षायां पदं संस्कृत्य पश्चात्

ता हनूमान् पराकुर्व्वन्नगमत् पुष्पकं प्रति ।
विमानं मन्दरस्याद्रेरनुकुर्व्वदिव श्रियम् ॥ ५० ॥
तस्मिन् कैलाससङ्काशं शिरःशृङ्गं भुजद्रुमम् ।
अभिक्षिपन्तमैक्षिष्ट रावणं पर्व्वतश्रियम् ॥ ५१ ॥
प्रवल्गन्तं सदामोदं सुप्तं परिजनान्वितम् ।

स्वशब्दादिसम्बन्धात् वाक्ये क्रियाफलस्य कर्त्रन्वयो गम्यत इत्याह अपरे तु कर्त्रभिप्रायेऽपि क्रियाफले विभाषोपपदेन प्रतीयमानइति सूत्रेण पक्षे आत्मनेपदाभावमाहुः । इत्यात्मनेपदाधिकारः अथ परस्मैपदमुच्यते । पश्यतां जनानां चित्तसमूहान् नेत्रैरिव पिबन्तीभिः स्त्रीभिराकुलं गृहं ययाविति श्रयः पापाने नवयः पमे इति पं यहः ॥ ४९ ॥ भ०

ता इत्यादि । ता दिव्यनारीः पराकुर्व्वन्नपक्षिपन् अगमत् पुष्पकं प्रति पुष्पकविमानं प्रति येन पुष्पकविमानेन जगाम कीदृशं मन्दरस्याद्रेः श्रियमनुकुर्व्वदिव अनुपराभ्यां कृञः कर्त्रभिप्राये चात्मनेपदस्य प्राप्तत्वात् ॥ ५० ॥ ज०म०

ता इत्यादि । हनूमान् ता दिव्यनारीः पराकुर्व्वन् विक्षिपन् पुष्पकनामानं विमानं प्रति लक्षीकृत्य अगमत् कीदृशं मन्दरनाम्नोऽद्रेः श्रियमनुकुर्व्वदिव स्वश्रिया सदृशीकुर्व्वदिव कृञोऽभिप्रायादुभयपदप्राप्ते चेपं परेति पं ता इत्यत्र तान् इति पठित्वा यान् यूनः स्वार्थं कारयमाणाभिराकुलं गृहं ययौ तान् पराकुर्व्वन्निति तृतीयश्लोकेनान्वयो जयमङ्गलायाहङ्कः व्योमयानं विमानोऽस्त्रीत्यमरः ॥ ५० ॥ भ०

तस्मिन्नित्यादि । तस्मिन् विमाने रावणमैक्षिष्ट कैलाससङ्काशं कैलासतुल्यं शिरःशृङ्गं शिरांसि शृङ्गाणीव यस्य भुजद्रुमं भुजा द्रुमा इव यस्य तं पर्व्वतस्य श्रियोऽभिक्षिपन्तं अभिभवन्तं अभिप्रत्यतिभ्यःक्षिप इति परस्मैपदं तस्य स्वरितेत्त्वात् कर्त्रभिप्राय आत्मनेपदं प्राप्तं ॥ ५१ ॥ ज०म०

तस्मिन्नित्यादि । हनूमान् तस्मिन् विमाने रावणमैक्षिष्ट दृष्टवान् कीदृशं कैलाससङ्काशं कैलाससदृशं तुल्यतां दर्शयति शिरांसि शृङ्गाणीव यस्य भुजाश्च द्रुमा इव यस्य तादृशं अन्येषां पर्व्वतानां श्रियं अभिक्षिपन्तं अभिभवन्तं चेपमिक्षारौ प्रत्यभ्यतिक्षिपेति पं कैलासेति केलिःप्रयोजनमस्येति विकारसंज्ञेत्यादिना णेः कैलः आस्तेऽस्मिन्नित्यासः पश्चात् कर्म्मधारयः केलीनां समूहः कैलं पूर्ववत्तस्य तस्मात्र इति वा ॥ ५१ ॥ भ०

मधोने परिरभ्यन्तमारमन्तं परं स्मरे ॥ ५२ ॥
व्यरमत् प्रधनाद्यस्मात् परित्रस्तः सहस्रदृक् ।
क्षणं पर्य्यरमत्तस्य दर्शनात् मारुतात्मजः ॥ ५३ ॥
उपारंसीच्च संपश्यन् वानरस्तं चिकीर्षितात् ।
रम्यं मेरुमिवाधूतकाननं प्रबलोर्म्मिभिः ॥ ५४ ॥

प्रवल्गादि । सदामोदं कस्तूरिकादिपरिमलं प्रवहन्तं प्राहृह इति परस्मैपदं स्वरितेत्त्वात् सुप्तं शयने संविष्टं परिजनान्वितं पारिपार्श्विकाधिष्ठितं मघोने इन्द्राय परिरभ्यन्तं अस्रूयन्तं परेर्भ इति परस्मैपदं स्मेः स्वरितेत्त्वात् क्रुधद्रुहेति सम्प्रदानसंज्ञायां चतुर्थी स्मरे कामे परमत्यर्थं आरमन्तं सक्तिं कुर्व्वाणं व्याङ्परिभ्योरम इति परस्मैपदं रमेरनुदात्तेत्त्वात् ॥ ५२ ॥ ज० म०

प्रवहन्तमित्यादि । कीदृशं रावणं सन्तसुत्कटं आमोदं कस्तूरिकादिपरिमलं सदा सर्व्वदा वा आमोदं प्रवहन्तं वेपमित्यादौ प्रवहेति पं सुप्तं शयानं परिजनैः पारिपार्श्विकैरन्वितं मघोने इन्द्राय परिरभ्यन्तं अस्रूयन्तं वेपमित्यादौ प्ररिरभेति पं यस्मै दित्सेत्यादिना संप्रदानत्वं स्मरे कामे परमत्यर्थं आरमन्तं क्रीडन्तं वेपमित्यादौ व्यापपरिरम इति पं ॥ ५२ ॥ भ०

व्यरेचादि । यस्माद्रावणात्सहस्रदृगिन्द्रः परित्रस्तः भीतार्थानामित्यपादाने पञ्चमी प्रधनात् युद्धात् व्यरमत् उपरतव्यापारोऽभूत् व्याङ्परिभ्योरम इति परस्मैपदं जुगुप्साविरामप्रमादार्थानामपादाने पञ्चमी तस्य दर्शनान्मारुतात्मजः हनूमान् क्षणं पर्य्यरमत् तुष्टिमानभवदित्यर्थः साधु रावणेति पूर्व्ववल्लुङः परस्मैपदम् ॥ ५३ ॥ ज०म०

व्यरमदित्यादि । सहस्रदृगिन्द्रो यस्मात् रावणात् परित्रस्तो भीतः सन् प्रधनात् युद्धात् व्यरमत् उपरतोऽभूत् यतोऽपायेत्यादिना भीतिरामयोरपादानं पूर्व्ववत् सहस्रदृगिति पदोपन्यासो युक्तः परित्रस्तस्य सर्व्वस्य प्रेरितनेतृत्वात् तस्य दर्शनात् मारुतात्मजो हनूमान् क्षणं पर्य्यरमत् तुष्टोऽभवत् पूर्व्ववत्पम् ॥ ५३ ॥ भ०

उपेत्यादि । तं रावणं पश्यन् वानरः चिकीर्षितात्कर्तुमिष्टात् सीतान्वेषणाद्व्यरंसीत् निवृत्तः उपाङ्नेर्धिक्रत्य विभाषाकर्म्मकादिति लुङः परस्मैपदं तस्य मेरोरिव रम्यत्वात् यदाह मेरुमिव प्रबलोर्म्मिभिः वातसमूहैः आधूतकाननं प्रचलितवनं मेरुं तथा प्रचलितकल्लोलैः आधूतानि शिरांस्यानयनानि च यस्येति ॥ ५४ ॥ ज० म०

दृष्ट्वा दयितया साकं रहीभूतं दशाननम्।
नात्र सीतेत्युपारंस्त दुर्मना वायुसम्भवः॥ ५५॥
ततः प्राकारमारोहत् क्षपाटानविबोधयन्।
नायोधयत् समर्थोऽपि सीतादर्शनलालसः॥ ५६॥
अध्यासीद्राघवस्याहं नाशयेयं कथं शुचः।

उपेत्यादि। वानरस्तं रावणं संपश्यन् चिकीर्षितात् कर्तुमिष्टात् सीताम्बेषणादपि उपारंसीत् निवृत्तः बेपमित्यादौ वाहूपरम इति पत्ते पं यमरमेति इमशनो मेरुवत् रम्यं श्वसनोर्म्मिभिर्निश्वासवेगैराधूतानि ईषत्कम्पितानि काननानि वृक्षाणि येन कानि शिरांसि आननानि च यस्येति वा मेरुपक्षे श्वसनोर्म्मिभि व्यायुवेगैरधूतानि काननानि वनानि यत्र उस्मिन्नरङ्के पीडायां वेगे सङ्गप्रकाशयोः। काननं विपिने गेहे परमेष्टिद्रुखेऽपि चेति विश्वः कं शिरोऽम्बुनोरित्यमरः॥ ५४॥ भ०

दृष्ट्वेत्यादि। रहीभूतं विजनस्थं दशाननं अकर्मनश्चत्रुरित्यादिना न्यौ सलोपः दयितया साकं दृष्ट्वा नात्र सीतेति ज्ञात्वा उपारंस्त विमना निवर्त्तते स्म विभाषाकथमकादिति तङ् वायुसम्भवो हनूमान्॥ ५५॥ ज०म०

दृष्ट्वेत्यादि। दयितया साकं सह रहीभूतं विजनदेशस्थं दशाननं दृष्ट्वा अत्र सीता नास्तीति ज्ञात्वा दुर्मना दुःखितचित्तो वायुसम्भवो हनूमान् उपारंस्त निवर्त्तते स्म तस्माद्देशादित्यर्थात् पूर्ववत् पत्ते मं अरहसि रहसि भवन्नमिति मनश्चत्रुरित्यादिना सलोपः॥ ५५॥ भ०

तत इत्यादि। तत उत्तरकालं प्राकारमारोहत् आरूढवान् क्षपाटान् राक्षसान् अविबोधयन् अचेतयत् णिचश्चेत्यात्मनेपदे प्राप्ते बुधयुधेत्यादिना वा लटः परस्मैपदं दुधेरणौ सकर्मकस्य चित्तवत्कर्तृकत्वात् हनूमतश्चित्तवत्त्वात् तत्र ह्यकर्मका ये तेषामन्वितवत्कर्तृत्वाश्रयेणोपादानमित्युक्तं तान्नायोधयत् समर्थोऽपि न संग्रामितवान् यतः सीतादर्शनलम्पटः अणावकर्मकादित्यनेन उभयत्रापि रुढः परस्मैपदं दुधेरेकस्याचित्तवत् कर्तृकत्वात्॥ ५६॥ ज० म०

तत इत्यादि। ततोऽनन्तरं हनूमान् प्राकारमारोहत् आरूढवान् किङ्कुर्व्वन् क्षपाटान् राक्षसान् अविबोधयन् अचेतयन् समर्थोऽप्यसौ तान् नायोधयत् सीतायाः दर्शने लालसो महाभिलाषोऽस्य अत्रात्मनेपदे प्राप्ते कर्म्मार्थेऽन्यादिना परम्॥ ५६॥ भ०

वैदेह्या जनयेयं वा कथमानन्दमुत्तमम् ॥ ५७ ॥
दृष्ट्वा राघवकान्तां तां द्रावयिष्यामि राक्षसान् ।
तस्याहि दर्शनात् पूर्व्वं विक्रमः कार्य्यनाशकृत् ॥ ५८ ॥
चिन्तयन्नित्यमुक्तुङ्गैः प्रावयन्तीं दिवं वनैः ।
अशोकवनिकामाराद्दृष्टवान् स्तवकाचिताम् ॥ ५९ ॥

अध्येत्यादि । राघवस्याहं कथं केन प्रकारेण शुचं शोकं नाशयेयं कथं वा वैदेह्याः सीताया आनन्दं जनयेयमिति हनूमानध्यासीत् चिन्तितवान् ध्यै चिन्तायामित्यस्य लुङि रूपं नशिजन्योरकर्मकत्वात् अणावित्यनेन लिङः परस्मैपदं नञ्धेत्यादिना जनिजृधित्यादिना जनेर्मित्त्वज्ञायां ह्रस्वत्वं ॥ ५७ ॥ ज० म०

अध्येत्यादि । अहं राघवस्य शुचः शोकान् केन प्रकारेण नाशयेयं कथं वा वैदेह्याः सीताया उत्तममानन्दं जनयेयं इति हनूमान् अध्यासीत् चिन्तितवान् ध्यै चिन्तायां एचोऽयिया यमरमेति इमसनौ आत्मनश्जनाभ्यां कम्यास्यार्थ इत्यादिना यं जनेर्घटादिजनीति ह्रस्वः ॥ ५७ ॥ भ०

दृष्ट्वेत्यादि । इयमसाविति राघवस्य कान्तां दृष्ट्वा द्रावयिष्यामि राक्षसान् पलाययिष्यामि अत्र अणावित्यनेन नञ्धेत्यादिना तस्याकर्मकस्य चित्तवत्कर्तृकत्वात् हि यस्मात् तस्याः सीताया दर्शनात्पूर्व्वं विक्रमः कार्यस्य सीतादर्शनरूपस्य नाशकृत् ॥ ५८ ॥ ज०म०

दृष्ट्वेत्यादि । तां राघवस्य कान्तां सीतां दृष्ट्वा अहं राक्षसान् द्रावयिष्यामि पलायनपरान् करिष्यामीति पूर्व्ववत्यं हि यस्मात् तस्य राघवस्य कान्तायाः दर्शनात् पूर्व्वकालं विक्रमः कार्यस्य सीतादर्शनस्य नाशमभावं करिष्यति इत्यं चिन्तयन्निति वक्ष्यमाणश्लोकेनान्वयः ॥ ५८ ॥ भ०

चिन्तेत्यादि । इत्यं पूर्व्वोक्तप्रकारेण चिन्तयन्नारात्समीपे अशोकवनिकामदृक्षत् उत्तुङ्गैरुच्चैर्वनैर्दिवमाकाशं प्रावयन्तीं व्याप्नुवतीं बुधयुधेत्यादिना तिङ् प्रकृतेरकर्मकत्वात्सत्वाच्चितत्वात् स्तवकाचितां अशोकपल्लवकैः व्याप्ताम् ॥ ५९ ॥ ज०म०

चिन्तेत्यादि । इत्यं पूर्व्वोक्तप्रकारेण चिन्तयन्नारात् समीपे ऽशोकवनिकां अपश्यत् कीदृशीं उत्तुङ्गैरुच्चैर्वनैर्दिवमाकाशं प्रावयन्तीं व्याप्नुवतीं पूर्ववत् यं नगैरिति पाठे नगैर्वृक्षैरित्यर्थः स्तवकैः पुष्पगुच्छकैराचितां व्याप्तां ॥ ५९ ॥ भ०

तां प्राविशत् कपिव्याघ्रस्तरून्चलयन् शनैः ।
अत्रासयन् वनेशयान् सुप्तान् शाखासु पक्षिणः ॥ ६० ॥
अवाद्वायुः शनैर्यस्यां लतां नर्त्तयमानवत् ।
नायासयन्त संत्रस्ता ऋतवोऽन्योन्यसम्पदः ॥ ६१ ॥

तामित्यादि । तामशोकवनिकां कपिव्याघ्रः कपिर्व्याघ्र इव शनैर्मन्दं प्रविशत् तरून्चलयन् अकम्पयन् चलेरकर्मकत्वाच्चित्तवत्कर्तृकादणावित्यनेन च लटः परस्मैपदं ननिगरणेत्यादिना तद्धि तत्र सकर्मकार्थं अचित्तवत्कर्तृकार्थञ्चेत्युक्तं वनशयान् पक्षिणः शाखासु सुप्तान् अत्रासयन् अणावित्यनेन परस्मैपदं वने भैरत इति अधिकरणे भेतेरित्यच् भयत्रासवार्त्तिकात्यादिना सप्तम्या विभाषा अलुक् ॥ ६० ॥ ज०म०

तामित्यादि । कपिव्याघ्रः कपिश्रेष्ठो हनूमान् तामशोकवनिकां शनैर्मन्दं प्रविशत् किञ्चित्तरून् अचलयन् अकम्पयन् पूर्ववत् पं घटादित्वात् ह्रस्वः वनेशयान् वनचरान् शाखासु सुप्तान् पक्षिणोऽत्रासयन् कम्पाच्चार्थेऽणित्यादिना अजिघ्राणिवाढादिति पं वनेभैरत इति पचाद्यित्वादन् अभिधानात् सप्तम्या अलुक् अत्रमासेऽपि न क्षतिः अकालवाचिनः भयत्रासवासिषु इति सप्तम्या अलुगिति परः एओसुङा अवस्वमिनिआविलङ्ङिति वचनात् नेदमत्र लघुत्वं गुरुत्वे जिह्वाकृष्टं वनशयानिति केचित् पठन्ति अकालवाचिनदित्यादि परस्मैपदखानित्यत्वेन विभक्तिलोपात् ॥ ६० ॥ भ०

अवादित्यादि । यस्यामशोकवनिकायां वायुर्वातः शनैर्मन्दमवात् वाति स्म तामाटेति वक्ष्यमाणेन सम्बन्धः लतां नर्त्तयमानवत् नृत्यमिव कारयन् नृतिश्चलने वर्त्तते ततश्च निगरणेत्यादिना परस्मैपदं प्राप्तं नपादमीत्यादिना प्रतिषिद्धं ऋतवोऽन्योन्यं सम्पदं परस्परस्य विभूतिं नायासयन्त नोपपीडयन्ति स्म सन्त्रस्ता रावणात् आङ्पूर्वाद्यासेः चित्तवत्कर्तृकत्वात् अणावित्यादिना परस्मैपदं प्राप्तं नपादमीत्यादिना प्रतिषिद्धं ॥ ६१ ॥ ज०म०

अवादित्यादि । यस्यामशोकवनिकायां वायुः शाखाभङ्गभयात् शनैर्मन्दं अवात् वाति स्म तां प्राविशदिति पूर्वेण तामाटेति वक्ष्यमाणेन वा सम्बन्धः लतां नर्त्तयमानदव जिघ्रन्नित्यनेन फलवत्कर्त्तरि मं फलवत्कर्तृत्वाभावे तु कृतेः कर्म्मार्थत्वात् परस्मैपदं स्यादिति पुरुषोत्तमः यत्र रावणात् संत्रस्ता भीता-

ज्योत्स्नाहृतं शशी यस्यां वापीर्व्विकसितोत्पलाः ।
अपाययत सम्पूर्णः सदा दयसुखाशया ॥ ६२ ॥
प्रादमयन्त पुष्पेषु यस्यां वन्द्याः समाहृताः ।
परिमोहयमाणाभी राक्षसीभिः समावृताः ॥ ६३ ॥
यस्यां वासयते सीतां केवलं स्म रिपुः स्मरात् ।
न त्वरोचयतात्मानं चतुरो बुद्धिमानपि ॥ ६४ ॥

ऋतवो वसन्तादयः परस्परसमृद्धीने आयासयन्त न पीडयन्ति स्म अत्रि प्राणिधाढाञ्चेति प्राप्ते पूर्ववन्नं ॥ ६१ ॥ भ०

ज्योत्स्नेत्यादि । यस्यां रावणाज्ञया शशी सदा संपूर्णः सन् ज्योत्स्नाहृतं वापीरपाययत पायितवान् निगरणार्थत्वात्तिपि प्राप्ते नपादमोत्यादिना प्रतिषिद्धे णिचश्चेति तङ् ॥ ६२ ॥ ज०म०

ज्योत्स्नेत्यादि । यस्यां रावणाज्ञया सदा सम्पूर्णः शशी ज्योत्स्नाहृतममृतं वापीर्गृहदीर्घिका अपाययत पायितवान् अन्नार्थत्वात् पे प्राप्ते पूर्ववन्नं शाच्छासाञ्छेत्यादिना यन् अतएव विकसितानि उत्पलानि यासु तासु तथा ज्योतिरस्ना अस्मिति ज्योत्स्ना निपातनात् ॥ ६२ ॥ भ०

प्रादेत्यादि । यस्यां वन्द्याः समाहृताः समानीताः पुष्पेषु कामं प्रादमयन्त प्रशमितवत्यः तन्मतस्याचरणात् कीदृश्यः परिमोहयमाणाभिः व्यामोहयन्तीभिः राक्षसीभिः परिवृताः दमिपरिमुह्योः अणावित्यादिना प्राप्तस्य प्रत्ययस्य पदस्य नपादमोत्यादिना प्रतिषेधे णिचश्चेत्यात्मानेपदं ॥ ६३ ॥ ज०म०

प्रादेत्यादि । यस्यामशोकवनिकायां समाहृता आनीता एकत्र कृता वा वन्द्यो हठहृताः स्त्रियः पुष्पेषु कामं प्रादमयन्त प्रशमितवत्यः अतिदुःखात् यतः परिमोहयमाणाभिर्व्यामोहयन्तीभीराक्षसीभिः समावृताः परिवृता दमुपरिमुहोरञ्जि प्राणिधाढाञ्चेति पे प्राप्ते पूर्ववत्नं ॥ ६३ ॥ भ०

यस्यामित्यादि । रिपुर्दशाननः स्मरात्कामाङ्गेतोः केवलं निष्फलं यस्यां सीतां वासयते स्म वासितवान् न त्वरोचयत् आत्मानं नैवात्मानमुपरोचितवान् चतुरोऽपि योषिदाराधनकुशलोऽपि बुद्धिमानपि सम्यग्ज्ञोऽपि रोचिवाक्षोरणात्मित्यादिना प्राप्तस्यापि च परस्मैपदस्य नपादमोतिप्रतिषेधे णिचश्चेति तङ् ॥ ६४ ॥ ज०म०

यस्यामित्यादि । यस्यामशोकवनिकायां रिपुर्दशाननः स्मरात् कामात्

मन्दायमानगमनो हरितायत्तरूं कपिः ।
द्रुमैः शकृच्छकायद्भिर्मारुतेनाट सर्व्वतः ॥ ६५ ॥
अस्यन्द्रेन्दुमणयो व्यरुचन् कुसुदाकराः ।
अलोठिषत वातेन प्रकीर्णाः स्तवकोच्चयाः ॥ ६६ ॥

केवलं सीतां वासयते स्म वसतिं कारयति स्म मनु आत्मानं तस्यै अरोचयत रोचितवान् चतुरोऽपि योषिदाराधनकुशलोऽपि बुद्धिमानपि स्वरागस्तमानवानपि वसरुचोरज्ञि प्राणिघादाञ्चेति मे प्राग्वे पूर्व्ववत्कम् ॥ ६४ ॥ भ०

मन्देत्यादि । कपिः सर्व्वतः सर्व्वत्र ताभाट विजहार यत्तदोर्नित्यसम्बन्धात्तामिति गम्यते मन्दायमानगमनः मन्दीभवद्गमनः कीदृशीं हरितायत्तरूं शाद्वलीभवद्भूतां अप्राणिजातेश्चेत्यूङ् द्रुमैरुपलक्षितां कीदृशैः शकृच्छकायद्भिः शकृत्स्वभावैः शकृद्भवद्भिः केन मारुतेन अत्यामन्दं मन्दं भवति अहरिता हरिता भवन्तीति लोहितादित्वात् क्यष् अशकाः शका भवन्तीति वाक्ये अव्यक्तानुकरणादिति डाच् तस्मिन्विषयभूते डाचि बहुलं द्वे भवतः नित्यमाम्रेडिते डाचीति परूपत्वं डाजन्तात् शकृच्छकायशब्दात् क्यष् वा क्यष् इति परस्मैपदं आत्मनेपदञ्च ॥ ६५ ॥ ज० म०

मन्देत्यादि । कपिः सर्व्वतः सर्व्वत तामशोकवनिकामाट बभ्राम कीदृशः मन्द्रायमानगमनः अमन्दं मन्दं भवति मन्द्रायमानं तादृशं गमनमस्येति विग्रहः भृशादेस्वङ्यर्थे इति ङ्यः ङित्वान्नं तां कीदृशीं हरितायत्तरूं हरिद्वर्णीभवद्भूतां अहरिता हरिता भवन्ति हरितायन्तस्तादृशास्तरवो यत्र डाजोहितादेरिति च्व्यर्थे ङ्यः पक्षे पञ्च मारुतेन वायुना शकृच्छकायद्भिः शकृत्शकदिति शब्दं कुर्व्वद्भिः द्रुमैरुपलक्षितां द्रुमैः करणभूतैराटेति वा शकदित्यनुकरणशब्दात् नैकाचोऽव्यक्तानुकरणादिति डाच् द्वित्वञ्च तलोपोऽत इति प्रकृतेर्हे च तलोपः अशकृच्छकाः शकृच्छका भवन्तीति डाजोहितादेरिति च्व्यर्थे ङ्यः पक्षे पञ्च शकदित्यस्य शब्दवाचकस्यापि लक्षणया तद्वति दृष्टे इति ॥ ६५ ॥ भ०

अस्येत्यादि । चन्द्रोदयादिन्दुमणयः अस्यन्दन् स्यन्दन्ते स्म तामाटेति योज्यं व्यरुचन् कुसुदाकराः विराजितवन्तः स्तवकोच्चयाः गुच्छराशयः वातेन प्रकीर्णाः इतस्ततो विक्षिप्ताः सन्तः अलोठिषत लुठन्ते स्म सर्व्वत द्युङ्भ्यो लुङीति विभाषा परस्मैपदं द्युतादयश्च क्रूपर्य्यन्ताः ॥ ६६ ॥ ज० म०

अस्येत्यादि । इन्दुमणयश्चन्द्रकान्ता अस्यन्दन् स्रवन्ति स्म चन्द्ररश्मिभिरित्यर्थात् यस्यां तामाटेति सम्बन्धो बोध्यः यस्यां कुसुदानामाकरा उत्पत्ति-

सीतान्तिके विद्दत्सन्तं वर्त्स्यत्सिद्धिं प्लवङ्गमम् ।
पतत्रिणः शुभा मन्द्रमानुवानास्वजिह्लदन् ॥ ६७ ॥
वर्त्स्यमाणमात्मानं सीता पत्युरिवान्तिके ।
उदपश्यत्तदा तथ्यैर्निमित्तैरिष्टदर्शनैः ॥ ६८ ॥

स्थानानि व्यरुचत् विरेजुः यस्यां स्तवकोच्चयाः पुष्पगुच्छसमूहा वातेन प्रकीर्णाः इतस्ततो विक्षिप्ताः सन्तः अलोठिषत लुलुठुः स्खन्दूङ्क्लृतौ रुचलुङ्गीति-प्रकाशयोः ल्लुलुठ्ङ्घादित्वात् एषां ङित्त्वादाङ्लुनेपदे सिद्धे भ्राम्यलिह्यलुषादेरिति द्युतादित्वात् टी भे ङविधानं तेनैव पं अतएव द्युतादेश्चाभयपदित्वं गम्यते परे तु लुङि द्युतादेरिति स्नूवेण विकल्पेनात्मनेपदमाहुः ङे स्खन्देर्नलोपाभावो बाहुल्यात् देवीदासचक्रवर्त्तीं तु भ्राम्यलिह्यादित्यादौ ग्लुचुनैवैष सिद्धौ ग्लुङ्ग्रहणादानेन ङे क्वचित् नलोपाभावो ज्ञापित इत्याह केचित्तु क्वचिदात्मनेपदिनोऽपि परस्मै-पदित्वं स्यादिति ज्ञापनाय स्यां रूपं दर्शितमित्याहुः अलोठिषतेति मान्तो-ऽदनत इत्यतादेशः ॥ ६६ ॥ भ०

सीतेत्यादि । सीतासमीपे विद्दत्सन्तं वर्त्तितुमिच्छन्तं प्लवङ्गमं वर्त्स्यन्तीं सिद्धिं वर्त्स्यन्ती भविष्यन्ती सिद्धिः सीतादर्शनलक्षणा यस्य तद्भूतः स्वसनोरिति विभा-क्तिप् तं पक्षिणः शुभाः प्रशस्ता अजिह्लदन् सुखयन्ति स्म णिचि लुङि चङि रूपं कीदृशाः मन्द्रं गम्भीरं मधुरमानुवानाः वाश्यमानाः आङिनुष्ठ्योरुप-संख्यानमिति तङ्ग्लुस्तावित्यादादिकस्य परस्मैपदित्वात् ॥ ६७ ॥ ज० म०

सीतेत्यादि । शुभा अनुकूलाः पतत्रिणः पक्षिणः प्लवङ्गमं हनूमन्तं अजिह्लदन् आनन्दयामासुः ह्लादीङ्मोदने औ स्यां रूपं किं कुर्वन्तः मन्द्रं गम्भीरं आनुवानाः उत्कण्ठापूर्वकं शब्दं कुर्वाणाः आङ्पूर्वो नौतिरुत्कण्ठायां शब्दे वर्त्तते विपराजीत्यादिना मं कीदृशं सीतासमीपे विद्दत्सन्तं वर्त्तितुमिच्छन्तं वर्त्स्यन्ती भविष्यन्ती सिद्धिः सीतादर्शनरूपा यस्य तं शुभशब्देन भाविनीं सिद्धिमनुमाय कपेरानन्द इति ध्वनिः द्वङ्योनेर्मपेक्षसनोर्व्यत्यय इति द्वम्-निषेधः अतएव पं तेन द्वतादेः स्वसनोरुभयपदित्वं गम्यते ॥ ६७ ॥ भ०

वर्त्तीत्यादि । सीतापि तदा तस्मिन् काले पत्यू रामस्यान्तिके आत्मानं वर्त्स्यमाणमिव उदपश्यत् उत्प्रेक्षते स्म द्वङ्योनेरिति विभाषावचनात्तङ् निमित्तैश्चक्षुःस्पन्दादिभिः तथ्यैरविसम्वादिभिः इष्टदर्शनैः इष्टार्थप्रकाशकैः दर्शनमिति ल्युट्यो बहुलमिति कर्त्तरि ल्युट् ॥ ६८ ॥ ज० म०

निरवर्त्स्यन्न चेद्वार्त्ता सीताया वितथैव नः ।
अकल्प्स्यदुद्यतिः सर्व्वा हनूमानित्यचिन्तयत् ॥ ६९ ॥

आत्मनेपदाधिकारः ।

दृष्ट्वादृष्टं परिक्रामन् रावणाद् बिभ्यतीं भृशम् ।
शतोल्लाणमपश्यन्तीमदृश्यो जनकात्मजाम् ॥ ७० ॥

वर्त्तीत्यादि । तदा तस्मिन् काले सीतापि पत्यूरामस्यान्तिके वर्त्तिष्यमाणमिवात्मानं निमित्तैश्चक्षुःस्पन्दनादिभिरुदपश्यत उत्प्रेक्षितवती तथैरविसम्बादिभिः दृष्टः प्रियो दृश्यते यैः करणेऽनट् दृष्टं दर्शयन्तीवि कर्त्तरि वा दृष्टस्य दर्शनं येभ्य इति वा दृताद्देः पे स्यसनोरिमनिषेधः मे तु इम् भवत्येव इवार्थोऽत्र सादृश्यं सम्भावना वा ॥ ६८ ॥ भ०

निरेत्यादि । चेदिति यद्यर्थे यदि सीताया वार्त्ता न निरवर्त्स्यत् निर्वर्त्तिं नायास्यत् तदा वृथैव निष्फलैव नोऽस्माकमुद्यतिः सर्व्वा अयमुद्यमः ससुद्रलङ्घनादिकः अकल्प्स्यत् अभविष्यत् इत्येवं हनूमानचिन्तयत् क्रियातिपत्तौ लङ् तत्र निरवर्त्स्यदिति दृङ्नः स्यसनोरिति विभाषापरस्मैपदं अकल्प्स्यदिति लुटि चक्लृप इति चकारात् स्यसनोरपि भवति विभाषापरस्मैपदं द्युद्यतिरिति यमेः स्त्रियां क्तिन् अनुदात्तेत्यादिना अनुनासिकलोपः इत्यात्मनेपदपरस्मैपदाधिकारः ॥ ६९ ॥ ज० म०

निरेत्यादि । चेद्यदि सीताया वार्त्ता न निरवर्त्स्यत् न निष्पत्स्यते तदास्माकं सर्व्वा ससुद्रलङ्घनादिरूपा उद्यतिरुद्यमो वितथैव निष्फलैव अकल्प्स्यत् अभविष्यत इति हनूमान् अचिन्तयत् दृताद्देः पूर्व्ववदुभयपदं अनिम् च ष्यां रूपं निष्पूर्व्वो वर्त्तिर्निष्पत्त्यर्थः क्लृपूषडक्लृच कल्पने क्लृपक्लृपोऽक्लृपादाविति क्लृपादेशः यमेः क्तौ वनतनाद्यनिमामिति मलोपः । इति परस्मैपदाधिकारः ॥ ६९ ॥ भ०

इतः प्रभृति कारकमधिकृत्याह ।

दृष्ट्वादित्यादि । तां जनकात्मजां सीतां स कपिकुञ्जरोऽदृश्यदिति वक्ष्यमाणेन सम्बन्धः दृष्ट्वात् दृष्टं परिक्रामन् गच्छन् ध्रुवमपायेऽपादानमित्यपादान संज्ञायां पञ्चमी रावणात् बिभ्यतीं भृशं त्रस्यन्तीं अत्यर्थं शतो रावणादुल्लामपश्यन्तीं यतो भयन्ततः कुतो रक्षेति भीत्रार्थानामित्यपादानसंज्ञा अदृश्यः प्रच्छन्नो भूत्वा दृदृधेत्यादिना क्यप् ॥ ७० ॥ ज० म०

अथ कारकाधिकारः ।

दृष्ट्वादित्यादि । तां जनकात्मजां कपिकुञ्जरोऽदृश्यदिति तृतीयश्लोकेनान्वयः

तां पराजयमानां स प्रीतेरक्ष्यां दशाननात् ।
अन्तर्दधानां रक्षोभ्यो मलिनां श्याममूर्द्धजाम् ॥ ७१ ॥
रामादधीतसन्देशो वायोर्जातश्रुतस्थिताम् ।

किं कुर्वन् अदृश्यो भूत्वा दृष्टादेकस्मादपरं दृष्टं परिक्रामन् गच्छन् तां कीदृशीं रावणात् बिभ्यतीं त्रसन्तीं यतो रावणात् त्राणं रक्षणं अपश्यन्तीं यतोऽपायेत्यादिना सर्व्वत्रापादानत्वं अपायः संश्लेषः अपायोगे यच्छब्दोऽवधिवचनः यतो भीर्भयमित्यत्र यच्छब्दो भयहेतुवचनः तेन भयार्थयोगे भयहेतोरपादानत्वं त्राणं रक्षणं तच्च भीतस्य तेनात्रापि यच्छब्दोभयहेतुवचनः तेन त्राणार्थयोगेऽपि भयहेतोरपादानत्वं दृभृजुषेत्यादिना ऋदुङ्त्वात् दृशेः क्यप् ॥ ७० ॥ भ०

तामित्यादि । प्रीतेः रावणसम्बन्धिन्याः पराजयमानां विमुखीभवन्तीं पराजेरसोढ इत्यपादानत्वं असोढ़ोऽर्थः प्रीतिः रक्ष्यान्दशाननात् रावणविषये स्वयं निवार्य्यप्रसरां वारणार्थानामीप्सित इत्यपादानत्वं प्रवृत्तिविघातलक्षणया रक्षणक्रियया आत्मसम्बन्धिन्या दशाननस्य व्याप्तुमभिप्रेतत्वात् अन्तर्दधानां रक्षोभ्यः मा मां रक्षांसि द्राक्षुरिति ततस्तान्द्वौ येनादर्शनमित्यपादानसंज्ञा अन्तर्द्धिनिमित्तं हि रक्षोभिरात्मनोदर्शनस्यानीप्सितत्वात् मलिनां शरीरेण स्नानमूर्द्धजां मलिनकेशां बद्धवेणीत्वात् ॥ ७१ ॥ ज० म०

तामित्यादि । तां कीदृशीं प्रीतेरावणसम्बन्धिन्या इत्यर्थात् पराजयमानां प्रीतिमसहमानामित्यर्थः यतोऽपायेत्यादौ पराजयोऽसहनं पराजयपदनिर्देशेन परापूर्व्वजेरसहनविषयीभूतो गम्यते पराजेरसोढे इति धातिविस्तृतदर्शनात् पराजेः सोढुमशक्यमिति क्रमदीश्वरस्तृतदर्शनाच्च अशक्या निवर्त्तनं वा पराजयः रावणप्रीतेः सकाशात् अशक्या निवर्त्तमानामित्यर्थः यद्यपि प्रीतिं बुद्धा प्राप्य ततो निवर्त्तत इति बुद्धिजतापाय एवापादानत्वं घटते तथापि पराजयेति कर्त्तृप्रधानत्वात् दशानत्वात् रक्ष्यां रक्षणीयां त्राणार्थेऽपादानत्वं रक्ष्यां निवारणीयां वा तदा वारणार्थेऽपादानत्वं रक्षोभ्योऽन्तर्दधानां राक्षसकर्त्तृकदर्शनाभावेच्छया व्यवहितीभवन्तीं अन्तर्द्धिव्यवधानं तच्च यदीयदर्शनाभावेच्छया तस्यापादानत्वं रक्षांसि विलोक्येति वा यत्रर्थे पञ्चमी मलिनां शरीरेण श्यामम्मूर्द्धजां मलिनकेशां वेणीकत्वात् मलशब्दात् फलादित्वात् गोत्रणमेधेत्यादिना इनः ॥ ७१ ॥ भ०

रामादित्यादि । कर्तृत्वे अधीतसन्देशो गृहीतसन्देशः कपिकुञ्जरः

प्रभवन्तीमिवादित्यादपश्यत् कपिकुञ्जरः ॥ ७२ ॥
रोचमानः कुदृष्टिभ्यो रक्षोभ्यः प्रत्तवान् श्रियम् ।
श्लाघमानः परस्त्रीभ्यस्तत्रागाद्राक्षसाधिपः ॥ ७३ ॥

आख्यातोपयोग इत्यपादानसंज्ञा रामस्याख्यातृत्वात् सावधानतया सन्देशग्रहणात् नियमपूर्व्वकविद्यावत्सन्देशग्रहणं वायोर्जात इति जनिकर्त्तुरित्यपादानसंज्ञा जन्यर्थस्य जन्मनः कर्त्ता हनूमान् तस्य वायुः प्रकृतिः कारणं च्युतस्रितां शोकाक्रान्तत्वात् प्रभवन्तीमिवादित्यात् भुवः प्रभव इत्यनेन भवत्यर्थस्य सीतायाः कर्त्तृभूतायाः प्रथमत उपलभ्यमानत्वात् अतः प्रभव आदित्यः तस्मात्तेजस्वित्वात् ॥ ७२ ॥ ज० म०

रामादित्यादि । च्युतं स्रितं यस्याः शोकाक्रान्तत्वात् तां आदित्यात् प्रभवन्तीमिव उत्पन्नामिव प्रथमत उपलभ्यमानां वा एतेन तेजोऽतिशयो दर्शितः यतोऽपायेत्यादिना यतो भूरित्यपादानत्वं भूरुत्पत्तिः उत्पत्तितुल्यत्वलक्षणया प्रथमोपलम्भस्थानञ्च बुद्धिसंश्लेषपूर्व्वकस्थापायस्य सत्त्वात् यतोऽपाय इत्यपादानत्वं वा यत्र प्रकाशनं प्रभव इत्याधारस्यापादानत्वमिति श्रीपतिः भुवः आद्योपलम्भस्थानमित्यपादानसंज्ञार्थं क्रमदीश्वरस्तूक्तं ईदृशीं तां कपिकुञ्जरः कपिश्रेष्ठो हनूमान् अपश्यदित्यन्वयः स कीदृशः रामादधीतसन्देशः गृहीतवाचिकः यत आदानमित्यपादानत्वं वायोर्जातः यतो भूरित्यपादानत्वम् ॥७२॥ भ०

रोचेत्यादि । तत्र तस्यामशोकवनिकायां राक्षसाधिपो रावणः आगात् आगतः रोचमानः कुदृष्टिभ्यः त्यक्तत्रयीधर्म्मत्वात् ये कुदृष्टयः कुबुद्धयः तान् स्वविषये स्पृहावतः कारयन्नित्यर्थः रुच्यर्थानां प्रीयमाण इति सम्प्रदानसंज्ञायां चतुर्थी रुचेरभिलाषस्य तत्रावस्थानात् कुदृष्टयः प्रीयमाणाः रक्षोभ्यः श्रियं विभूतिं प्रत्तवान् कर्म्मणा यमभिप्रैतीति सम्प्रदानं ददाति क्रियया राक्षसानामभिप्रीयमाणत्वात् श्लाघमानः परस्त्रीभ्यः युष्मद्विषयेऽस्माकं श्लाघेति परकलत्राणि श्लापयितुमेषयन् श्लाघङ्कुङ्भ्यादिना सम्प्रदानत्वं श्लाघया बडुमानेन श्लापयितुमिष्यमाणत्वात्तासाम् ॥ ७३ ॥ ज० म०

कुलकम् । रोचेत्यादि । तत्र तस्यामशोकवनिकायां राक्षसाधिपो रावणो आगात् आगतः कीदृशः कुदृष्टिभ्यो रोचमानः ये कुदृष्टयः कुबुद्धयः त्यक्तधर्म्मत्वात् तेभ्योरोचमानस्तेषां प्रीतिमुत्पादयन् यस्मै दित्सेत्यादिना यस्मैरुचिरिति संप्रदानत्वं रुचिरभिलाषोत्पादनं तेन रुच्यर्थस्य कर्त्ता यस्य प्रीतिमुत्पादयति तस्य

अशपन्निङ्कुवानोऽसौ सीतायै स्मरमोहितः ।
धारयन्निव चैतस्यै वस्तूनि प्रत्यपद्यत ॥ ७४ ॥
तस्यै स्पृहयमाणोऽसौ बद्धप्रियमभाषत ।
सानुनीतिश्च सीतायै नाक्रुध्यन्नाप्यसूयत ॥ ७५ ॥

संप्रदानत्वमिति पथ्यवसितोऽर्थः रक्षोभ्यः श्रियं प्रत्तवान् कृतसम्पत्तिदानः ग्यचस्तवेति दाञस्तादेशः यस्मैदित्येति संप्रदानत्वं परस्त्रीभ्यः श्लाघमानः तासां श्लाघया तास्तोषयन् स्वकीयश्लाघां वा श्लापयन् वा तास्वात्मश्लाघां कथयन् वा यस्मै श्लाघार्थ इति सम्प्रदानत्वं यस्मै श्लाघार्थ इति श्लाघार्थेन योज्यमानस्य सम्प्रदानत्वमित्यर्थः ॥ ७३ ॥ भ०

अशेत्यादि । सीतायै निङ्कुवानः क्रौर्य्यादिकं न मेऽस्तीति सीतां श्लापयितुमेषयन्नित्यर्थः तस्यै सीतायै अशपत् शपथं सीतां श्लापयितुमैषदित्यर्थः किमित्येवमाह स्मरमोहितः अत्र शपथापह्नुतिक्रियया सीताभाश्लापयितुमिष्यमाणत्वात् पूर्ववत्सम्प्रदानसंज्ञा किञ्चास्यै सीतायै स्वामिनीभूतायै वस्तूनि द्रव्याणि प्रत्यपद्यत अङ्गीकृतवान् धारयन्निव गृहीतवित्त इव अत्र धारेरुत्तमर्ण इति सीतायाः कयाचिदुत्तमर्ण्या तुल्यत्वात् ॥ ७४ ॥ ज० म०

अशपेत्यादि । असौ वारणः स्मरेण मोहितः सन् सीतायै अशपत शपथं मिथ्यानिरसनं तां श्लापयितुमिच्छति स्म स्वशपथपूर्वकं वा किञ्चित् श्लापयितुमिष्टवान् शपथाश्लोर्गत्यनुकार इति शपथे मं तस्यै निङ्कुवानः कपटापह्नवेन सीतां स्वाभिप्रायं श्लापयितुमिच्छन् किञ्च एतस्यै सीतायै वस्तूनि धारयन्निव तत्सम्बन्धीनि धनानि आत्मनि स्थापयन्निव गृहीतवित्तोऽधमर्ण इव तस्यै वस्तूनि प्रत्यपद्यत दातुमङ्गीकृतवान् यस्मै दित्येत्यादिना सर्व्वत्र सम्प्रदानत्वं शपञ्चुधात्वर्थयोगे यच्छब्दो स्पृहयमानवचनः धात्वर्थयोगे यच्छब्द उत्तमर्णवचनः ॥ ७४ ॥ भ०

तस्य इत्यादि । असौ राक्षसाधिपः स्पृहयमाणः सीतामाप्तुमिच्छन् बद्धप्रियमभाषत वक्ष्यमाणं स्पृहेरीप्सित इति स्पृहयतेः स्वार्थिकण्यन्तस्य प्रयोगे सीताया ईप्स्यमानत्वात् सानुनीतिश्च सानुनयः सीतायै नाक्रुध्यत् तां प्रति कोपं न कृतवान् नाप्यसूयत दोषाविष्करणलक्षणामसूयां न कृतवान् क्रुध्यति सूयत्योर्दिवादिकयोरुदात्तेत्त्वे तोर्लङीप्रयोगे क्रुधद्रुहेत्यादिना सम्प्रदानम् ॥ ७५ ॥ ज० म०

तस्य इत्यादि । असौ रावणो बद्धप्रियं वक्ष्यमाणं अभाषत तस्यै सीतायै

संक्रुध्यसि मृषा किं त्वं दिदृक्षुं मां मृगेक्षणे ।
ईक्षितव्यं परस्त्रीभ्यः स्वधर्मो रक्षसामयम् ॥ ७६ ॥
मृण्वद्भ्यः प्रतिमृण्वन्ति मध्यमा भीरु नोत्तमाः ।
गृणद्भ्योऽनुगृणन्त्यन्ये कृतार्था नैव मद्विधाः ॥ ७७ ॥

मृह्यमाणः मृहां कुर्वन् यस्मै दित्सेत्यादिना सम्प्रदानत्वं मृह्यर्थे यच्छब्द ईप्सितवचनः सानुनीतिः सानुनयः सन् सीतायै नाक्रुध्यत् न कोपं कृतवान् नापि असूयत दोषाविष्करणं नापि कृतवान् सूयोऽसूतावित्यस्यानेकार्थत्वात् इदं रूपं ध्यां कण्ड्वादावसूधातोर्धीटोयोर्ध्यमित्यस्य क्वचिद्व्यभिचारादभाव इति केचित् माध्यसूयतेति केचित् पठन्ति पूर्ववत् सम्प्रदानत्वम् ॥ ७५ ॥ भ०

संक्रुध्यादि । किं त्वं शुभाशुभे दिदृक्षुं द्रष्टुमिच्छुं मां हे मृगेक्षणे संक्रुध्यसि क्रुधद्रुहोरुपसृष्टयोः कर्मसंज्ञा क्रुधेरुपसर्गेण युक्तत्वात् कुतस्ते परिज्ञानं यत्परस्त्रीषु शुभाशुभं निरूपयसि अन्यत्र दुष्टाशयत्वात् अथ कथं मृषा संक्रुध्यामीति चेदाह ईक्षितव्यं परस्त्रीभ्यः का शुभा न शुभेति यदीक्षितव्यमीक्षणीयं तदयं स्वधर्मो रक्षसां राक्षीच्छोर्यस्यविप्रश्न इति सम्प्रदानसंज्ञा यतः स्त्रीविषये विविधस्य प्रश्नस्य क्रियमाणत्वात् ॥ ७६ ॥ ज० म०

संक्रुध्यादि । किं प्रियमभाषतेत्याह हे मृगेक्षणे त्वं शुभा न वेति द्रष्टुमिच्छन्तं मां किं मृषा त्वं संक्रुध्यसि क्रुधद्रुहोरुपसर्गे सम्प्रदानस्य कर्मत्वमिति केचित् क्षमते स्वभावादिमौ सोपसर्गौ सकर्मकाविति दुर्गवाक्यमाहतं क्रियाव्याप्यस्य कर्मत्वात् परस्त्रीदर्शने युक्त एव क्रोधः कथं मृषेति चेदाह परस्त्रीभ्य ईक्षितव्यं विविधप्रश्नपूर्वकं तद्दर्शनं तासां शुभाशुभनिरूपणं वा कर्त्तव्यमित्ययं रक्षसां स्वधर्मः यस्मै दित्सेत्यादिना ईक्षार्थयोगे सम्प्रदानत्वं ईक्षितव्यं विविधप्रश्नपूर्वकदर्शनार्थः शुभाशुभपर्यालोचनार्थो वा ॥ ७६ ॥ भ०

मृण्वदित्यादि । अनेनात्मना प्रभावं दर्शयति मृण्वद्भ्यः प्रार्थयमानेभ्यः स्वामिन्निदं क्रियतामिति मध्यमाः प्रभवः प्रतिमृण्वन्ति ओमित्युपगच्छन्ति हे भीरु नोत्तमा मादृशाः ते हि स्वातन्त्र्यात्स्वयमेव हितमतिपद्यन्त इति भावः प्रत्याङ्भ्यां स्नुवः पूर्वस्यकर्त्तेति सम्प्रदानसंज्ञा पूर्वस्याः प्रार्थनक्रियायाः प्रार्थयितुः कर्तृत्वात् अन्ये प्रभवोऽकृतार्थाः अलब्धलाभाः गृणद्भ्यः अनुग्राह्यस्य मृत्यस्य कस्यचिन्न स्तुतिं कुर्वद्भ्यो मन्त्रिभ्यः अनुगृण्वन्ति तान् प्रोत्साहयन्ति अनुगृणीत अनुगृणीतेति ममानुगतो भवतीति नैव मद्विधा अनुगृण्वन्ति कृतार्थत्वात् गृशब्द

दृच्छ स्नेहेन दीव्यन्ती विषयान् भुवनेश्वरम् ।
सम्भोगाय परिक्रीतः कर्त्तास्मि तव नाप्रियम् ॥ ७८ ॥
आस्व सार्कं मया सौधे मा धिष्ठा निर्जनं वनम् ।
मा धिवात्मोर्भुवं शय्यामधिशेष्व स्मरोत्सुका ॥ ७९ ॥

इत्यस्य प्रयोगे अनुप्रतिगृणश्चेति सम्प्रदानसंज्ञा गृणातेः स्तुतिक्रियापेक्षया कर्तृत्वात् ॥ ७७ ॥ ज० म०

गृध्नवदित्यादि । इदानीमात्मोत्कर्षः कथ्यते हे भीरु गृध्नवद्भ्यः प्रार्थयमानेभ्यः स्वामिन्निदं क्रियतामित्युपदेष्टृभ्यो मध्यमा एव प्रभवः प्रतिगृध्नन्ति तैः प्रयुक्ताः सन्तस्तथा कर्त्तव्यमित्युपगच्छन्ति न तु मद्विधा मादृशा उत्तमाः ते हि स्वातन्त्र्यात्स्वयमेव हिताहितं जानन्तीति भावः अन्ये ते अकृतार्थाः प्रभवो गृणद्भ्यः स्तुतिं कुर्व्वद्भ्य एव अनुगृण्नन्ति तैः प्रयुक्ता धनादिकं दातुमभ्युपगच्छन्ति स्वप्रसिद्धये स्तावकेभ्यो यच्छन्तीत्यर्थः नत्वेवं मद्विधाः स्वतः प्रसिद्धत्वेन परस्तुत्यनपेक्षत्वात् यच्छतिस्तेत्यादिना उभयत्र सम्प्रदानत्वं अत्र आप्रतिस्तुप्रत्ययुक्तयोगे यच्छब्दोगम्यपूर्व्वक्रियाकर्तृवचन इति तु रामं वदन्तं प्रोत्साहयामासेत्यर्थ इत्यनेन सूचितं अत्र हि प्रार्थनमेव पूर्व्वक्रिया गम्या तस्याः कर्त्ता गृध्नच्छब्दः एवं स्तुतिकरणमेव पूर्व्वक्रिया गम्या तस्याः कर्त्ता गृध्नच्छब्दः ॥ ७७ ॥ भ०

दृच्छेत्यादि । ईदृशं पूजितं भुवनेश्वरं त्रिलोकविजयिनमिह अङ्गीकुरु आत्मानमुद्दिश्य स्नेहेन प्रेम्णा साधकतमङ्करणमिति करणसंज्ञा दीव्यन्ती क्रीडन्ती विषयान् शब्दादिभिरित्यर्थः दिवः कर्म्म चेति करणसंज्ञापवादात्कर्म्मसंज्ञा सम्भोगाय परिक्रीतः त्वद्विषयभोगेन परिक्रीत इत्यर्थः परिक्रयणे सम्प्रदानमिति सम्प्रदानत्वं तव नाप्रियं कर्त्तास्मि न करिष्यामि ॥ ७८ ॥ ज० म०

दृच्छेत्यादि । भुवनानामीश्वरं मां त्वं स्नेहेन प्रेम्णा दृच्छ अङ्गीकुरु साधनहेतुमिति करणत्वं किं कुर्व्वती विषयान् दीव्यन्ती विषयैः स्वकृचन्दनादिभिः क्रीडन्ती दिवोधंवेति पक्षे करणे द्वितीया सम्भोगाय सम्भोगेन परिक्रीतो नियत कालं त्वया सेवार्थं स्वीकृतोऽहं तवाप्रियं अहं न कर्त्तास्मि न करिष्यामि परिक्रियोधंवेति पक्षे करणे चतुर्थी ॥ ७८ ॥ भ०

आस्स्वेत्यादि । मया सार्कं सार्द्धं सौधे धवलगृहे आस्स्व तिष्ठ आसेर्लोटि रूपं आधारोऽधिकरणमित्यधिकरणसंज्ञायां सप्तमी मा धिष्ठा निर्जनं वनं अधिशीङ्स्थासां कर्म्मेत्यधिकरणे कर्म्मसंज्ञा लुङि रूपं मा धिवात्मोः भुवं भूमौ

अभिन्यविक्षथास्त्वं मे यथैवाव्याहता मनः ।
तवाप्यध्यावसन्तं मां मारौत्सीर्हृदयं तथा ॥ ८० ॥
मावमंस्था नमस्यन्तमकार्य्यज्ञे जगत्पतिम् ।
संदृष्टे मयि काकुत्स्थमधन्यं कामयेत का ॥ ८१ ॥

मा शयिष्ठाः माङि लुङि रूपं उपान्वध्याङ् वस इति अधिकरणे कर्म्मसंज्ञा किन्तु शय्यामधिशेष्व शीङोलोटि रूपं अधिशीङिति कर्म्मसंज्ञा स्मरोत्सुका कामार्थिनी ॥ ७६ ॥ ज० म०

आस्स्वेत्यादि । मया साकं सह सौधे धवलगृहे आस्स्व तिष्ठ ज्ञिलाघङ् उपवेशे आमन्त्रणे प्रार्थने वा गौ कालभावाधारमित्यास्स्वेधाधारत्वं निर्ज्जनं वनं त्वं मा धिष्ठाः निर्ज्जने वने न तिष्ठ कर्म्मक्रियेत्यादिना आधिपूर्ब्बस्य आधारस्य कर्म्मत्वं भूस्थेति सेर्लुक् गौकः सुस्तुभेत्यादिना भवं भुवं मा धिवात्मीः भूमौ मा शयिष्ठाः पूर्ब्ववदधिवसेराधारस्य कर्म्मत्वं सत्यर इति तः स्मरोत्सुका कामासक्ता सती त्वं शय्यां अधिशेष्व पूर्ब्ववदधिशीङः आधारस्य कर्म्मत्वम् ॥ ७६ ॥ भ०

अभीत्यादि । यथैव त्वमव्याहृता अनिवारिता सती मे मम मनः अभिन्यविक्षथाः अभिनिविष्टासि लुङि रूपं नेर्विश इति तञ् अभिनिविशश्चेत्यधिरणे मनसः कर्म्मसंज्ञा तथा त्वमपि त्वद्धृदयमध्यावसन्तं मां मा रौत्सीः मा निवारय रुधेर्लुङि रूपं उपान्वध्येति हृदयस्य कर्म्मसंज्ञा ॥ ८० ॥ ज० म०

अभीत्यादि । यथैव येनैव प्रकारेण त्वमव्याहृता मया अनिवारिता सती मम मनोऽभिन्यविक्षथाः अभिनिविष्टासि शौविश प्रवेशे विपराजीति मं कृशनोऽनिमिजुङ् इति सक् अभिन्यविशथा इति पाठे धी पूर्ब्ववदाधारस्य कर्म्मत्वं तथा तेनैव प्रकारेण तव हृदयमध्यावसन्तं मां त्वमपि मा रौत्सीः न निवारय मां हृदि कुर्व्विति भावः रुधिरौजिधञ् आङ्पूर्ब्ववदधिवसेराधारस्य कर्म्मत्वम् ॥ ८० ॥ भ०

मावेत्यादि । हे अकार्य्यज्ञे अविशेषज्ञे मां जगत्पतिं नमस्यन्तं मावमंस्थाः लुङि रूपं कर्त्तुरीप्सिततममिति कर्म्मसंज्ञा अवमानक्रिया कर्त्रसम्बन्धिन्या जगत्पतेराप्तुमिष्टत्वात् मन्दे मयि काकुत्स्थमधन्यं मन्दभाग्यं का कामयेत का इच्छेत् नैवेत्यर्थः तथा युक्तं चानीप्सितमिति कर्म्मसंज्ञा येनैव प्रकारेण कर्त्तुरीप्सिततमं क्रियया युक्तं तेनैवेप्सितादन्यस्य रामस्य प्रयुज्यमानत्वात् ॥ ८१ ॥ ज० म०

मावेत्यादि । हे अकार्य्यज्ञेऽविशेषज्ञे नमस्यन्तं प्रणमन्तं जगत्पतिं मां त्वं

यः पयोदोग्धि पाषाणं स रामाङ्गतिमाप्नुयात् ।
रावणं गमय प्रीतिं बोधयन्तं हिताहितम् ॥ ८२ ॥
प्रीतोऽहं भोजयिष्यामि भवतीं भुवनत्रयम् ।
किं विलापयसेऽत्यर्थं पार्श्वे शायय रावणम् ॥ ८३ ॥

भावसंज्ञाः नावजानीहि जगन्नमस्योऽप्यहं त्वां नमस्यामीति नावज्ञा युक्तेति भावः कर्म्मक्रियेति कर्म्मत्वं कर्म्मक्रियेत्यत्र कर्म्मक्रियाव्याप्यं तच्च चतुर्विधं प्राप्यनिर्वर्त्यविकार्यान्यीप्सितभेदात् इदन्तु प्राप्यं कर्म्म प्राप्तुमिष्टत्वात् तत्र पूर्व्वनवमननक्रियया जगत्प्रतिव्याप्यते पश्चान्नञ्योगेन बहिरङ्गेन न तच्छक्तिः नमः करोतीति नमस्तपो वरिव इति क्यः मयि सन्दृष्टे सति अधन्यं मन्दभाग्यं काकुत्स्थं रामं का कामयेत् इच्छेत् । इदमनीप्सितं कर्म्म ॥ ८१ ॥ भ०

यःमेत्यादि । यथा पाषाणात् पयो न सम्भवति तथा रामादपि विभूतिरिति नैराश्यं दर्शयति पयसः पूर्व्वमेव कर्म्मसंज्ञा पाषाणस्याकथितत्वेनेन रावणं गमय प्रीतिं भवत्या सह प्रीतिं गच्छन्तं गमय प्रीतिं स्वयमेव हितातितं भवतीं बुध्यमानां बोधयन्तं गतिबुद्धीत्यादिना कर्म्मसंज्ञा गतिबुध्योरत्यन्तावस्थायां तयोः कर्त्तृत्वात् ॥ ८२ ॥ ज० भ०

य इत्यादि । यः पाषाणं पयो दोग्धि पाषाणेन हेतुना पयो निःसारयति स एव रामाङ्गतिं प्राप्नुयात् सम्भावनायां स्त्री यथा पाषाणात् पयो न सम्भवति तथा रामादपि भूतिरिति भावः याच्ञार्थत्यादिना दुहोहिकर्म्मकत्वं पाषाणमिति कर्म्महेतोः कर्म्मत्वं पय इति निर्व्वर्त्यं कर्म्म तस्मात् रावणं मां प्रीतिं गमय प्रापय हितञ्चाहितञ्च बोधयन्तं भवतीमित्युत्तरश्लोकस्थमिहानुषज्यते घोऽञोरिति गतिज्ञानार्थयोः प्रयोज्यकर्त्तुः कर्म्मत्वम् ॥ ८२ ॥ भ०

प्रीत इत्यादि । अहं प्रीतः सन् भुवनत्रयं तत्सम्बन्धि भोज्यं भोक्तृ योग्यान्भवतीं भोजयिष्यामि प्रत्यवसानार्थत्वात्कर्म्मसंज्ञा प्रत्यवसानमभ्यवहारः अकर्त्तृभिप्राये णिचश्चेत्यात्मनेपदं न भवति विलपन्तं विविधं भाषमाणं किं विलापयसेऽत्यर्थं नाहं त्वामिच्छामीति ब्रुवाणा अत्र शब्दकर्म्मकत्वात् कर्म्मसंज्ञा कर्त्तृभिप्राये णिचश्चेत्यात्मनेपदं तस्मादिदं प्रार्थ्यते पार्श्वे रावणं शायय अत्राकर्म्मकत्वात्कर्म्मसंज्ञा ॥ ८३ ॥ ज० भ०

प्रीत इत्यादि । अहं प्रीतः सन् भवतीं त्वां भुवनत्रयं भोजयिष्यामि भुवनत्रयसम्बन्धिसुखोपभोगो भुवनत्रयभोगेन लक्ष्यते पूर्व्ववदशनार्थस्य प्रयोज्य-

आज्ञां कारय रक्षोभिर्मां प्रियाण्युपहारय ।
कः शक्रेण कृतं नेच्छेदधिमूर्द्धानमञ्जलिम् ॥ ८४ ॥

इति कारकाधिकारः ॥

वचनं रक्षसां पत्युरनुकुर्वा पतिप्रिया ।
पापानुवसितं सीता रावणं प्राब्रवीद्वचः ॥ ८५ ॥

कर्तुः कर्मत्वं किं रावणं मां अत्यर्थं विलापयसे विविधं भाषयसि शब्दार्थत्वात् प्रयोजस्य कर्मत्वं तस्मादिदं प्रार्थये मां पार्श्वे शाययं स्वापय प्रार्थनायां गो शीङोऽकर्मकत्वात् प्रयोज्यस्य कर्मत्वम् ॥ ८३ ॥ भ०

आज्ञामित्यादि । रक्षांसि त्वदाज्ञां कुर्वन्त्येव कारय प्रियाणि च त्वत्सम्बन्धीनि मासुपहरन्तमुपहारय उत्पादय हृक्रोरन्यतरस्यामिति कर्मसंज्ञा शक्रेण कृतं विरचितं अञ्जलिमधिमूर्द्धानं अधिगतः प्राप्तो मूर्द्धा येनेति को नेच्छेत् स्वतन्त्रत्व इति कर्तृसंज्ञा शक्रेण प्रणतोऽहमित्यर्थः प्रयोज्यकर्त्ता नोदाहृतोऽन्तावस्थायामुदाहृतत्वात् । इति कारकाधिकारः ॥ ८४ ॥ ज० भ०

आज्ञामित्यादि । रक्षोभिराज्ञां कारय तान्याज्ञाकरणाय प्रेरय मां प्रियाणि अभिलषणीयानि उपहारय प्रियाण्युपहर्तुमानेतुं प्रेरय हृक्रुञाभिवादिदृशस्त्रुवेति प्रयोज्यस्य विकल्पेन कर्मत्वं कर्मत्वाभावपक्षे साधनहेत्वित्यादिना कर्तरि तृतीया को जनः शक्रेण कृतं विरचितं अधिमूर्द्धानमञ्जलिं न इच्छेत् अपि तु सर्व एवेच्छति इन्द्रेणाहं प्रणतः त्वामपि मत्प्रियायासौ नमस्करिष्यतीति भावः मूर्द्धानमधिगतः प्राप्तः अधिमूर्द्धा अधिगतो मूर्द्धा येनेति वा अत्र स्वतन्त्रकर्त्तोदाहृतः औपयोज्यकर्त्ता दर्शित एव ल्यर्थेत्यादिना उक्तकर्तरि प्रथमा कर्त्ता क्रियासुख्यः प्रयोजकश्च । इति कारकाधिकारः ॥ ८४ ॥ भ०

इतःप्रभृति कर्मप्रवचनीयमधिकृत्याह ।

वचनमित्यादि । रक्षसां पत्यू रावणस्य वचनमनुलक्ष्योक्त्य अनुर्लक्षण इति कर्मप्रवचनीयसंज्ञायां द्वितीया क्रुङा सती सीता पतिप्रिया पतिः प्रियो यस्या इति रावणं प्राब्रवीद्वचो वक्ष्यमाणं पापानुवसितं पापेन संयुक्तं तृतीयार्थ इत्यनेन कर्मप्रवचनीयसंज्ञायां द्वितीया पापमन्ववसितइति द्वितीयेति योगविभागात्सः सुप्सुपेति वा ॥ ८५ ॥ ज० भ०

न भवानसुरामच्चेदुपशूरेषु वा ततः ।
अपवाह्य कलाद्वीरौ किमर्थं मामिहाहरः ॥ ८६ ॥
उपशूरं न ते वृत्तं कथं रात्रिञ्चराधम ।
यत्त्रस्तप्रत्यपलोकेभ्यो लङ्कायां वसतिर्भयात् ॥ ८७ ॥

अथ कर्मप्रवचनीयाधिकारः सच सप्तमे धिक् समवेत्यादिसूत्रसमूहनिर्दिष्टविभक्त्यधिकारः । वचनमित्यादि ।

पतिः प्रियो यस्याः सा सीता रक्षसां प्रत्यूरावणस्य वचनमनुलक्ष्यीकृत्य तेन हेतुना वा कृद्वा सती रावणं वचो वक्ष्यमाणं प्राब्रवीत् रावणं कीदृशं पापानुवसितं पापमनु पापेन सह वसितं सम्बद्धमिति द्वितीया समासः सिनृगजन् बन्धे अवपूर्व्वात् क्तः वातो वाप्योरिति अवस्यालोपः धिक् समवेत्यादिना अनुयोगे द्वितीया वीप्सेत्यभाविक्रेऽभिस्तेषु भागे परिप्रती। अनुस्तेषु सहार्थे च हीनेऽनूपौ मताविहेति वीप्सादिसम्बन्धं द्वितीया वक्ति अभ्यादयोद्योतका अनुरत्व चिह्नार्थं सहार्थेच चिह्नं लक्षणं हेतावप्यनुयोगे द्वितीयेति केचित् ॥ ८५ ॥ भ०

नेत्यादि । यदि भवान्नानुरामं रामान्न हीन न्यूनः हीन न्यूनेन कर्म्मप्रवचनीयसंज्ञा अनुशब्दस्य स्वल्पार्थद्योतकः हीनस्तोकन्यूनाल्पेत्तः उपशूरेषु वा शूरेभ्यो वा यद्यधिको भवान् उपोधिके चेति चकाराद्धीने उपशब्दस्य कर्म्मप्रवचनीयसंज्ञा यस्मादधिकमित्यनेन सप्तमी उपशब्दस्याधिकद्योतनात् किमर्थं कनकमृगच्छलेन वीरौ रामलक्ष्मणौ अपवाह्य अन्यतो नीत्वा मामिहाहरः लङ्कामानीतवान् ॥ ८६ ॥ ज० भ०

नेत्यादि । किं प्राब्रवीदित्याह । चेद्यदि भवान् अनुरामं रामात् हीनो न भवेत् यदि वा उपशूरेषु शूरेभ्यो यद्यधिको भवान् तदा किमर्थं किंनिमित्तं कनकमृगच्छलेन वीरौ रामलक्ष्मणौ अपवाह्य अन्यतो नीत्वा त्वं मामिहाहरः लङ्कायामानीतवानसि. समर्थोहि जित्वैवानयति हृज्रोधी पूर्व्ववदनुयोगे द्वितीया अनुरत्व हीनार्थे अधिकेशार्थैर्योगाधिभ्यामिति अधिकार्थैर्योगे सप्तमी ॥८६॥भ०

उपेत्यादि । हे रात्रिञ्चराधम कथं ते वृत्तं चरितं नोपशूरं शूरेभ्योन हीनं उपोधिके चेति चकाराद्धीने उपशब्दस्य कर्म्मप्रवचनीयसंज्ञा यद्यस्मात्समत्यधना भयाल्लङ्कायां जलपर्व्वतदुर्गायां वसतिः वसेरिति वसिवर्त्तिभ्यश्चेत्यौणादिकः अपलोकेभ्यो लोकान् वर्जयित्वा अपपरीवर्জ्जन इति कर्म्मप्रवचनीयसंज्ञायां पञ्चम्यपाङ्परिरिति पञ्चमी ॥ ८७ ॥ ज० भ०

आरामदर्शनात् पाप विद्योतस्व स्त्रियः प्रति ।
सदृत्तानवदुर्वृत्तः परिस्त्रीं जातमन्मथः ॥ ८८ ॥
अभिद्योतिष्यते रामो भवन्तमचिरादिह ।
उद्गूर्णबाणः संग्रामे यो नारायणतः प्रति ॥ ८९ ॥

उपेत्यादि । हे रात्रिञ्चराधम कथं ते तव दृत्तं चरितं नोपसूरं सूरेभ्यो न हीनं सूरशब्दोऽत्र लक्षणया सूरदृत्तवाची धिक्समयेत्यादिना द्वितीया उपोऽत्र हीनार्थे यत् यस्मात् सम्मति भयाद्धेतोरपलोकेभ्यो लोकान् वर्ज्जयित्वा लङ्कायां जलपर्व्वतदुर्गायां तव वसतिर्निवासः अन्यारभ्येत्यादिना अपयोगे पञ्चमी अपरित्यागार्थे आङ्मर्य्यादाभिविध्योरित्यागेऽन्यौ प्रतिदाननिधौ प्रतीति अन्यौ पर्य्यपौ ॥ ८७ ॥ भ०

आरेत्यादि । हे पाप आरामदर्शनात् रामदर्शनं यावत् आङ्मर्य्यादावचनेन पूर्व्वदत्पञ्चमी स्त्रियः प्रति योषितोलक्ष्मीकृत्य विद्योतस्व शोभस्व लक्षणेत्थं भूतेति कर्म्मप्रवचनीयत्वं परिस्त्रीजातमन्मथः अत्र वीप्सायां कर्म्मप्रवचनीयत्वम् ॥ ८८ ॥ ज० भ०

आरामेत्यादि । हे पाप दुराचार आरामदर्शनात् रामदर्शनं यावत् स्त्रियः प्रति लक्ष्मीकृत्य विद्योतस्व शोभस्व पूर्व्ववत् सीमार्थाङ्योगे पञ्चमी धिक् समयेत्यादिना चिह्नार्थप्रतियोगे द्वितीया त्वं कीदृशः सदृत्तान् सदाचारान् अनु दुर्वृत्तः दुश्चरित्रः सदाचारेषु कथञ्चित् प्रकारं द्रोहादिकमापन्नो दुर्वृत्तो भवसीत्यर्थः पूर्व्ववदित्थम्भावार्थानुयोगे द्वितीया इत्थम्भावः कस्यचित्प्रकारस्यापत्तिः स्त्रीःपरि लक्ष्मीकृत्य स्त्रीषु कथञ्चित्प्रकारं विहारित्वादिकमापन्नोवा जातकामः पूर्व्ववच्चिह्नार्थे इत्थम्भावार्थे वा परियोगे द्वितीया वीप्सायां परिशब्दस्य कर्म्मप्रवचनीयत्वमिति जयमङ्गला न युक्ता वीप्सायां द्वित्वं लोकतः सिद्धमिति टीकायामुक्तत्वात् क्वचित् सम्बुद्धान्तमिदं विशेषणद्वयं दृश्यते ॥ ८८ ॥ भ०

अभीत्यादि । भवन्तमभि भवन्तं लक्ष्मीकृत्य अभिरभाग इति कर्म्मप्रवचनीयत्वं अचिरादिह लङ्कायां रामो द्योतिष्यते असङ्गतेजा भविष्यति य उद्गूर्णबाणः उद्यतबाणः सङ्ग्रामे नारायणतः प्रति तेन तुल्यः प्रतिनिधिः प्रति प्रतिनिधीति प्रतिनिधौ कर्म्मप्रवचनीयत्वं प्रतिः प्रतिनिधि प्रतिदाने च यस्मादिति पञ्चमी प्रतियोगे पञ्चम्यास्तसिः मुख्यसदृशः प्रतिनिधिः ॥ ८९ ॥ ज० ज०

अभीत्यादि । भवन्तमभि लक्ष्मीकृत्य रामोऽचिरादिह लङ्कायां द्योतिष्यते

कुतोऽधियास्यसि क्रूर निहतस्तेन पत्तिभिः ।
न सूक्तं भवतात्युग्रमतिरामं मदोद्धत ॥ ६० ॥
परिशेषं न नामापि स्थापयिष्यति ते विभुः ।
अपि स्थाणुं जयेद्रामो भवतो ग्रहणं कियत् ॥ ६१ ॥

असह्यतेजा भविष्यतीत्यर्थः पूर्ववत् चिक्रार्थाभियोगे द्वितीया यो रामः संयामे उद्गूर्णबाण उद्यतकाण्डः सन् नारायनतः प्रति तेन तुल्यः अन्यारभेत्यादिना प्रतिनिध्यर्थ प्रतियोगे पञ्चमी प्रसक्तेरिति पञ्चम्यास्तस् ॥ ८६ ॥ भ०

कुत इत्यादि । हे क्रूर तेन रामेण उद्गूर्णबाणेन पत्तिभिः शरैः निहतः सन् कुतोऽधियास्यसि केन प्रकारेण निःसरिष्यसि अधिपरीअनर्थकाविति अधेः-कर्मप्रवचनीयसंज्ञा धात्वर्थव्यतिरेकेणार्थस्यानभिधानादनर्थकत्वं संज्ञाच गत्युप-सर्गसंज्ञाबाधनार्था तेन तिङि चोदात्तवतीति निघाताभावोद्रष्टव्यः पञ्चमी च प्रश्नाख्यानयोरित्युपसंख्यानात् भवति किमिति हनिष्यतीति चेत् यतो भवता न सूक्तं प्रशस्तमुक्तं सुः पूजायामिति कर्मप्रवचनीयत्वं गतिरनन्तर इति स्वराभावः अत्युग्रमतिरौद्रं अतिरामं राममधिक्षिप्य काकुत्स्थमधन्यमिति अतिरतिक्रमणे चेति कर्मप्रवचनीयत्वं चकारात्पूजायाञ्च तत्रचाप्युक्तमिति प्रयोगः हे मदोद्धत ॥ ६० ॥ ज० म०

कुत इत्यादि । हे क्रूर तेन रामेण संयामे पत्तिभिः शरैर्निहतः सन् कुतस्त्वं अधियास्यसि सर्वतोभावेन कस्मात् निःसरिष्यसि हे मदोद्धत अतिरामं राममतिक्रम्य अवक्षिप्य अत्युग्रं अतिरौद्रं भवता न सूक्तं न शोभनमुक्तं रामा-क्षेपकं तव पूर्ववचनं मिथ्यैवेति भावः धिक्समयेत्यादिना अतियोगे द्वितीया ॥ ६० ॥ भ०

परीत्यादि । रामो विभुः प्रभुः ते परिशेषं नामापि संज्ञामपि न स्थापयि-ष्यति किमु देहं अपिः पदार्थेत्यादिना पदार्थे कर्मप्रवचनीयसंज्ञा पदस्य देहस्या-न्ययुज्यमानस्यार्थे अपिशब्दो वर्त्तते अपि स्थाणुं जयेद्रामो यमाराध्याधिमत्यं प्राप्त वानसि तमपि स्थाणुं महादेवं जेतुं सम्भाव्यते भवतो ग्रहणं कियत् वक्तव्य न भवति अत्र संभावनायां कर्मप्रवचनीयत्वं सम्भावने लिङ् उपसर्गबाधनत्वात्सं-ज्ञाया उपसर्गात्सुनोतीत्यादिना षत्वं न भवति ॥ ६१ ॥ ज० म०

परीत्यादि । स प्रभूरामस्ते तव परिशेषं नामापि संज्ञामपि न स्थापयिष्यति किं पुनः शरीरं अत्रापि शब्देन देहस्य समुच्चयात् अतार्ज्ञायां स्वती नातिक्रमेऽतिः

अपि स्तुह्यपिसेधास्मांस्तथ्यमुक्तं नराशन ।
अपि सिञ्चेः क्षणावौ त्वं दर्पं मय्यपि योऽभिकः ॥ ९२ ॥
अधिरामे पराक्रान्तमधिकर्त्ता स ते क्षयम् ।
इत्युक्ता मैथिली तूष्णीमासाञ्चक्रे दशाननम् ॥ ९३ ॥

पर्य्याप्तौ गतौ । अपिः पदार्थसंभाव्यगर्हानुज्ञासमुच्चये इत्यनेनोपसर्गत्वाभावः तेन व्यख्यन्यनुकारेत्यादिना न समासः धातुपूर्व्वत्वनियमाभावः गीकःस्तुस्तुभेत्यादिना न षत्वञ्च परैरेतदर्थं कर्म्मप्रवचनीयसंज्ञा कृता कुतस्तस्यैवं सामर्थ्यमित्याह रामः स्थाणुमपि जयेत् यमाराध्य त्वमाधिपत्यं प्राप्तवान् तमपि स्थाणुं महादेवं स जयेदिति सम्भाव्यते अपिशब्दः सम्भावनायाद्योतकः तवैव स्त्री तेन रामेण बलाद्भवतो यद्दर्पं कियत् अल्पायाससाध्यमेव पूर्व्ववत् षत्वनिषेधः ॥ ९१ ॥ भ०

अपीत्यादि । हे नराशन मया तथ्यमुक्तं यद्रामापि न स्थापयिष्यतीति अस्मानपि स्तुहि साधूक्तमिति प्रशंस सेर्ह्यपिच्चेति अपितिङित्त्वाद्गुणाभावः अपिसेध निग्टहाण यथेच्छं तथा क्रियतां मया तु सत्यमेवोक्तमिति भावः अत्रानुपसर्गे कांमचारानुज्ञाने कर्म्मप्रवचनीयसंज्ञा किञ्च क्षणावग्नौ दर्पं अपि सिञ्चेः क्षरेत्यं अत्र गर्हायां लिङि रूपं योऽयं मय्यपि महिषयेऽपि अभिकः कामयिता अनुकाभिकेत्यादिना निपातितः उपसर्गसंज्ञाबाधनार्थत्वात् स्तौतिसेधिसिचां षत्वं न भवति ॥ ९२ ॥ ज० म०

अपीत्यादि । हे नराशन परिशेषं न नामापि स्थापयिष्यतीति तथ्यं सत्यमेव मयोक्तं त्वमस्मान् अपि स्तुहि साधूक्तमिति प्रशंस अपिसेध निग्टहाण यथा तवेच्छा तथैव क्रियतां मया तु सत्यमेवोक्तमिति भावः अत्रापिवद्भः समुच्चयेऽनुज्ञायां वा पूर्व्ववत्षत्वनिषेधः ष्टुञ्स्तुतौ विधूग्विशेषास्त्वे स्त्री रूपं त्वं क्षणावौ वह्नावेव दर्पं अपिसिञ्चेत् सुच्च अत्रापिशब्दो गर्हायां पूर्व्ववत् षत्वनिषेधः यद्यपि जात्वपिभ्यां सदाचेमे इति कालसामान्ये गर्हायां की विहिता तथापि पदसंस्कारात् विधौ स्त्री अयतः स्यात् अत्र दर्पशब्देन दर्पजनकत्वाद्रेत उच्यते यस्त्वं मय्यपि महिषये अभिकः कामुकः ॥ ९२ ॥ भ०

अधीत्यादि । पराक्रान्तस्य शौर्य्यस्य राम ईप्सितेत्यस्मिन्नध अधिरामे पराक्रान्तं नपुंसके भावे क्तः अधिरीश्वर इति स्वस्वामिसम्बन्धे अधेः कर्म्मप्रवचनीयसंज्ञा यस्मादधिकमित्यादिना सप्तमी यश्चैवं स रामस्ते क्षयमधिकर्त्ता करिष्यति अत्र कर्म्मण्येव द्वितीया न कर्म्मप्रवचनीययुक्त इति विभाषाक्रतीति

ततः खड्गं समुद्यम्य रावणः क्रूरविग्रहः ।
वैदेहीमन्तरा क्रुद्धः क्षणमूचे विनिश्वसन् ॥ ६४ ॥
चिरेणानुगुणं प्रोक्ता प्रतिपत्तिपराङ्मुखी ।
न मासे प्रतिपत्तासे माञ्चेन्मर्त्तासि मैथिलि ॥ ६५ ॥

या संज्ञा तस्या गत्युपसर्गसंज्ञाबाधनार्थत्वात् संज्ञापक्षे तिङि चोदात्तवतीति निघाताभावो द्रष्टव्य इति एवमुक्ता दशानने मैथिलीतूष्णीमासाञ्चक्रे तूष्णीं स्थितवती । इति कर्म्मप्रवचनीयाधिकारः ॥ ६३ ॥ ज० म०

अधीत्यादि । रामः पराक्रमस्य स्वामीत्यर्थे अधिरामे अधिकेशार्थोपाधिभ्यामिति सप्तमी पराक्रान्तमिति भावे क्तः अधिरामे पराक्रान्तं यथा भवति तथा स रामस्ते तव क्षयं अधिकर्त्ता अधिकं करिष्यति स्वकीयपराक्रमेण क्षयं करिष्यतीत्यर्थः इति दशाननमुक्ता मैथली तूष्णीं मौनेन आसाञ्चक्रे स्थितवती र्व्विजादीत्याम् । इति कर्म्मप्रवचनीयाधिकारः ॥ ६३ ॥ भ०

इतः प्रभृत्यनभिहित इत्यधिकृत्य विभक्तिविधानमाह ।

तत इत्यादि । ततः सीतावचनादुत्तरकालं रावणः खड्गं समुद्यम्य उत्क्षिप्य कर्म्मणि द्वितीया क्रूरविग्रहः दुःप्रेक्ष्यत्वात् वैदेहीमन्तरा क्रुद्धः वैदेह्यामध्ये कुपितः अन्तरान्तरेण युक्त इति षष्ठ्यपवादाद्द्वितीया अन्तराशब्दो मध्यमाधेयप्रधानमाचष्टे आधेयश्चात्र क्रुद्धो रावणः क्षणमूचे उक्तवान् उक्तिक्रियया क्षणस्य कालस्य साकल्येन सम्बन्धात् कालाध्वनोरिति द्वितीया विनिश्वसन् क्रोधात् ॥६४॥ ज०म०

अथानभिहिताधिकारः । अथानभिहित इत्यधिकृत्य पाणिनिना या द्वितीयादिविभक्तयो विहितास्ताः कथ्यन्ते स्वमतेऽनभिहिताधिकाराभावेऽपि उक्ते कर्म्मादौ प्रथमा स्यात् पारिशेष्यादनभिहित इत्यवगम्यते । तत इत्यादि । सीतावचनानन्तरं रावणः क्रूरविग्रहो रोषात् दुष्प्रेक्ष्यशरीरः सन् खड्गमुद्यम्य उत्क्षिप्य क्षणं विनिश्वसन् उचे कीदृशः वैदेहीमन्तरा सीतायामध्ये क्रुद्धः मध्यभागं क्रेतुमुद्यत इत्यर्थः किंवा रावणपरिजनश्चेत्यत्राध्याहार्य्यं वैदेहीं रावणः परिजनश्चान्तरा क्रुद्धः वैदेह्यारावणपरिजनस्य चान्तरामध्ये कुपितः सन्नित्यर्थः खड्गमिति कर्म्मणि द्वितीया अन्तराशब्दो मध्यार्थः तद्योगे धिक्समयेत्यादिना द्वितीया क्षणमिति सदाध्वादिव्याप्ताविति द्वितीया विनिश्वासक्रियया वचनेन वा तस्यातिसंयोगसम्बन्धात् ॥ ६४ ॥ भ०

प्रायुङ्क राक्षसीर्भीमा मन्दिराय प्रतिव्रजन् ।
भयानि दत्त सीतायै सर्व्वा यूयं कृते मम ॥ ६६ ॥
गते तस्मिन् समाजग्मुर्भयाय प्रति मैथिलीम् ।

चिरेत्यादि । हे मैथिलि चिरेणापि कालेनानुगुणमनुकूलं मया प्रोक्तापि सती प्रतिपत्तिपराङ्मुखी उक्तस्यार्थस्यानुष्ठानं प्रतिपत्तिः तस्यां पराङ्मुखी इदानीं यदि त्वं मासे त्रिंशद्दिवसलक्षणे मां न प्रतिपत्तासे नाङ्गीकरिष्यसि तदा मर्त्तासि मरिष्यसि उभयमपि लुटि रूपं तत्र चिरेण प्रोक्तेत्यपवर्गे तृतीया विवक्षितार्थप्रकाशनं फलं तस्य प्राप्तौ तत्क्रियापरिसमाप्तिरपवर्ग इति मां मासेन प्रतिपत्तास इति सप्तमीपञ्चम्यौ कारकमध्य इति सप्तमी कर्म्मकर्त्रोः कारकयोर्मध्यत्वात् मासस्य ॥ ६५ ॥ ज० म०

चिरेणेत्यादि । हे मैथिलि चिरेण कालेन मयानुगुणं अनुकूलं प्रोक्तापि तस्योक्तस्य प्रतिपत्तिरनुमतिस्ततः पराङ्मुखी त्वमधुना चेद्यदि मासे त्रिंशद्दिनपरिमिते काले मां न प्रतिपत्तासे नाङ्गीकरिष्यसि तदा मर्त्तासि मरिष्यसि खङ्गप्रहारेणेत्यर्थात् मास इति व्याप्त्रविवक्षया न द्वितीया सत्यामपि व्याप्तौ निर्धारे अधिकेन क्रियान्तः कालाध्वनोश्च प्रीचेति सप्तमी आद्यैका वचनक्रिया अपरा च प्रतिपत्तिक्रिया तन्मध्ये मासः कालस्तेन तद्विषयः मासे अनतिक्रान्ते सतीत्यध्याहृत्य पदं साधयति श्रीपतिः प्रतिपूर्व्वपदोत्तङ्च त्वां रूपम् ॥ ६५ ॥ भ०

प्रायुङ्क्तेत्यादि । रावणो राक्षसीर्भीमा भयानकाः प्रायुक्त समादिष्टवान् लङि रूपं मन्दिराय प्रतिव्रजन् गृहाय प्रतिव्रजन् गत्यर्थकर्म्मणीत्यादिना तु चतुर्थी कर्म्मप्रवचनीयाधिकार एव दर्शितत्वात् किमादिग्रहणात्याह सर्व्वा यूयं सीतायै भयानि दत्त लोटि रूपं चतुर्थीसम्प्रदाने सम्पूज्याहृत्य प्रकर्षेण दीयत इति सम्प्रदानं मम कृते मदनुग्रहनिमित्तम् ॥ ६६ ॥ ज० म०

प्रायुङ्क्तेत्यादि । रावणो मन्दिराय प्रतिव्रजन् गृहं प्रति गच्छन् भीमा भयानका राक्षसीः प्रायुङ्क्तः समादिष्टवान् गत्यर्थमन्यढे इति कर्म्मणि चतुर्थी किमादिग्रहणात्याह सर्व्वा यूयं मम कृते मन्निमित्तं मत्कार्य्याय वा सीतायै भयानि दत्त प्रयच्छत संप्रदाने चतुर्थी यद्यपि स्वस्वत्वध्वंसपूर्व्वेत्यादिलक्षणं दानं भयस्य न सम्भवति आरोपणार्थ एव ददातिरत्रापि दित्साशब्दस्य विवक्षामात्रवचनत्वात् साधुत्वं कृतेशब्दो निमित्तार्थोऽव्ययः क्विपि तादर्थ्ये वा चतुर्थी ॥ ६६ ॥ भ०

गत इत्यादि । तस्मिन् रावणे गते सति राक्षस्यः समाजग्मुः सम्भूय

राक्षसो रावणप्रीत्यै क्रूरञ्चोचुरलं मुहुः ॥ ९७ ॥
रावणाय नमःकुर्य्याः स्वात् सीते स्वस्ति ते ध्रुवम् ।
अन्यथा प्रातराशाय कुर्य्याम त्वामलं वयम् ॥ ९८ ॥

गताः समोगच्छतीत्यादिना आत्मनेपदं न भवति आङाव्यवहितत्वात् मैथिलीं प्रति लक्षीकृत्य भयाय सीतायै भयं दातुं क्रियार्थोपपदस्य कर्म्मणि स्थानिन इति चतुर्थी ददातेः क्रियार्थोपपदस्य स्थानिनः प्रयुज्यमानस्य भयं कर्म्म क्रिया चात्र समागमः तत्रोपपदं क्रियार्थमिति क्रूरञ्च भयानकं मुहुः प्रतिक्षणं अलं पर्य्याप्तमूचुः उक्तवत्यः रावणप्रीत्यै रावणस्यैव प्रीतिः स्यादिति तुमर्थाच्च भाववचनादिति चतुर्थी क्रियायां क्रियार्थायामिति तुमुना समानार्थत्वात् भाववचनाश्चेत्यनेन विहितस्य क्रियार्थ उपपदं क्रूराभिधानम् ॥ ९७ ॥ ज० म०

गते इत्यादि । तस्मिन् रावणे गते सति मैथिलीं प्रति लक्षीकृत्य भयाय सीतायै भयं दातुं राक्षसः समाजग्मुः आङ्व्यवधानात् समोगच्छेति न मं भयायेति नित्यं कर्म्मणि तुमोऽप्रयोगिन इति चतुर्थ्यर्थं परस्कृतं खमते तादर्थ्य एव मैथिलीमिति धिक्समवेत्यादिना प्रतियोगे द्वितीया अथ रावणप्रीत्यै क्रूरं कठोरं अलं अत्यर्थं मुहुर्व्वारंवारं ऊचुः क्रूरमिति क्रियाविशेषणे द्वितीया ॥ ९७ ॥ भ०

रावेत्यादि । हे सीते रावणाय नमः कुर्य्या रावणं नमस्कुरु एवञ्च सति ते तुभ्यं स्वस्ति कल्याणं ध्रुवं स्यात् युष्मच्छब्दस्य चतुर्थ्येकवचनान्तस्य ते आदेशः नमस्कृत्येति पाठान्तरं तत्र नमस्कृत्वा स्थितायै तुभ्यमित्यध्याहृत्य योज्यं अन्यथा क्त्वासमानकर्तृकत्वात् क्त्वाप्रत्ययो न घटते नमस्कृत्येति पाठान्तरं साक्षात्प्रभृतिषु नमश्शब्दस्य विकल्पेन गतिसंज्ञा गत्यभावपक्षे नित्यं गतिसमासाभावे अवादेशः नमस्पुरसोर्गत्योरिति विसर्जनीयस्य सकारादेशश्च न सम्भवतीति अन्यथेति यदि न नमस्कुर्य्याः तदा अलमातराशाय प्रातर्भोजनाय त्वां कुर्य्याम वयमित्यूचुः नित्यं ङित इति सलोपः रावणायेत्यादिषु नमःस्वस्तीत्यादिना चतुर्थी ॥ ९८ ॥ ज०म०

रावणायेत्यादि । किमूचुरित्याह हे सीते त्वं रावणाय नमः प्रणामं कुर्य्याः तेनैव ध्रुवं ते तुभ्यं स्वस्ति कुशलं स्यात् शक्तार्थवषडित्यादिना नमःस्वस्तियोगे चतुर्थी नमःशब्दोऽयं यदा वाचक एव तदा तद्योगे चतुर्थीति बोध्यं नारायणं नमस्कृत्येत्यादिषु नमःशब्दोद्योतकः क्रञ्येव प्रणामं वक्ति तेन तद्योगे न चतुर्थी किन्तु द्वितीया नमस्कुर्य्या इति सकारवत्पाठे हस्तेपाणावित्यादिना

तृणाय मत्वा ताः सर्व्वा वदन्तीस्त्रिजटावदत् ।
आत्मानं हतदुर्व्वृत्ताः स्वमांसैः कुरुताशनम् ॥ ९९ ॥
अद्य सीता मया दृष्टा सूर्य्यं चन्द्रमसा सह ।
स्वप्ने स्पृशन्ती मध्येन तनुः श्यामा सुलोचना ॥ १०० ॥

सान्तादादित्वात्पक्षे समासः सेतुकस्वपफेवेति पक्षे विसर्गस्य सकारः नमस्कृत्येति पाठे स्थिताया इत्यध्याहार्य्यं विष्णुं नत्वा स्तौतीत्युदाहरणेन एककर्तृकधात्वन्वयोगे पूर्व्वकाले क्त्वाचोक्तापितत्वात् अन्यथा यदि रावणं न प्रणमसि तदा प्रातराशाय प्रातर्भोजनायालं समर्था त्वां वयं कुर्य्याम प्रातर्भोक्ष्याम इत्यर्थः अलंशब्दः शक्त्यर्थस्तेन तद्योगे चतुर्थी ॥ ९८ ॥ भ०

तृणेत्यादि । अथानन्तरं राक्षसीर्व्वदन्तीः त्रिजटा रावणस्वसा अवदत् उक्तवती तृणाय मत्वा तृणमिव सङ्गण्य मन्यकर्म्मण्यनादर इति चतुर्थी तत्र कुत्सितत्वहरणं कर्त्तव्यमित्युक्तं इह माभूत् तृणं मत्वेति किमवदत् आत्मानं हत मारयत दुर्व्वृत्ताः दुराचाराः स्वमांसैः कुरुताशनमिति करणे तृतीया ॥ ९९ ॥ ज० भ०

तृणायेत्यादि । इति वदन्तीस्ताः सर्व्वा राक्षसीस्तृणाय मत्वा तृणवन्मत्वा त्रिजटा नाम राक्षसी वक्ष्यमाणमवदत् गत्यर्थमन्यढ इति अवज्ञाबोधकत्वात् कर्म्मणि चतुर्थी राक्षसीशब्दोनावज्ञाबोधकः तेन तच्छब्दात् कर्म्मणि न चतुर्थी किन्तु द्वितीया किमवददित्याह हे दुर्व्वृत्ता दुराचारा यूयं आत्मानं हत मारयत स्वकीयैर्म्मांसैरशनं भोजनं कुरुत यतः सीताभोजनोद्यताः करणे तृतीया वनतनाद्यनिमामिति हनेर्नलोपः ॥ ९९ ॥ भ०

किमर्थमेवमाहेत्याह

अद्येत्यादि । स्वप्ने मया अद्य सीता दृष्टा कर्त्तरि तृतीया सूर्य्यं स्पृशन्ती चन्द्रमसा सह सहयोगे तृतीया सूर्य्याचन्द्रमसाविति रामलक्ष्मणाविति भावः मध्येन तनुः तन्वी इत्यभूततद्भावे तृतीया वोतोगुणवचनादिति ङीभावपक्षे रूपं श्यामा वर्णेन सुलोचना शोभननेत्रा ॥ १०० ॥ ज० भ०

अद्येत्यादि । अद्य स्वप्ने मया सीता दृष्टा कर्त्तरि तृतीया कीदृशी चन्द्रमसा सह सूर्य्यं स्पृशन्ती एतादृशः स्वप्नः सान्नाज्यलक्षणमिति केचित् सूर्य्याचन्द्रमसाविव रामलक्ष्मणाविति व्याख्यत इति जयमङ्गला सहवारणेति सहयोगे तृतीया मध्येन तनूः तन्वी भेदके तृतीया श्यामा शीते सुखोष्णसर्व्वाङ्गी

तास्तया तर्जिताः सर्वा सुखैर्भीमा यथागतम् ।
ययुः सुषुप्सवस्तल्पं भीमैर्वचनकर्म्मभिः ॥ १०१ ॥
गतासु तासु मैथिल्याः संजानानोऽनिलात्मजः ।
आयातेन दृशास्यस्य संस्थितोऽन्तर्हितश्चिरम् ॥ १०२ ॥
ऋणाङ्गेर्ङ इवोन्मुक्तो वियोगेन क्रतुद्विषः ।
हेतोर्बोधस्य मैथिल्याः प्रास्तावीद्रामसङ्कथाम् ॥ १०३ ॥

ग्रीष्मे या सुखशीतला । तत्प्रकाञ्चनवर्णाभा सा स्त्री श्यामेति कथ्यते । श्यामवर्णेनेत्यन्ये सुलोचना शोभननेत्रा ॥ १०० ॥ भ०

ता इत्यादि । ता राक्षस्तया विजटया तर्जिता भर्त्सिताः सुषुप्सवः स्वप्तुमिच्छवस्तल्पं शयनीयं ययुर्गताः यथागतं यतोयतस्तल्पादुत्थायागताः यथा सादृश्य इति वीप्सायामव्ययीभावः सुखैर्भीमा रौद्राः सुखानां विकृतत्वात् येनाङ्गविकार इति तृतीया भीमैर्वचनकर्म्मभिः उपलक्षिताः इत्यम्भूते तृतीया ॥ १०१ ॥ ज० म०

ता इत्यादि । ताः सर्वा राक्षसः तया विजटया तर्जिता भर्त्सिताः सत्यः सुषुप्सवः शयितुमिच्छवस्तल्पं ययुः यथागतं यस्माद्यस्मात् उत्थायागतास्तत्र तत्रैव वीप्सायामव्ययीभावः सुखैर्भीमाः सुखविकारोपलक्षिताः भेदके तृतीया येनाङ्गेनाङ्गिनो विकृतिर्लक्ष्यते तस्मादिति परः भीमैर्वचनकर्म्मभिरुपलक्षिताः विशेषणे तृतीया तल्पं शय्याट्टदारेष्वित्यमरः ॥ १०१ ॥ भ०

गतेत्यादि । तासु राक्षसीषु गतासु अनिलात्मजो हनूमान् रामसङ्कथां प्रास्तावीदिति वक्ष्यमाणेन सम्बन्धः मैथिल्या सञ्जानानः इयं सेत्यवगच्छन् संक्षोभ्यतरक्षामिति कर्म्मणि तृतीया सम्मतिभ्यामिति तङ् दृशास्यस्यायातेनागमनेन हेतुना चिरमन्तर्हितो निलीनः स्थितः हेताविति तृतीया॥१०२॥ज०म०

गतास्वित्यादि । तासु राक्षसीषु गतासु सतीषु अनिलात्मजो हनूमान् रामसङ्कथां प्रास्तावीत् प्रावर्त्तयदिति वक्ष्यमाणश्लोकेनान्वयः कीदृशः मैथिल्या सञ्जानानः सैवेयमित्यवगच्छन् संक्षोभ्यतावितिं कर्म्मणि तृतीया सम्मतेरक्षतावितिं कर्म्मणि तृतीया सम्मतेरक्षतावितिं मं दृशास्यस्यायातेनागमनेन हेतुना अन्तर्हितो विलीनः सन् चिरं संस्थितः हेतौ तृतीया ल्यभावक्तेति दृशास्यात् कर्त्तरि षष्ठी सम्बन्धविवक्षया वा ॥ १०२ ॥ भ०

ऋणादित्यादि । ऋणाङ्गेर्ङ इवोन्मुक्तोयथा स्थानान्तरं गतवान्

तं दृष्ट्वा चिन्तयत् सीता हेतोः कस्यैष रावणः ।
अवरुह्य तरोरारादैति वानरविग्रहः ॥ १०४ ॥

अकर्तृकरण इति पञ्चमी करणस्याकर्तृहेतुत्वात् करणेन वञ्चित इवेति नोक्तं अप्रयोजकं कर्तृत्वादस्य उन्मुक्तः कृतद्विषो रावणस्य वियोगेन विश्लेषेण विभाषा-गुणेऽस्त्रियामिति पक्षे तृतीयोदाहृता न पञ्चमी वियोगस्य गुणपदार्थत्वात् सङ्ख्यां प्रस्तावीदित्याह हेतोर्बोधस्य मैथिल्याः एष रामदूत इति मैथिल्या बोधोऽवगमः स्यात् षष्ठीहेतुप्रयोग इति बोधशब्दस्य षष्ठी प्रास्तावीदिति स्तुस्तु-धूभ्यः परस्मैपदेष्विति नेटीति फलन्तलक्षणायाष्टेः प्रतिषेधः नेगन्तलक्षणायाः ॥ १०३ ॥ जं० म०

करणादित्यादि । हनूमान् कीदृशः कृतद्विषो रावणस्य वियोगेन विश्लेषेण हेतुना उन्मुक्तः स्वच्छन्दः यथा करणाद्धेतोर्बद्धः सन् उन्मुक्तः स्थानान्तरं गत-स्तद्वत् हेतौ पञ्चमी तृतीया च दर्शिता किमर्थं रामसङ्ख्यां प्रास्तावीदित्याह एष रामदूत इति मैथिल्या यो बोधस्तस्य हेतोस्तदर्थं प्रयोजनमपि हेतुरुच्यते तदु-द्देशेन कार्योत्पत्तेः त्रादयोऽर्थाधैकक्तेरिति षष्ठी सुस्तुधोः सेरिम्से इतीम् व्रज-वदेति त्रिः ॥ १०३ ॥ भ०

तमित्यादि । तं हनूमन्तं रामं स्तुवन्तं दृष्ट्वा सीता अचिन्तयत् कस्य हेतोः रावणो वानरविग्रहः सन् ऐति आयाति आङ्पूर्वस्येणोरूपं सर्वनाम्नस्तृतीया चेति षष्ठी किंशब्दस्य सर्वनामत्वात् आरात् अन्तिके तरोरिति अन्यारादित्या-राच्छब्दयोगे पञ्चमी अवरुह्यावतीर्य्येति अवरोहणापेक्षयेत्यपादाने पञ्चमी अपेक्षा आयोगपद्याभावादुपपदविभक्तेः कारकविभक्तिर्बलीयसी आरादियोगे न वर्त्तते ॥ १०४ ॥ जं० म०

तमित्यादि । तं रामं स्तुवन्तं हनूमन्तं दृष्ट्वा सीताचिन्तयत् किं चिन्तित वतीत्याह कस्य हेतोः किमर्थं रावणोऽयं वानरमूर्त्तिः सन् अवरुह्य दृष्ट्वान्तरा-दर्थात् तरोरारात् तदाश्रितवृक्षस्य समीपे ऐति आगच्छति आङ्पूर्वइणगतौ कस्य हेतोरिति त्रादयोऽर्थाधैकक्तेः श्रेसुसर्व्वा इति षष्ठी तरोरित्यादृत्या उभ-यत्र सम्बन्धादेकत्वापादाने पञ्चमी अपरत्र अन्यारभ्येत्यादिना द्वयमेवोदाहृतं अपादानपञ्चम्याः कारकाधिकारे दर्शितत्वात्तरोरित्यस्यावरुह्येत्यनेन सम्बन्धो न विवक्षितः आरादित्यनेनैव सम्बन्ध इति केचित् उपपदविभक्तेः कारकविभक्ति-र्गरीयसीत्यपादान एव पञ्चमीति केचित् ॥ १०४ ॥ भ०

पूर्व्वस्मादन्यवद्भाति भावाद्दाशरथिं स्तुवन् ।
ऋते क्रौर्य्यात्समायातो मां विश्वासयितुं नु किम् ॥ १०५ ॥
इतरो रावणादेष राघवानुचरो यदि ।
सफलानि निमित्तानि प्राक् प्रभातात्ततो मम ॥ १०६ ॥
उत्तराहि वसन् रामः समुद्राद्दक्षसां पुरम् ।
अवैत्लवणतोयस्य स्थितां दक्षिणतः कथम् ॥ १०७ ॥

पूर्व्वेत्यादि । पूर्व्वस्माद्रावणादन्यवद्भाति ज्ञायते अन्येन तुल्यं वर्त्तत इति ज्ञात्वा अन्यशब्दयोगे पञ्चमी यतोभावात्स्नेहाद्दाशरथिं स्तुवन् किन्तु क्रौर्यादृते क्रौर्यं वर्जयित्वा ऋतेशब्दयोगे पञ्चमी मान्विश्वासयितुं सम्भावयितुं किमागत इत्यचिन्तयत् ॥ १०५ ॥ ज० म०

पूर्व्वस्मादित्यादि । अयं पूर्व्वस्माद्रावणादन्य इव भाति प्रकाशते अन्यारभ्येति पञ्चमी कुत इत्याह भावादभिप्रायाद्धेतोर्दाशरथिं स्तुवन् हेतौ पञ्चमी क्रौर्यात् ऋते रामविषये क्रूरतां विना मां विश्वासयितुं किन्नु समायातः नु वितर्के ऋते योगे पूर्व्ववत्पञ्चमी भावः स्वभावेऽभिप्राये चेष्टासत्तात्मजन्मसु । क्रियालीलापदार्थेषु दृङ्जन्तुर्विभूतिष्विति विश्वः ॥ १०५ ॥ भ०

इत इत्यादि । यदि रावणादितरः प्रतियोगी राघवानुचरः राघवार्थकारी इतरयोगे पञ्चमी ततो मम सफलानि स्वप्नलक्षणानि दर्शनादीनि निमित्तानि प्राक् प्रभातात् आदित्योदयात्पूर्व्वस्मिन् काले अन्यस्य हि प्रभातादुत्तरकालं सफलानि उत्तरपदयोगे पञ्चमी ॥ १०६ ॥ ज० म०

इतर इत्यादि । एष यदि रावणादितरोऽन्यः राघवानुचरः रामप्रयोजनकारी भवेत् मम प्राक् प्रभातात् सूर्य्योदयात् पूर्व्वकाले यानि शुभस्य निमित्तानि स्वप्नदर्शनादीनि तानि मम सफलानि स्युः इतरशब्दोऽन्यार्थः तद्योगे दिक्शब्दयोगे च पञ्चमी दिक्शब्दाद्दिग्देशकालेस्तात्तस्य लुक्च ॥ १०६ ॥ भ०

उत्तरेत्यादि । रामदूतोऽयमिति न सम्भाव्यते यतः समुद्रादुत्तरा या दिक् तस्यामुत्तराहि वसन् रामः आहिचदूरे उत्तराञ्चेति तत्राहिप्रत्ययान्तेन उत्तराहिशब्दन योगे समुद्रादिति पञ्चमी लवणतोयस्य लवणसमुद्रस्य दक्षिणतो दक्षिणस्यां दिशि स्थितां रक्षसां पुरीं लङ्कां कथमवैत् ज्ञातवान् दक्षिणत इति दक्षिणोत्तराभ्यामतसुच् तदन्तेन योगे षष्ठ्यतसर्थप्रत्ययेनेति षष्ठी ॥ १०७ ॥ ज० म०

दण्डकान् दक्षिणेनाहं सरितोऽद्रीन् वनानि च ।
अतिक्रम्याम्बुधिञ्चैव पुंसामगममाहृता ॥ १०८ ॥
पृथक्नभस्वतश्चण्डाद्वैनतेयेन वा विना ।
गन्तुमुत्सहते नेह कश्चित् किमुत वानरः ॥ १०९ ॥
इति चिन्तावतीं कृच्छ्रात् समासाद्य कपिद्विपः ।

उत्तरेत्यादि । अथ रामदूतोऽयं न सम्भाव्यते यत इतः समुद्रादुत्तरस्यां दिशि वसन् रामो लवणतोयस्य समुद्रस्य दक्षिणस्यां दिशि स्थितां रक्षसां पुरं लङ्कां कथमवैत् ज्ञातवान् दक्षिणोत्तरादाहोति सप्तम्या आहि अन्यारभ्येति दिक्शब्दयोगे पञ्चमी तस्त्रोरिति सप्तम्यास्तम् तद्योगे समार्थेनेत्यादिना षष्ठी ॥ १०७ ॥ म०

दण्डेत्यादि । दण्डकानामदूरे या दक्षिणा दिक् तस्यामिति एनवन्यतरस्यामिति सप्तम्यन्तादेनप्प्रत्ययः तदन्तेन योगे एनपाद्वितीयेति द्वितीया दक्षिणेन दण्डकानां दक्षिणस्यां दिशि सरितोऽद्रीन्वनानि च अम्बुधिं चातिक्रम्य पुंसामगममगम्यं अहृतदनिश्चिगमश्चेत्यप् अहमाहृता आनीता तत्कथमवैदित्यचिन्तयत् ॥ १०८ । ज० म०

दण्डकानित्यादि । दण्डकाया अदूरे दक्षिणस्यां दिशि स्थितानि सरितोऽद्रीन् वनानि च अम्बुधिञ्चातिक्रम्य पुंसामगमसिद्धान्तं यथा स्यात्तथाहमाहृता पुंसामगम्यं देशं प्रापिता वा न विद्यते गमो ज्ञानं यत्र तत्कथमवैदिति सम्बन्धः वनोऽपीति सप्तम्या एनः तद्योगे धिक्समयेत्यादिना द्वितीया एनोऽपञ्चम्या इति परस्परसात् कृत्तद्धितसमासानामभिधानं नियामकमित्युक्तेरदूरार्थमपि बोध्यं दण्डकाशब्दोवनेऽपि स्त्रीलिङ्गः नित्यबहुवचनान्तः पुंलिङ्ग इत्यन्ये तन्मते दण्डकानिति पाठः ॥ १०८ ॥ ज० म०

पृथगित्यादि । नभस्वतो वातात् चण्डात् पृथक् वायुं त्यक्त्वा वैनतेयेन वा विना गरुडं वा वर्जयित्वा पृथग्विनेत्यादिना तृतीयापञ्चम्यौ इह लङ्कायां कश्चित् गन्तुं नोत्सहते किमुत वानरः ॥ १०९ ॥ ज० म०

पृथगित्यादि । चण्डान्नभस्वतो वातात् पृथगन्यः वैनतेयेन गरुडेन वान्यः कश्चिदिह गन्तुं न उत्सहते किं पुनर्वानरः इत्येवमचिन्तयदिति सम्बन्धः पृथक्शब्दोऽन्यार्थस्तेन तद्योगे विना योगे च अन्यारभ्येत्यादिना पञ्चमी नभस्वन्तं वैनतेयञ्च वर्ज्जयित्वेत्यर्थ इति केचित् किमुतेत्यव्ययं पुनरर्थे ॥ १०९ ॥ म०

मुक्तां स्तोकेन रक्षोभिः प्रोचेऽहं रामकिङ्करः ॥ ११० ॥
विप्रकृष्टं महेन्द्रस्य न दूरं विन्ध्यपर्वतात् ।
नानभ्यासे समुद्रस्य तव माल्यवति प्रियः ॥ १११ ॥
असंप्राप्ते दशग्रीवे प्रविष्टोऽहमिदं वनम् ।
तस्मिन् प्रतिगते द्रष्टुं त्वामुपाक्रंस्यचेतितः ॥ ११२ ॥

इतीत्यादि । एवमुक्तो न प्रकारेण चिन्तावतीं कपिद्विपो हनूमान् क्लेशात्समासाद्य कथमप्युपगम्य अहं रामकिङ्करः रामप्रेषणकर इति प्रोचे मुक्तां स्तोकेनाल्पेन रक्षोभिः कर्तृभिः करणेन च स्तोकाल्पेत्यादिना तृतीयापञ्चम्यौ क्लेशस्तोकयोरसत्ववचनयोः करणत्वात् ॥ ११० ॥ ज० म०

इतीत्यादि । कपिद्विपः कपिश्रेष्ठो हनूमान् तां सीतां क्लेशात् चिरकालान्वेषणेन समासाद्य प्राप्य अहं रामस्य किङ्करः परिचारक इति प्रोचे वदति स्म कीदृशीं एवमुक्तप्रकारेण चिन्तायुक्तां रक्षोभिः स्तोकेनाल्पेन मुक्तां त्यक्तां करणे कतिपयस्तोकाल्पक्लेशादसत्त्व इति सूत्रेण विभाषया पञ्चमीमाह परः स्वमते क्लेशादिति हेतौ पञ्चमी स्तोकेनेति करणे तृतीया ॥ ११० ॥ भ०

यदि त्वं रामकिङ्करः कासावित्याह विप्रेत्यादि ।

माल्यवति पर्वते तव प्रियो रामः महेन्द्रस्य पर्वतस्य विप्रकृष्टं दूरं विन्ध्यपर्वताच्च न दूरं दूरान्तिकार्थैः षष्ठ्यन्यतरस्यामिति षष्ठीपञ्चम्यौ महेन्द्रपर्वतविन्ध्ययोर्दूरविप्रकृष्टयोस्तु दूरान्तिकार्थेभ्यो द्वितीया चेति द्वितीया नानभ्यासे न दूरे समुद्रस्य दूरान्तिकार्थैरिति षष्ठी माल्यवति सप्तम्यधिकरणे चेति सप्तमी चकाराद्दूरान्तिकार्थेभ्यश्च यस्य च भावेनेत्यनेनानभ्यास इति सप्तमी ॥ १११ ॥ ज० म०

विप्रेत्यादि । यदि त्वं रामकिङ्करस्तदा कासावित्यत इदमुच्यते तव प्रियो माल्यवति पर्वते वर्त्तते महेन्द्रस्य पर्वतविशेषस्य न विप्रकृष्टं न दूरं विन्ध्यनाम्नः पर्वतात् न दूरं समुद्रस्य नानभ्यासे न दूरे वारादर्थैरिति विन्ध्यपर्वतशब्दात् पक्षे पञ्चमी तदप्रवृत्तिपक्षे सम्बन्धे षष्ठ्येव आरादर्थैरिति दूरान्तिकार्थैः दूरान्तिकार्थादसत्त्वेऽमुटाङसिर्ङिश्चेति परः स्वमते विप्रकृष्टादयोदेशार्थत्वे विवक्षिताः स्थितिक्रियात्वर्थाल्लभ्यत एव तेनास्तीत्यध्याहारात् देशाध्वकालभावबाढैरिति पात्रिककर्मत्वं कर्मत्वाभावपक्षे सप्तमी ॥ १११ ॥ भ०

असमित्यादि । दशवदने असंप्राप्ते अप्रविष्टे अहमचेतितः सन् इदं वन-

तस्मिन् वदति दृष्टोऽपि नाकार्षं देवि विक्रमम् ।
अविनाशाय कार्यस्य विचिन्वानः परापरम् ॥ ११३ ॥
वानरेषु कपिः स्वामी नरेष्वधिपतेः सखा ।
जातो रामस्य सुग्रीवस्ततो दूतोऽहमागतः ॥ ११४ ॥

मयोकवनिकाख्यं प्रविष्ट इति तस्मिन् प्रति गते त्वां द्रष्टुमुपाक्रंसि सप्तम्यर्थे क्त यस्य च भावेनेति सप्तमी क्रमेः प्रवेशोपक्रमयोः रावणसंप्राप्तिप्रतिगमनक्रियाभ्यां लक्ष्यमाणत्वात् उपाक्रंसीति उपपराभ्यामित्यनेन दृत्यादिषु सर्ग लत्वाहे क्रमेस्तङ् उत्तमपुरुषैकवचनं दृट् स्त्रीक्रमोरनात्मनेपदनिमित्त इति सिच् दृट् न भवति ॥ ११२ ॥ ज० म०

असमित्यादि । रावणे असंप्राप्ते अनायाते सति अहमचेतितोऽज्ञातः सन्निदं वनं प्रविष्टः प्रवेशस्य गतिविशेषत्वात् गत्यर्थाढेति कर्त्तरि क्तः तस्मिन् प्रतिगते सति त्वां द्रष्टुं साक्षात्कर्त्तुं अहं उपाक्रंसि उद्यतोऽस्मि प्रोपादारभ्य इति मं ह्यांसिः उपाक्रंसि उत्वाहं कृतवानस्मीति वार्थः दृत्युत्वाहृतायन इति मं कालभावाधारमिति उभयत्र भावे सप्तमी ॥ ११२ ॥ भ०

यद्यादावेव प्रविष्टोऽसि तर्हि किमिति स्वकर्म्म न दर्शितवानसीत्याह

तस्मिन्नित्यादि । हे देवि तस्मिन्वदति दृष्टोऽपि विक्रमं नाकार्षं तं तथा वदन्तमनादृत्य विक्रमं नाकार्षमित्यर्थः षष्ठीचानादर इति चकारात्सप्तमी किमर्थं कार्यस्य सन्देशकथादेरविनाशाय विचिन्वानः परापरं पौर्व्वापर्य्यं निरूपयन् कर्त्तुमभिप्राये तङ् ॥ ११३ ॥ ज० म०

तस्मिन्नित्यादि । हे देवि तस्मिन् रावणे वदति वदन्तं तं अनादृत्य दृष्टोऽप्यहं विक्रमं नाकार्षं न कृतवान् स्वामीश्वराधिपतीत्यादिना अनादरे सप्तमी तस्मिन् वदति सतीति भावे सप्तमीति विद्यासागरः कुत इत्याह यतोऽहं कार्यस्य सन्देशकथनस्य अविनाशाय अविघाताय परापरं विचिन्वानः परं यद्भविष्यति विरोधादि अपरञ्च यद्भूतं सन्देशकथनार्थमागमनादि तत्सर्व्वं विचारयन् उत्तरे सति कथं न पूर्व्वस्य बाध इति चिन्तयन् ॥ ११३ ॥ भ०

कथं वानरस्त्वं तस्य किङ्कर इत्याह

वानरेत्यादि । वानरेषु स्वामी यः कपिः सुग्रीवः स नरेष्वधिपते रामस्य सखा जातः स्वामीश्वरेत्यादिना षष्ठीसप्तम्योर्विधानात् सप्तम्युदाहृता ततोऽहं दूत आगतः ॥ ११४ ॥ ज० म०

ईश्वरस्य निशाटानां विलोक्य निखिलां पुरीम् ।
कुशलोऽन्वेषणस्याहमायुक्तो दूतकर्म्मणि ॥ ११५ ॥
दर्शनीयतमाः पश्यन् स्त्रीषु दिव्यास्वपि स्त्रियः ।
प्राप्तो व्यालतमान् व्यस्यन् भुजङ्गेभ्योऽपि राक्षसान् ॥११६॥

रामस्यानुचरो वानरः कथमित्याह

वानरेष्वित्यादि । वानराणां कपिः सुग्रीवो नराणामधिपते रामस्य सखा जातः ततोऽहं दूत आगतः स्वामीश्वराधिपतीति सप्तमी ॥ ११४ ॥ भ०

आगत्य च लङ्कां प्रविश्य दृष्ट्वायात इत्याह

ईश्वेत्यादि । निशाटानां राक्षसानामीश्वरस्य दशाननस्य अत्र षष्ठ्युद्दाहृता पुरीं निखिलां निःशेषां विलोक्य किं तत्र वर्त्तत इति प्राप्त इति वक्ष्यमाणेन सम्बन्धः कुशलोऽन्वेषणस्याहं सीताया अन्वेषणस्य निपुणः आयुक्तो दूतकर्म्मणि दूतकर्म्मणि दूतक्रियायां व्याप्तः आयुक्तकुशलाभ्यामिति षष्ठीसप्तम्यौ ॥ ११५ ॥ ज० भ०

ईश्वरस्येत्यादि । निशाटानां राक्षसानां ईश्वरस्य रावणस्य निखिलां समस्तां पुरीं विलोक्य अहं प्राप्त इत्यग्रिमश्लोकेनान्वयः कीदृशः अन्वेषणस्य कुशलः सीतान्वेषणनिपुणः दूतकर्म्मणि आयुक्तः तत्परः स्वामीश्वराधिपतीत्यादिना षष्ठीसप्तम्यौ ॥ ११५ ॥ भ०

दर्शेत्यादि । तत्र दिव्यास्वपि स्त्रीषु मध्ये दर्शनीयतमाः स्त्रियः पश्यन् यतश्च निर्द्धारणमिति सप्तमी दर्शनीयतमत्वेन गुणेन पृथक्करणात् भुजङ्गेभ्योऽपि व्यालतमान् हिंस्रान् राक्षसान् व्यस्यन् अपाक्षिपन् पञ्चमीविधाने इति पञ्चमी भुजङ्गेभ्यो राक्षसानां विभागात् प्राप्तो देव्याः पादमूलमित्यर्थात् ॥११६॥ ज०म०

दर्शेत्यादि । दिव्यास्वपि स्त्रीषु मध्ये दर्शनीयतमाः स्त्रियः पश्यन् भुजङ्गेभ्योऽपि व्यालतमान् अतिहिंस्रान् राक्षसान् व्यस्यन् अवाक्षिपन् अहं प्राप्तो देव्याः स्थानमित्यर्थात् गम्यते स्त्रीष्वित्यत्र दर्शनीयतमत्वेन गुणेन समुदायादेकदेशस्य निर्द्धारणात् स्वामीश्वराधिपतीत्यादिना निर्द्धारे सप्तमी भुजङ्गेभ्य इत्यत्र पञ्चमीव्यतिरेके इति सूत्रेण पञ्चमीमाह परः व्यतिरेको हीनाधिकभाव इति परः स्वमते निर्द्धारेऽधिकेनेत्यादिना निर्द्धारे पञ्चमी केनचिद्गुणेन समानधर्म्मिभ्यो यत् पृथक्करणं स निर्द्धारः भुजङ्गराक्षसयोस्तु सधर्म्मित्वं व्यालत्वेन वासवता अपि क्वचित् पञ्चमीत्वेन निर्द्धारे पञ्चमीमाहुः ॥ ११६ ॥ भ०

भवत्यामुत्सुको रामः प्रसितः सङ्गमेन ते ।
मघासु कृतनिर्व्वापः पितृभ्यो मां व्यसर्ज्जयत् ॥ ११७ ॥
अयं मैथिल्यभिज्ञानं काकुत्स्थस्याङ्गुरीयकः ।
भवत्याः स्मरतात्यर्थमर्पितः सादरं मम ॥ ११८ ॥

किमवस्थो राम इत्याह

भवेत्यादि । भवत्यां त्वयि उत्सुकः उन्मनाः रामः तव सङ्गमेन प्रसितः प्रसक्तः प्रसितोत्सुकाभ्यां तृतीया चेति चकारात्सप्तमी मघाभिर्युक्तः कालः तत्सामीप्ये चन्द्रमसो वर्त्तमानत्वात् नक्षत्रेण युक्तः काल इत्यण् तस्य लुबविशेष इति लुप् तस्मिन् काले पितृभ्यः कृतनिर्व्वापः दत्तदानः मां व्यसर्जयत् नक्षत्रे च लुपीति सप्तमी तत्रापि लुपि युक्तवद्व्यक्तिवचन इति स्त्रीलिङ्गबहुवचने भवत्यां व्यसर्जयदिति विशब्दात्प्रातिपदिकेत्यादिना प्रातिपदिकमात्रे प्रथमा॥११७॥ज०म०

भवत्यामित्यादि । रामो मां व्यसर्ज्जयत् प्रास्थापयत् कीदृशः सन् भवत्यां त्वयि उत्सुकः उन्मनाः तव सङ्गमेन प्रसितः प्रसक्तः प्रसितोत्सुकाभ्यां तृतीया-सप्तम्याविति परः स्मरते विषयविवक्षया सप्तमी करणत्वविवक्षया तृतीया मघासु मघानक्षत्रयुक्तकाले पितृभ्यः कृतनिर्व्वापः कृतदानः काले सप्तमी मघाशब्दस्य तद्युक्तकालवाचित्वं कालवाचिनो नक्षत्रादित्युक्तेरेव गम्यते लोकोपचारात् कालेऽपि स्त्रीलिङ्गत्वं बहुवचनान्तत्वञ्च परे तु मघानक्षत्रेणेन्दुयुक्ते न युक्तः काल इत्यर्थे टण्तनलुक् च प्रकृतिवल्लिङ्गवचने इति स्त्रीत्वं बहुवचनत्वञ्चाहुः ॥११७॥ भ०

सन्देहनिवृत्त्यर्थं चाभिज्ञानं दर्शयन्नाह

अयमित्यादि । काकुत्स्थस्यायमङ्गुलीयकोऽभिज्ञानं चिह्नमयमभिज्ञानमिति लिङ्गाधिके प्रातिपदिकमात्रे प्रथमा मैथिलीति सम्बोधनाधिके सम्बोधने चेति सामन्त्रितं सम्बुद्धिश्चात्रैव द्रष्टव्यं काकुत्स्थेति षष्ठी शेष इति षष्ठी भवत्या अत्यर्थं स्मरता मम सादरमर्पितं अधीगर्थेत्यादिना स्मरणार्थे कर्म्मणः शेषविवक्षायां षष्ठी ॥ ११८ ॥ ज० म०

सन्देहनिरासार्थमाह

अयमित्यादि । हे मैथिलि अयं काकुत्स्थस्य रामस्य अङ्गुलीयक आभरणविशेषोऽभिज्ञानं चिह्नं ज्ञप्यर्थसम्बुद्ध्यर्थे इति लिङ्गार्थे सम्बोधने च प्रथमा काकुत्स्थस्येति सम्बन्धे षष्ठी अत्यर्थं भवतीं स्मरता रामेण सादरं यथा स्यात्तथा मम समर्पितः भवत्या इति समर्थनेत्यादिकर्म्मणि षष्ठी अन्ये तु

रामस्य दयमानोऽसावध्येति तव लक्ष्मणः ।
उपाक्रषातां राजेन्द्रावागमस्येह मा त्वसीः ॥ ११८ ॥
रावणस्येह रोक्ष्यन्ति कपयो भीमविक्रमाः ।
धृत्या नाथस्व वैदेहि मन्योरुज्जासयात्मनः ॥ १२० ॥

कर्म्मणो वा दयादेः स्तुत्यर्थस्य चेत्यादिविशेषस्तुतैः कर्म्मणि षष्ठीसङ्गा कर्म्मादिविषयेऽप्यविवक्षिते कर्म्मादौ सम्बन्धविवक्षायां षष्ठ्येवेत्यनेनान्यत्रापि षष्ठीं स्वीकुर्वन्ति विशेषस्तुतविषयादन्यत्रापि दृष्टत्वात् ममेत्याधारे सम्बन्धविवक्षा अङ्गुलौ भवति तिष्ठतीति ढधेकादिति ढैयः तदन्तस्य वाच्यलिङ्गत्वात् अलङ्कारशब्दस्य गम्यमानत्वात् पुंस्त्वमुदाहृतं अङ्गुलीयकमूर्म्मिकेत्यमरेण सामान्यत्वान्नपुंसकं प्रयुक्तम् ॥ ११८ ॥ भ०

रामेत्यादि । असौ लक्ष्मणो रामस्य दयमानो रामं रक्षन् गुहं मा कार्षीरिति दयतेः कर्म्मणि षष्ठी तवाध्येति त्वां स्मरति अधीगर्थेति षष्ठी आश्वासनार्थमाह मा त्वसीः उद्वेगं मा कार्षीः त्वसेरीदित्वाच्छिद्यायामिटप्रतिषेधात् च्वि इट् भवति यतो राजेन्द्रौ रामलक्ष्मणौ इहागमस्यागमनस्य भावे अप् उपाक्रषातां प्रतियत्नं कृतवन्तौ आगमनस्य निश्चितत्वात् तस्यैव सुग्रीवसख्येन गुणाधानात् तेन कृतः प्रतियत्न इति कर्म्मणि षष्ठी प्रतियत्ने लुङ् तङ् सुट् ॥ ११९ ॥ ज० भ०

रामेत्यादि । असौ लक्ष्मणो रामस्य दयमानः शोकापनोदनेन रामं प्रतिपालयन् तव अध्येति त्वां स्मरति पूर्ब्बवत्कर्म्मणि षष्ठी आश्वासार्थमाह राजेन्द्रौ क्षत्रियश्रेष्ठौ तौ इहागमस्य उपाक्रषातां आगमनमुपक्रृतवन्तौ अतो मा त्वसीः भयं न कुरु सूचनावज्ञेषणेत्यादिना प्रतियत्ने मं सम्मरेः सुसुपादित्वादिना सुम् सतो गुणान्तराधानं प्रतियत्नः निश्चितत्वात् सत एव गमनस्य सुग्रीवसख्येन गुणान्तरस्योत्कर्षाधानात् पूर्ब्बवत्कर्म्मणि षष्ठी कृतः प्रतियत्ने कर्म्मणि षष्ठीति परः त्वसी उद्वेगे टी ॥ ११९ ॥ भ०

रावेत्यादि । इह लङ्कायां कपयो भीमविक्रमाः असह्यपराक्रमाः रावणस्य रोक्ष्यन्ति सरोगं रावणं करिष्यन्ति भीमविक्रमा इति गुणप्रधानो निर्देशः ततश्च विक्रमेरुजः भावकर्तृकत्वात् रुजार्थानां भाववचनानामज्वर इति षष्ठी अतो वैदेहि धृत्या नाथस्व आत्मस्थं धृतिं लभस्वेत्यर्थः आशिषि नाथ इति कर्म्मणि षष्ठी आशिषि नाथ इत्युपसंख्यानात्तङ् मन्योरुज्जासयात्मनः मन्युं नाशय जसु

राक्षसानां मयि गते रामः प्रक्ष्णिहनिष्यति ।
प्राणानामपणिष्टासौ रावणस्त्वामिहानयन् ॥ १२१ ॥
अदेवीद्बन्धुभोगानां प्रादेवीदात्मसम्पदम् ।
शतक्रत्वस्तवैकस्याः स्मरत्यङ्को रघूत्तमः ॥ १२२ ॥

हिंसायां ताडने च चौरादिकस्य हिंसार्थत्वात्तेन जाक्षिनिप्रक्ष्णेति कर्म्मणि षष्ठी ॥ १२० ॥ ज० म०

रावणस्येत्यादि । इह लङ्कायां कपयो भीमपराक्रमाः सन्तो रावणस्य रोक्ष्यन्ति रावणं पीडयिष्यन्ति रुजो भङ्गे तौ कर्म्मणि षष्ठी अन्ये तु रुजार्थस्य भावकर्त्तृत्वे इति स्मृतेन कर्म्मणि षष्ठ्या उदाहरणार्थं कपयस्त्वत्सम्बन्धिनो भीमा विक्रमाश्च इह रावणस्य रोक्ष्यन्तीत्यन्वयं कुर्व्वन्ति हे वैदेहि इत्या नाथस्य धृतिर्भूयादित्यात्मन्याशिषं कुरु धृतिं लभस्वेति भावः कर्म्मणि षष्ठी आशिषि नाथ इति षष्ठ्यर्थं परस्मृत्वं अपथार्थीरित्यादिना मं आत्मनो मन्योरुज्जासय आत्मनः शोकं नाशय जसकवधे कर्म्मणि षष्ठी जाक्षिनिप्रक्ष्णनाटिक्राथिपिषां हिंसायामिति षष्ठ्यर्थं परस्मृत्वम् ॥ १२० ॥ भ०

राक्षेत्यादि । मयि गते रामो राक्षसानां प्रक्ष्णिहनिष्यति राक्षसान् मारयिष्यति पूर्व्ववत्कर्म्मणि षष्ठी निप्रक्ष्ण इति सङ्घातविग्रहीतविपर्य्यस्तप्रक्ष्ण मित्युक्तं नेर्गदेत्यादिना णत्वं किञ्च प्राणानामपणिष्टायमिति अयं रावणस्त्वामिहानयन् प्राणानपणिष्ट विक्रीतवान् व्यवहृज्पणोः समर्थयोरिति षष्ठी प्राणानामपणायिष्टेति पाठान्तरं तदयुक्तं स्तुत्यर्थस्य पणेस्तत्र ग्रहणात् गुप्धूपेत्यादिना आयप्रत्ययो न भवति ॥ १२१ ॥ ज० म०

राक्षसानामित्यादि । मयि गते सति रामो राक्षसानां प्रक्ष्णिहनिष्यति राक्षसान् मारयिष्यति ग्राग्वद्धो ण इति नेर्णत्वं कर्म्मणि षष्ठी असौ रावणस्त्वामिह लङ्कायामानयन् प्राणानामपणिष्ट प्राणान् विक्रीतवान् व्यवहृज्पणेर्व्यवहारे इति षष्ठ्यर्थं परस्मृत्वं तत्र व्यवहारे इति क्रयविक्रयलक्षणे द्यूतक्रियायाञ्चेति व्याख्यातं पणव्यवहृतौ स्तुतौ वारे इत्यनेन कमनृत इत्यादिस्मृत्यविहिता जिङीयङायाविभाषिताः तेन पक्षे नायप्रत्ययः अपणिष्टेति चिन्त्यमिति विद्याविनोदस्य प्रलपितं व्यवस्थितवाधिकारादायादयोऽसार्व्वधातुके वा भवन्तीति पक्षे नायप्रत्यय इति विद्यासागरेणोक्तत्वात् सुमतं युक्तमेव॥१२१॥भ०

अदेवीदित्यादि । न केवलं प्राणानपणिष्ट बन्धुभोगानामदेवीत् बन्धुभोगान्

तवोपशायिका यावद्राक्षस्यश्चेतयन्ति न ।
प्रतिसंदिश्यतां तावद्भर्तुः शार्ङ्गस्य मैथिलि ॥ १२३ ॥
पुरः प्रवेशमाश्चर्य्यं बुद्ध्वा शाखामृगेण सा ।
चूडामणिमभिज्ञानं ददौ रामस्य सम्मतम् ॥ १२४ ॥

विक्रीतवान् दिवस्तदर्थस्येति षष्ठी दिवो व्यवहारार्थत्वात् प्रादेवीदात्मसम्मदं विक्रीतवान् विभाषोपसर्ग इति पक्षे द्वितीया प्रशब्देन युक्तत्वात् रामानुरागं पुनर्दर्शयन्नाह रघूत्तम स्मरति अधीगर्थेति षष्ठी अङ्ग इति एकस्मिन्यर्थे क्त्वोऽर्थप्रयोगकालेऽधिकरण इति षष्ठी ॥ १२२ ॥ ज० म०

अदेवीदित्यादि । न केवलं प्राणानामपणिष्टासौ रावणो बन्धून् भोगांश्च अदेवीत् क्रीतवान् त्यक्तवानिति यावत् कर्म्मणि षष्ठी आत्मसम्मदमपि प्रादेवीत् विक्रीतवान् कर्म्मणि द्वितीया परे तु व्यवहारे सोपसर्गस्य दिवः कर्म्मणि वा षष्ठी नित्यत्वनुपसर्गस्येत्याहुः अथ संचिक्ष्य पुनरपि रामानुरागं दर्शयति अङ्गः शतक्रत्वो दिवसे शतं वारान् राम एकस्यास्व एकां त्वां स्मरति चक्रत्वम् वारे इति शतशब्दात् चक्रत्वस् तद्योगे स्वामीश्वराधिपतीत्यादौ सुजर्घैरिति अहन्शब्दात् षष्ठी तवेति कर्म्मणि षष्ठी ॥ १२२ ॥ भ०

एवं तामाश्वास्य सन्देशं दापयितुमाह

तवेत्यादि । हे मैथिलि तवोपशायिका परिमाष्टा शयनं याभीराक्षसीभिः सहेत्यर्थात् पर्य्यायार्हणोत्पत्तिषु खुच यावन्न चेतयन्ति न प्रतिबुध्यन्ते तावत् प्रतिसन्दिश्यतां प्रतिसन्देशो दीयतां शार्ङ्गस्य भर्त्तुः शार्ङ्गं धनुर्धारयतो रामस्य तव शार्ङ्गस्येति यथाक्रमं कर्त्तृकर्म्मणोः कृतीति षष्ठी ॥ १२३ ॥ ज० म०

तवेत्यादि । हे मैथिलि तवोपशायिका पर्य्यायशयनं याभीराक्षसीभिः सहेत्यर्थात् पर्य्यायप्राप्ता ताश्च राक्षसो यावन्न चेतयन्ति न प्रतिबुध्यन्ते तावत् शार्ङ्गस्य भर्त्तुर्धनुर्धारयतो रामस्य कृतप्रतिसन्दिश्यतां प्रतिसन्देशो दीयतां इत्येवं हनूमान् प्रोचे इति पूर्व्वेण सम्बन्धः उपपूर्व्वशीङ् पर्य्यायशयनवाचकः अस्त्यर्थकेति ज्ञापकात् भावे एकः स्त्रीत्वञ्च ढधेक्तीत्यादिना तवेत्यत्र कर्त्तरि षष्ठी शार्ङ्गस्येत्यत्र कर्म्मणि तव उप समीपे शायिकाः शयानाः राक्षसः कर्त्तरि एक इति केचित् चिक्कसंज्ञाने चुभ्यौञिः ॥ १२३ ॥ भ०

पुर इत्यादि । शाखामृगेण मर्कटेन पुरो लङ्कायाः दुःप्रवेशायाः प्रवेशः तमाश्चर्य्यमद्भुतं बुद्ध्वा सा सीता चूडामणिमभिज्ञानं ददौ सर्व्वसङ्गतस्य सम्भाव्यत

रामस्य शयितं भुक्तं जल्पितं हसितं स्थितम् ।
प्रक्रान्तञ्च मुहुः दृष्ट्वा हनूमन्तं व्यसर्ज्जयत् ॥ १२५ ॥

इति उभयप्राप्तौ कर्म्मणीति षष्ठी प्रवेश इत्युभयप्राप्तौ क्तेति लक्ष्मणाहनूमतोः कर्म्मकर्त्तृत्वात् रामस्य सम्मतं प्रियं मतिबुद्धीत्यादिना वर्त्तमाने निष्ठा नलोकेति षष्ठी प्रतिषेधे प्राप्ते क्तस्य च वर्त्तमान इति षष्ठी ॥ १२४ ॥ ज० म०

पुर इत्यादि । शाखामृगेण वानरेण पुरो लङ्कायाः प्रवेशमाश्चर्य्यं बुद्धा मत्वा सा सीता चूडामणिमभिज्ञानं शिरोरत्नं स्वकीयचिह्नं ददौ रामस्य सम्मतं रामेण मन्यमानं ज्ञायमानं सदा स्मरणात् ज्ञाङ्मिच्छार्थेति वर्त्तमाने क्तः तद्योगे कासुकसङ्कार्थ क्त इति कर्त्तरि षष्ठी प्रपूर्व्वविशेर्घञ् यद्योगे ढधेक्षतीति पुर इत्यत्र कर्म्मणि षष्ठी क्वचिदपवादविषयेऽप्युत्सर्गोऽभिनिविशत इति न्यायात् शाखामृगेणेत्यत्र ढधेक्षतीत्यनेन षष्ठीविषयेऽपि साधनहेत्वित्यादिना कर्त्तरि तृतीया इति केचित् वस्तुतस्तु यत्रैकक्तद्योगे कर्त्तरि कर्म्मणि च षष्ठ्याविषयः स्यात् तत्र ढधेक्षतीत्यादिना कर्म्मणि नित्यं षष्ठी ल्यभावक्तेत्यादौ सढ इत्यनेन तु कर्त्तरि विभाषया षष्ठी सढेषष्ठी योग्यकर्म्मवत् क्तेतिप्रयुज्यमाने इत्यर्थः यत्तु कर्त्तृकर्म्मप्राप्तौ कर्म्मण एवैकक्तेति षष्ठ्यर्थं क्रमदीश्वरस्य सूत्रं तत्तु प्रायिकं अनात्मक्तद्विर्वेत्यपरे इति तेनैव पश्चादुक्तं शब्दानामनुशासनमाचार्य्येणाचार्य्येत्यादुदाहरन्ति प्राज्ञः ॥ १२४ ॥ भ०

रामेत्यादि । रामस्य अभिज्ञानं दत्वा शयितादिकं मुहुः पुनः पुनः दृष्ट्वा हनूमन्तं व्यसर्ज्जयत् प्रेषितवती तस्य शयितं शयनस्थानं किं भूमौ शेते अन्यत्रेति वा भुक्तं भोजनस्थानं किं गृहे भुङ्क्ते सुनिजनगृहे वेति जल्पितं मन्त्रस्थानं किं रहसि मन्त्रयते प्रकाशे वेति हसितं हसनस्थानं किं शृङ्गारवस्तुनि हसति वीरवस्तुनि वेति स्थितं निवासस्थानं किं गुहायां तिष्ठत्युत तरुतले वेति प्रक्रान्तं प्रचंक्रमणस्थानं अनुनासिकेत्यादिना दीर्घः किं अङ्गने क्रम्यते अन्यत्र वेति एषां भौव्यगतिप्रत्यवसानार्थत्वात् क्तोधिकरणेयेवेति क्तः तस्य प्रयोगे अधिकरणवाचिनश्चेति षष्ठी ॥ १२५ ॥ ज० म०

रामस्येत्यादि । अभिज्ञानं दत्वा रामस्य शयितादि मुहुर्वारंवारं दृष्ट्वा सीता हनूमन्तं व्यसर्ज्जयत् प्रेषितवती शयितं शयनस्थानं भूमिः शय्या वेति भुक्तं भोजनस्थानं स्वगृहं सुनिगृहं वेति जल्पितं मन्त्रणास्थानं रहः प्रकाशितं वा हसितं हास्यस्थानं शृङ्गारवस्तु वीरवस्तु वा स्थितं वासस्थानं तरुतलं गृहादिकं वा प्रक्रान्तं चंक्रमणस्थानं अङ्गणं वनं वा सर्व्वत्र भौव्यगत्यवसानार्थादिति

असौ दधदभिज्ञानं चिकीर्षुः कर्म्म दारुणम् ।
गासुकोऽप्यन्तिकं भर्त्तुर्मनसाचिन्तयत् क्षणम् ॥ १२६ ॥
कृत्वा कर्म्म यथादिष्टं पूर्व्वकार्य्याविरोधि यः ।
करोत्यभ्यधिकं कृत्यं तमाहुर्दूतमुत्तमम् ॥ १२७ ॥
वैदेहीं दृष्टवान् कर्म्म कृत्वान्यैरपि दुष्करम् ।
यशो यास्याम्युपादाता वार्त्तामाख्यायकः प्रभोः ॥ १२८ ॥

आधारे क्तः तद्योगे कासुकसङ्कार्थक्त इति कर्त्तरि षष्ठी यदि भावे क्तः तदा ल्यभावक्तेति षष्ठी सम्बन्धविवक्षया वा ॥ १२५ ॥ भ०

असावित्यादि । असौ हनूमान् दधत् धारयन्नभिज्ञानं चिह्नं कर्त्रकर्म्मणोः कृतीति षष्ठ्यां प्राप्तायां न लोकेति लप्रयोगे प्रतिषेधः ल इति ग्रहणाद्यो गृह्यते दारुणमशोकवनिकाभङ्गादिकं कर्म्म चिकीर्षुः कर्त्तुमिच्छुः उकारप्रश्लेषात् षष्ठ्याः प्रतिषेधः भर्त्तुः स्वामिनः अन्तिकं समीपं गासुकोऽपि गमनशीलोऽपि उकप्रयोगे प्रतिषेधः मनसा क्षणं चिन्तितवान् वक्ष्यमाणं कर्म्म॥ १२६ ॥ज०म०

असावित्यादि । असौ हनूमान् अभिज्ञानं चिह्नं दधत् धारयन् दारुणं कर्म्म चिकीर्षुः कर्त्तुमिच्छुः भर्त्तूरामस्य अन्तिकं समीपं गासुको गमनशीलोऽपि क्षणं मनसाचिन्तयत् वक्ष्यमाणमिति योज्यं ढधेक्षतीति सूत्रे व्यादिवर्जनात् न कर्म्मणि षष्ठी ॥ १२६ ॥ भ०

कृत्वेत्यादि । यो दूतो यथोद्दिष्टं कर्म्म कार्यं कृत्वा अत्र कृत्वेत्यव्ययप्रयोगे प्रतिषेधः तत उत्तरकालं पूर्व्वकर्म्माविरोधि पूर्व्वकृतस्य कार्यस्य यदविरोधि तदधिकं करोति तमुत्तमं दूतमाहुर्विदुर्नीतिविद इति शेषः मया च यथोद्दिष्टं सीतान्वेषणं कृतमिति भावः ॥ १२७ ॥ ज०म०

कृत्वेत्यादि । यो दूतो यथादिष्टमाज्ञानतिक्रमेण कार्यं कृत्वा पूर्व्वकार्याविरोधि अधिकं कार्यान्तरं करोति तमुत्तमं दूतमाहुर्नीतिविद इति शेषः तस्मात् सीतान्वेषणमादिष्टं कर्म्म कृत्वा अधिकमपि करिष्यामीत्यग्रिमश्लोके वक्ष्यति कृत्वेति व्यवर्जनात् न तद्योगे षष्ठी ॥ १२७ ॥ भ०

तदेव च दर्शयन्नाह

वैदेहीमित्यादि । अहमद्य तावद्वैदेहीं दृष्टवान् निष्ठाप्रयोगे प्रतिषेधः अन्यदपि कार्यमतिदुष्करं कृत्वा खलप्रयोगे प्रतिषेधः ततो यश उपादाता आत्मसात्कर्त्ता इदमतिदुष्करं तेन कृतमिति तन्नस्य प्रयोगे प्रतिषेधः वार्त्तामाख्याय

राक्षसेन्द्रस्य संरक्ष्यं मया लव्यमिदं वनम् ।
इति संचिन्त्य सदृशं नन्दनस्याभनक् कपिः ॥ १२९ ॥
राघवाभ्यां शिवं दूतस्तयोरहमिति ब्रुवन् ।
हितो भनज्मि रामस्य कः किं ब्रूतेऽत्र राक्षसः ॥ १३० ॥

कः प्रभोर्वार्त्तामाख्याता ख्यातिभविष्यदधिकारात्तुमख्वुलौ क्रियायामिति ख्वुल् अकेनोर्भविष्यदाधमर्ण्ययोरिति प्रतिषेधः ॥ १२८ ॥ ज० म०

वैदेहीमित्यादि । वैदेहीं दृष्टवानहं अन्यैरतिदुष्करं कर्म वक्ष्यमाणं वन-भङ्गादि कृत्वा यश उपादाता उपादानशीलः सन् प्रभोः समीपे वार्त्तामाख्यायकः आख्यातुं यास्यामि कृवृतृखलर्थशीलार्थत्वणां योगे षष्ठीनिषेधो दर्शितः आख्या-यक इति अस्त्यणकेत्युक्तेस्तृणकौघे इति विधानादन्यत्रापि णको भवतीति ज्ञापितं तेनात्र तुमर्थे णको बोध्यः किंवा तृणकौघे इत्यनेनैव णकः तत्र कालस्याविशेषात् सर्व्वस्मिन् काले तौ भवत इति प्राप्तं अत्र तु भविष्यत्कालो विवक्षितः आख्यायकः आख्यास्यन्नित्यर्थः क्वचिदपवादविषयेऽप्युत्सर्गोऽपि प्रवर्त्तत इति न्यायात् षष्ठीविषयेऽपि द्वितीया परे तु क्रियार्थार्थाद्भविष्यतीति सूत्रेण णकं णकस्तुमर्थे प्राय इति सूत्रेण षष्ठीनिषेधञ्चाहुः प्रायो ग्रहणात् क्वचित् षष्ठीमपि ॥ १२८ ॥ भ०

राक्षेत्यादि । इदं वनमशोकवनिकाख्यं राक्षसेन्द्रस्य संरक्ष्यं रक्षार्हं अर्हे कृत्यः कृहलोर्णत् तन्मया लव्यं लवनीयं कृत्यानां कर्त्तरि वेति षष्ठी तृतीये कर्त्तरि भवतः इत्येवं सञ्चिन्त्य कपिर्नन्दनस्य वनस्य सदृशं तुल्यं तुल्यार्थैरिति पक्षे षष्ठी अभनक् भग्नवान् भञ्जेर्लङि स्वादिलोप इति नलोपे झल्ङादिलोपे जस्चे-र्चत्वे च रूपम् ॥ १२९ ॥ ज० म०

राक्षेत्यादि । इदं वनं राक्षसेन्द्रस्य संरक्ष्यं सम्यक् रक्षार्हं मया लव्यं छेदनीयं इति सञ्चिन्त्य नन्दनस्य इन्द्रवनस्य सदृशं तद्वनं कपिर्हनूमान् अभनक् भग्नवान् भनज्मेर्ण्यां रुधादित्वात् श्नम् ल्यभावश्चेति ल्ययोगे कर्त्तरि विभाषया षष्ठी समार्थैनेति समार्थेन षष्ठी ॥ १२९ ॥ भ०

राघेत्यादि । राघवाभ्यां रामलक्ष्मणाभ्यां शिवं भद्रमस्तु तयोर्हनूमान् दूतो हितो रामस्य भनज्मीदं वनं एवञ्च क्रियमाणे को भवतां मध्ये राक्षसः किं ब्रूते इत्येवं ब्रुवन् बभञ्ज पवनात्मजो रिपुवनमिति वक्ष्यमाणेन सम्बन्धः राघवाभ्यां

विलुलितपुष्परेणुकपिशं प्रशान्तकलिकापलाशकुसुमं
कुसुमनिपातविचित्रवसुधं सशब्दनिपतद्द्रुमोत्कशकुनम् ।
शकुननिनादनादितककुभ्विलोलविपलायमानहरिणं
हरिणविलोचनाधिवसतिं बभञ्ज पवनात्मजो रिपुवनम् ॥१२१॥

इति भट्टिकाव्येऽष्टमः सर्गः ।

शिवं हितो रामस्येति चतुर्थी चाशिष्येत्यादिना षष्ठीचतुर्थ्यौ । इति विभक्त्यधिकारः ॥ १२० ॥ ज० म०

राघवाभ्यामित्यादि । हे राक्षसा राघवाभ्यां रामलक्ष्मणाभ्यां शिवं भूयादिति शेषः शक्तार्थवषड्वित्यादिना हितार्थत्वात् शिवशब्दयोगे चतुर्थी तत्र हि शक्त इत्यनेन शक्तार्थानां अलंप्रभुप्रोथपर्याप्तसमर्थादीनां यहणं अर्थशब्दः प्रयोजनवाची तेन प्रयोजनार्थानां यहणं हितमित्यनेन हितार्थानां भद्रशोभनशिवादीनां कल्याणपर्यायपठितानां अनेनाशिषि साध्वादीनां यहणं हितार्थत्वेन स्वस्तिशब्दे गृहीतेऽपि स्वस्तिशब्दयहणं समर्थैरित्यादिना हितार्थत्वेन प्राप्तषष्ठ्या अप्रवृत्त्यर्थं अतएव स्वस्तिवर्जं कुशलार्थैरिति विभाषया चतुर्थ्यर्थं परस्तूतं एवं सुखार्थानां सत्प्रीत्यादीनां यहणं अतएव क्षत्राय साधुः क्षत्रिय इत्युदाहृतं रामस्य हितः सन् इदं वनं भनज्मि समर्थैर्नेति सम्बन्धे हितयोगे च षष्ठी एवं क्रियमाणे अत्र कर्मणि को राक्षसः किं ब्रूते इति ब्रुवन् पवनात्मजो रिपुवनं बभञ्जेत्यग्रिमश्लोकेनान्वयः ॥ १२० ॥ भ०

विलुलित्यादि । कीदृशं बभञ्ज विलुलितानां पुष्पाणां रेणुभिः कपिशं पिङ्गलं प्रशान्ता अवसन्नाः कलिकाः पलाशानि पत्राणि कुसुमानि च यत्र कुसुमानां निपातेन विचित्रा वसुधा यत्र सशब्दैर्निपतद्भिर्द्रुमैरुत्का उन्नमनः शकुना यत्र शकुनानां पलायमानानां निनादेन नादिताः सञ्जातनादाः ककुभो दिशो यत्र विलोला व्याकुला विपलायमाना हरिणा यत्र हरिणस्येव लोचने यस्याः सीतायाः तस्या अधिवसतिं निवासम् । इत्यनभिहिताधिकारः ॥१२१॥ज०म०

इति भट्टिकाव्यटीकायां जयमङ्गलायां अधिकारकाण्डे तृतीयः परिच्छेदः

काव्यस्यार्थावबोधिकाभङ्गो नामाष्टमः सर्गः ।

विलुलितेत्यादि । पवनात्मजो रिपुवनं बभञ्ज कीदृशं विलुलितानां विघटितानां पुष्पाणां रेणुभिः कपिशं पिङ्गलं प्रशान्तानि अवसन्नानि कलिकाः पलाशि

पुष्पाणि च यत्र कुसुमानां निपातेन विचित्रा वसुधा यत्र सशब्दैः सशब्दं वा निपतद्भिर्दुमैरुत्काः स्थानान्तरं गन्तुमुन्मनसः शकुनाः पक्षिणो यत्र शकुनानां पलायमानानां निनादेन नादिताः सञ्जातनादाः शब्दायमानीकृता वा ककुभो दिशो यत्र विलोला व्याकुलाः सन्तो विपलायमाना हरिणा यत्र हरिणस्येव विलोचने यस्याः सीतायास्तदधिवसतिं तन्निवासस्थानम् ॥ १२१ ॥ म०

इति सद्वैद्यहरिहरस्वानबंशसम्भवगौराङ्गमल्लीकात्मजश्रीभरतसेनकृतायां सुग्धबोधिन्यां भट्टिटीकायामधिकारकाण्डेऽष्टमः सर्गः ।

नवमः सर्गः ।

अथ प्रकीर्णकाः ।

द्रुभङ्गध्वनिसंविग्नाः कुवत्यञ्चिकुलाकुलाः ।
अकार्षुः क्षणदाचर्य्यो रावणस्य निवेदनम् ॥ १ ॥
यदतापीच्छनैर्भानुर्यत्रावासीन्मितं मरुत् ।
यदाप्यानं हिमोस्रेण भनक्त्युपवनं कपिः ॥ २ ॥

अत्रान्तरे प्रकीर्णकश्लोकानाह

द्रुभङ्गेत्यादि । क्षणदाचर्य्यो निशाचर्य्यः चरेष्टः राक्षसस्य निवेदनमकार्षुः कृतवत्यः वक्ष्यमाणप्रकारेण द्रुभङ्गध्वनिसंविग्नाः शाखाभङ्गशब्देन सन्त्रस्ताः ओविजीभयचलनयोः ओदितश्चेति निष्ठानत्वं नुवत्यञ्चिकुलाः कूजद्भिः पक्षिकुलैः व्याकुलमानसाः नुशब्दे तौदादिकस्यास्य उवङादेशः ॥ १ ॥ ज० म०

द्रुभङ्गेत्यादि । सीतासन्निधिस्थाः क्षणदाचर्य्यो राक्षस्यो रावणस्य निवेदनं वक्ष्यमाणं अकार्षुः कृतवत्यः क्रुञ्ष्टौ अनुस्विङ्ङे रित्युस् कीदृश्यः द्रूणां वृक्षाणां भङ्गशब्दैः संत्रस्ताः विजङीशोभीकम्पे ओदित्त्वात् क्तस्य न कुवद्भिः शब्दायमानैः पक्षिणां कुलैः समूहैराकुला व्याकुलचित्ताः कुङशब्दे कुलचेत्यादिकात् शतः कुशब्दे भौवादिक इति जयमङ्गलायां प्रमादस्तस्यात्मनेपदित्वात् शपो गुणित्वाच्च कूजत्यञ्चिकुलाकुला इति क्वचित् पाठः ॥ १ ॥ भ०

यदित्यादि । यद्यदा भानुः घर्मैर्मन्दमतापीत् तपति स्म ह्लन्तलक्षणा दृद्धिः मरुत् मितं स्तोकमवासीत् वाति स्म हिमोस्रेण शिशिररश्मिना आप्यानं वृद्धिं नीतं प्यायतेर्लोपोव्योर्वलीति यलोपः ओदित्वान्नत्वं तदुपवनं कपिर्भिनत्ति चूर्णयतीति निवेदनमकार्षुः ॥ २ ॥ ज० म०

निवेदनमाह

यदित्यादि । यदुपवनं भानुः घर्मैर्मन्दं अतापीत् तपति स्म व्रजवदेति त्रिः अनिसृत्वात् यत्रोपवने वायुर्मितमल्पं अवासीत् वाति स्म यमरमेति द्रुसमौ यदुपवनं हिमोस्रेण चन्द्रेण आप्यानं वृद्धं ओप्यायीङ्वृद्धौ कर्त्तरि क्तः

ततोऽशीतिसहस्राणि किङ्कराणां समादिशत् ।
इन्द्रजित्सूविनाशाय मारुतेः क्रोधमूर्च्छितः ॥ ३ ॥
शक्त्यष्टिपरिघप्रासगदामुद्गरपाणयः ।
व्यश्नुवाना दिशः प्रापुर्वनं दृष्टिविषोपमाः ॥ ४ ॥
दध्वान मेघवद्भीममादाय परिघं कपिः ।
नेदुर्दीप्तायुधास्तेऽपि तडित्वन्त इवाम्बुदाः ॥ ५ ॥

द्यौर्दीप इति यलोपः किरणोत्तमयूखांशुगभस्तिरुचिदीप्तय इत्यमरः तदुपवनं कपिर्भनक्ति इति निवेदनमकार्षुरिति पूर्व्वेण सम्बन्धः ॥ २ ॥ भ०

तत इत्यादि । निवेदनानन्तरमिन्द्रजित्सूः रावणः इन्द्रजितं सूत इति सत्सूद्विषेत्यादिनानुपसर्गे क्विप् मारुतेर्हनूमतो विनाशाय अशीतिसहस्राणि समादिशत् समादिष्टवान् किङ्कराणां किं कुर्व्वन्ति दिवाविभेत्यादिना टच् क्रोध-मूर्च्छितः क्रोधोद्गतः मूर्च्छः समुच्छ्राये वर्त्तमानत्वात् ॥ ३ ॥ ज० भ०

तत इत्यादि । ततोऽनन्तरमिन्द्रजित्सूः रावणः क्रोधेन मूर्छितः सञ्जातमूर्छः सन् मारुतेर्हनूमतो विनाशाय किङ्कराणां अशीतिसहस्राणि समादिशत् आज्ञापयत् । इन्द्रजितं सूते इति क्विप् ॥ ३ ॥ भ०

शक्तीत्यादि । ते किङ्करा वनं प्रापुः प्राप्नुवन्तः शक्त्यादयः प्रहरणविशेषाः पाणौ येषामिति प्रहरणार्थेभ्यः परे निष्ठासप्तम्यौ भवतः व्यश्नुवानाः दिशो व्याप्नुवन्तः अश्नूव्याप्तौ सावादिकः दृष्टिविषोपमा भुजङ्गवत् दष्ट्वैव विनाशयन्त इत्यर्थः ॥ ४ ॥ ज० भ०

शक्तीत्यादि । शक्त्यादयः पाणौ येषां ते किङ्करा वनं प्रापुः दिशो व्यश्नु-वाना व्याप्नुवन्तः अश्नूङ्नव्याप्तिसंहत्योः दृष्टिविषैः सर्पविशेषैरुपमा येषां दृष्टि-र्दर्शनं विषोपमा विषमिव येषामिति वा ॥ ४ ॥ भ०

दध्वेत्यादि । कपिर्भीमं परिघं भयानकमर्गलमादाय मेघवद्दध्वान ध्वनति स्म तेऽपि किङ्कराः तडित्वन्त इवाम्बुदाः नेदुः नदन्ति स्म किङ्कराणां क्षणत्वात् मेघैः सादृश्यं आयुधानाञ्च तडितेति ॥ ५ ॥ ज० भ०

दध्वानेत्यादि । कपिर्हनूमान् भीमं भयानकं परिघं लौहवनुरुद्गरमादाय गृहीत्वा मेघ इव दध्वान ध्वनशब्दं तेऽपि दीप्तप्रहरणा राक्षसास्तडिद्युक्ता मेघा इव नेदुः शब्दितवन्तः ॥ ५ ॥ भ०

कपिनाम्भोधिधीरेण समगंसत राक्षसाः ।
वर्षासूद्धततोयौघाः समुद्रेणेव सिन्धवः ॥ ६ ॥
लाङ्गूलमुद्धतं धुन्वन्नुद्वहन् परिघं गुरुम् ।
तस्थौ तोरणमारुह्य पूर्वं न प्रजहार सः ॥ ७ ॥

एते प्रकीर्णकाः ।

सिचि वृद्ध्यधिकारमाह

अक्षारिषुः शरानम्भांसि तस्मिन् रक्षःपयोधराः ।
न चाक्षालीन्न चाव्राजीत्तासं कपिमहीधरः ॥ ८ ॥

कपीत्यादि । कपिना अम्भोधिधीरेण क्षोभ्यत्वात् राक्षसाः समगंसत सङ्गताः समीयमीत्यादिना तङ् लुङ् यथा सिन्धवो नद्यः उद्धततोयौघाः उद्रिक्तजलपूराः समुद्रेण सङ्गच्छन्ते ॥ ६ ॥ ज० म०

कपिनेत्यादि । ते राक्षसाः समुद्रवद्धीरेण कपिना समगंसत मिलिता बभूवुः समीयमङ्क्षेति मं मान्तोऽदन्त इत्यतादेशः यथा वर्षासूद्धतजलपूराः सिन्धवो नद्यः समुद्रेण सङ्गता भवन्ति ॥ ६ ॥ भ०

लाङ्गूलेत्यादि । स हनूमान् लाङ्गूलं पुच्छसङ्गतं उत्क्षिप्तं धून्वन् धूञ् कम्पन इति स्वादौ पठितः परिघं गुरुं उद्वहन् तोरणमारुह्य तस्थौ न तु पूर्वं प्रजहार प्रहृतवान् शूराणां पश्चात् प्रहारित्वात् ॥ ७ ॥ ज० म०

एते प्रकीर्णकाः ।

लाङ्गूलेत्यादि । स हनूमान् तोरणं बहिर्द्वारमारुह्य उद्धतमुत्क्षिप्तं लाङ्गूलं धुन्वन् कम्पयन् गुरुं परिघं उद्वहन् धारयन् तस्थौ पूर्वं न प्रजहार शूराणां पश्चात् प्रहारित्वात् ॥ ७ ॥ भ०

एते प्रकीर्णकाः ।

इतःपरं सिचि वृद्धिमधिकृत्याह

अक्षेत्यादि । तस्मिन् वने रक्षःपयोधराः रक्षांसि पयोधरा इव शरानम्भांसि शरान् अम्भांसीव अक्षारिषुः क्षरितवन्तः क्षरतिरकर्मकः क्षरेत् क्षुतजदृक्षिरित्यादिप्रयोगेषु दृश्यते इह तु सकर्मको विवक्षितः कपिर्महीधर इव न चाक्षालीत् न चलितवान् द्वयोरथतो हलादेर्लघोरिति विकल्पे प्राप्ते अतो

अवादीत्तिष्ठतेत्युच्चैः प्रादेवीत् परिघं कपिः ।
तथा यथा रणे प्राणान् बह्वनामग्रहीत् द्विषाम् ॥ ९ ॥
व्रणैरवमिषूरक्तं देहैः प्रौर्णाविषुर्भुवम् ।
दिशः प्रौर्णविषुश्चान्ये यातुधाना भवद्भियः ॥ १० ॥

लान्तस्येति सिचि वृद्धिः नात्राजीत् त्वासं भयञ्च न जगाम महीधरतुल्यत्वात् नेटीति प्रतिषेधस्यातो हलादेर्लघोरिति विकल्पिते वदव्रजेत्यादिना वृद्धिः ॥ ८ ॥ ज० म०

अथ सिचि वृद्ध्यधिकारः स्वमते सिच् सिः ।

अत्रेत्यादि । तस्मिन् कपौ रक्षांसि पयोधरा इव शरानम्भांसीव अत्यारिषुः क्षिप्तवन्तः किन्तु कपिर्महीधर इव न च अह्वालीत् नैव चलितवान् न च त्वासमत्राजीत् प्राप्तवान् चर्ज्जसञ्चलने ह्वलह्मलचाले व्रजगतौ सर्व्वत्र त्रांसिः व्रजवदेति व्रिः ॥ ८ ॥ भ०

अवेत्यादि । तत उत्तरकालं कपिस्तिष्ठत मा पलायध्वमिति उच्चैस्तमवादीत् । पूर्व्ववद्वृद्धिः तथा तेन प्रकारेण परिघं परिघेण प्रादेवीत् विजिगीषते स्म दिवः कर्म्म चेति परिघस्य कर्म्मसंज्ञा दिवेर्नेटीति वृद्धिप्रतिषेधः यथा बह्वनां द्विषां शत्रूणां प्राणान्प्रयहीत् निग्रहीतवान् अतो हलादेरिति विकल्पे प्राप्ते ह्यन्तलक्षणश्चेति वृद्धिप्रतिषेधः ॥ ९ ॥ जं० म०

अवादीदित्यादि । अतःपरं यूयं तिष्ठत मा पलायध्वमित्युच्चैर्महता ध्वनिना कपिरवादीत् उक्तवान् पूर्व्ववद्वृद्धिः परिघेण तथा तेन प्रकारेण प्रादेवीत् क्रीडति स्म जेतुमैच्छद्दा दिव्युजिगीषेच्छापणिष्टुतौ क्रीडागत्योः टौ णुर्द्दूङ् इति णुः दिवोधेवेति करणे द्वितीया यथा रणे बह्वनां शत्रूणां प्राणान् अग्रहीत् अपहृतवान् हलादेः सेम इति ह्यन्तवर्ज्जनान्न व्रिः ॥ ९ ॥ भ०

व्रणैरित्यादि । यातुधाना राक्षसा व्रणैः प्रहारमार्गैः रक्तं शोणितमवमिषुः वमन्ति स्म ह्यन्तेति वृद्धिप्रतिषेधः देहैर्भुवं प्रौर्णाविषुः आच्छादितवन्तः अन्ये यातुधानाः भवद्भियः भवन्तीभीर्येषामिति भयात्पलायमानाः दिशः प्रौर्णविषुः आच्छादितवन्तः ऊर्णोतेर्विभाषेति विकल्पः ऊर्णोर्विभाषोर्णोरित्यङ्क्षपक्षे द्रष्टव्यः ङिच्चे गुणवृद्धिप्रतिषेधात् ॥ १० ॥ ज० म०

व्रणैरित्यादि । यातुधाना व्रणैः प्रहारमार्गैरक्तं अवमिषुः वमन्ति स्म पूर्व्ववन्मान्तवर्ज्जनान्न व्रिः देहैर्भुवं प्रौर्णाविषुः आच्छादितवन्तः भवन्तो विद्य-

अक्काणिषुश्युतोत्साहा भिन्नदेहाः प्रियासवः ।
कपेरत्रासिषुर्नादान् खगाः सिंहध्वनेरिव ॥ ११ ॥

इति सिचि वृद्ध्यधिकारः ।

मायानामीश्वरास्तेऽपि शस्त्रहस्तारथैः कपिम् ।
प्रत्यावर्तिरे हन्तुं हन्तव्या मारुतेः पुनः ॥ १२ ॥

माना भीर्भयं येषां तेऽन्ये यातुधाना दिशः प्रौर्णविषुः पर्यायन्त स्मेत्यर्थः जर्णुलआच्छादने णूवन्निष्यामिति वृद्धिरावादेशश्च ॥ १० ॥ भ०

अरेत्यादि । च्युतोत्साहाः निरुत्साहाः अरारिषुः सृताः स्म इति शब्दितवन्तः यतः प्रियासवः प्रियप्राणाः कपेः सम्बन्धिनो नादादत्रासिषुः त्रस्ताः उभयत्रापि नेटीति प्रतिषिद्धोऽतोहलादेरिति विकल्पः ॥ ११ ॥ ज० भ०

इति सिचि वृद्ध्यधिकारः ।

अक्केत्यादि । प्रिया असवः प्राणा येषां ते यातुधाना भिन्नदेहा विदीर्णशरीरा भूत्वा सिरुत्साहा निःसृहाः सन्तः अक्काणिषुः सृताः स्म इति शब्दितवन्तः कणशब्दे हसादेः सेम इति पक्षे त्रिः कपेर्नादात् अत्रासिषुः त्रस्ताः पूर्ववत्पक्षे त्रिः यथा सिंहस्य ध्वनेर्मृगा त्रसन्ति ॥ ११ ॥ भ०

इति सिचि वृद्ध्यधिकारः ।

इत इट्प्रतिषेधमधिकृत्याह

मायेत्यादि । अथानन्तरं राक्षसा ये दिशो गताः ते कपिं हन्तुं पुनः प्रत्यावर्तिरे प्रतिनिवृत्ताः मायानामीश्वराः प्रभवः स्मेति वरच् नेड्वशिकृतीति नेट् आर्द्धधातुकेत्यादिना प्राप्तत्वात् रथैस्तत्र गताः सन्तः शस्त्रहस्ताः शस्त्राणि हस्तेषु येषामिति हनिकुषेत्यादिना रमेरौणादिकः क्थन् रथाः अमिचमीत्यादिना थसेरौणादिस्त्रन् हसिमृग्रुचीत्यादिना हसेस्त्रन् तयोस्तित्वेत्यादिना इट्प्रतिषेधः हन्तव्या मारुतेरिति हनूमतो वधार्हैः कृत्यानां कर्तरि वेति षष्ठी एकाच इत्यादिना इट्प्रतिषेधः हन्तेर्नमान्तेष्वनिट्त्वात् ॥ १२ ॥ ज० भ०

इत इट्प्रतिषेधाधिकारः ।

मायानामित्यादि । अथानन्तरं ये दिशः प्रौर्णविषुः ते कपिं हन्तुं रथैः पुनः प्रत्यावर्तिरे प्रत्यागताः प्रतिनिवृत्ता हनलौ गतौ बधे वसोरस्मनौदित इति औदिद्वर्जनादनिम् कीदृशास्ते मायानामीश्वराः प्रभवः यायायभासकस इति वरः इयत्तेरिति नेम् शस्त्रं हस्ते येषां ते तथा शस्यते हन्यतेऽनेनेति शस्त्रं

तांश्चेतव्यान् क्षितौ श्रित्वा वानरस्तोरणं युतान् ।
जघानाधूय परिघं विजिघृक्षून् समागतान् ॥ १३ ॥
संजुघुक्षव आयूंषि ततः प्रतिरुरूषवः ।
रावणान्तिकमाजग्मुर्हतशेषा निशाचराः ॥ १४ ॥
एकेन बहवः शूराः साविष्काराः प्रमत्तवत् ।
वैमुख्यञ्चक्रमेत्युच्चैरूचुर्दशमुखान्तिके ॥ १५ ॥

असबधे त्वासुसिति त्वः पूर्ववच्चेम् मारुतेर्हनूमतो हन्तव्याः हन्तुं शक्याः ल्यभावेति पक्षे कर्त्तरि षष्ठी ॥ १२ ॥ भ०

तांश्चेत्यादि । असुदिता एकस्यामेव वेलायां मया हन्तव्या इति वानरस्तोरणमाश्रितवान् स तोरणं श्रित्वा तान् राक्षसान् विजिघृक्षून् विग्रहीतुमिच्छून् युतान् असुदितान् समागतान् ढौकितान् क्षितौ पृथिव्यां चेतव्यान् पुञ्जीकर्त्तव्यान् जघान हतवान् परिघमाधूय परिभ्राम्य तत्र चेतव्यानिति एकाचइतीट्प्रतिषेधः क्षितावितिं क्तिच्क्तौच संज्ञायामिति क्तिच् तितुत्रेत्यादिना इट्प्रतिषेधः श्रित्वा युतानिति शुप्रकः कितीट्प्रतिषेधः विजिघृक्षूनिति सनि ग्रहगुहोश्चेति तत्र रुदविदेति सनः किच्च ग्रहिज्येति सम्प्रसारणं ठत्वकत्वषत्वानि ॥ १३ ॥ ज०म०

तानित्यादि । तोरणं श्रित्वा परिघमवधूय परिभ्राम्य वानरस्तान् राक्षसान् जघान कीदृशान् क्षितौ चेतव्यान् पुञ्जीकर्त्तव्यान् युतान् एकीभूतान् विजिघृक्षून् विग्रहं कर्त्तुमिच्छून् समागतान् मिलितान् चिञस्तव्यः नेमेकाजादित्यादिना इम्निषेधः इदुश्रिञ्भ्यूर्णोरिति श्रियुभ्यां नेम् नेसुगुहग्रह इति ग्रहेः सनि नेम् गमेरोदित्वान्नेम् ॥ १३ ॥ भ०

संजित्यादि । तत उत्तरकालं ये हतशेषा निशाचराः ते संजुघुक्षव आयूंषि जीवितानि गोहितुमिच्छवः गुहेः पूर्ववत्प्रतिषेधः रावणान्तिकमाजग्मुः आगताः प्रतिरुरूषवः वक्ष्यमाणमर्थं कथयितुमिच्छवः अत्रापि पूर्ववत्प्रतिषेधः तत्र चकारेणोगन्तानां सनि ससुच्चितत्वात् ॥ १४ ॥ ज० म०

एकेनेत्यादि । वयं बहवः शूराः साविष्काराः साहङ्कारा अपि सन्तः एकेनापि कपिना हेतुभूतेन वैमुख्यं चक्रम पराङ्मुखत्वमनुष्ठितवन्तः प्रमत्तवत्

मांसोपभोगसंभूनानुद्विग्नांस्तानवेत्य सः ।
उद्वृत्तनयनो मित्रान्स्निग्धान् व्यसर्ज्जयत् ॥ १६ ॥
प्रमेदिताः सपुत्रास्ते सुस्थानता वाढविक्रमाः ।
अश्लिष्टनादा निरगुः फाण्टचित्तास्त्वपाणयः ॥ १७ ॥

मद्यपानमत्ता इव एवञ्च चित्तव्याक्षेपादुत्तमपुरुषे लिटि कृते क्रस्व इत्यादिना इट्प्रतिषेधो नियमित इति एवं दशमुखान्तिके ऊचैरूचुः ॥ १५ ॥ ज० म०

एकेनेत्यादि । एकेन कपिना हेतुना बहवोऽपि समर्था अपि प्रमत्ता इव साहङ्कारा अपि वैसुख्यं विसुखतां चक्रम विसुखाभवामः स्मेत्यर्थात् इति ते हतशेषाः निशाचरा रावणस्य समीपे जगुः नेमधुमिति नेम् परमते अक्षदि वाच्ये चित्तविक्षेपार्थं टी तदर्थसूचनाय प्रमत्तवदित्युक्तं मद्यपानां हि चित्तविक्षेपः सम्भवत्येव क्षमते सर्व्वत्र टी दुर्निवारा ॥ १५ ॥ भ०

मांसेत्यादि । स दशमुखस्तानुद्विग्नान् भीतानवेत्य ज्ञात्वा स्वानात्मीयान् मन्त्रिणो व्यसर्जयत् प्राहिणोत् कीदृशांस्तान् मांसोपभोगसंभूनान् मांसोपभोगेन स्थूलवर्ष्मणः उभयत्रापि श्वीदितो निष्ठायामितीट्प्रतिषेधः तत्र श्वयतेर्यजादित्वात् संप्रसारणं हल इति संप्रसारणस्य दीर्घः द्वयोरप्योदित्त्वान्निष्ठानत्वं उद्वृत्तनयनो रोषात् निष्क्रान्ततारकः यस्य विभाषेतीट्प्रतिषेधः वृतेरुदित्त्वात् मित्रान् स्निग्धान् मन्त्रिणः आदितश्चेतीट्प्रतिषेधः रदाभ्यामिति निष्ठानत्वम् ॥ १६ ॥ ज०म०

मांसेत्यादि । तान् राक्षसान् उद्विग्नान् त्रस्तान् अवेत्य ज्ञात्वा स रावणो मन्त्रिणो व्यसर्ज्जयत् कीदृशान् मांसोपभोगेन संभूनान् स्थूलान् मित्रान् स्निग्धान् स कीदृशः उद्वृत्तनयनः उद्घूर्णितनेत्रः क्रोधवशात् ट्वायोश्चीर्गतिवृद्धोः नेमडीश्चीदिति नेम् यजादित्वात् अक्षखपाद्योरिति जिः जिघर्षेऽन्त्यःस्त्रूत्वाद्योदिति ओदित्त्वात् क्षस्य नः विजड़ीशोभीकम्पे ईदित्वात् पूर्ब्ववन्नेम् वृतुङब्लृवर्त्तने पूक्लिशुदित इत्यनेन वेम्त्वात् पूर्ब्ववन्नेम् दृम्मिद्याजृभिदाजिङ्च इति चकारात् स्नेहने आदित इति नेम् ॥ १६ ॥ भ०

प्रम इत्यादि । ते मन्त्रिणः सपुत्राः पुत्रैः सह निरगुः निर्गताः दृणोगालुङि प्रमेदिताः स्निग्धीभवितुमारब्धाः आदिकर्म्मणि निष्ठा ततो विभाषाभावादिकर्म्मणोरिति प्रतिषेधः दृट्पक्षे निष्ठा शीङ्त्यादिना कित्त्वप्रतिषेधात् गुणः सुस्थानाः स्वामिनि कल्याणमनसः वाढविक्रमाः भृशपराक्रमाः अश्लिष्टनादाः विश्लिष्टवाचः मन्त्रिणां वाग्मित्वात् फाण्टचित्तास्त्वपाणयः यदृच्छतपिष्टं कषायं

तान् दृष्ट्वातिदृढान् धृष्टान् प्राप्तान् परिदृढाज्ञया ।
कष्टं विनर्दतः क्रूरान् शस्त्रघुष्टकरान् कपिः ॥ १८ ॥
अव्यर्णो गिरिकूटाभानभ्यर्णानार्हिंदत् द्रुतम् ।
दृप्तशस्त्रान् महारम्भानदान्तांस्त्रिदशैरपि ॥ १९ ॥युग्मकम् ॥

उदकसम्पर्कमात्राद्विभङ्गुरसं दैवदुर्ण तदल्पप्रयाससाध्यत्वात् अनायाससाध्यं फाण्टमित्युच्यते तेन चित्राणि रञ्जितानि अस्त्राणि पाणौ येषामिति खान्तादयः क्षुब्धेत्यादिना निपातिताः ॥ १७ ॥ ज० म० ।

प्रमे इत्यादि । ते मन्त्रिणः सपुत्राः पुत्रैः सह निरगुर्निर्गतवन्तः दृशच्छां रूपं कीदृशाः प्रमेदिताः बहिर्गमनसमये भार्यादीन् प्रति स्नेहं कर्तुमारब्धवन्तः राजप्रसादात् स्निग्धाभवितुमारब्धा विविधोपभोगेन प्रीता भवितुमारब्धा वा भावादिढेवेति पक्षे इम् सुखान्ताः शोभनमनसः वाढविक्रमाः भृशपराक्रमाः अभिष्टनादा विस्पष्टवाचः मन्त्रिणां वाग्मित्वात् फाण्टचित्रास्त्रपाणयः फाण्टेन कषायभेदेन चित्राणि अस्त्राणि पाणौ येषां ते तथा क्षुब्धवाढेत्यादिना खनवाह्नमेच्छकिफणां खान्तवाढमिष्टफाण्टा निपातिताः पुनातीति पुत्रः पूदेः स इत्यस्य योगविभागेन क्षुस्त्वात्र गुणः हवत्वतेरिति नेम् ॥ १७ ॥ भ०

तानित्यादि । तान् दृष्ट्वा कपिः आर्हिंददिति वक्ष्यमाणेन सम्बन्धः किम्भूतान् धृष्टान् धृष्णोतीति धृष्टः धृषीशसीवैयात्य इतीट्प्रतिषेधः अतिदृढान् बलवतः दृढस्थूलबलयोरिति निपातनं परिदृढाज्ञया परिदृढस्य प्रभोराज्ञया प्राप्तान् प्रभौ परिदृढ इति निपातनं कष्टं विनर्दतः कृच्छ्रं ध्वनतः गम्भीररवञ्च कृच्छ्रगहनयोः कष इतीट्प्रतिषेधः क्रूरान् हिंस्रान् शस्त्रघुष्टकरान् घुषिरविशब्दने इतीट्प्रतिषेधः ॥ १८ ॥ ज० म०

तानित्यादि । कपिर्हनूमान् तान् राक्षसान् दृष्ट्वा द्रुतं आर्हिंददित्यग्रिमश्लोकेनान्वयः कीदृशान् अतिदृढान् बलवत्तरान् धृष्टान् प्रगल्भान् परिदृढस्य प्रभोराज्ञया प्राप्तान् कष्टं कृच्छ्रं श्रोतृदुःखदं विनर्दतः शब्दायमानान् क्रूरान् हिंस्रान् शस्त्रैर्घुष्टो घोषणां प्राप्तः सततधारणाद्दृष्टो वा करो येषां तान् पूर्ववत् इह दृषदृक्षषषुषांक्ते निपातः ॥ १८ ॥ भ०

अव्य इत्यादि । अव्यर्णोऽपीड़ितः अर्देःसंनिविभ्य इतीट्प्रतिषेधः गिरिकूटाभान् महागिरिसदृशप्रमाणान् अभ्यर्णानविदूरान् अभेस्त्वविदूर्य इतीट्प्रतिषेधः द्रुतमार्हिंदत् हिंसितवान् अर्देः स्वार्थिकण्यन्तस्य लुङि रूपं दृतशस्त्रो-

दमितारिः प्रशान्तोर्जान्नादापूरितदिङ्मुखः ।
जघान रुषितो रुष्टांस्त्वरितस्तूर्णमागतान् ॥ २० ॥
तेषां निहन्यमानानां संघुष्टैः कर्णभेदिभिः ।
अभूदभ्यमितत्रासमाख्यान्ताशेषदिग्जगत् ॥ २१ ॥

ऽधीतशस्त्रविद्याः शैरध्ययने वृत्तमिति वृडभावो णिलुक् निपात्यते महारम्भान् अनल्पव्यापारान् त्रिदशैरप्यदान्तान् अशमितान् वादान्तेत्यादिना वृडभावो णिलुक् च निपात्यते ॥ १९ ॥ ज० म०

अव्यर्ण इत्यादि । गिरिकूटाभान् पर्वतशृङ्गसदृशान् अभ्यर्णान् समीपगतान् वृत्तशस्त्रान् अधीतशस्त्रविद्यान् महारम्भान् कृतव्यूहत्वात् त्रिदशैर्देवैरपि अदान्तान् अदमितान् कपिः कीदृशः अव्यर्णः अपीडितः अर्दृ ऋ नेम् सन्व्यर्दृ इति नेम् चुब्यवाढेत्यादिना सामीप्ये अभिपूर्व्वाद्दर्दृ ऊर्ज्जन्तवृतोरध्ययने च निपातितः ऊर्ज्जन्तदमेर्दान्तशान्तेत्यादिना निपातः ॥ १९ ॥ म०

दमीत्यादि । ये तु प्रशान्तौजसः शमितबलाः सन्तो रुष्टाः तूर्णमागताः तान् कपिर्जघान व्यापादितवान् प्रतापाढ्यत्वोऽरयो दमिता येन दमितारिः प्रशान्तं शत्रूणामोजो येन स प्रशान्तौजाः नादापूरितदिङ्मुखः तस्य वृत्तत्वात् रुषितः क्रुद्धः त्वरितः ससम्भ्रमः अत्र दमितप्रशमितपूरिताः ख्यन्ताः वादान्तेत्यादिना विकल्पितेटः रुष्टरुषितत्वरिताः रुष्यमत्वरेत्यादिना ॥ २० ॥ ज० म०

दमीत्यादि । कपिस्तूर्णं शीघ्रं आगतान् राक्षसान् त्वरितः सन् जघान कीदृशः दमिता उपशमिता अरयः शत्रवो येन स तथा नादैरापूरितं दिङ्मुखं येन रुषितः क्रुद्धः कीदृशान् प्रशान्तौर्ज्जान् उपशमितबलान् रुष्टान् क्रुद्धान् ऊर्ज्जन्तशमेः क्त इमनोपो जेरिति जिलोपः ऊर्ज्जन्तदमेर्दान्तशान्तेत्यादिना निपातः रुषत्वरिभ्यां क्तस्य वा रुषामित्यादिना विभाषित इम् त्वरेरनिमपक्षे श्रिवाश्मवेत्यादिना ऊट् ॥ २० ॥ म०

तेषामित्यादि । तेषां रक्षसां निहन्यमानानां संघुष्टैः शब्दैः कर्णभेदिभिः वाधिर्यकरैः अभ्यमितत्रासं अभिगतत्रासं जगदभूत् आख्यान्ताः अशेषा दिशो यस्मिन् जगति संघुष्टाभ्यमितास्यान्ताः रुष्यमत्वरेति विकल्पितेटः ॥ २१ ॥ ज० म०

तेषामित्यादि । हनूमता निहन्यमानानां तेषां राक्षसानां संघुष्टैः शब्दैः जगत् भुवनं अभ्यमितत्रासं प्राप्तभयं अभूत् कीदृशैः कर्णभेदिभिः श्रोत्रविदारिभिः कीदृशं अख्याना आशब्दिता अशेषा दिशो यत्र तत्तथा सम्पूर्व्वघुष आम् आङ्पूर्व्वस्यनाश्च वा रुषामित्यादिना क्तस्य वत्वोर्वमुत्वम् ॥ २१ ॥ म०

भयसंहृष्टरोमाणस्ततस्तेऽपचितद्विषः ।
क्षणेन क्षीणविक्रान्ताः कपिनानेषत क्षयम् ॥ २२ ॥

इतोट्प्रतिषेधाधिकारः ।

हत्वा रक्षांसि लवितुमक्रमीन्मारुतिः पुनः ।
अशोकवनिकामेव निगृहीतारिशासनः ॥ २३ ॥

आवरीतुमिवाकाशं वरितुं वीनिवोत्थितम् ।

भयमित्यादि । ततस्ते राक्षसाः कपिना क्षणेन क्षयं विनाशमनेषत नीताः कर्म्मणि लुङ् भयसंहृष्टरोमाणः भयोद्गतरोमाञ्चाः हृषेर्लोमस्विति विभाषितेट् अपचितद्विषः अपचितानां पूजितानां क्षपणां शत्रवः अपचितश्चेति निपातः क्षीणविक्रान्ताः क्षीणं विक्रान्तं पराक्रमो येषां स्त्रियो दीर्घादिति निष्ठातकारस्य नः ॥ २२ ॥ ज० म०

भयेत्यादि । ततोऽनन्तरं कपिना ते राक्षसाः क्षणेन क्षयं अनेषत प्रापिताः कर्म्मणि टौ णुर्युङ् इति णुः मान्तोऽदनत इत्यादेशः न्यादिऽग्रन्थाढगत्यर्थ इति सुख्यकर्म्मोक्तं कीदृशाः भयेन संहृष्टानि उद्गतानि रोमाणि येषां वारुषा-मिति वेम् अपचितानां पूजितानां क्षुन्यादीनां द्विषः शत्रवः नेमेकाजिति नेम् क्षीणं विक्रान्तं पराक्रमो येषां क्षेः पूर्ब्बवन्नेम् क्षेर्धोढे इषि दीर्घत्वे क्षूल्लाद्योदित्यादिना क्तस्य नः क्तसुगतावित्यस्य पूल्लिगुदित इत्यनेन वेस्त्वात् नेम् डीश्वीदिति नेम् अमुडभ्यसणाविति र्घः ॥ २२ ॥

इतोट्प्रतिषेधाधिकारः ।

इतः प्रभृतीटमधिकृत्याह

हत्वेत्यादि । रक्षांसि हत्वा मारुतिरशोकवनिकामेव पुनर्लवितुं छेत्तुं आङ्पूर्वाद्धातुक्षेट् अक्रमीत् गतवान् क्नुक्रमोरनानेपदनिमित्त इतोट् निगृहीतारिशासनः ध्वसारिव्यवस्थः यहौ लिटि दीर्घइतीटो दीर्घत्वम् ॥ २३ ॥ ज० म०

अथेडधिकारः ।

हत्वेत्यादि । रक्षांसि हत्वा निगृहीतरावणाज्ञो मारुतिर्हनूमान् पुनरशोकवनिकामेव लवितुं छेत्तुं अक्रमीत् जगाम लूञगिच्छिदि वसोरस्तीम् क्रमेष्टौ क्नुक्रमोऽम इति इम् मान्तवर्ज्जनात् हसादेः सेम इति न त्रिः यङ्लिमोर्घत्वम् ॥ २३ ॥ भ०

आवेत्यादि । प्रभञ्जनसुतो हनूमान् वनमशोकवनिकाख्यं विनाशयन् नाद-

वनं प्रभञ्जनसुतो नादृक्षिष्ट विनाशयन् ॥ २४ ॥
वरिषीष्ट शिवं क्षिप्यन् मैथिल्याः कल्पशाखिनः ।
प्रावारिषुरिव क्षौणीं क्षिप्ता दृक्षाः समन्ततः ॥ २५ ॥
संवुवूर्षुः स्वमाकूतमाज्ञां विवरिषुं द्रुतम् ।
अवरिष्टात्तमक्षय्यं कपिं हन्तुं दशाननः ॥ २६ ॥

यिट दयां न कृतवान् लुङि रूपं आकाशमावरीतुमिव अवष्टब्धमिवोत्थितं वनं वीन् पक्षिणो वरितुं प्रार्थयितुमिवोत्थितं आगच्छत नान्यत्र यात इहैव फलदृष्टिं प्राप्स्यथेति आवरीतुं वरितुमिति इतो वेति विकल्पेनेटो दीर्घत्वम् ॥२४॥ ज० भ०

आवेत्यादि । प्रभञ्जनसुतो हनूमान् वनं विनाशयन् न अदृक्षिष्ट दयां न कृतवान् कीदृशं आकाशं आवरीतुं आच्छादयितुमिव वीन् पक्षिणो वरितुं प्रार्थयितुमिव उत्थितं अत्युच्चत्वात् उच्चत्वोत्प्रेक्षा नेमेकाजित्यादौ इवर्जनादिम् इतोवेमोर्घ इति वा दीर्घः ॥ २४ ॥ भ०

वरीत्यादि । ये कल्पशाखिनः कल्पवृक्षाः स्वर्गादादायारोपितास्तानुन्मूल्य यथास्थानं क्षिप्यन् मैथिल्याः शिवं कल्याणं वरिषीष्ट प्रार्थितवान् मैथिल्या भद्रमस्त्वित्याशंसावचने लिङ् न लिङोति दीर्घप्रतिषेधः अन्ये च वृक्षास्तेन समन्ततः क्षिप्ताः सन्तः क्षौणीं पृथ्वीं प्रावारिषुरिवाच्छादितवन्त इव तेषामनाच्छादितत्वादिवार्थः सिचि वृद्धिः परस्मैपदेष्विति वृद्धिः ॥ २५ ॥ ज० भ०

वरीत्यादि । हनूमान् मैथिल्याः शिवं मङ्गलं वरिषीष्ट प्रार्थितवान् आशिषि टी स्याद्यूदृङ् इति पक्षे इम् अठीढीपसेरिति नेमो दीर्घः किं कुर्वन् ये कल्पवृक्षाः स्वर्गादानीयाशोकवनिकायामारोपितास्तानुन्मूल्य यथास्थानं क्षिप्यन्नुप्रेरयन् शिवशब्दस्य हितार्थत्वात् समर्थैर्नेत्यादिना मैथिल्या इत्यत्र षष्ठी अन्ये वृक्षाः समन्ततस्तेन क्षिप्ताः क्षौणिं भूमिं प्रावारिषुरिव आच्छादितवन्त इव या अनि रूपं पूर्ववन्नेमोर्घः ॥ २५ ॥ भ०

संवु इत्यादि । रामदूतेन कपिना कर्म्मेदृशं कृतमिति स्वमाकूतमभिप्रायं संवुवूर्षुः संवरीतुमिच्छुः दशाननो द्रुतमाज्ञां विवरिषुः प्रकटितुमिच्छुः अक्षं स्वसुतमवरिष्ट प्रार्थितवान् कर्त्रभिप्राये तङ् किमर्थं कपिं हन्तुं हनिष्यामीति अक्षय्यं क्षन्तुमशक्यं पोरदुपधादिति यत् संवुवूर्षुः विवरिषुरिति उगन्तत्वात् सनि ग्रहगुहोश्चेति चकारेणेट्प्रतिषेधे प्राप्ते इट् सनीवेति विभाषेट् तत्रानिट्पक्षे इकोझलीति कित्त्वे उदोष्ठ्यपूर्व्वस्येत्युत्वपक्षे गुण एव ॥ २६ ॥ ज० भ०

जचे संवरिषीष्टास्त्वं गच्छ शत्रोः पराक्रमम् ।
ध्वृषीष्टा युधि मायाभिः स्वरिता शत्रुसम्मुखम् ॥ २७ ॥
द्रुतं संस्वरिषीष्टास्त्वं निर्दयः प्रधनोत्तमे ।
स मायानामगात् सोता कपेर्विधवितुं द्युतिम् ॥ २८ ॥

इमित्यादि । अथ दशाननो द्रुतं कपिं हन्तुं अक्षनामानं कुमारं अवरिष्ट प्रार्थितवान् पक्षे इमोर्घाभावः कीदृशं अक्षस्यं न क्षमार्हं कीदृशः कपिमात्रेण रामदूतेनैवं कृतमिति स्वमाकूतं स्वकीयमाशयं संवृवृषुः संवरीतुमिच्छुः आच्छां विवरिषुः हे अक्षागच्छागच्छ कपिर्हन्यतामित्याच्छां विवरीतुं प्रकटयितुमिच्छुः स्वाद्वृद्वृद्वु रिति वृञः सनो वेम् अनिमृपक्षे घोऽञ्झनिङ्क्षामिति दीर्घत्वे गुर्नाभिसनीत्यगुत्वात् वदिरणाविल्लुर् ॥ २६ ॥ भ०

जचे इत्यादि । किमित्याह त्वं गच्छ शत्रोः पराक्रमं संवरिषीष्टाः सञ्छादय आशिषि लिङ्सिचोरात्मनेपदेष्विति वृञो विभाषेट् उश्चेतीट् पक्षे न कित्वं ध्वृषीष्टाः युधि मायाभिः कर्तृभूताभिः त्वं कुटिलोक्षधीष्टाः ध्वृङ्क्षुञ्ने ङ्क्षुर्कौटिल्ये तस्य चोदात्तत्वात् आशिषि कर्मणि लिङ् कृतश्च संयोगादेरिति विभाषेट् अनिट्पक्षे उश्चेति कित्त्वं स्वरिता उपतापयिता शत्रुसम्मुखं शत्रोरग्रतः अतो द्रुतं स्वरिषीष्टा इति वक्ष्यमाणेन योज्यं स्वृशब्दोपतापयोरित्यस्य स्वरति-स्वृतिस्वृवेत्यादिना विभाषेट् लिङ्सिचोरिति नानुवर्त्तते ॥ २७ ॥ ज० म०

विवरणमाह दशानन जचे किमित्याह

जचे इत्यादि । हे अक्ष त्वं गच्छ गत्वा शत्रोः कपेः पराक्रमं संवरिषीष्टाः आच्छादय आशिषि टी पूर्ववत् पक्षे इम् त्वं युधि संग्रामे मायाभिः कर्तृभिः ध्वृषीष्टाः कुटिलोक्षधीष्टाः ध्वृ कौटिल्ये कर्मणि टी स्वाद्वृद्वृद्वु रिति पक्षे इमोऽभावे इगुदुम्मदीक्ष्मनिम इति कित्त्वान्न गुणः त्वं कीदृशः शत्रुसम्मुखं यथा स्यात्तथा स्वरिता शत्रोरग्रत उपतापयितेत्यर्थः किंवा शत्रुसम्मुखं शत्रूणां प्रधानं स्वरिता उपतापनशीलः सुखमाद्ये प्रधानेचेत्यमरः स्वृ उशब्दोपतापयोः वेमूदित्स्वरेति पक्षे इम् ॥ २७ ॥ भ०

द्रुतमित्यादि । संस्वरिषीष्टाः उपतापय निर्दयः सन् आशिषि लिङ् समोगम्छीत्यात्मनेपदं अत्र कृतश्चेतीट् प्रधनोत्तमे संग्रामवरे एवमुक्तः सन् स मायानां सोता जनकः कपेर्द्युतिन्तेजो विधवितुमपनेतुमगात् गतः सोता धवितुमिति स्वरतीत्यादिस्वृवेण विभाषेट् ॥ २८ ॥ ज० म०

विगाढारं वनस्यासौ शत्रूणां गाहिता कपिः ।
अक्षं रधितुमारेभे रक्षा लङ्कानिवासिनाम् ॥ २९ ॥
निष्कोषितव्यान्निष्कोष्टुं प्राणान् दशमुखात्मजात् ।
आदाय परिघं तस्थौ वनान्निष्कुषितद्रुमः ॥ ३० ॥
एष्टारमेषिता संख्ये सोढारं सहिता भृशम् ।
रेष्टारं रेषितुं व्यास्यद्रोष्टाच्छः शस्त्रसंहतीः ॥ ३१ ॥

द्रुतमित्यादि । त्वं प्रधनोत्तमे महायुद्धे निर्भयः सन् द्रुतं संस्तरिषीष्टाः उपतापय शत्रुमित्यर्थात् समोगम्छेति मं एवमुक्तः सोऽज्ञः कपेर्द्युतिं तेजो विधवितुं अपनेतुं अगात् गतः कीदृशः मायानां सोता जनकः सूधुजां पूर्ववत् पक्षे इम् ॥ २८ ॥ भ०

विगेत्यादि । असौ कपिः वनस्य विगाढा अवलोडयिता अरं शीघ्रं शत्रूणां गाहिता विनाशयिता कर्मणि षष्ठी अदित्त्वाद्विभाषेट् खतरीत्यादिना अक्षं रधितुं हिंसितुमारेभे प्रवृत्तः लङ्कानिवासिनां रक्षसां रक्षा हिंसिता रधादिभ्यश्चेति विभाषेट् ॥ २९ ॥ ज० भ०

विगेत्यादि । असौ हनूमान् अक्षं रधितुं हिंसितुं आरेभे प्रवृत्तः कीदृशः अरं शीघ्रं वनस्य विगाढा विलोडयिता शत्रूणां गाहिता नाशयिता लङ्कानिवासिनां रक्षा हन्ता गाङ्विलोडे इत्यस्य अदित्वात् रधहतौ इत्यस्य च रधादित्वात् पूर्ववद्विभाषया इम् ॥ २९ ॥ भ०

निष्क इत्यादि । दशमुखात्मजादक्षात् प्राणान्निष्कोषितव्यान् अपनेतव्यान् अपनयार्हान् निष्कोष्टुं अपनेष्यामीति परिघमादाय तस्थौ निरः कुष इति विभाषेट् निष्कुषितद्रुमः वनादपनीतद्रुक्षः दक्षिष्टायामितीट् ॥ ३० ॥ ज० भ०

निष्क इत्यादि । दशमुखात्मजात् अक्षात् निष्कोषितव्यान् आकर्षणयोग्यान् प्राणान् निष्कोष्टुं अपहर्तुं परिघं आदाय गृहीत्वा कपिः तस्थौ कीदृशः वनात् निष्कुषिता आकृष्टा द्रुमा वृक्षा येन पूर्ववत् निःपूर्वकुषोवेम् नेमडीश्वीदिद्वेम् इति क्तेम् निषेधस्तत्र निष्कुषवर्जनात् ॥ ३० ॥ भ०

एष्टेत्यादि । कपिं युद्धस्यैष्टारं एषिता एषणशीलोऽज्ञः ताच्छील्ये तृन् न लोकेति षष्ठीप्रतिषेधः सोढारं प्रहरणस्य सहितारं सहिता भृशं सहनशीलः रेष्टारं हिंसकं रेषितुं हिंसितुं रोष्टा रोषणशीलः शस्त्रसंहतीर्व्यास्यत् क्षिप्तवान् लङि रूपं सर्वत्र तीषसहेत्यादिना वेट् ॥ ३१ ॥ ज० भ०

शस्त्रैर्दिदेविषुं संख्ये दुद्रुग्धुः परिघं कपिः ।
अर्दिधिषुर्यशः कीर्त्तिमीर्त्सुं हर्त्तारताडयत् ॥ ३२ ॥
भूयस्तं धिप्सुमाहूय राजपुत्तं दिदम्भिषुः ।
अहंस्ततः समूर्च्छावान् संशिश्रीषुरभूद्ध्वजम् ॥ ३३ ॥

एष इत्यादि । अत्तः संख्ये युद्धे रेष्टारं हिंसकं हनूमन्तं रेषितुं हिंसितुं शस्त्रसमूहान् व्यास्यत् क्षिप्रवान् अस्मुरर्त्तेर्मे धी कीदृशं एष्टारं इच्छाशीलं युद्धस्येत्यर्थात् सोढारं सहनशीलं भृशमत्यर्थं सोऽपि एषिता एषणशीलः सहिता सहनशीलः रोष्टा रोषणशीलः दृषुग्रवाञ्छे सहजडग्रक्तौ रिषबधे दृषजि च चकारात् बधे वेम्सहेत्यादिना वेम् ॥ ३१ ॥ भ०

शस्त्रैरित्यादि । कपिः अर्दिधिषुः यशोवर्द्धितुमिच्छुः परिघं दुद्रुग्धुः परिघेण क्रीड़ितुमिच्छुः अत्तं हर्त्तारताड़यत् हतवान् कीदृशं शस्त्रैर्दिदेविषुं क्रीडितुमिच्छुं कीर्त्तिमीर्त्सुं वर्द्धितुमिच्छुं दिवेरिश्वन्तस्य धृषुद्रुवाक्यस्य च सनीवन्तर्द्धेत्यादिना विभाषितेट् तत्र दिवेरिडभावपक्षे छोः सूट् धृषेराप्तृष्टधामीदितीत्वं अभ्यासलोपश्च ॥ ३२ ॥ ज० म०

शस्त्रैरित्यादि । कपिः संख्ये युद्धे हर्त्तारत्तमताड़यत् अत्तं कीदृशं शस्त्रैर्दिदेविषुं क्रीड़ितुमिच्छन्तं हर्त्तुं वर्द्धयितुमिच्छुं कपिः कीदृशः परिघेण दुद्रुग्धुः क्रीड़ितुमिच्छुः दिवोधेवेति करणे द्वितीया यशोऽर्दिधिषुः वर्द्धयितुमिच्छुः दिव्युक्रीड़ादौ भ्रस्जभ्रिसृयूर्णुभरेत्यादिना श्वन्नत्वात् सनो वेम् इसोऽभावपक्षे च्छोः सूटावित्यादिना जट् धृषुद्रुवौ पूर्व्वेण सनोवेम् नाजन्ताद्देरादिर्द्वित्वकारस्य स्वादौ नवद्रोऽये इति रेफस्य च न द्वित्वं अनिसृपक्षे त्रप्रधर्षापामीर्य्य इति हैर खिलोपश्च अन्तर्भूतज्ञ्यार्थोऽत्र बोध्यः ॥ ३२ ॥ भ०

भूय इत्यादि । तं राजपुत्तं अत्तं धिप्सुं दम्भितुं वञ्चयितुमिच्छुं भूयः पुनरपि दिदम्भिषुः वञ्चयितुमिच्छुः आहूयागच्छेत्यहन् हतवान् ततः सोऽत्तः मूर्च्छावान् मूर्च्छायुक्तः ध्वजमात्मीयं संशिश्रीषुः संश्रयितुमिच्छुः अभूत् भूतः अत्र दम्भेः श्रयतेश्च सनीवन्तर्द्धेटि अत्र श्रयतेरनिट्पक्षे अज्झनगमांसनीति दीर्घः द्वितीयस्य च दम्भ इच्च अभ्यासलोपः दम्भेर्हल् ग्रहणस्य जातिपरत्वात्सिद्धमिति कित्त्वे अनुनासिकलोपः एकाचोवश इति भष् खरिचेति चत्त्वम् ॥३३॥ ज०म०

भूय इत्यादि । कपिस्तमत्तं आहूय आगच्छ युद्धे इत्युक्त्वा भूयः पुनरपि अहन् हत्वेर्धी कीदृशं धीषुं दम्भं कर्त्तुमिच्छुं सच दिदम्भिषुः दम्भं कर्त्तुमिच्छुः ततः

आश्वस्याक्षः क्षणाल्लोकान् विभ्रज्जुरिव तेजसा ।
रुषा विभ्रज्जिषुप्रख्यं कपिं वाणैरवाकिरत् ॥ २४ ॥
संयुयूषुं दिशो वाणैरक्षं यियविषुर्द्रुमैः ।
कपिर्मायामिवाकार्षीद्दर्शयन् विक्रमं रणे ॥ २५ ॥
वानरं प्रोर्णुनविषुः शस्त्रैरक्षो विदिद्युते ।

प्रहारानन्तरं सोऽक्षो ध्वजं संश्रिश्रीषुः आश्रयितुमिच्छुः सन् मूर्च्छावान् मूर्छितोऽभूत् भ्रस्जश्रीत्यादिना दम्भेश्चयतेश्च सनोवेम् दम्भेरनिम्पक्षे दभोयाविति अचइत्वं खिलोपश्च अनकारनिर्देशात् नस्य लोपः झभान्तस्येति दस्य धः श्चयतेर्धोऽञ्झनिङ्क्षामिति दीर्घः ॥ २३ ॥ भ०

आश्वस्येत्यादि । क्षणात् क्षणमात्रेणाश्वस्य संज्ञां लब्धा लोकान् जनान् तेजसा क्रोधोत्थेन विभ्रज्जुरिव अथ स कपिं वाणैरवाकिरत् सञ्छादितवान् कीदृशं विभ्रज्जिषुप्रख्यं अग्नितुल्यं विभ्रज्जिषुः विभ्रज्जुरिति सनीवन्तर्धेत्यादिना विभाषेट् तत्रानिट्पक्षे स्कोरिति सलोपः ह्रश्चेति षः इट्पक्षे सकारस्य जश्त्वं चुत्वञ्च ॥ २४ ॥ ज० म०

आश्वस्येत्यादि । ततोऽक्षः क्षणात् आश्वास्य चेतनां प्राप्य वाणैः कपिमवाकिरत् आच्छादितवान् कीदृशः तेजसा लोकान् विभ्रज्जुरिव कोधलक्षणमत्र तेजः रुषा क्रोधेन विभ्रज्जिषुप्रख्यं अग्नितुल्यं भ्रस्जश्रीति भ्रस्जेः सनि वेम् ॥ २४ ॥ भ०

संमित्यादि । वाणैर्दिशः संयुयूषुं मिश्रयितुमिच्छुं अक्षं कपिः द्रुमैर्यियविषुः योतुमिच्छुर्मायामिवेन्द्रजालमिवाकार्षीत् कृतवान् रणे विक्रमं दर्शयन् यौतेः सन् सनीवन्तर्धेति विभाषेट् ओः पुयण्ज्यपर इतीत्वं अज्झनगमांसनीति दीर्घः ॥ २५ ॥ ज० म०

संमित्यादि । कपी रणे विक्रमं दर्शयन् मायामिव अकार्षीत् इन्द्रजालमिव दर्शितवानित्यर्थः कीदृशः द्रुमैरक्षं यियविषुः मिश्रयितुमिच्छुः अक्षं कीदृशं वाणैर्दिश दिशः संयुयूषुं मिश्रयितुमिच्छुं भ्रस्जश्रीति वेम् ॥ २५ ॥ भ०

वानेत्यादि । वानरं प्रोर्णुनविषुः छादयितुमिच्छुरक्षः विदिद्युते विद्योतते स्म द्युतिस्वाप्योरिति सम्प्रसारणं कपिरपि तमक्षं उपलैर्दक्षसहितैः प्रोर्णुनूषुः संवरीतुमिच्छुरावभौ भाति स्म जर्णोतेः पूर्ववद्विभाषेट् इट्पक्षे गुणः अन्यत्र अज्झनेति दीर्घः उभयत्र नन्द्रा इति रेफो न द्विरुच्यते ॥ २६ ॥ ज० म०

तं प्रोर्णुनूषुरुपलैः स वृक्षैरावभौ कपिः ॥ ३६ ॥
स्वां जिज्ञापयिषू शक्तिं बुभूर्षू नु जगन्ति किम् ।
शस्त्रैरित्यक्षपातां तौ पश्यतां बुद्धिमाहवे ॥ ३७ ॥
मायाभिः सुचिरं क्लिष्ट्वा राक्षसोऽक्लिशितक्रियम् ।
संप्राप्य वानरं भूमौ पपात परिघाहतः ॥ ३८ ॥
पवितोऽनुगुणैर्वातैः शीतैः पूता पयोनिधौ ।

वानरमित्यादि । अत्रः शस्त्रैर्वानरं प्रोर्णुनविषुः आच्छादयितुमिच्छुः सन् विदिद्युते दीप्तः द्युत्स्वाप्योः खेर्ज्जिः कपिरपि वृक्षसहितैरुपलैः पाषाणैस्तमक्षं प्रोर्णुनूषुः आच्छादयितुमिच्छुः सन् बभौ दीप्यते स्म ऊर्णुञ् आच्छादने भ्वसृजभ्रीत्यादिना वेम् ॥ ३६ ॥ भ०

स्वाङ्गीत्यादि । तौ कपिराक्षसौ किं स्वां शक्तिं जिज्ञापयिषू बोधयितुमिच्छूः इव बुभूर्षू त्रिजगन्ति किं नु त्रैलोक्यं शस्त्रेण भर्त्तुं पूरयितुमिच्छू इत्येवं बुद्धिमाहवे पश्यतां प्रेक्षकाणां अक्षपातां कृतवन्तौ जिज्ञापयिषू बुभूर्षू इति विभाषेट् तत्र भ्रञ्जभरण इति भौवादिकस्य ग्रहणं सनीवन्तर्द्धेति सूत्रे भरेति श्रपा निर्देशात् ॥ ३७ ॥ ज० म०

स्वामित्यादि । तौ कपिराक्षसौ पश्यतां जनानां आहवे युद्धे इति बुद्धिमक्षपातां चक्रतुः कीदृशीं बुद्धिमित्याह किन्नु किमु एतौ स्वां शक्तिं ज्ञापयितुमिच्छू जगन्ति त्रिभुवनानि शस्त्रैर्बुभूर्षू पूरयितुमिच्छू इमिभभ्यां भ्वसृजभ्रीत्यादिना सनोवेम् भ्रौवादिकः सूत्रे भरेति निर्देशात् ॥ ३७ ॥ भ०

मायेत्यादि । राक्षसो मायाभिः सुचिरं क्लिष्ट्वा क्लेशं कृत्वा वानरं अक्लिशितक्रियमनभिभूतव्यापारं सम्प्राप्य परिघाहतो भूमौ पपात क्लिशः क्ष्वानिष्टयोरिति विभाषेट् ॥ ३८ ॥ ज० म०

मायाभिरित्यादि । राक्षसोऽक्षो मायाभिः सुचिरं क्लिष्ट्वा क्लेशं प्राप्य अक्लिशितक्रियं अनभिभूतव्यापारं वानरं सम्प्राप्य परिघेणाहतः सन् भूमौ पपात क्लिशेः पूक्लिशुदित इति क्ष्वाचो वेम् पूक्लिशवमजपेति क्ष्वाक्ष्वत्वोर्वेम् ॥ ३८ ॥ भ०

पवीत्यादि । कपिरपि पयोनिधौ पूता स्नात्वा अनुगुणैरनुकूलैः शीतैर्वातैः पवितः पवित्रीकृतः पूङस्येति विभाषेट् भयः पुनर्वनं बभञ्ज कीदृशं पवित्रिभिः पक्षिभिः क्षुधित्वा क्षुधितैर्भूत्वा अध्युषितं कृतनिवासं वसन्निक्षुधोरितीट् ॥ ३९ ॥ ज० म०

बभञ्जाध्युषितं भूयः क्षुधित्वा पतिभिर्वनम् ॥ ३९ ॥
उच्चैरञ्चितलाङ्गूलः शिरोऽञ्चित्वेव संवहन् ।
दधद्विलुभितं वातैः केशरं वह्निपिङ्गलम् ॥ ४० ॥
जरित्वेव जवेनान्ये निपेतुस्तस्य शाखिनः ।
व्रश्चित्वा विवशानन्यान् बलेनापातयत्तरून् ॥ ४१ ॥
दमित्वाघरिसङ्घातानश्रान्त्वा कपिकेशरी ।
वनं चचार कर्त्तिष्यन्नत्यर्थन्निव निरङ्कुशः ॥ ४२ ॥

पवित इत्यादि । कपिः क्षुधित्वा क्षुधितो भूत्वा पयोनिधौ पूत्वा स्नात्वा फलादिकं भुक्त्वा चेत्यर्थात् शीतलैरनुगुणैर्व्वातैः पवितस्वक्तश्रमः सन् भूयः पुनरपि तद्वनं बभञ्ज भग्नवान् कीदृशं पतिभिः पक्षिभिरध्युषितं अधिष्ठितं क्षणं भङ्गाभावात् पक्षः पूक्षिश्रवसेतिक्षक्षत्वोर्वेम् पूशीष्टषेत्यादिना षुः पूक्षिषुदित इति क्षाचो वेम् वसेः क्षुधेश्च क्षुधवसपूजार्थाच्च इतीम् ॥ ३९ ॥ भ०

उच्चैरित्यादि । उच्चैरूर्द्ध्वं अञ्चितं पूजितं लाङ्गूलं पुच्छं यस्य शोभनविन्यासेन स्थितत्वात् शिरोऽञ्चित्वेव संवहन् अनम्रत्वात् पूजयित्वेव शिरोबिभ्राणः अञ्चेः पूजायामिति विभाषेट् वह्निपिङ्गलञ्च केशरं सटां दधत् बिभ्रत् वातैर्विलुभितं आकुलितं लुभोविमोहन इतीट् विमोहनमाकुलीकरणम् ॥४०॥ ज० म०

उच्चैरित्यादि । कपिः कीदृशः उच्चैरञ्चितलाङ्गूलः ऊर्द्ध्वं अञ्चितं पूजितं लाङ्गूलं पुच्छं यस्य स तथा शिरोऽञ्चित्वेव अनम्रत्वात् पूजयित्वेव संवहन् बिभ्राणः वातैर्विलुभितं चञ्चलीकृतं वह्निवत्पिङ्गलं केशरं दधत् धारयन् ईदृशो वनं बभञ्जेति पूर्व्वेणान्वयः क्षुधवसपूजार्थाच्चागाध्यीर्थलुभ इति इम् नेदित्पूजार्थाच्चोरिति नलोपाभावः ॥ ४० ॥ भ०

जरीत्यादि । तस्य कपेर्जवेन वेगेन अन्ये शाखिनः जरित्वेव जीर्णा इव भूत्वा निपेतुः अन्यांस्तरून् बलेन व्रश्चित्वा छित्त्वा विवशान् स्वस्वपक्षवानपातयत् पातितवान् जॄव्रश्चोः क्षीतीट् ॥ ४१ ॥ ज० म०

जरित्वेत्यादि । अन्ये शाखिनः तस्य कपेर्ज्जवेन वेगेन जरित्वेव जीर्णा इव भूत्वा निपेतुः निपतितवन्तः अन्यान् विवशान् अनायत्तान् तरून् बलेन व्रश्चित्वा छित्त्वा कपिरपातयत् पातयामास जॄव्रश्चो न जिरिति इम् जिनिषेधश्च ॥ ४१ ॥ भ०

दमीत्यादि । कपिकेशरी हनूमान् अरिसङ्घातान् दमित्वा उपशमं नीत्वा अश्रान्त्वा अपरिश्रान्तो भूत्वा वनं चचार उदितो वेति विकल्पेनेट् निरङ्कुशः

पारं जिगमिषन् सोऽथ पुनरावर्त्स्यतां द्विषाम् ।
मत्तद्विरदवद्रेमे वने लङ्कानिवासिनाम् ॥ ४३ ॥
यद्यकल्प्स्यदभिप्रायो योद्धुं रक्षःपतेः स्वयम् ।
तमप्यकर्त्स्यमद्याहं वदन्नित्यचरत् कपिः ॥ ४४ ॥
हृते तस्मिन् प्रियं श्रुत्वा कल्पा प्रीतिं परां प्रभुः ।

निरवग्रहः कर्त्तियतुं छेत्स्यन् नर्त्स्यन्निव नर्त्तुकाम इव सेसिचीत्यादिना विभाषेट् ॥ ४२ ॥ ज० म०

दमित्वेत्यादि । कपिकेशरी हनूमान् शत्रुसमूहान् दमित्वा नाशयित्वापि अश्रान्त्वा अश्रान्तो भूत्वा वनं कर्त्तियतुं छेत्स्यतु नर्त्स्यन्निव नर्त्तितुकाम इव निरङ्कुशो निरवग्रहः सन् चचार बभ्राम दध्म इर्थमे अस्तभ्य इर्त्तपःखेदयोरुदित्वात् पूङ्क्रियुदित इति वेम् क्रतीशपच्छिदि नटत्यन्त्ये अनयोर्नृत्कृदिति वेम् ॥ ४२ ॥ भ०

पारमित्यादि । अथ स कपिर्द्विषां पारं जिगमिषन् गन्तुमिच्छन् अमेरिट् परस्मैपदेषु पुनरावर्त्स्यतां प्रतीपीभविष्यतां नटद्भ्र इतीट्प्रतिषेधः दृङ्भ्रः ससनोरिति परस्मैपदं लङ्कानिवासिनां वने मत्तद्विरद इव रेमे क्रीडितवान् ॥ ४३ ॥ ज० म०

पारमित्यादि । अथानन्तरं स हनूमान् पुनरावर्त्स्यतां प्रत्यागमिष्यतां लङ्कानिवासिनां द्विषां शत्रूणां पारमन्तं गन्तुं इच्छुः सन् वने मत्तहस्तीव रेमे क्रीडति स्म गमोऽमेस इति गच्छतेरिम् दृङ्भ्रोनेम्पे इति हृतेर्नेम् अतएव पम् ॥ ४३ ॥ भ०

यदीत्यादि । रक्षःपतेः रावणस्य स्वयं योद्धुं यद्यभिप्रायोऽकल्प्स्यत् समपत्स्यत् तासिचक्लृप इति चकारात् सकारे च नेट् तदा तमप्यहमकर्त्स्यं उत्पाटयामि अहमद्येति एवं वदन् कपिर्वनमचरत् सेसीचीत्यादिना विभाषेट् अकल्प्स्यदकर्त्स्यमिति च लिङ्निमित्त इति लृङ् हेतुहेतुमद्भावस्य लिङो निमित्तम् ॥ ४४ ॥ ज० म०

यदीत्यादि । यदि रक्षःपते रावणस्य स्वयं योद्धुमभिप्रायोऽकल्प्स्यत् कल्पिष्यते तमप्यद्याहमकर्त्स्यं अच्छेत्स्यं इति वदन् कपिरचरत् चरति स्म क्रमूङ्वृत्तचकल्पने पूर्ववत् इत्तादित्वात् सस्य नेम् क्रतीशपच्छिदि नटत्यन्त्ये इति वेम् ॥ ४४ ॥ भ०

तोषोऽद्यैव च सीतायाः परश्चेतसि कल्प्स्यति ॥ ४५ ॥
आहूय रावणोऽवोचदथेन्द्रजितमन्तिकात् ।
वने मत्त इव क्रुद्धो गजेन्द्रः प्रधनेष्वटन् ॥ ४६ ॥
ययाथ त्वं द्विषामन्तं भूयो यातासि चासकृत् ।
शशकृथ जेतुं त्वं देवान् मायाः ससर्थ सम्प्रति ॥ ४७ ॥

हृत इत्यादि । हृते तस्मिन् रक्षःपतौ प्रियं श्रुत्वा प्रभुः रामः परां प्रीतिं कल्प्या जनयिता अत्यन्तभावितोण्यर्थः धातोरकर्मकत्वात् सीतायाश्चाद्यैव चेतसि तोषः परो महान् कल्प्स्यति सम्पत्स्यते तासि च लृप इतीट्प्रतिषेधः लुटि च लृप इति परस्मैपदम् ॥ ४५ ॥ ज० म०

हृते इत्यादि । तस्मिन् रावणे हृते सति प्रियं श्रुत्वा प्रभू रामः परां प्रीतिं कल्प्या प्राप्स्यति नेमुमेद्या इति तेनैव पं किञ्च अद्यैव च अधुनैव च सीतायाश्चेतसि परस्तोषः कल्प्स्यति भविष्यति पूर्ववत् हृतादित्वात् स्स्य नेम् इति वदन् कपिरचरदिति पूर्वेणान्वयः ॥ ४५ ॥ भ०

आहूयेत्यादि । अथ रावणः इन्द्रजितमाहूय अन्तिकमवोचत् किमवोचदित्याह वने मत्त इव यथा गजेन्द्रो मत्तः क्रुद्धो वने पर्य्यटन् द्विषामन्तं गतवान् तथा त्वं प्रधनेषु संग्रामेष्वटन् द्विषामन्तं ययाथेति वक्ष्यमाणश्लोकेनान्वयः ॥ ४६ ॥ ज० म०

आहूयेत्यादि । अथानन्तरं अन्तिके समीपे इन्द्रजितमाहूय रावणोऽवोचत् उक्तवान् किमवोचदित्याह त्वं क्रुद्धः सन् प्रधनेषु युद्धेषु अटन् परिभ्रमन् वने मत्तो गजेन्द्र इव द्विषामन्तं ययाथेत्यग्रिमश्लोकेनान्वयः मदीभिर्यजिर्हर्षे नेमडीश्वीदिति ईदित्त्वान्नेम् स्फूल्वाद्योदित्यादौ मदवर्ज्जनान्न क्षस्य नः क्रुध्लटयौ कोमे आदित्वान्नेम् ॥ ४६ ॥ भ०

ययेत्यादि । न केवलं ययाथ भूयः पुनरपि यातासि यास्यसि यातेः क्षादिनियमात्प्राप्तेटः अचस्तास्वत्थल्यनिटो नित्यमिति प्रतिषेधः तस्य हि तासौ नित्यमनिट्त्वं अजन्ताधातवोऽनुदात्त इति वचनान् देवान् जेतुं त्वमसकृत् बहुधा शशकृथ शक्नोऽसि उपदेशेत्वत इति थलीट्प्रतिषेधः शकेस्तासौ नित्यानिट्त्वं शकिसुकान्त इति वचनात् मायाश्च कूटयुद्धानि सम्प्रति युद्धे सस्मर्थ स्मृतवानसि ऋतो भारद्वाजस्येतीट्प्रतिषेधः ॥ ४७ ॥ ज० म०

ययाथेत्यादि । असकृत् वारंवारं द्विषामन्तं ययाथ प्राप्तवानसि स्मृज-

त्वं ससर्ज्जिथ शस्त्राणि दद्रष्ठारींश्च दुःसहान् ।
शस्त्रैरादित्थ शस्त्राणि त्वमेव महतामपि ॥ ४८ ॥
स त्वं घ्नन्निष्यन् दुर्बुद्धिं कपिं व्रज ममाज्ञया ।
मानाक्षीराक्षसीर्म्मायाः प्रस्तावीर्म्मा न विक्रमम् ॥ ४९ ॥
मा न सावीर्म्महास्त्राणि मा न धावीररिं रणे ।

दृग्रजिति वेम्त्वं भृयः पुनरपि यातासि च यास्यसि च नेमेकाजिति नेम्त्वं देवान् जेतुं शशक्थ शक्तो भूतोऽसि स्रुजदृग्रजिति वेम् संयति युद्धे मायावक्षीः ससर्ज्जार्थ स्रुतवानसि नेम्रुतस्यप इति नेम् ॥ ४७ ॥ भ०

त्वमित्यादि । शस्त्राणि त्वं ससर्ज्जिथ क्षिप्तवानसि अरींश्च दुःसहान् युध्यतः दद्रष्ठ दृष्टवानसि न पलायितोऽसि विभाषास्रुजिदृग्रोरिति थलि विभाषेट् अनिट्पक्षे स्रुजिदृग्रोर्झल्यमकिति षत्वष्टुत्वे महतामपि मध्ये त्वमेव शस्त्राणि परकीयानि शस्त्रैः स्वैरादित्थ जग्धवानसि दृडत्यर्तिव्ययतीनामित्यत्रेरिट् ॥ ४८ ॥ ज० म०

त्वमित्यादि । त्वं शस्त्राणि च ससर्ज्जिथ क्षिप्तवानसि स्रुजदृग्रेति वेम् दुःसहानरीन् दद्रष्ठ दृष्टवानसि पूर्ववद्वेमृत्वात् पक्षेऽनिम् शक्ऌाजिति षड्वर्द्धकिदिति क्रतोरः स्वकीयैः शस्त्रैः त्वमेवाद्वितीयः महतामिन्द्रादीनामपि शस्त्राणि आदित्थ भक्षितवानसि स्रुजदृग्रेत्यादौ अदवर्ज्जनाद्वेमृत्वमित्यादिना नियमात् नित्यमिम् ॥ ४८ ॥ भ०

स त्वमित्यादि । स त्वमेवंविधः कपिं दुर्बुद्धिं चपलत्वाद्धनिष्यन्निति मदाज्ञया व्रज हनोस्त्र दृतीट् वस्वेकाजिति स्रुतत्वयं नोदात्तं फस्वादेश्यस्य छन्दोविषयत्वात् राक्षसीं मायां मा नाक्षीः मा न व्यक्तीकुरु अपित व्यक्तीकुर्व्वित्यर्थः अक्षेः सिचीतीट् विक्रमं न मा प्रस्तावीः मा न प्रादुरभूस्त्र स्तुस्रुधुभ्य इतीट् ॥ ४९ ॥ ज० म०

स त्वमित्यादि । स एवंविधः प्रसिद्धस्त्वं दुष्टमतिं कपिं घ्नन्निष्यन् विनाशयिष्यन् ममाज्ञाया व्रज गच्छ स्वस्त्रेन इति इम् राक्षससम्बन्धिनीर्मायां मा न अक्षीः व्यक्तीकरिष्यसि अपि त्ववश्यमेव अनजूधञित्यक्तिगतिक्षेपणे जदित्वाद्वेमत्वे अनजःसेरिमिति नित्यमिम् विक्रमं मा न प्रस्तावीः न न प्रस्तुतं करिष्यसि अपि त्ववश्यमेव स्तुस्रुधोः सेरितीम् व्रजवदेति त्रिः मायोगे इमोऽभावः माटीवेति सदा टी च । ४९ ॥ भ०

वानरं मा न संयंसीर्व्रज तूर्णमशङ्कितः ॥ ५० ॥
अनंसीच्चरणौ तस्य मन्दिरादिन्द्रजिद् व्रजन् ।
गते तस्मिन्नुपारंसीत् संरम्भाद्रक्षसां पतिः ॥ ५१ ॥
इन्द्रजिद्विक्रमाभिज्ञो मन्वानो वानरं जितम् ।
संसिस्मयिषमाणोऽगान्मायां व्यञ्जिजिषुर्द्विषः ॥ ५२ ॥

मा नेत्यादि । रणे महास्त्राणि मा न सावीः मा न प्रसुहि मा न सञ्चेत्यर्थः षुप्रसवैश्वर्य्ययोरित्यस्य रूपं अरींश्च मा न धावीः मा न कम्पय अपि तु भीषयस्वेत्यर्थः पूर्ववदिट् वानरं मा न संयंसीः मा न बधीः यमरमेत्यादिना सगिटौ सप्तदाङ्भ्योयम इति तङ् न भवति तत्राकर्म्मकादिति वर्त्तते यत एवं तस्मादशङ्कितस्तूर्णं व्रज ॥ ५० ॥ ज० म०

मा नेत्यादि । महास्त्राणि मा न सावीर्न न सन्धास्यसि अपि तु सन्धानं करिष्यस्येव रणे अरिं शत्रुं मा न धावीर्न न कम्पयिष्यसि अपि त्ववश्यमेव वानरं मा न संयंसीः बद्धं न न करिष्यसि अपि त्ववश्यमेव तस्मात्त्वं निर्भयः सन् तूर्णं शीघ्रं व्रज गच्छ षुञ्नसम्भालेदपीडानन्दे षुञ्नकम्मे आभ्यां सस्तुधोः सेरितीम् यमौ उपरतौ संपूर्व्वौबन्धनार्थः यमरमेति इमसनौ जिनूजप्रन्तेत्यादौ अप्रन्योत्समायम इति न मं कर्त्तुः फलवत्त्वाभावात् इति रावणोऽवोचदिति पूर्वेण सम्बन्धः ॥ ५० ॥ भ०

अनंसीदित्यादि । एवमुक्त इन्द्रजित् मन्दिरात् व्रजन् गमिष्यन् वर्त्तमानसामीप्ये वर्त्तमानवदिति लट् तस्य पितुश्चरणावनंसीत् नतवान् पूर्ववत्सगिटौ गते तस्मिन् रक्षसां पतिः रावणः संरम्भात् क्रोधात् उपारंसीत् निवृत्तवान् पूर्ववत्सगिटौ रमेरुपाङ्गेति तिप् ॥ ५१ ॥ ज० म०

अनंसीदित्यादि । एवमुक्त इन्द्रजित् मन्दिरात् व्रजन् गच्छन् तस्य रावणस्य चरणौ अनंसीत् प्रणनाम तस्मिन्निन्द्रजिति गते सति रक्षसां पती रावणः संरम्भात् क्रोधात् उपारंसीत् निवृत्तः उभयत्र यमरमणमेति इमसनौ ॥ ५१ ॥ भ०

इन्द्रेत्यादि । वानरं जितं मन्वानोऽवगच्छन् यतोविक्रमाभिज्ञः अगात् गतवान् द्विषः शत्रून् सिस्मयिषमाणः उपहसितुमिच्छन् पूर्ववत्सन इति तङ् मायां व्यञ्जिजिषुः व्यक्तीकर्त्तुमिच्छुः स्मिपूङ्रञ्शासनीतीट् तत्राङ्गेनेन्द्रा इति नकारो न द्विरुच्यते ॥ ५२ ॥ ज० म०

इन्द्रजिदित्यादि । इन्द्रजित् स्वविक्रमाभिज्ञः अतएव वानरं जितमभिभूतं

जगत् पिपविषुर्वायुः कल्पान्त इव दुर्द्धरः ।
लोकानाग्निग्निषोस्तुल्यः कृतान्तस्य विपर्य्यये ॥ ५३ ॥
वने चिकरिषोर्दृप्तान् बलं जिगरिषुः कपेः ।
लसद्विचित्रशस्त्रौघः संग्रामो मूर्त्तिमानिव ॥ ५४ ॥
रोदिति स्मेव चायाति तस्मिन् पक्षिगणः शुचा ।
सुकृकण्ठं हृतान् दृप्तान् बन्धून् बन्धोरिवागमे ॥ ५५ ॥

मन्यानो जानन् द्विषः शत्रोः संसिस्नयिषमाणः उपदृसितुमिच्छुः सन् मायां व्यक्निजिषुर्व्यक्तीकर्त्तुमिच्छुः सन् अगात् गतः स्निङ्पूङित्यादिना स्निङोऽनुजश्च सन इस् द्विष इति सम्बन्धे षष्ठी ॥ ५२ ॥ भ०

जगदित्यादि । कल्पान्ते युगान्ते वायुरिव दुर्द्धरः जगत् पिपविषुः पवितुमुत्क्षेप्तुमिच्छुः विपर्य्यये विनाशकाले लोकानाग्निग्निषोः भक्षयितुमिच्छोः कृतान्तस्य तुल्योऽगादिति पूर्व्वेण सम्बन्धः पूर्व्ववदिट् ॥ ५३ ॥ ज० भ०

जगदित्यादि । कीदृशः जगत् भुवनं पिपविषुः पवितुमुत्क्षेप्तुमिच्छुः कल्पान्ते वायुरिव दुर्द्धरः धर्त्तुमशक्यः विपर्य्यये जगतां विनाशकाले लोकान् व्याग्निग्निषोः व्याग्नुमात्मसात्कर्त्तुमिच्छोः कृतान्तस्य यमस्य तुल्यः ईदृश इन्द्रजिदगादिति पूर्वेणान्वयः पूङःशोधे अशूङ्व्याग्निसंक्त्योः आभ्यां सनः स्निङ्पूङित्यादिना इस् आग्निग्निषोर्भक्षयितुमिच्छोरिति केचित् तन्न साधु स्नूते अस्नूदित्यूदनुबन्धनिर्देशात् ॥ ५३ ॥ भ०

वन इत्यादि । वने दृप्तांश्चिकरिषोः विक्षेप्तुमिच्छोः कपेर्बलं सामर्थ्यं जिगरिषुः अपनेतुमिच्छुः क्त्योरुगन्तत्वात् सनि यङ्लुगोरेति प्रतिषेधे प्राप्ते दृङ्निरेति विकल्पे किरश्चपञ्चभ्य इतीट् किरतेरिटो दीर्घत्वं नेङ्नीति न दीर्घः लसन् शोभमानो विविधो बहुप्रकारः शस्त्राणामायुधानामोघः समूहो यस्य स मूर्त्तिमान् शरीरी संग्राम इव इन्द्रजिदगादिति पूर्वेणान्वय इत्यर्थः ॥ ५४ ॥ ज० भ०

वने इत्यादि । पुनः कीदृशः वने दृप्तान् चिकरिषोर्विक्षेप्तुमिच्छोः कपेः बलं सामर्थ्यं जिगरिषुर्भक्षयितुं नाशयितुमिच्छुः लसन् दीप्यमानो विचित्रो नानाविधः शस्त्रसमूहो यस्य मूर्त्तः संग्राम इव इन्द्रजिदगादिति पूर्वेण सम्बन्धः कृञविक्षेपे गृञनिगरणे आभ्यां सनः पूर्व्ववदिम् ॥ ५४ ॥ भ०

रोदीत्यादि । तस्मिन्निन्द्रजिति आयात्यागच्छति सति पक्षिगणः हृतान्

आश्वसीदिव चायाति तद्वेगपवनाहृतम् ।
विचित्रस्तवकोल्लासि वनं लुलितपल्लवम् ॥ ५६ ॥
न प्राणिषि दुराचार मायानामीशिषे न च ।
नेडिषे यदि काकुत्स्थं तमूचे वानरो वचः ॥ ५७ ॥

इतीडधिकारः ।

हृत्वान् कपिनाशितान् शुचा शोकेन सुक्कण्ठं सशब्दं नामग्राहं रोदिति स्मेव रुदितवानिव नामग्रहणपूर्व्वया रोदनक्रियया व्याप्यमानत्वात् हृत्वाणां कर्म्मसंज्ञा रुदादिभ्य इतीट् बन्धून् बन्धोरिव यथा बन्धोरागमने कश्चित् बन्धून् रोदिति ॥ ५५ ॥ ज० म०

रोदितीत्यादि । तस्मिन्निन्द्रजिति आयाति आगच्छति सति पक्षिगणः शुचा शोकेन सुक्कण्ठं सशब्दं यथास्यात्तथा हृतान् हनूमता विनाशितान् हृत्वान् रोदिति स्मेव क्रन्दति स्मेव यथा बन्धोरागमने लोको हृतान् बन्धून् रोदिति सशब्दरोदनक्रियायां रुदिःसकर्म्मकः रुद्भ्योऽयोहृस्मृतीम् हृनलोगतौवधे औदित्वान्नेम् ॥ ५५ ॥ म०

आश्वेत्यादि । तस्मिन्नायाति वनं तद्वेगपवनाहृतं सत् आश्वसीदिव सञ्जीवितमिव लङि रूपं यतो विचित्रस्तवकोल्लासि लुलितपल्लवञ्च जातं पूर्व्ववदिट् ॥ ५६ ॥ ज० म०

आश्वसीदित्यादि । तस्मिन्नायाति सति वनञ्च आश्वसीदिव सञ्जीवितमिव स्वसघ्लुप्राणने धी रुदाद्यस्तीति ईम् कीदृशं तस्य हनूमतो वेगवायुना आहृतं आश्वस्ततामाह विचित्रेण स्तवकेनोल्लासमानं यद्दादित्वान्नेम् लुलितं मनोहरं पल्लवं यस्य तत् तथा ॥ ५६ ॥ भ०

न प्रेत्यादि । वानरस्तमागच्छन्तमिदं वचनमूचे हे दुराचार न प्राणिषि न जीवसि अनचेत्यस्य रूपं पूर्व्ववदिट् अनितेरिति णत्वं नच मायानामीशिषे नेशिता भवसि ईशः स इति इट् अधीगर्थेति कर्म्मणि षष्ठी यदि काकुत्स्थं नेडिषे न स्तौषि ईडजनोर्ध्वे चेति चकारात्सेचेतीट् ॥ ५७ ॥ ज० म०

इतीडधिकारः ।

न प्रेत्यादि । वानरो हनूमान् तमिन्द्रजितं वच ऊचे किं वच इत्याह हे दुराचार त्वं काकुत्स्थं यदि नेडिषे न स्तौषि तदा न प्राणिषि न जीवसि न च मायानामीशिषे मायानामीश्वरो न भविष्यसि माया यद्येष्टं न च विनियोक्ष्यसे

ससैन्यश्चादयन् संख्ये प्रावर्त्तिष्ट तमिन्द्रजित् ।
शरैः क्षुरप्रैर्मायाभिः शतशः सर्व्वतो मुहुः ॥ ५८ ॥
वानरः कुलशैलाभः प्रसह्यायुधशीकरम् ।

इति वा कर्म्मणि षष्ठी धातूनामनेकार्थत्वात् विनियोगार्थता वर्त्तमानसामीप्येऽपि वर्त्तमानवद्विवक्षत इति न्यायात् सर्व्वत्र की अनद्यतनप्राणने रुङ्गोऽयदिति इम् दिङलङस्तुतौ आभ्यां सभ्योरसेमिति इम् ॥ ५७ ॥ भ०

इतीडधिकारः ।

इदानीं विसर्जनीयस्य स इत्यधिकृत्याह

सेत्यादि । इन्द्रजित् ससैन्यः सबलः तं वानरं सर्व्वतः शरैः क्षुरप्रैः भल्लैः छादयन् मुहुः क्षणं मायाभिः शतशोऽनेकधा संखे प्रावर्त्तिष्ट प्रवृत्तः लुङि रूपं तत्र ससैन्यश्छादयन् इति विसर्जनीयस्य स इति सत्वं छकारे परे श्चुत्वं शरैः क्षुरप्रैरिति सत्वापवादः शर्परोखरि विसर्जनीयस्य विसर्जनीयः विसर्जनीयस्य विकारनिवृत्त्यर्थः मायाभिः शतशः सर्व्वत इति वाशरीति विकल्पः विसर्जनीयः सकारो वा ॥ ५८ ॥ ज० भ०

अतः परं विसर्ज्जनीयसत्वाधिकारः । सकारपदमादेशमात्रोपलक्षणं क्षमते विसर्ज्जन्यधिकारः ।

ससैन्य इत्यादि । इन्द्रजित् सशैन्यः सैन्यैः सह शरैः क्षुरप्रैश्च सर्व्वतो मुहुर्म्मुहुर्वारं वारं तं वानरं छादयन् संखे युद्धे मायाभिः शतशः शतं शतं वारान् प्रावर्त्तिष्ट प्रवृत्तः ससैन्यश्छादयन्नित्यत्र वेःसोऽशसन्लेऽते इति विसर्गस्य सः स्तुभिरिति तालव्यत्वं शरैः क्षुरप्रैरित्यत्र कखपफयोर्मुन्यावित्यस्य न विषयः अशसन्त इत्यस्यानुवर्त्तनात् विभक्तिव्यत्ययेन अशसन्तयोरिति कखपफयोर्विशेषणात् परे तु शषपरयोः ख्याञ्च च न स्यादिति जिह्वामूलीयनिषेधं षस्परयोर्न स्यादित्यनेन उपध्मानीयनिषेधञ्चाह शरैः क्षुरप्रैर्म्मायाभिरित्यत्र रिचोऽवे इति विसर्गस्य रेफः यद्यपि रवे इति कृते इष्टसिद्धिः स्यात्तथापि इच इति कृतस्य साफल्यमाह देवीदासचक्रवर्त्ती यथा क्वचिदपवादविषयेऽप्युत्सर्गोऽपि प्रवर्त्तत इति न्यायात् अभोभगोऽघोभ्योऽवेलुवित्यादिसूत्रविषये प्रवृत्त्याशङ्कानिरासः तेन हि न्यायेन दधिना पतिनेत्यादिसिद्धं मायाभिः शतश इत्यत्र शसिशसित्यस्य विषयः सर्व्वतो मुहुरित्यत्र अतोऽङ्व्युरित्यस्य विषयः ॥ ५८ ॥ भ०

वानेत्यादि । वानरः कुलशैलाभः संग्रामे स्थिरत्वात् आयुधं शीकरमिव

रक्षस्साशान् यशस्काम्यंस्तमस्कल्पानदुद्रुवत् ॥ ५९ ॥
धनुष्माशभृतः संख्ये ज्योतिष्कल्पोरुकेशरः ।
दुधाव निर्नमस्कारान् राक्षसेन्द्रपुरस्कृतान् ॥ ६० ॥

नैरन्तर्येण पतनात् प्रसह्याभिभूय कुःपौः कःघौ चेति जिह्वामूलीयोपध्मानीयौ रक्षस्साशान् कुत्सितराक्षसान् पाय्येपाशप् स्वार्थिका अपि प्रकृतितोलिङ्गवचनान्यतिवर्त्तन्ते यशस्काम्यन् आत्मनो यश इच्छन् अत्र तकारे परतोनश्चव्यप्रशानिति नुत्वं विसर्जनीयसकारौ च पूर्व्वस्यानुनासिकः तमस्कल्पान् ईषदसमाप्ततमसः कुप्वोरपवादः सोपदादाविति सकारः तत्र पाशकल्पकाम्येच्छीति प्रतिगणनं अदुद्रुवत् ढौकते स्म णिश्रीत्यादिना चङ् ॥ ५९ ॥ ज० म०

वानर इत्यादि । वानरः कुलपर्व्वततुल्यः क्लेशरहितत्वात् आयुधं शोकरमिव नैरन्तर्येण पतनात् प्रसह्य सोढ्वा रक्षस्साशान् कुत्सितरक्षांसि अदुद्रुवत् ढौकते स्म द्रावितवानित्यर्थः द्रुगतौ ढी जिश्विसुद्रुक्रुश इति अङ् कीदृशः यशस्काम्यन् आत्मनो यश इच्छतीति लेःकाम्यक्स्वेच्छायामिति काम्यक् ततः शतृः कीदृशान् तमस्कल्पान् अन्धकारतुल्यान् त्यादेश्चोने इति कल्पः कुत्सितानि रक्षांसि रक्षस्साशाः पाशः कुत्सायामिति पाशः पुंस्त्वमभिधानात् राजानमिच्छति राजीयतीत्यादिषु नोलुप्फेधाक्त्यनेनैवेष्टसिद्धौ नलोपार्थं नलोपः क्यङेः इति ह्रस्वं ज्ञापयति लुप्तविभक्तिकस्य विरामाश्रितकार्य्यस्यानित्यमिति तेन रक्षस्साशादिषु विसर्गाभावः किंवा रक्षस्साशादयो मनीषादित्वात् सिद्धाः किंवा सेतु कखपफे वेत्यस्य योगविभागात् वाशब्दस्य व्यवस्थावाचित्वाच्च पाशकाम्यकल्पेषु विसर्गस्य नित्यं सकारः ॥ ५९ ॥ भ०

धनुरित्यादि । धनुष्माशभृतः कुत्सितधनुर्धरान् राक्षसान् ज्योतिष्कल्पोरुकेशरः अग्नितुल्यदृढत्वटो वानरः इणःष इति षाशादिष्वेव विसर्जनीयस्य षत्वं दुधाव कम्पितवान् यस्माद्निर्नमस्कारान् अप्रणमान् राक्षसेन्द्रेणेन्द्रजिता पुरस्कृतान् अग्रतः स्थापितान् नमस्पुरसोर्गत्योरिति विसर्जनीयस्य सकारः इणउत्तरस्य तु विसर्जनीयस्य स एवाधिक्रियते तत्र नमःशब्दस्य साक्षात्प्रभृतिषु पाठात् पुरःशब्दस्य पुरोऽव्ययमिति गतिसंज्ञा ॥ ६० ॥ ज० म०

धनुरित्यादि । वानरः संख्ये युद्धे तान् राक्षसान् दुधाव कम्पितवान् धूञ्जकम्पे ठी कीदृशान् धनुष्माशभृतः निन्दितधनुर्द्धरान् पूर्व्ववत्पाशः निर्नमस्कारान् नमस्कारवर्जितान् अप्रणतानित्यर्थः राक्षसेन्द्रपुरस्कृतान् इन्द्रजिता-

स्वामिनो निष्क्रयं गन्तुमाविष्कृतबलः कपिः ।
रराज समरे शत्रून् घ्नन् दुष्कृतवह्निष्कृतः ॥ ६१ ॥
चतुष्काष्ठं क्षिपन् दृप्तान् तिरस्कुर्व्वन्नरीन् रणे ।
तिरस्कृतदिगाभोगो दृष्टश्चे बहुधा भ्रमन् ॥ ६२ ॥
द्विष्कुर्व्वतां चतुष्कुर्व्वन्नभिघातं नगैर्हिषाम् ।

ऽयतः स्थापितान् कीदृशः द्योतिष्कल्पोरुकेशरः अग्नितुल्यवर्त्मविपुलसटः पूर्ब्बवत् कल्पः सर्व्वत्र पूर्ब्बवत् विसर्गाभावः वेःसकारोवा तस्येलात्परस्य सस्य षत्वमभिनिष्पतन्त्य इत्यत्र व्याख्यातम् ॥ ६० ॥ भ०

स्वामीत्यादि । स्वामिनः सुग्रीवस्य निष्क्रयमान्हरणं गन्तुं शत्रून् घ्नन् विनाशयन् कपिः समरे रराज आविष्कृतबलः प्रकटितसामर्थ्यः दुष्कृतवह्निष्कृतः दुष्कृतं पापं वह्निःकृतमनेनेति वाहिताग्न्यादिषु द्रष्टव्यं सर्व्वत्र दुष्कृतप्रधस्य चेत्यनेनाप्रत्ययविसर्जनीयस्य षत्वम् ॥ ६१ ॥ ज० भ०

स्वामीत्यादि । कपिः समरे संग्रामे शत्रून् घ्नन् विनाशयन् रराज दीप्यते स्म कीदृशः स्वामिनः सुग्रीवस्य निष्क्रयमान्हरणं गन्तुं आविष्कृतं प्रकाशितं बलं सामर्थ्यं येन तादृशः दुष्कृतेन पापेन वह्निष्कृतस्यक्तः निष्पाप इत्यर्थः दुष्कृतं वह्निष्कृतं येनेति वा पूर्ब्बनिपातस्यानियमात् क्वचित् क्लान्तस्य परनिपातः आहिताग्न्यादेर्व्वेति परः दुर्निरावर्विह्निःप्रादुश्चतुरांघः कस्पफे इति परस्रूत्वदर्शनात् निष्क्रयादिषु सेतु कस्पफेत्यस्य वाग्रब्दस्य व्यवस्थाश्रयित्वात् नित्यं सकारोबोध्यः विकल्पेऽपि न क्षतिः दुःखं दुष्खञ्चेति द्विरूपदर्शनात् मूर्द्धन्यषत्वं पूर्ब्बवत् ॥ ६१ ॥ भ०

चतुरित्यादि । चतस्रः काष्ठा दिशो यस्मिन् क्षेपणक्रिया विशेषणं पूर्ब्बवत् षत्वं चतसृषु दिक्षु दृप्तान् रणे भ्रमन् एकोऽपि बहुधा दृष्टश्चे दृष्टः कपिः क्षिपन्निति तौदादिकः अरीन्तिरस्कुर्व्वन् अभिभवन् तिरस्कृतदिगाभोगः अपनीतदिग्विस्तरः तिरसोन्यतरस्यामिति पक्षे षत्वम् ॥ ६२ ॥ ज० भ०

चतुरित्यादि । स एकः कपीरणे भ्रमन् बहुधा दृष्टश्चे जनैरित्यर्थात् किं कुर्व्वन् चतुष्काष्ठं दृप्तान् क्षिपन् चतस्रः काष्ठा दिश आधारत्वेन यस्मिन् क्षेपणे क्रियाविशेषणमिदं चतसृषु दिक्षु दृप्तान् क्षिपन्नित्यर्थः अरीन् शत्रून् तिरस्कुर्व्वन् अभिभवन् तिरस्कृतदिगाभोगः आच्छादितदिग्विस्तारः पूर्ब्बवद्विभाषया विसर्गस्य सकारः ॥ ६२ ॥ भ०

वह्निष्करिष्यन् संग्रामाद्रिपून् ज्वलनपिङ्गलः ॥ ६३ ॥
ज्योतिष्कुर्व्वन्निवैकोऽसावाटीत् संख्ये परार्द्धवत् ।
तमनायुष्करं प्राप शक्रशत्रुर्द्धनुष्करः ॥ ६४ ॥
अस्यनरुष्करान् वाणान् ज्योतिष्करसमद्युतिः ।

द्विष्कुर्व्वेत्यादि । असौ कपिराटीदिति वक्ष्यमाणेन सम्बन्धः कीदृशः द्विष्कुर्व्वतां द्वौ वारावभिघातं कुर्व्वतां द्विधा चतुष्कुर्व्वन् चतुरो वारान् नगैर्वृक्षैरभिघातं कुर्व्वन् द्विस्त्रिश्चतुरिति कृत्वोऽर्थे इति विसर्जनीयस्य वा षत्वं अरीन् संग्रामाद्वह्निष्करिष्यन् अपनेष्यामीति इषुसोः सामर्थ्य इति विसर्जनीयस्य षत्वं पक्षे सामर्थ्य चात्र ह्यमेक्षानैकार्थीभावः वह्निष्करिष्यन्निति द्वयोः परस्परव्यमेक्षत्वात् ॥ ६३ ॥ ज० म०

द्विरित्यादि । असौ कापिराटीदित्यग्रिमश्लोकेनान्वयः किङ्कुर्व्वन् द्वौ वारौ अभिघातं कुर्व्वतां द्विधा नगैः पर्व्वतैश्चतुरो वारान् अभिघातं कुर्व्वन् द्विस्त्रिश्चतुःकृत्वोऽर्थे इति सूत्रेण विभाषया कख्यादित्वाद्रूपद्वयमिति परः स्वमते हस्तेपाणावित्यादिना साक्षादादित्वात् वा समासः । समासे सेतुकखेति रूपद्वयं निर्व्विरोधं एवमसमासेऽपि कखपफेवेत्यस्य योगविभागः कार्य्यः समासपक्षे षत्वं व्याख्यातमेव असमासे ऽपि किलादित्यस्य योगविभागात् षत्वं अनीषादित्वाद्वा संग्रामात् अरीन् शत्रून् वह्निष्करिष्यन् पूर्व्ववत् वेःसः षत्वञ्च ज्वलनवत् वह्निवत् पिङ्गलः ॥ ६३ ॥ भ०

ज्योतिरित्यादि । एकोऽपि ज्वलनपिङ्गलः ज्योतिष्कुर्व्वन्निव अग्निं दीपयन्निव पूर्व्ववत्पक्षे विसर्जनीयस्य षः परार्द्धवत् दिव्य इव परार्द्धो द्युलोकः ब्रह्माण्डसम्बन्धिन ऊर्ध्वभागस्योत्कृष्टत्वात् तत्र भव इति परावरार्धमिति यत् संख्ये संग्रामे आटीत् परिचक्राम इटइटोति सिचोलोपः तं वानरमनायुष्करं प्राणापहारिणं शक्रशत्रुरिन्द्रजित् प्राप प्राप्तवान् धनुष्करः धनुः करे यस्येति नित्यं समासेत्यादिना षत्वं ॥ ६४ ॥ ज० म०

ज्योतिरित्यादि । एकोऽसौ कपिः संख्ये परार्द्धवत् अत्युत्कृष्टसंख्याविशेषावच्छिन्नवत् ज्योतिष्कुर्व्वन् आटीत् परिचक्राम परार्द्धवत् दिव्यवदिति जयमङ्गला तं कपिं शक्रशत्रुरिन्द्रजित् प्राप कीदृशं न आयुः करोतीत्यनायुष्करं कीदृशः धनुः करे यस्य स तथा पूर्व्ववद्वेःसःषत्वञ्च इषुसन्तयोः कखपफयोर्न्नित्यमिति परः ॥ ६४ ॥ भ०

यशस्करो यशस्कामं कपिं वाणैरताडयत् ॥ ६५ ॥
चकाराधस्पदं नासौ चरन् वियति मारुतिः ।
मर्म्माण्यिद्धिस्तमस्काण्डैर्विध्यमानोऽप्यनेकधा ॥ ६६ ॥

इति सत्वाधिकारः ।

पुरुहूतद्विषोधूर्षु युक्तानश्वस्य वाजिनः ।
आयूंषि त्वक्षु निर्भिद्य प्राभञ्जनिरमोचयत् ॥ ६७ ॥

अस्यन्नित्यादि । वाणानरुष्करान् व्रणजनकान् दिवाविभेत्यादिना टः अस्यन् क्षिपन् ज्योतिष्करसमद्युतिः ज्योतिष्करणशीलः आदित्यः क्रञोहेत्यादिना टः तेन तुल्यइत्यर्थः पूर्ववत् षत्वं यशस्करो यशोजननशीलः इन्द्रजित् यशस्कामं यशसि कामोऽस्येति तं कपिं वाणैरवाकिरत् अताडयत् अतः कृकमी-त्यादिना न व्यवसर्जनीयस्य सत्वम् ॥ ६५ ॥ ज० म०

अस्यन्नित्यादि । इन्द्रजिदरुष्करान् व्रणजनकान् वाणान् अस्यन् क्षिपन् वाणैः कपिमताडयत् ज्योतिष्करस्य सूर्य्यस्य समा द्युतिर्य्यस्य यशस्करोयशो-जननशीलः कीदृशं कपिं यशस्कामं यशसि कामो यस्य सर्व्वत्र पूर्व्ववद्वेः स इलात् षत्वञ्च अरुर्द्विषदजन्तस्य मुम् करोतीति मुकुटः ॥ ६५ ॥ भ०

चकारेत्यादि । असौ मारुतिर्वियति चरन् अधस्पदं पृथिव्यां पदं न चकार अधस्पदमिति मयूरव्यंसकादित्वात्समः कस्कादिषु चेति षत्वं मर्म्माणि विध्यन्नीति क्विप् नक्षिद्यतीत्यादिना पूर्वपदस्य दीर्घत्वम् ॥ ६६ ॥ ज० म०

इति षत्वसत्वाधिकारः ।

चकारेत्यादि । असौ मारुतिर्हनूमान् वियति आकाशे चरन् मर्म्माणि विध्यद्भिः कालायसघटितत्वात् तमस्तुल्यैः काण्डैः शरैरनेकधा विध्यमानस्ताड्य-मानोपि अधस्पदं पृथिव्यां पदं न चकार पूर्ववद्वेः सः अधः शिरसोःपदे तम-सस्तु काण्डे नित्यं विसर्गस्य सकारः इति परः ॥ ६६ ॥ भ०

इति विसर्जनीयसत्वाधिकारः ।

इतःप्रभृति अपदान्तस्य मूर्द्धन्य इत्यधिकृत्याह

पुरुहूतेत्यादि । पुरुहूतद्विषः इन्द्रजितः सम्बन्धिनो यानस्य रथस्य धूर्षु युक्तान् वाजिनः त्वक्षु चर्म्मसु निर्भिद्य प्राभञ्जनिर्मारुतिरायूंषि जीवितानि अमोचयत् त्याजितवान् धूर्षु त्वक्षीति आदेशप्रत्यययोरिति षः प्रत्ययसकार-स्यात् तत्र हि इण्कोरिति वर्त्तते परेण च णकारेण प्रत्याहारः आयूंषीति

सुषुपुस्ते यदा भूमौ रावणिः सारथिं तदा ।
आहर्त्तुमन्यानश्विषत् प्रोषितत्रासकर्कशः ॥ ६८ ॥
प्रतुष्टुवुः पुनर्युद्धमासिषञ्जयिषुर्भयम् ।
आतस्थौ रथमात्मोयानुत्सिसाहयिषन्निव ॥ ६९ ॥

नुम् विसर्जनीयेत्यादिना सहेःसाटस्यः इति ऊन्दोविषयत्वाद्गोदाहृतं ततः छन्दसि सह इति खिप्रत्ययस्य विधानात् एवञ्च पृतनाषाड्हिष इति पाठान्तरमयुक्तम् ॥ ६७ ॥ ज० म०

अथ मूर्द्धन्यषत्वाधिकारः ।

पुरुहूतेत्यादि । प्रभञ्जनस्यापत्यं हनूमान् पुरुहूतद्विषः शक्रशत्रोर्मेघनादस्य यानस्य रथस्य धुर्षु भारेषु युक्तान् वाजिनोऽश्वान् त्वचं चर्म्मसु निर्भिद्य आयूंषि अमोचयत् त्याजयामास घोऽजौऽरिति स्रुवे उपसर्ज्जनीभूतार्था अपि शब्दार्थादयो गृह्यन्ते इति तु प्राप्तयर्थनिवहोः प्रतिषेधेन ज्ञापितं तेन वाजिनां प्रयोज्यानां कर्म्मत्वं अत्र हि सुचिर्म्मुक्तिपूर्ब्बिकायां गतौ वर्त्तते अतएवामोचयत् मोचनेन भवान्तरमगमयदित्यर्थः किलादित्यानां धूर्षित्यत्र रेफात् आयूंषीत्यत्र नुविव्यवधानेऽपि त्वच्चित्यत्र ककारात् सस्य षत्वं पुरुहूतेत्यत्र पृतनाषाडिति कचित्पाठः ॥ ६७ ॥ भ०

सुप्तित्यादि । ते यदा भूमौ सुषुपुः निषेदुः आदेशसकारत्वात् पूर्ब्बवत् षत्वं तदा रावणिरन्यानश्वानाहर्त्तुमानेतुं सारथिमश्विषत् आदिष्टवान् सर्तिशास्त्योर्ङ् शासदडुङ्हलोरिति इकारः शासिवसीति षत्वं प्रोषितत्रासः प्रोषिताद्रामादुपगतभयः कर्कशश्च रौद्रः प्रोषित इति यजादित्वात्सम्प्रसार षत्वं पूर्ब्बवत् ॥ ६८ ॥ ज० म०

सुषुपुरित्यादि । ते वाजिनो यदा भूमौ सुषुपुः निषेदुः जिष्वपौयये भ्वाद्यादिष्ण इति मूर्द्धन्यस्य दन्त्यत्वं ततः किलादिति सस्य कृतत्वात् षत्वं तदा तस्मिन् काले रावणस्यापत्यमिन्द्रजित् अन्यानश्वानाहर्त्तुं सारथिं अश्विषत् आदिष्टवान् कोदयः प्रोषितोऽपगतस्त्रासो यस्येति बहुव्रीहिः स चासौ कर्कशश्चेति यश्चात्कर्म्मधारयः प्रोषितत्रासेन कर्कशो वा शास्तेः शासिवसिघसीनां चेति डः शासुडिति इत् वसेः जुषवसेति क्षस्य इत्वं यहस्वप्राद्योरिति जिः किलादित्यादौ शासवसेति षत्वम् ॥ ६८ ॥ भ०

प्रतित्यादि । अश्वा आनीता इति पुनरपि युद्धं प्रतुष्टुवुः प्रस्तोतुमारब्धु-

बलान्यभिषिषिक्षन्तं तरुभिः कपिवारिदम् ।
विजिगीषुः पुनश्चक्रे व्यूहं दुर्ज्जयमिन्द्रजित् ॥ ७० ॥
अभिघ्नन्तः कपिं क्रोधादभ्यषिञ्चन्निवात्मनः ।
सम्प्रहारसमुद्भूतैरक्तैः कोणैररुश्रुतैः ॥ ७१ ॥

सिक्षुः सन् अज्झनगमां सनीति दीर्घः सनाद्यंसभिक्षउः नलोकेति षष्ठीप्रतिषेधः रथमातस्थौ आरूढवान् भयमासिषङ्क्षयिषुः संक्षेषयितुमिच्छुः हनूमता अत्र स्तौतेः सनि षत्वभूते सन्नेव स्तौतिण्योरिति अभ्यासादुत्तरस्य षत्वं आत्मीयान् भृत्यानुत्प्लवासाहयिषन्निव उत्प्लाहयितुमिच्छन्निव युध्यध्वमिति स्तौतीत्यादिना षत्वे प्राप्ते सःखिदित्यादिना षकारस्य सत्वम् ॥ ६९ ॥ ज० म०

प्रतुष्टुषुरित्यादि। इन्द्रजित् पुनः सज्जीभूतं रथमातस्थौ आश्रितवान् कीदृशः युद्धं प्रतुष्टुषुः प्रस्तोतुमारब्धुमिच्छुः भयं आसिषङ्क्षयिषुः हनूमतो भयमासङ्क्षयितुं संक्षेषयितुं इच्छुः आत्मीयान् अनुचरान् उत्प्लवासाहयिषन्निव उत्प्लाहयितुमिच्छन्निव जिस्खोः खेरित्यादिना षत्वभूते सनि खेः षत्वं तत्रैव सहवर्ज्जनात् उत्प्लवासाहयिषन्नित्यत्र न षत्वम् ॥ ६९ ॥ भ०

बलेत्यादि। कपिवारिदं कपिं वारिदमिव बलान्यभिषिषिक्षन्तं तरुभिः अभिषेक्तुं क्षादयितुमिच्छन्तं स्वादिभ्यासेत्यादिना तु सकारस्याभ्यासस्य सकारस्य च षत्वं तमेवंविधं कपिं विजिगीषुर्विजेतुमिच्छुः इन्द्रजित् सनलिटोर्जेरिति कुत्वं पुनर्व्यूहं बलसन्निवेशं दुर्जयाख्यं चक्रे हस्त्यश्वादिसैनिकानां मण्डलस्थित्या विरच्यते ॥ ७० ॥ ज० म०

बलानीत्यादि। तरुभिर्बलानि अभिषिषिक्षन्तं क्षादयितुमिच्छन्तं अतएव कपिं वारिदमिव जेतुमिच्छुरिन्द्रजित् पुनर्व्यूहं बलविन्यासं चक्रे दुर्ज्जयं जेतुमशक्यं व्यूहस्य कर्मेर्वा निषेधणं अभिपूर्वसिचः सनः षत्वे जिस्खोः खेरिति नियमेन क्ङिलादित्यादिना गीक इति इत्यादिना च प्राप्तं षत्वं बाध्यते प्रक्षतेर्बाधितत्वात् गीक इत्यादिना खेः सकारस्यापि न षत्वमिति केचित् जिस्खोःखेरित्यनेन खिनिमित्तं षत्वं बाध्यते तेन प्रक्षतेः सस्य न षत्वं खेस्तु गीक इत्यादिना षत्वं भवत्येवेति केचित् वस्तुतस्तु षत्वभूते सनि खिनिमित्तस्यैव सस्य निषेधः नतु गिनिमित्तस्य तेनोभयत्र गीक इति षत्वम् ॥ ७० ॥ भ०

अभीत्यादि। राक्षसाः क्रोधादात्मनोऽभिघ्नन्तः अन्यं नयन्तः घोऽन्तकर्म्मणीत्यस्य अतरि ओतःश्यनीत्योकारलोपः उपसर्गादिति षत्वं सम्प्रहारसम्भूतैः रक्तैः

संग्रामे तानधिष्ठास्यन् निषद्य पुरतोरणम् ।
अविषीदन्नवष्टब्धान् व्यष्टभ्नान्नरविष्वणान् ॥ ७२ ॥
विषह्य राक्षसाः क्रुद्धाः शस्त्रजालमवाकिरन् ।
यन्न व्यषहतेन्द्रोऽपि कपिः पर्य्यषहिष्ट तत् ॥ ७३ ॥

क्रोष्णैरोषदुष्णैः अरुस्तुदैः व्रणाच्छिन्नगतैः कपिमभ्यषिञ्चन्निव अभिषिक्तवन्तस्तद्व लङि रूपं प्राक्सितादध्वायेऽपीति षत्वम् ॥ ७१ ॥ ज० म०

अभीत्यादि । राक्षसाः क्रोधादात्मनो अभिध्यन्तोऽन्तं नयन्तः सम्यक् प्रहारजातैः रैषदुष्णैर्व्रणच्युतैः रक्तैः कपिं अभ्यषिञ्चन्निव अभिषिक्तवन्त इव षोयतायें यतः अभिषोसिचोगीकिःस्तुस्तुभषो इत्यादिना षत्वम् ॥ ७१ ॥ भ०

संग्रामेत्यादि। ये प्राणिनः अभिषिञ्चन्ति तान्नरविष्वणान् राक्षसान् संग्रामे अधिष्ठास्यन् अस्वतन्त्रीकरिष्यन् कपिः उपसर्गादिति षत्वं पुरतोरणं पुरद्वारं व्यष्टभ्नात् आश्रितवान् निषद्य तत्रैव पुरतोरणे स्थिता प्राणिनोमाप्रविशुरिति अविषीदन् विषादमगच्छन् निषद्य विषीदन्निति सदिरप्रतेरिति षत्वं अवष्टब्धान् अविदूरान् अवाङ्मुखत्वनाविदूर्य्ययोरिति षत्वं व्यष्टभ्नादिति अञ्चवायेवेस्तम्भे रिति षत्वं स्तम्भुस्तुम्भुस्कुम्भ्वादिना आप्रत्ययः सशब्दायामभ्यवहारक्रियायां स्वनतिर्वर्त्तते नराणां विष्वणा इति सः नरान् सशब्दमभ्यवहरन्नित्यर्थः वेश्वस्वनोसभोजन इति षत्वम् ॥ ७२ ॥ ज० म०

संग्राम इत्यादि । हनूमान् संग्रामे निषद्य स्थित्वा अविषीदन् विषण्णो न भवन् तान् राक्षसान् अधिष्ठास्यन् अभिभविष्यन् पुरतोरणं पुरीबहिर्द्वारं व्यष्टभ्नात् आक्रान्तवान् पुरतोरणमधिष्ठास्यन् तान् व्यष्टभ्नादिति वा कीदृशान् अवष्टब्धान् निकटस्थान् जर्जितान् वा नरविष्वणान् मनुष्यं भुञ्जानान् अधिस्थानिषिदविस्तम्भ्वाद्यर्थविस्तानां गीक इत्यादिना षत्वं अवष्टब्धानिति गीक इत्यादौ अवस्तेत्यस्य योगविभागार्थात् क्वचिदन्यत्रापि षत्वं मनीषादित्वाद्वा अवात्स्तम्भेरौर्ज्जित्यात्त्रयनिकटभोजनेष्विति परः ॥ ७२ ॥ भ०

विषेत्यादि । विषह्य सोढ्वा कपिचेष्टितमित्यर्थात् सात्पदाद्योरिति प्रतिषेधे प्राप्ते परिनिविभ्य इति षत्वं राक्षसाः क्रुद्धाः शस्त्रजालमवाकिरन् विक्षिपन्तः लङि रूपं यच्च शस्त्रजालमिन्द्रोऽपि न व्यषहत न सोढवान् सः लङि रूपं तत्कपिः पर्य्यषहिष्ट लुङि रूपं सहेःसिवादीनामित्यादिना विभाषा षत्वम् ॥ ७३ ॥ ज० म०

विष्यन्दमानरुधिरो रक्तविस्यन्दपाटलान् ।
विष्क्रान्तून् परिघेणाहन्नविस्क्रान्ता कपिर्द्विषः ॥ ७४ ॥
मेघनादः परिष्क्रन्दन् परिस्क्रन्दन्तमाप्लरिम् ।
अवभ्राट्परिस्क्रन्दं ब्रह्मपाशेन विस्फुरन् ॥ ७५ ॥

विषह्येत्यादि । राक्षसा विषह्य सोढ्वा हनूमतः प्रहारमित्यर्थात् क्रुद्धाः सन्तः शस्त्रजालं शस्त्रसमूहं नैरन्तर्येण सर्वतोविक्षेपात् जालमिव अवाकिरन् विक्षिप्तवन्तः घ्यां रूपं यत् शस्त्रजालं इन्द्रोऽपि न व्यषहत न विसोढवान् कपिस्तत् शस्त्रजालं पर्यवष्किट परिसोढवान् घ्यां रूपं विषह्येत्यत्र गोक इत्यादिना षत्वं व्यसहतेत्यत्र पर्यवष्किटेत्यत्र च निविपरिसनुजेत्यादिना षात्विकषत्वम् ॥ ७३ ॥ भ०

विष्येत्यादि । विष्यन्दमानरुधिरः क्षरद्रक्तः कपिः परिघेणाहन् ताडितवान् द्विषः शत्रून् रक्तविस्यन्दपाटलान् रक्तस्रुतिलोहितान् अनुपर्यभिनिविभ्यः स्यन्देरिति विभाषाषत्वं रक्तस्राग्राणित्वात् विष्क्रान्तून् विविधं स्क्रान्तुं गन्तुं शीलमेषामिति क्त्रु अविस्क्रान्ता कपिः अगमनशीलः स्थानशील इत्यर्थः वेः स्क्रन्देरनिष्ठायामिति विभाषा षत्वम् ॥ ७४ ॥ ज० भ०

विष्येत्यादि । कपिर्द्विषः शत्रून् परिघेण अहन् ताडितवान् कीदृशः विष्यन्दमानरुधिरः क्षरद्रक्तः अविस्क्रान्ता अविचलनशीलः कीदृशान् रक्तविस्यन्दपाटलान् रक्तस्रुतिलोहितान् विष्क्रान्तून् विविधगतिशीलान् स्यन्दूङ्क्लृस्रुतौ स्क्रन्दिरौ शोषणे गत्यां अनयोः यस्य विस्रम्भानिर्व्यविस्क्रान्त्यादिना पक्षे षत्वं स्यन्देः कर्तृ रक्तं तेनाप्राणिकर्तृकत्वं स्क्रन्देस्तृन् भयभसोरिति दस्य तः सवर्गात् सवर्गस्य सवर्गे लुग्वेति स्तृलोप पक्षे दलोपमाङ्क परे रूपते मनीषादित्वात्तद्रूपमपि ॥ ७४ ॥ भ०

मेघेत्यादि । मेघनाद इन्द्रजित् परिष्क्रन्दन् परितो भ्रमन् परिस्क्रन्दन्तमरिभ्रमन्तमरिं कपिं ब्रह्मपाशेन ब्रह्मणा दत्तेन पाशेन शीघ्रमबभ्रात् बद्धवान् लडि आप्रत्यये रूपं परेरिति वा षत्वं अपरिस्क्रन्दं अप्राच्यभरतत्वात् तेन परिस्क्रन्दः प्राच्यभरतेष्विति निपातनं विस्फुरन् हे बाहुइत्यध्याहारेणेत्यर्थः स्फुरतिस्फुलत्योरिति विभाषाषत्वम् ॥ ७५ ॥ ज० भ०

मेघेत्यादि । मेघनाद इन्द्रजित् परिष्क्रन्दन् परितो भ्रमन् परिस्क्रन्दन्तं परितो भ्रमन्तमरिं हनूमन्तं ब्रह्मपाशेन आशु शीघ्रं अपरिस्क्रन्दं निश्चलं यथा

विस्फुलङ्गिर्गृहीतोऽसौ निष्फुलः पुरुषाशनैः ।
विष्कम्भितुं समर्थोऽपि नाचलद्ब्रह्मगौरवात् ॥ ७६ ॥
क्षपीढ्वं भर्तुरानन्दं मा न प्रोढ्वं द्रुतं वियत् ।
वानरं नेतुमित्युच्चैरिन्द्रजित् प्रावदत् स्वकान् ॥ ७७ ॥
गतमङ्गुलिषङ्गं त्वां भीरुष्ठानादिहागतम् ।
खादिष्याम इति प्रोचुर्नयन्तो मारुतिं द्विषः ॥ ७८ ॥

स्यात्तथा अवभ्रात् बहुवान् न विद्यते परिस्खन्दश्चलनं यस्मात् बन्धनात् क्रियाविशेषणं अरेर्विशेषणमिति केचित् विस्फुरन् कोपात् हर्षाद्वा कम्पमानः परिस्खन्दविस्फुरोः सस्य विस्खन्नानिर्वेत्यादिना विभाषया षत्वम् ॥ ७५ ॥ भ०

विष्फुलेत्यादि । असौ कपिः पुरुषाशनैः राक्षसैः विस्फुलङ्गिः हर्षाज्ज्वलङ्गिर्गृहीतः निष्फुलः सतेजाः निस्फुलेति विभाषा षत्वं विष्कम्भितुं व्यापारितुं समर्थोऽपि ब्रह्मगौरवान्नाचलत् न चलितः माभून्मोघो ब्राह्मः पाश इति स्कम्भ्नातेरिति षत्वम् ॥ ७६ ॥ ज० भ०

विष्फुलेत्यादि । असौ कपिर्विस्फुलङ्गिर्हर्षाज्ज्वलङ्गिः पुरुषाशनैः राक्षसैः गृहीतोऽपि निष्फुलो निष्कम्पः विष्कम्भितुं व्यावर्त्तितुं समर्थोऽपि ब्रह्मगौरवात् नाचलत् न चलितवान् विस्खन्नेत्यादिना विष्कम्भः षत्वं नित्यं स्फुरस्फुलोस्तु विभाषितम् ॥ ७६ ॥ भ०

क्षपीत्यादि । भर्तुः रावणस्य आनन्दं क्षपीढ्वं कुरुध्वं लिङि रूपं अतो वानरं द्रुतं नेतुं वियदाकाशं मा न प्रोढ्वं मा नोत्पतिष्ट माङि लुङ् इणः षीध्वमिति धकारस्य मूर्द्धन्यढकारः इत्येवमुच्चैरिन्द्रजित् स्वकान् भृत्यान् प्रावदत् वदेर्लङि रूपम् ॥ ७७ ॥ ज० भ०

क्षपीढ्वमित्यादि । यूयं भर्तुरावणस्य आनन्दं क्षपीढ्वं कुरुध्वं ढाढ्रूपं दृगुडुभृढीति किच्चान्न गुणः टीठीढीधोढि च इति धस्य ढत्वं किलादिति षः वानरं नेतुं द्रुतं यूयं वियदाकाशं मा न प्रोढ्वं न न गच्छत अपि तु प्रोढ्वं प्रुङ्डुङ्च सर्पणे मा योगे टी सिः गुणः धेसलोपोवेति पक्षे सिलोपः टीठीढीधोढि च इति धस्य ढत्वं इत्युक्तं इन्द्रजित् स्वकान् आत्मीयान् उच्चैर्महता ध्वनिना प्रावदत् प्रोक्तवान् ॥ ७७ ॥ भ०

गतमित्यादि । अङ्गुलीनां सङ्गः अङ्गुलीषङ्गः तं गतं प्राप्तं हस्तप्राप्तमित्यर्थः समासेऽङ्गुलेः सङ्ग इति षत्वं भीरोः कातरस्य यत् स्थानं तस्माद्भीरु-

अग्निष्टोमादिसंस्थेषु ज्योतिष्टोमादिषु द्विजान् ।
योऽरचीत्तस्य दूतोऽयं मानुषस्येति चावदन् ॥ ७९ ॥
नासां मातृष्वसेयाश्च रावणस्य लुलाव यः ।
मातुः स्वसुश्च तनयान् खरादीन् विजघान यः ॥ ८० ॥
प्रादुःषन्ति न संत्रासा यस्य रक्षःसमागमे ।

ष्ठानादिहागतं भीरो स्थानमिति षत्वं खादिष्याम इति प्रोचुः द्विषो राक्षसा मारुतिं नयन्तो नेष्यन्तः वर्त्तमानसामीप्ये भविष्यति लट् ॥ ७८ ॥ ज० म०

गतमित्यादि । मारुतिं नयन्तो राक्षसा इति प्रोचुः उक्तवन्तः किमित्याह त्वां वयं खादिष्यामः कीदृशं त्वां अङ्गुलेः सङ्गं गतं प्राप्तं हस्तप्राप्तमित्यर्थः भीरो-रामस्य स्थानादिह लङ्कायामागतं समासेऽङ्गुलेः सङ्गस्य भीरोः स्थानस्य चेति षत्वमिति परः खमते किलादित्यस्य योगविभागात् ग्रासवसघसस्कटाङ्गेत्यत्र चकारस्यानुक्तसमुच्चयार्थत्वादन्येषामपीत्यर्थाद्वा मनीषादित्वाद्वा ॥ ७८ ॥ भ०

अग्नीत्यादि । अग्निष्टोमादिसंस्थेषु सप्तसंस्थेषु ज्योतिष्टोमादिषु यो द्विजा-नरचीत् तस्य मानुषस्यायं दूत इति चावदन् नयन्तो द्विषः अग्नेस्तुत्स्तोम-सोमाः ज्योतिरायुषस्तोम इति षत्वम् ॥ ७९ ॥ ज० म०

अग्नीत्यादि । अग्निष्टोमादिसप्तसंस्थेषु ज्योतिष्टोमादिषु यज्ञेषु यो द्विजान् अरचीत् आदिशब्दाद्वाजपेयादेर्ग्रहणं आयुर्ज्योतिरग्निभ्यः स्तोमस्येति षत्व-मिति परः खमते मनीषादित्वात् तस्य मानुषस्यायं दूत इति च ते द्विषो-ऽवदन् ॥ ७९ ॥ भ०

नासामित्यादि । रावणस्य या मातुः स्वसा भगिनी सा मातृष्वसा मातृ-पितृभ्यामिति षत्वं तस्या अपत्यं मातृष्वसेयो मातृष्वसुश्चेति ठगन्तलोपौ तस्या यो नासां लुलाव मातुः स्वसुश्च तनयान् खरादीन्निजघान मातृपितृभ्यामन्यतर-स्यामिति षत्वाभावपक्षे विभाषास्वसृपत्योरिति षष्ठ्या अलुक् ॥ ८० ॥ ज० म०

नासामित्यादि । यो रावणस्य मातृष्वसेया मातृष्वसुर्द्वितुः सूर्पणखाया नासां लुलाव छिन्नवान् मातृस्वसृशब्दात्रप्रादित्वात् ष्णेयः मनीषादित्वादन्त-लोपः आदिसस्य षत्वञ्च मातृपितृभ्यां स्वसुरिति परः यो मातुः स्वसुश्च मातु-र्भगिन्याश्च तनयान् पुत्रान् खरादीन् निजघान तस्य दूतोऽयमिति सम्बन्धः स्वसुर्वा मातृपितृभ्यामिति विभाषया षत्वमिति परः खमते मनीषादि-त्वात् ॥ ८० ॥ भ०

तस्य क्षत्रियदुःधूतेरयं प्रणिधिरागतः ॥ ८१ ॥
दृष्ट्वा सुषुप्तं राजेन्द्रं पापोऽयं विषमाशयः ।
चारकर्म्मणि निष्णातः प्रविष्टः प्रमदावनम् ॥ ८२ ॥
सुप्रतिष्णातसूत्राणां कपिष्ठलसमत्विषाम् ।
स्थितां वृत्ते द्विजातीनां रात्रावैक्षत मैथिलीम् ॥८३॥ कलकम्

प्रादुरित्यादि । यस्य रक्षःसमागमे सन्त्रासाः भयानि न प्रादुःयन्ति न प्रादुर्भवन्ति उपसर्गप्रादुर्भ्यामित्यादिना दुःशब्दादुत्तरस्यास्तिसकारस्य अषोरनोपदत्यलोपे कृते षत्वं प्रादुःसकारस्य च षुत्वं तस्य क्षत्रियदुःधूतेः दुष्प्रत्रस्यायं प्रणिधिरागत इति चावदन् नयन्तः स्रूयतइति स्रूतिः दुनिन्दायामिति स्रूतेः सकारस्य सुधिनिर्दुभ्य इति षत्वम् ॥ ८१ ॥ ज० म०

प्रादुरित्यादि । रक्षसां समागमे यस्य सन्त्रासा न प्रादुःयन्ति न प्रादुर्भवन्ति प्रादुर्गीक इति षत्वं तस्य क्षत्रियदुःधूतेः प्रणिधिश्चरोऽयमागतः विनिसुदुर्भ्यः स्रूतिसमसुपामिति षत्वमिति परः स्वमते मनीषादित्वात् ॥ ८१ ॥ भ०

दृष्ट्वेत्यादि । राजेन्द्रं रावणं दृष्ट्वा प्रमदावनं प्रविष्टः सुषुप्तं गाढनिद्रं वच्यादिना सम्प्रसारणं पापोऽयं विषमाशयः सुपीत्यादिना षत्वं चारकर्म्मणि निष्णातः कुशलः निनदीभ्यां स्नातेःकौशल इति षत्वम् ॥ ८२ ॥ ज० म०

दृष्ट्वेत्यादि । अयं पापो दुराचारो राजेन्द्रं रावणं दृष्ट्वा प्रमदावनं प्रविष्टः कीदृशं राजेन्द्रं सुषुप्तं गाढनिद्रितं विस्रब्धान्निर्व्विसुनिर्दुःस्वप इति षत्वं कीदृशः विषमाशयः कुटिलहृदयः विषमेत्यत्र मनीषादित्वात् षत्वं चारकर्म्मणि निष्णातः कुशलः निनदीभ्यां स्नः कौशले इति षत्वमिति परः स्वमते मनीषादित्वात् ॥ ८२ ॥ भ०

सुप्रेत्यादि । येषां द्विजातीनां सुप्रतिष्णातानि अन्यतोऽर्थतश्च निश्चितानि सूत्राणि तेषां सुप्रतिष्णातसूत्रानां सूत्रं प्रतिष्णातमिति निपातनं कपिष्ठलसमत्विषां कपिष्ठलो नाम द्विजर्षभो गोत्रप्रवर्त्तकः कपिष्ठलो गोत्र इति साधुः तत्तुल्यतेजसां द्विजातीनां वृत्ते चरिते स्थितां मैथिलीं ऐक्षत ॥ ८३ ॥ ज० म०

सुप्रेत्यादि । अयं रात्रौ द्विजातीनां वृत्ते स्थितां मैथिलीं ऐक्षत दृष्टवान् घ्यां रूपं कीदृशानां सुप्रतिष्णातं अन्यतोऽर्थतश्च विशुद्धं गोभिलादिसूत्रं येषां मनीषादित्वात् सूत्रे प्रतिस्नातस्य षत्वं कपिष्ठलसमत्विषां कपिष्ठलाख्यस्य ऋषेः समा त्विट् येषां मनीषादित्वात् गोत्रे ऋषेः स्थलस्य सस्य षत्वं ॥ ८३ ॥ भ०

सर्व्वनारीगुणैः प्रष्ठां विष्टरस्थां गविष्ठिराम् ।
शयानां कुष्ठले तारां दिविष्ठामिव निर्म्मलाम् ॥ ८४ ॥
सुधाम्नीं सर्व्वतेजःसु तन्वीं ज्योतिष्मतीं शुभाम् ।
निष्टपन्तीमिवात्मानं ज्योतिःसात् कुर्व्वतीं वनम् ॥ ८५ ॥

कीर्द्यीमित्याद्य सर्व्वेत्यादि । यावन्तो नारीगुणाः तैः प्रष्ठां अपगामिनीं प्रष्ठोऽपगामिनीति साधुः विष्टरस्थामासनस्थां इत्यासनयोर्विष्टर इति साधुः गविष्ठिरां वाचिस्थिरां गवियुधिभ्यामिति षत्वं अकारादेव वचनात् सप्तम्याश्चलुक् कुष्ठले शयनां कौ स्थले भूतले शुद्धे विकुशमित्यादिना षत्वं दिविष्ठां दिवि तिष्ठतीति क्विपि स्थ इति कः तत्पुरुषे कृति बहुलमिति सप्तम्या अलुक् गगनस्थां तारामिव निर्म्मलां अम्भाम्बेत्यादिना षत्वम् ॥ ८४ ॥ ज० म०

सर्व्वेत्यादि । मैथिलीं कीर्द्यीं सर्व्वनारीगुणैः प्रष्ठां यावन्तो नारीगुणास्तैरपगामिनीं मनीषादित्वात् प्रातृस्थोऽपगे षत्वं विष्टरस्थां आसनस्थां मनीषादित्वाद्वासनयोर्विष्टर इति रूपसिद्धिः गविष्ठिरां वाचिस्थिरां सप्तमीतत्पुरुषः अभिधानाच्च ङेर्लोपः मनीषादित्वात् गवियुधिभ्यांस्थिरस्य षत्वं कुष्ठले भूस्थले शयानां मनीषादित्वात् अभिपरिविकुभ्यः स्थलस्य षत्वं दिविष्ठां तारामिव निर्म्मलां दिवि तिष्ठतीति क्विनजनादिति कः अभिधानात् सप्तम्या अलुक् स्त्रियामाप् मनीषादित्वात् षत्वम् ॥ ८४ ॥ म०

सुधेत्यादि । शोभनं साम यस्या इति विग्रहे अनउपधालोपिनोऽन्यतरस्यामिति ङीप् सुधादिषु चेति षत्वं सुष्ठु प्रियंवदामित्यर्थः तन्वीं कृशां शुभां कल्याणीं सर्व्वतेजस्सु ज्योतिष्मां अतिशयेन ज्योतिष्मतीं सुस्नात्वादौ तद्वित इति षत्वं एवञ्च कृत्वा निष्टपन्तीमिवात्मानं सह.ज्वलयन्तीमिवात्मानं निसस्तपतावन्यसेवन इति षत्वं वनं ज्योतिःसात्कुर्व्वन्तीं अज्योतिर्ज्योतिःकुर्व्वाणां कातृच्छ्रेण दीपयन्तीमित्यर्थः कातृच्छ्रे सातिप्रत्ययः तत्र तुमि विसर्जनीयस्येत्यादिना प्राप्तस्य षत्वस्य सात्पदाद्योरिति प्रतिषेधः युष्मदित्यादिनोदाहृतं छान्दसत्वात् ॥ ८५ ॥ ज० म०

सुधाम्नीमित्यादि । पुनः कीर्द्यीं मैथिलीं सुधाम्नीं प्रियंवदां शोभनं साम यस्या इति नान्तत्वात् स्त्रियामीप् निःसुदुर्भ्यः समासे धसन्धीनामिति षत्वमिति परः खमते मनीषादित्वात् तन्वीं कृशां गुणाद्धीत इति पचे ङीप् सर्व्वज्योतिःसु मध्ये ज्योतिष्मां प्रकृष्टप्रकाशरूपां लोकोपादिति षत्वं शुभां कल्याणयुक्तां

मधुसाद्भूतकिञ्जल्कपिञ्जरभ्रमराकुलाम् ।
उल्लसत्कुसुमां पुण्यां हेमरत्नलतामिव ॥ ८६ ॥
विलोचनाभ्यु मुञ्चन्तीं कुर्वाणां परिसेसिचाम् ।
हृदयस्येव शोकाग्निसन्तप्तस्योत्तमव्रताम् ॥ ८७ ॥
दृष्ट्वा तामभनग् दृप्तान् द्विषो घ्नन् परिसेधतः ।
परितप्तान् विचित्तेव क्रुद्धः स्वयमिवानिलः ॥ ८८ ॥

आत्मानं निष्टपन्तीमिव सक्लत्तापयन्तीमिव हनूमद्दर्शनात् तपस्य नैरन्तर्याभावात् निरन्तरौषक्लत्त्वेन इति षत्वमिति परः स्वमते मनोषादित्वात् तापस्य सक्लत्त्वेन-मत्र विवक्षितं वनं ज्योतिःसात्कुर्वती कात्स्न्र्येन दीपयन्तीमित्यर्थः कात्स्न्र्याय-त्स्योः सम्पद्यकादाविति चसात् किलादित्यादौ साद्दर्जनात् न षत्वम् ॥८५॥ भ०

मध्विश्यादि । मधुसाम्भूतकिञ्जल्कं कात्स्न्र्येन मधुतामापन्नं यत्किञ्जल्कं पुष्पकेसरं तन्मधुसाद्भूतकिञ्जल्कं आदेशप्रत्यययोरिति प्राप्तस्य पूर्व्वसत्प्रतिषेधः तेन पिञ्जराः पिङ्गलाः ये भ्रमराः तैराकुलां उल्लसत्कुसुमां चलत्पुष्पां हेमरत्नलतामिव यथा हेमरत्नमयीं कल्पतरुलतां पुण्यां पवित्रान्तद्दृत्तामपीत्यर्थः ॥८६॥ ज०म०

मधुसादित्यादि । पुनः कीदृशीं हेमरत्नलतामिव कल्पतरुलतामिव पुण्यां पवित्रां उत्तमामित्यर्थः हेमरत्नलतां कीदृशीं कात्स्न्र्येन मधुतामापन्नेन किञ्जल्केन पुष्पकेसरेण पिङ्गला ये भ्रमरास्तैराकुलां व्याप्तां अत्रापि साद्दर्ज्जनान्न षत्वं उल्लसत्कुसुमां राजत्पुष्पाम् ॥ ८६ ॥ भ०

विलोचेत्यादि । विलोचनाभ्यु अक्षु मुञ्चन्तीं विक्षिपन्तीं हृदयस्य शोकाग्नि-सन्तप्तस्य परिसेसिचां भृशं निर्व्वाणमिव कुर्व्वाणामेतेति पूर्व्वेण सम्बन्धः सिचे-र्यङन्तात् स्त्रीलिङ्गे भावे अकारप्रत्ययः उपसर्गादित्यादिना अभ्यासव्यवायेऽपि प्राप्तस्य षत्वस्य सिचोयङीति प्रतिषेधः उत्तमव्रतां पतिव्रतात्वात् ॥८७॥ ज०म०

विलोचनेत्यादि । विलोचनाभ्यु मुञ्चन्तीं अक्षु क्षिपन्तीं शोकरूपाग्निस-न्तप्तस्य हृदयस्य परिसेसिचां पुनः पुनरतिशयेन वा सेचनं कुर्व्वाणामिव अग्नि-निर्व्वाणाय जलसेकः क्रियतइत्युत्प्रेक्षा सिचोयङ्लुकि संस्याद इति अः स्त्रिया-माप् गौक इत्यादौ अयङ् सिचेति यङ्वर्जनान्न षत्वं उत्तमव्रतां पतिव्रतात्वात् ईदृशीं मैथिलीमैक्षतेति सम्बन्धः ॥ ८७ ॥ भ०

दृष्ट्वेत्यादि । तां दृष्ट्वा दृप्तानभनक् चूर्णितवान् द्विषः शत्रून् परिसेधतः आगच्छतः घ्नन् हिंसन् पूर्व्ववत्प्राप्तस्य सेधतेर्गतावितिं प्रतिषेधः परितश्च

अप्रतिस्तब्धविक्रान्तमनिस्तब्धो महाहवे ।
विसोढवन्तमस्त्राणि व्यतस्तम्भद्दनध्वनिः ॥ ८९ ॥
ते विज्ञायाभिसोष्यन्तं रक्षौरक्षांसि सव्यथाः ।
अन्यैरप्यायतं मेवुर्वरत्राभ्रुङ्कलादिभिः ॥ ९० ॥

समन्तादुद्दिचिक्षेप उन्मूलितवान् लिटः संयोगादित्वादकित्त्वे गुणः क्रुद्धः स्वयमिव साक्षादिवानिलः ॥ ८८ ॥ ज० म०

ढढेत्यादि । अयं तां सीतां ढढा दृष्ट्वान् अभनक् भग्नवान् किं कुर्वन् द्विषः शत्रून् घ्नन् हिंसन् कीदृशान् परिसेधतः सर्व्वतो गच्छतः गीक इत्यादौ अगतिसेधेति गत्यर्थवर्ज्जनात् न षत्वं अयं तान् दृष्ट्वान् परितः समन्तात् प्रचिक्षेप क्षिप्तवान् क्रुद्धः सन् स्वयं साक्षात् अनिल इव ॥ ८८ ॥ म०

अप्रेत्यादि । घनध्वनिर्मेघनादः अनिस्तब्धोऽनभिभूतः अप्रतिस्तब्धविक्रान्तं अनभिभूतविक्रमं कपिं स्तम्भेरिति प्राप्तस्य षत्वस्य प्रतिस्तब्धनिस्तब्धौ चेति प्रतिषेधनिपातनं अस्त्राणि महाहवे विसोढवन्तं सोढ इति प्रतिषेधः व्यतस्तम्भत् निष्पादितवान् एवं नयन्तोऽवदन्निति योऽयं स्तम्भेर्ण्यन्तस्य स्तम्भिवुसहाङ्क्षीति षत्वप्रतिषेधः ॥ ८९ ॥ ज० म०

अप्रेत्यादि । घनध्वनिर्मेघनादः अप्रतिस्तब्धविक्रान्तं अनभिभूतविक्रमं हनूमन्तं व्यतस्तम्भत् निश्चलं कृतवान् कीदृशः अनिस्तब्धः अनभिभूतः कीदृशं महाहवे अस्त्राणि विसोढवन्तं सहेः क्त्वतुः वेमसहेति वेमत्वात् नेम्ढीश्वीदिति नेम् ढौटः सढवढौऽदोढीति ढोत्यं गीक इत्यादौ अनोढ्सहेति ओढ्वर्जनात्र षत्वं स्तम्भेः प्रेरणे ञिः जिश्रीत्यङ् गीक इत्यादौ अनङ्स्तम्भेति अङ्वर्जनात्र षत्वं प्रतिस्तब्धनिस्तब्धयोः प्रतिनिशब्दौ उपसर्गप्रतिरूपकौ तेन गीक इत्यादिना न षत्वं प्रतिनिभ्यां स्तब्धस्येति षत्वनिषेधार्थपरस्तूत्तम् ॥ ८९ ॥ म०

ते इत्यादि । राक्षसाः ये मारुतिं नेष्यन्तः रक्षौः रक्षांसि विसोढ्यन्तं अभिषेक्ष्यन्तं कपिं सुनोतेः स्यसनोरिति षत्वं यद्यालक्ष्यमाणो न नीयेत् अवश्यं राक्षसान् रक्षौः सोढ्यतीति विज्ञाय सव्यथाः सभयाः सन्तः अन्यैरपि वरत्राभ्रङ्कलादिभिरायतं दीर्घं नेङ्तः बध्नन्ति स्म गहवरबन्धन इत्यस्य क्षिटि रूपम् ॥ ९० ॥ ज० म०

ते इत्यादि । ते मारुतिं नयन्तो राक्षसा विज्ञाय हनूमत्पराक्रममित्यर्थात् सव्यथाः सभयाः सन्तः ब्रह्मास्त्रबन्धे सत्यपि अन्यैरपि वरत्राभ्रङ्कलादिभिरायतं दीर्घं कपिं मेवुः बध्नन्ति स्म गवनष्टे नष्टोबन्धनं यां रूपं कीदृशं रक्षौः सगात्र-

विषसादेन्द्रजिद्बुद्ध्वा बन्धे बन्धान्तरक्रियाम् ।
दिव्यबन्धो विषहते नापरं बन्धनं यतः ॥ ९१ ॥

इति षत्वाधिकारः ।

मुष्णन्तमिव तेजांसि विस्तीर्णोरस्थलं पुरः ।
उपसेदुर्दशग्रीवं गृहीत्वा राक्षसाः कपिम् ॥ ९२ ॥
बहुधा भिन्नमर्माणो भीमाः खरणसादयः ।

सम्भवैरवांसि अभिरोधनं अभिषेक्ष्यन्तं गीक इत्यागौ अस्मान्नुञेति स्नान्तवर्जनान्न षत्वं वरत्वा चर्म्मरज्जुः ॥ ९० ॥ भ०

विषेत्यादि । बन्धे दिव्ये बन्धान्तरक्रियां बन्धनविशेषकरणं बुद्ध्वा इन्द्रजित् विषसाद विषादमुपगतः नियतं दिव्यबन्धं सृक्कवानिति यतो दिव्यबन्धो नापरं स्वयं बन्धनं विषहते अतो विषसादेति योज्यं सदिरञ्जोः परस्य लिटि षत्वप्रतिषेधः पूर्व्वस्य तु सदिरप्रतेरिति भवत्येव विषहत इति न प्रतिषेधः तत्र सोढरूपस्य ग्रहणात् ॥ ९१ ॥ ज० म०

इति मूर्द्धन्याधिकारः ।

विषेत्यादि । इन्द्रजित् बन्धे बन्धान्तरकरणं बुद्ध्वा ज्ञात्वा विषसाद विषादं गतवान् गीक इत्यादिना षत्वे प्राप्ते सत्खनजोष्क्रांनाखेरिति प्रक्षतेः षत्वनिषेधः खेस्तु षत्वमेव यतो यस्मात् दिव्यबन्धोऽपरं बन्धनं न विषहते गीक इत्यादिना षत्वम् ॥ ९१ ॥ भ०

इति षत्वाधिकारः ।

इतःप्रभृति णत्वमधिकृत्याह

मुष्णेत्यादि । राक्षसाः पुरः कपिमादाय दशग्रीवमासेदुः ढौकितवन्तः नतु दर्शनगोचरं गताः अप्रभातत्वात् कीदृशं तेजांसि मुष्णन्तं खण्डयन्तमिव विस्तीर्णोरस्थलं विस्तृतवक्षसं तत्र रषाभ्यां नो ण इति णत्वम् ॥ ९२ ॥ ज० म०

अथ णत्वाधिकारः

मुष्णन्तमित्यादि । राक्षसाः कपिं गृहीत्वा पुरोऽग्रतो दशग्रीवमुपसेदुः कीदृशं तेजांसि मुष्णन्तमिव खण्डयन्तमिव स्वतेजसाऽभिभवात् विस्तीर्णवक्षसं उभयत्र घृणोऽदानेन इति णत्वम् ॥ ९२ ॥ भ०

बह्वित्यादि । वानरद्विषो राक्षसा ऊचुरिति वक्ष्यमाणेन सम्बन्धः कीदृशाः किमूचुरित्याह बहुधा भिन्नमर्माण इति यानि कालान्तरे प्राणहराणि मर्म्माणि

अग्नेवणं वर्त्तमाने प्रतीच्यां चन्द्रमण्डले ॥ ९३ ॥
निर्व्रणं कृतमुद्यानमनेनाम्रवणादिभिः ।
देवदारुवनामिश्चैरित्यूचुर्वानरद्विषः ॥ ९४ ॥

तानि बहुधा भिन्नानि येषामिति बहुव्रीहिः अट्पवर्गसमुदायस्य व्यवधानादट् कुप्वाङित्यादिना णत्वं खरणसादयः खरस्येव नासिका यस्येति अज्नासिकाया इत्यच् नसादेशश्च पूर्वपदात् संज्ञायामिति णत्वं खरणसादयो राक्षसाः वनस्याग्ने अग्नेवणं राजदन्तादित्वात्परनिपातः वनं परगेति णत्वं प्रतीच्यां दिशि यद्वनस्य वनस्याग्ने उपरि वर्त्तमाने चन्द्रमण्डले प्रभातसन्ध्यायामित्यर्थः ॥ ९३ ॥ ज०म०

बहुधेत्यादि । वानरद्विषो राक्षसा इत्यूचुरित्यग्रिमश्लोकेनान्वयः कीदृशाः बहुधा भिन्नानि मर्म्माणि जीवितस्थानानि येषां तादृशाः घृणौऽदान्ते इत्यादिना अवकुघन्तरेपीति णत्वं भीमा भयानकाः खरस्येव नसा नासिका येषां ते आदयो येषां ते तथा घृर्ण इत्यादावतहादित्यस्य योगविभागात् णत्वं नसाशब्दस्य रूपमिदं लपनं वदनं तुण्डमाननं नासिका नसेति रभसः नसा नासा च नासिकेति कोषान्तरं खरखुराभ्यां नासिकाया नस्नसाविति परः किमूचुरित्याह चन्द्रमण्डले प्रतीच्यां पश्चिमायां दिशि वनस्याग्ने वर्त्तमाने सति अनेनोद्यानं निर्व्रणं वनशून्यं कृतमिति परश्लोकेनान्वयः वनस्याग्ने अग्नेवनं तस्मिन् व्यंपूर्व्वमिति अग्ने शब्दस्य पूर्व्वनिपातः अग्नेवणमिति पाठे देशाध्वकालेति टसंज्ञा अग्नेवणमित्यनुखारवत् पाठोऽत्र प्रमादकृतः सप्तम्यन्तत्वादिति विद्याविनोदः अग्नेवण इति खरणसवस्णत्वं अग्ने मिश्रकासारिकासिप्रकापुरगाकोटराभ्यो वनस्य संज्ञायामिति परसूत्रे संज्ञायामिति सम्भवपरसूत्रं तेनासंज्ञायामपि णत्वं स्यादिति बोध्यं अग्ने वणे वर्त्तमाने प्रतीच्यां चन्द्रमण्डल इत्यनेन प्रातःसन्ध्या सूचिता ॥ ९३ ॥ भ०

निर्व्रणेत्यादि । उद्यानं संनिवेशविशेषः निर्व्रणं क्षत्तरहितं अनेन कपिना कृतं आम्रवणादिभिरुपलक्षितं उभयत्रापि प्रनिरन्तेति णत्वं देवदारुवनामिश्चैरिति विभाषौषधीत्यादिना णत्वं न भवति ह्यक्षरत्वप्रक्षरेभ्य इति वक्तव्यमिति वचनात् इत्येवमूचुः ॥ ९४ ॥ ज० म०

निर्व्रणमित्यादि । कीदृशमुद्यानं आम्रवणादिभिरुपलक्षितं कीदृशैः देवदारुवनामिश्चैः देवदारुवनयुक्तैः निर्व्रणाम्रवणयोः खरणसवस्णत्वं देवदारुवनेत्यत्र योगविभागस्य क्वचिद्विषयान्न णत्वं प्रसक्तं आम्रश्चपीयूक्षशरखदिरनिः

उपास्थियत संप्रीताः पूर्व्वाह्णे रोषवाहणम् ।
राक्षसाः कपिमादाय पतिं रुधिरपायिणाम् ॥ ९५ ॥
सुरापाणपरिक्षीवं रिपुदर्पहरोदयम् ।
परस्त्रीवाहिणं प्राप्तुः साविष्काराः सुरापिणः ॥ ९६ ॥

प्रकार्य्यान्तरिक्षुभ्यो वनस्य णत्वं तथा हैरिकाभद्रिकातिभिरवर्जं द्वित्राच्चतुर्ष्वौषधिस्थघ्रुर्व्वावनस्य णत्वं देवदारुशब्दस्य चतुरचत्वाहेवदारुवनामिश्चैरित्यत्र न णत्वम् ॥ ९४ ॥ भ०

उपेत्यादि । ते राक्षसाः पतिमुपास्थियत उपागताः दृष्टिपथं गता इत्यर्थः उपाहेवपूजेत्यादिना सङ्गतिकरणे तङ् स्थाद्वोरिच्च सम्प्रीताः हृष्टाः तेषामनुज्ञातप्रवेशत्वात् पूर्व्वाह्णे प्रत्यूषसि अह्नोदन्तादिति णत्वं रोषवाहणं कपिमादाय रोषस्यासनीक्षतं वाहनमाहितादिति णत्वं रोषस्य तत्राधीयमानत्वात् पतिं रुधिरपायिणां राक्षसानां पानं देश इति णत्वम् ॥ ९५ ॥ ज० म०

उपेत्यादि । राक्षसाः कपिमादाय संप्रीताः सन्तः पूर्व्वाह्णे प्रत्यूषसि रुधिरपायिणां राक्षसानां पतिं रावणं उपास्थियत उपगताः मैत्राध्वसङ्गरादाविति सङ्गे मं स्यादोर्डिष्टीमे इति डिः गुणाभावश्च मान्तोऽदनदृत्यत् कपिं कीदृशं रोषवाहणं आरूढक्रोधं पूर्व्वाह्णे इति प्राग्वह्नोर्णोऽतोऽह्नेति णत्वं रोषवाहणमिति खरणसवणत्वं परमते वाह्यघ्रुर्व्वाहनस्य णत्वं रोषस्य वाह्यत्वात् रुधिरपायिणामिति रुधिरं रक्तं पिबन्तीति अहादित्वात् णिन् घ्रुर्णोऽदान्तदृत्यादौ नैकाचकोस्तुवेति पाक्षिकं णत्वं असृक्पाणाधिपं तूर्णं कपिमादाय राक्षसा इति क्वचित्पाठः तदा असृक् प्रधानं पानं येषां तेषामधिपं असृजां पानं यत्र सोऽसृक्पाणो देशः तस्याधिपमिति वा असृजेव पानं मेयं येषामिति वा खरणसवणत्वं देशे पानस्य णत्वं नित्यं भावकरणयोः पानस्य वा णत्वमिति परः ॥९५॥ भ०

सुरेत्यादि । सुरापाणात्परिक्षीवं मत्तं रावणं वा भावकरणयोरिति णत्वं रिपुदर्पहर उदयोऽद्विर्यस्य तं परस्त्रियं वाहयितुमुपभोक्तुं शीलं यस्य तं परस्त्रीवाहिणं प्रातिपदिकान्त इति णत्वाभावः पाक्षिकः प्राप्तुः सुष्ठु निकटीकृताः साविष्काराः साहङ्काराः सुरापिणः सुरापैर्युक्ताः सुरां पिबन्तीति गाधोष्टक् ते येषां सन्तीति मत्वर्थीयः एकाजुत्तरपदेण इति णत्वं उत्तरस्य प्रातिपदिकान्तस्यैकाच्त्वात् ॥ ९६ ॥ ज० म०

सुरेत्यादि । राक्षसा रावणं प्राप्तुः कीदृशं सुरापाणेन परिक्षीवं मत्तं

संहर्षयोगिणः पादौ प्रणेमुस्त्रिदशद्विषः ।
प्रहिण्वन्तो हनूमन्तं प्रमीणन्तं द्विषन्मतीः ॥ ६७ ॥
प्रवपाणि शिरो भूमौ वानरस्य वनच्छिदः ।
आमन्त्रयत संक्रुद्धः समितिं रक्षसां पतिः ॥ ६८ ॥
प्रख्यगादीत् प्रणिघ्नन्तं घनः प्रणिनदन्निव ।
ततः प्रणिहितः स्वार्थे राक्षसेन्द्रं विभीषणः ॥ ६६ ॥

खरणसवस्वत्वं भावकरणयोः यानस्य वा णत्वमिति परः रिपूणां दर्पहारक उदयो यस्य तं परस्त्रियं वोढुं उपभोक्तुं शीलं यस्य तं षृ्णोऽदाने इत्यादिना नैकाचकोस्तुवेति पक्षे णत्वं परस्त्रीकामिणमिति पाठे तेनैव कवर्गवत्त्वात् नित्यं णत्वं कीदृशाः साविष्काराः साहङ्काराः सुरापिणः सुरापैर्युक्ताः सुरां पिबन्तीति सुरापाः हनजनादिति डः ततोऽस्त्यर्थे इन् पूर्ववदेकाच्त्वात् नित्यं णत्वम् ॥ ६६ ॥ भ०

संहेत्यादि । संहर्षयोगिणः स्वर्द्धायोगिनः कुमति चेति णत्वं ते अन्योन्याभिभवेच्छया त्रिदशद्विषो रावणस्य पादौ प्रणेमुः उपसर्गादसमासेऽपीति णत्वं हनूमन्तं प्रहिण्वन्तः ढौकयन्तः द्विषन्मतीः शत्रुबुद्धीः प्रमीणन्तं अभिभवन्तं मीञ् हिंसायां क्र्यादिकः हिनुमिना इति णत्वम् ॥ ६७ ॥ ज० म०

समित्यादि । राक्षसां स्त्रिदशद्विषो रावणस्य पादौ प्रणेमुः प्रणतवन्तः प्राग्वन्नोण इत्यादिना नादिधातुत्वाणत्वं संहर्षयोगिणः महाहर्षयुक्ताः षृ्ण इत्यादिना कवर्गत्वात् नित्यं णत्वं हनूमन्तं प्रहिण्वन्तः प्रापयन्तः कीदृशं द्विषन्मतीः शत्रुबुद्धीः प्रमीणन्तं अभिभवन्तं प्राग्वन्नोण इति मीनातिन्योर्णत्वम् ॥६७॥भ०

प्रवेत्यादि । अस्य वानरस्य वनच्छिदः शिरो भूमौ प्रवपाणि क्षित्वा पातयामि आनिलोडिति णत्वं वपिरत्र पातने वर्त्तते संक्रुद्धः रक्षसां पतिः स्वामी समितिं समूहं आमन्त्रयत भाषितवान् ॥ ६८ ॥ ज० म०

प्रवेत्यादि । रक्षसां पतौ रावणः संक्रुद्धः सन् समितिं सभां आमन्त्रयत उक्तवान् किं तदित्याह अहं वनच्छिदो वानरस्य शिरो भूमौ प्रवपाणि क्षित्वा पातयामीत्यर्थः वपिरत्र प्रहरणे प्राग्वन्नोण इति आनिपोणत्वम् ॥ ६८ ॥ भ०

प्रख्येत्यादि । तत उत्तरकालं विभीषणो राक्षसेन्द्रं प्रणिघ्नन्तं हन्तुमारभमाणं प्रख्यगादीत् वक्तुं प्रवृत्तः घन इव प्रणिनदन् गर्जन् स्वार्थे राक्षसेन्द्रस्य प्रणिहितोऽवहितमनाः सर्व्वत्र नेर्गदेति णत्वम् ॥ ६६ ॥ ज० म०

प्रणिशाम्य दशग्रीव प्रणियातुमलं रुषम् ।
प्रणिजानीहि हन्यन्ते दूता दोषे न सत्यपि ॥ १०० ॥
प्राणयन्तमरिं प्रोचे राक्षसेन्द्रो विभीषणम् ।
प्राणिणिषुर्न पापोऽयं योऽभाङ्क्षीत् प्रमदावनम् ॥ १०१ ॥
प्राघानिषत रक्षांसि येनाघ्नानि वने मम ।
न प्रहण्यः कथं पापं वद पूर्व्वापकारिणम् ॥ १०२ ॥

प्रणेत्यादि । ततोऽनन्तरं हनूमन्तं प्रणिघ्नन्तं हन्तुमारभमाणं राक्षसेन्द्रं विभीषणो घन इव प्रणिनदन् गर्ज्जन् प्रणयगादीत् वक्तुं प्रवृत्तः स्वार्थे रावण-प्रयोजने प्रणिहितः सावधानः सर्व्वत्र प्राग्वद्भोण इति णत्वम् ॥ ९९ ॥ भ०

प्रणीत्यादि । हे दशग्रीव प्रणिशाम्य रोषं त्यज लेटि श्यनि रूपं शमामष्टानामिति दीर्घः रुषं प्रणियातुमलं न किञ्चित् पूर्व्ववत्त्वं प्रणिजानीहि अवगच्छ सत्यपि दोषे न हन्यन्ते दूता इति जानातेः शेषघातोरुपदेशावस्थायां अकखाद्यषान्तत्वात् शेषे विभाषेत्यादिना णत्वम् ॥ १०० ॥ ज० म०

प्रणीत्यादि । हे दशग्रीव प्रणिशाम्य शान्तो भव शमेर्ग्यां रूपं यत्तोश्रमादिमिद इति दीर्घः हेलेर्पः रुषं क्रोधं प्रणियातुं आश्रयितुं अलं नार्हसि निषेधार्थोऽलं शब्दः उभयत्र प्राग्वद्भोण इति णत्वं त्वं प्रणिजानीहि अवगच्छ पूर्व्ववदकखाद्यषान्तान्ननेरिति पक्षे णत्वं दोषे सत्यपि दूता न हन्यन्ते नीतिस्तैरित्यर्थात् ॥ १०० ॥ भ०

प्राणेत्यादि । अरिं कपिं यः प्राणयति जीवयति तं प्राणयणं विभीषणं स्वप्राणने अनचेत्यस्य रूपं अनितेरिति णत्वं प्रोचे राक्षसेन्द्रः न प्राणिणिषुः न जीवितुमिच्छुरयं पापः उभौ साभ्यासस्येति णत्वं द्वयोरपि योऽभाङ्क्षीत् भग्नवान् प्रमदावनं फलन्तलक्षणा दृद्भिः ॥ १०१ ॥ ज० म०

प्राणेत्यादि । अरिं हनूमन्तं प्राणयन्तं जीवयन्तं विभीषणं राक्षसेन्द्रः प्रोचे उक्तवान् अनितेर्ज्जन्तस्य रूपं किमुक्तवानित्याह अयं पापो दुराचारो न प्राणिणिषुर्न जीवितुमिच्छुः अनितेः सनि रूपं प्राग्वद्भोण इत्यादिना वात्वनेति विभाषया णत्वं योऽयं प्रमदावनं अभाङ्क्षीत् भग्नवान् स्यां रूपम् ॥ १०१ ॥ भ०

प्राघेत्यादि । मम आघ्नानि अत्तुमर्हतीनि येन वने प्राघानिषत मारितानि कर्म्मणि लुङ् चिण्वदिट् होहन्तेरिति घत्वं तपरपरिच्छिन्नाकारपूर्व्वस्य नकारस्य

वेश्मान्तर्हणनं कोपान्मम शत्रोः करिष्यतः ।
मा कार्षीरन्तरयणं प्रयाणार्हमवेह्यमुम् ॥ १०३ ॥
प्रहीणजीवितं कुर्य्युर्ये न शत्रुमुपस्थितम् ।
न्याय्याया अपि ते लक्ष्म्याः कुर्व्वन्त्याशु प्रहापणम् ॥ १०४ ॥
कः कृत्वा रावणामर्षप्रकोपणमवद्यधीः ।

हनेरत्यूर्ध्वस्येति णत्वं न भवति तं पूर्व्वापकारिणं पापं कथं न प्रहण्मः मारयाम इति वद कथय ब्रूर्वेति णत्वम् ॥ १०२ ॥ ज० म०

प्राघेत्यादि । येन मम प्राणानि रक्षांसि अक्षप्रभृतीनि रणे प्राघाणिषत मारितानि कर्म्माणि टी हनश्चहृदश्च इति मिण् स्वेर्हौ घो ऋणिति चेति घः हनोक्षौघ्नोणन इत्यत्र घ्न इत्युपलक्षणं हृस्वान्यधात्वे णत्वाभाव इति बोध्यं तेन घत्वेऽपि णत्वनिषेधः हौवत्वे इति णत्वनिषेधार्थं परसूत्रं तं पूर्व्वापकारिणं पापं कपिं कथं वयं न प्रहण्मः इति त्वं वद प्राग्वन्नोण इत्यादौ मवान्तहन इति पक्षे णत्वं पूर्व्वापकारिणमिति मृगुर्ण इत्यादिना कवर्गवत्त्वात् नित्यं णत्वम्॥१०२॥भ०

वेश्मेत्यादि । शत्रोर्वेश्मान्तः गृहमध्य एव हननं कोपान्मम करिष्यतः अन्तरदेय इति नकारस्य णत्वं हननस्याभावरूपस्यादेशत्वात् अन्तरयणमन्तरायणं विघातं मा कार्षीः अयनञ्चेति णत्वं प्रयाणार्हं दीर्घप्रस्थानार्हममुमवेहि अवगच्छ क्त्वाच इति ल्यबं अच उत्तरस्य नकारस्य ह्रस्यत्वात् ॥१०३॥ ज०म०

वेश्मेत्यादि । वेश्मान्तर्गृहमध्ये शत्रोर्हणनं करिष्यतो मम अन्तरयणं विघ्नं त्वं मा कार्षीः न कुरु हे विभीषण अमुं वानरं प्रयाणार्हं दीर्घप्रस्थानार्हं मरणयोग्यं अवेहि जानीहि अन्तर्हणनमिति प्राग्वन्नोण इति णत्वं अन्तरोऽदेशेहन इति णत्वमिति परः अन्तरयणमिति खरणसवस्यत्वं अन्तरोऽदेशेऽयनस्येति णत्वमिति परः प्रयाणार्हमिति नोऽचोन्तऽरदुर्गेरिति णत्वम् ॥१०३॥ भ०

प्रहीत्यादि । शत्रुमुपस्थितं प्रहीणजीवितं ये न कुर्य्युः जहातेरोदितश्चेति निशादेशनकारस्य पूर्ववत्त्वं ते न्याय्याया अपि कुलक्रमादागताया अपि लक्ष्म्याः प्रहापणं त्याजनं कुर्व्वन्ति णेर्विभाषेति णत्वम् ॥ १०४ ॥ ज० म०

प्रहीत्यादि । ये उपस्थितं शत्रुं प्रहीणजीवितं त्यक्तप्राणं न कुर्य्युः ओहाक्त्यागे दामागैहागिति डी ओदित्त्वात् क्त्रस्य नः नोचोऽन्तरदुर्गेरिति णत्वं ते न्याय्याया न्यायप्राप्ताया अपि लक्ष्म्याः श्रियः प्रहापणं त्यागं कुर्व्वन्ति नोचोऽन्तरदुर्गेरित्यादिना अप्रत्ययात् पक्षे णत्वम् ॥ १०४ ॥ भ०

शक्तो जगति शक्रोऽपि कर्त्तुमायुःप्रगोपणम् ॥ १०५ ॥
वनान्तप्रेङ्खणः पापः फलानां परिशिंसकः ।
प्रणिक्षिष्यति नो भूयः प्रणिन्द्यास्मान्मधून्यथम् ॥ १०६ ॥
हरेः प्रगमनं नास्ति न प्रभानं हिमद्रुहः ।
नातिप्रवेपनं वायोर्मया गोपायिते वने ॥ १०७ ॥

कः क्रुधेत्यादि । अवद्यधीः योऽवद्धिः रावणामर्षस्य प्रकोपणमभिवर्द्धिं कृत्वा आयुःप्रगोपणं कर्त्तुं शक्रोऽपि कः शक्तः कृलसेजुपधादिति खत्वं कुपगुपयोर्हलन्तयोरिगुपधत्वात् ॥ १०५ ॥ ज० भ०

क इत्यादि । कोऽवद्यधीर्दुर्बुद्धिः शक्रोऽपि इन्द्रतुल्योऽपि रावणसम्बन्धिक्रोधस्य प्रकोपणमतिवृद्धिं कृत्वा आयुषः प्रगोपणं कर्त्तुं शक्तः समर्थो भवति नोचोऽन्तरदुर्गेरित्यादिना कुपगुपोरिजुङ्त्वात् विभाषया खत्वम् ॥ १०५ ॥ भ०

वनेत्यादि । प्रेङ्खति गच्छतीति प्रपूर्वादिङ्खेः कर्त्तरि ल्युट् वनान्तस्य वनसमीपस्य प्रेङ्खणः इजादेः सनुम इति खत्वं फलानां परिशिंसकः भक्षयिता णिशिचुम्बन इत्यस्य रूपं अस्मान् प्रणिन्द्य तिरस्कृत्य भूयः पुनरप्ययं मधूनि नोऽस्माकं प्रणिक्षिष्यति भोक्ष्यति णिक्षचुम्बन इत्यस्य रूपं वानिंसनिक्षनिन्दामिति खत्वम् ॥ १०६ ॥ ज० भ०

वनान्तेत्यादि । अयं पापोऽस्मान् प्रणिन्द्य तिरस्कृत्य भूयः पुनरपि मधूनि नः प्रणिक्षिष्यति न चुम्बिष्यति न भक्षयिष्यतीत्यर्थः कीदृशः वनान्तप्रेङ्खणः वनमध्यगः इङ्खिगतौ नन्द्यादित्वादनः नोचोऽन्तरदुर्गेरित्यादिना इजादौदित्त्वात् खत्वं फलानां परिशिंसकः चुम्बकभक्षक इत्यर्थः प्राग्वद्नोणोऽन्तरदुर्गेरित्यादिना निंसनिक्षनिन्दां विभाषया खत्वम् ॥ १०६ ॥ भ०

हरेरित्यादि । मया गोपायिते रक्षिते वने हरेरिन्द्रस्यापि प्रगमनं सञ्चारो नास्ति हिमद्रुहः आदित्यस्य न प्रभानं न प्रकर्षेण दीप्तिः वायोर्नातिप्रवेपनं मन्दगमनं तद्वनेन भग्नमित्यर्थात् क्त्वाच इति प्राग्वस्य खत्वस्य नभाभूपूकमिगमीत्यादिना प्रतिषेधः ॥ १०७ ॥ ज० भ०

हरेरित्यादि । मया गोपायिते रक्षिते वने हरेरिन्द्रस्यापि चन्द्रस्य वा प्रगमनं सञ्चारो नास्ति हिमद्रुहः सूर्यस्य प्रभानं प्रकृष्टा दीप्तिर्नास्ति वायोरतिप्रवेपनं प्रचण्डगमनं नास्ति सर्वत्र नोचोऽन्तरदुर्गेरित्यादौ स्यादिवर्जनाच्च खत्वम् ॥ १०७ ॥ भ०

दुष्मानः पुनरेतेन कपिना भृङ्गसम्भृतः ।
प्रनष्टविनयेनाग्रः स्वादुः पुष्पासवो वने ॥ १०८ ॥
रोषभीमसुखेनैवं क्षुभ्नतोक्ते प्लवङ्गमः ।
प्रोचे सानुनयं वाक्यं रावणं स्वार्थसिद्धये ॥ १०९ ॥

इति णत्वाधिकारः ।

दूतमेकं कपिं बद्धमानीतं वेश्म पश्यतः ।
लोकत्रयपतेः क्रोधः कथं तृणलघुस्तव ॥ ११० ॥

दुष्मेत्यादि । पुनरेतेन प्रनष्टविनयेन कपिना पुष्पासवो दुष्मानः दुःखेन पास्यत इति आतोयुच् पात्पदान्तादिति णत्वस्य प्रतिषेधः भृङ्गसम्भृतो भ्रमरसञ्चितः प्रनष्ट इति नशेः षान्तस्येति प्रतिषेधः अग्र्यः श्रेष्ठः । १०८ ॥ ज० भ०

दुष्मानेत्यादि । प्रनष्टविनयेन एतेन कपिना वने भृङ्गेण भ्रमरेण सम्भृतः सञ्चितः श्रेष्ठः अग्रः स्वादुर्मिष्टः पुष्पासवः पुनर्दुष्मानः दुःखेन पास्यते भयाद्य ताडनात् नोचोऽन्तरदुर्गेरित्यादौ दुर्व्वर्ज्जनान्न णत्वं नशः क्ते शच्छ्राजिति षड् प्राग्वन्नेण इत्यादिना नशेः शान्तत्वाभावात् न णत्वम् ॥ १०८ ॥ भ०

रोषेत्यादि । रोषभीमसुखेन इति पदव्यवायेऽपि णत्वप्रतिषेधः भीमसुख इत्यनेन निमित्तनिमित्तिनोर्व्यवधानात् क्षुभ्नादिषुचेति णत्वप्रतिषेधः एवमुक्ते सति प्लवङ्गमः रावणं प्रोचे वक्तुं प्रवृत्तः वाक्यं वक्ष्यमाणं सानुनयं अनुकूलं किमर्थं स्वार्थस्य सिद्धये स्वार्थश्च सीताप्रत्यर्प्पणम् ॥ १०९ ॥ ज० भ०

इति णत्वाधिकारः ।

रोषेत्यादि । रोषेण भीमं दुष्प्रेक्ष्यं सुखं यस्य तेन क्षुभ्नता कलुषीभवता रावणेन एवमुक्ते सति प्लवङ्गमो हनूमान् स्वार्थस्य सीताप्रत्यर्पणरूपस्य सिद्धये सानुनयमनुकूलं वाक्यं रावणं प्रोचे रोषभीमसुखेनेति षूङ् धूर्ण इत्यादौ अतद्धादिति अतद्धपदेन नकारवत् पूर्व्ववर्त्तिनिमित्तवदेकमात्रपदं गृह्यते प्रथमदृष्टत्वात् न तु पूर्व्वपूर्व्ववर्त्ति यावत् पदं तेनात्र कार्य्यकारणयोर्भीमपदव्यवधानात् न णत्वं अनाङ्पदव्यवायेऽपीति णत्वनिषेधार्थं परस्मृतं क्षुभ्नतेति मनीषादित्वात् भयुक्तस्य नस्य णत्वनिषेधः ॥ १०९ ॥ भ०

इति णत्वाधिकारः ।

इतः प्रभृति प्रकीर्णकश्लोकानाह

दूतमित्यादि । दूतं सन्देशस्य हारकं एकमद्वितीयं बद्धं अस्वतन्त्रीकृतं

अग्न्याहितजनप्रह्वे विजिगीषापराङ्मुखे ।
कस्माद्वा नीतिनिष्णस्य संरम्भस्तव तापसे ॥ १११ ॥
न सर्व्वरात्रकल्याण्यः स्त्रियो वा रत्नभूमयः ।
यं विनिर्ज्जित्य लभ्यन्ते कः कुर्य्यात्तेन विग्रहम् ॥ ११२ ॥

वेश्मानीतं पश्यत इति सर्व्वमेतन्न रोषकारणं अतो लोकत्रयपतेस्तवायं तृणवल्लघुरसारः कथं कोपः ॥ ११० ॥ ज० म०

अथ प्रकीर्णकाः ।

दूतमित्यादि । एकमद्वितीयं बद्धं वेश्म गृहमानीतं कपिं दूतं सन्देशहारकं मां पश्यतो लोकत्रयपतेस्तव कथं तृणवत् लघुरसारः क्रोधः ॥ ११० ॥ भ०

अग्न्येत्यादि । अग्न्याहितजनप्रह्वे आहिताग्नौ जने प्रवणे वाहिताग्न्यादिषु पूर्व्वनिपातः तस्मिन् विजिगीषापराङ्मुखे त्यक्तराज्यत्वात् तापसे रामे तपः सहस्राभ्यां विनियो अण्वेत्यण् निष्णस्य तव नीतौ पटुप्रग्रस्य कस्माद्धेतोः संरम्भः रोषः ॥ १११ ॥ ज० म०

अग्न्येत्यादि । कस्माद्वा तव तापसे रामे संरम्भः क्रोधः कीदृशे अग्न्याहितजनप्रह्वे याज्ञिकजनेषु नम्रे अग्निराहितो येन सोऽग्न्याहितः क्तान्तस्य पूर्व्वनिपात औत्सर्गिकः अत्र तु आहितादिरग्न्यादेरिति स्तत्वेन क्तान्तस्य विकल्पेन परनिपात इति परः स्मृते पूर्व्वनिपातपरनिपातयोरन्वयबोधेन कर्त्तव्यत्वं नियमाभावात् तथात्वे विवक्षाधीनत्वादुभयपदं सिद्धमेव विजिगीषापराङ्मुखे विजेतुमिच्छा विजिगीषा तत्र पराङ्मुखे विगतस्पृहे कीदृशस्य नीतिनिष्णस्य नीतौ पण्डितस्य ॥ १११ ॥ भ०

न सेत्यादि । यं विनिर्जित्य सर्व्वरात्रं कल्याण्यः स्त्रियो न लभ्यन्ते सर्व्वाश्च ता रात्रयश्चेति पूर्व्वकालेति सः अहः सर्व्वेत्यादिना अच् सर्व्वरात्रं कल्याण्य इति सः न रत्नभूमयः रत्नाकराः रत्नानि भूमयश्चेति सः कः तेन सह विग्रहं कुर्य्यात् सन्धिरेव युक्तः ॥ ११२ ॥ ज० म०

न सेत्यादि । यं विनिर्जित्य सर्व्वरात्रान् व्याप्य कल्याण्यः सुखदाः स्त्रियो रत्नानि भूमयश्च न लभ्यन्ते तेन सह विग्रहं कः पुरुषः कुर्य्यात् सर्व्वाश्च ता रात्रयश्चेति सर्व्वरात्राः ततः सदाध्वादिव्याप्ताविति द्वितीयाविधानात् द्वितीयातत्पुरुषः सर्व्वैकदेशसंख्यातेति षः तदन्तरात्रिशब्दस्य पुंलिङ्गत्वं पूर्व्वरात्रेत्युदाहरणेन ज्ञापितम् ॥ ११२ ॥ भ०

सङ्गच्छ रामसुग्रीवौ भुवनस्य समुद्भये ।
रत्नपूर्णाविवाम्भोधी हिमवान् पूर्व्वपश्चिमौ ॥ ११३ ॥
सुहृदौ रामसुग्रीवौ किङ्करा: कपियूथपा: ।
परदारार्पणेनैव लभ्यन्ते मुञ्च मैथिलीम् ॥ ११४ ॥
धर्म्मं प्रत्यर्पयन् सीतामर्थं रामेण मित्रताम् ।
कामं विश्वासवासेन सीतां दत्त्वाप्नुहि त्रयम् ॥ ११५ ॥

तदेव दर्शयन्नाह

सङ्गच्छेत्यादि । यथा रत्नपूर्णावम्भोनिधी पूर्व्वपश्चिमौ भुवनस्य समुद्भये हिमवान् सङ्गतवान् तथा त्वमपि रामसुग्रीवौ भुवनस्य समुद्भये सङ्गच्छ सङ्गतिं कुरु सकर्म्मकत्वात्समोगमिति तङ् न भवति ॥ ११३ ॥ ज० म०

सङ्गच्छेत्यादि । भुवनस्य समुद्भवे उद्भये त्वं रामसुग्रीवौ सङ्गच्छ सकर्म्मकत्वात् समो गमच्छेति न मं हिमवान् हिमालयः पर्व्वतः रत्नैः पूर्णौ पूर्व्वपश्चिमौ समुद्रौ यथा सङ्गतवान् ॥ ११३ ॥ भ०

तच्च सङ्गतं परदारार्पणेनैवेति दर्शयन्नाह

सुहृदित्यादि । रामसुग्रीवौ सुहृदौ लभ्येते सुहृदुर्हृदौ मित्रामित्रयोरिति निपातनं तत्प्रीतिलाभात् किङ्करा लभ्यन्ते किं कुर्व्वन्तीति दिवाविभेति टः कपियूथपाः नीलप्रभृतयः तस्मान्मुञ्च मैथिलीमिति ॥ ११४ ॥ ज० म०

सुहृदित्यादि । रामसुग्रीवौ सुहृदौ त्वया लभ्येते एवं सति कपियूथपा नीलादयः किङ्करा लभ्यन्ते परस्त्रीसमर्पणेनैव नतु स्वकीयकिञ्चिद्द्रव्यप्रदानेन तस्मान्मैथिलीं मुञ्च त्यज ॥ ११४ ॥ भ०

किञ्च सीताप्रत्यर्पणात् पुरुषार्थप्राप्तिरिति दर्शयन्नाह

धर्म्ममित्यादि । सीतां प्रत्यर्पयन् धर्म्मं अधर्म्मविरतेः अर्थं रामेण मित्रतां सर्व्वलाभानामर्थसम्पन्नमित्रलाभस्य महत्त्वात् विश्वासवासेन रामविश्वासपूर्व्वकेणावस्थानेन कामं अतः सीतां दत्त्वा आप्नुहि लभस्व त्रयं त्रिवर्गं त्रयोऽवयवा अस्येति द्वित्रिभ्यां तयस्यायज्वा ॥ ११५ ॥ ज० म०

सीतार्पणेन त्रिवर्गप्राप्तिं दर्शयति

धर्म्ममित्यादि । सीतां दत्त्वा त्रयं त्रिवर्गं आप्नुहि लभस्व यथा सीतां प्रत्यर्पयन् धर्म्मं प्राप्स्यसि परस्त्रीहरणाभावात् रामेण सह मित्रतामर्थं प्राप्स्यसि

विराधताडकाबालिकबन्धखरदूषणैः ।
न च न ज्ञापितो यादृङ्मारीचेनापि ते रिपुः ॥ ११६ ॥
खरादिनिधनञ्चैव मा मंस्था वैरकारणम् ।
आत्मानं रक्षितुं यस्मात् कृतं तन्न जिगीषया ॥ ११७ ॥
ततः क्रोधानिलापातकम्प्रास्याम्भोजसंहतिः ।
महाह्रद इव क्षुभ्यन् कपिमाह स्म रावणः ॥ ११८ ॥
कृतराक्षसयोधस्य विरुग्नोद्यानशाखिनः ।

विश्वासवासेन कामं प्राप्स्यसि त्वयोऽवयवा अस्येति द्वित्वेवायट् ॥ ११५ ॥ भ०

रिपुरेवास्तु किन्तेन मित्रीकृतेन नयासौ शक्नोऽपकर्त्तुमिति चेदाह

विराधेत्यादि । यादृगसौ रिपुः तादृग्विराधादिभिः नच न ज्ञापितः तव अपि तु ज्ञापित एवेत्यर्थः तस्मात्तेन सह मैत्री युक्ता न विग्रह इति भावः यादृगिति त्यदादिषु दृश इति क्विन् आर्षत्वान्नञः ॥ ११६ ॥ ज० भ०

शत्रुरपि रामः किं कर्त्तुं शक्नोतीत्यत आह

विराधेत्यादि । तव रिपुर्यादृक् विराधाद्यैर्मारीचेन च न न ज्ञापितः अपित्तु ज्ञापित एव ॥ ११६ ॥ भ०

खरादीन् व्यापादयता तेनैव वैरकारणमाचरितं न मयेति चेदाह

खरेत्यादि । खरादिनिधनञ्चापि वैरकारणं मा मंस्थाः मा ज्ञासीः लुङि रूपं यस्मादात्मानं संरक्षितुं तत् खरादिनिधनं कृतं न तु जिगीषया विजेतुमिच्छया ॥ ११७ ॥ ज० भ०

खरादीत्यादि । खरप्रभृतिविनाशमपि विरोधबीजं त्वं मा मंस्थाः मा ज्ञासीः ज्ञां रूपं यस्मात् आत्मानं रक्षितुं तत कृतं नतु जेतुमिच्छया ॥११७॥भ०

तत इत्यादि । ततः कपिवाक्यानन्तरं क्रोधोऽनिल इव तस्यापातेन संश्लेषेण कम्रा कम्पनशीला आस्याम्भोजानां मुखपद्मानां संहतिर्यस्य स एवं महाह्रद इव क्षुभ्यन् चलन् दैवादित्वाच्छ्यन् ॥ ११८ ॥ ज० भ०

तत इत्यादि । कपिवचनानन्तरं रावणो महाह्रद इव क्षुभ्यन् सञ्चलन् कपिमाह स्म उक्तवान् कीदृगेनातीते इति की पञ्चतिप्रश्नेष्वाहस्येति ब्रूजस्तिपो णप् आहादेशश्च कीदृशः क्रोधोऽनिल इव तस्यापातेनागमनेन संश्लेषेण कम्रा कम्पनशीला मुखपद्मानां संहतिर्यस्य स तथा अतएव क्षुदतुल्यता ॥ ११८ ॥ भ०

दूतोऽस्मीति ब्रुवाणस्य किं दूतसदृशं तव ॥ ११९ ॥
पङ्गुबालस्त्रियो निघ्नन् कबन्धखरताडकाः ।
तपस्वी यदि काकुत्स्थः कीदृक् कथय पातकी ॥ १२० ।
अभिमानफलं जानन्महत्त्वं कथमुक्तवान् ।
रत्नादिलाभशून्यत्वान्निष्फलं रामविग्रहम् ॥ १२१ ॥
परस्त्रीभोगहरणं धर्म्म एव नराशिनाम् ।

हतेत्यादि । हताः राक्षसयोधाः अक्षप्रभृतयो येन विरुग्नाः भग्नाः ओदितसेति निष्ठानत्वं उद्यानशाखिनो येन तस्यैवंविधस्य तव दूतोऽस्मीति ब्रुवाणस्य किं दूतसदृशं सन्देशमात्रस्य प्रापकाहि दूता इति भावः ॥११९॥ ज०म०

हतेत्यादि । हे वानर अहं दूतोऽस्मीति ब्रुवाणस्य तव किं कर्म्म दूतसदृशं न किमपि दूताहि सन्देशप्रापका भवन्ति तव कीदृशस्य हता राक्षसयोधा येन विरुग्ना उद्यानवृक्षा येन स तस्य ॥ ११९ ॥ भ०

अन्याहितजनप्रश्ने तापसे कस्मात्संरम्भ इत्याह

पङ्गुबालेत्यादि । पङ्गुमङ्गविकलं कबन्धं बालं खरं स्त्रियं ताडकां निघ्नन् व्यापादयन् यदि तपस्वी काकुत्स्थः कीदृक् पातकीति कथय इदं किमोरोश्की ॥ १२० ॥ ज० म०

कस्मात् संरम्भस्तव तापसे इत्यस्योत्तरमाह

पङ्गुबालेत्यादि । पङ्गु कबन्धं बालं खरं स्त्रियं ताडकाञ्च निघ्नन् रामो यदि तपस्वी तदा पातकी कीदृगिति त्वं कथय ॥ १२० ॥ भ०

यदुक्तं यं विनिर्जित्य स्त्रियो रत्नभूमयश्च न लब्धास्त इत्याह

अभीत्यादि । अभिमानः फलं यस्य महत्त्वस्य तज्जानन् रत्नादिलाभशून्यं रामविग्रहं कथं निष्फलमुक्तवानसि विग्रहे सति अभिमानफलं महत्त्वं स्यात् ॥ १२१ ॥ ज० म०

न सर्व्वरात्रकल्याण इत्यादि यदुक्तं तदुत्तरमिदम्

अभीत्यादि । अभिमानमेव फलं यस्य तन्महत्वं जानन् त्वं कथं रामविग्रहं रत्नादिलाभशून्यत्वात् निष्फलं उक्तवान् अभिमानस्य फलत्वात् ॥ १२१ ॥ भ०

सीतां प्रत्यर्पयन् धर्म्ममाप्नुहीत्येतदप्ययुक्तमित्याह

परेत्यादि । परस्त्रीणां हरणं परेषामोगहरणञ्च हयमपि नराशिनां धर्म्म

सुखमस्तीत्यभाषिष्ठाः का मे साशङ्कता त्वयि ॥ १२२
ब्रूहि दूरविभिन्नानाञ्जह्यशीलक्रियान्वयैः ।
हनूमन् कीदृशं सख्यं नरवानररक्षसाम् ॥ १२३ ॥
एको द्वाभ्यां विरोधस्तु जिताभ्यामविवक्षितः ।
हतश्छलेन मूढोऽयं तेनापि तव कः क्षयः ॥ १२४ ॥

एव आचार एव अतो सुखमस्तीत्यभाषिष्ठाः अभिहितवानसीति सीतां प्रत्यर्पयन् धर्ममाप्नुहीति लुङि रूपं भयात् प्रत्यर्पयसि चेदाह का मे साशङ्कता त्वयीति त्रैलोक्यविजयित्वात् त्वयीति हनूमद्व्यपदेशेन रामं सूचयति ॥ १२२ ॥ ज० म०

धर्मं प्रत्यर्पयन् सीतामित्यादि यदुक्तं तदप्ययुक्तमित्याह

परेत्यादि । परेषां स्त्रीणां भोगानाञ्च यद्धरणं तदेव नराशिनां राक्षसानां धर्मः आचारः अतएव सुखमस्ति इति हेतोः सीतां प्रत्यर्पयन् धर्ममित्यादि अभाषिष्ठाः उक्तवानसि त्वां रूपं भयात् सीतां प्रत्यर्पयिष्यति चेदाह का मे मम त्वयि साशङ्कता भयवत्ता त्रैलोक्यविजयित्वात् त्वयीति रामव्यपदेशेन हनूमतीति ॥ १२२ ॥ भ०

सङ्गच्छ रामसुग्रीवावित्येतदपि न घटत इत्याह

ब्रूहीत्यादि । हत्वा विभूत्वा शीलेन स्वभावेन क्रियया अनुष्ठानेन अन्वयेन कुलेन दूरविभिन्नानां नरादीनां कीदृशं सख्यमिति हनूमन् त्वमेव ब्रूहि ॥ १२३ ॥ ज० म०

सङ्गच्छ रामसुग्रीवाविति यदुक्तं तदप्ययुक्तमित्याह

ब्रूहीत्यादि । हे हनूमन् त्वमेव ब्रूहि नरवानरराक्षसानां सख्यं कीदृशं कीदृशानां हत्वा सम्पत्त्या शीलेन स्वभावेन क्रियया अनुष्ठानेन अन्वयेन कुलेन चातिविभिन्नानाम् ॥ १२३ ॥ भ०

विराधादिभिर्ज्ञापितोऽसि यादृगरिरित्यत्रोत्तरमाह

एक इत्यादि । एकेनापि विराधेन प्रथमं द्वावपि जितौ ताभ्यां पश्चाद्धतः सत्वापि न प्रकाशं अपि तु छलेन यतोऽसौ मूढोऽल्पबुद्धिः तथाप्यविवक्षितः शौर्यान्न प्रतीतः तेनापि हतेन तव विक्षयो जातः ॥ १२४ ॥ ज० म०

किराधादिभिर्न च न ज्ञापितो यादृगित्यस्योत्तरमिदम्

मन्त्रियोगाच्च मारीचः पलायनपरायणः ।
युयुत्सारहितो रामं ममारापहरन् वने ॥ १२५ ॥
निजघानान्यसंसक्तं सत्यं रामो लताद्रुमम् ।
त्वमेव ब्रूहि सञ्चिन्त्य युक्तं तन्महतां यदि ॥ १२६ ॥
पुंसा भक्ष्येण वन्यूनामात्मानं रक्षितुं वधः ।
क्षमिष्यते दशास्येन कृत्येयं तव दुर्मतिः ॥ १२७ ॥

एक इत्यादि । एकेनापि विराधेन द्वावपि जिताविति जिताभ्यां द्वाभ्यां पश्चात् छलेन विराधोऽपि हतः यतोऽसौ मूढः अल्पबुद्धिः एकोऽद्वितीयः अविवक्षितः अप्रसिद्धः शौर्येणाप्रथितो वा तेनापि हतेन तव को विस्मयो जातः॥१२४॥म०

मन्त्रीत्यादि । मारीचस्तु यतो राममपहरन् ममार मन्त्रियोगादादेशात् पलायनपरायण अपसर्पणनिष्ठः सन् पलायनपरायण इति परस्य नामरूपत्वादनुप्रसर्गत्वाच्च लतं युयुत्सारहितः योद्धुमिच्छारहितः मन्त्रियोगादिति प्रत्ययोत्तरपदयोश्चेति अच्मदो मदादेशः ॥ १२५ ॥ ज० म०

मारीचेन च ज्ञापित इत्यस्योत्तरमाह

मन्त्रीत्यादि । मारीचस्तु मन्त्रिदेशतः पलायनतत्परः सन् वने रामं अपहरन् योद्धुमिच्छया रहितो ममार तेन तव को विस्मय इति भावः ॥ १२५ ॥ म०

निजघानेत्यादि । रामो लताद्रुमं वानरं वालिनं निजघानेति सत्यमेतत् किन्तु अन्यसंसक्तं सुग्रीवेण सह युध्यमानं हतवान् तच्च त्वमेव सञ्चिन्त्य ब्रूहि युक्तं तन्महतां यदि ॥ १२६ ॥ ज० म०

वालिवधोऽयुक्त इत्याह

निजेत्यादि । लताद्रुमं वालिनं रामो निजघान कीदृशं अन्यसंसक्तं सुग्रीवेण सह युध्यमानं सत्यं साधु सत्यं तथ्यं वा निजघानेत्यनेन ब्रूहीत्यनेन वा सम्बन्धः हे हनूमन् त्वमेव सञ्चिन्त्य ब्रूहि तद्यदि महतां युक्तम् ॥ १२६ ॥ म०

पुंसेत्यादि । आत्मानं रक्षितुं पुंसा भक्ष्येण भक्षणार्हेण सतां बन्धूनां खरदूषणादीनां वधो दशास्येन क्षमिष्यते सहिष्यते कृत्येयं कृभवेयं तव दुर्मतिर्दुष्टबुद्धिः कृशब्दादव्ययात्यप् अमेहकृतसिलेभ्य इति परिगणनात्॥१२७॥ज०म०

आत्मानं गोपितुं यस्मादिति यदुक्तं तस्योत्तरमिदम्

पुंसेत्यादि । भक्ष्यार्हेण पुंसा रामेण आत्मानं रक्षितुं बन्धूनां खरदूषणा-

कपिर्जगाद दूतोऽहमुपायं तव दर्शने ।
द्रुमराक्षसविध्वंसमकार्षं बुद्धिपूर्वकम् ॥ १२८ ॥
आवित्कूटमकार्षुर्ये त्वत्का निर्जङ्गमं जगत् ।
दशग्रीव कथं ब्रूषे तानवध्यान्महीपतेः ॥ १२९ ॥
अभिमानफलं प्रोक्तं यत्त्वया रामविग्रहे ।

दीनां वधो मारणं दशास्येन क्रमिष्यते सहिष्यते इयं तव दुर्मतिः दुर्बुद्धिः जाता कुत्र जातेत्यर्थः त्वत्तादृचिरेत्यादिना त्यः ॥ १२७ ॥ म०

इदानीं कपिर्दशाननोक्तं दूषयन्नाह

कपिरित्यादि । तव दर्शने अन्य उपायो नास्तीति बुद्धिपूर्वकं बुद्ध्या निरूप्य द्रुमभङ्गं राक्षसविनाशञ्च उपायमकार्षं कृतवानस्मीति कपिर्जगाद अन्यथा दूतोऽहमागत इति मदावलिप्तः को मां गणयेत् अतः सदृशमेव मया कृतमिति ॥ १२८ ॥ ज० म०

इदानीं रावणोक्तं क्रमेण दूषयन् कपिराह तत्र प्रथमं किं दूतसदृशं तवेत्यस्योत्तरमाह

कपिरित्यादि । कपिर्जगाद किं तदित्याह दूतोऽहं तव दर्शने द्रुमाणां राक्षसानाञ्च विनाशरूपमुपायं अकार्षं कृतवानस्मि बुद्धिपूर्वकं बुद्ध्या निरूप्य अन्यथा दूतोऽयमागत इति को मां गणयेत् अतः सदृशमेव कृतमिति ॥ १२८ ॥ भ०

आवीत्यादि । हे दशग्रीव ये त्वत्काः त्वदीयमणीकाः कबन्धादयः स एषां श्यामणीरिति कन् आवित्कूटं निकूटपर्वतमभिव्याप्य जगत् निर्जङ्गमं निर्जन्तुकमकार्षुः तान् महीपतेः रामस्य कथमवध्यान् ब्रूषे अभिदधासि हि महीपतेर्धर्मः जङ्गम इति गमेर्डज्लुगन्तस्यापि रूपम् ॥ १२९ ॥ ज० म०

प्रकृवालक्षिय इत्यादि यदुक्तं तदुत्तरमाह

आवीत्यादि । ये त्वत्कास्त्वत्सेवकाः कबन्धादयस्त्रिकूटपर्वतमभिव्याप्य जगत् निर्जङ्गमं निर्जन्तुकं अकार्षुः कृतवन्तः जङ्गमनिरूपं त्वां सेवन्त इति ढधेकादिति कः त्वमेव मुख्यो येषामिति वा तवामी इति वा विकारसंश्लेषादिना कः युष्मदस्मदोरुक्तादित्यादिना एकत्वे त्वदादेशः हे दशग्रीव तान् महीपतेः रामस्यावध्यान् कथं ब्रूषे अभिदधासि हि महीपतेर्धर्मः ॥ १२९ ॥ भ०

अभीत्यादि । मा भूद्रामविग्रहे रत्नादिलाभः अभिमानफलं महत्त्वमस्मीति

विनेशुस्तेन शतशः कुलान्यसुररक्षसाम् ॥ १३० ॥
यत् स्वधर्म्ममसर्म्मज्ञं दुर्बलं प्रत्यपद्यथाः ।
रिपौ रामे च निःशङ्को नैतत् क्षेमङ्करं चिरम् ॥ १३१ ॥
अन्वयादिविभिन्नानां यथा सख्यमनीप्सितम् ।
नैवीर्व्विरोधमप्येवं सार्द्धं पुरुषवानरैः ॥ १३२ ॥
विराधं तपसां विघ्नं जघान विजितो यदि ।
वरो धनुर्भृतां रामः स कथं न विवक्षितः ॥ १३३ ॥

यत्त्वया प्रोक्तं तेन निमित्तेन शतशोऽनेकशः असुररक्षसां कुलानि विनेशुः विनष्टानि ॥ १३० ॥ ज० म०

अभीत्यादि । मा भूदामविग्रहे रत्नादिलाभोऽभिमानफलं महत्त्वमस्मीति यत्त्वया प्रोक्तं तेन हेतुना शतशः शतं शतं असुराणां रक्षसाञ्च कुलानि विनेशुर्विनष्टानि ॥ १३० ॥ भ०

यत्स्वेत्यादि । यदधर्म्मं परस्त्रीभोगहरणं दुर्बलं असारं अश्रेयसां आवाहकत्वात् स्वधर्म्ममात्मीयमाचारं त्वं प्रत्यपद्यथाः प्रतिपन्नवानसि स्वधर्म्म एव नराश्रितमिति लक्षि ज्ञानि रूपं यच्च रिपौ रामे निःशङ्कः निर्भयः विहरसि का मे सापत्नता त्वयीति तदेतदुभयमपि न चिरं क्षेमङ्करं कल्याणकरं क्षेमप्रियमद्रोद्वेति खच् ॥ १३१ ॥ ज० म०

यदित्यादि । परस्त्रीभोगहरणं यत् स्वधर्म्ममात्मीयमाचारं धर्म्मरहितं दुर्बलमसारं प्रत्यपद्यथाः प्रतिपन्नवानसि यच्च रामे रिपौ त्वं निःशङ्कः निर्भयः का मे सापत्नता त्वयीत्युक्तवान् तदेतदुभयं चिरं क्षेमङ्करं कल्याणदायकं न भविष्यति क्षेमप्रियमद्रातेर्कुर्व्वति खः ॥ १३१ ॥ भ०

अन्वेत्यादि । यथा नरादीनां अन्वयादिभिर्दूरविभिन्नत्वात् सख्यमनीप्सितं आप्तुमनिष्टं एवं पुरुषवानरैः सार्द्धं वियहमपि नैर्वीः नेष्टवानसि ॥ १३२ ॥ ज० म०

ब्रूहि दूरविभिन्नानामित्यादि यदुक्तं तदुत्तरमिदम्

अन्वयेत्यादि । अन्वयादिविभिन्नानां नरवानररक्षसां यथा सख्यमनीप्सितं नेष्टं विरोधमप्येवं पुरुषवानरैः सह नैर्वीः न दूरे मायोगे टी ॥ १३२ ॥ भ०

विरेत्यादि । तपसां विघ्नं विराधं विहन्यतेऽस्मिन्निति घञर्थे कविधानमिति कः तादृक् छलेनापि हन्तुं न दोषायेति दर्शयति धनुर्भृतां वरः श्रेष्ठः यत्

प्रणश्यन्नपि नाशक्नोदत्येतुं वाणगोचरम् ।
त्वयैवोक्तं महामायो मारीचो रामहस्तिनः ॥ १२४ ॥
अन्यासक्तस्य यद्वीर्यं न त्वं स्मरसि वालिनः ।
मूर्च्छावान् नमतः सन्ध्यां ध्रुवं तद्बाहुपीडितः ॥ १२५ ॥

विजितोऽभिभूतोऽपि रामो यदि जघान स कथं न विवक्षितः यतो रामममर्षी जितवान् ॥ १२२ ॥ ज० म०

एको द्वाभ्यामिति यदुक्तं तदुत्तरमाह

विराधमित्यादि । धनुर्धराणां श्रेष्ठोऽपि रामः आदौ विजितोऽभिभूतोऽपि सन् पश्चात्तमसां विघ्नमन्तरायं विराधं यदि जघान तदा कथं स विराधो न विवक्षितः न प्रसिद्धः अपि तु विवक्षित एव स राम इत्यन्ये विहन्यतेऽस्मिन्निति विघ्नः अभिधानादाधारे टक् ॥ १२३ ॥ भ०

प्रणेत्यादि । मारीचः प्रणश्यन्नपि पलायनपरोऽपि सन् महामायः कनकमृगरूपधारित्वात् रामहस्तिनः रामो हस्तीव तस्य वाणगोचरं वाणपदवीं अत्येतुं अतिक्रमितुं नाशक्नोत् न शक्तवानिति त्वयैवोक्तं मयेत्यभिदधता मया यदि शक्नोति अतिक्रमितुं न मयार ॥ १२४ ॥ ज० म०

मन्त्रियोगाच्च मारीच इत्यादि यदुक्तं तदुत्तरमाह

प्रणश्यन्नित्यादि । महती माया यस्य स मारीचः प्रणश्यन्नपि पलायमानोऽपि रामहस्तिनो वाणगोचरं वाणपदवीं अत्येतुं अतिक्रमितुं न अशक्नोत् न शक्तोऽभूत् इति त्वयैवोक्तं रामो हस्तीव बलवत्त्वात् एतेन रामस्य श्रेष्ठत्वमस्त्येवेति सूचितम् ॥ १२४ ॥ भ०

अन्येत्यादि । सन्ध्यादेवतां नमतो अन्यासक्तस्य वालिनो यद्वीर्यं सामर्थ्यं तत् ध्रुवमवश्यं त्वं न स्मरसि न चेतयसि कुतः बाहुपीडितः सन् मूर्च्छावान् जातः अतएव न स्मरसि येनैवमुक्तवानसि ॥ १२५ ॥ ज० म०

निजधानान्यसंसक्तमित्यादि यदुक्तं तदुत्तरमाह

अन्येत्यादि । अन्यासक्तस्य वालिनो यद्वीर्यं तत्त्वं ध्रुवं न स्मरसि कीदृशस्य सन्ध्यां नमतो वन्दमानस्य तस्य बाहुपीडितः सन् मूर्च्छावान् एतेन वालिनोऽपि महत्त्वमस्तीति सूचितम् ॥ १२५ ॥ भ०

असहन्बधोपन्नं विमुञ्च बलिविग्रहम् ।
सीतामर्पय नन्तव्ये कोपदण्डात्मभूमिभिः ॥ १३६ ॥

स्फुटपरुषमसह्यमित्यमुच्चैः
सदसि मरुत्तनयेन भाष्यमा
परिजनमभितो विलोक्य दारं
दशवदनः प्रदिदेश वानरस्य ॥ १३७ ॥

इति प्रकीर्णकाः ।

इति भट्टिकाव्येऽशोकवनप्रभञ्जनं नाम नवमः सर्गः ।

निजघानान्यसंसक्तमिति उपसंहरन्नाह

असदित्यादि । यतो बलङ्गोऽपि बलीयान् रामः तस्माद्बलिना रामेण सह विग्रहं युद्धं त्यज कोदृशं बन्धुवधोपन्नं प्रथमतो ज्ञातिविनाशेन विदितमित्यर्थः उपन्नायत इत्युपन्नः इत्युपधेति कः बन्धुवधश्चोपन्नश्चेति सः उपन्नोपक्रममिति नपुंसकलिङ्गता ततः सामानाधिकरण्यादसदिति नपुंसकलिङ्गता नन्तव्ये प्रणाम्ये कोपदण्डात्मभूतिभिः सह सीतामर्पय ॥ १३६ ॥ ज० म०

असदित्यादि । तस्मात् बलिना रामेण सह विग्रहं विरोधं विमुञ्च त्यज कोदृशं असतां बन्धूनां वधश्च उपन्नं प्रथमतो ज्ञातिवधेनावेदितमित्यर्थः उपन्नायते यत इत्युपन्नः अत इति डः परमते उपन्नोपक्रमयोरादिकथने क्लीबत्वं तस्मात् असतां बन्धूनां वधश्च उपन्नः प्रथमतो ज्ञानं यस्मादिति बहुव्रीहिः एतेन रावणश्च बन्धुबधो न भविष्यतीति यत् ज्ञानमासीत् बलिविग्रहेण तदभाव इति सूचितं तस्मात् नन्तव्ये प्रणम्ये रामे कोपादिभिः सीतां समर्पय ॥ १३६ ॥ भ०

स्फुटेत्यादि । इत्थं स्फुटपरुषं उक्तप्रकारेण स्फुटं स्पष्टं परुषं रूक्षं अतएवासह्यं सोढुमशक्यं उच्चैर्महता ध्वनिना सदसि सभायां मरुत्तनयेन भाष्यमाणोऽभिहितः इत्यभित्यनेन वस्तुनः परिसमापितत्वात् तेन वर्त्तमानसामीप्ये इति लट् परिजनमभितः उभयपार्श्वे स्थितान् भृत्यान् विलोक्य वानरस्य दारं प्रदिदेश आदिष्टवान् ॥ १३७ ॥ ज० म०

इति भट्टिकाव्यटीकायां जयमङ्गलायामधिकारकाण्डे चतुर्थः परिच्छेदः ।
काव्यस्य भाहतिमयश्चो नाम नवमः सर्गः ।

स्फुटेत्यादि । स्वयमुक्तप्रकारेण स्फुटं स्पष्टं पदं रूपं अतएवाश्लक्ष्णं उच्चैर्महता ध्वनिना सदसि सभायां मरुत्तनयेन हनूमता भाष्यमाण उक्तः सन् अभित उभयपार्श्वं परिजनं विलोक्य दशवदनो रावणो वानरस्य दाहं प्रदिदेश आदिष्टवान् ॥ १३७ ॥ ४०

इति प्रकीर्णकाः ।

इति सहृदयहरिहरखानवंशसम्भवगौराङ्गमल्लीकात्मज श्रीभरतसेनविरचितायां भट्टिटीकायां सुप्रबोधिन्यां नवमः सर्गः ।

00012871

Digitized with financial assistance from the
Government of Maharashtra
on 18 July, 2018